::श्रीहरिः::

श्रीमन्मथुराधीश्वरचरणाब्जनखचञ्चरीकगोस्वामिवर्यश्रीमद्विट्ठलनाथमहाशयेन
विरचितं

।। प्राभञ्जनः ।।

शुद्धाद्वैतसिद्धान्तमण्डनग्रन्थस्य पूर्वभागेण सहिता तट्टीका
‘पञ्चनदी’-उपाह्वेन विद्वद्रत्नश्रीघनश्यामभट्टात्मजेन शिष्येण च
गट्टूलाला-इति अपरनामकेन भारतमार्तण्डश्रीगोवर्धनशर्मणा

प्रणीता

मारुतशक्तिः

तृतीयं संस्करणम्

प्रकाशक : श्रीवल्लभविद्यापीठ-श्रीविठ्ठलेशप्रभुचरणाश्रम ट्रस्ट,
वैभव को-ओपरेटियटी,
पूना-बेंगलोर रोड, कोल्हापुर,
महाराष्ट्र.४१६००८

सम्पादकमण्डल : धर्मेन्द्र झाला-पद्मिनी झाला
परेश शाह-मनीषा शाह
अनिल भाटिया, जगदीश शेठ

प्रथमसंस्करणम् : वि.सं.१९४३
द्वितीयसंस्करणम् : वि.सं.२०२२
तृतीयसंस्करणम् : वि.सं.२०७६.

प्रति : ३००

निःशुल्कवितरणार्थ

मुद्रक : पूर्वी प्रेस
राजकोट

प्रकाशकीय

स्वसमयावनसुदक्षं मार्तण्डावरकवारकं नौमि।
भट्टं विद्वद्रत्नं मारुतशक्तिप्रणेतारम्॥

सन् पचासके दशकके उत्तरार्धमें हमारे घरमें आदरणीय श्रीहरिशंकर ओंकारजी शास्त्रीजीके आनेपर मेरे दादाजी (पितृचरण गो.श्रीदीक्षितजी महाराज) ने उनके निवासकी सुविधा मेरे रूममें ही निश्चित की. तब दादाजीके पास तो शांकरभाष्यकी भामती और श्रीबालकृष्ण शास्त्रीजीके पास वेदाध्ययन मेरा चल रहा था परन्तु श्रीहरिशंकरजीने साग्रह 'शुद्धाद्वैतमार्तण्ड' नामक ग्रन्थ मुझे तथा अन्य भी मेरे चचेरे भाईओंको पढ़ाना चाहा.

इसी अरसेमें दादाजीने अपना ग्रन्थसंग्रह उनके ग्रन्थोंमें दीमककी सफाई करनेके कारण मेरेपर प्रसन्न हो कर मेरे रूममें रखवा दिया. उन्हें कबाटमें जमानेकी प्रक्रियामें हमारे वृद्धप्रपितामह विद्वद्वरेण्य श्रीविठ्ठलनाथजी(कोटा.राज.), इनकी पौत्रवधूने मेरे दादाजीको किशनगढ़में पुत्रतया गोद लिया था, द्वारा विरचित 'प्राभञ्जन'की एक जीर्ण-शीर्ण प्रति मेरी निगाहमें आयी. तब पूछनेपर श्रीहरिशंकरजीसे इतिहास सुनना मिला कि कैसे काशीवाले श्रीगिरधरजीकृत शुद्धाद्वैतमार्तण्डका खण्डन श्रीसदानन्द नामक संन्यासीने 'सहस्राक्ष'नाम्ना किया और उसके प्रत्युत्तरतया 'प्राभञ्जन' गो.श्रीविठ्ठलनाथजीने लिखा और उसपर 'मारुतशक्ति' नामिका व्याख्या भारतमार्तण्ड श्रीगोवर्धन भट्ट (गट्टुलालाजी मुंबई) ने लिखी.

यह जानकारी मिलनेपर मेरी उत्सुकता तीव्र हो गयी सो मेरे आग्रहवश दादाजीने उसका भी पाठ चलाना चाहा. पुस्तक, परन्तु, इतनी जीर्णशीर्ण हो गयी थी कि पन्ने खोलने-पलटनेकी प्रक्रियामें फटने लगे. सो क्षुब्ध हो कर पाठ बन्द करके पुनर्मुद्रणार्थ संस्कृत

ग्रन्थोंके प्रसिद्ध मुद्रणालय निर्णयसागर प्रेसको कार्य सोंपा गया. वह ‘मक्षिकास्थाने मक्षिका’न्यायेन यथाकञ्चित् पुनः मुद्रित तो हुवा. उसे पढ़ पाना, परन्तु, एक दुष्कर आयास लगता था. इस वर्षसे श्रीगट्टुलालाजीके ग्रन्थोंका पुनःप्रकाशन प्रारम्भ हुवा होनेसे, जिसमें सर्वप्रथम वल्लभाख्यानकी टिप्पणी, सत्सिद्धान्तमार्तण्ड और वेदान्तपंचदशी प्रकाशित हो गये हैं. इसी शृंखलामें इस चौथे ग्रन्थका प्रथम भाग प्रकाशित होने जा रहा है.

इसमें ग्रन्थकारोंका इतिवृत्त आदिकी सम्पादकीय इतिकर्तव्यता पूर्व सम्पादक श्रीगट्टुलालाजीके अन्तेवासी शीघ्रकवि श्रीश्याम शर्माजी द्वारा आद्यप्रस्तावनाके रूपमें लिखी हुयी यथावत् साथ रखी गयी है. विषयानुक्रमणिकाके अलावा उद्धृतवचनानुक्रमणिका उद्धृतग्रन्थसंकेत तथा मूलमात्र शुद्धाद्वैतमार्तण्ड प्रस्तुत संस्करणके सम्पादकमण्डलने सपरिश्रम पाठकोंकी सुविधार्थ परिशिष्टतया योजित किये हैं.

इसे कम्प्युटरमें फीड मांडवी-हालोलके चिरञ्जीवी स्वमार्गसेवादक्ष गोस्वामी श्रीशरद्ने करवाया है. मेरे लिये गौरवास्पद तथा सन्तोषप्रद बात यह भी है कि इसका सम्पादन श्री-श्रीमती धर्मेन्द्र-पद्मिनी झाला, श्री-श्रीमती परेश-मनिषा शाह श्रीअनिल भाटिया तथा श्रीजगदीश शेठ ने परस्पर सहयोग द्वारा अतीव मनोयोग एवं परिश्रम द्वारा पूर्ण किया है. इसी तरह मुद्रणोचित उत्तरदायित्व श्रीप्रवीण डढाणिया तथा श्रीपीयूष गोंधियाने अतीव उत्साह एवं दक्षता के साथ निभाया. महाप्रभु श्रीवल्लभाचार्यकी इन सभीपर असीम कृपाका ही यह अनुभाव निरतिशय हार्दिक अभिनन्दनका विषय है.

श्रीवल्लभविद्यापीठ-श्रीविठ्ठलेशप्रभुचरणाश्रम ट्रस्टके वास्ते

वैशाखकृष्ण तृतीया वि.सं.२०७६
गोस्वामी श्याम मनोहर
तदनुसार सन् २.४.२०१९.

विषयानुक्रमणिका

विषय पृष्ठः

१. आद्यप्रस्तावना... १–११

२. मंगलाचरण... १–१३

३ प्राभञ्जन–मारुतशक्तिसहितं सहस्राक्षप्रस्तावनाखण्डनम्... १४–५४

४. प्राभञ्जन–मारुतशक्तिसहितं सहस्राक्षप्रथमश्लोकखण्डनम्... ५५–१८०

५. प्राभञ्जन–मारुतशक्तिसहितं सहस्राक्षद्वितीयश्लोकखण्डनम्... १८१–२३८

६. प्राभञ्जन–मारुतशक्तिसहितं सहस्राक्षतृतीयश्लोकखण्डनम्... २३९–५१०

७. परिशिष्ट–१. शुद्धाद्वैतमार्तण्डः... ५११–५१८

८. परिशिष्ट–२. द्वितीय संस्करणप्रकाशकीय... ५१९

उद्धृतवचनानुक्रमणिका... ५२०–५८४

उद्धृतग्रन्थसंकेतालिका... ५८५–५९०

प्राभञ्जनकार

श्रीविठ्ठलनाथजी

मारुतशक्तिकार

श्रीगोवर्धनजी

आद्यप्रस्तावना

श्रीकृष्णचरणपरिचरणप्रवणान्तःकरणाः विजयन्ते केचन सज्जनाः सज्जनानाशास्त्रबोधाः. अथ इदं नाविदितं विदुषां वो यत्स्ववर्त्मसंरक्षणं श्रेयस्करम् इति. तदनुरुन्धानैः विविधानवद्यविद्यानिधानैः श्रुतिस्मृतिसमुचितसदाचारदत्तावधानैः स्वयमपि ग्रन्थनिर्माणनिपुणान् दैवीदत्तादिविद्वद्वरान् सानुकम्पं साश्रयदानम् अनुगृह्णद्भिः अधिवसद्भिः सद्भिः परिष्कृतं विविधवनोपवनराजिविराजितपरिसराभिरामं कोटापराख्यं नन्दग्रामं श्रीमथुराधीश्वरचरणकमलयमलसंसेवनसाधितसकलपुरुषार्थसार्थैः वैष्णवविबुधगोपीनाथशास्त्रितोऽपि अवाप्तबहुग्रन्थार्थैः रश्मिनवार्थीप्रभृत्यनेकप्रौढतरग्रन्थग्रथनकेलिकेभ्यो गोस्वामिवंशमौक्तिकेभ्यः श्रीमद्गोपीश्वराख्यमहाराजमहापण्डितेभ्यो अधिगतकतिपयस्वमार्गीयग्रन्थैः गोस्वामिवर्यश्रीवल्लभात्मजैः श्रीविठ्ठलनाथ(कन्हैयालाल)महाराजमहाशयैः देशिकमण्डला खण्डल-मायावादमहान्धकारसंहतिसमुत्सारण- भक्तिमार्गपुण्डरीकमण्डनमार्तण्ड-श्रीवल्लभाचार्यचरणानां मनोजवसैः[१] श्रीमद्विठ्ठलनाथप्रभुचरणैः विरचितस्य विद्वन्मण्डनस्य खण्डनाभासं वाराणसीवासिगोस्वामिवर्यश्रीगिरिधराख्यमहाराजविरचितस्य शुद्धाद्वैतमार्तण्डस्य खण्डनाभासं च ‘सहस्राक्ष’नामानं ग्रन्थं तत्प्रसिद्धिं कुर्वाणेन भट्टिवंशजेन मथुरादासवर्मणा चिखण्डयिषया प्रेषितम्.

समासाद्य सहस्राक्रेक्षाक्षेपभञ्जन‘प्राभञ्जन’नामा ग्रन्थो ग्रन्थयाञ्चक्रे. समदिदृक्षि[२] च संस्कृत्य मुद्रितो मोहमय्यां प्राहायि च तदर्थं समर्यादं[३] पण्डितचक्रचक्रवर्तिनां द्वादशदर्शनीदारद[४]पारदर्शिनां श्रीमद्बालमुकुन्दपादारविन्दमकरन्दबिन्दुसंदोह-मिलिन्दायमानमानसानां निगमागमपयःपयोधिमथनमन्दरायमाण-गीर्वाणवाणीविलासानांप्रकृतिजन्यसौजन्यादूष्यवैदूष्य-सर्वतन्त्र- प्रवचनस्वातन्त्र्याद्यनेकानवद्यहृद्यप्रगुणगुणगणार्णवाविर्भूत-यशस्तोमसोमसमुदय विकासितसितसुहृदयहृदयकुवलयवलयानां ‘पञ्चनदी’-उपनामकानां श्रीघनश्यामभट्टानाम्. तैस्तु मनोजवाय असम्भवदवद्यलवाय वैतण्डिकवेतण्डमण्डलगण्डकण्डूतिखण्ड-

---

[१] पितृसंनिभैः [२] संपूर्वाद् दृशेः सन्नन्तात् चिण् [३] समीपम् [४] समुद्रः

नाकुण्ठोत्कण्ठकण्ठीरवाय स्वनिदेशवशंवदाय वदावदाय च सभासु भासुरासु भाजनैः अनुकम्पायाः श्रीहरेः सभाजनैः प्रेमपात्राणां छात्राणां गोवर्धनेन अन्वर्थितनामधेयाय स्वतनुजनुषे समार्पि स ग्रन्थः आदेशि च यद् अस्य ग्रन्थस्य बहुशोधनं विधाय बहुशो धनव्ययेनापि मुद्रय एनं कस्यचिद् भागस्य च स्वकृतया टीकया तिलकितम् इति. परमपूज्यपितृपादाज्ञां मालतीमालामिव शिरसि निधाय प्रारम्भितमाम्.

अथ प्रथमस्तु तेन प्रस्तुतम् आसीद् यत् खण्डनं तदपि न अतिस्वल्पीयसा अनेहसा अनल्पकल्पं समाप्तकल्पम् अभूद् अभूतपूर्वम्. तदेव प्राभञ्जनस्य अस्य टीकारूपतया पर्यणामि. अवशिष्टा विशिष्टा युक्तिमुक्तावली तत्र समग्रा हि समग्राहि ‘अयमर्थः’, ‘अत्रायं भावः’, ‘इदमत्र ज्ञेयम्,’ ‘इदन्तु अधिकम् अनुसंधेयम्’, ‘अत्र अयं संदर्भार्थः, ‘अत्र अयं सारो अवगन्तव्यः’, ‘अत्र अयं निष्कर्षः’ इत्यादि संदर्भैः “श्रेयांसि बहुविघ्नानि” इति अभियुक्तोक्तिः न मृषा उद्येति अर्थशून्येन पैशुन्येन अन्तरायितः कंचिद् अवसरं ग्रन्थव्यवसायः. यतः सति एकस्मिन्नपि बाधके साधकसहस्रस्यापि अकिंचित्करत्वात् कार्यमात्रं प्रति प्रतिबन्धकाभावस्य हेतुत्वम्. ततो नीहारतुषारशीकरासारवर्षिणी वेला भास्करकरनिकरेणेव क्षिप्रं प्रत्यक्षेपि. प्रत्यक्षेपि साधीयसि अर्थे सा धीयते पुरोभागिना युक्तिदुरुक्तिः.

अथवा अलम् अतिप्रसक्तेन. यत्तु केचन व्यतिविद्रते यथा मुद्रयित्वा प्रसिद्धिं प्रापिते सहस्राक्षग्रन्थे जीवति च ग्रन्थकारे न केनचित् सो अयम् अखण्डि अपितु शुद्धाद्वैतसिद्धान्तपरिपन्थिनि परलोकपान्थे च ग्रन्थकर्तरि अस्थाने इयम् आविष्क्रियते खण्डनाहोपुरुषिका इति तैरपि सूक्ष्मम् ईक्षणीयं विद्वन्मण्डनशुद्धाद्वैतमार्तण्डप्रभृतिग्रन्थकारसांनिध्यं क्व सहस्राक्षग्रन्थकारस्य आसीदिति समानयोगक्षेमम् अपर्यनुयोज्यम्. किञ्च यद्ग्रन्थमुद्रणात् प्राक् समवस्थितः ग्रन्थकारः इति समभिव्यज्यते भावप्रधाने तत्प्रस्तावनान्तिमे पद्ये “यशोदेहेन अस्मिन् जगति सततं सुस्थितिजुषः” इत्युक्त्या प्राज्ञत्वप्रकर्षो यदुपज्ञः प्रस्तावनाप्रणेतुः इति न अन्यथासम्भावना संख्यावतां समाजं समाजिगमिषति. अन्यच्च सोऽयं सहस्राक्षः तेन ग्रन्थकारेण द्वाविंशत्युत्तरैकोनशत-

मितिविक्रमसंवत्सरे समपारीति प्रतीयते सहस्त्राक्षान्त्येन पद्येन. तथाहि *"सहस्राक्षाभिधो ग्रन्थः संपूर्णः कार्तिकेऽभवत् वर्षे नेत्रा^{२}क्षि^{२}नन्दे^{९}न्दौ^{१} विक्रमस्य महौजसः"*. किञ्च सोऽयं यस्याः स्मरणस्तम्भत्वेन सम्भावितः सोऽपि दीर्घनिद्राम् अशायिष्ट पञ्चविंशत्युत्तरेकोनविंशशतमितविक्रमादित्यवत्सरे तत्स्फुटं प्रस्तावनायां *"शर^{५}नयन^{२}नन्द^{९}निशाकर^{१}प्रमितविक्रमवर्षान्तर्गतोर्जमासवलक्षपक्ष-चतुर्दशी-समासादित-निलिंपनिलयवासायाः कोऽपि स्मरणस्तम्भइव अयम्"* इत्याद्युक्त्या.

किञ्च अयं ग्रन्थकारोऽपि तस्मिन्नेव वत्सरे वैशाखे मासि वदि स्मरतिथौ शिवपदं प्रापत्. ग्रन्थमुद्रणसमयस्तु मुखपृष्ठलिखितः शकाब्द १७९२मितो अस्ति. अथ इतः आपामरं युज्यते अवगन्तुं यद् ग्रन्थम् अङ्कयित्वा ग्रन्थकारेण न प्रेषितो अस्ति चिखण्डयिषया अपितु मुद्रितोऽपि ग्रन्थः तत्प्रसिद्धिकर्त्रा वर्षं यावद् न प्रत्तः. भूयो-भूयो अनुयुक्तः च अभाणीद् न अद्यापि. अथ एवं वत्सरान्ते प्राप्ते सहस्त्राक्षग्रन्थकारस्य प्रयाणं पारलौकिकम् आकर्ण्य मन्थरोत्साहेन मन्दं-मन्दं व्यरचि. प्राभञ्जनस्तु वसुगगननागेन्दु १८०८ मिते शालिवाहनशकएव मुद्रितः प्रसिद्धिं च प्रापितः. अतस्ते दत्तोत्तराः सुहृदया दयामयाशयाः. उपेक्षामहे च तान् असूयापिशाचिकावेशविवशान् निन्दातुन्दिलान् मुखरान् खलान्. अथ इयं शङ्का समुदेति कुतो न मारुतशक्तिः प्राभञ्जनस्य उत्तरभागे प्रणीता? तदुत्तरन्तु तेनैव ग्रन्थकारेण दत्तं भूतानुवादेन उच्यते. उत्तरार्धं किमिति न कृतमिति मुहुर्मुहुः अनुयुक्तोऽपि स्वहृदयगुहावरुद्धं खेदं बहिः अप्रकटयन् सातिनिर्बन्धं तदन्तेवासिभिः अस्माभिः स्वहृद्यप्रकाशनाय उक्तः. तर्हि शृणुत किञ्चिदेव सविस्तरम् इदं मम खेदोद्गारालपनम् इति सनिःश्वासम् उक्त्वा इमान् पञ्चत्रिंशतं श्लोकान् हेलया तदैव अवादीत्. त इमे श्लोकाः अक्षरशो अनूद्यन्तेः :

कालं विशालमपि शक्त्यधिकं स्ववित्तं
चित्तं शरैरिव परैर् वचनैश्च विद्धम्॥

देहश्रमं च परमं परियोज्य यावत्
किञ्चिद् यथामति [१]कथार्थम् अथान्ववर्णि ॥१॥
लोकेत तावदपि भावविबोधपूर्व-
मप्येकवारम् अखिलं खलु यः प्रहृष्यन् ॥
को निश्चितो निजजनस्वमताभिमन्ता
संतापहृद् वदत संप्रति सोऽस्मदीयः[२] ॥२॥
विद्या वरेषु बलिना कलिना विलीना
हीनादरेषु हरिभक्तिविधौ नवीना[३] ॥
प्रायेण पद्धतिरुदेति मुदेऽतिगानां[४]
लेखास्ततो गतजनेषु[५] वनेषु खेदाः[६] ॥३॥
ये वा मतान्तरनितान्तरता अतान्त-
विद्यावदातवपुषो विबुधा विभिन्नाः ॥
स्वैः-स्वैः प्रसिद्धपुरुषैः विहितान् विहाय
द्रक्ष्यन्ति हन्त किमु तत्त्वधिये[७] परोक्तिम् ॥४॥
उच्छूनमत्सरनमत्सरसावधाना[८]
नानागमा[९] अपि धृतात्ममताभिमानाः ॥
विद्वेषरोषकलुषेण विलोचनेन
द्रक्ष्यन्ति केचन चिखण्डिषया परेऽपि ॥५॥
प्रायः परेष्वपि बलेन कलेः समल्पाः[१०]
कल्पा जनेन सधनेन धनाशनाद्यैः ॥
न प्रेरिता निरुपधिस्वमताभिमानात्
कालेऽत्र ये कुशलशालिन आलिखेयुः ॥६॥
यत्साध्वसाध्वपि विसाध्वसमात्मबुद्ध्या
प्रोक्तं मया रस[११]मयात् समयात्समग्रम् ॥
बुद्ध्वा बुधा इह लिखन्तु सुखन्तु दोषान्

१.कोटिक्रमाय २.अस्मत्संप्रदायवर्ती ३.इदं पद्धतिविशेषणम् ४.अतिक्रामताम् ५.निर्जनेषु ६.अरण्यरुदितप्रायाः ७.तत्वज्ञानाय ८.अभिवृद्धमत्सरेण नमद्गुणीभूतं सरसवस्तून्यपि अवधानं येषां ते ९.अनेकशास्त्रज्ञः १०.अत्यल्पाः ११.रसमयमाचारं संविदं चावलंब्य

वादोऽपि मार्मिकबुधैः सह पुण्यलभ्यः ॥७॥
अग्रे न शक्त इति वक्ति विरक्तिवाचं
पण्याङ्गना[1] भवितुमिच्छति भूरिपुण्या ॥
वृद्धेति बद्धकुटिलभ्रु[2]वलद् दृगास्यम्
उल्लास्यहास्यकृदपास्यति मां जनोऽन्यः ॥८॥
आस्तामियं परकथा न तथा व्यथायै
तोदः परान् मनसि मोदमहोदयार्थः ॥
अङ्गप्रभङ्ग इह संगररङ्गभूमौ
भूमानमानयति मानभृतो बलानाम्[3] ॥९॥
या स्वैरवैरपरमैर[4]शमैरवज्ञा
स्वैरेव दैववशतो निशितोक्तिरक्तैः ॥
सा हन्ति हन्त तु निरन्तरमन्तरं तत्
प्रोत्साहमत्युपरमं[5] परमं तनोति ॥१०॥
वर्यं स्वकार्यमिह किं किमकार्यमार्यैः
सत्कार्यधुर्यपदगा अविचार्य चैवम् ॥
मात्सर्यमेकमुपधार्य निवार्य धैर्य-
गाम्भीर्यवृत्तिमपकुर्वत आत्मपक्षम् ॥११॥
शक्त्याखिलागमगतिः खलु पण्डितः[6] स्यात्
साभ्यासमेकमपि शास्त्रमवाप्य शास्त्री ॥
श्लोकार्थमात्रमतिरेव न वैदुषी स्यात्
प्रायोऽद्य नैव सुलभा किल भाति सापि[7] ॥१२॥
शास्त्रश्रमं परिविधाय निधाय चित्तं
स्वाचार्यवर्यचरणेप्यवधाय कृत्ये ॥
सन्धाय [8]सत्पतिरतिं स्वयमेव सेतु-

१.''वृद्धा वेश्या तपस्विनी''(महासुभाषितसंग्रह ३४५८)इति न्यायेन २.वलद् दृगास्यम् इति भिन्नं पदम् ३.प्रत्युत बलबाहुल्यं मानभृत इति द्वितीयान्तम् आनयतिक्रियायाः कर्म ४.प्रसाद्यमानैरपि अप्रसन्नैः ५.लेखप्रोत्साहबुद्धेः विरामम् ६.मध्यमणिन्यायेन उभयत्र संबन्धः ७.श्लोकलापनशक्तिरपि ८.भगवान्

बन्धाय साधु सकलैर्यतनीयमेव॥१३॥
शक्येत न स्वयमिदं यदि शुद्धचित्तं
वित्तं प्रयुज्य च परैरपि कारणीयम्॥
चेद् दुस्त्यजोऽर्थ इह साधुगिरोपकार्यः
सोत्तेजनं निजजनः स्वयमेव कुर्वन्॥१४॥
वाचोव्ययेऽपि यदि भूरिपरिश्रमः स्याद्
वीक्ष्य स्वतः स्वजनमुद्यतमार्यकार्ये॥
औदास्यमात्रमवलम्ब्य सदास्यमुद्रा[1]
कार्या दया परतयात्र परापकारे॥१५॥
कुर्वन्ति न स्वयममीः कतिचित्कृतेर्ष्या
नान्यैः सहन्त इह हन्त विधीयमानम्॥
निन्दन्ति सत्सरणिमत्सरिणः परार्थान्
उन्मूलयन्ति वचसा बहुमान्यवाचः[2]॥१६॥
लब्ध्वा न शास्त्रमधियन्ति धियं विशालां
तां योजयन्ति कुपथेषु नुताः कुभक्तैः॥
केचित्कथंचिदपि शास्त्रलवानवाप्य
स्वाचार्यवाचमतिमुच्य[3] परं चरन्ति॥१७॥
आचार्यवर्यविभुपादगिरः समग्राद्
[4]दृक्कर्णशोधनकृते किल वर्णशोऽपि॥
पीताः सकृज्जनुषि यैरधुना सुधन्याः
स्युर्वैष्णवेषु कति तान्दिशताभिधातः॥१८॥
अन्यस्तनोति न वयं निजकर्म कुर्म
एतत्तु नोचितमतो न परः करोतु॥
एवं प्रपञ्चपदसंचयमञ्चयन्तः
साधून्मृदूनधमयन्ति जनेषु वाग्भिः॥१९॥

---

[1] सदा मुखमुद्रणं तूष्णींभाव इति यावत् [2] बहुभिर्विश्रब्धैर्मान्या वाक् येषाम्
[3] उल्लंघ्य [4] दृशोः करणयोः च शुद्ध्यै

दोषैकसेचनविवेचनदक्षवाचो
ग्रामेऽत्र केचन सदैव मदीयनिन्दाम्॥
प्रत्यालयं प्रतिजनं कृतिविघ्न[1]निघ्ना
आवर्तयन्त्यविदिताः किमु वैष्णवाग्र्याः॥२०॥
यैर्भ्रामितः स कितवामितवाक्प्रपञ्चैः
पूर्वाटवीष्वनुदकासु तपर्तुपूर्त्तौ॥
क्रूरै[2]र्भ्रमन्सममदृ[3]क्स्वजनैर्वियुक्तः
त्रातोऽस्मि दासकरुणेन गदाधरेण॥२१॥
श्रान्तं यथामतिबलं समधीत्य मार्गे
[4]तत्पारितोषिकमिदं बिरुदं मयाप्तम्॥
अत्रत्य भावकचये 'धृतराष्ट्र'शब्दः
किं वर्णितैर्[5] उपकृतैरितरैः कृतैस्तैः॥२२॥
आजीवनानि च धनानि जनानुरागात्
सौख्यानि कीर्तिमपि हन्त हठैर्हरन्तः॥
जीवन्तु संततमनन्तपदैकभक्तेः
हेतुं विरागमिह मन्मनसेऽर्पयन्तः॥२३॥
आचार्यवाच्यपि न चेद् यतते कथा का
[6]श्रीपुरुषोत्तममुखोक्तिसुधावधाने॥
भट्टस्य मे तु रणितं मशकोपमस्य
दूरं क्षिपेच्छ्रवणतो नहि वैष्णवः कः॥२४॥
लेखे स्वतन्त्र इह मेऽस्ति समाप्तकल्पो
भागः परोप्युपहतो वहतो विरागम्॥
प्रायोऽवकाशवसुचित्तविकाशहैन्याद्
व्याख्यात्मना परिणतिं न गतस्ततः किम्॥२५॥
श्रीवल्लभप्रभुपदाब्जरतिर् मुकुन्द-

१.ग्रन्थनिर्माणविघ्नतत्परः २.स्वजनासंनिधानाद् अगत्या क्रूरैः समं भ्रमन् ३.अन्धः ४.यत् श्रान्तं तस्य श्रमस्य ५.उपकारैः ६.एतन्नामा नानाग्रन्थकारः तदादीनाम्

सेवाकृतिः श्रुतिमतिर्[१] हरिवक्त्रवाचाम्[२]॥
अर्थादृतिर् हृदि धृतिः[३] प्रतिजन्म मे स्यात्
चित्रैश्चिरादिह भवे भ्रमतः स्वकृत्यैः॥२६॥
अष्टाक्षरस्मरणमेव गुरोः प्रसादात्
चित्ते चिरं शरणभारपुरःसरं चेत्॥
भव्याय किं न भविता भुवि तावदेव
सासूयमत्सर[४]करैरपरैः श्रमैः[५] किम्॥२७॥
ये[६] नाम केचिदिति यो भवभूतिनोक्तो
न्यायेन तेन लिखितं व्यसनेन किञ्चित्॥
कर्तास्म्यहो उपरतः पुरतः स्वभाव-
कृत्यं प्रसह्य हृदि मां[७]प्रकृतिर्नियुङ्क्ते॥२८॥
चेन्मण्डने[८]ऽपि विदुषां च सुवर्णसूत्रे
व्याख्या मनोऽभिलषिता कृपया हरेः स्यात्॥
वक्ष्ये मया यदिह[९] वाच्यतयोक्तमग्रे
प्राभञ्जनोपकरणं च समासतोऽस्याम्॥२९॥
दूरं निजोरुयुगलाद् विरचय्य वासो
दृश्येत नग्न इह दूरयितेति जाने॥

१.गीतादीनां सुबोधिन्यां च अर्थेषु आदरः २.वैदिकज्ञानम् ३.तासामेव हृदये धारणम् ४.असूयावतां मत्सरोत्पादकैः ५.ग्रन्थनिर्माणादिरूपैः ६.“ये नाम केचिदिह नः प्रथयन्त्यवज्ञां जानन्तु(जानन्ति) ते किमपि तान् प्रति नैष यत्नः, उत्पत्स्यतेऽस्ति(ऽस्ति पाठ नास्ति) मम (तु) कोपि समानधर्मा कालो ह्ययं निरवधिर्विपुला च पृथ्वी” (भवभूति मालतिमाधवम् १।८) ७.“प्रकृतिस्त्वां नियोक्ष्यति” (भग.गीता १८।५९) इति भगवद्वाक्यात्. ८.विद्वन्मण्डनं श्रीविट्ठलनाथप्रभुकृतो वादग्रन्थः सुवर्णसूत्रं च तस्यैव टीका श्रीपुरुषोत्तममहाशयैः कृता ९.मारुतशक्तौ इदम् अग्रे वक्ष्यामि इदम् उत्तरार्धे वक्ष्यते इत्यादिकथनेन मया यद् अग्रे वाच्यतया प्रतिज्ञातं तत् तस्यां टीकायां वक्ष्ये प्राभञ्जनोपयुक्तमपि तत्रैव प्रसङ्गात् किञ्चिद् वक्ष्ये

निर्गच्छदच्छसुहां[1] पुरतः प्रतप्ताद्
चित्ताद् बहिः प्रलपितं क्षणविश्रमाय॥३०॥
वाचाटितेन[2] कुटिलैः परिभाव्य मूर्त-
दुर्दैववद्भि बहुधैव समर्दयद्भिः॥
अस्मन्मतानुगतलोकविशेषवार्ता
स्वल्पा मयाकथि नमः शिरसा महद्भ्यः॥३१॥
गोस्वामिवंशतिलकः किल कश्मलाना-
हर्त्तोद्यतो निजमतोदयतोषहेतोः॥
गोवर्धनोस्ति गिरिभृत्पदपङ्कजालि-
र्विद्याविलास्यथ विभुः सदयो मयि स्वे॥३२॥
श्रीदीक्षितान्वयविभूषणमार्यकार्यं
कुर्वन्त्स्वयं प्रमदितैश्च विधापयन्त्स्वैः॥
सेवास्वधर्मशुचिशास्त्रनिधिः स्वमार्गोद्धर्ता
विभाति विभुविठ्ठलनाथनामा॥३३॥
मादृग्जनेऽपि सदयाभ्युदयाः स्वधर्म-
शर्मस्पृहाः श्रमवहा हि महानुभावाः॥
अन्येऽपि सन्ति विलसन्तु यथोपकारी
श्रीदेवकीसुत[3]सुहृद्धृतिधर्मधुर्यः॥३४॥
पुनरमृतघनैर्यैर्दग्धमाशुप्ररोहेद्
अघविघटनवज्रा दासवर्गे दयार्द्राः॥
ददतु सुभगसिद्धीरत्र चामुत्र सर्वाः
सततमथ कटाक्षाः श्रीमुकुन्दस्य ते मे॥३५॥

मुद्रालयमनुष्याणां विशेषतः प्रमादात् परिशोधे अस्माभिः नियुक्तानामपि

---

[1] विमलाशयानां पुरः प्रतप्तात् चित्ताद् बहिर्निर्गच्छत्प्रतापः क्षणं विश्रांतये भवति [2] मूर्तदुर्दैवेनैव अत्यन्तं पीडयद्भिः वाचाटितेन मया लोकविशेषाणां वार्ता अत्र उक्ता नतु सर्वः तादृशः इति विशेषपदं तदेव अभिप्रेत्य आह 'नमः'इति [3] देवकीनंदनाख्यः सुहृत्

दृष्टिप्रमादात् च अत्र ग्रन्थे बहूनि अशुद्धानि सन्ति आपतितानि यानि प्रेक्षकैः ग्रन्थकारप्रमादतयैव संभाव्येरन् तादृशानि यथा पृ.९६ पं. २४ "व्यवस्थातो नाना" (वैशे.सू. ३।२।२०) इति काणादसूत्रानुवादे "व्याख्यातो नाना" इति आपतितं तानि गुणैकग्राहिभिः बुधैः परिशोध्य अनुग्राह्यो अयं ग्रन्थः. एतदर्थमेव ग्रन्थान्ते ग्रन्थकृता तेन अमुना श्लोकद्वयेन अभ्यर्थ्यन्ते भवादृशा अकृशानुभावा विबुधाः.

वेदानुयायिविदुषः परभक्तिनिष्ठान्
  विज्ञापयामि चरणौ परिगृह्य नम्रः ॥
उद्यद्दयागुणदृशोन्यपरिश्रमज्ञाः
  अस्मिन्प्रमादशतकानि मम क्षमध्वम् ॥१॥
अन्धोऽस्म्यहं निजकरेण न लेखशक्तः
  तल्लेखितं निखिलमेव करैः परेषाम् ॥
भ्रान्त्यादयो जगति मानुषबुद्धिधर्माः
  सर्वांशतो न परिहर्तुमिमे च शक्याः ॥२॥

अयं मारुतशक्तिग्रन्थनिर्माता 'गट्टूलाले'ति नाम्ना प्रसिद्धः तैलङ्गवेल्लनाटीज्ञातीयः पञ्चनद्युपाह्वो गोवर्धनशर्मा विक्रमार्कशकस्य विंशशतकस्य प्रथमवर्षे लब्धजन्मा सौराष्ट्रदेशे 'गिरिनार' इति प्रसिद्धस्य रैवतकपर्वतस्योपत्यकावर्तिनि (जुनागढ) जीर्णदुर्गपुरे श्रीमद्वल्लभाचार्यवंश्य-गोस्वामिश्रीव्रजवल्लभमहाराजस्य स्वमातामहस्य गृहे वृद्धिं गतो गर्भाष्टमे वर्षे वैशाखवलक्षपक्षे पित्रा उपनीय उपदिष्टसावित्रीकः स्वमातामहाद् अवाप्तसंप्रदायदीक्षः स्वजन्मतो नवमे (१९०९) वर्षे शीतलाख्यरोगेण हृतनयनद्वयः स्वपितुः परिश्रमादेव अधीतवेद-तदङ्ग-षड्दर्शनादिको दशमे (१९१०) मुम्बापुरे निवासम् इच्छता स्वतातेन सह आगत्य इह पुरे कृतसद्मा पद्मापतिदासो निजसदने स्ववसुव्ययेन स्थापितविद्यालक्ष्मीपाठशालो बहून् अन्तेवासिनो अध्यापितवान् ग्रन्थान् च निर्मितवान्. अद्यापि स्वयं स्थापितायां विद्यालक्ष्मीपाठशालायां स्वतः परतश्च छात्रान् पात्राणि विद्यादानस्य अध्यापयमानः स्वमातामहदत्तं श्रीप्रभुरणात्मजश्रीगि-

रिधरसेवितं श्रीबालमुकुन्दाख्यं भगवत्स्वरूपं तदिच्छोपलब्धैः उपचारैः सेवमानो अत्यल्पविभवोऽपि यथोपपत्तिप्रायसंप्रदाय आवश्यकग्रन्थान् निर्मिमाणो दैवोपसादितम् अन्नं देवपित्र्यतिथ्यादिभ्यो यथासंभवं विभज्य शेषम् उपभुञ्जानः **''संतुष्टो यर्हि वर्तेत ब्राह्मणो येन केनचित्''** (भाग.पुरा.१०।४९।३१) इत्यादिशास्त्रम् अनुसृत्य आस्ते. अद्यापि तत्सदनं ग्रहणधारणपटुभिः वटुभिः प्रौढैः च साहित्यव्याकरणन्यायवेदान्तादिशास्त्रार्थकोलाहलेन मुखरीक्रियते.

अथ मारुतशक्तिग्रन्थकारस्य प्रस्तावनाप्रणयने अनवकाशात् तदनुज्ञावशाद् एतां प्रस्तावनां भावेन अयम् अचीक्लृपद् विनिवेदयति च चराचरोदञ्चनोपचयापचयचातुरीचणस्य सकलविद्यास्थानसंपदुपलम्भिनो जगदीश्वरस्य सच्चिदानन्दस्य श्रीहरेः चररणारविन्दयोः प्रणतिततिपुरःसरं प्रस्वावनापुष्पाञ्जलिम् इमं जामनगरनिवासी गिरिनारायणज्ञातीयभट्टावटङ्कवालजीतनुजनुः—

शीघ्रकविः शास्त्री श्यामशर्मा.

* * *



॥ श्रीकृष्णाय नमः ॥

॥ श्रीगोपीजनवल्लभाय नमः ॥

॥ श्रीमन्मथुरेशो जयति ॥

॥ प्राभञ्जनः ॥

(सहस्राक्षखण्डनपरः)

मारुतशक्तिव्याख्यासहितः

(१)सहस्राक्षः

[श्रीमदुमारमण-चरण-कोकनदेषु विलसन्तु सर्वदा ॥
चेतस्चञ्चरीकास्सज्जनानामनवरतानन्दभरपूर्णाः ॥]

(२)प्राभञ्जनः

वृन्दारण्यनिकुञ्जमञ्जुभवने देदीप्यमानं सदा
भक्त्यास्वाद्यलसद्रसैकसदनं सेव्यं सदा सज्जनैः ॥
वेदान्तैकविचारवेद्यममलं गोपीजनानन्दकृत्
भक्तानां भयभञ्जनं भयहरं भव्यं महो भावये ॥१॥

(३)मारुतशक्तिः

मारुतशक्तिव्याख्या

॥ श्रीमदाचार्यश्रीविट्ठलेश्वरचरणकमलेभ्यो नमः ॥

वन्दे श्रीसुखवृद्धये धृततनुं स्वैकाश्रितानाममुं
तीव्रासार-घनोद्यमोद्धत-सहस्राक्षस्य भिन्दन् मदम् ॥
दासं स्वं कृपया करेण मृदुना गोवर्धनं प्रोद्धरन्
हृत्वार्त्तिं स निजव्रजं सुखनिधिं यो लीलयैव व्यधात् ॥१॥
अथो(ॐ)न्तत्-सद्-धाम-ध्रुवमधुरलीलावलिपरः
परानन्दाकारो भुवि करुणयाऽऽविष्कृततनुः ॥
गदां विघ्नान् भेत्तुं तिमिरमपहर्त्तुं जनहृदां

दधच्चक्रं सोऽस्मानवतु मथुराऽधीश्वरहरिः ॥२॥
शुभा विद्यासंपद् व्रजपसुतभक्तिः परपदं
स्वतः संसिद्धचेद् यन्नखशशिकरव्याप्तवपुषाम् ॥
तदास्तां मस्ते मे सकलकलुषोन्मोषि रुचिरं
चिरं स्वाचार्याणां चरणमरुणं भूरिकरुणम् ॥३॥
सदालिसेवितौ वन्दे पराऽऽगमहितौ मृदू ॥
अरविन्दरुचां चोरौ चरणौ विठ्ठलेशितुः ॥४॥
श्रीमद्बालमुकुन्दसुन्दरवपुःस्पर्शेन सानन्दतां
नीतो नित्यमहं महं च महतामर्हं जडोऽप्यापितः ॥
यैर्मन्त्रानुपदिश्य तान्हरिरतेर्दाने स्वतन्त्रान्तसदा
गोस्वामिव्रजवल्लभाभिधगुरून् मातामहान्स्वान् भजे ॥५॥
श्रीमच्चक्रधराऽऽस्यचन्दिररुचां चञ्चच्चकोराश्चिरा-
द्दुर्वादोन्नतगर्वपर्वतपविप्रायप्रचण्डोक्तयः ॥
श्रीमद्विठ्ठलनाथनामविभवो गोस्वामिवर्याः सदा
जीवासुः कुविदां विदारणकृते प्राभञ्जनो यैः कृतः ॥६॥
नृणां ये व्यामोहं मथितमतयो हन्त यतयो
वहन्ते वाग्जालैर्जगति कलिकालैधितबलैः ॥
समस्ताः प्रोदस्तास्त इह सहसा तैर्विभुवरैर्वयं
कुर्मस्तेषां वचसि पुनराहोपुरुषिकाम् ॥७॥
सत्पक्षपातिनो हंसा नूनं नालीकवल्लभाः ॥
गुणं गृह्णीत मा दोषं नीरक्षीरविवेकिनः ॥८॥
मार्त्तण्डेक्षणसंकटां घनघटां क्षोदैः क्षिपन्ती क्षणात्
निघ्नानाप्यशनिं सहस्रनयनं निर्गर्वयन्ती स्वतः ॥
पुष्णन्ती हरिभावमात्मजमसावुच्छ्वासयन्ती जनान्
जीयान्मारुतशक्तिराशुगतिदा संजीवयन्ती जगत् ॥९॥

अथ श्रीपुरुषोत्तमवदनरूपश्रीमदाचार्यप्रकटिते वेदगीतासूत्रश्रीभागवतादिसिद्धे ब्रह्मवादसिद्धान्ते दोषोद्भावाभिलाषिणा केनचिद् द्वेषविशेषकषायकलुषम-

तिना वेषमात्रयतिना अधुना निबद्धं ‘सहस्राक्ष’नामकं ग्रन्थं चिखण्डयिषवो गोस्वामिश्रीविठ्ठलनाथचरणाः प्रारिप्सितग्रन्थस्य निष्प्रत्यूहपरिपूर्तिप्रचारादिफलकं शिष्टाचारानुमितश्रुतिबोधितकर्त्तव्यताकं श्रीपुरुषोत्तमध्यानलक्षणं मङ्गलम् आचरन्ति **वृन्दारण्य** इत्यादिना. **महस्** तेजः पुरुषोत्तमरूपं **भावये** ध्यायामि इति सम्बन्धः. “**अथ यदतः परो दिवो ज्योतिर्दीप्यते**” (छान्दो.उप.३।१३।७), “**भारूपः सत्यसंकल्पः**” (छान्दो.उप.३।१४।२), “**परं ज्योतिरुपसम्पद्य**” (छान्दो.उप.८।३।४), “**येन स्वरोचिषा विश्वं रोचितं रोचयाम्यहम्**” (भाग.पुरा.२।५।११), “**ज्योतिश्चरणाभिधानाद्**” (ब्र.सू.१।१।२४) इत्यादिश्रुतिस्मृतिन्यायेभ्यः परस्य महोरूपत्वं स्पष्टम्. एतेन “**प्रकाशाश्रयवद्वा तेजस्त्वाद्**” (ब्र.सू.३।२।२८) इत्यधिकरणसिद्धस्वधर्माभेदोऽपि दर्शितो ज्ञेयः. मह्यते इति महः, “**मह पूजायां**” (पाणि.सू.३।१।५५) असुन्, तेन सर्वोत्तमत्वं बोधितम्. “**पुरुषाद् न परं किंचित् सा काष्ठा सा परा गतिः**” (कठोप.१।३।११) इति कठश्रुतेः. “**अक्षरात् परतः परः**” (मुण्ड.उप.२।१।२) इति मुण्डकश्रुतेः. “**मत्तः परतरं न अन्यद्**” (भग.गीता ७।७) इत्यादिस्मृतिभ्यः. “**परमतः...**” (ब्र.सू.३।२।३१) इति न्यायात् च. **भावना** ध्यानं “**नच अभावयतः शान्तिः अशान्तस्य कुतः सुखम्**” (भग.गीता २।६६) इति परमानन्दलाभार्थं तस्य आवश्यकत्वम्. परमानन्दप्राप्तिरूपफलस्य कर्तृगामित्वविवक्षणाद् आत्मनेपदम्. कीदृशं महः? इति आकाङ्क्षायां लौकिकतेजस्तो व्यवच्छेत्तुम् आहुः **वृन्दा...** इत्यादि. “**यत्र ‘वृन्दावनं’ नाम वनं कामदुघैः द्रुमैः मनोरमनिकुञ्जाढ्यं सर्वर्त्तुसुखसंयुतम्**” इति वक्ष्यमाणबृहद्वामनादिवाक्येभ्यो वृन्दावनसंबन्धिनो ये निकुञ्जाः तैः मञ्जुनि मनोरमे भवने स्वधामनि तद्रूपे वा मञ्जुभवने सदा देदीप्यमानं अतिशयेन प्रकाशमानम्. दीप्यतेः यङि द्वित्त्वे हलादिशेषे पूर्वखण्डगुणे च शानच्. “**न यत्र सूर्यो भाति न चन्द्रतारकं न इमाः विद्युतो भान्ति कुतो अयम् अग्निः तमेव भान्तम् अनुभाति सर्वं तस्य भासा सर्वम् इदं विभाति**” (मुण्ड.उप.२।२।१०) इति मुण्डकश्रुतेः. कठवल्लीषुतु ‘न तत्र’ इति पाठः. स्वधामनि स्थितिस्तु यत्र एतत् “**पदम् अवभाति भूरि**” (ऋक्.संहि.२।२।२४।६) “**यो वेद निहितं गुहायां परमे व्योमन्**”

(तैत्ति.उप.१।१) “**तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः**” (अथर्ववेद ७।२६।७) “**सो अध्वनः पारम् आप्नोति तद् विष्णोः परमं पदम्.**” (कठोप.१।३।९) “**आविस्संनिहितं गुहाचरं नाम महत्पदम् अत्र एतत् समर्पितं**” (मुण्ड.उप.२।२।१) इत्यादि बह्वृचतैत्तिरीयकठमुण्डकादिश्रुतिभिः. “**यं प्राप्य न निवर्तन्ते तद् धाम परमं मम**”, “**न तद् भासयते सूर्यः**” (भग.गीता ८।२१,१५।६) इत्यादिस्मृतिभिः. “**विष्णोः धाम परं साक्षात्**” (भाग.पुरा.३।११।४१) “**स्वधामनि ब्रह्मणि रंस्यते नमः**” (भाग.पुरा.२।४।१४) इत्यादिपुराणवचनैः च निर्विचिकित्सैव. **सदा** इति कालपरिच्छेदराहित्यम्. द्वादशस्कन्धचतुर्थाध्याये “**न तस्य कालावयवैः परिणामादयो गुणाः**” (भाग.पुरा.१२।४।१९) इति उपक्रम्य “**तद् मूलभूतं पदम् आमनन्ति**” (भाग.पुरा.१२।४।२१) इति स्मरणात् कालस्यापि ततएव उत्पत्तेश्च. इदं यथा तथा सहस्राक्षतृतीयश्लोकखण्डने प्रपञ्चयिष्यामः. “**योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया, ज्ञानं कर्म च भक्तिश्च न उपायो अन्यो अस्ति कर्हिचित् (कुत्रचित्)**” (भाग.पुरा.११।२०।६) इति एकादशे भगवद्वाक्याद् मार्गत्रयस्य साधनतः फलतः च उपयोगं दर्शयिष्यन्तः प्रथमं भक्तिमार्गस्य निष्कर्षम् आहुः **भक्त्या** इति, भक्त्यैव आस्वादयितुं शक्यो **लसन्** शोभमानो यो **रसो** “**रसो वै सः... आनन्दं ब्रह्मणः**” (तैत्ति.उप.२।७,२।९) इत्यादिषु श्रावितो निरवध्यानन्दः तस्य एकं अद्वितीयं सदनं स्थानम्. भक्त्यैकास्वाद्यत्वन्तु छान्दोग्यकैवल्यादिषु “**ब्रह्मसंस्थो अमृतत्वम् एति**” (छान्दो.उप.२।२३।१) “**श्रद्धाभक्तिध्यानयोगाद् अवेहि**” (कैव.उप.२) इत्यादिश्रवणात् “**पुरुषः स परः पार्थ भक्त्या लभ्यस्तु अनन्यया**” (भग.गीता ८।२२) “**न अहं वेदैः...**” इति उपक्रम्य “**भक्त्या तु अनन्यया शक्यः**” (भग.गीता ११।५३-५४) इति स्मरणाद् “**भक्त्या अहम् एकया ग्राह्यः**” (भाग.पुरा.११।१४।२१) “**भक्त्यैव तुष्टिम् अभ्येति विष्णुः न अन्येन केनचित्**” (महाभा.ता.नि.१।११६) “**प्रीयते अमलया भक्त्या हरिः अन्यद् विडम्बनम्**” (भाग.पुरा.७।७।५२) इत्यादिपुराणात् च. आनन्दस्य एकसदनत्वन्तु तदानन्दांशतएव अन्येषाम् आनन्दवत्तायाः “**तस्यैव आनन्दस्य अन्यानि भूतानि मात्राम् उपजीवन्ति**” (बृह.उप.४।३।३२) “**एषह्येव**

आनन्दयाति’’ (तैत्ति.उप.२।७) इत्यादौ आम्नानात्. स्पष्टञ्च इदं चतुर्लक्षण्यां ‘‘**तद्धेतुव्यपदेशाच्च**’’ (ब्र.सू.१।१।४) इत्यादौ. कर्ममार्गनिष्कर्षम् आहुः **सेव्यं सदा सज्जनैः** इति, ‘‘**सद्भावे साधुभावे च**’’ (भग.गीता १७।२६) इत्याद्युक्तजनैः दैवसर्गोत्पन्नैः इति यावत्. निरन्तरं सेवितुं योग्यं शक्यं च. ‘‘**माम् अप्राप्यैव कौन्तेय**’’ (भग.गीता १६।२०) इति आसुराणाम् अनधिकारस्मरणात्. एतेन ‘‘**अतो बुध आभजेत भक्त्या एकया ईशं गुरुदेवतात्मा**’’ (भाग.पुरा.११।२।३७) ‘‘**गृहशुश्रूषणं मह्यं दासवद् यद् अमायया**’’ ‘‘**सर्वलाभोपहरणम्**’’ (भाग.पुरा.११।११।३९,३५) इत्याद्येकादशवाक्यसिद्धा तनुजवित्तजसेवाऽवश्यकर्तव्यत्वेन दर्शिता. श्रौतस्मार्तकर्माण्यपि तत्तद्रूपस्य भगवतएव सेवा इयम् इति बुद्ध्या अवश्यकर्त्तव्यानि इति बोधितम्. तेन कर्ममार्गनिष्कर्षो व्याख्यातः ‘‘**कर्मापि एकं तस्य देवस्य सेवा**’’ (त.दी.नि.१।४) इति उक्तेः. ज्ञानमार्गस्य निष्कर्षम् आहुः **वेदान्त**...इति. विद्यते ज्ञायते तत्त्वम् एभिः इति **वेदाः** धर्मब्रह्मप्रतिपादकापौरुषेयवाक्यानि, ‘‘**हलश्च**’’ (पाणि.सू.३।३।१२१) इति घञ् तेषाम् **अन्तो** निश्चयो अत्र इति **वेदान्ताः** ‘‘**वेदान्तविज्ञानसुनिश्चितार्थाः**’’ (मुण्ड.उप.३।२।६) इति, वेदार्थनिश्चयं प्रति वेदान्तविज्ञानस्य हेतुत्वश्रवणात्. यद्वा **वेदस्य अन्ताः** शिरोभागाः ‘‘**ऋचां मूर्द्धानं यजुषाम् उत्तमाङ्गं साम्नां शिरो अथर्वणां मुण्डमुण्डम्**’’ (शांखा.आ.) इति कौषीतकिश्रुतेः उपनिषदः इति अर्थः. तेषाम् **एकेन** केवलेन ‘‘**एके मुख्यान्यकेवलाः**’’ (अम.को. ३।३।१६) इति अमरः विचारेण युक्तिभिः परिचिन्तनरूपम् अनेनैव वेदितुं शक्यम्. शाकल्यब्राह्मणे ‘‘**अगृह्यो नहि गृह्यते**’’ (बृह.उप.३।९।२६) इत्यादिना प्रमाणान्तरप्रवृत्तिं प्रतिषिद्ध्य ‘‘**तन्तु औपनिषदं पुरुषं पृच्छामि**’’ (बृह.उप.३।९।२६) इति उपनिषन्मात्रप्रवृत्तेः प्रतिप्रसवात्. मननस्य आवश्यकत्वन्तु ‘‘**तत्त्वेव भयं विदुषोऽमन्वानस्य** ’’ (तैत्ति.उप.२।७) भवति इति आनन्दवल्लीश्रुतेः. **अमलं** निर्दोषं प्राकृतधर्मानाश्रयम् इति यावत्. स्पष्टम् इदं तृतीयस्य द्वितीयचरणे ‘‘**प्रकृतैतावत्त्वंहि प्रतिषेधति ततो ब्रवीति च भूयः**’’ (ब्र.सू.३।२।२२) इत्यत्र. भक्तवश्यत्वम् आहुः **गोपीजनानन्दकृद्** इति, गोपालतापनीवासुदेवाद्युपनिषत्प्रसिद्धा, गोपनोपयोग्याधिदैविकशक्त्यो

गोपीजनः. एतच्च पञ्चरात्रेऽपि प्रपञ्चितम्. तेषां परमभक्तत्वाद् आनन्दकृत्. नवमस्कन्धे “**अहं भक्तपराधीनः**” (भाग.पुरा.९।४।६३) इत्यादिसन्दर्भात्. तनुजवित्तजसेवायाः अवान्तरफलद्वयं विशेषणद्वयेन आहुः **भक्तानाम्** इत्यादि, भक्तानां “‘**भज्**’**इति एष वै धातुः सेवायां परिकीर्तितः**” “**तस्मात् सेवा बुधैः प्रोक्ता भक्तिः साधनभूयसी**” (गरु.पुरा.२१९।३) इति गारुडवाक्यात् सेवाकर्तॄणां भवं संसारं भनक्ति इति भवभञ्जनः तम्. “‘**भञ्जो**’**=आमर्दने**” (पाणि.सू.धा.पा.१४७८). ‘पवन’-‘स्यन्दना’दिशब्दवद् “**बहुलम् अन्यत्रापि**” (पाणि.सू.सि.कौ.२।४।७६) इति औणादिकसूत्रेण युच्. “**यत्पादपोतेन महत्कृतेन कुर्वन्ति गोवत्सपदं भवाब्धिम्**” (भाग.पुरा.१०।२।३०) इत्यादि उक्तेः युक्तम् एतत्. तथा भक्तानाम् आत्मनि प्रपञ्चे च अद्वैतब्रह्मत्वस्फोरणेन भयहरम्. तथाच पुरुषविधब्राह्मणे “**सो अबिभेत् तस्माद् एकाकी बिभेति स ह अयम् ईक्षाञ्चक्रे यद् मदन्यद् न अस्ति कस्मान् नु बिभेमि इति ततएव अस्य भयं वीयाय**” (शतप.ब्रा.१४।४।२।३) “**भयं द्वितीयाभिनिवेशतः स्याद् ईशाद् अपेतस्य विपर्ययो अस्मृतिः तन्माययातो बुध आभजेत् तं भक्त्या एकया ईशं गुरुदेवतात्मा**” (भाग.पुरा.११।२।३७) इत्यादि अनुसन्धेयम्. एतेन “**ततः संसारदुःखस्य निवृत्तिः ब्रह्मबोधनम्**” (सि.मु.२) इति श्रीमदाचार्योक्तं तनुजवित्तजसेवायाः अवान्तरफलद्वयं संगृहीतं ज्ञेयम्. अत्र विशेषस्तु मदीये वेदान्तचिन्तामणौ पञ्चदशप्रकरणे द्रष्टव्यः. तथा **भव्यं** कल्याणगुणपूर्णम्, अप्राकृतनिखिलधर्मरूपम् इति यावत्. “**आह च तन्मात्रम्**” (ब्र.सू.३।२।१६) इति ब्रह्मसूत्रात्. अत्र विस्तरः तृतीयस्य द्वितीये पादे भाष्ये प्रकाशे च अवधेयः. किञ्च तत्तद्धर्मरूपेण तत्तत्फलरूपेण च भवतीति भव्यम्. “**भव्यगेय...**” (पाणि.सू.३।४।६८) इत्यादिना साधुः. **भक्तानां भयभञ्जनम्** इत्यादिविशेषणत्रयेण भक्तिज्ञानकर्ममार्गाणां फलान्यपि द्योतितानि. अत्र वेदान्तरूपं प्रमाणं, तत्प्रमेयं ब्रह्मस्वरूपं, भक्त्यादिरूपं साधनं, निरवध्यानन्दास्वादलक्षणं फलं च संक्षेपेण दर्शितमिति व्यासदर्शनानुरोधी सर्वोऽपि शास्त्रार्थः संगृहीतः. तेनैव मङ्गलस्य वस्तुनिर्देशात्मकत्वमपि फलितम्. “**आशीः नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्**” (काव्यादर्शः १।१४)

इति मङ्गलस्य त्रैविध्याङ्गीकारात् स्वस्य भक्तत्वाद् **भक्त्यास्वाद्य** इत्यादिना प्रत्यगाशीरपि ध्वनिता. नमस्क्रियारूपन्तु अग्रिमश्लोके सेत्स्यति. शार्दूलविक्रीडितं वृत्तम्. ‘‘**सूर्याश्वैः मसजः तताः सगुरवः शार्दूलविक्रीडितम्**’’ (वृत्तर. ३।१०१) इति वृत्तरत्नाकरे तल्लक्षणात्॥१॥

(२) नमामि मथुराधिपं सकलवल्लवीवल्लभं
विचित्रवनमालया लसितपीतपट्टाम्बरम्॥
किरीटमणिमेखलाकटककुण्डलैर्मण्डितं
समुल्लसितराधया नवनिकुञ्जतल्पे स्थितम्॥२॥

(३) एवं वेदादिप्रमितं पुरुषोत्तमस्वरूपं स्मृत्वा विस्पष्टस्वेष्टदेवतानमनलक्षणं मङ्गलम् आचरन्ति **नमामि मथुराधिपम्** इति, भगवति जीवैः नमनस्यैव कर्तुं शक्यत्वात् ‘नमामि’ इति आरम्भएव उक्तम्. ‘‘**नमस्कृत्यहि वसीयांसम् उपचरन्ति**’’(तैत्ति.संहि.५।४।४।५) इति तैत्तिरीयश्रुतेः. ‘‘**किम् आसनं ते गरुडासनाय**’’ (गरु.पुरा.३।७।३६) इत्यादौ परितोषणक्षमस्य साधनान्तरस्य अशक्यत्वस्मरणात् च. अतएव श्रीमदाचार्याः सर्वत्र नमनवाचकं पदम् आदावेव प्रयुञ्जते. नमनं च प्रह्वीभावः, सच *‘‘मत्तः त्वम् उत्कृष्टः त्वत्तो अहम् अपकृष्टः’’* इति अनुसन्धानपूर्वकः कायादिव्यापारः. विस्तरस्तु ‘‘**नमो भगवते तस्मै**’’ (त.दी.नि.१।१) इत्यत्र आवरणभङ्गादौ अवधेयः. **मथुराधिपं** ‘श्रीमथुरेशा’ख्यं श्रीमदाचार्यसेव्यं श्यामचतुर्भुजाकृति स्वयम् अभिव्यक्तं भगवत्स्वरूपम्. कीदृशं तम्? **सकलबल्लवीवल्लभं** सकलाः सर्वाः कलाभिः चातुर्यैः सहिता वा या बल्लव्यो गोप्यः ‘‘**गोपे गोपाल गोसंख्यगोधुगाभीरवल्लवाः**’’ (अम.को.२।९।१२८८) इति अमरः, पुंयोगलक्षणो ङीष्. ताः वल्लभाः यस्य तम्. ‘‘**नायं श्रियो अङ्ग उ नितान्तरतेः प्रसादः**’’ (भाग.पुरा.१०।४४।६०) इत्यादिवाक्येभ्यः. तासां वा वल्लभम्. इदञ्च गोपालविद्यायां तद्विवरणरूपपञ्चरात्रभागादिषु च प्रसिद्धम्. अथवा **सकल**... इत्यत्र कलया भगवद्रूपया लक्ष्म्या सहिताः सकलाः, रमावेशयुक्ता इति यावद्; अन्यथा भगवत्सम्बन्धायोगात्. इदञ्च ‘‘**रेमे रमेशो व्रजसुन्दरीभिः**’’

(भाग.पुरा.१०।३०।१७) इत्यत्र सुबोधिन्यां स्पष्टम्. लक्ष्म्याः कलात्वन्तु कूर्मपुराणे प्रथमाध्याये इन्द्रद्युम्नेतिहासे **“तस्यैवं वर्तमानस्य कदाचित् परमा कला स्वरूपं दर्शयामास दिव्यं विष्णुसमुद्भवं दृष्ट्वा प्रणम्य शिरसा विष्णोः भगवतः प्रभाम्”** (कूर्मपुरा.१।१।५४-५५) इत्यादिना **“एवम् उक्ता अथ विप्रेण देवी कमलवासिनी”** (कूर्मपुरा.१।१।६४) इत्यन्तेन दर्शितम्. मध्ये **“न मे नारायणाद् भेदो विद्यतेहि विचारतः तन्मया अहं परं ब्रह्म स विष्णुः परमेश्वरः”** (कूर्मपुरा.१।१।५९) इति तस्याः भगवदभेदोऽपि उक्तः. अतो बृहद्वामनपुराणादौ प्रसिद्धं वरदानं सार्थकयितुं स्वाभिन्नपरमलक्ष्म्यावेशाद् वह्न्याविष्टदारुन्यायेन स्वात्मकत्वं तासां सम्पाद्य ताभिः समं रमणं तद्वल्लभत्वं च युक्तमेव. **विचित्र...** इति, विशेषेण चित्रा, **“स्वमायां ‘वनमाला’ख्यां नानागुणमयीं दधद्”** (भाग.पुरा.१२।११।११) इति द्वादशस्कन्धवाक्याद्, **अद्भुता** विविधवर्णयुक्ता वा, **“चित्राखुपर्णीगोडुम्बासुभद्रादन्तिकासु च मायायां सर्पनक्षत्रे नदीभेदेषु च स्त्रियां तिलकालेख्ययोः क्लीबं कर्बुराद्भुतयोरपि. तद्युक्तयोस्तु अन्यलिंगम्”** इति मेदिनी. यद्वा *“चितं=बुद्धिं त्रायते”* इति चित्रा. **“प्रेक्षा उपलब्धिः चित् संविद्”** (अम.को.१।५।१) इति अमरः. विशेषेण चित्रा बुद्धित्रात्री. श्रीसुबोधिन्यां **“बर्हापीडम्”** (भाग.पुरा.१०।१८।५) इत्यादिश्लोकविवरणे वनमालायाः कीर्तिमयत्वनिरूपणात्. अथवा ‘विभिः’=पक्षिभिः भ्रमरैः चित्रा **“मधुव्रतव्रातविघुष्टया स्वया विराजितः श्रीवनमालया हरिः”** (भाग.पुरा.८।१८।३) इत्यादिवर्णनात् तादृशी या **वनमाला** तया **लसितं पीतपट्टरूपं अम्बरं** यस्य तम्. **किरीट** इत्यादि, इदं कौस्तुभादेः उपलक्षणम्. एतेन **“तम् अद्भुतं बालकम् अम्बुजेक्षणम्”** (भाग.पुरा.१०।३।९) इत्यादिश्लोकद्वयेन निरूपितं स्वरूपम् अत्रापि प्रदर्शितम्. **‘मथुराधिप’**इति नाम्नैव चतुर्भुजत्वसायुधत्वादेः लाभात्. सान्द्रपयोदसौभगत्वं ध्वनयन्ति **समुल्लसिता** इति, सम्यग् उल्लसिता; यद्वा मुदा सहिता समुत्, साच असौ लसिता शोभिता च इति. ‘शीतोष्णं’-‘स्निग्धोष्णम्’-इत्यादिवद् उत्तरपदार्थस्य विशेष्यत्वविवक्षया समासः. सा च असौ राधाच इति तया. सहार्थकपदयोगाभावेऽपि **“वृद्धो यूना”** (पाणि.सू.१।२।६५) इति ज्ञापकात्

सहार्थविवक्षया तृतीया. नव्यास्तु “**सहयुक्तेऽप्रधाने**” (पाणि.सू.२।३।१९) इत्यत्र युक्तपदादेव अयम् अर्थो लभ्यते इति आहुः. दृश्यन्ते च एवंविधा भोजराजादीनां प्रयोगाः “**रामे विदेहसुतया तरुमूलसंज्ञम् अन्तःपुरं विशति लक्ष्मणसौविदल्लम्**” इत्यादयः. तेन अप्रयुक्तत्वशङ्कापि अपास्ता. अथच राधा विद्युत् “**राधा विद्युद्-विशाखयोः विष्णुक्रान्तामलक्योश्च गोपीवेधविशेषयोः**” इति हैमः. श्लेषमहिम्ना समुल्लसितविद्युत्साहित्यबोधनेन सम्यङ्मेघलक्ष्मीः ध्वनिता भवति. **नव** इति नवं=तत्कालकल्पितत्वाद् अम्लानं निकुञ्जसम्बन्धि. अर्थात् पुष्पादिमयं यत् **तल्पं** शयनीयं तत्र स्थितम्. यद्वा नवनं=स्तवनं, “‘**णु**’ **स्तुतौ**” (पाणि.सू.धा.पा.१०६०) नवम् अस्य अस्ति इति नवनी, पक्ष्यादिकर्तृकभगवत्स्तुतिविशिष्टः **कुञ्जः**, “**शृण्वन्ति मीलितदृशो विगताऽन्यवाच**” (भाग.पुरा.१०।१८।१४) इत्यत्र ‘अन्य’पदेन भगवदुपयोगिवागत्यागबोधनात्. अथवा नवनी स्वयं स्तुतिविषयः कुञ्जः, तलवकारब्राह्मणे “**तद्ध तद्वनं नाम तद्वनम् इति उपासितव्यं**” (केनोप.४।६) इति भगवतएव लीलावनत्वेन उपासनाश्रवणात्. यद्वा नवनि स्तुतिविषयः यत्कुञ्जतल्पं तत्र. भगवत्पर्यङ्कस्य कौषीतकिब्राह्मणे अमितौजस्त्वाम्नानात्. तथाहि तत्र चित्रगाङ्ग्यायन्युपाख्याने “**अपराजितम् आयतनम् इन्द्रप्रजापती द्वारगोपौ विभुप्रमितं विचक्षणा आसन् हि अमितौजः पर्यङ्कः**”(कौषी.ब्रा.उप.१।३) इति. तथा “**स आगच्छति अमितौजसं पर्यङ्कं स प्राणः तस्य भूतं च भविष्यत् च पूर्वौ पादौ श्रीश्च इरा च अपरौ**” (कौषी.ब्रा.उप.१।५) इत्यादि श्रूयते. अत्र नमनोक्त्या प्राधान्येन कायिकः प्रह्वीभावः. पूर्वश्लोके भावनोक्त्या मानसः सः. वाचिकस्तु श्लोकद्वयपठनादेव सिद्धः. तेन “**मनः स्मरेत असुपतेः गुणान् ते गृणीत वाक् कर्म करोतु कायः**” (भाग.पुरा.६।११।२४) इत्यादिषष्ठस्कन्धादिवाक्यसंमतः कायादित्रयस्य भगवदुपयोगो अत्र दर्शितः. पृथ्वी वृत्तं “**जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः**” (वृत्तर. ३।९१) इति तल्लक्षणात्॥२॥

(२) नत्वा श्रीवल्लभाधीशान् प्रभून् श्रीविट्ठलेश्वरान्॥
तद्वचःखण्डनाभासं खण्डयामि यथाक्रमम्॥३॥

(३) एवं भगवन्तं नत्वा **“यस्य देवे परा भक्तिः यथा देवे तथा गुरौ तस्य एते कथिताहि अर्थाः प्रकाशन्ते महात्मनः”** (श्वेता.उप.६।२३) **“आचार्यवान् पुरुषो वेद”** (छान्दो.उप.६।१४।२) इत्यादिश्वेताश्वतरच्छान्दोग्यादिश्रुतिभिः आचार्यभक्तेः आवश्यकत्वात् श्रीमदाचार्यश्रीविठ्ठलाचार्यनमनलक्षणं मङ्गलम् आचरन्तः स्वचिकीर्षितं प्रतिजानते **नत्वा** इति, नमनार्थकपदस्य आरम्भएव प्रयोगे अभिसंधिस्तु उक्तएव. **श्रीवल्लभाधीशान् नत्वा** तथा **प्रभून्** सर्वविधफलदाने प्रभवतो, “ ‘विदा’=ज्ञानेन ‘ठान’=शून्यान् ‘लान्ति’=अनुगृह्णन्ति” इति विठ्ठलाः, ते च ते ईश्वराः सर्वसमर्थाश्च तान् नत्वा. **तद्वच** इति, तेषां निर्दिष्टपूर्वाणां श्रीमदाचार्याणां श्रीविठ्ठलेश्वराणां च वचसां **खण्डनस्य आभासम्**, ईश्वरवाचां वास्तविकखण्डनस्य असम्भवाद् ‘आभास’पदम्. **यथाक्रमम्** क्रमम् अनतिक्रम्य **खण्डयामि.** पूर्वं श्रीमदाचार्यवचसां खण्डनम् अनन्तरं श्रीविठ्ठलाचार्यवचसां तस्य तद् इति क्रमः. यद्यपि प्रथमभागे समर्थ्यमानः शुद्धाद्वैतमार्त्तण्डो न श्रीमदाचार्यकृतः तथापि तत्प्रतिपाद्यः शुद्धाद्वैतपदार्थः श्रीमदाचार्योक्तएव समर्थ्यते. तत्र-तत्र दूषिता अणुभाष्यभागाअपि समर्थ्यन्तएव इति श्रीमदाचार्यवचसां मण्डनम् अविवादम्. द्वितीयभागेतु स्पष्टमेव श्रीविठ्ठलेश्वरचरणविरचितं विद्वन्मण्डनं मण्ड्यते. यद्वा **यथाक्रमम्** येन क्रमेण खण्डनाभासः प्रवृत्तः तेनैव क्रमेण **खण्डयामि.** एतेन साकल्येन चिखण्डयिषा बोध्यते. श्रीमदाचार्यादिवचस्सु निर्दूषणतायाः स्वयं सम्यज्ज्ञातत्वेऽपि परेषां तत्र व्यामोहवारणार्थं ग्रन्थारम्भइति क्रियाफलस्य परगामित्वात् परस्मैपदम्. एतेन प्रयोजनम् अदर्शि. तद्वचस्समर्थनरूपो विषयोऽपि अवाबोधि. तेनैव तज्जिज्ञासुः अधिकारी. प्रतिपाद्यप्रतिपादकभावः सबन्धश्च अस्फोरि इति अनुबन्धचतुष्टयं स्पष्टम्॥३॥

(२) शुद्धाद्वैतविभाकरस्य किरणैः प्रोद्बोधितान् सज्जनान्
विद्वन्मण्डनमण्डितान् बुधवरान् आलोक्य कोप्यासुरः॥
व्यातेनेऽभ्रतमः पविं च युगपत् स्रष्टुं सहस्रेक्षणं
शक्तस्तद्द्वितयस्य नाशनविधौ प्राभञ्जनस् तन्यते॥४॥

(३) उत्तरार्द्धोक्तार्थं स्वयं स्पष्टयन्ति **शुद्धाद्वैत...** इति, शुद्धाद्वैतमेव **विभाकरः** सूर्यः, मयूरव्यंसकादित्वात् समासः. अथवा शुद्धाद्वैतस्य विभाकरइव विभाकरः तत्प्रकाशकः ‘शुद्धाद्वैतमार्त्तण्डा’ख्यो ग्रन्थः तस्य किरणैः तत्तादात्म्यापन्नैः उपदेशैः **प्रोद्बोधितान्** सर्वांशतो निरस्तमोहनिद्राकान् **सज्जनान्** साधुभावप्रशस्तकर्मयज्ञतपोदानस्थित्यादिसम्पन्नान् ब्रह्मास्तित्वज्ञानाद् आस्तिकान्. “**सद्भावे साधुभावे च**” (भग.गीता १७।२६) इत्यादिगीतोक्त्या “**अस्ति ब्रह्म इति चेद् वेद सन्तम् एनं ततो विदुः**” (तैत्ति.उप.२।६) इति ब्रह्मवल्लीश्रुत्या च इदं लभ्यते. तथा **विद्वन्मण्डन** इति, विदुषाम् उचितेन मण्डनेन वस्त्राभरणादिना अथच ‘**विद्वन्मण्डना**’ख्येन ग्रन्थविशेषेण **मण्डितान्**. मनुष्यो यः प्रातर् उत्थाय प्रथमं शरीरकार्येषु आह्निकं ततः आभरणादिना मण्डनं च करोति इति प्रसिद्धम्. दशमस्कन्धोक्तभगवदाह्निकेऽपि एष क्रमो दृश्यते. तथा अत्रापि प्रथमं शुद्धाद्वैतमार्त्तण्डाभ्यासे अज्ञाननिवृत्त्या भगवत्सेवादौ प्रवृत्तिः, ततो बुद्धिदाढर्च्ये विद्वन्मण्डनव्यासंगः इति क्रमिकाण्येव विशेषणानि. **बुधवरान्** पण्डितश्रेष्ठान् दैवसर्गोत्पन्नान्. “**बुधो वृद्धौ पण्डितेऽपि**” (अम.को.३।३।५५३) इति अमरः. अथच **देववरान्** “ज्ञातृचान्द्रिसुरा बुधा” (अम.को.३।३।५६३) इति क्षीरस्वामी. प्रयुञ्जते च एनम् उभयार्थं श्रीहर्षादयः “**तथा आद्रियन्ते न बुधाः सुधामपि** ” (नैषधीयचरितम् १।१) इति. एतेन बहुषु कोशेषु व्युपसर्गरहित‘बुध’शब्दस्य देवपर्यायस्य अनुपलम्भेऽपि अदोषः. **आलोक्य** दृष्ट्वा **कोऽपि** अनिर्दिष्टनामको, भगवदवतारमहानुभावनिन्दकत्वात् तस्य साक्षाद् नाम्नो न निर्देशः. यद्वा **कोपी** इति दीर्घान्तच्छेदः, पूर्वोक्तान् दृष्ट्वा **कोपी** क्रोधवान् **आसुरः** तत्सर्गोत्पन्नो अथच दैत्यो **अभ्रतमः** मार्त्तण्डस्य आच्छादनार्थं मेघान्धकारविस्तारं विद्वन्मण्डनापकारार्थं **पविं** वज्रं च युगपत् एककालावच्छेदेन **स्रष्टुं सहस्रेक्षणं** एतन्नामकं ग्रन्थं, अथच इन्द्रं व्यातेने. स्वार्थार्थं तस्य तथाकरणम् इति बोधनार्थम् आत्मनेपदम्. असुराहि देवाभ्युदयासहिष्णुतया युद्धादौ मायया मेघविस्तारादिकं प्रदर्शयन्ति इति पुराणेषु अपाणिपिहितम्. **व्यातेने** इति उक्त्या तत्कल्पितो मायिको असौ सहस्राक्षः. वास्तवे देवेन्द्रे मार्त्तण्डादिविरोध-बुधविरोध-भगवद्विरोधानाम् अनुपपत्तेः. अतः तत्खण्डनम् उचितमेव इति ज्ञाप्यते. एतदेव प्रतिजानन्ति

शक्त इत्यादिना. तत्रितयस्य सहस्राक्षभागद्वयस्य अथच वास्तवाभ्रान्धकारवज्रयोः द्वयस्य नाशनविधौ. *''देवदत्तस्य गुरुकुलम्''* इत्यादिवद् नित्यसापेक्षत्वेऽपि गमकत्वात् समासः. **युगपद्** इत्यत्रापि अनुवर्तते. एकहेलया नाशनविधाने **प्राभञ्जनः** प्रबलपवनः. वस्तुतस्तु एतन्नामको ग्रन्थः तन्यते. प्रकर्षेण भनक्ति इति प्रभञ्जनो वायुः. **''बहुलम् अन्यत्रापि''** (पाणि.सू. सि.कौ.२।४।७६) इति युच् **''नभस्वद्-वात-पवन-पवमान-प्रभञ्जनाः''** (अम.को.१।१।१४६) इति अमरः. प्रकर्षतो भञ्जकत्वात् प्रबलत्वम् अर्थसिद्धम्. प्रभञ्जनएव प्राभञ्जनः. प्रज्ञादेः आकृतिगणत्वात् स्वार्थिको अण्. ग्रन्थपक्षे प्रकर्षेण भञ्जनं खण्डनं तत्सम्बन्धी अयं प्राभञ्जनः. **''तस्य इदम्''** (पाणि.सू.४।३।१२०) इति अण्. यद्वा प्रकर्षेण आसमन्ताद् भनक्ति खण्डयति इति तथा. पूर्वोक्तो युच्. **''कृत्यल्युटो बहुलम्''** (पाणि.सू.३।३।११३) इति ल्युड् वा. अथवा प्राभज्यते वादिपक्षो अनेन इति तथा. **''करणाधिकरणयोः च''** (पाणि.सू.३।३।११७) इति ल्युट्. खण्डने प्रमाणयुक्तिपुरस्सरत्वं 'प्र'शब्दार्थः. परोक्तदूषणानवशेषः 'आङ्'र्थः. किञ्च एवम् ऐतिहासिकाः वदन्ति भगवत्कार्यसाधकं संसारसमानापारपारावारप्लवनप्रभुं मूर्त्तमिव भगवद्भावं हनूमन्तं मार्त्तण्डद्वेषी असुरस्य वचनात् सहस्राक्षो वज्रेण हनुदेशे ताडयामास. ततो मूर्च्छितं पतन्तं तं वहमानः पवमानः पुरन्दरमानभङ्गाय गिरिवर्यस्य गुहां न्यविशत. ततो निरुच्छ्वासं विश्वम् अनुग्राहको वेदगर्भः स्ववाचा सहस्राक्षस्य दोषं प्रकाश्य जगत्प्राणं च प्रणुत्य प्रभञ्जनप्रचारार्थं स्वयं भगवद्भक्तापराधिनं वृत्रहणं मार्त्तण्डप्रभृतिदैववर्गं च आदाय तामेव क्षमाधरगुहां प्रविश्य समीरणं प्रसादयन् तदुत्संगसंगतं सर्वासुरगर्वापहं भगवद्भक्तिमयमूर्त्तिं हनूमन्तं पुनरुदजीजिवत्. अथ वेदगर्भप्रसादाय आदिभप्रभञ्जनप्रचारात् सर्वेषां सुखं सहस्राक्षस्य मदभङ्गश्च अभूद् इति. तदेतत् प्रायेण सर्वमेव अत्रापि संगच्छतइति युक्ततमं **'प्राभञ्जन'** इति अभिधानम्. एतद् वाल्मीकीयरामायणस्य उत्तरकाण्डे पञ्चत्रिंशषट्त्रिंशसर्गयोः किष्किन्धाकाण्डे षट्षष्टितमसर्गे च प्रसिद्धम्. तत्रहि किष्किन्धाकाण्डे हनूमन्तं प्रति जाम्बवान् **''ततः त्वां निहतं दृष्ट्वा वायुः गन्धवहः स्वयं त्रैलोक्यं भृशसंक्रुद्धो न ववौ वै प्रभञ्जनः. संभ्रान्ताश्च सुराः सर्वे त्रैलोक्ये क्षुभिते**

सति. प्रसादयन्ति संक्रुद्धं मारुतं भुवनेश्वराः'' (रामा.४।६६।२५-२६) इति 'प्रभञ्जन'शब्दोक्तिपूर्वकम् आह उत्तरकाण्डे च ''**पुत्रः तस्याम् अमरेशेन इन्द्रेण अद्य निपातितो राहोः वचनम् आस्थाय ततः स कुपितो अनिलो अशरीरः शरीरेषु वायुः चरति पालयन्. शरीरंहि विना वायुं समतां याति दारुभिः. वायुः प्राणः, सुखं वायुः, वायुः सर्वम् इदं जगद् वायुना वा सम्परित्यक्तं न सुखं विन्दते जगत्. अद्यैव च परित्यक्तं वायुना जगदायुषा. अद्यैव ते निरुच्छ्वासाः काष्ठकुड्योपमाः स्थिताः**'' (रामा.७।३५।५९-६३) इति प्रजापतिना वायुस्तुतिः दर्शिता. तैत्तिरीयोपनिषच्छान्तिपाठादिषु श्रुतिभागेष्वपि ''**नमो ब्रह्मणे नमस्ते वायो. त्वमेव प्रत्यक्षं ब्रह्मासि. त्वमेव प्रत्यक्षं ब्रह्मवदिष्यामि**'' (तैत्ति.उप.१।१) इत्यादिरूपा तत्स्तुतिः दृश्यतएव. ग्रन्थेऽपि तादृशोत्कर्षबोधनाय तथा नामधेयम्. विस्तारार्थकतनोतिना स्वोत्प्रेक्षितं किमपि न उच्यते किन्तु प्राक्तनोक्तमेव विशदीक्रियते इति प्रत्याय्यते. वायुरपि प्रसरन्नेव मेघाद्यपहारे प्रभवति. एतावता पूर्वश्लोकोत्तरार्द्धोदितं विशदितम्. ननु सहस्राक्षकर्तुः आसुरत्वं कथम् उच्यते ? इति चेद् जगतो असत्यत्वादिकथनेन महानुभावात्यन्तनिन्दाद्युग्रकर्मारम्भेण दम्भमानमदान्वितत्वेन संन्यासित्वेऽपि बहुराजानुसरणानुमीयमानबह्वाशापाशबन्धेन स्वाश्रमविरुद्ध-छत्रचामर-सुवर्णाद्यर्थ-सञ्चयोपार्जनेन अहंकारबलदर्पादिवशात् तुलसीकाष्ठमालात्रोटनादौ प्रद्वेषे अभ्यसूयने प्रवृत्त्या च तन्निश्चयाद् इति जानीहि. एतेषां धर्माणाम् आसुरलक्षणत्वन्तु गीताषोडशाऽध्याये ''**आसुरं पार्थ मे शृणु**'' (भग.गीता १६।६) इति उपक्रम्य ''**प्रद्विषन्तो अभ्यसूयकाः**'' (भग.गीता १६।१८) इत्यन्तं भगवतैव प्रदर्शितम् इति अलं पल्लवितेन. उक्तलक्षणकं शार्दूलविक्रीडितं वृत्तम्।।४।।

* * *



। सहस्राक्षप्रस्तावनाखण्डनम् ।

सहस्राक्षप्रस्तावना

(सहस्राक्षनिबन्ध-प्रथम-मुद्रण प्रस्तावना)

(१) [आसीत्कश्चिद् औत्तराहो अनेक-नग-नगराराम-रमणीयस्य निरुपम-कमलकुल-संकुल-सरस्सहस्रस्य कवि-विद्वन्मस्करिगण-कमनीयस्यकश्मीरमण्डलस्यनिकट-निवासी कात्यायनीकान्त-कृपापात्रं सारस्वतो विप्रः. तेनच अनपत्यता-प्रतप्त-चेतसा कस्यचित् कर्मन्दिनो अनुग्रहेण चिराद् दृष्टाः पुत्रमुख-सुधांशवः. तन्मध्यात्प्राथमिकः तनूजन्मनास्वप्रतिज्ञा-पालन-परेणकुरुक्षेत्रारण्य-पुण्यावनि-निवास-शालिने तस्माएव यतिवर्याय समर्पितः.]

(२) श्रीवल्लभकुलोत्पन्नानाम् उदयं दृष्ट्वा ईर्ष्यया प्रतप्यमानेन केनचिद् यतिम्मन्येन कृतस्य शुद्धाद्वैतमार्त्तण्डविद्वन्मण्डनयोः खण्डनाभासस्य आदौ तदनुयायिना केनचित् कृतायां प्रस्तावनायाम् आसीत् कश्चिद् **इत्यारभ्य** प्रार्थये परमात्मानम् **इत्यन्तेन तदुत्पत्तिः तस्य संन्यासाश्रमपरिग्रहप्रकारो ग्रन्थकरणे हेतुः तत्प्रत्प्रशंसा च प्रतिपादिताः.**

(३) अथ सहस्राक्षं खण्डयिष्यन्तो मुद्रिततत्पुस्तके ततः पूर्वनिबद्धां सहस्राक्षकृत्पक्षरक्षणप्रवणेन केनचित् प्रणीतां प्रस्तावनां बाध्यसामान्यचिन्तया प्रथमस्य त्यागे मानाभावात् प्रथमं दूषयितुं तदभिप्रायं तावद् उपक्षिपन्ति—**श्रीवल्लभकुल**... इत्यादिना **प्रतिपादिता** इत्यन्तेन. **ईर्ष्या** अक्षमा, “**अक्षान्तिः ईर्ष्या**” (अम.को.१।७।४५७) इति अमरः. हेतुत्वं तृतीयार्थः. **केनचिद्** इति नाम्नः स्वयम् अनिर्देशस्य आशय उक्तः. **यतिम्मन्येन** आत्मानं यतिं मन्यते इति तथा. “**आत्ममाने खश्च**” (पाणि.सू.३।२।८३) इति खश्. शित्वेन सार्वधातुकत्वात् श्यन्. “**अरुर्-द्विषद् अजन्तस्य**” (पाणि.सू.६।३।६७) इति मुम्. नतु वस्तुतः परिव्राजको

वक्ष्यमाणरीत्या तद्धर्मविरहात्. **“वेणुभिः न भवेद् यति”** (भाग.पुरा.११।१८।-१७) इति स्मरणात्. **तदनुयायिना** इति. द्वारकां निकषा विषयविशेषनिवासिना केनचिद् द्विजन्मना क्षत्रियमथुरादासस्य नाम्ना प्रस्तावना निरमायि इति किंवदन्त्या अवगम्यते. स्वसिद्धान्ते शिवद्वेषाभावम् आदितएव स्फुटयितुं **श्रीमदुमारमण...**इत्याद्यंशं विहाय दूष्यभागमेव गृह्णन्ति **आसीत् कश्चिद्** इत्यादि. अत्र प्रेक्षावताम् अनायासेन उभयग्रन्थयोः तारतम्यावगमाय परप्रस्तावना स-स सहस्राक्षभागः च अक्षरशो मया पृथगेव अनूद्यते. **तदुत्पत्तिः** इत्यादि‘तत्’शब्दचतुष्टयेन उक्तचरो यतिम्मन्यः परामृश्यते. उत्पत्त्यादयः चत्वारः प्रस्तावनायाः मुख्यविषयः. ग्रन्थकरणे हेतोः तुरीयविषयत्वेऽपि **तस्य** इति पदस्य उभयत्र अन्वयार्थं मध्ये निर्देशः. अन्तेऽपि प्रशंसायाः सत्त्वात् च.

> **(२) तत्रच प्रायेण अन्योन्यं-विरुद्धानि वाक्यानि अर्थान्तरप्रतिपादकानीव लक्ष्यन्ते. तथाहि : कात्यायनीकान्तकृपापात्रे अनपत्यताप्रतप्तचेतस्त्वं विरुद्धम्. हेतुं विनैव परदुःखप्रहाणेच्छा कृपा, सा चेत् समर्थस्य ईश्वरस्य यद्विषयिका जाता तत्र दुःखं सर्वथैव न सम्भवति. अथ प्रारब्धकर्मणो ज्ञानेनापि अविनाश्यत्वेन प्रबलत्वात् तज्जन्यदुःखवारणे कात्यायनीकान्तस्यापि असामर्थ्यं *“दयालोः असमर्थस्य दुःखायैव दयालुता”* इति उच्यते चेद् ईदृशं दुःखं कर्मन्दिना निवारितम् इत्यपि विरुद्धम्. यद्यपि अपूर्वे कस्मिंश्चिद् भिक्षौ तादृशसामर्थ्यं सम्भावितं तथापि कुरुक्षेत्रनिवासिनि शिष्याभिलाषिणि ‘स्वरूपानन्दा’भिधे लोकैः दृष्टगुणे असंभावितमेव.**

(३) दूषयन्ति **तत्रच** इत्यादिना. सहस्राक्षप्रस्तावनायाम् आसीद् इत्यादिना पुत्रमुख-सुधांशवः इत्यन्तेन उक्तं शिवकृपापात्रपुत्रत्व-यत्यनुग्रहजन्यत्व-लक्षणम् उत्पत्तौ उत्कर्षं परिहरन्ति **कात्यायनी...** इत्यारभ्य **असम्भावितमेव** इत्यन्तम्. **हेतुम्** इत्यादि, हेतुः फलं कारणं च, **“लक्षणहेत्वोः क्रियायाः”**

(पाणि.सू.३।२।१२६) इत्यादौ तथा व्याख्यानात्. निरुपाधिपरदुःस्वप्रहाणेच्छात्वं कृपात्वम्. निरुपाधित्वञ्च हेत्वनधिकरणवृत्तित्वम्. तदेतद् हृदिकृत्य उक्तं **हेतुं विनैव** इति. स्वेष्टा-ऽनिष्ट-प्रवृत्ति-निवृत्तीच्छायाः प्राणिमात्रे सत्त्वात् तत्र अतिप्रसङ्गवारणाय ‘**पर**’पदम्. प्रहाणस्य चेष्टात्वाद् “*दयया दुःखं हापयति*” इत्यादिप्रयोगात् च तत्र अतिव्याप्तिवारणाय ‘**इच्छा**’पदम्. **समर्थस्य ईश्वरस्य** इति, सिद्धान्ते शिवस्य ईश्वरकोटावेव निवेशाद् वादिविशेषवत् तत्र जीवत्वस्य अनङ्गीकाराद् ‘**ईश्वर**’पदम्. एतच्च प्रहस्तवादादिषु (अव.प्रह.वेदा.१) प्रपञ्चितम्. तथाच यदि असौ शिवकृपापात्रं स्याद् अनपत्यत्वदुःखेन न प्रतप्येत इति अनुकूलतर्केण तस्मिन् तत्कृपाविरहो निश्चीयते. ईश्वरस्य तद्दुःखप्रहाणेच्छासत्त्वेऽपि तदनिवृत्तौ अनीश्वरत्वापत्तेः सत्यसंकल्पादिश्रुतिबाधापत्तेः च. मतान्तरेण समाधिं गृह्णन्ति **अथ** इति, ‘अथ’शब्दः प्रश्नार्थः, “**मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येषु अथो अथ**” (अम.को.३।३।२४८) इति अमरोक्तेः. **ज्ञानेनापि** इति “**क्षीयन्ते च अस्य कर्माणि तस्मिन् दृष्टे परावरे**” (मुण्ड.उप.२।२।८) इत्यादिकठादिश्रुतिषु “**ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा**” (भग.गीता ४।३७) इत्यादिस्मृतिषु च सर्वकर्मनाशकतया प्रसिद्धेनापि. **अविनाश्यत्वेन** इति, शारीरकभाष्ये चतुर्थस्य प्रथमपादे “**अनारब्धकार्यएव तु पूर्वे तदवधेः**” (ब्र.सू.४।१।१५) इति अधिकरणे प्रारब्धतया परिणतपापपुण्ययोः ज्ञानेन अविनाश्यतायाः “**भोगेनतु इतरे क्षपयित्वा सम्पद्यते**” (ब्र.सू.४।१।१९) इति अधिकरणे तयोः भोगैकनाश्यतायाः च अङ्गीकारात् तथा इति अर्थः. अतो युक्तं प्रबलत्वम्. **तज्जन्य**... इत्यादि, तस्य प्रारब्धजन्यम् अनपत्यतादुःखम् ईश्वरेणापि कृपासत्त्वेऽपि न उच्छेत्तुं शक्यम् इति निगर्वः. **दयालोः** इति अयं माधवभट्टोक्तेः (८४वै.वा.२७।२) अनुवादः. एतेन “**अस्ति चेद् ईश्वरः कश्चित् फलरूपी अन्यकर्मणां कर्तारं भजते सोऽपि नहि अकर्तुः प्रभुर्हि सः**” (भाग.पुरा.१०।२१।१४) इत्यादौ दर्शितो अनीश्वरवादः ईश्वरस्य अनत्यन्तप्रयोजनकत्वं वा प्रसज्यते इति पूर्वपक्षिणः स्वपादे कुठारः. परिहरन्ति **ईदृशम्** इत्यादि. **ईदृशं** प्रारब्धजन्यम्. **कर्मन्दिना** संन्यासिना. **विरुद्धम्** उपन्यस्तचराधिकरणादिविरुद्धम्. ईश्वरेणापि तदपरोक्षज्ञानेनापि अविनाश्ये

आधुनिकसंन्यासिविशेषनाश्यतायाः अशक्यवचनत्वात् प्रारब्धे मनुष्यविशेषनाश्यत्वबोधकमानानुपलम्भात् च इति भावः. किञ्च एवं कल्पयता आधुनिकपुरुषविशेषादपि शिवस्य अपकर्षो वर्णितो भवतीति तस्यैव शिवद्वेषिता आपद्यते. नच शिवएव मस्करिणा दापितवान् इति वाच्यं, स्वयम् अदाने चिरम् उपेक्षणे च हेत्वभावात्. नच दुष्टप्रारब्धस्य भोगेन क्षयपर्यन्तम् उपेक्ष्य शुभप्रारब्धोदये दत्तवान् इति वाच्यं, तथा सति प्रारब्धेनैव तत्सिद्धौ लाघवेन शिव-कर्म्मन्दिनोः उभयोरपि अप्रयोजकत्वापातात्. कृपामन्तरापि तल्लाभसम्भवात् च. एवं तत्कल्पनायाः तन्मतविरुद्धत्वं दर्शयित्वा भक्तविशेषाणां प्रारब्धानधीनत्वमते कथञ्चित् समाधिम् आशङ्क्य पाक्षिकोऽपि दोषः परिहरणीयः इति आशयेन आहुः **यद्यपि** इति. तेन एतद् वृत्तं कपोलकल्पितमेव इति द्योतितम्.

> **(२) किञ्च अयं संन्यासाश्रमपरिग्रहप्रकारोऽपि वर्णाश्रमधर्मप्रणेतृभिः मनुयाज्ञवल्क्यादिभिः अदर्शितो अपूर्वएव तत्प्रदर्शितप्रकारविरुद्धः च. तथाच उक्तं याज्ञवल्क्येन "वनाद् गृहाद् वा कृत्वा इष्टिं सार्ववेदसदक्षिणां, प्राजापत्यां तदन्ते तान् अग्नीन् आरोप्य च आत्मनि अधीतवेदो जपकृत् पुत्रवान् अन्नदो अग्निमान् शक्त्या च यज्ञकृद् मोक्षे मनः कुर्यात् तु न अन्यथा" (याज्ञ.स्मृ.३।४।५६-५७). मिताक्षरायां च तद्व्याख्याने "यावता कालेन तीव्रतपःशोषितवपुषो विषयकषायपरिपाको भवति, पुनश्च मदोद्भवाशङ्का न उद्भाव्यते तावत्कालं वनवासं कृत्वा तत्समनन्तरं मोक्षे मनः कुर्यात्. 'वन'-'गृह'शब्दाभ्यां तत्सम्बन्ध्याश्रमौ लक्ष्येते; 'मोक्ष'शब्देन च मोक्षैकफलकः चतुर्थाश्रमः" (याज्ञ.स्मृ.मिता.३।४।५६) इति उक्तम्.**

(३) अथ प्रस्तावनायां तन्मध्याद्... इत्यारभ्य समर्पितः इत्यन्तेन दर्शितं संन्यासाश्रमपरिग्रहप्रकारम् अशास्त्रीयत्वोद्घाटनेन दूषयन्ति **किञ्च अयम्**

इत्यादिना **अबाधितएव बोधः** (पृ.२८) इत्यन्तम्. **मनुयाज्ञवलक्यादिभिः** इति, "**मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोङ्गिरा**" (याज्ञ.स्मृ.१।१।४) इति याज्ञवल्क्याद्युक्तक्रमानुरोधात् "**यद्वै किञ्च मनुः अवदत् तद् भेषजम्**" (तैत्ति.संहि.२।२।१०।२) इति तैत्तिरीयश्रुतिप्रशंसितत्वात् च मनोः प्रथमनिर्देशः. तद्वचनानितु षष्ठाध्याये वानप्रस्थधर्मनिरूपणोत्तरं "**वनेषु च विहृत्य एवं तृतीयं भागम् आयुषः चतुर्थम् आयुषो भागं त्यक्त्वा संगान् परिव्रजेत्. आश्रमाद् आश्रमं गत्वा हुतहोमो जितेन्द्रियो भिक्षाबलिपरिश्रान्तः प्रव्रजन् प्रेत्य वर्द्धते. ऋणानि त्रीणि अपाकृत्य मनो मोक्षे निवेशयेत्. अनपाकृत्य मोक्षन्तु सेवमानो व्रजति अधः. अधीत्य विधिवद् वेदान् पुत्रान् च उत्पाद्य धर्मतः इष्ट्वा च शक्तितो यज्ञैः मनो मोक्षे निवेशयेत्. अनधीत्य द्विजो वेदान् अनुत्पाद्य तथा सुतान् अनिष्ट्वा चैव यज्ञैः च मोक्षम् इच्छन् व्रजति अधः**" (मनुस्मृ.६।३३-३४) इति. अग्रेऽपि "**ब्रह्मचारी गृहस्थः च वानप्रस्थो यतिः तथा एते गृहस्थप्रभवाः चत्वारः पृथगाश्रमाः. सर्वेऽपि क्रमशः ते-ते यथाशास्त्रं निषेविताः यथोक्तकारिणं विप्रं नयन्ति परमां गतिम्**" (मनुस्मृ.६।८७-८८) इति. तथा "**दशलक्षणकं धर्मम् अनुतिष्ठन् समाहितो वेदान्तं विधिवत् श्रुत्वा संन्यसेद् अनृणो द्विजः**" (मनुस्मृ.६।९४) इति. एतदेव याज्ञवल्क्येन तृतीयाध्याये अध्यात्मप्रकरणे संगृह्य उक्तं "**वनाद् गृहाद् वा कृत्वा इष्टिम्**" (याज्ञ.स्मृ.३।४।५६) इति. **याज्ञवल्क्यादिभिः** इति '**आदि**'शब्दो ऋष्यन्तरसमुच्चायकः. तथाच आचारमाधवापरार्कमदनपारिजातादिषु स्मृत्यन्तरम् "**ऋणत्रयम् अपाकृत्य निर्ममो निरहंकृतिः ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद् गृहाद्**" ( ) इति. कूर्मपुराणेऽपि "**अग्निम् आत्मनि संस्थाप्य द्विजः प्रव्रजितो भवेद् योगाभ्यासरतः शान्तो ब्रह्मविद्यापरायणः**" (कूर्मपुरा.२।२८।२) इति. तथा तत्रैव "**प्राजापत्यां निरूप्य इष्टिम् आग्नेयीम् अथवा पुनः अन्तःपक्वकषायो असौ ब्रह्माश्रम् उपाश्रयेद्**" (कूर्मपुरा.२।२८।४) इति. एकादशस्कन्धेच भगवान् "**यदा कर्मविपाकेषु लोकेषु निरयात्मसु विरागो जायते सम्यङ् न्यस्ताग्निः प्रव्रजेत् ततः, इष्ट्वा यथोपदेशं मां दत्वा सर्वस्वम् ऋत्विजे अग्नीन् स्वप्राणे आवेश्य निरपेक्षः परिव्रजेत्**" (भाग.पुरा.११।१८।१२-१३) अत्र मन्वादिवचनेषु

“**ऋणानि त्रीणि अपाकृत्य**” (मनुस्मृ.६।३५) इत्यादिना ऋणत्रयापाकरणोत्तरमेव संन्यासे अधिकारः तदनपाकृतवतः तत्प्रतिषेधो दुष्फलं च स्पष्टम् आघुष्टम्. ऋणत्रयञ्च तैत्तिरीयाः आमनन्ति “**जायमानो वै ब्राह्मणः त्रिभिः ऋणवा जायते, ब्रह्मचर्येण ऋषिभ्यो, यज्ञेन देवेभ्यः, प्रजया पितृभ्यः, एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी**” (तैत्ति.संहि.६।३।१०।५) इति. मन्त्रवर्णोऽपि तैत्तिरीयब्राह्मण-तृतीयकाण्ड-सप्तमाध्याये “**अनृणा अस्मिन् अनृणाः परस्मिन् तृतीये लोके अनृणाः स्याम. ये देवयानाः उत पितृयाणाः सर्वान् पथो अनृणाः आक्षीयेम**” (तैत्ति.ब्रा.३।७।९।८-९) इति. अन्यदपि ब्राह्मणम्. तैत्तिरीयारण्यकद्वितीयाध्याये “**सर्वान् लोकान् अनृणो अनुसंचरति**” (तैत्ति.आर.२।१५।१) इति. उक्तवचनेषु “**त्यक्त्वा संगान्**” (मनुस्मृ.६।३३) इत्यादिना दृढतरवैराग्यसम्पन्नस्यैव तत्र अधिकारो बोध्यते. वाजसनेयिब्राह्मणेऽपि आम्नायते “**एवञ्च एतं वै तम् आत्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय अथ भिक्षाचर्यं चरन्ति**” (बृह.उप.३।५।१) इति. तैत्तिरीयाणां नारायणोपनिषदि “**वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद् यतयः शुद्धसत्त्वाः**” (मुण्ड.उप.३।२।६) इति. वेदान्तविज्ञानाद् अर्थस्य सुनिश्चयोत्तरं संन्यासः श्रूयते. एतदेव अभिप्रेत्य विज्ञानेश्वरो विषयकषायपरिपाकात् पुनः मदोद्भवाभावनिश्चये प्रव्राजाधिकारं व्याचष्टे. मूले “**यावता कालेन**” इत्यादि “**चतुर्थाश्रमः**” इत्यन्तो मिताक्षराग्रन्थो अनूद्यते. आश्रमसमुच्चयपक्षे जाबालश्रुतौ च श्रूयते “**ब्रह्मचर्यं परिसमाप्य गृही भवेत् गृही भूत्वा वनी भवेद् वनी भूत्वा प्रव्रजेद्**” (जाबा.उप.४) इति. श्रुतिं प्रमाणयन्ति **जाबालश्रुतौ च** इति. ननु न इदम् ऐकान्तिकम् “**यदहरेव विरजेत् तदहरेव प्रव्रजेद्**” (जाबा.उप.४) इति जाबालश्रुत्या कालविलम्बननिषेधात्. नच इयं श्रुतिः “**तृतीयं भागम् आयुषः**” (मनुस्मृ.६।३३) इत्यादेः अनैकान्तिकत्वबोधिका वनस्थपरत्वेन संकोच्या. अतएव सप्तमस्कन्धद्वादशाध्याये “**चरेद् वने द्वादशाब्दान् अष्टौ वा चतुरो मुनिः. द्वौ एकं वा यथाबुद्धिः न विपद्येत कृच्छ्रतः**” (भाग.पुरा.७।१२।२२) इति पक्षान्तराणि स्मर्यन्ते इति वाच्यं; संकोचे मानाभावात्. अतएव जाबाला “**ब्रह्मचर्यं परिसमाप्य**” इत्यादिना

समुच्चयम् आम्नाय अनुपदं विकल्पमपि आमनन्ति “**यदिवा इतरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद् वा वनाद् वा**” (जाबा.उप.४) इति. एतदेव आश्रित्य याज्ञवल्क्योऽपि “**वनाद् वा गृहाद् वा**” (याज्ञ.स्मृ.३।४।५६) इति व्यचीक्लृपद् इति चेद् अत्र ब्रूमो विकल्पपक्षाद् अस्तु कथञ्चिद् ब्रह्मचर्यादपि प्रव्राजः परं वेदान्तश्रवणमननादिना द्रढिष्ठवैराग्यसंपन्नस्य अधीतसाङ्गवेदस्यैव वर्णिनः तत्र अधिकारो नतु अतिबाल्यात् संसारस्वरूपम् अविजानतो अनधिगतवैराग्यगन्धस्य अनधीताम्नायस्य. एतदेव दर्शयितुं विकल्पश्रुत्यर्थं स्मरति माधवीये अङ्गिराः “**संसारमेव निस्सारं दृष्ट्वा सारदिदृक्षया प्रव्रजति अकृतोद्वाहः परं वैराग्यम् आश्रितः**” (नारदपरि.उप.३।-१५) इति. तत्रैव नारदोऽपि “**प्रथमाद् आश्रमाद् वापि विरक्तो भवसागराद् ब्राह्मणो मोक्षम् अन्विच्छन् त्यक्त्वा संगान् परिव्रजेद्**” (   ) इति. उक्तश्रुतावपि “**यद् अहरेव विरजेद्**” (जाबा.उप.४) इति वैराग्यस्य अत्यावश्यकत्वम् उच्यतएव. विकल्पश्रुतावपि ‘इतरथा’पदस्य अर्थं वेदवेदान्तश्रवणादिना दृढतरवैराग्ये सति इति त्वदीया व्याचक्षते, नापि अविरक्ताधिकारप्रापकं किमपि प्रमाणम् उपलभामहे. अनुपनीतस्य अनधिकारन्तु विकल्पश्रुतिरेव ब्रह्मचर्यात् प्रभृति तदधिकारकथनमुखेन बोधयति. अन्यथा सावित्रीप्रवेश-प्रेषोच्चारादिलक्षण-वैदिकतदितिकर्तव्यतायाः “**सखे मां गोपाय**” (द्र.याज्ञ.स्मृ.मिता.३।४।५८) “**येन देवाः पवित्रेण**” (तैत्ति.ब्रा.१।४।८।६) इत्यादिदण्डपवित्रादिग्रहणमन्त्राणां च अप्राप्त्या संन्यासएव न उत्पद्येतेति, निर्विवादे अस्मिन् विषये किं बहुना! परेतु बहुषु श्रुतिषु ऋणापाकरणस्य आवश्यकत्वबोधनाद् मन्वादिभिः तथैव स्मरणात् च विकल्पश्रुतौ ‘ब्रह्मचर्य’शब्दो वैधुर्यपरः. “**ब्रह्मचर्यम् अहिंसा च सततं ब्रह्मचारिभिः**” इत्यादौ स्त्रीसंगराहित्ये तस्य रूढिदर्शनात्. एतदेव अभिप्रेत्य स्मरति माधवीये यमः “**पुनर्दारक्रियाभावे मृतभार्यः परिव्रजेद् वनस्थो धूतपापो वा परं पन्थानम् आश्रयेद्**” (   )इति अङ्गिरोवचनमपि एतेनैव समानार्थकम्. नारदवचनेऽपि ‘प्रथमाद् आश्रमाद्’ इति वैधुर्यलक्षकम्. अथवा बहुश्रुतिस्मृतिषु संन्यासाधिकारप्रापकतया वनाश्रमस्यैव उक्तत्वेऽपि दृढवैराग्योत्पत्तौ ततः प्रथमाद् आश्रमाद् गार्हस्थ्यादपि परिव्रजेद् इति तदर्थः. अतएव याज्ञवल्क्यो “**वनाद् गृहाद् वा**” (याज्ञ.स्मृ.३।४।५६)

इति पक्षद्वयमेव आह नतु ब्रह्मचर्यादपि इति. मनुरपि “**वनेषु च विहृत्य एवम्**” (मनुस्मृ.६।३३) “**ब्राह्मणः प्रव्रजेद् गृहात्**” (मनुस्मृ.६।३८) इति च पक्षद्वयमेव दर्शयति. अतो ‘ब्रह्मचर्य’ शब्दो न साक्षाद् वर्णित्वपरो बहूनाम् अनुग्रहस्य न्याय्यत्वाद् यदि श्रुत्यर्थः तथा अभविष्यत् कथं तर्हि “**यः कश्चित् कस्यचिद् धर्मो मनुना परिकीर्तितः. स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः**” (मनुस्मृ.२।७) इत्यादि वास्तवस्तवविषयः स न अवक्ष्यत् कथं वा प्रत्युत अत्यन्तं व्यगास्यत्? तस्माद् आश्रमचतुष्टयसमुच्चयः तत्त्रयसमुच्चयः “**ऐकाश्रम्यन्तु आचार्याः**” (गौ.गृ.सू.१।३।३५) इति गौतमोक्तो गार्हस्थ्येतराश्रमबाधो वा इति त्रयएव पक्षाः प्रामाणिककत्वाद् व्रीहियववद् इच्छया विकल्पन्ते इति इति मन्यन्ते.

अथ ब्रह्मचर्यात् प्रव्रज्योरीकारेऽपि श्रुतौ ‘यदि वा’ इत्यस्य नारदवचने ‘वापि’ इत्यस्य च अनादरार्थत्वम् आश्रित्य तत्पक्षस्य अतिगौणत्वं वर्णयन्ति. अतएव एकादशस्कन्धे भगवता “**आश्रमाद् आश्रमं गच्छेद् नान्यथा मत्परः चरेत्**” (भाग.पुरा.११।१७।३८) इति स्वपरायणस्य असौ पक्षः प्रत्यषेधि. सर्वमतेषु उपनयनात् प्राक्तु कामचारकामवादत्वादिकमेव प्रायो विधीयते, नतु प्रव्राजो नापि उपनीतस्यापि अनधीतविद्यस्य अधीतविद्यस्यापि अत्यन्तविरक्तस्य सः. नापि स्वप्रतिज्ञापालनार्थमेव जनकेन बालोऽपि अनुपनीतोऽपि अविरक्तोऽपि स्वेच्छया प्रव्राजनीय इति विधिः क्वापि उपलभ्यते. तस्मात् शास्त्रविरुद्धः संन्यासाभासएव अयम्. तदेतत् सर्वं हृदि कृत्वा आहुः **श्रुतिस्मृतिषु** इत्यादि :

(२) श्रुतिस्मृतिषु एवं कुत्रापि न प्रतिपादितं पिता बालं पुत्रम् अनुपनीतं परिव्राजयेद् इति. किञ्च तत्पित्रापि कनिष्ठपुत्रसद्भावे ज्येष्ठं ददता अनुचितम् आचरितम्. ज्येष्ठपुत्रस्य सर्वथैव अदातव्यत्वात्. तथाच मिताक्षरायाम् “अनेकपुत्रसद्भावेऽपि ज्येष्ठो न देयो ‘ज्येष्ठेन जातमात्रेण पुत्रीभवति मानवः’ (मनुस्मृ.९।१०६) इति तस्यैव

पुत्रकार्यकरणे मुख्यत्वात्'' (याज्ञ.स्मृ.मिता.२।८।१३०) इति.

(३) यत्तु जिज्ञासाधिकरणे भामत्यां ''**'जायमानो वै ब्राह्मणः त्रिभिः ऋणवा जायते' (तैत्ति.संहि.६।३।१०।५) इति गृहस्थः सम्पद्यमान इति व्याख्येयम् अन्यथा 'यदि वा इतरथा ब्रह्मचर्यादेव' (जाबा.उप.४) इति श्रुतिः विरुद्ध्येत**'' (ब्र.सू.शां.भा.भाम.१।१।१) इति अभाणि, तद् अविचारचारु, तथा सति गार्हस्थ्योत्तरम् आर्षऋणापाकरणाय ब्रह्मचर्यस्य गुरुकुलवासस्य च अनुष्ठेयतापत्तेः. ''**ब्रह्मचर्येण ऋषिभ्यः**'' (तैत्ति.संहि.६।३।-१०।५) इति अनुपदं श्रावणात्. नच इष्टापत्तिः, आरूढपातित्यप्रसङ्गात्. यथा आह दक्षः ''**त्रयाणाम् आनुलोम्यं स्यात् प्रातिलोम्यं न विद्यते. प्रातिलोम्येन यो याति न तस्मात् पापकृतमः**'' ''**यो गृहाश्रमम् आस्थाय ब्रह्मचारी भवेत् पुनः न यतिः न वनस्थः च स सर्वाश्रमवर्जितः**'' (दक्षस्मृ.१।१।१०) इति. एतदेव आश्रित्य पराशरव्याख्याने माधवः ''**यदि गृही कथञ्चित् प्रत्यवरुह्य ब्रह्मचारी भवेत् तदा असौ सर्वाश्रमबहिष्कृतः, आरूढपतितत्वात्. अतो न वनस्थादिभिः आश्रमवासिभिः शब्दैः अभिलप्यो भवति**'' (   ) इति आह. अयं प्रत्यवरोहाभावः च शङ्कराचार्यैः तृतीयस्य चतुर्थे पादे ''**तद्भूतस्यतु न अतद्भावो जैमिनेरपि नियमाऽतद्रूपाभावेभ्यः**'' (ब्र.सू.३।४।४०) इति अधिकरणे विचारितः. तत्रहि तद्भाष्ये ''**तथा हि 'अत्यन्तम् आत्मानम् आचार्यकुले अवसादयन्' (छान्दो.उप.२।२३।१) इति 'अरण्यम् इयाद् इति पदं 'ततो न पुनः एयाद्' इति उपनिषद्'**'' (ब्र.सू.शां.भा.३।४।४०) इत्यादि उक्तम्. नच 'ब्रह्मचर्यादेव' इत्यस्य अनुरोधाद् इदम् अन्यथा नेतव्यम्. एतदनुरोधेन तस्यैव वैधुर्यपरतया परैः अन्यथानयनात्. नच विनिगमनाविरहाद् अनिर्णयः शङ्क्यः, समानबलेन एकेन बहूनां बाधायोगात्, ऋणापाकरणावश्यकतायाः बहुत्र आम्नानात्. बहूनाम् अनुग्रहस्य न्याय्यत्वात् प्रव्राजकप्राप्यदेवयानपथानामपि अनृणगम्यताम्नानात् च. अथ यैः ब्रह्मचर्यात् प्रव्राजः उच्यते तैरपि वेदान्ताध्ययनादिना अत्यन्तविरक्तं किञ्चित्पुरुषधौरेयमेव अधिकृत्य उच्यते

इति अग्रे स्फुटिष्यति. ननु प्रकृते तथा संभवति सकलाध्ययनस्य उत्तरकालिकतायाः प्रस्तावनाकृतैव वक्ष्यमाणत्वात् छत्रचामरोरीकारादिना वैराग्याभावनिश्चयात् च. अनुपनीतस्यतु अत्यन्ताप्राप्तमेव एतद् इति प्रागेव अवोचाम. तत्पितृकर्तृकतत्प्रव्राजने दूषणान्तरम् आहुः **किञ्च तत्पित्रापि** इत्यादि **मुख्यत्वाद्** इति इत्यन्तम्. **मिताक्षरायाम्** इति व्यवहाराध्याये दायविभागप्रकरणे "**दद्याद् माता पिता वा अयम्**" (याज्ञ.स्मृ.मिता.२।८।१३०) इत्यस्य विवरणे इति भावः. "**अनेकपुत्रसद्भावे**" इत्यादिना "**मुख्यत्वाद्**" (याज्ञ.स्मृ.मिता.२।८।१३०) इत्यन्तो मिताक्षराग्रन्थएव. **मुख्यत्वाद् इति** "**कामजान् इतरान् विदुः**" (   ) इति स्मृत्या अवरजानाम् अमुख्यत्वबोधनाद् ज्येष्ठस्यैव तथात्वम् इति भावः. "**ज्येष्ठेन जातमात्रेण**" (मनुस्मृ.९।१०६) इति तु नवमाध्याये मनुवचनं तत्रहि "**ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः पितृणाम् अनृणः चैव स तस्मात् सर्वम् अर्हति. यस्मिन् ऋणं सन्नयति येन च आनन्त्यम् अश्नुते. सएव धर्मजः पुत्रः कामजान् इतरान् विदुः. पितेव पालयेत् पुत्रान् ज्येष्ठो भ्रातॄन् यवीयसः पुत्रवच्चापि वर्तेरन् ज्येष्ठे भ्रातरि धर्मतः. ज्येष्ठः कुलं वर्धयति विनाशयति वा पुनः. ज्येष्ठः पूज्यतमो लोके ज्येष्ठः सद्भिः अगर्हितः**" (मनुस्मृ.९।१०६-१०९) इति स्मर्यते. तथाच पित्रा धर्मजस्य ज्येष्ठस्य समर्पणे तस्य अनृणीभाव आनन्त्याशनकुलप्रतिष्ठादेः अभावात् तदर्पणमपि अत्यन्तानुचितमेव. अतएव बह्वृचब्राह्मणेऽपि सप्तमपञ्चिकायां हरिश्चन्द्रोपाख्याने "**सह ज्येष्ठं पुत्रं निगृह्णन् सन् उवाच ननु इमं नोएव न इमम् इति**" (   ) इत्यादि श्रूयते. अर्थस्तु वारुणपुरुषपश्वर्थम् अजीगर्तस्य सौयवसेः त्रिषु पुत्रेषु अन्यतमं शतेन चिक्रीषन् हरिश्चन्द्रपुत्रो रोहितः तेषु ज्येष्ठं निगृहाणः सन् उवाच "ननु इमं पुत्रम् आददीय" इति. तं क्रेष्यमाणस्य पिता प्रत्युवाच "नो एव इमं दास्यामि ज्येष्ठस्य अदेयत्वाद्" इति. 'एव'कारः सर्वथैव अदेयत्वबोधनार्थः. एतदेव लिङ्गम् आश्रित्य वीरमित्रोदयादिषु दानक्रयादिकं ज्येष्ठस्य प्रतिषिद्धम्. किञ्च कनिष्ठस्यापि आपद्येव दानम् "**माता पिता वा दद्यातां यम् अद्भिः पुत्रम् आपदि**" (मनुस्मृ.९।१६८) इति मनूक्तेः.

एतदेव आश्रित्य पूर्वोक्तस्थले विज्ञानेश्वरोऽपि “**आपद्ग्रहणाद् अनापदि न देयो दातुः अयं प्रतिषेधः**” (याज्ञ.स्मृ.२।८।१३०) इति आह. वीरमित्रोदयकारोऽपि “‘**आपदि’इत्युक्तेः अनापदि दातुः प्रत्यवायः**” ( ) इति आचष्टे. अपिच केनचिद् दीयमानः पुत्रादिरपि यतिना प्रतिग्राह्यः इति विधायकं वाक्यम् अन्वेष्टव्यम्. तत्र-तत्र श्रुतिस्मृतिषु तस्य वैणवदण्डकन्थादिस्वाश्रमलिङ्गातिरिक्तवस्तुपरिग्रहनिषेधात्. तथा पुत्रदानप्रतिज्ञापनमपि यतिवर्यस्य उचितं नवा इति चिन्त्यम् प्रत्याशावत्तापत्तेः. “**एकएव चरेद् भिक्षुः**” (भाग.पुरा.७।१३।३) इत्यादिबाधप्रसक्तेश्च.

> **(२) किञ्च “परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदम् आयात्” (मुण्ड.उप.१।२।१२) इत्यादिना “शान्तो दान्तः उपरतः तितिक्षुः समाहितः भूत्वा आत्मन्येव आत्मानं पश्येद्” (बृह.उप.४।४।२३) इत्यादिश्रुत्या च नित्यानित्यवस्तु-विवेक-इहामुत्रार्थफलभोगविराग- शमदमादिषट्कसम्पन्-मुमुक्षुत्वरूपसाधन-चतुष्टय- सम्पन्नस्यैव “तद्विज्ञानार्थ स गुरुमेव अभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्” (मुण्ड.उप.१।२।१२) इत्याद्युक्तरीत्या गुरुसमीपे गमनाधिकारो भवन्मते. नतु अनुपनीतस्य साधनचतुष्टयासम्पन्नस्य ऋणत्रयाविनिर्मुक्तस्य बालस्येति परस्परविरुद्धमेव एतत् सर्वम् अतो अर्थान्तरम् अनुमापयति. तद् उच्यते दुर्भिक्षत्याजितदेशेन बुभुक्षितेन बहुपुत्रेण देशाद् देशान्तरं भ्रममाणेन कुरुक्षेत्रम् आगतेन केनचिद् ब्राह्मणब्रुवेण उल्लंघितशास्त्रमर्यादेन ज्येष्ठः तनूजन्मा विक्रीतः, केनचित् कर्मन्दिना वणिग्वृत्त्युपजीविना क्रीतः इति अविरुद्धम्.**

(३) अपिच त्वन्मतरीत्यातु तादृशस्य बालस्य गुरूपसत्तिरेव असम्भाविता कुतस्तरां संन्यासः इति आशयेन आहुः **किञ्च परीक्ष्य लोकान्** इत्यादिना **ऋणत्रयाविनिर्मुक्तस्य बालस्य** इत्यन्तेन—अयम् अर्थः : “**वेदान्तविज्ञान-**

सुनिश्चितार्थाः संन्यासयोगाद् यतयः शुद्धसत्त्वाः’’ (मुण्ड.उप.३।२।६) इत्यत्र ‘‘**समिधो यजति तनूनपातं यजति इडो यजति बर्हिर् यजति स्वाहाकारं यजति**’’ (ऋक्.संहि..२।६।१।१) इत्यादिवत् पाठः क्रमनियामकतया अवगम्यते. तथाच वेदान्तविज्ञानोत्तरमेव संन्यासः. ‘‘**शान्ताः विद्वांसो भैक्षचर्यां चरन्तः**’’ (मुण्ड.उप.१।२।११) इति मुण्डकादिश्रुतिष्वपि तथैव निश्चीयते. नच अग्निहोत्रयवागूपाकन्यायेन ( ) पाठक्रमाद् आर्थक्रमस्य बलीयस्त्वम् आश्रित्य विपर्ययो अत्र शङ्क्यः. वाजसनेयिभिः ‘‘**एतं वै आत्मानं विदित्वा**’’ (बृह.उप.३।५।१) इति ‘क्त्वा’श्रुत्या स्पष्टमेव आत्मवेदनस्य भिक्षुचर्यापूर्वकालिकत्वबोधनात्. अतो ‘‘**दर्शपूर्णमासाभ्याम् इष्ट्वा सोमेन यजेत**’’ ( ) इत्यादिवत् श्रौतएव क्रमः. युक्तञ्च एतद् अन्यथा दृढतरवैराग्यानुदयाद्’’ इति विरक्तस्यैव संन्यासे अधिकारात् तद्रहितसंन्यासिनो अत्यन्तविगानात् च. वेदान्तविज्ञानञ्च गुरूपसत्त्येकसाध्यम्. सामगानां श्वेतकेतुविद्यायां गन्धारानीताभिनद्धाक्षपुरुषदृष्टान्तम् उपन्यस्य ‘‘**एवमेव इह आचार्यवान् पुरुषो वेद**’’ (छान्दो.उप.६।१४।२) इति श्रावणात्. उपसत्तिश्च विविदिषादिजन्या ‘‘**तद्विज्ञानार्थम्**’’ (मुण्ड.उप.१।२।१२) इति श्रुतेः. विविदिषाच वेदानुवचनयज्ञदानतपःप्रभृतिजन्या ‘‘**तम् एतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा अनाशकेन**’’ (बृह.उप.४।४।२२) इति तेषां तत्कारणत्वाम्नानात्. अतः पूर्वमेव वेदानुवचनयज्ञादि अपेक्ष्यते. अथ जन्मान्तरीयदृढतरयज्ञाद्यपूर्वसत्त्वेऽपि वेदानुवचनं वेदान्तव्यासङ्गः च एतज्जन्मीयएव अपेक्षितः. अतएव जिज्ञासासूत्रभाष्ये शङ्कराचार्याः ‘‘**धर्मजिज्ञासायाः प्रागपि अधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः**’’ (ब्र.सू.शां.भा.१।१।१) इति आहुः. अध्ययनादेव हि विविदिषानियतपूर्ववृत्तीनि नित्यानित्यवस्तुविवेकादीनि सम्पद्यन्ते. अतएव जिज्ञासासूत्रस्थ‘**अथ**’शब्दस्य आनन्तर्यार्थकत्वम् आश्रित्य तदवधित्वेन तदादिचतुष्टयं निरूपितं शङ्कराचार्यैः. तथाहि : तद्भाष्ये ‘‘‘**अथ**’**शब्दः आनन्तर्यार्थः परिगृह्यते**’’ (ब्र.सू.शां.भा.१।१।१) इत्यादिना. प्राचीनाभिमतम् अधिकारार्थत्वं प्रतिषिध्य मङ्गलस्य आर्थिकत्वम् अर्थान्तरासम्भवं च प्रदर्श्य कैश्चिद् अभिप्रेतं स्वाध्यायानन्तर्यं कर्मावबोधानन्तर्यं च निराकृत्य उच्यते ‘‘**तस्मात् किमपि वक्तव्यं यदनन्तरं ब्रह्मजिज्ञासा उपदिश्यते, उच्यते**

नित्यानित्यवस्तुविवेकः इहामुत्रार्थफलभोगविरागः शमदमादिसाधनसम्पत् मुमुक्षुत्वं च. तेषुहि सत्सु प्रागपि धर्मजिज्ञासायाः ऊर्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च, न विपर्यये. तस्माद् ‘अथ’शब्देन यथोक्तसाधनसम्पपत्त्यानन्तर्यम् उपदिश्यते'' (ब्र.सू.शां.भा.१।१।१) इति. अत्र भामत्यां **''‘तस्मात् किमपि वक्तव्यम्’ इति. यस्मिन् असति ब्रह्मजिज्ञासा न भवति, सतितु भवन्ती भवत्येव इत्यर्थः''** (ब्र.सू.शां.भा.भाम.१।१।१) इत्यादिना, **''नित्यानित्यवस्तुविवेकः इत्यादि नित्यानित्ययोः वसतीति नित्यानित्यवस्तु तद्धर्मः नित्यानित्ययोः धर्मिणोः तद्धर्माणां च विवेको नित्यानित्यवस्तुविवेकः...इहामुत्रार्थभोगविरागः अर्थ्यते प्रार्थ्यते इति अर्थः फलम् इति यावत्, तस्मिन् विरागो अनाभोगात्मिकोपेक्षाबुद्धिः...ततः शमदमादिसाधनसम्पद् वैराग्यहेतुको मनोविजयः शमः इति वशीकारसंज्ञः इतिच आख्यायते. विजितञ्च मनः तत्त्वविषयविनियोगयोग्यतां नीयते, सेयम् अस्य योग्यता दमः. ‘आदि’ग्रहणेन च विषयतितिक्षा-तदुपरम-तत्त्वश्रद्धाः संगृह्यन्ते. ततो अस्य संसारबन्धनाद् मुमुक्षा भवति इत्याह (मुमुक्षत्वं च) तस्य च नित्यशुद्धमुक्तसत्यस्वभावब्रह्मज्ञानं मोक्षस्य कारणम् इति उपश्रुत्य तज्जिज्ञासा भवति तस्मात् तेषामेव आनन्तर्यम्''** (ब्र.सू.शां.भा.भाम.१।१।१) इति व्याख्यायि. अत्र मूलभूताम्नायस्तु यथा **''तद् यथा इह कर्मचितो लोकः क्षीयते''** (छान्दो.उप.८।१।६) इत्यादिषु स्वर्गादिसुखस्य अनित्यत्वम् आम्नायते. मुण्डकेष्वपि प्रथममुण्डकद्वितीयखण्डे **''प्लवाः ह्येते अदृढाः यज्ञरूपाः''** (मुण्ड.उप.१।२।७) इत्यादिना **''नाकस्य पृष्ठे ते सुकृते अनुभूत्वा इमं लोकं हीनतरं च आविशन्ति''** (मुण्ड.उप.१।२।१०) इत्यन्तेन स्वर्गादिसुखस्य क्षयिताम् आम्नाय **''तपःश्रद्धे ये हि उपवसन्ति अरण्यम्''** (मुण्ड.उप.१।२।११) इति ऋचा निवृत्तिनिष्ठस्य परमपुरुषार्थसिद्धिम् उक्त्वा उच्यते **''परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदम् आयान् नास्ति अकृतः कृतेन. तद्विज्ञानार्थं स गुरुमेव अभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्. तस्मै स विद्वान् उपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय. येन अक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्''** (मुण्ड.उप.१।२।१२-१३) इति. अत्र **‘स’** इत्यनेन कर्मचितलोकपरीक्षया निर्विण्णो ब्राह्मणः परामृश्यते.

‘प्रोवाच’ इति लकारव्यत्ययो “**व्यत्ययो बहुलम्**” (पाणि.सू.३।१।८५) इति अनुशासनात्. प्रब्रूयाद् इति अर्थः. स्पष्टञ्च इदं शाङ्करोपनिद्भाष्येऽपि अत्रापि श्रद्धापूर्वकोपसत्तिप्रशान्तचित्तत्वादिगुणविशिष्टं प्रत्येव उपदेशः आचार्येण कर्तव्यः इति विधीयते नतु तद्रहितं प्रति. अतएव शमदमादिसम्पन्नस्यैव आत्मदर्शनविधिं काण्वाः दर्शयन्ति “**तस्माद् एवं विच्छान्तो दान्तः उपरतः तितिक्षुः समाहितः भूत्वा आत्मन्येव आत्मानं पश्यति**” (बृह.उप.४।४।२३) इति. इह तस्माद् इति प्रकृतप्रशंसापरिग्रहाद् विधित्वं स्वीकृतम्. तैत्तिरीयसंहिता “**तस्मात् पूषाप्रपिष्टभागो अदन्तको हि**” (तैत्ति.संहि.२।६।८) इत्यादिवद् अपूर्वत्वाच्च. माध्यन्दिनास्तु “**तस्मात् शान्तो दान्तः उपरतः तितिक्षुः श्रद्धाचित्तो भूत्वा आत्मन्येव आत्मानं पश्येत् सर्वम् आत्मनि पश्यति**” (बृह.उप.४।४।२३) इति पठन्ति. शमादिस्वरूपन्तु रत्नप्रभायां दर्शितम्. “**लौकिकव्यापाराद् मनसो उपरमः शमः, बाह्यकरणानाम् उपरमो दमः, ज्ञानार्थं विहितनित्यादिकर्मसंन्यासो उपरतिः, शीतोष्णादिद्वन्द्वसहनं तितिक्षा, निद्रालस्यप्रमादत्यागेन मनःस्थितिः समाधानम्, सर्वत्र आस्तिकता श्रद्धा, एतत् षट्कप्राप्तिः शमादिसम्पत्**” (ब्र.सू.शां.भा.र.१।१।१) इति दिक्. अत्र उपरतिस्वरूपं चिन्त्यम् इति अन्यत्र विस्तरः. अतो नित्यानित्यवस्तुविवेकादिचतुष्कसम्पन्नेनैव ब्रह्मविविदिषा कर्तव्या इति प्रथमसूत्रस्य अर्थं वर्णयन्ति शङ्कराचार्याः “**तस्माद् यथोक्तसाधनसम्पत्त्यनन्तरं ब्रह्मजिज्ञासा कर्तव्या. ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा ब्रह्म च वक्ष्यमाणलक्षणम्**” (ब्र.सू.शां.भा.१।१।१) इत्यादि. उपसत्तिश्च विविदिषया तस्यैव च उपदेशार्हत्वम् “**नच अशुश्रूषवे वाच्यम्**” (भग.गीता १८।६७) इति अजिज्ञासमानाय उपदेशस्य प्रतिषेधात्. तथाच प्रकृते यथोक्तविवेकवैराग्यादिसाधनचतुष्टयाभावाद् जिज्ञासानुदयात् च तादृशबालस्य गुरूपसत्तिरेव भवन्मतरीत्या अत्यन्तविरुद्धा. वस्तुतस्तु ‘अथ’शब्दस्य अनन्तर्यार्थकत्वे अधिकाकाङ्क्षाध्याहारादिदोषान् विवेकादीनामानन्तर्यावधित्वेन परिग्रहे चक्रकापत्तिगर्भान्योन्याश्रयादिदोषांश्च प्रदर्श्य तस्य अधिकारार्थत्वमेव समर्थितम् आकरे, प्रकाशे च. तदेतद् अभिप्रेत्य मूले **भवन्मते** इति अवादि. सर्वमतेषु स्वयम् अविरक्तस्य अविविदिषोः अनुपनीतत्वाद्यधिकारप्रतिबन्धकधर्मशालिनो बालस्य परेच्छया

प्रव्राजार्थम् उपसत्तिस्तु सर्वथा शास्त्रविरुद्धैव इति दिक्. तदेतत् सर्वम् अनुसन्धाय उक्तं **किञ्च परीक्ष्य** इत्यादि **बालस्य** इत्यन्तम्. अत्र **इत्यादिना** इति "**तद्विज्ञानार्थम्**" (मुण्ड.उप.१।२।१२) इत्यस्यादिभागेन इति अर्थः. तृतीयान्तद्वयं प्रकृतश्रुत्युक्तोपसत्तौ साधनचतुष्टयसंपन्नस्यैव अधिकारे हेतुबोधकम्.

अथ **तत्रच प्रायेण अन्योन्यं विरुद्धानि वाक्यानि अर्थान्तरप्रतिपादकानि** (पृ.१५) इति प्रतिज्ञावाक्यानुरोधात् परस्परविरुद्धत्वम् उपपाद्य वास्तवार्थभिन्नार्थप्रतिपादकत्वं स्पष्टयन्ति **अतो अर्थान्तरम्** इत्यादिना **अविरुद्धम्** इत्यन्तेन. **तदुच्यते** इति. **तद्** = अर्थान्तरम्. तदुक्तार्थातिरिक्तो वास्तवो भूतार्थः इति यावत्. **भ्रममाणेन** इति भ्रमणशीलेन. "**ताच्छील्यवयोवचनशक्तिष्विति चानश्**" (पाणि.सू.३।२।१२९) आत्मानं मण्डयमान इत्यादिवत्. **ब्राह्मणब्रुवेण** इति 'ब्राह्मण'इति उच्यते असौ ब्राह्मणब्रुवः, नतु वस्तुतः तल्लक्षणाक्रान्तः. बाहुलकात् कर्मणि पचाद्यच्. घरूपेत्यादिना निपातनाद् वच्यादेशगुणयोः अभावः. तल्लक्षणन्तु दानचन्द्रिकादिषु व्यासो "**गर्भाधानादिभिः युक्तः तथा उपनयनेन च न कर्मविद् नचाधीतः स भवेद् ब्राह्मणब्रुवः/ज्ञेयो ब्राह्मणब्रुवः**" (   ) इति. उल्लङ्घितशास्त्रमर्यादेन इति. पुत्रक्रयज्येष्ठक्रयादिप्रतिषेधोल्लङ्घनात् तथा इति भावः.

(२) काश्मीरदेशे प्रबलदुर्भिक्षम् अभूत् सन्ति च कुरुक्षेत्रे व्यवहारकर्त्तारो धनिकाः कर्मन्दिनः इति अबाधितएव बोधः

(३) प्रकृतानुमितिसाधकं विश्वजनीनम् इतिवृत्तम् आहुः **काश्मीरे** इत्यादिना **बोधः** इत्यन्तेन, तथाच शिष्टकिंवदन्त्या निर्विचिकित्सप्रतिपन्नो अयम् अर्थो अनुमितिसम्प्रतिपत्त्या सार्वजनिकनिश्चयगोचरो भविष्यति इति किंबहुना. **व्यवहारकर्तारः** इति "**घटानां निर्मातुः त्रिभुवनविधातुश्च कलहो**" इतिवत् शेषषष्ट्या समासः. तेन "**तृजकाभ्यां कर्तरि**" (पाणि.सू.२।२।१५)

इत्यस्य अविषयः. किञ्च चतुर्विधेषु भिक्षुषु कतमो अयं भिक्षुः ? तेषां चातुर्विध्यन्तु माधवीये हारीतः ‘‘**चतुर्विधा भिक्षवस्तु प्रोक्ताः सामान्यलिङ्गिनः. तेषां पृथक् पृथग् ज्ञानं वृत्तिभेदात् कृतं श्रुतम्. कुटीचरो बहूदश्च हंसश्चैव तृतीयकः. चतुर्थः परमो हंसो यो यः पश्चात् स उत्तम**’’ इति. पितामहोऽपि ‘‘**चतुर्विधा भिक्षवस्तु प्रख्याता ब्रह्मणो मुखात् कुटीचरो बहूदको हंसश्चैव तृतीयकः चतुर्थः परहंसश्च संज्ञाभेदैः प्रकीर्तिताः**’’ (हारि.स्मृ.) इति. एवं बृहत्पराशरादिस्मृतिष्वपि द्रष्टव्यम्. तत्र न तावद् आद्यः, प्रजापतिना ‘‘**कुटीचरो नाम स्वगृहे वर्तमान आहिताग्निषु भिक्षां भुञ्जानो अपगतकामक्रोधलोभमोहो अहंकारवर्जितो य आत्मानुग्रहं कुरुते**’’ ( ) इति. वृद्धपराशरेणच ‘‘**कुटीचरा नाम पुत्रादिभिः कुटीं कारयित्वा कामक्रोधलोभमोहमदमात्सर्यभयादीन् हित्वा विधिवत् संन्यासं कृत्वा**’’ ( ) इत्यादिना दर्शितलक्षणस्य अप्रवेशात्. नापि द्वितीयः, ‘‘**स्कन्देन बहूदकश्च संन्यस्य बन्धुपुत्रादिवर्जितः सप्तागारं चरेद् भैक्षम् एकान्नंच परित्यजेत्. गोवाल रज्जुसम्बद्धत्रिदण्डं शिक्यमुद्धतं जलपात्रं पवित्रं च खनित्रीं चकृपाणिकां शिखां यज्ञोपवीतं च देवताराधनं चरेत्**’’ ( ) इति. वृद्धपराशरेणापि ‘‘**तत्र बहूदका नाम त्रिदण्ड-कमण्डलु-पद्म-पवित्रकाषायवस्त्रधारिणः**’’ ( ) इत्यादिना प्रोक्ततदसाधारणधर्माणाम् अभावात्, माधवादिभिः कुटीचर-बहूदकयोः नियतधर्मत्वेन व्यवस्थापितत्रिदण्डशिखासूत्राद्यभावात् च. वस्तुतस्तु त्रिदण्डधारणमेव मुख्यम्, मनुयाज्ञवल्क्यादिभिरेकदण्डस्य अनुक्तत्वात् तथाच मनुः ‘‘**यस्य एते नियताः बुद्धौ स त्रिदण्डि इति च उच्यते**’’ (मनुस्मृ.१२।१०) इति आन्तरनियमवदेव वास्तवसंन्यासित्वं वदन् संन्यासस्य त्रिदण्डत्वं बोधयति. याज्ञवल्क्योऽपि ‘‘**सर्वभूतहितः शान्तः त्रिदण्डी सकमण्डलुः. एकारामः परिव्रज्य भिक्षार्थी ग्रामम् आश्रयेत्.**’’ (याज्ञ.स्मृ.३।४।५८) मिताक्षरादिषु स्मृत्यन्तरं ‘‘**त्रीन् वैणवान् दण्डान् मूर्द्धप्रमाणान् दक्षिणेन पाणिना धारयेत् सव्येन सोदकं कमण्डलुम्**’’ (द्र.याज्ञ.स्मृ.मिता.३।४।५८) इति. देवलोऽपि ‘‘**काषायी त्रिदण्डी सकमण्डलुपवित्रपादुकासनकन्थामात्रः**’’ (द्र.याज्ञ.स्मृ.मिता.३।४।५८) इति. माधवीये हारीतदत्तात्रेयपितामहाः कुटीचरादीन् चतुरोऽपि

उपन्यस्य सर्वेषां त्रिदण्डमेव विदधते “**वृत्तिभेदेन भिन्नाः च नैव लिङ्गेन ते द्विजाः. लिङ्गन्तु वैणवं तेषां त्रिदण्डं सपवित्रकम्**” (   ) इति. दक्षोऽपि सर्वेषाम् आश्रमाणां क्रमात् लक्षणम् अभिदधानः “**त्रिदण्डेन यतिश्चैव**” (   ) इति यतेः लक्षणम् अभिधाय त्रिदण्डरहितस्य यतित्वं निषेधति “**यस्य एतल्लक्षणं नास्ति प्रायश्चित्ती नच आश्रमी**” (दक्षस्मृ.१।१३) इति. यत्तु क्वचिद् एकदण्डवचनं तत्तु अपहारादिना त्रिदण्डनाशे तत्-त्रयलाभपर्यन्तम् एकेन निर्वाहाभिप्रायम्. यथा आह अतिथिः “**यावद् न स्युः त्रयो दण्डाः तावद् एकेन पर्यटेद्**” (   ) इति. हारीतोऽपि “**नष्टे जलपवित्रे वा त्रिदण्डं वा प्रमादतः एकन्तु वैणवं दण्डं पालाशं बैल्वमेव वा गृहीत्वा विचरेत् तावद् यावद् लभेत् त्रिदण्डकम्**” (   ) इति. यत्तु “**एकदण्डी वेति बौधायना**” (   ) इति स्मरणं यच्च “**चतुर्थम् आश्रमं गच्छेद् ब्रह्मविद्यापरायणः एकदण्डी त्रिदण्डी वा सर्वसंगविवर्जितः**” (   ) इति चतुर्विंशतिमते विकल्पाभिधानं तदपि एतेनैव व्याख्यातम्. यत्तु केचित् “**वाग्दण्डो अथ मनोदण्डः कायदण्डः तथैवच तस्य एते नियता बुद्धौ स त्रिदण्डी इति च उच्यते. त्रिदण्डम् एतद् निक्षिप्य सर्वभूतेषु मानवः कामक्रोधौतु संयम्य ततः सिद्धिं निगच्छति**” (मनुस्मृ.१२।१०-११) इति द्वादशाध्याये मनुवचनाद्, “**वाग्दण्डो अथ मनोदण्डः कायदण्डः तथैवच यस्य एते निहिता दण्डाः त्रिदण्डी इति स उच्यते**” (मनुस्मृ.१२।१०) इति दक्षवचनात् च, सर्वेषां त्रिदण्डवचनानि वाग्दण्डादिविषयाणि इति वदन्ति, तन्न; तथासति कुटीचर-बहूदकयोरपि एकदण्डप्रसंगात्, तयोः त्रिदण्डावश्यकतायाः स्वयम् अंगीकारात्. अथ शास्त्रबलात् तयोः वेणुत्रयधारणमपि आवश्यकम् इति चेत् तर्हि सर्वेषां तथा अस्तु; पूर्वोक्तशास्त्रबलात् “**परः परमहंसस्तु तुर्याख्यश्रुतिः अब्रवीत्. यमैश्च नियमैः युक्तो विष्णुरूपी त्रिदण्डभृद्**” इति, पितामहेन परमहंसस्यापि त्रिदण्डधारणविधानात् च. तथाच वाग्दण्डादिरहितस्य केवल बाह्यत्रिदण्डधारणाद् न ‘त्रिदण्डि’व्यपदेशार्हत्वम् इत्येव मनु-दक्षवचसोः आशयः. मनुना “**न लिङ्गं धर्मकारणम्**” (मनुस्मृ.६।६६) इति केवललिङ्गस्य नैष्फल्यकथनात्, याज्ञवल्क्येनापि

“कर्तव्या आशयशुद्धिस्तु भिक्षुकेण विशेषतः ज्ञानोत्पत्तिनिमित्तत्वात् स्वातन्त्र्यकरणाय च इति” (याज्ञ.स्मृ.३।४।६२) तथा **“न आश्रमः कारणं धर्मे क्रियमाणो भवेद्हि स”** (याज्ञ.स्मृ.३।४।६५) इतिच स्मरणात्, श्रीभागवतेऽपि एकादशस्कन्धाष्टादशाध्याये **“मौनानीहानिलायामाः दण्डाः वाग्-देह-चेतसाम् नहि एते यस्य सन्ति अङ्ग! वेणुभिः न भवेद् यतिः”** (भाग.पुरा.११।१८।१७) इति कथनात् च. **“नतु लिङ्गन्तु वैणवं तेषां त्रिदंडं सपवित्रकम्”** (   ) इति स्पष्टम्. वैणवदण्डत्रयस्य चतुर्णां लिङ्गताधानं वाग्दण्डादिपरतया नेतुं शक्यम्. पराशरमाधवीये कालिकापुराणे **“वैणवाः ये स्मृताः दण्डाः लिङ्गमात्रप्रबोधकाः लिङ्गव्यक्त्यैहि धार्याः ते न पुनः धर्महेतवः. कायिकाः ये बुधैः नित्यं नृणां पापप्रमोक्षणात् जितेन्द्रियैः जितक्रोधैः धार्याः वै तत्त्वदर्शिभिः”** (   ) इति बाह्याभ्यन्तराणाम् उभयेषां धारणविधानाच्च.

अथवा, अस्तु हंसपरमहंसयोः कथंचित् त्रिदण्डेन सह एकदण्डस्य विकल्पः. विष्णुबौधायनाभ्याम् **“एकदण्डी भवेद् वापि त्रिदण्डी वा मुनिः भवेद्”** (   ) इति व्यासेनापि **“त्रिदण्डम् एकदण्डं वा व्रतम् आस्थाय तत्त्ववित् पर्यटेत् पृथिवीं नित्यं वर्षाकाले स्थिरी भवेद्”** (   ) इति स्मरणात्. नतु हंसादेः त्रिदण्डधारणं प्रतिषेद्धुं शक्यम् इति अन्यद् एतत्. अथ परिशेषात् त्वया हंसः परमहंसो वा स वक्तव्यः. तत्रापि न आद्यः, कुटीचराद्यवस्थोत्तरं तीव्रतरवैराग्ये सत्येव तत्र अधिकारात्. तथाच माधवीये तत्र अधिकारिविशेषः पुराणे दर्शितः **“विरक्तिः द्विविधा प्रोक्ता तीव्रा तीव्रतरा इतिच सत्यामेव तु तीव्रायां न्यसीद् योगी कुटीचरः शक्तो बहूदके तीव्रतरायां ‘हंस’संज्ञिते मुमुक्षुः परमे हंसे साक्षाद् विद्वानसाधने”** (परा.उपपुरा.९।८०-८२) इति. प्रकृतेतु परेण स्वेच्छया प्रव्राजितस्य न विरक्तेः गन्धोऽपि कुतस्तरां तीव्रा सा कुतस्तमां च तीव्रतरेति दूरापास्तैव हंसत्वाद्यधिकारः. अपिच मदनपारिजाते ब्रह्मवैवर्ते **“वैराग्योत्पत्तिमाने च संन्यासे परियुज्यते.” “रागवान् नतु विप्रोऽपि वेदवेदाङ्गवित्तमः”(   )**

इति विदुषोऽपि अविरक्तस्य तत्र अनधिकारः, किमुत अविदुषो बालस्य. किञ्च हंसवृत्तिः माधवीये स्कन्दपुराणे ‘‘**हंसः कमण्डलुं शिक्यं भिक्षापात्रं तथैव च कन्थां कौपीनम् आच्छाद्य अरङ्गवस्त्रं बहिःपटम्**’’ (   ) इत्यादिना तदितरापरिग्रहदेवताध्यानार्चनादिरूपाः दर्शिताः. विष्णुरपि ‘‘**यज्ञोपवीतं दण्डं च वस्त्रं जन्तुनिवारणम् तावान् परिग्रहः प्रोक्तो न अन्यो हंसपरिग्रह**’’ (   ) इति. पितामहोऽपि ‘‘**हंसः तृतीयो विज्ञेयो भिक्षुः मोक्षपरायणः. नित्यं त्रिषवणस्नायीतु आर्द्रवासा भवेत् सदा. चान्द्रायणेन वर्तेत यतिधर्मानुशासनात्. वृक्षमूले वसेद् नित्यं गुहायां वा सरित्तटे**’’ (   ) इति. बौधायनोऽपि ‘‘**हंसः कमडलुं शिक्यं दण्डं पात्राणि बिभ्रतः. ग्रामतीर्थे एकरात्राश्च नगरे पञ्चरात्रकाः त्रिषड्रात्रोपवासाः च पक्षमासोपवासिनः कृच्छ्रसान्तपनाद्यैश्च मन्त्रैः कृशवपुर्धराः**’’ (   ) इति प्रकृतपुरुषेः तु तद्विरुद्धा छत्रचामरादिपरिग्रहराजसेवा-नगरनिवासादिरूपा वृत्तिः प्रस्तावनाकृतैव वक्ष्यतेति न तत्र तत्त्वसम्भावना; नापि अयं परमहंसः, तद्वृतेः अभावात्. सापि स्कन्दपुराणे प्रतिपादिता ‘‘**कौपीनाच्छादनं वस्त्रं कन्थां शीतनिवारिणीम् अक्षमालां च गृह्णीयाद् वैणवं दण्डम् अव्रणम् माधूकरम् एकान्नं परहंसः समाचरेद्**’’ (   ) इति. ‘दण्डम्’इति एकवचनं जात्यभिप्रायाद् विकल्पाभिप्रायाद् वा. एवमादिप्रतिपादितहंसधर्माभावाद् न स तथा. अधिकन्तु अग्रे वक्ष्यते. तस्माद् आश्रमपरिभ्रष्टएव अयम् इति निगर्वः.

(१) [सच प्राक्तन-संस्कार-बलाद् अल्पेनैव कालेन अधिगत-पाणिनीय-गोनर्द्दीय-शास्त्र-सर्वस्वो नवद्वीप-गमनेन सम्पादित-कणभुक्-चरणाक्ष-सिद्धान्तसम्पद् भाट्ट-प्राभाकरमत-पारावार-पारदृश्वा व्याससूत्र-शारीरकादि-निखिल-निगमान्त-पयःपयोधि-पारीणः काश्यादि-पत्तनेषु स्वदिग्विजयं नाटयन् दिग्गजइव देशिकमण्डलाखण्डल-श्रीशंकराचार्य-सिद्धान्त-सन्मार्गा-ऽवरोधिनो वादि-विटपान् आमूलं समुत्पाटयन् तत्तदेश-क्ष्मापाल-पूजित-पादपद्मो-

ऽनेक-भूजानिलब्धछत्र-चामरा द्यखिल-राजचिह्नः उत्तर-दिक्स्थ-शंकराचार्याभिमानिताम् उद्वहन् सकल-सद्गुणरत्न-रोहण-गिरिः 'सदानन्दगिरिरि'त्यभिख्याम् अलंकुर्वन् निखिल-देशावलोकन-कौतुकी हरिच्चक्र-चंक्रमण-क्रमेण समाससाद मेदपाट-विषय-राजधानीम्.]

(२) सच अप्राप्तगार्हस्थ्यसुखो, विधिं विनैव संन्यासाश्रमपरिग्रहाद् अप्राप्ततत्फलः च उभयभ्रष्टएव. अतो युक्तमेव एतादृशस्य महतां निन्दनम् एतादृशाचरणञ्च; परन्तु, एतादृशस्य विद्यालाभः इति आश्चर्यम्! प्रारब्धकर्मणो बलीयस्त्वादेव तल्लाभः. अतएव तेन उक्तं सच प्राक्तनसंस्कारवशाद् (बलाद्?) **इति. तत्र व्याससूत्रशारीरकाध्ययनस्य ब्रह्मविचाररूपत्वाद् उपयोगित्वेऽपि व्याकरण-न्याय-वैशेषिक-मीमांसाध्ययनं संन्यासाश्रमस्थानां विक्षेपकारित्वाद् अनुचितमेव. उक्तञ्च तन्मतानुसारिभिः ''कृषि-वाणिज्य-सेवादौ काव्य-तर्कादिकेषु च विक्षिप्यते प्रवृत्ता धीः, तैः तत्त्वस्मृत्यसम्भवात्''** (पञ्चद.सप्त.तृप्ति) **इति.**

(३) अथ प्रस्तावनायां सच प्राक्तन... इत्यादिना सम्बभूवुः इत्यन्तेन दर्शितायां तत्प्रशंसायां कल्पितत्वम् आश्रमविरुद्धत्वं च उद्घाटयन्ति **सच अप्राप्तगार्हस्थ्यसुखः** इत्यादिना **अग्रे वक्ष्यन्ते** (मु.पृ.४१) इत्यन्तेन. **अप्राप्तगार्हस्थ्यसुख...** इत्यादि. षष्ठस्कन्धे दक्षवचनेषु **''नानुभूय न जानाति पुमान् विषयतीक्ष्णताम्''** (भाग.पुरा.६।५।४१) इत्यादिकथनाद् धर्मतो गार्हस्थ्यानुभवमन्तरा आहत्य संन्यसने कथञ्चित् कर्मेन्द्रियसंयमनेऽपि श्रवणदर्शनादिजन्य-विषयसंस्कार-विशिष्टमनसा स्मरणावश्यम्भावाद् मिथ्याचारत्वमेव आपद्यते. **''कर्मेन्द्रियाणि संयम्य''** (भग.गीता ३।६) इति भगवद्वाक्यात्. वस्तुतस्तु अवैधप्रव्राजाश्रयणात् तदाश्रयणोत्तरमपि तद्धर्मानाचरणात् तद्विरुद्धधर्माचरणात् च पातित्यप्रसक्त्या शास्त्रोक्तं संन्यासफलम् अलभमानो

गार्हस्थ्य-भैक्षवोभयाश्रमतः उभयलोकतः च परिभ्रष्टएव. यथा आह एकादशस्कन्धे भगवान् “**यस्तु असंयतषड्वर्गः प्रचण्डेन्द्रियसारथिः ज्ञानवैराग्यरहितः त्रिदण्डम् उपजीवति, सुरान् आत्मानम् आत्मस्थं निह्नुते मां च धर्महा, अविपक्वकषायो अस्माद् अमुष्मात् च विहीयते**” (भाग.पुरा.११।१८।४०-४१) इति. माधवीयेच ज्ञानादिरहितप्रव्राजस्य फलम् आम्नायते “**काष्ठदण्डो धृतो येन सर्वाशी ज्ञानवर्जितः, स याति नरकान् घोरान् महारौरवसंज्ञितान्**”(परमहंस.उप.३) इति. तत्रैव स्मृतावपि “**एकदण्डं समाश्रित्य जीवन्ति बहवो नराः, नरके रौरवे घोरे कर्मत्यागात् पतन्ति ते**”(   ) इति. निर्णयसिन्धावपि इदम् उदाहारि “**काष्ठदण्डो धृतो येन**” (परमहंस.उप.३) इति तु यमवचनत्वेन समग्राहि.

महतां निन्दनम् इति. इदं सहस्राक्षे शप्तैः पुरा ब्राह्मणैः वल्लभीकृतं विद्वन्मण्डनं इत्यादौ अतिस्फुटीभविष्यति. **एतादृशाचरणम्** इति, विद्योपजीवनराजसेवादिप्रतिषिद्धाचरणम्. स्वस्य तत्सदृशदुराग्रहलेशस्यापि अभावात् तस्य लेखानुमितं वैदुष्यं साश्चर्यं स्वीकुर्वन्ति **परन्तु** इत्यादिना. **तेन** इति प्रस्तावना कृता. प्रस्तावनायां सच प्राक्तने ...पयःपयोधिपारीणः इत्यन्तेन दर्शितं दूषयन्ति तत्र **व्याससूत्र...** इत्यादिना **तत्त्वस्मृत्यसम्भवाद् इति** इत्यन्तेन. अयम् अत्र आशयो : यतेः व्याकरणादिबहुग्रन्थाभ्यासो न्यायाद्यसच्छास्त्रव्यासङ्गः च नैव युक्तः. “**नाभ्यसेद् बहून् शब्दान् वाचोविग्लापनं हि तत्**” (बृह.उप.४।२१) इति प्रतिषेधात्. श्रीभागवतेच सप्तमस्कन्धे त्रयोदशाध्याये यतिधर्मानुपक्रम्य नारदो “**न असच्छास्त्रेषु सज्जेत नोपजीवेत जीविकां. वादवादान् त्यजेत् तर्कान् न पक्षं कञ्चन संश्रयेत्. न शिष्यान् अनुबध्नीत ग्रन्थान् नैव अभ्यसेद् बहून्. न व्याख्याम् उपयुञ्जीत नारम्भान् आनारभेत् क्वचित्**” (भाग.पुरा.७।१३।७-८) इति. किञ्च यतेः अध्ययनमेव प्रतिषिध्यते, यथा आह पराशरमाधवीये दक्षो “**न अध्येतव्यं न वक्तव्यं न श्रोतव्यं कदाचन एतैः सर्वैः सुनिष्णातो यतिः भवति नेतर**” (कूर्मपुरा.२।२८।१३) इति. बह्वृचशाखायामपि तृतीयारण्यके द्वादशखण्डे “**एतद्ध स्म वै तद्विद्वांस आहुः ऋषयः कावषेयाः किमर्था वयम् अध्येष्यामहे**

किमर्था वयं यक्ष्यामहे” (ऐते.ब्रा.३।२।६) इति. न्यायादीनाम् असच्छास्त्रत्वन्तु चतुर्लक्षण्याम् अविरोधस्य प्रथमपादे तर्काप्रतिष्ठानसूत्रे शिष्टापरिग्रहसूत्रे च स्पष्टमेव. ननु विविदिषुत्वाश्रयणाद् न अध्ययनं विरुद्धम् अस्ति, संन्यासिनां विद्वद्-विविदिषु-भेदाद् द्वैविध्यम् इति चेत् सत्यम्; अस्ति द्वैविध्यं, तथापि “**कुटीचर-बहूदकयोरेव पाक्षिकं विविदिषुत्वं नतु हंस-परमहंसयो:, साक्षाद्विद्वानसाधन...**” (   ) इत्यादिविरोधात्. अयन्तु शिखासूत्रत्यागात् परमहंसतया भावत्कै: अभिप्रेयतइति न तस्य तथात्वम्. यत्तु कैश्चित् परमहंसस्यापि विद्वद्-विविदिषुभेदेन द्वैविध्यम् उक्तं तत्र मूलं चिन्त्यम्. तै: दर्शितस्य “**एतमेव विदित्वा मुनि: भवति एवमेव प्रव्राजिनो लोकम् इच्छन्त: प्रव्रजन्ति**” (बृह.उप.४।४।२२) इति वाजसनेयिब्राह्मणस्य कुटीचरादिपरतया उपपत्ते:, पारमहंस्यद्वैविध्ये स्पष्टमानानुपलम्भात् च. किञ्च यै: तद्द्वैविध्यम् अङ्गीक्रियते तैरपि विविदिषो: एकदण्डादिधारणम् आवश्यकम् अभ्युपगम्यते. सर्वथा विद्वद्दशायामेव तदनावश्यकत्वञ्च उच्यते. “**प्रकृतपुरुषस्तु मूलतएव दण्डादिरहित:**”(   ) इति न असौ ‘विविदिषु’व्यपदेशार्ह:. विद्वद्विषयकतया कमलाकरभट्टेन उदाहृतायां “**न दण्डं न शिखां न आच्छादनं चरति परमहंस:**”(परमहंस.उप.२) इति महोपनिषदि ज्ञानमेव अस्य दण्ड: इति वाक्यशेषात्. ज्ञानरहित: पिपठिषु: साच्छादनो अयं न ‘विद्वत्’पदाभिलप्य:. अपिच विविदिषुसंन्यासेऽपि “**एतत्सर्वं भू स्वाहा इति अप्सु परित्यज्य आत्मानम् अन्विच्छेत्**” (जाबा.उप.६) इति माधवोदाहृतजाबालश्रुतौ श्रुतचरस्य वेदान्तस्यैव दार्ढ्याय पुन: परिशीलनरूपात्मान्वेषणापरपर्यायम् अध्ययनं विधीयते “**आवृत्ति: असकृदुपदेशात्**” (ब्र.सू.४।१।१) इति अधिकरणे व्रीह्यवघातादिवत् श्रवणादीनाम् आफलोदयम् आवर्तमानस्य मीमांसितत्वात्. “**ऊर्ध्वगमनं विसृजेत्. त्रिसन्ध्यादौ स्नानम् आचरेत्. सन्धिसमाधौ आत्मनि आचरेत्. सर्वेषु वेदेषु आरण्यम् आवर्तयेत् उपनिषदाम् आवर्तयेत्**” (आरुणि.उप.२) इति माधवोपन्यस्तारुणीश्रुते:. तत्रैव पूर्वं “**दण्डम् आच्छादनं कौपीनं परिग्रहेत्, शेषं विसृजेद्**” (आरुणि. उप.१) इति श्रावणाच्च. नतु तस्य अपूर्वमेव अध्ययनं नापि न्यायादीनां विक्षेपहेतूनाम् अध्ययनं विविदिषुसंन्यासे क्वापि विधीयते. प्रत्युत प्रतिषिद्धं तद् बृहस्पतिना

“न तीर्थवासी नित्यं स्याद् न उपवासपरो यतिः, नच अध्ययनशीलः स्याद् न व्याख्यानपरो भवेद्” (   ) इति. **“इदं वेदान्त-ब्रह्ममीमांसातिरिक्तविषयम्”** (   ) इति माधवादयः. किञ्च संन्यासोत्तरं दार्ढ्यार्थं संन्यासगुरोरेव समीपे वेदान्तपरिशीलनमपि संवत्सरमात्रमेव उच्यते, नतु वादिविजिगीषया बहुत्र बहुशास्त्राभ्यासः. यथा उक्तं लिङ्गपुराणे **“आश्रमत्रयम् उत्सृज्य प्राप्तस्तु परमाश्रमं यतिः संवत्सरस्य अन्ते प्राप्य ज्ञानम् अनुत्तमम्, अनुज्ञाप्य गुरुं चैव चरेद्धि पृथिवीम् इमां, त्यक्तसंगो जितक्रोधो लब्धाहारो जितेन्द्रियः, पिधाय बुद्ध्या द्वाराणि, ध्यानेन एकमना भवेद्”** (वायुपुरा.१७।१-५) इति. मत्स्यपुराणेऽपि **“गुरोरपि हिते युक्तो नतु संवत्सरं वसेद् नियमेषु अप्रमत्तस्तु यमेषुच सदा भवेत्. प्राप्य च अन्ते ततः चैव ज्ञानयोगम् अनुत्तमम्”** (लिङ्गपुरा.१।८९।५-६) **“अविरोधेन धर्मस्य चरेत् पृथिवीम् इमाम्”** (वायुपुरा.१६।५) इति. **“आश्रमत्रयम् उत्सृज्य”** (वायुपुरा.१७।१) इत्युक्त्या अध्ययनस्य पुनः परिशीलनरूपत्वमेव अर्थात् फलति. श्रीभागवतेऽपि एकादशस्य अष्टादशाध्याये **“दुःखोदर्केषु कामेषु जातनिर्वेद आत्मवान् अजिज्ञासितमद्धर्मो गुरुं मुनिम् उपाव्रजेत्. तावत् परिचरेद् भक्तः श्रद्धावान् अनसूयको यावद् ब्रह्म विजानीयाद् मामेव गुरुम् आदृतः”** (भाग.पुरा.११।१८।३८-३९) इति. **“सर्वकामनिर्विण्णस्य आत्मवतएव संन्यासेऽपि पुनः ब्रह्मधर्मविचारद्वारा ब्रह्मानुभवार्थमेव अभ्यासो विधीयते. यत्तु “आत्मज्ञाने शमे च स्याद् वेदाभ्यासे च यत्नवान्”** (मनुस्मृ.१२।९२) इति, तत्र वेदाभ्यासः प्रणवाभ्यासः इति मिताक्षरामदनपारिजातादयः. एवञ्च नवद्वीपगमनादिप्रयासपुरस्सरस्तर्काद्यभ्यासः तस्य विक्षेपद्वारा पातित्यहेतुरेव.

> (२) दिग्विजयादिनाटनमपि धनाद्यर्जनार्थं नटवदेव. किञ्च दिग्विजयस्य काश्यादिपत्तनेषु केनापि आप्तेन अनुच्यमानत्वेन सद्वादिशाखिनां च प्रतिदिनं वर्द्धमानत्वेन जयपुरबुन्दीकोटाद्युत्तमभूपतिभ्यः स्वप्नेऽपि अलब्धच्छत्रचामरत्वेन बाधितार्थम् एतद् वाक्यजालम्. यदितु एतत् सर्वं तन्मुखाद् अवगत्य

वर्णितं भवेद् न तु स्वयं स्तुत्यर्थं कल्पितं तदातु इदं तस्मिन् अनृतवादित्वे सति उत्तरदिक्स्थशङ्कराचार्यसम्बन्धिस्पर्द्धावत्त्वं द्योतयद् अतिपातकित्वमपि सम्पादयति. तथाच उक्तम् ‘‘निषिद्धभक्षणं जैह्व्यम् उत्कर्षे च वचो अनृतं, रजस्वलामुखास्वादः सुरापानसमानि तु’’ (याज्ञ.स्मृ. ३।४।२२९) इति महापातकतुल्येषु उत्कर्षार्थानृतवचनस्य मिताक्षराकारेण गणितत्वात्.

(३) अथ प्रस्तावनायां काश्यादिपत्तनेषु इत्यादिं राजधानीम् इत्यन्तं भागं दूषयन्ति **दिग्विजयादिनाटमपि** इत्यादिना **गणितत्वाद्** इत्यन्तेन. अत्र इदम् आकूतं : प्रस्तावनाकृतैव ‘‘दिग्विजयं नाटयन्’’ इति कथनाद् नटवद् नाटनमेव सिद्ध्यति नतु वास्तवो विजयः. तस्य धनाद्यर्जनार्थत्वन्तु राजचिह्नादिप्राप्तिं वर्णयता तेनैव स्पष्टीकृतम्. वस्तुतस्तु यतेः न वादिविजयोऽपि योग्यो ‘‘**वादवादान् त्यजेत् तर्कान्**’’ (भाग.पुरा.७।१३।७-८) इति दर्शितपूर्वप्रतिषेधात्. मनुरपि ‘‘**अतिवादान् तितिक्षेत न अवमन्येत कञ्चन नच इमं देहम् आश्रित्य वैरं कुर्वीत केनचित्. क्रुध्यन्तं न प्रतिक्रुद्ध्येद् आक्रुष्टः कुशलं वदेत्, सप्तद्वारावकीर्णां च न वाचम् अनृतां वदेत्. अध्यात्मरतिः आसीनो निरपेक्षो निराशिषः आत्मनैव सहायेन सुखार्थी विचरेद् इह**’’ (मनुस्मृ.६।४७-४९), बृहस्पतिरपि ‘‘**यस्मिन् वाचःप्रतिष्ठाः स्युः कूपे अपास्ताः शिलाइव न वक्तारं पुनः यान्ति, स कैवल्याश्रमे वसेत्. यस्मिन् कामाः प्रविशन्ति विषयेभ्योपसंहृताः. विषयाद् न पुनः यान्ति स कैवल्याश्रमे वसेत्. यस्मिन् क्रोधः शमं याति विफलः सम्यगुत्थितः. आकाशे असिः यथा क्षिप्तः स कैवल्याश्रमे वसेत्. यस्मिन् क्षान्तिः शमः शौचं सत्यं सन्तोष आर्जवम्, आकिञ्चन्यम् अदम्भभश्च स कैवल्याश्रमे वसेत्. वृथालापी च यो न स्याद् न लोकाराधने रतः न अन्यविद्याभियुक्तश्च स कैवल्याश्रमे वसेत्. अतीतान् स्मरेद् भोगान् तथैव अनागतानपि, प्राप्तांश्च न अभिनन्देत स कैवल्याश्रमे वसेत्. अन्धवद् मूकवत् पङ्गुबधिरक्लीबवत् च यः आस्ते व्रजति यो नित्यं स कैवल्याश्रमे वसेद्**’’ (   )

इति. एकादशस्कन्धेच “**वेदवादरतो न स्याद् न पाषण्डी न हैतुकः. शुष्कवादविवादे न कञ्चित् पक्षं समाश्रयेत्. न उद्विजेत जनाद् धीरो जनं च उद्वेजयेद् नतु. अतिवादान् तितिक्षेत न अवमन्येत कञ्चन**” (भाग.पुरा.११।१८।३०-३१) वादिनाम् उत्पाटनमपि स्वाश्रमविरुद्धम्. तस्य अभयदानादेव संन्याससिद्धेः परपदलाभोक्तेः च. यथा आह मनुः “**यो दत्वा सर्वभूतेभ्यः प्रव्रजति अभयं गृहात् तस्य तेजोमया लोकाः भवन्ति ब्रह्मवादिनः. यस्माद् अण्वपि भूतानां द्विजाद् न उत्पद्यते भयं तस्य देहाद् विमुक्तस्य भयं नास्ति कुतश्चन**” (मनुस्मृ.६।३९-४०), याज्ञवल्क्योऽपि “**सन्निरुद्ध्य इच्चेन्द्रियग्रामं रागद्वेषौ प्रहाय च भयं हृत्वा च भूतानाम् अमृती भवति द्विजः**” (याज्ञ.स्मृ.३।४।६१) इति. किञ्च अभयदानम् अन्तरा संन्यासएव न सिद्ध्यति; तदितिकर्तव्यतायां तद्विधानात्. तद् आह पराशरमाधवनिर्णयसिन्ध्वादिषु कपिलः “**विधिवत् प्रैषम् उच्चार्य त्रिरुपांशु त्रिरुच्चकैः अभयं सर्वभूतेभ्यो मत्तः स्वाहा इति अधो भुवि निनीय दण्डशिक्यादि गृहीत्वा अथ बहिः व्रजेद्**” (नि.सि.३) इति. अतएव सर्वभूताऽपीडनपुरस्सरं विहरणं मनुना उच्यते “**क्लृप्तकेशनखश्मश्रुः पात्री दण्डी कुसुंभवान्. विचरेद् नियतो नित्यं सर्वभूतानि अपीडयन्**” (मनुस्मृ.६।५२) इति. ‘कुसुम्भः’=कमण्डलुः. यच्च तत्तद्देशक्ष्मापालपूजितपादत्वं तेभ्यः छत्रचामराद्यखिलराजचिह्नोपार्जनं च वर्णितं तदपि संन्यासोज्ज्वालकमेव. राजसत्कारादिप्रतिषेधन्तु दर्शयति मनुः “**अभिपूजितलाभांस्तु जुगुप्सेतैव सर्वशो अभिपूजितलाभैश्च यतिः मुक्तोऽपि बध्यते**” (मनुस्मृ.६।५८) इति. तथा “**आगाराद् अभिनिष्क्रान्तः पवित्रोपचितो मुनिः. समुपोढेषु कामेषु निरपेक्षः परिव्रजेत्**” (मनुस्मृ.६।४१) इति. किञ्च “**अतैजसानि पात्राणि तस्य स्युः निर्व्रणानि च तेषाम् अद्भिः स्मृतं शौचं चमसानामिव अध्वरे. अलाबुदारुपात्रं च मृन्मयं वैदलं तथा, एतानि यतिपात्राणि मुनिः स्वायम्भुवो अब्रवीत्**” (मनुस्मृ.६।५३) इति. पात्राणि अल्पमौल्यलभ्यानि प्रतिपाद्य “**एककालं चरेद् भैक्षं न प्रसज्जेत विस्तरे, भैक्षे प्रसक्तो हि यतिः विषयेष्वपि सज्जते**” (मनुस्मृ.६।५५) इति. भिक्षायापि विस्तारं प्रतिषिध्य “**प्राणयात्रिकमात्रः स्याद् मात्रासंगाद् विनिर्गतः**” (मनुस्मृ.६।५७) इति इतरवैभवस्य अभावमेव

बोधयति. याज्ञवल्क्योऽपि उक्तस्थले **"अप्रमत्तः चरेद् भैक्षं सायाह्ने नाभिलक्षितो रहिते भिक्षुकैः ग्रामे यात्रामात्रम् अलोलुपो, यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च सलिलैः शुद्धिः एतेषां गोवालैश्चावघर्षणम्"** (याज्ञ.स्मृ.३।४।५९) इति. तदेव आह बौधायनोऽपि. **"दारवं वैणवं वापि मार्दं धातुमयं तथा पात्रं शिलामयं ताम्रपर्णादिमयमेव वा, चतुरस्रं वर्तुलं वापि आसनं दारवं शुभम्. कौपीनाच्छादनं वासः कन्थां शीतनिवारिणीम्"** (   ) इत्यादि. यमोऽपि **"हिरण्मयानि पात्राणि कृष्णाय समयानि च यतीनां तानि अपात्राणि वर्ज्ज्ययेत् तानि भिक्षुकः"** (   ). पुनः बौधायनः **"स्वयम् आहृतपर्णेषु स्वयं शीर्णेषु वा पुनः भुञ्जीत न वटा-ऽश्वत्थ-करञ्जानान्तु पर्णके. कुम्भतिन्दुकयोः वापि कोविदारार्कयोः तथा आपद्यपि न कांस्ये तु मलाशी कांस्यभोजनः. सौवर्णे राजते ताम्रमये वा त्रपुसीसयोः"** (   ) इति पर्णपुटादौ भोजनं विदधाति कांस्यादिपात्राणि च निषेधति क्व पुना राजचिह्नस्य अवसरः! वैभवाभावादेव भिक्षापात्रेणापि भोजनं विदधाति मदनपारिजातादिषु देवलः **"तद् भैक्षं गृहीत्वा एकान्ते तेन पात्रेण अन्येन वा तूर्ष्णीं भुञ्जीत"** (   ) इति. तथा देशविशेषस्थाचार्याभिमाननिखिलदेशावलोकनकौतुकेऽपि प्रव्राजस्य विभूषणे **"ज्ञानामृतेन तृप्तस्य कृतकृतस्य योगिनो नैव अस्ति किञ्चित् कर्तव्यम् अस्ति चेद् न स सर्वविद्"** (   ) इति माधवाद्युदाहृतस्मृत्यादिषु कर्तव्यस्य प्रतिषेधात् तादृशस्यैव दण्डशिखादित्यागयोग्यताभिधानाच्च. एतत् सर्वं तदुक्तम् अभ्युपेत्य वदामः.

वास्तवं भूतार्थम् आहुः **किञ्च... काश्यादि...** इत्यादिना **वाक्यजालम्** इत्यन्तेन. **अनुच्यमानत्वेन** इति, तत्समानकालिकाअपि काशीस्थाः सर्वे विद्वांसो अन्ये च आप्ताः केऽपि वाराणस्यां तदागमनमपि न विदन्ति, बहवः तन्नामापि न जानते, क्व तर्हि स्वप्नोऽपि दिग्विजयस्य इति भावः. **सद्वादिशाखिनाम्** इति. प्रस्तावनाकारो विटान् पान्ति इति दुष्टार्थान्तरम् अभिप्रेत्य 'विटप'शब्दं प्रायुङ्क्त. इहतु तन्निरसितुं श्लेषेण वेदशाखासम्बन्धं वेदमार्गवर्तिनां तापहरणच्छायाचरण-फलवितरण-

भ्रमश्रमसमुद्धरण-प्रभृति-विविधोपकरणचणतां शरणप्राप्त-द्विजादि-भरणभावं च ध्वनयितुं 'शाखि'पदम् उपात्तम्. स्पष्टम् अन्यत्. **तथाच उक्तम्** इति, तृतीयाध्याये कर्मविपाकपूर्वक-पातकपरिगणन-प्रकरणे याज्ञवल्क्येन उक्तम् इति अर्थः. अत्र उत्कर्षे इति सप्तम्या निमित्तार्थत्वे विज्ञानेश्वरसंमतिं बोधयितुम् आहुः **महापातक...** इत्यादि. **गणितत्वाद्** इति, इदं सम्पादयति इति पूर्वत्र हेतुतया अन्वेति. महापातकसमानाम् अतिपातकत्वन्तु उपपातक[१] मिताक्षरायां "**महापापं च अतिपापम्**" (याज्ञ.स्मृ.मिता.३।५।२४२) इति स्मृतेः.

> (१) [अथ तत्सत्कीर्ति-श्रवणसमुत्पन्न-दर्शनाभिलाषेण योजनपरिमितभूभागं सन्मुखसमागतेन श्रीमच्चन्द्रचूडचरण-दत्तावधानेन सद्गुणसम्पन्निधानेन 'सरूपसिंहा'भिधानेन उदयपुटभेदनाधिपतिना समानीय निजनगरं स्वगुरुवर्यतया स्थापितः. तदनन्तरं प्रतिदिनवर्द्धमानप्रतापैः निजविद्याविभव-वशीकृतानेक-विद्वद्भिः स्वसिद्धान्तप्रतिपादनपुरस्सरा-ऽपरमतोत्पाटन-प्रबल- युक्तिकप्रचुर-प्रबन्धकृद्भिः वागीश्वरीविहार-भूभृद्भिः तैः तथा चरितं यथा आकल्पभयाह्लादिताखिल-विद्वद्वर-विहङ्गानिस्तापनिर्मलीकृत-समस्त-मनुजमानसभूमयः सत्कीर्तिकूलंकषा निर्विरामाः भवितारः. येषाञ्च सद्विद्यावैदग्ध्य-वाक्पाटव-प्रौढप्रतापाद् निखिलावनि-मण्डलमण्डनानि विद्वन्मण्डलानि न प्रेम्णा अद्यापि विस्मरन्ति. कदाचित् तीर्थयात्राप्रसंगवशाद् उदयपुरं प्राप्ता विद्वांसो गोस्वामिनः श्रीजीवनजिच्छर्माणः समर्पयामासुः आत्मरचितां बालकृष्णचम्पूम् उदयपुरभूभुजानि-सरूपसिंहाय तां विलोक्य सोऽपि स्वामिनां सकाशे प्रेषयामास तद्विलोकनसमुत्पन्न-तत्समागमाभिलाषैः च यैः समागमाय आमंत्रितापि ते गोस्वामिनः कस्माच्चित् कार्यवशात् प्रयाणप्रणयिनः सम्बभूवुः.]

---

[१] तूपपादितमिति पाठो भाति

(२) उदयपत्तनाधिपस्य नगरे स्थितिः उत्कर्षहेतुत्वेन प्रतिपादितापि वस्तुतो अपकर्षहेतुरेव, तुर्याश्रमिणां तस्य अविहितत्वात् प्रत्युत निषिद्धत्वात् च. उक्तञ्च "सर्वभूतहितः शान्तः त्रिदण्डी सकमण्डलुः एकारामः परिव्रज्य भिक्षार्थी ग्रामम् आश्रयेत्"(याज्ञ.स्मृ.३।४।५८). मिताक्षरायाञ्च "भिक्षाप्रयोजनात् ग्रामम् आश्रयेत् प्रविशेद् न पुनः सुखनिवासार्थम्" (याज्ञ.स्मृ.मिता.३।४।५८) "ऊर्ध्वं वार्षिकाभ्यां मासाभ्यां न एकस्थानवासी" ( )इति शङ्खस्मृतिरपि. "एकरात्रं वसेद् ग्रामे नगरे पञ्चरात्रकम्" (नारदपरि.उप.४।१४) इति कण्वेनापि उक्तम्. किञ्च नृपान्नभक्षण-विद्योपजीवित्व-राजाश्रिततत्वादिकम् आह स्वधर्महानिकरमेव. तथाच उक्तं मनुना "नच उत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया न अनुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित्"(मनुस्मृ.६।५०). संवर्त्तः "अष्टौ भिक्षाः समादाय स मुनिः सप्त पञ्च वा अद्भिः प्रक्षाल्य ताः सर्वाः ततो अश्नीयात् च वाग्यतः" ( ). तथाच सर्वाश्रमोत्तमं चतुर्थमाश्रममारूढे विद्योपजीवित्व-नृपाश्रितत्व-विवादकर्तृत्वादीन् तुरीयाश्रमिणां पतितत्वसम्पादकान् तस्मिन् दर्शयता एकारामत्वादीन् च आदर्शयता तस्मिन् आरूढपतितत्वं सम्यक्तया सम्पाद्यते "विहितस्य अननुष्ठानाद् निन्दितस्य च सेवनात्,अनिग्रहात् च इन्द्रियाणां नरः पतनम् ऋच्छति" (याज्ञ.स्मृ.३।४।२१९) इति वचनात्. यथा पित्तपीतिमदूषितचक्षुषा शङ्खं पीतमिव पश्यता धवलोऽपि शङ्खः पीत इति उच्यते एवम् अनेनापि स्वनिष्ठारूढपतितत्वदूषितहृदा सज्जनानारूढपतितानिव जानता सत्कर्मनिष्ठाअपि आरूढपतिता इति अग्रे वक्ष्यन्ते.

(३) अथ प्रस्तावनायां अथ तत्सत्कीर्ति इत्यादिना सम्बभूवुः इत्यन्तेन दर्शितं दूषयन्ति **उदयपत्तनाधिपस्य** इत्यादिना **वचनाद्** इत्यन्तेन—अयं

भावो : राज्ञः सम्मुखगमनादिकन्तु पूर्ववत्प्रशंसार्थं मनोराज्यविजृम्भितमेव. तात्कालिकतत्रत्यराजकीयजनतानुभवागोचरत्वात्. तत्त्वन्तु राज्ञा आजीविकां दत्वा स्वाश्रितविद्वत्त्वेन स्थापित इत्येव. याच राजगुरुतया स्थितिरुत्कर्षाय अकल्पि सा तदाश्रमविरोधात् प्रत्युत अपकर्षमेव आपादयति. **उक्तञ्च** इति याज्ञवल्क्येन (याज्ञ.स्मृ.३।४।५८) इति शेषः. **सुखनिवासार्थम्** इत्यन्तो मिताक्षराग्रन्थः. मूलोक्तं कण्ववचनादिकन्तु मिताक्षरामाधवीयमदनपारिजातादिषु उदाहृतमेवेति न अमूलत्वशङ्कावकाशः. मनुरपि यतेः सर्वदा एकाकित्वाऽनिकेतनत्वादिकम् अन्नार्थमेव ग्रामप्रवेशं च वदति “**एकएव चरेद् नित्यं सिद्ध्यर्थम् असहायवान् सिद्धिम् एकस्य सम्पश्यन् न जहाति न हीयते. अनग्निः अनिकेतः स्याद्, ग्रामम् अन्नार्थम् आश्रयेद्, उपेक्षको असंकुसुको मुनिः भावसमाहितः**” (मनुस्मृ.६।४२-४३) “**असंकुसुकः स्थिरमतिः**” (मनुस्मृ.६-।४२-४३) इति कुल्लूकभट्टः. “**असञ्चायकः**” (   ) इति अन्ये. पुनः सएव “**अल्पान्नाभ्यवहारेण रहःस्थानासनेन च ह्रियमाणानि विषयैः इन्द्रियाणि निवर्तयेत्. इन्द्रियाणां निरोधेन रागद्वेषक्षयेन च अहिंसया च भूतानाम् अमृतत्वाय कल्पते**” (मनुस्मृ.६।५९-६०) इति. एकादशस्कन्धे “**एकः चरेद् महीम् एतां निस्संगः संयतेन्द्रियः. आत्मक्रीडः आत्मरतः आत्मवान् समदर्शनो विविक्तक्षेमशरणो मद्भावविमलाशयः**” (भाग.पुरा.११।-१८।२०-२१) इति. तथा “**पुरग्रामव्रजान् सार्थान् भिक्षार्थं प्रविशन् चरेत् पुण्यदेशसरिच्छैलवनाश्रयवर्ती महीं वानप्रस्थाश्रमपदेषु अभीक्ष्णं भैक्ष्यम् आचरेत् स सिद्ध्यति आशु असम्मोहः शुद्धसत्त्वशिलान्धसा**” (भाग.पुरा.११।१८।२४-२५). सप्तमस्कन्धे “**कल्पस्तु एवं परिव्रज्य देहयात्रावशेषितः. ग्रामैकरात्रविधिना निरपेक्षः चरेद् महीम्**” (भाग.पुरा.७।९।१३) “**एकएव चरेद् भिक्षुः आत्मारामो अनपाश्रयः सर्वभूतसुहृच्छान्तो नारायणपरायणः**” (भाग.पुरा.७।१३।३) इति. मदनपारिजाते पराशरविवरणे च मत्स्यपुराणे “**अष्टौ मासान् विहारः स्याद् यतीनां संयतात्मनाम् एकत्र चतुरो मासान् वार्षिकान् निवसेत् पुनः**” (मत्स्यपुरा.१८४।३२) इति. माधवीयमिताक्षरादिषु “**दक्षः एको भिक्षुः यथोक्तस्तु द्वावेव मिथुनं स्मृतं त्रयो ग्रामः समाख्यातः उर्ध्वन्तु नगरायते. नगरं नहि कर्तव्यं ग्रामोऽपि मिथुनं तथा. एतत्रयं च**

कुर्वाणः स्वधर्मात् च्यवते यतिः. राजवार्ता हि तेषाञ्च भिक्षावार्तापरस्परं स्नेहपैशुन्यमात्सर्यं सन्निकर्षाद् न संशयः’’ (याज्ञ.स्मृ.मिता.३।४।५८) इति राजवार्तादिः स्नेहादेः च सम्भवात् परिव्राजकान्तरस्यापि संगं प्रतिषेधति क्व पुनः नगरनिवासपूर्वकराजादिसंगस्य अवसरः. माधवीये श्रुतिः ‘‘**वर्षासु ध्रुवशीलो अष्टौ मास एकाकी चरेत्**’’ (नारदपरि.उप.७।१) इति. बौधायनः ‘‘**विधूमे सन्नमुसले व्यङ्गारे भुक्तवद्जने काले अपराह्णभूयिष्ठे भिक्षाटनम् अथ आचरेत्. ऊर्ध्वं जान्वोः अधो नाभेः परिधाय एकम् अम्बरं द्वितीयम् अन्तरं वासः पात्री दण्डी च वाग्यतः**’’ (   ) इति उपक्रम्य सूर्योपस्थानं जपं च उक्त्वा. ‘‘**भिक्षापात्रादिशुद्ध्यर्थम् उपमुच्यापि उपानहौ ततो ग्रामं व्रजेद् मन्दं युगमात्रावलोकको ध्यायन् हरिं च तच्चित्त इदञ्च समुदीरयेत्**’’ (   ) इति भिक्षार्थमेव ग्रामप्रवेशं तत्रापि अटनभिक्षाग्रहणयोः प्रकारं च विस्तरेण दर्शयित्वा, ‘‘**प्राणयात्रिकम् अन्नन्तु भिक्षेत विगतस्पृहः**’’ (   ) इति तदतिरिक्तापरिग्रहं बोधयति. किञ्च नृपादेः एकस्यैव आश्रयेण भिक्षासम्पादनं निन्दति सएव ‘‘**एकत्र लोभाद् वा भिक्षुः परिपूरणम् इच्छति दाता स्वर्गम् अवाप्नोति भोक्ता भुञ्जीत किल्बिषम्**’’ (   ) इति. यमोऽपि ‘‘**स्नात्वा शुचिः शुचौ देशे कृतजप्यः समाहितः. भिक्षार्थी प्रविशेद् ग्रामं रागद्वेषविवर्जितं चरेद् माधुकरं भैक्षं यतिः म्लेच्छकुलादपि. एकान्नं नच भुञ्जीत बृहस्पतिसमो यदि. मेध्यं भैक्षं चरेद् नित्यं सायाह्ने वाग्यतः शुचिः. एकवासा विशुद्धात्मा मन्दगामी युगान्तदृक्. यथालब्धं तदश्नीयात् प्राज्यसंस्कारवर्जितं भैक्षं ‘माधुकरं’नाम सर्वपातकनाशनम्**’’ (   ) इति. अत्र एकान्नमभक्षणनिषेधे तात्पर्यं, नतु म्लेच्छकुलाद् भैक्षग्रहणे. अतएव बौधायनः ‘‘**ब्राह्मणक्षत्रियविशां मेध्यानाम् अन्नम् आहरेत्. असम्भवेतु पूर्वस्यापि आददीत उत्तरोत्तरं सर्वेषामपि अभावेतु भक्तद्वयम् अनश्नता भैक्षं शूद्रादपि ग्राह्यं रक्ष्याः प्राणाः विजानता**’’ (   ) इति. अत्र साधारणक्षत्रियाद् अन्नग्रहणमपि ब्राह्मणालाभएव उच्यते. अपिच माधवीये जाबालश्रुतौ सर्ववस्तुत्यागम् उक्त्वा ‘‘**यथाजातरूपधरो निर्द्वन्द्वो निष्परिग्रहः तत्त्वब्रह्ममार्गे सम्यक्त्वसम्पन्नः शुद्धमानसः प्राणसन्धारणार्थं यथोक्तकाले विमुक्तो भैक्षम्**

आचरन् करपात्रेण लाभालाभौ समौ भूत्वा शून्यागार-देवगृह-तृणकूट-वल्मीक-वृक्षमूल-कुलालशाला-ऽग्निहोत्र- नदीपुलिन-गिरिकुहरकन्दर-कोटर-निर्झर-स्थण्डिलेषु अनिकेतवासी अप्रयतो निर्ममः शुक्लध्यानपरायणो अध्यात्मनिष्ठो शुभकर्मनिर्मूलनपरः संन्यासेन देहत्यागं करोति स परमहंसो नाम'' (जाबा.उप.६) इति आच्छादनादिपरिग्रह-ग्रामस्थित्यादिकं परमहंसस्य प्रतिषिध्यते. अभिपूजितलाभादिनिषेधाः च प्रागेव दर्शिताः. अतो राजाश्रयाद् औद्धत्यम् आश्रित्य नगरे चिरं स्थितिः सर्वदा तदन्नाशनं तदा तत्रत्यैः अनुभूतं वैष्णवानां तुलसीकाष्ठमालोर्ध्वपुण्ड्रादेः बलाद् अपलोपनं च तस्य पातित्यसम्पादकमेव. विहिताननुष्ठानप्रतिषिद्धाचरणादौ पातित्यस्मरणात्. **किञ्च नृपान्...** इत्यादि. राजान्नादिप्रतिषेधस्तु यमस्मृतौ चतुर्थाध्याये **''राज्ञां प्रतिग्रहः त्याज्यो लोकत्रयजिगीषुभिः. राज्ञः प्रतिग्रहात् चैव ब्राह्मण्यं हि विलुप्यते''** (यमस्मृ.४।५९) इति. अत्रिस्मृतौ **''अधीत्य चतुरो वेदान् सर्वशास्त्रार्थतत्त्वविद् नरेन्द्रभवने भुक्त्वा विष्ठायां जायते कृमिः''** (अत्रिस्मृ.१।३०३) इति. **नच उत्पातनिमित्ताभ्याम्** इति. इदं षष्ठाध्याये (श्लो.५०) अस्ति, तथाच विद्यया उपजीवनं त्वदुक्तरीत्या गुरुत्वेन अनुशासनं वादकरणं च प्रतिषिद्धाचरणरूपमेव इति सिद्धम्. प्रतिषेधबाहुल्यन्तु प्रागेव प्रापञ्चि. 'नच उत्पात' इत्यस्य अविद्योपजीवनादि-प्रतिषेधपरत्वन्तु माधवविज्ञानेश्वरमेधातिथि-प्रभृतयो व्याचक्षतएव. भिक्षालब्धान्नमात्रस्य अशने तस्य अधिकारं बोधयितुं संवर्तवचनम् आहुः **अष्टौ भिक्षा** इति. इदमपि मिताक्षरामाधवीयमदनपरिजातादिषु स्फुटं संगृहीतम्. भिक्षापि असंकल्पित-सप्तागारेभ्यएव सम्पाद्या, नतु नित्यं राजगृहाद् यथा आह मिताक्षरायां वसिष्ठः **''सप्तागाराणि असंकल्पितानि चरेद् भैक्षम्''** (वसि.स्मृ.१०।७) इति. एकादशस्कन्धाष्टादशाध्याये च भगवान् **''भिक्षां चतुर्षु वर्णेषु विगर्ह्यान् वर्जयन् चरेत् सप्तागारान् असंक्लृप्तान् तान् तुष्येत् लब्धेन तावता''** (भाग.पुरा.११।१८।१८) इति. भिक्षाविषयेऽपि विशेषस्तु प्रागेव अदर्शि. यत्तु प्रस्तावनायां तदनन्तरम् इत्यादिना विस्मरन्ति इत्यन्तेन विवादकर्तृत्वादिकम् उक्तं तदपि एतेनैव अपास्तम्. प्रचुरप्रबन्धकर्तृत्वन्तु मिथ्यैव भाति; शैवसुधाकरातिरिक्त-तत्प्रबन्धानुपलम्भात्. सुधाकरेच प्रबलयुक्तिकत्वाभावात्. प्रायेण तत्खण्डनन्तु मत्कृते सत्सिद्धान्तमार्तण्डे द्रष्टव्यम्.

नापि निखिलावनिमण्डलस्थपण्डितमण्डलीनिःशेषा तदभिधानमपि श्रवणातिथीकृतवती क्व पुनः सर्वदा स्मरणसम्भावना.

यच्च कदाचिद् इत्यादिना गोस्वामिश्रीजीवनजीमहाराजानां वृत्तं वर्णितं, तदपि अन्यथाकारमेव. तथाहि श्रीमद्वल्लभाचार्यवंशमुक्तामणयः पण्डितवेतण्डमण्डलमूर्द्धमण्डनकराः श्रीजीवनजीमहाराजाः पुरुषोत्तमपुरपर्यन्तप्राच्यतीर्थसार्थयात्रापवित्रगात्राः तत्फलतया श्रीमद्गोवर्धनोद्धरणचरणपरिचरणम् अभिलषन्तः श्रीनाथद्वारम् आगच्छन्. ततः चिराद् आकर्णितभृशविशदयशस्कान् आचार्यान् तान् भक्त्या दिदृक्षमाणो भूपभूपः 'स्वरूपसिंहा'भिधो विविधोचिताचारसत्कारप्रकारप्रणयी सादरं समाह्वयत. तदा तदाकारणं सद्धर्मशर्मकारणं सफलयितुं सदयम् उदयपत्तनम् अलंकुर्वाणाः ते स्वसंदर्शनविदितामन्दानन्दाय अनन्ताकान्तवृन्दारकवृन्दपुरन्दराय तस्मै मूर्तामिव आशिषं स्वप्रणीतां श्रीबालकृष्णचम्पूम् अस्पृशन्. ततः स महीक्षित् सत्कृत्यचञ्चु सत्कृत्य तान् यथार्हं विसृज्य तत्प्रत्तप्रबन्धप्रमेयं जिज्ञासमानः स्वाश्रितसदानन्दगिरेः करे तत् पुस्तकम् अदात्. सोऽपि मदादिवर्जितस्य तस्य सागराम्बराकान्तस्य तेषु तादृशं भृशं स्वविधित्सितविषयावरोधिनं विनयप्रणयप्रकर्षं प्रेक्ष्य श्रीमत्सरं स्वहृदयाकल्पीकुर्वन् उर्वीजानेः तेषु अरुचिम् उत्पिपादयिषन् ''निःशेष एष निबन्धो धनेशबन्धोः अमन्दया निन्दया पूर्णः'' इति तूर्णम् अचकथत्. अथ श्रीगोवर्द्धनधरम् एकलिङ्गेश्वरं च परम्परया भजतो हरिहराभेदविदो मम हस्ते हिमरश्मिमस्तकनिन्दाग्रन्थपुस्तकं यद् विश्राणितं तत् तैः अनुचितम् अनुष्ठितम् इति दूयमानमानसः पुनः तान् समाचीकरत्. ततो यतिः तैः महाराजैः समम् अहं वादरणे नवादरणवान् अस्मि यदि ते भूयो अभ्येष्यन्ति इति कांश्चन मानवान् मानवान् अवादीत्. इदं कर्णाकर्णिकया आकर्ण्य ते महाराजा न अस्मिन् ग्रन्थे लवस्यापि सम्भवो भवनिन्दायाः यदिच अवनीवल्लभः पुनः आह्वयेत् तर्हि तदेतद् उपपादयितुं सिद्धो अहम् इति व्याहार्षुः. तदेतद् अवगतवतापि क्षितिभृता स्वसम्मतयोः शैववैष्णवमतयोः वादोत्पादनम् अरोचयता भूयस्ते न समाकारिषत इति तात्कालिकतत्रत्याप्तवदनाद् अवगम्यते. सा चम्पूश्च मुद्रिता इदानीम् उपलभ्यतएव इति तत्र शिवनिन्दायाः अभावस्तु

स्वयमेव विद्वद्भिः अवगंस्यते. प्रस्तावनायां कस्माच्चित् कार्यवशाद् इत्यत्रतु ''*कस्यचित् कार्यस्य वशाद्*'' इति रम्यम्. समासाद् एकार्थीभावापन्ने कार्ये कस्माच्चिद् इत्यस्य विशेषणतया अन्वये सामर्थ्याभावात्. अन्यथा ''चक्रवर्तिनो राजपुरुषः'' इत्यपि शक्येत प्रयोक्तुम्. 'कस्माच्चिद्' इति अपरिज्ञानन्तु कार्यस्यैव अवगम्यते. अथ मूले एतावता सिद्धम् अर्थम् आहुः **तथाच सर्व...** इत्यादिना **वक्ष्यन्ते** इत्यन्तेन. **एकारामत्वादीन्** इति, एकारामः परिव्रज्य इत्यादौ याज्ञवल्क्यादिभिः दर्शितान्. **आरूढपतितत्वम्** इति, अत्र माधवीये मेधातिथिः :

> **''श्रद्धया परया उपेतः परमात्मपरायणः स्थूलसूक्ष्मशरीराभ्यां मुच्यते दशषट्कवित्. त्रिदण्डं कुण्डिकां कन्थां भैक्षभाजनम् आसनं कौपीनाच्छादनं वासः षड् एतानि परिग्रहेत्. स्थावरं जङ्गमं बीजं तैजसं विषम् आयुधं षड् एतानि न गृह्णीयाद् यतिः मूत्रपुरीषवद्, रसायनक्रियां वादं ज्यौतिषं क्रयविक्रयं विविधानि च शिल्पानि वर्जयेत् परदारवत्. भिक्षाटनं जपः स्नानं ध्यानं शौचं सुरार्चनं कर्तव्यानि षड् एतानि सर्वथा नृपदण्डवत्. नापदि प्रेक्षणं प्लुष्टं प्रमदां सुहृदां तथा भक्ष्यं भोज्यम् उदक्यां च षड् न पश्येत् कदाचन. स्कन्धावारे खलेसार्थे पुरे ग्रामे च सद्गृहे न वसेत यतिः षट्त्सु स्थानेषु एतेषु कर्हिचित्. रागं द्वेषं मदं मायां दम्भं मोहं परात्मसु षड् एतानि यतिः नित्यं मनसापि न चिन्तयेत्. मञ्चकं शुक्लवस्त्रं च स्त्रीकथालौल्यमेव च, दिवास्वापः च यानं च यतीनां पतनानि षट्. संयोगं च वियोगं च विभोगस्य च साधनं, जीवेश्वरप्रधानानां स्वरूपाणि विचिन्तयेत्. आसनं पात्रलोपः च संचयः शिष्यसंग्रहः दिवास्वापो वृथाजल्पो यतेः बन्धकराणि षट्. एकाहात् परतो ग्रामे पञ्चाहात् परतः पुरे वर्षाभ्यो अन्यत्र यत् स्थानम् आसनं तद् उदाहृतम्. उक्तानां यतिपात्राणाम् एकस्यापि न संग्रहो भिक्षोः भैक्षभुजः**

> **चापि 'पात्रलोपः' स उच्यते. अजिह्वः पण्डकः पङ्गुः अन्धो बधिरएव च मुग्धः च मुच्यते भिक्षुः षड्भिः एतैः न संशयः. इदम् इष्टम् इदं न इति यो अश्नन्नपि न सज्जति, हितं सत्यं मितं वक्ति तम् अजिह्मं प्रचक्षते. सद्योजातां यथा नारीं तथा षोडशवार्षिकीं शतवर्षां च यो दृष्ट्वा निर्विकारः स पण्डकः. भिक्षार्थम् अटनं यस्य विण्मूत्रकरणाय च योजनाद् न परं याति सर्वथा पङ्गुरेव सः. तिष्ठतो व्रजतो याति यस्य चक्षुः न दूरतः. चतुर्युगाद्ध्वयं त्यक्त्वा परिव्राट् सो अन्धः उच्यते. हिताहितं मनोरामं वचः शोकावहन्तु यत् श्रुत्वा यो न शृणोतीव बधिरः स प्रकीर्तितः. सान्निध्ये विषयाणां यः समर्थो विकलेन्द्रियः सुप्तवद् वर्तते नित्यं स भिक्षुः मुग्धः उच्यते इति''.**

तथाच षडतिरिक्तानां राजचिह्नानां परिगृहात् वादादिप्रतिषिद्धाचरणात् भिक्षाटनादिविहिताकरणात् प्रतिषिद्धनिवासात् परेषु रागद्वेषादिविधानात् सर्वदा गमनार्थं यानस्यैव निषेवणात् आसनादिप्रणयनात् प्रकृतग्रन्थे शैवसुधाकरे वादेषु च अहितासत्यामितभाषणात् वादार्थम् अटनात् मुग्धत्वाभावात् च तस्मिन् आरूढपतितत्वम् असन्दिग्धमेव. सच द्वारकाप्रान्तप्रवेशोत्तरं राजधानीषु प्रायः शिबिकायामेव स्थितिम् अभिनिविशानः तत्प्रान्ते जामनगराद् निर्गमनावसरे बहुवसुव्ययतोऽपि शिबिकावाहकपुरुषालाभाद् भाटकलब्धानडुच्छकटोपरि स्वशिबिकां बद्ध्वा ताम् अधिष्ठाय ततो निरगाद् इति एवंविधाः यानाभ्यासप्रभृतयः पतनहेतवः तस्मिन् बहुभिरेव सन्ति अनुभूता इति किं तत्कथनेन! अतएव उक्तं **सम्यक्तया** इति. पातित्ये मानान्तरम् आहुः **विहितस्य इति, वचनाद्** इति, तृतीयाध्याये कर्मविपाकपूर्वक-पातकपरिगणन-प्रकरणे(श्लो.१३) याज्ञवल्क्यवचनाद् इति अर्थः. मनुरपि "**अकुर्वन् विहितं कर्म निन्दितं च समाचरन्, प्रसक्तः च इन्द्रियार्थेषु प्रायश्चित्तीयते नरः**" (मनुस्मृ.११।४४). **अग्रे** इति, द्वितीयभागे प्रथमखण्डखण्डनादिस्थले.

(१) [सहस्राक्ष-प्रस्तावना : एवम् अनेकप्रतिद्वन्द्विविद्वदनुभूतप्रौढप्रतापाः प्रत्यक्ककुप्स्थतीर्थयात्राप्रसङ्गेन सौराष्ट्रभूभागं भूषयन्तो भावनगरक्षितिजानिमान्येन वेदशिखरनिहितनिष्ठेन चमत्कारनगरनिवासिनागरगृहस्थविप्रेण ‘सन्तोषराम’नामकेन श्रीवल्लभसिद्धान्तखण्डनपूर्वका-ऽद्वैतसिद्धान्त मण्डनाय प्रार्थिताः सन्तः स्वयम् उपशमशीलापि प्रज्ञाविरहिणां संसारकूपाद् बहिर्निःसारणं स्वधर्मं जानन्तः समवलोक्य तदीय अणुभाष्य-विद्वन्मण्डन-शुद्धाद्वैतमार्तण्डादीन् ग्रन्थान् परार्थमेव धृतशरीराः ते श्रुतिस्मृत्यविरुद्धानेकप्रौढोक्तिभिः, प्रथमतः शुद्धाद्वैतमार्तण्डम् अनन्तरञ्च विद्वन्मण्डनं, सटीकं खण्डयन्तः सहस्राक्षनामकम् अपूर्वनिबन्धम् इमं रचयामासुः.]

(२) एवञ्च भावनगराधिपमान्यनागरनगरनिवासं खण्डनमण्डनादीन् च संसारकूपपतनहेतून् निःसरणप्रतिबन्धकान् च कुर्वाणेन स्वनिःसरणस्यापि दुर्विभाव्यत्वात् प्रज्ञाविरहिणां संसारकूपाद् निसारणं दूरापास्तम्. “स्वयम् असिध्दः कथं परान् साधयेद्” इति न्यायात्. किञ्च श्रीवल्लभसिद्धान्तखण्डनाय ‘संतोषराम’नामकस्य प्रार्थनम् उपशमशीलानां प्रवृत्तिः च इति द्वयमपि स्वरूपहानिकरम् श्रीवल्लभसिद्धान्तस्य वज्रदृढत्वाच्च.

(३) एवं वृथाप्रशंसां दूषयित्वा प्रस्तावनायां एवम् अनेक... इत्यादिना रचयामासुः इत्यन्तेन दर्शितं ग्रन्थकरणे हेतुं सप्रशंसं दूषयन्ति **एवञ्च भावनगर...** इत्यादिना **दृढत्वाच्च** इत्यन्तेन—अत्र प्रस्तावनायां अनेकप्रतिद्वन्द्विइत्यादि प्रथमविशेषणेन निर्वैरत्वाभयदानोपशमशीलत्वादिभ्यः सम्यक् तिलाञ्जलिः अदायि. सौराष्ट्रदेशे नगरविशेषे तीर्थत्वानास्पदे भावनगरे धनिकाश्रयफलकनिवासस्य वर्णनेन वारुणीतीर्थयात्रापि साध्वी समर्थिता मूले.

नागरनगर इति नागरसंबन्धि तदधिष्ठितं यद् नगरम् इति अर्थः. **पतन** इत्यादि, नगरनिवास-खण्डनमण्डनादीनां पतनहेतुत्वं निस्सरणप्रतिबन्धकत्वं च उपन्यस्तचराद्यनेकप्रमाणसिद्धमेव. **कुर्वाणेन** इत्यस्य निस्सरणम् इति अग्रिमे कर्तृतया अन्वयः. ‘‘**उभयप्राप्तौ कर्मणि**’’ (पाणि.सू.२।३।६६) इत्यनेन **(प्रज्ञा)विरहिणाम्** इति कर्मणि षष्ठीसत्त्वात् कर्तरि तृतीया, ‘‘**गवां दोहो गोपेन**’’ इत्यादिवत्. **स्वरूपहानिकरम्** इति राज्ञाधिकारे नियुक्तानां कस्मिंश्चिदपि धर्मे द्वेषस्य अयोग्यत्वाद्, उपनिषन्निष्ठस्य च सर्वथा तदसम्भवात् प्रथमस्य स्वरूपहानिः ‘‘**लोभः प्रवृत्तिः आरम्भः**’’ (भग.गीता १४।१२) इति स्मृत्या प्रवृत्तेः रजःकार्यत्वाद् रजसा सत्त्वोपमर्दनिश्चयेन उपशमभङ्गापत्तेः द्वितीयस्य सा. नच परोपकाराय खण्डनाद्यारम्भो न अनुचितः इति वाच्यं, माधवेन ‘‘**हिताचरणं नाम हिंसाननुष्ठानमात्रं न पुनः उपकारेषु प्रवृत्तिः**’’ ‘‘**हिंसानुग्रहयोः अनारम्भः... इति गौतमस्मरणाद्**’’ ( ) इत्युक्तेः, ‘‘**सर्वभूतहितःशान्त**’’ (याज्ञ.स्मृ.३।४।५८) इत्यत्र विज्ञानेश्वरेणापि तथैव विवरणात् च, ‘‘**न आरम्भान् आरभेत् क्वचिद्**’’ (भाग.पुरा.७।१३।८) इत्यादि प्रतिषेधदर्शनात् च. अपिच ‘‘**कपालं वृक्षमूलानि कुचेलम् असहायता समता चैव सर्वस्मिन् एतद् मुक्तस्य लक्षणम्**’’ (मनुस्मृ.६।४४) इति मन्वाद्युक्तलक्षणाभावाद् उपशमशीलत्वादिकथनम् उपचारमूलकमेव. ‘‘**न लिङ्गं धर्मकारणम्**’’ (मनुस्मृ.६।६६) इति मनुना केवलवेशस्य असाधकत्वस्मरणात्, प्रकृतपुरुषे दृढवादित्वेहाविशिष्टत्वादिधर्मदर्शनेन मनुदक्षादिस्मृतवाग्दण्डाद्यान्तरधर्माभाव- निश्चयात् च. वाग्दण्डादिस्वरूपन्तु दक्षेण उक्तम् ‘‘**वाग्दण्डे मौनम् आतिष्ठेत् कर्मदण्डेतु अनीहतां मानसस्य तु दण्डस्य प्राणायामो विधीयते**’’ ( ) इति. **वज्रदृढत्वाद्** इति वज्रइव दृढत्वाद् ‘‘**उपमानानि सामान्यवचनैः**’’ (पाणि.सू.काशि.२।१।५५) इति समासः तथाच अशक्यार्थप्रार्थना. तत्र प्रवृत्तिश्च अयोग्यैव इति भावः. ग्रन्थस्य खण्डनाभासरूपत्वन्तु प्राग् उक्तम् दर्शयिष्यते च तथा.

(१) [सच श्रीवल्लभार्यमतानुयायिना सर्वश्रेयोभिलाषिणा भट्टिवंशजेन लवजित्तनूजन्मना मथुरादासवर्मणा शर-नयन-

नन्द-निशाकर-प्रमित-विक्रमवर्षान्तर्गतोर्जमासवलक्षपक्ष-चतुर्दशी-समासादित निलिंपनिलयवासायाः लाडकाँबाई ‘समाख्यायाः’ निजाङ्गजायाः प्रचुरकालातिक्रमणेनापि उन्मूलनीयमूलः प्रचण्डवातवर्षातपैरपि अलोपनीयलावण्यः सकललोकलोचनानन्दजनकः कोऽपि स्मरणस्तम्भइव अयम् अनेकद्वैतमतान्धकारसम्भ्रान्तदृग्भ्यो जनेभ्यः सन्मार्गावबोध-प्रदानप्रवीणो मया अङ्कयित्वा प्रसिद्धिं नीतः. विलोक्य इमं निबन्धं सम्भूय सर्वेऽपि श्रीवल्लभवंशीयाः स्वकीयसिद्धान्तानुसारेण तत्खण्डनाय बद्धपरिकराः भवितार इति महतीं आशां मन्मनसि स्थापयामि. हन्त! अयम् असन्तोषो यत् केऽपि ते वीणा-वेणु-मृदङ्गाद्यनेकवाद्य-वादननिष्ठचित्ताः संगीतमेव संसारसारं मन्यमानाः प्रबलेन शङ्करसिद्धान्तिसिन्धुरेण आमूलतः उन्मूलितं स्वसिद्धान्त-शाखिनं दृष्ट्वापि न पश्यन्ति इति. हा हतं! निगमागमोक्तस्वधर्मपालनप्रीतिःस्वकीयसिद्धान्तदृढीकरण-बद्धपरिकरता-व्याससूत्रभाष्य करणशक्तिमत्ता शम-दम-तितिक्षोपरतिब्रह्मण्यता ब्रह्मनिष्ठताद्यखिलाचार्यचिन्हविरहिणां केवलम् आचार्यकुले उत्पत्तितएव आचार्यपदाभिमानम् उद्वहतां तेषां न एतत् किञ्चिदपि त्रपाकरम् अस्ति. तद्दयामयात्मा अनवरत- निखिलजगज्जनहितपरायणः सर्वशक्तिमान् ईश्वरः तेभ्यः सन्मार्गदर्शिनीं दृशं प्रयच्छताद् इति प्रार्थये परात्मानम्.

“जयत्वद्वैतार्याः सकलवसुधाख्यातयशसः ।।
श्रिताद्वैताभासापरमततमश्चण्डकिरणाः ।।
यशोदेहेनास्मिन् जगति सततं सुस्थितिजुषो ।।
विपश्चिद्वर्याः ते यतिवरसदानन्दगिरयः ।।”]

(२) श्रीवल्लभमतानुयायिनो मथुरादासवर्मणः एतादृशग्रन्थप्र-

सिद्धिकर्तृत्वमपि तन्मताननुयायित्वमेव व्यनक्ति. प्रचुरकालातिक्रमणेनापि अनुन्मूलनीयमूलत्वं प्रचण्डवातातपैरपि अलोपनीयलावण्यत्वं सकललोक-लोचनानन्दजनकत्वम् इत्यादिभिः आरोप्यमाणगुणैः परैः तोष्टूय्यमानोऽपि स्मरणस्तम्भत्वेन अभिमतोऽपि एकेनैव श्रीवल्लभवंश्येन परीक्षणार्थं हसता मन्दं स्पृष्टएव कीटाकीर्ण-विशीर्ण-जीर्णतरस्थूणेव स्वल्पकालेनापि उन्मूलनीयमूलत्वं फूत्कारेणापि अपलोपनीयलावण्यत्वम् आरोपयितृणामपि पश्चात्तापाद्यनेकदुःखोत्पादकत्वं सर्वजनोपेक्षणीयत्वम् इत्यादीन् साहजिकान् गुणान् प्रदर्शयन् स्तोतृन् च ह्रेपयन् शतधा भिद्यमानो निपपात इति. तच्च श्रुति-स्मृत्युक्तसंन्यासाश्रमधर्मप्रतिपालनरहितस्य तन्निषिद्धाचरणशीलस्य केवलं शिखा-सूत्रवर्जन- काषायवस्त्रपरिधानाभ्यामेव मस्करित्वेन प्रतीयमानस्य न लज्जाकरम् अस्ति; प्रत्युत, आपातालतलप्ररूढमूल-सकललोकव्याप्त-प्रकाण्ड श्रीवल्लभसिद्धान्तशाखिप्रबलप्रभञ्जनाहतः शङ्करसिद्धान्तानभिज्ञो गजम्मन्यो मशकः कान्दिशीकः स सहस्राक्षसहितः क्वचिद् लीनो वा गतो वा प्रमीतो वा इति तस्य वृत्तं न उपलभामहे.

(३) एवं प्रस्तावनायां मुख्यान् चतुरोऽपि विषयान् निराकृत्य तत्र सच श्रीवल्लभार्य... इत्यादिना परमात्मानम् इत्यन्तेन वर्णितं मुद्रणकारणादिकं परिहरन्ति **श्रीवल्लभमतइत्यादिना न उपलभामहे** इत्यन्तेन **तोष्टूय्यमान** इति **“अतिशयेन पौनःपुन्येन वा स्तूयमानः स्तौतेः यङन्तात् कर्मणि लटः शानचि शित्वेन सार्वधातुकत्वाद् यकि आने मुग्”** इति मुगागमे च सिद्धम्. **श्रीवल्लभवंश्येन** इति श्रीवल्लभस्य वंशभवेन, दिगादित्वाद् यत्. यस्तु श्रीवल्लभवंशीयाः इति प्रस्तावनायां प्रयोगः स चिन्त्यः. अवृद्धत्वेन “वृद्धात् छः” (पाणि.सू.४।२।११४) इति ‘यत्’प्राप्तेः दिगादिषु ‘वंश’शब्दपाठं निश्चितमपि अनादृत्य बलाद् गृहादिषु तत्पाठकल्पनस्य

अगतिकगतित्वात्; “**संख्या वंश्येन**”(पाणि.सू.२।१।१९) इत्यादि विरुद्धनिर्देशोपलम्भाद्, देवदत्तादिवद् ‘वंश’शब्दस्य नामधेयत्वाभावाच्च. **परीक्षणार्थम्** इति वर्ण्यमानगुणको अयम् अस्ति न वा इति परीक्षणार्थम्. **मन्दम्** इति स्पर्शक्रियाविशेषणम्. **स्थूणा** स्तम्भः **स्तोतॄन्** प्रस्तावनाकारादीन् लज्जयन् **निपपात** इति ग्रन्थस्य प्रत्यक्षत्वेऽपि तन्निष्ठनिपतनक्रियायाः अनायासजन्यत्वाद् अननुसन्धानेन पारोक्ष्याद् लिट्. अतएव भाष्ये “**कस्मिन् पुनः परोक्षे लिड् भवति**” (पातं.महाभा.३।२।११५) इत्यादिना परोक्षविचारे “**परोक्षे धातौ परोक्षे धात्वर्थे इति कः पुनः धात्वर्थः क्रिया क्रियायां परोक्षायाम्**” (पातं.महाभा.३।२।११५) इति व्याख्याय क्रियापारोक्ष्ये मतान्तराणि उक्त्वा तेषु उत्तमपुरुषासिद्धिं स्वमते सुप्तादिव्यापारे तत्सिद्धिं च दर्शयित्वा उच्यते “**अथ भवति वै कश्चिद् जाग्रदपि वर्तमानकालं न उपलभते. तद्यथा वैयाकरणानां शाकटायनो राजमार्गे आसीनः शकटसार्थं यान्तं न उपलेभे. किं पुनः कारणम्? कश्चिद् जाग्रदपि वर्तमानं कालं न उपलभते. मनसा प्रयुक्तानि इन्द्रियाणि उपलब्धौ कारणानि भवन्ति मनसो असान्निध्याद्**” (पातं.महाभा.३।२।११५।३) इति.

अत्र कैय्यटः “**केचिद् इति मतभेददर्शनाय अनेकदर्शनोपन्यासः इन्द्रियागोचरसाधनसाधितानद्यतन-क्रियावाचिनस्तु धातोः लिट् प्रत्ययः**” (पातं.महाभा.प्र.३।२।११५) इत्यादि उक्त्वा “‘**असान्निध्याद्**’ **इति विषयान्तरेण आकृष्टत्वाद् मदाद्यभिभवाद् वा इति भावः**” (पातं.महाभा.३।२।११५) इति व्याचष्टे. भाष्ये “**वर्तमानकालम्**” इति “**वर्तमानकालं वस्तु**” (पातं.महाभा.प्र.३।२।११५) इति विवरणकारः. तथाच अत्र स्तम्भे परैः आरोपितेषु गुणेषु तत्परीक्षणे च चित्तस्य अभिनिवेशाद् अयत्नसिद्धं तत्पतनं वर्तमानकालमपि न अनुसंहितम् इति भावः. न चैवं मत्ततापत्तिः शङ्क्या; शाकटायनादिवद् तदभावोपपत्तेः. अतएव विवरणे “**वैयाकरणानां शाकटायन इत्यनेन तस्य अमत्तता उक्ता अन्यचित्तता च भाष्ये**”(तत्रैव) इति उक्तम् इति दिक्. **निपपात** इति ‘नि’शब्देन पुनः आरोपणस्य अशक्यत्वं बोध्यते. **शिखासूत्र** इत्यादि. तथाच पराशरमाधवीये पद्मपुराणे “**शिखायज्ञोपवीतेन**

त्यक्तेन असौ कथं द्विजः”(   ) इति. तत्रैव अत्रिः “**यज्ञोपवीतं सर्वेषां द्विजानां मुक्तिसाधनं परित्यजन्ति ये मोहाद् नराः निरयगामिनः**”(   ) इति. हारीतः “**चत्वारोऽपि आश्रमाहि एते सन्ध्यावन्दनवर्जिताः ब्राह्मण्यादेव हीयन्ते यदपि उपगतं बुधैः**”(   ) इति यत् शास्त्रविद्भिः उपगतं तेनापि वर्जिता हीयन्तएव इति तद्व्याख्यातारः. अथ सन्ति शास्त्रोक्तधर्मानुष्ठायिनां विदुषां परमहंसानामेव पाक्षिकतत्त्यागवचनान्यपि; परन्तु, विहिताननुष्ठायिनः विप्रतिसिद्धसेविनो वेषमात्रेणतु न कार्यसिद्धिः इति सर्वसम्मतम्. दण्डाभावाद् मस्करित्वमपि औपचारिकमेव. **कान्दिशीको** भयात् पलायितः, “**कान्दिशीको भयद्रुतः**” (अम.को.३।१।८७) इति अमरः. सः सदानन्दगिरिः. शिष्टं सर्वम् अतिरोहितार्थम्. यत्तु प्रस्तावनायां वीणा-वेणु-मृदङ्ग... इत्यादिना वीणावादनादेः अनौचित्यं बोधितं; तदसद् भगवद्गुणविशिष्टसंगीते भगवत्प्रीत्यर्थं तदग्रे भक्त्या वीणादिवादने च दोषाभावात्. प्रत्युत, तस्य भगवत्प्रीतिसम्पादकत्वात्. अतएव पाद्मे कार्तिकमाहात्म्यपञ्चमाध्याये पृथुं प्रति नारदः “**तालवेणु-मृदङ्गादिध्वनियुक्तान् सनर्तकान् पुष्पैः गन्धैः सताम्बूलैः गायकानपि च अर्चयेद्, देवालये गीतपराः यतः ते विष्णुमूर्तयः तपांसि यज्ञदानानि कृतादिषु जगद्गुरोः तुष्टिदानि कलौ यस्माद् भक्त्या गानं प्रशस्यते, ‘क्व त्वं वससि देवेश?’ मया पृष्टस्तु पार्थिव विष्णुः एवं तदा प्राह मद्भक्तिपरितोषितः, ‘नाहं वसामि वैकुण्ठे योगिनां हृदये रवौ मद्भक्ताः यत्र गायन्ति तत्र तिष्ठामि नारद’**” (पद्मपुरा.६।९२।२१) तथा “**मत्पुराणकथां श्रुत्वा मद्भक्तानां च गायनं निन्दन्ति ये नराः मूढास्ते मद्द्वेष्या भवन्ति हि**” (पद्मपुरा.६।९२।२२-२३) नच अस्य शूद्रमात्रपरत्वं शक्यं, तैत्तिरीयब्राह्मणे तृतीयकाण्ड नवमप्रपाठके “**ब्राह्मणौ वीणागाथिनौ गायतः श्रिया वा एतद्रूपं यद् वीणा श्रियमेव अस्मिन् तद् अद्धत्तः**” (तैत्ति.ब्रा.३।९।१४।५२) इत्यादिना “**दिवा ब्राह्मणो गायेद् नक्तं राजन्यः**” (तैत्ति.ब्रा.३।९।१४।५४) इति ब्रह्मक्षत्रयोरपि गानविधानाद् यावद् अनुवाकसमाप्तितत्फलाम्नानाच्च. याज्ञवल्क्योऽपि तृतीयाध्याये अध्यात्मप्रकरणे “**वीणावादनतत्त्वज्ञः श्रुतिजातिविशारदः तालज्ञः च अप्रयासेन मोक्षमार्गं निगच्छति**” (याज्ञ.स्मृ.३।४।११५)

इति मोक्षसाधनत्वं तस्य आह. अष्टमस्कन्धादावपि **"अत्यद्भुतं तच्चरितं सुमङ्गलं गायन्तः आनन्दसमुद्रमग्नाः"** (भाग.पुरा.८।३।२०) इत्यादिना भगवत्सम्बधितं तद् अनेकत्र प्रशस्यते. नच **गायन्तः** इत्यस्य कथयन्तः इति अर्थः कल्प्यः, **"नामानि अनन्तस्य यशोङ्कितानि यच्छृण्वन्ति गायन्ति गृणन्ति साधवः"** (भाग.पुरा.१।५।११) इत्यादिषु स्पष्टं भेदेन निर्देशात्. कूर्मपुराणेऽपि सप्तचत्वारिंशाध्याये हरिवर्षवर्णने **"गायन्ति चैव नृत्यन्ति"** (कूर्मपुरा.१।४७।१९) इत्यादिना विष्णोः गानप्रियत्वं दर्शितम्. विस्तरस्तु अन्यत्र द्रष्टव्यः.

॥ इति प्रस्तावनाखण्डनम् ॥

* * *



॥ प्राभञ्जनः ॥

(सहस्राक्षखण्डनपरः)

मारुतशक्तिसहितः

(१) [श्रीगणेशाय नमः. परमहंस-परिव्राजकाचार्य-
श्रीसदानन्दगिरि-विरचितः.

ॐ तत्सद् स्वनिषेवितिष्यमलहृद् श्रीशङ्करं देशिकं
न्याय्यश्रौतमतस्य शिष्यसहितं नत्वा पुरा ब्राह्मणैः ॥
शप्तैर्विप्रकुलोद्भवैः श्रुतिपथाद् दुष्टार्थबोधैर्नरा
मा प्रच्याविषतेति तान्प्रति मया ज्ञाप्यः सहस्रेक्षणः ॥१॥

'ॐ' श्रीसदानन्दाय नमः. 'ॐ' इत्यादि पदत्रयेण ब्रह्म निर्दिश्यते. "'ॐतत्सद्' इति निर्देशो ब्रह्मणः त्रिविधः स्मृतः" (भग.गीता १७।२३) इति भगवदुक्तेः. श्रीशङ्कराचार्यस्य स्वभक्त-कलिमल-हर्तृत्वं श्रौत-धर्मोपदेष्टृत्वं च कौर्मे पूर्वखण्डे एकोनत्रिंशे[1] अध्याये वर्णितम्. तथाहि

"करिष्यत्यवताराणि शङ्करो नीललोहितः ॥
श्रौतस्मार्तप्रतिष्ठार्थं भक्तानां हितकाम्यया ॥१॥
उपदेक्ष्यति तज्ज्ञानं शिष्याणां 'ब्रह्म'संज्ञितम् ॥
सर्ववेदान्तसारंहि धर्मान् वेदनिदर्शनान्[2] ॥२॥
ये तं प्रीत्या[3] निषेवन्ते येन केनोपचारतः ॥
विजित्य कलिजान् दोषान् यान्ति ते परमं पदम् ॥३॥
अनायासेन सुमहत्पुण्यं आप्नोति[4] मानवः[5] ॥

---

१. 'त्रिंशे'इतिपाठः पूर्वमुद्रित-सहस्राक्षे. २.'निदर्शितान्'इति मुद्रितपु. ३.'प्रीता'इति मुद्रितपु. 'विप्रा'इत्यपि मुद्रितपु. ४.'पुण्यमाप्नोति मानवः'इति मुद्रितपु. ५.ते यान्ति मानवाः

अनेकदोषदुष्टस्य कलेरेष[६] महान् गुणः''॥४॥
(कूर्मपुरा.१।३०।३३-३७) इति

''करिष्यति अवताराणि'' इत्यत्र 'अवतार'शब्दः ''अवे तृस्त्रोः'' (पाणि.सू.३।३।१२०) इति अधिकरणघञन्तः. तेन पुल्लिङ्गनियमो न. अत्र ''इहावतरिता लोके'' इत्येव असन्दिग्धं शिवमात्रावतारबोधक-वाक्यप्रयोगे कर्तव्ये अवताराणि करिष्यति इति स्वेतरसाधारणावतारकरणबोधहेतुवाक्यप्रयोगं कुर्वता अवतरन्ति येषु इति अर्थसूचनात् स्वस्य परेषां च अवताराणि करिष्यति इति सूचितम्. तत्रच के ते इतरे ? इति आकांक्षा ''उपदेक्ष्यति तज्ज्ञानं शिष्याणां 'ब्रह्म'संज्ञितम्'' (कूर्मपुरा.१।३०।३४) इति प्रत्यासन्नेन वाक्येन शाम्यते. एवञ्च शिष्याणामपि अवतारत्वं बोधितम्. एतेन ''कलीनां बहुत्वेन प्रतिकलि शङ्करावतारसत्त्वेन च अवतारबहुत्वसिद्धौ बहुवचनस्य प्रक्षीण-शक्तिकतया शिष्याणाम् अवतारत्वे न मानम्'' इति कस्यचिद् उक्तिः प्रत्युक्ता. किञ्च ''चतुर्भिः सह शिष्यैस्तु शङ्करो अवतरिष्यति'' (वायुपुरा. ।) इति वायुपुराणमपि अत्र मानम्. तत्रहि शिष्याणाम् अवतारक्रियया साहित्यम् उक्तम्. एवञ्च तच्छिष्याणां सामान्यतो अवतारत्वे सिद्धे बुद्धाद्युक्तिष्विव इह अप्रामाण्ये मानाभावेन तदुक्तीनां व्यासाद्युक्तिवत् प्रामाण्ये शङ्करदिग्विजयादिरूपतदुक्तिभिः विशिष्य तेषां तत्तदवतारत्वं निश्चेतव्यमिति तेषां सर्वेषामपि कलि-मल-हर्तृतया नमनीयत्वेन 'शिष्यसहितम्' इति उक्तम्. प्रत्यक्षत्वानुमितत्वाभ्यां द्विविधया श्रुत्या उक्तस्य धर्मस्य पुराणे श्रौत-स्मार्त इति भेदेन कीर्तनेऽपि इह अभेद-विवक्षया श्रौतत्वेनैव

---

[६] 'कलेरेक' इति मुद्रितपु

कीर्तनं, **श्रौत**इति. ‘‘ज्ञानम् उपदेक्ष्यति’’ उपदेशेन सम्पादयिष्यति. ‘‘ब्रह्म’संज्ञितं’ ब्रह्मविषयकं सर्ववेदान्तानां सारं फलम्. यद्वा ‘‘ब्रह्म’संज्ञितं’ ब्रह्माख्यम्. ‘सर्ववेदान्तसारं’ सर्ववेदान्ततात्पर्यविषयभूतम्. ‘ज्ञानं’ चिद्रूपम्. ‘उपदेक्ष्यति’ वर्णयिष्यति. ‘‘धर्मान् वेदनिदर्शनाद्’’ (कूर्मपुरा.१।३०।३५) इत्यत्र उपदेक्ष्यति इति अनुवर्त्य पृथग्वाक्यता ज्ञेया. निदर्श्यन्ते अनेन इति ‘निदर्शनम्’. वेदो निदर्शनं येषां ते ‘वेदनिदर्शनाः’, वेदप्रमाणकाः तान् इति अर्थः. ननु पुराणे ‘‘विजित्य कलिजान् दोषान्’’ (कूर्मपुरा.१।३०।३६) इत्यत्र दोष-जयादिकं प्रति सेवकानामेव कर्तृत्वम् उक्तं तत्कथं शङ्कराचार्यस्य कलिमल-हर्तृत्वम् उच्यते इति चेद्, वक्ष्यमाणरीत्या ईश्वरस्य कर्मफलदातृत्वे जीवानां तद्द्वारैव फलाप्त्या(फलाय) इति गृहाण. इदम् उपलक्षणम्, तेन पुण्य-हेतुत्वं तद्द्वारा हित-सम्पादकत्वं च अनायासेन ‘सुमहद्’ इति ‘‘भक्तानां हितकाम्यया’’ (कूर्मपुरा.१।३०।३४) इति च कौर्मोक्तं बोध्यम्. ‘‘व्याकुर्वन् व्याससूत्रार्थं श्रुतेः अर्थं यथा उचिवान्. श्रुतेः न्याय्यः सएव अर्थः शङ्करः स विताननः’’ (शिवपुरा.?) इति शिवपुराणवाक्यम् अवष्टभ्य आह **न्याय्य** इति. ‘विताननो’ व्याख्याता. क्वचित् ‘सविता न ना’ इति पाठः, तत्र ‘न ना’ इत्यस्य ‘नरो न’ इति अर्थः. न्यायाद् अनपेतो न्याय्यः. न्यायो युक्तिः तत्सहितः तदविरुद्धः च इति निष्कर्षः. श्रौते अर्थे युक्तेः अपेक्षोत्तरभागे षोडश-खण्ड-खण्डनावसरे उपपादयिष्यते.]

॥ अथ प्राप्तावसरः सहस्राक्षः खण्ड्यते॥

(२) तत्र आदौ 'ॐ तत्सद्' **इत्यारभ्य** "विष्णोः स्मृत्या च मङ्गलम्" **इत्यन्तग्रन्थेन श्रीशङ्कराचार्य-नमस्कारपूर्वकं वैष्णवसम्प्रदायप्रवर्तकाचार्याणां तन्मतवर्तिनां च शप्तत्वं कौर्मवाक्यबोधितलक्षणसप्तकेन प्रतिपादितम्. तत्र शङ्कराचार्याणां शिवावतारत्वेऽपि तदुक्तकौर्मवचनानि तु शिवविषयाण्येव. तेषाम् अवतारप्रयोजनन्तु पाद्मवाराहादिषु प्रसिद्धम् इति अन्यत्र विस्तरः.**

(३) श्रीमद्बालमुकुन्दमिन्दुवदनं वृन्दावनानन्दिनम्
वन्दे सुन्दरमेकमेव न परान्निन्दामि वृन्दारकान्॥
वर्तन्तामचिरन्तनादिविषदोनन्ता अनन्तातले
मन्तुं ते गणयन्तु मायमितरान् मूर्धा न नन्तुं क्षमः॥१॥

एवं तदनुयायिना कृतां प्रस्तावनां बाध्यसामान्यचिन्तया दूषयित्वा साक्षात् तत्कृतं सहस्राक्षग्रन्थं दूषयितुम् उपक्रमन्ते **अथ** इति. **अथ** सूचीकटाहन्यायेन प्रस्तावना खण्डनानन्तरम् अवसरसंगत्या **सहस्राक्षः खण्ड्यते.** संगतिस्तु "**अनन्तरा(आनन्तर्या)भिधानप्रयोजकाकाङ्क्षाजनक ज्ञानविषयो(हि) अर्थः**" (तत्त्वचि.अनु.खं.) इति दीधितिकारादयः. वस्तुविशेषस्य वस्तुविशेषानन्तरं निरूपणे प्रयोजिका या जिज्ञासा तज्जनकं तत्स्वरूपोपयोगि यज्ज्ञानं तद्विषयो अर्थः इति अर्थः. अवसरश्च संगतिविशेषः "**सप्रसंगः उपोद्धातो हेतुता अवसरः तथा निर्वाहकैक्यकार्यैक्ये(निर्वाहकैककार्यत्वे) षोढा संगतयो(संगतिः ईष्यते) मताः**" (अनु.जा.सं.प्र.) इति उक्तेः. वस्तुतस्तु परिगणनं प्रायिकम् आक्षेपादीनां संगत्यन्तराणाम् उपलब्धेः इत्यादि अन्यत्र द्रष्टव्यम्. तत्र 'अवसरो' नाम प्रतिबन्धकीभूतजिज्ञासानिवृत्तौ अवश्यवक्तव्यत्वम्. 'अथ' शब्दः च अत्र साक्षाद्ग्रन्थखण्डनारम्भे पुनः मङ्गलार्थः. "**'ॐकारः' च 'अथ'शब्दश्च द्वौ एतौ ब्रह्मणः पुरा कण्ठं भित्त्वा विनिर्यातौ तस्माद्**

माङ्गलिकौ उभौ” (नार.पुरा.१।५१।१०) इति “**अथ वर्णसमाम्नायः**” (तैत्ति.प्राति.१।१) इत्यत्रत्य त्रिभाष्यरत्नादौ उदाहृतशिक्षाकारवचनात्. नच तस्य आनन्तर्यार्थकत्वेन व्याख्यातत्वाद् न मंगलार्थकत्वं, “सकृदुच्चरितः शब्दः सकृदेव अर्थं गमयति” इति व्युत्पत्तेः इति शङ्क्यं, संगीतोपकाराद्यर्थं कृतेनापि मृदङ्गध्वनिनेव इतरार्थकतया प्रयुक्तेन अनेनापि मङ्गलसिद्धिसम्भवात्. अव्ययतत्त्वबोधिन्यादिषु “**निपातस्तु स्वरूपेणैव मङ्गलं मृदङ्गध्वनिवद्**” (पाणि.सू.त.बो.१।१।३७) इति अङ्गीकारात्. “**सिद्धे शब्दार्थसम्बन्धे वृद्धिरादैच्**” (पातं.महाभा.१।१।१) इत्यादौ अन्यार्थकैरपि ‘सिद्ध’-‘वृद्ध्या’दिशब्दैः मङ्गलसिद्धेः महाभाष्यादौ दर्शितत्वात् च. मङ्गलप्रयोजनन्तु तत्रैव पस्पशाह्निकवृध्याह्निकयोः उक्तं “**मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि च भवन्ति आयुष्मत्पुरुषकाणि च अध्येतारः च सिद्धार्थाः यथा स्युः इति वृद्धियुक्ताः यथा स्युः**” (पातं.महा.भा.१।१।१) इति एतदेव प्रयोजनं साधयितुं पूर्वोत्तरमीमांसा-पातञ्जलयोगादिसूत्रवत् शबरस्वामि-श्रीमदाचार्य-श्रीव्यासाचार्यप्रणीततत्तद्भाष्यवत् च ‘अथ’शब्देनैव साक्षाद्ग्रन्थखण्डनारम्भे पुनः मङ्गलम् आचरितम्. भूयो मङ्गलन्तु प्रागेव कृतम् आपरिसमाप्ति-विघ्नपरिहारार्थं भविष्यति.

अथ सहस्राक्षकृता भगवदनुयायिनो अपार्थाभिधानरहितान् अजय्यानपि जिगीषता स्वप्रबन्धपूर्वभागे दुःशासनप्रधानाः कौरवाक्षौहिणीकल्पा एकादश-श्लोकाः प्राणायिषत व्यवरिषत च स्वयमेव. तत्र आद्यं पद्यं सव्याख्यानं खण्डयितुं तत्तात्पर्यकथनमुखेन गृह्णन्ति **तत्र आदौ** इति. सहस्राक्षे ‘ॐ’इत्यादि पदत्रयेण इत्यादि उपपादयिष्यते इत्यन्तं भागम् एकहेलया निराकुर्वन्ति **तत्र शङ्कराचार्याणाम्** इत्यादिना **अन्यत्र विस्तरः** इत्यन्तेन. अयम् अत्र आशयः : तदीयश्लोकारम्भे ‘ॐतत्सद्’ इति पदत्रयं क्रियापदाभावाद् गौरश्वः पुरुषो हस्ती शकुनिः मृगो ब्राह्मण इत्यादिवद् आकाङ्क्षानुपशमाद् अप्रमाणमेव.

यथा वदन्ति “**यद् यद् आकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते तेन तेन अन्वितः स्वार्थः पदैरेव अवगम्यते**” (न्या.मु.श.खं.८२) इति. एतच्च

दिनकरभट्टाचार्याः **“स्वार्थाकाङ्क्षितं स्वार्थयोग्यं यद् यत् सन्निधानं प्रपद्यते स्वार्थोपस्थिति...विषयो भवति तेन तेन अन्वितः स्वार्थः पदैः प्रथमम् अनुभाव्यते, अनन्तरं च महावाक्यार्थबोधः”** (न्या.का.दि.श.खं.८२) इति व्याचक्षते. आकाङ्क्षास्वरूपन्तु तार्किकाः **“येन पदेन विना यत्पदस्य अन्वयाननुभावकत्वं...तत्पदविशिष्टत्वं”** (न्या.का.दि.श.खं.८४) **“...तस्य आकाङ्क्षा क्रियापदं विना कारकपदं न अन्वयबोधं जनयति तेन तस्य आकाङ्क्षा”** (न्या.मु.श.खं.८४) इति आहुः. यच्च एकपदे अपरपदवत्त्वं तत्पदे अपरपदाव्यवहितोत्तरत्वं तच्च प्रकृतिप्रत्यययोरेव सम्भवति, तेन ‘घटम्’ इत्यादौ ‘घट’पदवैशिष्ट्य‘मं’पदाकाङ्क्षा. क्रियाकारकपदयोस्तु न उत्तरपदत्वनियमः. “पचति चैत्रः” “चैत्रः पचति” इति वाक्यद्वयाद् अन्वयबोधात्. अतः क्रियाकारकपदानां सन्निधानम् आसत्त्या चरितार्थम् इति वदन्ति. तत्पक्षेऽपि प्रकृतेः ‘नमामी’त्यादिपदान्तराभावाद् अन्वयाननुभावकत्वदोषः तदवस्थः. शाब्दिकास्तु **“वाक्यसमयग्राहिका च आकाङ्क्षा. साच एकपदार्थज्ञाने तदर्थान्वययोग्यार्थस्य यज्ज्ञानं तद्विषयेच्छा ‘अस्य अन्वय्यर्थः कः’ इत्येवंरूपा पुरुषनिष्ठैव. तथापि तस्या आकाङ्क्षाविषये अर्थे आरोपः. एतदेव अभिधानापर्यवसानम् इति उच्यते. ‘अयम् अर्थो अर्थान्तरम् ‘आकाङ्क्ष’ इति व्यवहारात्. पदेतु न आरोपः. अर्थबोधोत्तरमेव जिज्ञासोदयात् च. समर्थसूत्रे भाष्ये अर्थयोः ‘व्यपेक्षाकथनाच्च’... जिज्ञासोत्थापकं चैकपदार्थे अपरपदार्थव्यतिरेकप्रयुक्तस्य अन्वयबोधाजनकत्वस्य ज्ञानम् इति तद्विषये तादृशान्वयबोधाजनकत्वेऽपि ‘आकाङ्क्षा’ इति व्यवहारः... अन्वयबोधः च तदाकाङ्क्षितसकलक्रियाकारकादिविषयो विवक्षितः. एतेन तस्य हेतुत्वे खण्डवाक्यार्थबोधोत्तरं महावाक्यार्थबोधो न स्याद् इति अपास्तम्. खण्डबोधस्य क्रियातद्विशेषणकारकतद्विशेषणैः तदन्यतरमात्रविषयकत्वात्... किञ्च उक्तस्य अन्वयबोधाजनकत्वज्ञानस्य समभिव्याहारकारणताज्ञानमूलकत्वात् सापि आकाङ्क्षा. अतः ससमभिव्याहारः तादृशतादृशान्वयबोधजनक इति ज्ञानं कारणं तदजानताम् अबोधात् च... ससमभिव्याहारः तत्तदन्वयबोधजनकः इति अयमेव वाक्यविषये ऐश्वरः समयः तत्परिपालिका च मीमांसा”** (लघुमञ्जूषा.आकाङ्क्षाविचार) इत्यादि आहुः. तेन तन्मतेऽपि असमभिव्याहत-

क्रियापदकं साकाङ्क्षार्थम् एतद् वाक्यबोधकमेव. अन्यथा ‘‘दश दाडिमानि’’ ‘‘षडपूपा’’ इत्यादिकमपि प्रमाणं स्यात्.

ननु अनन्वितार्थमपि पदत्रयं मङ्गलार्थम् उच्यते इति चेद्, नहि मङ्गलार्थत्वमात्रेण पूर्वोक्तदोषनिस्तारः. अतएव ‘‘**‘ॐकारः’ च ‘अथ’शब्दः च**’’ (द्र.ब्र.सू.शां.भा.र.१।१।१) इति स्मृत्या ॐकारसमानयोगक्षेमस्यापि ‘अथ’शब्दस्य अन्यार्थमृदङ्गादिध्वनिवत् श्रवणमात्रेण मङ्गलसिद्धिम् अभिप्रेत्य तस्य अर्थान्तरं तद्घटितवाक्ये अन्वयः च अदर्शि शारीरकभाष्ये जिज्ञासासूत्रे शङ्कराचार्यैः. तथा अत्रापि प्रामाण्यसिद्धये तदन्वययोग्यं किमपि वक्तव्यम्, अन्यथा तत्रापि केवलमङ्गलार्थकएव ‘अथ’शब्दो अनन्वितः स्वीक्रियताम्, कृतं तस्य अर्थान्तरपरत्वकल्पनया. अथ प्रथमतरेऽपि अस्मिन् वाक्ये ‘ॐ’आदिपदवाच्यं ‘नमामि’ ‘स्मरामि’ इति अध्याहारेण पूरणन्तु प्रथमग्रासे मक्षिकापातः. ‘द्वारम्’ इत्यादौ ‘पिधेहि’ इत्यादेरिव ‘नमामि’ इत्यादेः शीघ्रोपस्थितिकत्वाभावोऽपि प्रचुरव्यवहारविरहाद् द्रष्टव्यः. नच समासादि कल्प्यम्, स्वयम् अव्याख्यानेन तथाभिप्रायाभावनिश्चयात्; ‘स्व’शब्दपरामृष्टदृश्यव्यक्तिविशेषे अन्वयायोगात् च इति अलम्. अपिच गीतावाक्ये ‘ब्रह्म’शब्दो अक्षरपरः प्रतीयते; प्रणवस्य अक्षरवाचकत्वाद्, माण्डूक्ये ‘‘**‘ॐ’इति एतदक्षरम्**’’ (माण्डु.उप.१।१) इति श्रावणात्, कठवल्लीष्वपि ‘‘**तत् ते पदं संग्रहेण ब्रवीमि ‘ॐ’ इति एतद्**’’ (कठोप.१।२।१५) इति स्फुटं धामवाचकताबोधनात्. अग्रेऽपि ‘‘**एतद्ध्येव अक्षरं ब्रह्म**’’, ‘‘**एतदालम्बनं श्रेष्ठम्**’’ (कठोप.१।२।१६,१७) इति तथैव प्रपञ्चनाद्, द्वादशस्कन्धेऽपि ‘‘**स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः**’’ (भाग.पुरा.१२।६।४१) इति उपबृंहणात् च. तेन ततः परस्य तत्र रममाणस्य स्मरणलक्षणे मूलस्थमङ्गले एतदपेक्षया उत्कर्षः स्वतःसिद्धः इति ध्येयम्.

यच्च कौर्मवाक्यावलम्बेन शङ्कराचार्याणां शिवावतारत्वादिकम् उक्तं तत्र तेषां तदवतारत्वन्तु अस्माकम् अभिमतमेव. परं त्वदुक्तवचनविषये तु वदामः : कौर्म-ब्रह्माण्ड-सूतसंहितादिषु द्राविड-केरलशैवैः भूयएव प्रक्षिप्तम्

इति विद्वत्किंवदन्तीसत्त्वात् सम्प्रदायान्तरग्रन्थेष्वपि तस्या उज्जीवनात् च अस्ति तावद् एतेषां समूलत्वएव सन्देहः. अतएव तावकोऽपि न कोऽपि प्रामाणिकः एतानि उदाहार्षीत्. यदि इदं समूलम् एवम् अर्थपरं च ‘अभविष्यत्’ कथं तर्हि माधवादयो दिग्विजयादौ न उदाहरिष्यन्. तथापि त्वयेव न अस्माभिः अंहो-अंहो-भयाद् आर्षतया व्यवह्रियमाणे वस्तुनि सहसा प्रक्षिप्तत्वं शक्यवचनम्. अतः सति समूलत्वे समादधामः : ‘‘करिष्यति अवताराणि’’ इत्यादिवचांसितु न शङ्कराचार्यविषयाणि. तेषाम् एकत्वेन अत्र ‘अवताराणी’ति बहुवचनेन च अतत्परत्वप्रतीतेः. नच ‘शङ्कर’पदोपादानमात्रात् तत्परत्वं शङ्क्यं तस्मिन्पुराणे ‘‘**अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे**’’, ‘‘**निशम्य भगवान् वाक्यं शङ्करो धर्मवाहनः**’’ (कूर्मपुरा.१।१०।४१, १।७।२९) एवमादिषु अनेकत्र देवाभिप्रायेणैव ‘शङ्कर’शब्दाभ्यासदर्शनात्. किञ्च अत्र ‘शङ्कर’पदम् अवतारपरम् अवतारिपरं वा? न आद्यः, तस्मिन् नीललोहितत्वाप्रसिद्धेः. शङ्कराचार्याणाम् अनेकावतारकर्त्तृत्वापत्त्या तेषाम् अवतारत्वासिद्धिप्रसक्तेश्च. द्वितीयः चेद्; ओम! कुर्मः. तथा सति तत्पुराणप्रसिद्धाः रुद्र-शुक-साम्बादयः शिवावताराएव अत्र ‘अवतार’पदेन गृह्येरन्, एकग्रन्थावगतत्वाद् नतु शङ्कराचार्याः, एकत्वेन बहुवचनविरोधात्. अमुकस्मिन् देशे काले च अमुको नाम भविष्यति इति निर्देशाभावाच्च. रुद्रादीनां शिवावतारत्वन्तु यथा तत्रैव सप्तमाध्याये ‘‘**भृकुटीकुटिलात् तस्य ललाटात् परमेष्ठिनः समुत्पन्नो महादेवः शरण्यो नीललोहितः**’’ इत्यादि उक्त्वा उच्यते ‘‘**निशम्य भगवान् वाक्यं शङ्करो धर्मवाहनः स्वात्मना सदृशान् रुद्रान् ससर्ज मनसा शिवः कपर्दिनो निरातङ्कान् त्रिनेत्रान् नीललोहितान्**’’ (कूर्मपुरा.१।७।२६, २९) इति. एकादशाध्यायेच ‘‘**स्वात्मना सदृशान् रुद्रान् ससर्ज मनसा शिवः कपर्दिनो निरातङ्कान् नीलकण्ठान् पिनाकिनः. त्रिशूलहस्तान् उद्रिक्तान्... महावृषभवाहनान् वीतरागान् च सर्वज्ञान् कोटि-कोटिशतान् प्रभुः**’’ (कूर्मपुरा.१।१०।३३-३५) इति. तथा एकोन्नविंशाध्याये ‘‘**द्वैपायनात् शुको जज्ञे भगवानेव शङ्करः अंशाशेन अवतीर्य उर्व्यां सम्प्राप परमं पदम्**’’ (कूर्मपुरा.१।१९।२५) इति. चतुस्त्रिंशाध्याये च शैवान् व्यासं प्रत्यभिज्ञापयन्तः पैलादयः ‘‘**यस्य देवो महादेवः साक्षाद्देवः पिनाकधृक् अंशाशेन अभवत् पुत्रो नाम्ना शुकः**

इति प्रभुः'' (कूर्मपुरा.१।३४।११) इति. तथा चतुर्विंशाध्यायसमाप्तौ ''**तत् शृणुध्वं मुनिश्रेष्ठाः यथा असौ देवकीसुतः दृष्ट्वा लेभे सुतं रुद्रं तप्त्वा तीव्रं महत्तपः**'' (कूर्मपुरा.१।२४।८६) इति. ततो विस्तरेण कथाम् उक्त्वा सप्तविंशाध्यायारम्भे पुनः उदितं ''**ततो लब्धवरः कृष्णो जाम्बवत्यां महेश्वराद् अजीजनद् माहात्मानं साम्बम् आत्मजम् उत्तमम्**'' (कूर्मपुरा.१।२७।१) इति. महेश्वराद् लब्धवरः इति अन्वयः. नच लृडर्थबाधः शङ्क्यः, तस्मिन् पुराणे ''**व्यत्ययम् इच्छति शास्त्रकृद् एषाम्**''(पाणि.सू.३।१।८५) इति आश्रित्य क्वचिद् भूतेऽपि लृटः प्रयोगात्. यथा कलिप्रवृत्त्यनन्तरं युगधर्मान् वदता व्यासेन एकोनत्रिंशे ''**कृतं त्रेता द्वापरं च सर्वेषु एतेषु वै नराः भविष्यन्ति महात्मानो धार्मिकाः सत्यवादिनः**'' (कूर्मपुरा.१।२९।४) इत्यत्र '**भविष्यन्ति**' इति प्रयुक्तम्. मुख्यो अर्थस्तु वक्ष्यते.

यस्तु बहुवचनं सार्थकयितुं ''**अवेतृस्त्रोः**'' (पाणि.सू.३।३।१२०) इति अधिकरणे घञं स्वीकृत्य प्रयोगसाधुत्वाय पुल्लिङ्गानियमः उक्तः सतु पाणिनीयगौनर्दीयसर्वस्वानधिगमादेव. ''**अवेतृस्त्रोः**'' (पाणि.सू.३।३।१२०) इत्यत्र ''**पुंसि संज्ञायाम्**'' (पाणि.सू.३।३।११८) इति अनुवृत्तेः तत्रापि पुल्लिंगनियमाद् घापवादतयापि तत्समानविषयतौचित्यात्. अतएव तत्त्वबोधिन्याम् ''**अवे उपपदे तृस्तृभ्यां करणाधिकरणयोः पुंसि संज्ञायां घञ् स्यात्. घस्य अपवादः**''(पाणि.सू.त.बो.३।३।११८) इति व्याख्यातम्. ननु ''**पुंसि संज्ञायां घः प्रायेण**'' (पाणि.सू.३।३।११८) इति अधिकारात् 'प्रायेण' इति उक्त्या पुंस्त्वानियमः स्यात्. न स्यात्. 'प्रायेण' इत्यस्य प्रधानेन प्रत्ययेनैव सह अन्वयस्य भाष्यकृता स्वीकारात्. तथाच गोचरसञ्चरसूत्रे भाष्ये ''**गोचरादीनां ग्रहणं शक्यम् अकर्तुम्. घञ् कस्माद् न भवति? प्रायवचनाद् यथा कषः निकषः इति. प्रायवचनाद् घञ् न भवति**'' (पातं.महाभा.३।३।११९) इति. नच 'प्रायेण'पदम् आवर्त्य प्रायेण पुंसि प्रायेण संज्ञायाम् इति व्याख्येयम्. आवृत्तौ तत्र-तत्र तस्य अन्वये च मानाभावात्. नहि प्राञ्चो अर्वाञ्चो वा केऽपि तथा व्याचक्षते. अतो अत्र पुंस्त्वं नियतमेव. सूत्रकृतापि पूर्वोत्तरसूत्रेषु गोचरसञ्चरादीनाम् उदङ्कानायान्तानां पुंस्त्वेनैव निर्देशात्. वार्तिकोक्तौ

अवहारादिनामपि “**अवह्रियन्ते अस्मिन् अवहारः**” (पातं.महाभा.३।३।१२१) इत्यादिना भाष्ये तथा निर्देशात् क्वापि लिङ्गान्तरानिर्देशात् च. अतएव “**अवस्तारो जवनिका**” (पाणि.सू.सि.कौ.३।३।१२०) इति प्रकृतसूत्रोदाहरणं सङ्गच्छते. अनियमेतु सः जवनिकापर्यायतया टाबन्तो व्यवह्रियेत. प्रायिकत्वेच पुंसि इति अनर्थकमेव स्यात्, पाक्षिकपुंस्त्वस्य निर्देशादिनैव सिद्धेः. किञ्च “**खनो घ च**” (पाणि.सू.३।३।१२५) इत्यत्र “**चजोः कुधिण्यतोः**” (पाणि.सू.७।३।५२) इति ‘कुत्वा’प्राप्त्या अनन्यार्थकाद्धित्वाद् ज्ञापकाद् अन्यतोऽपि घं स्वीकृत्य भगः पदम् इति उदाहृतं, तत्र तत्त्वबोधिन्यां “**ननु ‘पदम्’ इत्यत्र ‘घ’स्य किं प्रयोजनम् इति चेद् अत्र आहुः ‘करणाधिकरणयोः’ ‘पुंसि संज्ञायाम्’ इति यदि ‘घः’ स्यात् तदा ‘पदम्’ इति नपुंसकं न स्याद् अनेन चेद् ‘घो’ भवति तदा तु इष्टसिद्धिः इति**” (पाणि.सू.त.बो.३।३।१२५) इति उच्यते. तेन पूर्वत्र पुंस्त्वं नियतमेव इति अवगम्यते. एतदपि प्राचाम् अनुरोधेन ‘भग’पदयोः उदाहरणत्वाभिप्रायम्. नव्यानुरोधाद् ‘भगः’ ‘पदम्’ इति क्वचित् प्रयोगः इति आश्रित्य ‘भगः’ इत्यस्यैव उदाहरणत्वे अभिप्रेयमाणेतु अत्रापि पुंस्त्वमेव नियतम्. “**लिङ्गम् अशिष्यं लोकाश्रयत्वाद्**” (पातं.महाभा.२।१।३६) इतितु लिङ्गानुशासनस्यैव प्रत्याख्यानं नतु अष्टाध्यायीस्थानां पुंसि-इत्याद्यधिकाराणाम्. अन्यथा स्त्रियाम् इत्यादेः अभावात् पुंस्यपि टाबादयः स्युः. “**चतुर्थी तदर्थार्थ...**” (पाणि.सू.२।१।३६) इति सूत्रे “**अर्थेन नित्यसमासो विशेष्यलिंगता च**” (पाणि.सू.वा.२।१।३६) इति वार्तिककारोक्तं प्रत्याचक्षाणेन भाष्यकृता “**यदपि उच्यते सर्वलिंगता वक्तव्या इति. न वक्तव्या लिङ्गम् अशिष्यं लोकाश्रयत्वाद् लिंगस्य**” (पातं.महाभा.२।१।३६) इति कथनाद् यत्र प्राधान्येन लिङ्गम् अनुशिष्यते परवद् लिङ्गम् इत्यादौ तदेव प्रत्याख्यायते इति ज्ञायते. तत्त्वबोधिनीकारादयस्तु “**लिङ्गानुशासनं सर्वमेव प्रत्याख्यानं तथापि तत् प्रौढिवादमात्रं अन्यथा व्याकरणस्यैव वैयर्थ्यप्रसङ्गाद्**” (पाणि.सू.त.बो.२।४।२६) इति आहुः. तत्प्रत्याख्यानबलाद् लिङ्गानियमविवक्षणेतु भावार्थघञं परित्यज्य अधिकरणार्थकघञ्पर्यन्तानुधावनप्रयासो व्यर्थएव. “शेषं पुंवद्” इत्यादिप्रयोगदर्शनेन “**घञजपाः पुंसि**” इत्यस्य प्रायिकतायाः शक्यवचनत्वात्.

अधिकरणार्थतदाश्रयणेतु 'अवतार:' 'कूपादे:' इत्यादाविव सुतरां पुंस्वनियमापत्त्या व्याधिनाशाय भक्षिते लशुने प्रत्युत वृद्धो व्याधि:. अपिच ''अवतरन्ति येषु'' इति व्याख्याने कानि तानि 'अवतार'शब्दवाच्यानि अवतरणाधिकरणानि इति आकाङ्क्षानुपशमाद् मूलवाक्ये स्वार्थबोधनासामर्थ्यं दोष:. तथा व्याख्यात्रा त्वयापि अकथितत्वेन तवापि तदनवबोधप्रतीतेश्च. अथ यथाकथञ्चित् कस्यचिद् विशेष्यतया अत्र अध्याहारं ब्रूया: तथापि तेन सह 'अवतार'शब्दस्य संज्ञासंज्ञिभावग्राहकं शास्त्रं शिष्टव्यवहारो वा त्वया दर्शनीय:, संज्ञायां घञ्विधानात्. नच प्रायेण संज्ञायाम् इति वाच्यं; दत्तोत्तरत्वात्. गुणप्रधानसन्निधौ प्रधानस्य विशेषणनिरूपिताकाङ्क्षावत्त्वे सति गुणे विशेषणान्वयस्य अयुक्तत्वेन तथा व्याख्यातुम् अशक्यत्वात्. ''**उपदेशे अज्**'' (पाणि.सू.१।३।२)इति सूत्रे भाष्ये ''**नहि उपाधे: उपाधि: भवति विशेषणस्य वा विशेषणम्**'' (पातं.महाभा.१।३।२) इति भाष्यकृता तादृशार्थस्य अवहेलनात् च. इहहि विधेयत्वेन प्रत्यय: प्रधानं तत्रैव 'प्रायेण' पदस्य अन्वय:. तत्रैव भाष्यकृत्-कैयटाभ्यां ''**हलश्च**'' (पाणि.सू.३।३।१२१) इति सूत्रे संज्ञानुवृत्तेः कण्ठरवोक्ततया ''**अवेतृ**''सूत्रेऽपि तदनुवृत्ति: तदभिप्रेतैव. एतत्सर्वम् 'उपदेश'शब्दार्थविचारे मनोरमा-शब्दार्थरत्नयोरपि स्पष्टम्. किञ्च अधिकरणार्थ-घञङ्गीकारे अवतरणाधिकरणानामेव बहुत्वं सिद्ध्यति नतु अवतरणस्य. तेन स्वस्य परेषां च अवतारकरणं निरस्तम्. के ते इतरे? इति आकाङ्क्षाया: शिष्याणाम् इत्यनेन शमनोक्तिरपि कुशकाशावलम्बनमेव. तेषाम् उपदेशकर्मतयैव उपादानस्य प्रतीते:.

क: तर्हि एषां वाक्यानां वास्तवो अर्थ:? इति चेद्, उच्यते. पूर्वोत्तरवाक्यपर्यालोचने त्रिलोचनलिङ्गार्चनपरत्वमेव एषां सिद्ध्यति. तथाहि कौर्मे पूर्वखण्डे अष्टाविंशे अध्याये ''**उवाच परमप्रीत्या कस्माद् एतद् महामुने इदानीं गच्छसि क्षिप्रं गंगादेशं प्रति प्रभो! संदर्शनाद् वै भवत: शोको मे विपुलो गत: इदानीं मम यत् कार्यं ब्रूहि पद्मदलेक्षण!**'' (कूर्मपुरा.१।२८।५-६) इति अर्जुनेन पृष्टो व्यास: एकोनत्रिंशारम्भे ''**इदं कलियुगं घोरं सम्प्राप्तं पाण्डुनन्दन! ततो गच्छामि देवस्य वाराणसीं महापुरीम्**''

(कूर्मपुरा.१।२९।१) इति. तथा “**न अन्यत् पश्यामि जन्तूनां मुक्त्वा वारणसीं पुरीम् सर्वपापोपशमनं प्रायश्चित्तं कलौ युगे**” (कूर्मपुरा.१।२९।३) इत्यादि आह. ततो अर्जुनेन पृष्टान् चतुर्युगधर्मान् निरूपयन् “**ब्रह्मा कृतयुगे देवः त्रेतायां भगवान् रविः द्वापरे दैवतं विष्णुः कलौ देवो महेश्वरः**” (कूर्मपुरा.१।२९।११) इति कलौ शिवार्चनस्य मुख्यत्वं बोधयित्वा यावदध्यायसमाप्तिक्रमेण त्रियुगीधर्मान् निरूप्य त्रिंशाध्याये “**तिष्ये मायाम् असूयां च वधं चैव तपस्विनाम् साधयन्ति नरा नित्यं तमसा व्याकुलीकृताः**” (कूर्मपुरा.१।३०।१) इत्यादिना कलिधर्मान् वदन् “**कलौ रुद्रो महादेवो लोकानाम् ईश्वरः परः तदेव साधयेद् नृणां देवतानां च दैवतम्**” (कूर्मपुरा.१।३०।३२-३३) इति शिवोपासनया यज्ञादिकर्मसिद्धिसम्भवं बोधयित्वा कथं तदुपासनादि इति आङ्क्षायाम् आह “**करिष्यति अवताराणि**” (कूर्मपुरा.१।३०।३३) इत्यादि. अत्र द्वितीयश्लोके कतिषुचित्पुस्तकेषु ‘उपदेक्ष्यन्ति’ इति बहुवचनपाठोऽपि दृश्यते. तदुत्तरार्धं च “**सर्ववेदान्तसारं यद् धर्माद् वेदनिदर्शनाद्**” (कूर्मपुरा.१।३०।३५) इत्यपि दृश्यते. तृतीयश्लोकेतु “**ये तं प्रीता निषेवन्ते**” (कूर्मपुरा.१।३०।३६) इत्येव पाठः. तुरीये च “**कलेः एको महान् गुणः**” (कूर्मपुरा.१।३०।३७) इत्येव. अग्रेच अनुपदं “**कलौतु केवलं कर्ता लिप्यते पुण्यपातकैः आद्येतु वासनामात्रधृत्या तत् प्राप्नुवन्तिहि. तस्मात् सर्वप्रयत्नेन प्राप्य माहेश्वरं युगं विशेषाद् ब्राह्मणो रुद्रम् ईशानं शरणं व्रजेद्, ये नमन्ति विरूपाक्षम् ईशानं कृत्तिवाससं प्रसन्नचेतसो रुद्रं ते यान्ति परमं पदं, यथा रुद्रनमस्कारः सर्वकामफलो ध्रुवः अन्यदेवनमस्काराद् न तत्फलम् अवाप्नुयाद्, एवंविधे कलियुगे दोषाणामेव शोधनं महादेवनमस्कारो ध्यानं दानम् इति श्रुतिः तस्माद् अनीश्वरान् अन्यान् त्यक्त्वा देवं महेश्वरं, समाश्रयेद् विरूपाक्षं यदि इच्छेत् परमं पदं, न अर्चयन्ति इह ये रुद्रं शिवं त्रिदशवन्दितं तेषां दानं तपो यज्ञो वृथा जीवितमेव च**” (कूर्मपुरा.१।३०।३८-४३) इति उक्त्वा, “**नमो रुद्राय महते**” (कूर्मपुरा.१।३०।४४) इत्यादिना “**भास्करं परमं तपः**” (कूर्मपुरा.१।३०।५२) इत्यन्तेन “**काश्यां तमहं गच्छामि**” (कूर्मपुरा.१।२९।१) इति अभिधाय “**इत्येतद् लक्षणं प्रोक्तं युगानां वै समासतः**”

(कूर्मपुरा.१।३०।५३) इत्यादिना उपसञ्जहार. अग्रेच सूतः "**एवम् उक्तो भगवता किरीटी श्वेतवाहनः बभार परमां भक्तिम् ईशाने अव्यभिचारिणीम्**" (कूर्मपुरा.१।३०।५६) इति. "**तम् उवाच पुनः** व्यासः" इति उक्त्वा "**दृष्टवान् असि तं देवं विश्वाक्षं विश्वतोमुखम् प्रत्यक्षमेव सर्वेषां रुद्रं सर्वजगन्मयम्. ज्ञानं तदैश्वरं दिव्यं यथावद् विदितं त्वया**" (कूर्मपुरा.१।३०।६०-६१) इत्यादि व्यासवचांसि "**व्रजस्व परया भक्त्या शरण्यं शरणं शिवम्**" (कूर्मपुरा.१।३०।६२) इत्यन्तानि अनूद्य. "**एवम् उक्त्वा स भगवान् अनुगृह्य अर्जुनं प्रति जगाम शङ्करपुरीं समाराधयितुं भवम्. पाण्डवेयोऽपि तद्व्याक्यात् सम्प्राप्य शरणं शिवम्. सन्त्यज्य सर्वकर्माणि ज्ञात्वा तत्परमो अभवद्**" (कूर्मपुरा.१।३०।६३-६४) इत्याह. अत्र "**इदानीं मम यत् कार्यम्**" इति द्वितीयप्रश्नस्य एकोनत्रिंशे "**पालय अद्य परं धर्मं स्वकीयं मुच्यसे भयाद्**" (कूर्मपुरा.१।२९।५) इति उत्तरम् उक्त्वा तदेव उपसंहारे "**व्रजस्व परया भक्त्या**" (कूर्मपुरा.१।३०।६२) इत्यनेन प्रकृतपुराणाभिप्रेतं परधर्मस्वरूपं दर्शितम् इति प्रतीयते. तथा सति अयम् अमीषाम् अर्थः सिद्ध्यति वचसाम्.

अत्र 'अवतार'शब्दो यदा अधिकरणघञन्तः तदा क्लैब्यम् आर्षम्. भावघञन्तो वा असौ क्लिबत्वं "घञजपाः पुंसि" इत्यस्य प्रायिकत्वाभिप्रायम् आर्षं वा कुर्वन्ति च अवताराणि इत्यत्रेव. अधिकरणपक्षे "स्वयम् अवतरति एषु" इति स्वप्रादुर्भावाधिकरणानि लिङ्गानि अवताराणि. षड्विंशाध्याये मार्कण्डेयं प्रति श्रीकृष्णेन "**एष देवो महादेवः सदा संसारभीरुभिः याज्यः पूज्यः च वंद्यः च ज्ञेयो लिङ्गे महेश्वरः**" (कूर्मपुरा.१।२६।६१) इति लिङ्गस्य अधिकरणत्वम् उक्तम्. ततो मार्कण्डेयेन "**किं तल्लिङ्गं सुरश्रेष्ठ लिङ्गे सम्पूज्यते च कः**" (कूर्मपुरा.१।२६।६२) इति आधेयाधिकरणयोः स्वरूपे चोदिते "**अव्यक्तं लिङ्गम् इति आहुः आनन्दं ज्योतिः अक्षयम् वेदाः महेश्वरं देवम् आहुः लिङ्गिनम् अव्ययम्**" (कूर्मपुरा.१।२६।६३) इत्यादिना "**लिङ्गं तत्तु यतो ब्रह्मन् ब्रह्मणः परमं वपुः**" (कूर्मपुरा.१।२६।१००) इत्यन्तेन स्पष्टं तस्य तदधिकरणत्वं निरणायि.

भावपक्षेऽपि सएव अर्थः. लिङ्गानाम् अर्चावतारत्वात्. अर्चा-चेतनभेदेन अवतारद्वैविध्यस्य बहुवादिसम्मतत्वात्. यथा भगवतो मत्स्याद्याः चेतनावताराः, व्यङ्कटेश-वरदराज-पाण्डुरंगप्रभृतयोः अर्चावताराः. तावकैरपि कलौ आकाश-लिङ्गादयः तदवताराः वर्ण्यन्ते यथा उक्तम् आनन्दगिरिकृते शङ्करदिग्विजये 'अवतारकथा'ख्ये द्वितीयप्रकरणे "**ततः सर्वात्मको देवः चिदम्बरपुराश्रितः आकाशलिङ्गनाम्ना तु विख्यातो अभूद् महीतले**" (श्रीशंक.दिग्वि.) इति. स्वकृतदिग्विजयद्वितीयसर्गे माधवोऽपि आह "**ततो महेशः किल केरलेषु श्रीमद्वृषाद्रौ करुणासमुद्रः पूर्णा नदी पुण्यतटे स्वयंभूः लिङ्गात्मना अनङ्गधुत्र् आविरासीद्**" (श्रीशंक.दिग्वि.२।१) इति. तथाच **अवताराणि** स्वलिङ्गानि भक्तानां श्रौतस्मार्तकर्मणोः प्रकर्षेण स्थित्यर्थं **करिष्यति** भावयिष्यति इति अर्थः. क्रिया-भावनयोः ऐक्यात्. स्वलिङ्गद्वारा द्विविधधर्मप्रतिष्ठारूपं प्रयोजनं सम्पादयिष्यति इति भावः. "**भक्तानाम्**" इति देहलीदीपकवद् उभयत्र अन्वेति. तेषांहि लिङ्गार्चनादेव श्रौतस्मार्तप्रतिष्ठानम् "**न अर्चयन्ति इह ये रुद्रम्**" (कूर्मपुरा.१।३०।४३) इति अग्रिमवाक्ये तदन्तरेण तयोः आनर्थक्यबोधनात्. अत्र '**अवतार**' शब्दप्रयोगो लिङ्गएव भक्तानां शिवसाक्षात्काररूपस्यहि तस्य सिद्धिबोधनार्थः. अतएव त्रयस्त्रिंशे कृत्तिवासेश्वरलिङ्गमाहात्म्ये "**तेषां लिङ्गाद् महादेवः प्रादुरासीत् त्रिलोचनः रक्षणार्थं द्विजश्रेष्ठा भक्तानां भक्तवत्सलः**" (कूर्मपुरा.१।३२।१७) इति. तथा चतुस्त्रिंशे मध्यमेश्वरलिङ्गमाहात्म्ये "**तस्य वै बहवः शिष्याः ब्रह्मचर्यपरायणाः लब्ध्वा तद्वचनाद् ज्ञानं दृष्टवन्तो महेश्वरम्**" (कूर्मपुरा.१।३४।२२) इति उक्तम्. अथ साक्षात्कारहेतोः ज्ञानस्य कथं सिद्धिः? इति आकांक्षायाम् आह **उपदेक्ष्यन्ति** इति. सर्ववेदान्तानां सारभूतं यद् ज्ञानं वेदनिदर्शनाद् धर्मात् सम्पद्यते तच्छिवस्वरूपज्ञानं शैवा महात्मान उपदेक्ष्यन्ति "**ऋतं सत्यं परं ब्रह्म**" (जाबा.दर्श.उप.९।१) इति श्रुत्या 'ब्रह्म'संज्ञितत्वम्. इदञ्च ज्ञानं तत्पुराणाभिप्रेतं शिवविषयकम् अन्यदेव नतु त्वदभिमतनिर्विशेषब्रह्मज्ञानम्. तथाहि चतुर्विंशाध्याये "**कथं स भगवान् ईशो दृश्यो योगविदां वरः**" (कूर्मपुरा.१।२५।३३) इति श्रीकृष्णेन पृष्टः उपमन्युः प्रत्याह "**भगवान् उक्तो...दृश्यते परमेश्वरः भक्त्यैव उग्रेण तपसा**

तत् कुरुष्व इह यत्नतः"(कूर्मपुरा.१।२४।३४-३५) इत्यादिना भक्तेरेव साक्षात्कारहेतुत्वं तस्य ध्यानाराधने वसिष्ठाद्युदाहरणानि च उक्तवान् इति वर्णयित्वा उच्यते "**एवम् उक्त्वा ददौ ज्ञानम् उपमन्युः महामुनिः व्रतं पाशुपतं योगं कृष्णाय अक्लिष्टकर्मणे**" (कूर्मपुरा.१।२४।४७) इति. एकत्रिंशाध्याये च जैमिनिना धर्म-साङ्ख्य-योगादीनि सर्वाणि निर्दिश्य "**किम् एषाञ्च भवेत् श्रेयः प्रब्रूहि मुनिपुङ्गव! यदि वा विद्यतेऽपि अन्यद् गुह्यं तद् वक्तुम् अर्हसि**" (कूर्मपुरा.१।३१।११) इति पृष्टो व्यासः "**ईश्वरेण पुरा प्रोक्तं ज्ञानम् एतत् सनातनं गूढम् अप्राज्ञविद्विष्टं सेवितं सूक्ष्मदर्शिभिः. न अश्रद्दधाने दातव्यं न अभक्ते परमेष्ठिनः न अवेदविदुषो, ज्ञेयं ज्ञानानाम् उत्तमोत्तमम्**" (कूर्मपुरा.१।३१।१४-१५) इत्यादिना शिवपार्वतीसंवादमुखेन यावज्जीववाराणसीवास-कृत्तिवासःसमाराधनादिरूपं तद् यावदध्यायसमाप्तिं प्रपञ्चितवान्. तत्र वेदादीनां सर्वेषां सारभूतत्वं तादृशज्ञानस्यैव समर्थितम्. चतुस्त्रिंशाध्यायेच व्यासवर्णने "**यो वै साक्षाद् महादेवं सर्वभावेन शङ्करं प्रपन्नः परया भक्त्या यस्य तद् ज्ञानम् ऐश्वरम्**" (कूर्मपुरा.१।३४।१२) इति तदेव उक्तम्. ततः "**भगवन् भवता ज्ञानं विज्ञातं परमेष्ठिनः प्रसादाद् देवदेवस्य यत् तद् माहेश्वरं परम्**" (कूर्मपुरा.१।३४।१४) "**तद्वद् अस्माकम् अव्यग्रं रहस्यं गुह्यम् उत्तमम् क्षिप्रं पश्याम तं देवं श्रुत्वा भगवतो मुखाद्**" (कूर्मपुरा.१।३४।१५) इति मुनिप्रश्नानन्तरं समाभाष्यैव "**...तान् शिष्यान् सुमन्तुप्रमुखान् ततः...प्रोवाच मध्यमेशस्य माहात्म्यं पैलपूर्वकान्**" (कूर्मपुरा.१।३४।१६-१८) इत्यादिना व्यासकर्तृकः तादृशो ज्ञानोपदेशो वर्णितः. एवम् एकत्रिंशाध्यायम् आरभ्य अध्यायपञ्चके तेषु-तेषु स्थलान्तरेषु च तस्मिन् पुराणे तदेव मुख्यं ज्ञानं ॐकारेश्वरकृत्तिवासेश्वरमध्यमेश्वरादिलिङ्गेषु शिवप्रादुर्भावाधिकरणत्वं तदर्चादिना श्रौतस्मार्तप्रतिष्ठा च विस्तरेण निरूप्यतएवेति किं बहुना! **उपदेक्ष्यति** इति एकवचनपाठेतु शिवएव तद् ज्ञानं महात्मनाम् उपदेशेन सम्पादयिष्यति. "**कारीषो अग्निः अध्यापयति**" इत्यादिवत् कर्तृत्वम्. अन्तर्भावितण्यर्थो वा प्रयोगः. अथवा स्वाश्रम-वाराणसीवसन-नैष्ठिकब्रह्मचर्यादिना शिष्यान् शासितुं योग्यान् 'तारकब्रह्मा'ख्यं ज्ञानं शिवः स्वयमेव साक्षाद् उपदेक्ष्यति इति अर्थः. यथा उक्तम् एकत्रिंशे

शिवेनैव **“कृत्वा वा नैष्ठिकीं दीक्षाम् अविमुक्ते वसन्ति ये तेषां तत् परमं ज्ञानं ददामि अन्ते परं पदम्”** (कूर्मपुरा.१।३१।४५) इति. पुनः तत्रैव **“यत्र साक्षाद् महादेवो देहान्ते स्वयम् ईश्वरः व्याचष्टे तारकं ब्रह्म तत्रैव हि अविमुक्तकम्”** (कूर्मपुरा.१।३१।६०-६१) इति अतएव कलौ व्यासस्यापि तत्र गमनम् अवर्णि. ननु कलिजदोषाक्रान्तानां कथम् एतज्ज्ञानप्राप्तिः? इति चेत्, तत्र आह **“ये तम्...”** (कूर्मपुरा.१।३०।३६) इति. **ये** जनाः प्रीताः सन्तः **तं** शिवं **येन केन** बिल्वपत्रपुष्पादिरूपेण सुलभेनापि उपचारेण. **उपचारतः** इति सार्वविभक्तिकः तसिः, नितरां सेवन्ते **ते कलिजान् दोषान्** त्रिंशाध्यायारम्भे **“तिष्ये मायाम् असूयां च”** (कूर्मपुरा.१।३०।१) इत्यादिना दर्शितपूर्वान् **विजित्य, परमं पदं**=रुद्रधाम **यान्ति.** पत्रपुष्पाद्युपचारेण सेवनं लिङ्गपक्षएव संगच्छते नतु शङ्कराचार्यपक्षे. तद्व्यक्तेः तदानीम् अनुपलम्भात् तन्मूर्तिप्रतिष्ठापनस्यापि अभावाच्च. **निषेवन्ते** इति वर्तमानप्रयोगोऽपि तथैव स्वरसतो युज्यते. लिङ्गार्चनव्यवहारस्य व्यासार्जुनकालेऽपि सत्त्वाद् अन्यथा **निषेविष्यन्ते** इति वदेत्. तत्काले शङ्कराचार्यावतारार्चनप्रचारस्य सर्वथैव अभावात्. मायादिकलिदोषजयोऽपि लिङ्गार्चनसाध्यतयैव अस्मिन् पुराणे अभिप्रेयते. यथा द्वितीयाध्याये **‘जगद् मोहय’** इति मायाम् उपदिशता हरिणा उच्यते **“ये यजन्ति जपैः होमैः देवदेवं महेश्वरं स्वाध्यायेन इज्यया दूरात् तान् प्रयत्नेन वर्जय. भक्तियोगसमायुक्तान् ईश्वरार्पितमानसान् प्राणायामादिषु रतान् दूरात् परिहर अमलान्. प्रणवासक्तमनसो रुद्रजाप्यपरायणान् अथर्वशिरसो अध्येतॄन् धर्मज्ञान् परिवर्जय. बहुना अत्र किम् उक्तेन स्वधर्मपरिपालकान् ईश्वराराधनरतान् मन्नियोगाद् न मोहय”** (कूर्मपुरा.२।२।१५-२०) इति. एवं तत्र स्थलान्तरेष्वपि द्रष्टव्यम्. प्रकृतवचनतो अग्रेऽपि अनुपदं **“ये नमन्ति विरूपाक्षम् ईशानं कृत्तिवाससम्”** (कूर्मपुरा. १।३०।३९) इत्यादिना रुद्रार्चनमेव प्रशस्यते नतु तदवतारविशेष-यत्यर्चनम्. दोषाणामेव शोधनं **महादेवनमस्कार**इति तदाराधनस्यैव कलिदोषप्लोषकत्वं भाष्यते. रुद्रार्चनादेव च परमपदप्राप्तिः प्रतिपाद्यते. परमपदञ्च रुद्रधामैव प्रकृतपुराणस्य सम्मतं नतु अविद्यानाशाद् निर्विशेषस्वरूपेण व्यवस्थानं त्वदभिमतम्. यथा उक्तं चतुश्चत्वारिंशे. **“ऊर्ध्वं तद् ब्रह्मसदनात्**

पुरं ज्योतिर्मयं शुभं वह्निना च परिक्षिप्तः तत्र आस्ते भगवान् हरः. देव्या सह महादेवः चिन्त्यमानो मनीषिभिः योगिभिः शतसाहस्त्रैः भूतैः रुद्रैः च संवृतः. तत्र ते यान्ति निरताः भक्ताः वै ब्रह्मचारिणः महादेवपराः शान्ताः तापसाः सत्यवादिनः निर्ममाः निरहंकाराः कामक्रोधविवर्जिताः द्रक्ष्यन्ति ब्राह्मणाः युक्ताः रुद्रलोकः स वै स्मृतः'' (कूर्मपुरा.१।४४।११-१४) इति. किञ्च धर्माब्धिसारे तृतीयपरिच्छेदे वचनानि ''**विष्णुं शिवं वा भजतां गुरोः पित्रोः च सेविनां गो-वैष्णव-महाशैव-तुलसीसेविनामपि न स्यात् कलिकृतो दोषः काश्यां निवसतामपि**'' (धर्मसिंधु.तृ.परि.पू.कलि.२). तथा ''**कलौ दानं महाश्रेष्ठं शिवविष्णोश्च कीर्तनम्**'' (धर्मसिंधु.तृ.परि.पू.कलि.४) इति. एवमादिवाक्यैकवाक्यतयापि प्रकृतवचसां लिङ्गार्चनपरत्वमेव सिध्यति. ननु पापदूषितहृदां कथं सत्कर्मणि प्रवृत्तिः अतः आह **अनायासेन** इति. अनुपदम् अग्रे रुद्रनमस्कारेणापि महाफलकथनाद् अनायासेन सुमहत्पुण्यम् आप्नोति. अथवा कलौ संकल्पमात्रेणापि पुण्यावाप्तिकथनाद् अनायासतएव तद् आप्नोति. अतएव धर्माब्धिसारे ''**कुशलानि आशु सिध्यन्ति न इतराणि कृतानि यद्**'' (भाग.पुरा.१।१८।७) इति श्रीभागवतवचनम् उदाहृत्य ''**कलौ पुण्यकर्मणां संकल्पेऽपि सिद्धिः पापानान्तु आचरणादेव**'' इति उक्तम्. एवम् अन्यत्रापि द्रष्टव्यम्. अनेकदोषेऽपि गुणमेव अनुपदं स्पष्टयति ''**कलौ तु केवलं कर्ता**'' (पद्मपुरा.६।११२।१०) इति. आद्ये = पुण्येतु वासनामात्रस्य धृत्या तत्पुण्यं प्राप्नुवन्ति. यद्वा आद्ये = शिवे इत्यर्थः. यातु प्रतिकलियुगं शङ्कराचार्यावतारसत्त्वाद् बहुवचनं प्रक्षीणशक्तिकम् इति कस्यचिद् उक्तिः त्वया अनूदिता सातु असंगतैव. तथासति ''कलिषु अवतरत्येव'' इति ''करोति अत्र अवतारं हि'' इति वा वदेत्. नतु **करिष्यति अवताराणि** इति **करिष्यति** इति लृट्प्रयोगासंगतेः. तथाहि : अयं व्यासार्जुनसंवादो वर्तमानकलेः आरम्भे अभूद् इति तेन मन्तव्यम्. एवंसति कल्पारम्भात् प्रभृति सप्तममन्वन्तरसप्तविंशकलियुगपर्यन्तं न तस्य अवतारः अष्टाविंशतितमादिसर्वकलियुगेषु तु तदवतारइति '**करिष्यति**'इति उक्त्या सिध्येत्. तत्र तावत्सु कलिषु अनवतारे इतःप्रभृति अवतारे च कारणं सप्रमाणं वक्तव्यम्. तथाङ्गीकारे वक्ष्यमाणानां त्रिपञ्चाशत्तमाध्यायवचसां

विरोधश्च आपद्येत. किञ्च प्रतिकलियुगावसानभाविकल्क्यवतारादौ न क्वापि बहुवचनं प्रयुज्यतइति प्रकृतेऽपि बहुवचनानर्थक्यं तदवस्थमेव. “**ये तं प्रीताः**” इत्यत्र तत्पक्षे “ये तान् प्रीता” इति पठनीयं स्यात्. त्वयापि सा उक्तिः प्रत्युक्तेति किं विशेषतः तत्खण्डनेन! वस्तुतस्तु तत् सकलं पुराणं त्वया अनालोकितम् इति प्रतिभाति. अस्ति तत्र प्रतिकलियुगं शिवावतारस्य तेन सह चतुर्णां शिष्याणाम् अवतारस्य च वर्णनम्. तथापि न शङ्कराचार्यावतारः तत्पुराणसम्मतः. तथाहि : तत्र एकपञ्चाशाध्यायारंभे ऋषयो: अतीत-अनागतमन्वन्तराणि व्यासावतारं शाखाप्रणयनं च पृष्ट्वा अप्राक्षुः “**धर्मार्थानां प्रवक्तारोहि ईशानस्य कलौ युगे कियन्तो देवदेवस्य शिष्याः कलियुगेऽपि वा**” (कूर्मपुरा.१।५१।१-२) इति. ततः सूतः प्रश्नक्रमानुरोधेन शाखाप्रणयनान्तं निरूप्य त्रिपञ्चाशाध्यायारम्भे आह “**वेदव्यासावताराणि द्वापरे कथितानि तु महादेवावताराणि कलौ शृणुत सुव्रताः. आद्ये कलियुगे श्वेतो देवदेवो महाद्युतिः नाम्ना हिताय विप्राणाम् अभूद् वैवस्वतेन्तरे, हिमवच्छिखरे रम्ये सकले पर्वतोत्तमे, तस्य शिष्याः प्रशिष्याश्च बभूवुः अमितप्रभाः. श्वेतः श्वेतशिखः चैव श्वेताश्वः श्वेतलोहितः चत्वारः ते महात्मानो ब्राह्मणाः वेदपारगाः**” (कूर्मपुरा.१।५३।१-४) इति वैवस्वतमन्वन्तरप्रथमकलियुगे ‘श्वेता’ख्यं[१] शिवावतारम् उक्त्वा द्वितीयकलियुगात् प्रभृति अष्टाविंशतितमकलियुगपर्यन्तं प्रतिकलियुगं भाविनः एकैकावतारस्य क्रमेण नामानि आह. “**सुतारो[२] मदनश्चैव[३] सुहोत्रः[४]- कङ्कणः[५] तथा लोकाक्षिस्तु[६] अथ योगीन्द्रो जैगीषव्यो[७] अथ सप्तमे, अष्टमे दधिवाहः[८] स्याद्, नवमे ऋषभः[९] प्रभुः, भृगु[१०]स्तु दशमे प्रोक्तः, तस्माद् उग्रः[११] पुरः[१२] स्मृतः द्वादशेति समाख्यातो, वालीच[१३] अथ त्रयोदशे, चतुर्दशे गौतमस्तु[१४], वेदशीर्षा[१५] ततः परः. गोकर्ण[१६]श्च अभवत्, तस्माद् गुहावासः[१७] शिखण्डधृक्[१८], जयमाली[१९]-उदहासः[२०] च दारुको[२१]लाङ्गली[२२] तथा, महायामो[२३] मुनिः शूली[२४]मुण्डी[२५]मुण्डीश्वरः[२६] तथा, सहिष्णुः सोमशर्मा[२७] च नकुलीश्वर[२८]एवच**” इति अष्टाविंशतितमे अस्मिन् कलियुगे ‘नकुलीश्वरा’ख्यो अवतारः उक्तो नतु ‘शङ्करा’ख्यः. नच शङ्कराचार्याणामेव “नकुलीश्वर”इति नाम कल्पनीयम् कल्पने मानाभावात्, प्राचीनार्वाचीनदिग्विजयादिषु क्वापि

अदर्शनाच्च. तेषुतु ‘शङ्कर’इत्येव नाम निर्दिश्यते. अतएव माधवेन स्वकृतशङ्करविजयद्वितीयसर्गे नामकरणस्थले “**यत् पश्यतां शिशुः असौ कुरुते शमग्र्यं तेन कृता अस्य जनकः किल ‘शङ्करा’ख्याम्. यद्वा चिराय किल शङ्करसम्प्रसादाद् जातः ततो व्यधित ‘शङ्कर’नामधेयम्**” (श्रीशंक.दिग्व.-२।८२-८३) इति उक्तम्. तस्मात् पाशुपतादिग्रन्थप्रसिद्धो महाशैवप्रस्थानप्रवर्तको नकुलीश्वरएव इह आद्यत्वे शिवावतारतया अभिमतो भाति. शिष्याश्च प्रथमकलियुगे “**श्वेतः श्वेतशिखः चैव श्वेताश्वः श्वेतलोहितः**” (कूर्मपुरा.१।५३।४) इति उक्ताः. “**नकुलीश्वरएव च**” इत्यस्य अग्रे अनुपदं प्रतिकलियुगं चत्वारः तत्तदवतारस्य शिष्याः भवन्ति इति उक्त्वा “**क्रमेण तान् प्रवक्ष्यामि योगिनो योगवित्तमान्... दुन्दुभिः शतरूपः च ऋचीकः केतुमान् तथा**” (कूर्मपुरा.१।५३।११-१२) इत्यादिना द्वितीयकलियुगात् प्रभृति प्रतिकलिं चतुरः चतुरो नामतो निर्दिशन् अष्टाविंशतितमे कलियुगे “**कुणिः चैव च गर्गः च मित्रको रुद्रएव च शिष्याः एते महात्मानः सर्वावर्तेषु योगिनाम्**” (कूर्मपुरा.१।५३।२५) इति कुण्यादीन् चतुरो वदति, नतु शङ्करदिग्विजयोक्तान् विष्ण्वादिदेवावतारान् पद्मपादादीन्. एतेच प्रतिकलिके चत्वारो अवतरन्ति इति आकांक्षापि तत्रैव अष्टचत्वारिंशाध्याये तत्तत्पर्वतविशेषे तत्तद्देवधाम्नां निरूपणे रत्नधारगिरिवर्णनं प्रक्रम्य पठितैः “**तस्य एकशिखरे रम्ये महापद्मैः अलंकृतम् स्वच्छामृतजलं पुण्यं सुगन्धं सुमहत्सरः जैगीषव्याश्रमं पुण्यं योगीन्द्रैः उपसेवितम्. तत्र आस्ते भगवान् नित्यं सर्वशिष्यैः समावृतः प्रशान्तदोषैः अक्षुद्रैः ब्रह्मविद्भिः महात्मभिः. शंखो मनोहरः चैव कौशिकः कृष्णएव च सुमहान्तो वेदविदः शिष्याः तस्य प्रसादतः. सर्वे योगरताः शान्ताः भस्मोद्धूलितविग्रहाः उपासते सदा आचार्याः ब्रह्मविद्यापरायणाः. तेषाम् अनुग्रहार्थाय यतीनां शान्तचेतसां सान्निध्यं कुरुते भूयो देव्याः सह महेश्वरः**”(कूर्मपुरा.१।४८।१७-२२) इति वाक्यैः पूर्यते. तथाच ‘शंख’-‘मनोहर’-‘कौशिक’-‘कृष्णा’ख्याः चत्वारो यतयएव प्रत्यवतारम् अवतरन्ति इति सिध्यति. माधवकृतशङ्करविजयेतु तृतीयसर्गे “**कमलानिलयः कलानिधेः**” (श्रीशंक.दिग्वि.३।२) इत्यादिना “**वरुणो अजायत ‘चित्सुखा’ह्वय**” (श्रीशंक.दिग्वि.३।६) इत्यन्तेन पद्मपाद[1]-

हस्तामलक[२]-त्रोटक[३]-उदङ्क[४]-सुरेश्वर[५]-आनन्दगिरि[६]-सनन्द[७]-चित्सुखान्[८] विष्णु[१]-पवन[२]-तद्दशांश-नन्दि-ब्रह्म-बृहस्पत्य-वरुणावतारत्वेन वर्णयित्वा "-**अपरेऽपि अभवद् दिवौकसः**" (श्रीशंक.दिग्वि.३।७) इति अन्येषामपि अवतरणं निरूप्यते. केषाञ्चिद् मते सुरेश्वरस्य बृहस्पत्यवतारत्वम् आनन्दगिरेश्च नन्दीश्वरावतारत्वञ्च अभिधीयते. अतो न शङ्करदिग्विजये शिष्याणां चतुष्ट्वं नापि कौर्मशङ्करदिग्विजययोः एकवाक्यत्वम्. त्रिपञ्चाशाध्यायैकवाक्यतयातु "**करिष्यति अवताराणि**" (कूर्मपुरा.१।३०।३३) इति त्रिंशाध्यायवचसां नकुलीश्वरपरत्वापत्तेः. अथ नकुलीश्वरस्य एकत्वेन '**अवताराणि**' इति बहुवचनविरोधाद् नैवं युक्तम् इति चेत्; तर्हि प्रागुक्तं लिङ्गार्चनपरत्वम् आद्रियस्व. त्रिंशाध्यायस्थप्रकृतवचनेषु उक्तरीत्या सिध्यन्तं लिङ्गार्चनोत्कर्षमेव 'तस्माद्' इत्यनेन हेतुतया परामृशन् अनुपदं व्यासः आह "**तस्मात् सर्वप्रयत्नेन प्राप्य माहेश्वरं युगम् विशेषाद् ब्राह्मणान् रुद्रम् ईशानं शरणं व्रजेद्**" (कूर्मपुरा.१।३०।३८) इति. नहि अस्य अर्थः "शङ्कराचार्यं नकुलीश्वरं वा शरणं व्रज" इति शक्यो व्याख्यातुम्. ननु एवं सति "**कलौ देवो महेश्वरः**" (कूर्मपुरा.१।२९।११) इति वाक्याद् इदानीं विष्ण्वाद्यर्चनम् अयुक्तमेव इति चेद्; मैवम्. तव एकोनत्रिंशे "**कलौ देवो महेश्वरः**" (कूर्मपुरा.१।२९।११) इत्यतो अनुपदमेव अग्रे "**ब्रह्मा विष्णुः तथा सूर्यः सर्वएव कलिष्वपि पूज्यते भगवान् रुद्रः चतुर्ष्वपि पिनाकधृक्**" (कूर्मपुरा.१।२९।१२) इति कथनात्. किञ्च त्रयोविंशाध्याये सहस्रार्जुनपुत्राणां कथायाम् "**जयध्वजस्तु मतिमान् देवं नारायणं हरिं जगाम शरणं विष्णुं दैवतं धर्मतत्परः तम् ऊचुः इतरे पुत्रा न अयं धर्मः तव अनघ**" (कूर्मपुरा.१।२२।२३-२४) इत्यादिना तेषां विष्णुशिवार्चनविषये विवादं कोटिक्रमं च उक्त्वा उच्यते "**एवं विवादे वितते शूरसेनो अब्रवीद् वचः प्रमाणम् ऋषयो हि अत्र ब्रूयुः ते यत् तथैव तत्. ततः ते राजशार्दूलाः पप्रच्छुः ब्रह्मवादिनः गत्वा सर्वे सुसंरब्धाः सप्तर्षीणां तदाश्रमम्. तान् अब्रुवन् ते मुनयो वसिष्ठाद्या यथार्हतः 'या यस्य अभिमता पुंसः सा हि तस्यैव देवता किन्तु कार्यविशेषेण पूजिताच इष्टदा नृणाम्. विशेषात् सर्वदा न अयं नियमो हि अन्यथा नृपाः. नृपाणां दैवतं विष्णुः तथैव च**

पुरन्दरः, विप्राणाम् अग्निः आदित्यो ब्रह्माविष्णुः पिनाकधृक्, देवानां देवता विष्णुः, दानवानां त्रिशूलधृक्, गन्धर्वाणां तथा सोमो यक्षाणामपि कथ्यते. विद्याधराणां वाग्देवी, सिद्धानां भगवान् हरिः, रक्षसां शङ्करो रुद्रः, किन्नराणाञ्च पार्वती, ऋषीणां भगवान् ब्रह्मा महादेवः त्रिशूलभृद् मान्याः, स्त्रीणाम् उमादेवी तथा विष्णु-ईश-भास्कराः, गृहस्थानाञ्च सर्वे स्युः, ब्रह्मा वै ब्रह्मचारिणाम्, वैखानसानाम् अर्कः स्याद्, यतीनाञ्च महेश्वरः, भूतानां भगवान् रुद्रः, कूष्माण्डानां विनायकः, सर्वेषां भगवान् विष्णुः ब्रह्मा देवः प्रजापतिः’ इत्येवं भगवान् ब्रह्मा स्वयं देवोहि अभाषत. तस्माद् जयध्वजो नूनं विष्णवाराधनम् अर्हति” (कूर्मपुरा.१।२२।३८-४७) इति. अतो या देवता यस्य संप्रदायप्राप्ता सैव तेन आराधनीया. तैत्तिरीयसंहिता द्वितीयकाण्डे “**यो वै स्वां देवताम् अतियजते प्र स्वायै देवतायै च्यवते न परां प्राप्नोति पापीयान् भवति**” (तैत्ति.संहि.२।५।४) इति अन्याश्रयणेन स्वदेवतातिक्रमे दोषश्रावणात्. अपिच द्वितीयाऽध्याये आश्रमचतुष्टयं निरूप्य “**आश्रमो वैष्णवो ब्राह्मो हराश्रमः इति त्रयः तल्लिङ्गधारीनियतं तद्भक्तजनवत्सलः. ध्यायेद् अथ अर्चयेद् एकं ब्रह्मविद्यापरायणः**” (कूर्मपुरा.१।२।९८-९९) इति त्रयः संप्रदायाः उक्ताः. तत्र हैरण्यगर्भसंप्रदायस्य इदानीम् उच्छेदेऽपि शैववैष्णवसंप्रदायौ उभावपि शास्त्रसिद्धौ परस्पराविरुद्धौ शिष्टसम्मतावेव. तत्र यो यस्य पारम्पारिको धर्मः सएव तेन सेवनीयः. “**स्वधर्मे निधनं श्रेयः**” (भग.गीता ३।३५) इति भगवद्वाक्यात्. येच विष्णुभक्ताः शिवं वेदाविरुद्धशैवशास्त्राणि वा निन्दन्ति येच शिवभक्ताः भगवन्तं तदविरुद्धभगवच्छास्त्राणि वा गर्हयन्ति ते उभये अन्तकभये निपतन्ति. एकस्यैव हि वेद-गीता-श्रीभागवतादिषु ‘परब्रह्म’-‘परमात्म’-‘पुरुषोत्तम’-‘भगवदा’-दिशब्दैः अभिधीयमानस्य परवस्तुनो निर्गुणस्य सत्त्वाद्युपाधिभेदाद् लीलावताराः ब्रह्म-विष्णु-महेश्वराः. अतो निर्गुणपुरुषोत्तमभक्तानां शुद्धाद्वैतब्रह्मवादनिष्ठानान्तु न क्वापि निन्दावकाश इति दिक्. विस्तरस्तु बालबोध-प्रहस्तवादादिषु प्राक्तनप्रबन्धेषु तदुच्छिष्टसंग्राहके मम सत्सिद्धान्तमार्तण्डादौ च द्रष्टव्यः. तस्मात् कलावपि वैष्णवानां भगवदर्चनमेव. तत्कीर्तनादितएव च निःशेषकलिदोषप्लोषः. श्रीभागवतादिवचनोपन्यासपुरःसरं हेमाद्रिकौस्तुभधर्मा-

ब्धिसारादिषु तथा निर्णयाद् इति अलं प्रासङ्गिकेन.

यच्च वायुपुराणवचनं शिवपुराणवचनं च उक्तं तत्तु अनाकरमेव. तत्तत्पुस्तकेषु अनुपलम्भात् त्वयापि अदृष्टमूलञ्च. अतएव अत्यावश्यकेऽपि विषये पूर्ववद् अध्यायसङ्ख्यादिकं न उदाहारि. अवतारक्रियया साहित्यं इत्यत्र ‘अवतारक्रियायाम्’ इति रमणीयम्, साहित्यस्थले हि अप्रधानएव तृतीया प्रयुज्यते नतु क्रियायाम्. व्युत्पत्तिवादादिषु “**‘सह’शब्दार्थः तत्क्रियाकालः क्वचित् तत्क्रियान्वयि प्रथमान्तपदार्थे अन्वेति क्वचित् स्वसमभिव्याहृतक्रियायाम्. ‘सपुत्रः आगच्छति’ इत्यस्य ‘पुत्रेण सह आगच्छति यः’ इति विग्रहात् प्रथमान्तान्यपदार्थेएव पुत्रागमनकालान्वयो नतु क्रियायामिति न समासानुपपत्तिः**” (व्यु.वा.तृती.कार.‘सह’शब्दार्थविचारे) इत्यादौ गदाधरभट्टादिभिः क्रियायां सप्तम्येव प्रयुज्यते. नतु क्वापि तथा प्रयोगो विद्वद्व्यवहारगोचरः. शिष्योक्तीनां व्यासाद्युक्तिवत् प्रामाण्यकथनन्तु स्वीयगोष्ठ्चैव श्रद्धेयं व्यासादितौल्ये मानाभावात्. शङ्करदिग्विजयादीनां मानतया उदाहरणे “**कपिलो यदि सर्वज्ञः कणादो नेति का प्रमा**” (द्र.ब्र.सू.शां.भा.र.२।१।११) इतिन्यायः प्रसज्येत सर्वत्रैव व्यवस्थिताविति पराशरस्मृतिव्याख्यायां माधवोक्तदिशैव तत्तत्संप्रदायप्रसिद्धतत्तदाचार्यदिग्विजयादिग्रन्थानां त्वयापि मानतया आदर्तव्यत्वापत्तेः. तथासति गृहाद् बर्करापसारणश्रमे क्रमेलकप्रवेशः. तेषां सर्वेषां कलिमलहर्तृत्वम् उक्तं तदपि मानाभावात् स्वानुयायिमात्रश्रद्धागोचरः. स्वयं मानत्वेन उपन्यस्ते “**ये तं प्रीता**” इति वाक्ये ‘**तम्**’ इति एकवचनप्रयोगेण त्वदुक्तार्थादरणेऽपि शिष्याणां कलिमलहर्तृतायाः ततो अप्राप्तेः. तेषु “**फलमत...**”(ब्र.सू.३।२।३९) इतिन्यायस्य अप्रवृत्तेश्च. ‘**ब्रह्म**’**संज्ञितम्** इत्यस्य ब्रह्मविषयकम् इति अर्थः कथम् इति विचार्यम्. इतरत्तु प्रागेव अपास्तम्.

किञ्च ‘श्रौत’पदेन श्रौतस्मार्तधर्मं स्वयं व्याख्याय तत्र स्वयं विशेषितन्याय्यतोपष्टम्भकत्वेन “व्याकुर्वन् व्याससूत्रार्थम्” इति पद्योपन्यासो हासोल्लासको व्याससूत्रेषु श्रौतस्मार्तकर्मणोः निर्णयस्य अभावात्.

सूत्रानुसारिवाक्यैः सूत्रार्थवर्णनरूपे भाष्येऽपि तदसम्भवाद् व्याससूत्रैरेव धर्मनिर्णयाङ्गीकारे जैमिनीयद्वादशलक्षण्या आपार्थक्यप्रसङ्गाच्च. 'व्याकुर्वन्' इति श्लोके 'ऊचिवान्' इति भूतार्थप्रयोगोऽपि तस्य अर्वाचीनकल्पितत्वमेव अवगमयति. शङ्कराचार्यावतारस्य वर्षसहस्रादेव प्राग्जातत्वेन तत्कृतशारीरकभाष्ये पुराणापेक्षया प्राक्तनतायाः अशक्यवचनतया पुराणे तथाप्रयोगानुपपत्तेः. अपिच 'एवं'कारम् अत्र यद्यपि शक्यते वक्तुम्. "**चतुर्भिः सह**" इति वाक्यं वक्ष्यमाणपाद्मवाराहादिविषये विशेषसमर्पकम्. उक्तकौर्मवाक्यैकवाक्यतया नकुलीश्वरपरं वा. 'व्याकुर्वन्' इति वाक्यन्तु शिवः **सूत्रार्थं** सूत्रात्मना कारणरूपेण स्थितं सर्वम् **अर्थं** पदार्थं नामरूपाभ्यां **व्याकुर्वन्** "**तद्धेदं तर्हि अव्याकृतम् आसीत् तद् नामरूपाभ्यां व्याक्रियत**" (बृह.उप.१।४।७) इति बृहदारण्यके श्रावणात्. '**व्यास**' = विशेषेण आस जगद्रूपेण आविर्बभूव. "**स ह एतावान् आस**" (बृह.उप.१।४।३) इति तत्रैव आम्नानाद् यथा यथावच्छ्रुतेः अर्थम् उक्तवान् नारदादीन् प्रति इति शेषः, उपबृंहणेभ्यो अवगन्तव्यः "**ईशानः सर्वविद्यानाम् ईश्वरः सर्वभूतानां ब्रह्माधिपतिः ब्रह्मणो अधिपतिः ब्रह्मा शिवो मे अस्तु सदाशिवोम्**" (महाना.उप.२१।१) इत्यादि श्रुतिसिद्धम् इदम्. सः व्याकरणादिकर्ता **सवितानन:** वितानया प्रपञ्चस्य पटवद् विस्तारणया सहितः शङ्करएव न्यायाद् अनपेतः श्रुतेः अर्थः. '**सविता न ना**' इति पाठेतु सविता = जगत्प्रसविता शिवो नतु ना जीवः शिवस्य पुरुषोत्तमलीलावतारत्वात्. 'नृ' शब्दस्य जीवपरत्वन्तु "**इति नृगतिं विविच्य कवयो निगमावपनं**" (भाग.पुरा.१०।८४।२०) इत्यादौ प्रसिद्धम्. एवं शिवस्य परब्रह्मतया स्तुतिपरत्वेन व्याख्येयम्. निर्णीतञ्च इदं "**ब्रह्मैव तादृशं यस्मात् सर्वात्मकतया उदितौ**" (बा.बो.१२) इत्यादौ च "**ब्रह्म-विष्णु-शिवाः ततः देवतारूपवत् प्रोक्ताः**" (सि.मु.१०) इत्यादौ श्रीमदाचार्यचरणैः. त्वत्पक्षेतु "शङ्करः सवितानन:" इति समाप्तपुनराप्तिः. केचित्तु इमं दोषं समाप्तपुनरात्तम् इति व्यवहरन्ति. एतत्स्वरूपन्तु मञ्जूषायां "**क्रियाकारकभावेन अन्वयबोधकसकलपदोक्त्यनन्तरं तद्धटक-यत्किञ्चिद् अन्वयिविशेषणोपादानं हि समाप्तपुनराप्तम्**" (   ) इति उक्तम्. यथा 'ऊचिवान्' इत्यत्र च "यम् ऊचिवान्' इति पठनीयं स्यात्. अन्यथा 'स' इत्यनेन सामानाधिकरण्यायोगात्.

‘ऊचिवान्’ इति प्रयोगात् तदभिमतासिद्धिश्च. तथाहि ‘भूतः’ इति अधिकृत्य “**छन्दसि लिट्**”, “**लिटः कानज्वा**”, “**क्वसुश्च**” (पाणि.सू.३।२।१०५, १०६, १०७) इति भूतार्थकस्यैव लिटः स्थाने पक्षे ‘क्वसुः’ विधीयते. अतो भाष्यादिस्थे ‘आजिवान्’-‘अतितीर्वान्’ इत्यादौ अञ्जन-तरणादिवद् इहापि भूतकालमेव वचनम्. तच्च न संगच्छेत. पुराणापेक्षया शङ्कराचार्याणाम् उत्तरकालिकत्वादिति प्रागेव अदर्शयाम. नच उक्तव्याख्यानेऽपि ‘आसे’ति प्रयोगो अनुपपन्नो अस्तेर्हि भ्वादेशेन बभूव इत्येव स्याद् इति वाच्यम्; प्रामाणिकग्रन्थेषु अनेकेषु तथाप्रयोगदर्शनाद् धात्वन्तरतः साधयितुं शक्यत्वात् च. यथा माधवकृतशङ्करदिग्विजये तृतीयसर्गे “**विधिः आस सुरेश्वरो गिरांनिधिः आनन्दगिरिः व्यजायत**” इति (श्रीशंक.दिग्वि.३।६) प्रयुज्यते. कालिदासोऽपि कुमारसम्भवप्रथमसर्गे “**वृत्तानुपूर्वे च नच अतिदीर्घे जङ्घे शुभे सृष्टवतः तदीये शेषाङ्गनिर्माणविधौ विधातुः लावण्य उत्पाद्यइव आस यत्नः**” (कुमा.सं.१।३५) इति प्रयुङ्क्तते. अत्र ‘आस’ इति बभूवार्थे तिङन्तप्रतिरूपकम् अव्ययम् इति आह शाकटायनः. वल्लभपण्डितस्तु न तिङन्तप्रतिरूपकम् अव्ययम्. “**‘अस्तेः भूः’ (पाणि.सू.२।४।५२) इति भ्वादेशनियमात् तादृक्तिङन्तस्यैव अभावात् किन्तु कवीनाम् अयं प्रामादिकः प्रयोगः इति आह. वामनस्तु ‘अस्’गति-दीप्त्यादानेषु इति धातोः लिटि रूपम् इदम् इति आह. ‘अस्’ इति अनुदात्ते द्दीप्त्यर्थे, ‘आस’ दिदीपे प्रवृत्तः इत्यर्थः**” (कुमा.सं.म.१।३५) इति मल्लिनाथः. वस्तुतस्तु भ्वादौ “**अथ गूहत्यन्ताः स्वरितेत इति उदीर्य ‘हिक्क’ = अव्यक्ते शब्दे**” (पाणि.सू.सि.कौ.१।३।६०) इत्यारभ्य पठितेषु गूहत्यन्तेषु अष्टत्रिंशद् धातुषु अन्तर्भूतो अयमपि स्वरितेत्त्वाद् उभयपदी. “कुर्दखुर्दगुर्दगुदक्रीडायामेव” इति ‘एव’कारग्रहणाद् “ज्ञापकात् परौ भुवो अवज्ञान” इति सौत्रज्ञापकाद् वा धातूनाम् अनेकार्थत्वम् आश्रित्य अस्य सत्तार्थकत्त्वमपि शक्यवचनम्. गति-दीप्तिभ्यां वा उक्तार्थनिर्वाहः. श्रुतिपुराणादिषु च “**तस्य ह ‘नचिकेता’नाम पुत्र आस**” (कठोप.१।१) “**स ह एतावान् आस**” (बृह.उप.१।४।३) “**न यद् इदम् अग्र आस न भविष्यद् अतो निधनाद्**” (भाग.पुरा.१०।८४।३७) इत्यादि प्रचुरप्रयोगदर्शनात् प्रकृते न अनुपपत्तिः काचित्. तस्माद् उक्तएव अर्थो

युक्तइति. तथापि कादम्बरीकल्पस्य किं व्याख्यानेन. श्रुत्यर्थे युक्त्यपेक्षायामपि ‘न्यग्रोधफलाहरण’-लवणाऽऽचमना’दिरूपा वैदिक्येव सा(=युक्तिः) तत्र अपेक्षिता तदनुकूला च लौकिक्यपि. नतु तद्विरुद्धा सा तथा. आर्षधर्मोपदेशस्य वेदशास्त्राविरोधितर्केण अनुसन्धेयत्वस्मरणाद् इत्यादि मयापि द्वितीयभागे वक्ष्यते. तदेतत् सर्वम् अनुसन्धाय उक्तं मूले **शिवविषयाण्येव** इति, ‘**एव**’कारः “**करिष्यति अवताराणि**” इत्यादिवचसां शङ्कराचार्यविषयकत्वं व्यवच्छिनत्ति. तेषाम् इत्यादि. अत्र प्राञ्चः. पाद्मोत्तरखण्डे चत्वारिंशे अध्याये “**भगवन् श्रौतुम् इच्छामि द्वादश्याश्च विधानकं, विष्णोः पूजाविधानं च कर्तव्यं तत्र वै प्रभोः**” (पद्मपुरा.६।२३४।१) इत्यादि पार्वत्या पृष्टः शिवः “**एकादश्यान्तु प्राप्तायां समुपोष्येह मानवः**” (पद्मपुरा.६।२३४।४) इत्यादिना तत्कृत्यं वदन् उपवासावश्यकत्वम् अरुणोदयवेधादिकं च उक्त्वा दशम्यादिदिनत्रयकृत्यकथने “**पाषण्डिनं विकर्मस्थं पतितं श्वपचं तथा न अवलोकेद् न स्पृशेत् त्रिदिनं तत्र वैष्णवः. अवैष्णवस्तु यो विप्रः स ‘पाषण्डी’प्रकीर्तितः. शिखोपवीतत्यागी च ‘विकर्मस्थः’इति ईरितः. महापापोपपापाभ्यां युक्तः ‘पतित’उच्यते. अन्त्यजः ‘श्वपच’प्रोक्तो देवि! वेदैः एषः सुनिर्णयः**” (पद्मपुरा.६।२३४।२६-२८) इति आह. ततः एकचत्वारिंशे “‘**पाषण्डानाञ्च संलापं वर्जयेद्’ इति यत् त्वया उक्तं मम इह भगवान्!**” (पद्मपुरा.६।२३५।१) “**ब्रूहि त्वं गर्हितान् हि तान् तेषां वृत्तीः समाचक्ष्व**” (   ) “**कैः लिङ्गैः चिन्हिताः भुवि**” (पद्मपुरा.६।२३५।२) इति पार्वत्या पृष्टः सः “**ये अन्यं देवं परत्वेन वदन्ति अज्ञानमोहिताः नारायणाद् जगन्नाथात् ते वै पाषण्डिनो स्मृताः...द्वेष्टारो विष्णुभक्तानां येच अवैष्णवसंश्रयाः पाषण्डिभिश्च संयुक्ताः ते वै पाषण्डिनः स्मृताः कपाल-भस्म-अस्थिधराः येहि अवैदिकलिङ्गिनः ऋतेवनस्थाश्रमाच्च जटावल्कलधारिणः अवैदिकक्रियोपेताः ते वै पाषण्डिनः तथा शंख-चक्र-उर्ध्वपुण्ड्रादिचिह्नैः प्रियतमैः हरेः रहिताः ये द्विजा देवि! ते वै पाषण्डिनः स्मृताः. श्रुतिस्मृत्युदिताचारं यस्तु न आचरति द्विजः स ‘पाषण्डी’इति विज्ञेयः सर्वलोकेषु गर्हितः...स्वातन्त्र्यात् कुरुते यस्तु कर्मवेदोदितं महद्...विनैव भगवत्प्रीत्या ते वै पाषण्डिनः स्मृताः. समस्तयज्ञभोक्तारम् विष्णुं वै ब्रह्मदैवतम् उद्दिश्य**

देवताएव जुहोति च ददाति च स ‘पाषण्डी’इति विज्ञेयः स्वतन्त्रो सर्वकर्मसु...यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः सममन्यैर्निरीक्षेत स पाषण्डी भवेत् सदा. अवस्थात्रितये यस्तु मनोवाक्कायकर्मभिः वासुदेवं न जानाति स पाषण्डी भवेद् द्विजः. किम् अत्र बहुना उक्तेन ब्राह्मणा येऽपि अवैष्णवाः” (पद्मपुरा.६।२३५।१-११) इत्यादि आह. ततो गिरिजया कपाल-भस्म-चर्माऽस्थिधारणप्रभृति दुराचारकारणे अनुयुक्ते श्रीमहादेवः **“नमुच्याद्याः महादैत्याः पुरा स्वायंभुवेन्तरे”** (पद्मपुरा.६।२३५।१९) इत्यादिना कर्म-ज्ञान-भक्तिसम्पन्नैः दैत्यैः देवानां स्थानादेः हरणं ततो निर्जराणां श्रीहरिं प्रति शरणभावेन सरणं प्रार्थनञ्च वर्णयित्वा आह **“इति आकर्ण्य हरिः वाक्यं देवानां च भयानकं तान् समाश्वास्य दिक्पालान् माम् आह पुरुषोत्तमः त्वंहि रुद्र! महाबाहो! मोहनार्थे सुरद्विषां पाषण्डाचरणं धर्मं कुरुष्व सुरसत्तमं तामसानि पुराणानि कथयस्व च तान् प्रति. मोहनानि च शास्त्राणि कुरुष्व च महामते! मयि मुक्ताश्च विप्राश्च भविष्यन्ति महर्षयः मद्भक्त्या तान् समाविश्य कथयस्व च तामसान्. काणादं गौतमं शक्तिम् उपमन्युं च जैमिनिम् कपिलं चैव दुर्वासं मृकण्डुं च बृहस्पतिम् भार्गवं जामदग्न्यं च दश एतान् तामसान् ऋषीन् तव शक्त्या समाविश्य कुर्वता जगतो शिवम्. त्वच्छक्त्या च निविष्टाः ते तमसोद्रिक्तया भृशम् तामसाः ते भविष्यन्ति क्षणादेव न संशयः. कथयिष्यन्ति ते विप्राः तामसानि जगत्त्रये पुराणानिच शास्त्राणि त्वया सत्त्वेन बृंहिताः. कपाल-चर्मा-भस्मास्थिचिह्नानि अमरसर्वशः त्वमेव धृतवान् लोकान् मोहयस्व जगत्त्रये. तथा पाशुपतं शास्त्रं त्वमेव कुरु सत्कृतः कंकाल-शैव-पाषण्ड-महाशैवादिभेदतः. अलक्ष्यं च मतं सम्यग् वेदबाह्यं नराधमाः भस्मास्थिधारिणः सर्वे भविष्यन्तिहि अचेतसः. त्वां परत्वेन वक्ष्यन्ति सर्वशास्त्रेषु तामसाः तेषां मतम् अधिष्ठाय सर्वे दैत्याः सनातनाः भवेयुः ते मद्विमुखाः क्षणादेव न संशयः. अहमपि अवतारेषु त्वाञ्च रुद्र! महाबल! तामसानां मोहनार्थं पूजयामि युगे युगे. मतम् एतद् अवष्टभ्य पतन्त्येव न संशयः”** (पद्मपुरा.६।२३५।२२-३६) इति भगवदाज्ञाम् अनूद्य पाषण्डप्रवर्तने स्वस्य उद्वेगं तद्वारणाय भगवताज्ञप्तं नामसहस्रस्य रामषडक्षरतारकमन्त्रस्य च जपितव्यत्वं **“मनसैव अर्चय हृदि**

मां नाथं पुरुषोत्तमं मदाज्ञां कुरु मत्प्रीत्या सर्वम् एतत् शुभं तव” (पद्मपुरा.६।२३५।४९) इत्यन्तेन निरूप्य ततः स्वयं पाशुपतादिशास्त्रोत्पादनं तमःप्रधानशक्त्याविष्टविप्रद्वारा मोहकशास्त्रोत्पादनञ्च यावद् अध्यायसमाप्तिः निर्दिष्टवान्. ततो द्विचत्वारिंशे “**पार्वती उवाच ‘तामसानिच शास्त्राणि समाचक्ष्व मम अनघ! सम्प्रोक्तानि च तैः विप्रैः भगवद्भक्तिवर्जितैः. तेषां नामानि क्रमशः समाचक्ष्व सुरेश्वर’. श्रीरुद्र उवाच ‘शृणु देवि! प्रवक्ष्यामि तामसानि यथाक्रमं तेषां श्रवणमात्रेण मोहः स्याद् ज्ञानिनामपि. प्रथमंहि मयैव उक्तं शैवं पाशुपतादिकं मच्छक्त्यावेशितैः विप्रैः सम्प्रोक्तानिच ततः शृणु. कणादेनतु सम्प्रोक्तं शास्त्रं वैशेषिकं महद्, गौतमेन तथा न्यायं, सांख्यन्तु कपिलेन वै, धिषणेन तथा प्रोक्तं चार्वाकम् अतिगर्हितम्. दैत्यानां नाशनार्थाय विष्णुना बुद्धरूपिणा बौद्धशास्त्रम् असत् प्रोक्तं नग्ननीलपटादिकम्, मायावादम् असच्छास्त्रं प्रच्छन्नं बौद्धम् उच्यते मयैव कथितं देवि कलौ ब्राह्मणरूपिणा. अपार्थं श्रुतिवाक्यानां दर्शयन् लोकगर्हितम् स्वकर्मरूपं त्याज्यत्वम् अत्रैव प्रतिपाद्यते. सर्वकर्मपरिभ्रष्टैः वै धर्मत्वं तद् उच्यते. परेश-जीवयोः ऐक्यं /परेशजीवपारैक्यं मयातु प्रतिपाद्यते. ब्रह्मणश्च स्वयं रूपं निर्गुणं वक्ष्यते मया सर्वस्य जगतोऽपि अत्र मोहनार्थं कलौ युगे. वेदार्थवद् महाशास्त्रं मायावादम्/मायया यद् अवैदिकं मयैव कल्पितं देवि! जगतां नाशकारणात्. मदाज्ञया जैमिनिना पूर्वं वेदम् अपार्थकं निरीश्वरेण वादेन कृतं शास्त्रं महत्तरम्. शास्त्राणि चैव गिरिजे तामसानि निबोध मे...** ” (पद्मपुरा.६।२३६।१-१३) इति. इमानिच वचनानि विज्ञानेन्द्रभिक्षु-नागोजीभट्टादिभिः प्रामाणिकैरपि उदाहृतानीति न तेषु कल्पितत्वादिशङ्कावकाशः. वाराहेच प्रागितिहासे रुद्रगीतासु भगवान् “ ‘**त्वञ्च रुद्र! महाबाहो! मोहशास्त्राणि कारय.” “अतथ्यानि वितथ्यानि दर्शयस्व महाभुज! प्रकाशं कुरु च आत्मानम् अप्रकाशं च मां कुरु’ इति”** (वारा.पुरा.७०।३६, पद्मपुरा.६।७१।१०८-१०९) इति वदन्ति. अवशिष्टन्तु उत्तरभागे वक्ष्यते. तद् एतत् सर्वम् अनुसन्धाय उक्तं मूले. **पाद्म-वाराहादिषु प्रसिद्धम्** इति. **अन्यत्र** इति निबन्धादिषु “**बुद्धावतारेतु अधुना हरौ तद्वशगाः सुराः**” (त.दी.नि.१।१५) इत्यादिस्थले विस्तरः इति अर्थः.

(१) [‘ब्राह्मणैः’ इति गौतमादिभिः इति अर्थः. उक्तंहि कौर्मे पूर्वखण्डे सप्तविंशे अध्याये श्रीकृष्णेन भृग्वादीन् प्रति “द्विषन्तो देवम् ईशानं युष्माकं वंशसम्भवाः शप्ताश्च गौतमेन ऊर्व्यां न सम्भाष्या द्विजोत्तमैः” (कूर्मपुरा.१।२७।-१८). तत्रैव एकोनत्रिंशे अध्याये अर्जुनं प्रति व्यासेन “कुर्वन्ति च अवताराणि ब्राह्मणानां कुलेषु वै देवीशापविनिर्दग्धाः पुरा दक्षाध्वरे द्विजाः. निन्दन्तिच महादेवं तमसाविष्टचेतसः वृथाधर्मं चरिष्यन्ति तस्मिन् काले युगान्तके. येच अन्ये शापनिर्दग्धाः गौतमस्य महात्मनः सर्वे ते अवतरिष्यन्ति ब्राह्मणाः तासु योनिषु.” (कूर्मपुरा.१॥२९।२७-२९) इत्यादि उक्त्वा उक्तम्, “मोहयन्ति जनान् सर्वान् दर्शयित्वा फलानि वै” (कूर्मपुरा.१।२९।३१) इति. कौर्मे पूर्वखण्डएव दक्षं प्रति दधीचेन “भविष्यन्ति त्रयीबाह्याः सर्वेऽपि ईश्वरविद्विषः निन्दन्तो ह ऐश्वरं मार्गं कुशास्त्रासक्तचेतसः मिथ्याधीत-समाचाराः मिथ्याज्ञान-प्रलापिनः प्राप्य कलियुगं घोरं कलिजैः परिपीडिताः त्यक्त्वा तपोबलं कृत्स्नं गच्छध्वं नरकान् पुनः भविष्यति हृषीकेश स्वाश्रितोऽपि पराङ्गमुखः”, “ये अन्ये शापाग्निनिर्दग्धाः दधीचस्य महर्षयः द्विषन्तो मोहिता देवं संभूताः ते कलिषु अथ” (कूर्मपुरा.१।१५।३०-३२,१।१५।९३) इत्यादि उक्त्वा “त्यक्त्वा तपोबलं कृत्स्नं विप्राणां कुलसम्भवाः” इति च उक्त्वा “कल्पान्ते रौरवादिषु निपात्यमानाः कालेन” (कूर्मपुरा.१।१५।१५) इति उक्तम्. तत्र “द्विषन्तो देवम्” इत्यत्र “लक्षण-हेत्वोः क्रियायाः” (पाणि.सू.३।२।१२६) इति सूत्रेण लक्षणे हेतौ वा शत्रा “अदन् विप्रो न नमनीयः” “पचन् विप्रो न श्राद्धे भोजनीयः” इत्यादिवत्.]

> **(२) यच्च शप्तानां लक्षणसप्तकम् उक्तं तदपि तेषां लक्षणत्वेन अभिमतानां वास्तवलक्षणत्वएव घटते नतु आरोपमात्रेण. नहि मरुमरीचिका केनचिद् अज्ञेन जलत्वेन आरोपितापि स्नानपानादि-कार्यक्षमा भवति. किं तावद् वास्तवं लक्षणत्वम्? लक्ष्यतावच्छेदक-समनियतत्वम् इति गृहाण. लक्ष्यतावच्छेदक-समनियतत्वञ्च लक्ष्यतावच्छेदकवन्निष्ठभेदप्रतियोगितानवच्छेदकत्वे सति लक्ष्यतावच्छेदकनिष्ठावच्छेदकताकप्रतियोगिताकभेदवदवृत्तित्वम्. इदमेव असाधारणत्वम्. तादृशमेव च लक्षणम् अव्याप्ति-अतिव्याप्ति-असम्भवरूपदोषत्रयरहितं भवति. तद्भिन्नञ्च लक्षणाभासत्वेन व्यवह्रियते. नहि लक्षणाभासेन व्यवहर्तव्यव्यवहारो भवति अन्यथा शृङ्गित्वरूपलक्षणेन महिष्यादावपि गौः इति व्यवहारापत्तिः. तस्माद् दोषत्रयविनिर्मुक्तेनैव लक्षणेन प्रामाणिकानां व्यवहारः, तस्यैव लक्ष्यतावच्छेदकसमनियतत्वात्. त्वदुक्तलक्षणानान्तु दोषदूषितत्वेन न प्रामाणिकव्यवहारप्रयोजकत्वम् लक्षणाभासत्वात्.**

(३) अथ सहस्राक्षे ब्राह्मणैः इति इत्यादिना उदाहृतमेव (पृ.१७९) इत्यन्तेन आरोपितं वैष्णवाचार्येषु तदनुयायिषु च शप्तत्वं परिहर्तुं तं भागं निराकुर्वन्ति **यच्च शप्तानाम्** इत्यादिना **फलानीति बहुवचनस्य अनुपपन्नत्वाद्** (पृ.१७०) इत्यन्तेन. अत्र इदं बोध्यं : यत् सहस्राक्षे सप्तविंशाध्यायवचनं प्रथमम् उक्तं तत्पूर्वापरविचाराद् न वैष्णवविषयकम्. तथाहि तस्मिन् अध्याये पृथिव्यां धर्मस्थापनादिसर्वकार्यानन्तरं श्रीकृष्णः स्वधाम जिगमिषन् तस्मिन् अवसरे समागतान् भृग्वादीन् यथोचितं सत्कृत्य आह **''गमिष्यामि परं स्थानं स्वकीयं विष्णुसंज्ञितम् कृतानि सर्वकार्याणि प्रसीदध्वं मुनीश्वराः. इदं कलियुगं घोरं सम्प्राप्तम् अधुना अशुभम् भविष्यन्ति जनाः सर्वेहि अस्मिन् पापानुवर्तिनः. प्रवर्तयध्वं विज्ञानम् अज्ञानाञ्च हितावहम्. येन इमे कलिजैः पापैः मुच्यन्ते हि द्विजोत्तमाः. ये मां जनाः संस्मरन्ति**

कलौ सकृदपि प्रभुं तेषां नश्यति तत्पापं भक्तानां पुरुषोत्तमे. ये अर्चयिष्यन्ति मां भक्त्या नित्यं कलियुगे द्विजाः. विधिना वेददृष्टेन ते गमिष्यन्ति तत्पदम्. ये ब्राह्मणा वंशजाता युष्माकं वै सहस्रशः तेषां नारायणे भक्तिः भविष्यति कलौ युगे. परात् परतरं यान्ति नारायणपराजनाः न ते तत्र गमिष्यन्ति ये द्विषन्ति महेश्वरम्. ध्यानं योगः तपः तप्तं ज्ञानं यज्ञादिको विधिः तेषां विनश्यति क्षिप्रं ये निन्दन्ति महेश्वरम्. यो मां समर्चयेद् नित्यम् एकान्तं भावमाश्रितः विनिन्दन् देवम् ईशानं स याति नरकायुतम्. तस्मात् सम्परिहर्तव्या निन्दा पशुपतेः द्विजाः कर्मणा मनसा वाचा मद्भक्तेष्वपि यत्नतः. येच दक्षाध्वरे शप्ता दधीचेन द्विजोत्तमाः भविष्यन्ति कलौ भक्तैः परिहार्याः प्रयत्नतः. द्विषन्तो देवम् ईशानं युष्माकं वंशसंभवाः शप्ताश्च गौतमेन ऊर्व्यां न सम्भाष्या द्विजोत्तमैः. एवम् उक्ताश्च कृष्णेन सर्वे ते वै महर्षयः 'ओम्' इति उक्त्वा ययुः तूर्णं स्वानि स्थानानि सत्तमाः. ततो नारायणः कृष्णो लीलयैव जगन्मयः संहृत्य स्वकुलं सर्वं ययौ तत्परमं पदम्'' (कूर्मपुरा.१।२७।७-२०) इति. अत्र सर्वेषां पापानुवर्तनम् अज्ञानां तेषां हितार्थं कलिजपापनाशार्थञ्च स्वविज्ञानस्य प्रवर्तनम् आज्ञाप्य ''कथं त्वद्विज्ञानम्?'' इति आकांक्षायां सर्वदापुरुषोत्तमस्मरण-नित्यतत्सेवनादिना इति आशयेन **''ये मां जनाः संस्मरन्ति''** (कूर्मपुरा.१।२७।१०) इति श्लोकद्वयम् उक्त्वा पुरुषोत्तमस्मरण-सेवा-ऽपरोक्षज्ञानसाधक-वैष्णवसंप्रदायानां भवनं सूचयित्वा श्रीमहादेवनिन्दकस्य दुष्फलावश्यम्भावाद् वैष्णवैरपि शिवनिन्दा न कार्या इति निश्चाय्य वैष्णवनिन्दापि यत्नतः त्याज्या इतिच अभिधाय वेदादिविमुखैः सह संसर्गो वैष्णवैः न कार्यः इति उच्यते **'ये च'** इति श्लोकेन. **''देवम् ईशानम्''** (कूर्मपुरा.१।२७।१८) इतितु उपलक्षणं, **''विनिन्दन्ति हृषीकेशं ब्राह्मणान् ब्रह्मवादिनः''** (कूर्मपुरा.१।३०।३०) इति वक्ष्यमाणत्रिंशाध्यायवाक्यैकवाक्यत्वसिद्धेः. अतो विष्णु-शिव-देव-वेदादिद्वेषिणो ये वेदबाह्याः ते न सम्भाष्याः इत्येव अर्थः. तत्रैव षोडशाध्याये **''कापालं लाङ्गलं वामं भैरवं पूर्वपश्चिमम्''** (कूर्मपुरा.१।१६।११९) इत्यादिना गौतमशप्तानां कापालादिवेदबाह्यशास्त्रेष्वेव प्रवृत्तिकथनात्. शिवादिद्वेषरहिताः प्रत्युत शिवप्रवर्तितपुरुषोत्तमभक्तिमार्गनिष्ठाः

वेदानुयायिनो वयन्तु न अस्य वाक्यस्य गोचराः. “**एवम् उक्ताश्च**” इति श्लोके “**ओम् इति उक्त्वा**” इति. “**प्रवर्तयध्वं विज्ञानम्**” इत्यादिना भगवता आज्ञप्तं तत्साक्षात्कारसाधनसंप्रदायप्रवर्तनादिकम् अङ्गीकृत्य इति अर्थः. एवं स्वस्थापितधर्मज्ञानादीनां भुवि चिरम् अवस्थानसिद्धये भृग्वादीन् प्रति आज्ञापनोत्तरं भगवतः स्वधामगमनं वर्णितम्. लोकक्षेमार्थमेव कलौ भूयो भक्तिमार्गप्रवृत्तिः इत्यत्र साधकानि ब्रह्माण्डादिवचनानि मूले वक्ष्यन्ते “**यच्च कुर्वन्ति च अवताराणि**” इत्यादि वचसाम् एकोनत्रिंशाध्यायस्थत्वम् उक्तं तत् प्रमादात् तेषां त्रिंशाध्यायएव उपलम्भात्. तत्रापि “**ब्राह्मणाः तासु योनिषु**” इत्यस्य अग्रे अनुपदमेव उच्यते, “**विनिन्दन्ति हृषीकेशं ब्राह्मणान् ब्रह्मवादिनः वेदबाह्यव्रताचाराः दुराचाराः वृथाश्रमाः. मोहयन्ति जनान् सर्वान् दर्शयित्वा फलानि वै तमसाविष्टमनसो बैडालव्रतिकाधमाः**” (कूर्मपुरा.१।३०।३१) इति. इमान्यपि वचनानि शिवविष्ण्वादिनिन्दक वेदबाह्य-निरर्थकाचार-विशिष्टविषयिकाणि, कण्ठरवेण **वेदबाह्यव्रताचारा** इत्याद्युक्तेः षोडशाध्यायैकवाक्यत्वसिद्धेः च. ‘विरागि’ शब्दवाच्य-वर्णाश्रमपरिभ्रष्ट-त्वादृश-यतिविषयाणि च. एकोनत्रिंशे “**अस्मिन् कलियुगे घोरे नराः पापानुवर्तिनः भविष्यन्ति महाबाहो! वर्णाश्रमविवर्जिताः**” (कूर्मपुरा.१।२९।२) इति अर्जुनं प्रति व्यासेन कथनात्. प्रकृताध्याये च “**यतयश्च भविष्यन्ति शतशो अथ सहस्रशः नाशयन्तः स्वकं धर्मं न अधिगच्छन्ति तत्पदम्**” (कूर्मपुरा.१।३०।२३-२४) इति तेनैव निरूपणात्. एतच्च सर्वं मूलएव स्फुटीभविष्यतीति व्याख्यानेऽपि तत्रैव प्रपञ्चयिष्यते. यानिच “**भविष्यन्ति त्रयीबाह्या**” (कूर्मपुरा.१।१५।३०) इत्यादीनि पूर्वखण्डपञ्चदशाध्यायवचांसि प्रकरणगोपनाय पूर्ववद् अध्यायादिकम् अनिर्दिश्य उक्तानि तेषामपि पूर्वापरभागपर्यालोचने अन्यएव विषयः सिध्यति नतु तेषु त्वदुक्तं किञ्चिदपीति मूलएव उपपादयिष्यते. ‘**लक्षणहेत्वोः**’ इति ‘शत्रा’पि विचारयिष्यते. वास्तवार्थाच्छादनाय त्वया यथा त्रिंशाध्यायवाक्येषु “**विन्दन्ति हृषीकेशम्**” (कूर्मपुरा.१।३०।३०) इति एकं श्लोकं इत्यादि उक्त्वा इति उक्त्या पिधाय मोहयन्ति जनान् सर्वान् इति अर्धमेव अनूदितम्. तथा पञ्चदशाध्यायवचस्स्वपि पूर्वापरभागौ मध्यमान् भागविशेषांश्च

तिरोधाय भ्रमजननक्षमएव भागो अनूद्यते तत्सर्वं पुरस्ताद् उद्धाटयिष्यामः. तस्मात् ज्ञानदुर्बलच्छलनमात्रफलकम् अखिलम् एतदिति प्रेक्षावताम् उपेक्षार्हम्. तथापि शास्त्रविनोदरसिकाः मूलग्रन्थकाराः प्रथमं तदुक्तम् अभ्युपेत्य तेन लक्षणतयाभिमतेषु सप्तसु वास्तवलक्षणत्वम् अस्ति नवा? इत्येव तावत् परीक्षन्ते **तदपि तेषाम्** इत्यादिना. **...कार्यक्षमा** इति कार्ययोग्याः कार्यस्य भूमिः वा. **लक्ष्यतावच्छेदक-समनियतत्वम्** इति समनियतत्वं हि तद्व्यापकत्वविशिष्टतद्व्याप्यत्वम्, वैशिष्ट्यञ्च स्वरूपघटितसामानाधिकरण्यसम्बन्धेन. तादृश समानाधिकरण्यञ्च स्वरूपसम्बन्धावच्छिन्नतद्व्यापकत्वनिष्ठाधेयतानिरूपिताधिकरणतावन्निरूपितस्वरूपसम्बन्धावच्छिन्न-तद्व्याप्यत्वनिष्ठाधेयतारूपं यथा प्रमेयत्वे अभिधेयत्वसमनियतत्वम् अभिधेयत्वे च तत्समनियतत्वम्. लक्ष्यतावच्छेदकव्यापकत्वञ्च लक्ष्यतावच्छेदकाधिकरणनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम्. लक्ष्यतावच्छेदकवन्निष्ठभेदप्रतियोगिताऽनवच्छेदकत्वं वा. लक्ष्यतावच्छेदकसमानाधिकरणाः यावन्तोः धर्माः यत्समानाधिकरणाः तत्त्वं वा. लक्ष्यतावच्छेदकव्याप्यत्वञ्च लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदवदवृत्तित्वम्. लक्षणाधिकरणनिष्ठात्यन्ताभावाप्रतियोगिलक्ष्यतावच्छेदक- सामानाधिकरण्यं वा अत्र गोत्वाव्याप्ये तद्व्यापके शृङ्गित्वे गोलक्षणत्वाभावाय विशेष्यदलम्. लक्ष्यतावच्छेदकव्याप्यस्यैव लक्षणत्वेतु गृष्टित्वसमानाधिकरणशृङ्गित्वेऽपि गोलक्षणत्वं स्यात्. तथाच द्विस्त्रिःप्रसूतगव्यादौ अव्याप्तिरिति तत्र तल्लक्षणत्वव्यवच्छेदाय विशेषणदलम्. एतदेव सर्वम् उरसि कृत्वा आहुः **लक्ष्यतावच्छेदकवन्निष्ठ...** इत्यादि. अत्र तद्व्यापकत्वं सत्यन्तदलस्य अर्थः. तद्व्याप्यत्वं प्रथमान्तदलस्य. यथा शृङ्गित्वसमानाधिकरणसास्नावत्त्वं गोः लक्षणम्. सरटे अतिव्याप्तिवारणाय शृङ्गित्वसामानाधिकरण्यम्. शृङ्गित्वंहि शृङ्गसम्बन्धः. सास्नावत्त्वे तत्सामानाधिकरण्यञ्च स्वरूपसम्बन्धावच्छिन्न- शृङ्गित्वनिष्ठाधेयतानिरूपिताधिकरणतावन्निरूपित-स्वरूपसम्बन्धावच्छिन्नाधेयता-शालित्वम्. शृङ्गित्वमात्रस्य महिष्यादौ अतिप्रसङ्गात् तद्वारणाय सास्नावत्त्वम्. अत्र लक्ष्यतावच्छेदकं गोत्वम्. तद्वन्निष्ठो भेदश्च घटादिप्रतियोगिको भेदः तादृशभेदप्रतियोगितावच्छेदकं लक्षणम्. तथा गोत्वनिष्ठा अवच्छेदकता यस्याः तादृशी प्रतियोगिता

यस्य तादृशो यो भेदो लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदः इति यावत्. तद्वन्तो घटादयः तदवृत्तित्वं गोलक्षणस्य वर्ततइति तत्र लक्षणे समन्वयः. दलद्वयकृत्यन्तु प्रागेव दर्शितम्. **‘प्रतियोगिताक’**पदरहितपाठेतु अवच्छेदकतायां भेदस्य स्वनिरूपितप्रतियोगितावच्छेदकतात्वं संसर्गः. **तादृशमेव** इति असाधारणमेव वास्तवमेव इति यावत्. अव्याप्ति-अतिव्याप्ति-असम्भवरूपदोषत्रयरहितम् इति.

अव्याप्तिः हि लक्ष्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगित्वम्. लक्षणतावच्छेदकतया अभिमतसम्बन्धेन लक्ष्यैकदेशावृत्तित्वं वा. यथा “कपिलत्वं गोः लक्षणम्” इति उच्यमाने शुक्लादिगवीषु अव्याप्तिः. कालिकसम्बन्धेन तद्वृत्तित्वस्य अनपनोद्यतया द्वितीयलक्षणे सम्बन्धविशेषनिवेशः. अतिव्याप्तिस्तु लक्षणस्य अलक्ष्यवृत्तित्वं, लक्ष्यतावच्छेदकाधिकरणवृत्तित्वे सति लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्यं वा. यथा शृंगित्वस्य गोलक्षणत्वे महिष्यादौ अतिव्याप्तिः. असम्भवश्च लक्ष्यमात्रावर्तनं, लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वं वा. यथा ‘एकशफत्व’रूपगोलक्षणस्य असम्भवः. एतद्दोषत्रयात्यन्ताभाववद् इति अर्थः. व्यावृत्तिः व्यवहारो वा लक्षणस्य प्रयोजनम् इति अभियुक्तोक्तेः व्यवहारस्य लक्षणप्रयोजनत्वम् अभिप्रेत्य आहुः **व्यवहर्तव्यव्यवहारः** इत्यादि. **व्यवहर्तव्यानां** ‘गवा’दिपदानां **व्यवहारः** इति अर्थः. **अन्यथा** इति, लक्षणाभासवत्यपि तत्त्वेन व्यवहारस्य अंगीकारे **लक्षणेन (शृंगित्वरूपलक्षणेन)** इति लक्षणाभासेन. अतएव सांख्यतत्त्वकौमुद्यां वाचस्पतिमिश्रः “**समानासमानजातीयव्यवच्छेदो लक्षणार्थः**” (सां.त.कौ.त.वै.५) इति आह. अत्र “**समानजातीयेभ्यश्च असमानजातीयेभ्यश्च व्यवच्छिद्यते येन इति व्युत्पत्तिलभ्यो ‘लक्षण’शब्दार्थः**” इति कश्चिद् व्याचष्टे. वस्तुतस्तु तदुभयव्यवच्छेदो लक्षणप्रयोजनम् इति अक्लिष्टो अर्थः प्रतीयते. एवञ्च “**समानासमानजातीयव्यवच्छेदकत्वं लक्षणत्वम्**” (न्या.वा.ता.१।१।३४) इति तन्मतं फलति. समानजातीयव्यवच्छेदकत्वमात्रं विशेषणे अतिव्याप्नोति. “नीलो घटः” इत्यादौ ‘नीला’दिपदेन समानजातीयस्य रक्तघटादेरेव व्यवच्छेदात्.

लक्षणन्तु स्वलक्ष्यं गवादिकं असमानजातीयेभ्योऽपि महिष्यादिभ्यो व्यवच्छिनत्ति. असमानजातीयव्यवच्छेदकत्वमात्रकथने सामान्ये अतिव्याप्तिः. गोत्वादिसामान्यस्य असजातीयव्यवच्छेदकत्वात्. अतः उभयग्रहणम्. एवं लक्षणस्य व्यावृत्तिरूपे प्रथमप्रयोजने सिद्धे व्यावृत्तस्थलएव तत्त्वव्यवहारो अर्थात् सिध्यति इति न लक्षणाभासेन व्यवहारः. एतदेव आहुः **तस्माद् इत्यादि.**

(१) [तेन शिवद्वेषः शप्तानाम् एकं लक्षणम् उक्तं द्वेषस्य असम्भाष्य-हेतुत्वं तु स्पष्टमेव उक्तम्. द्वेषो अप्रीतिः कलिमलहर्तरि श्रौतधर्मवक्तरि च तस्मिन् अनभिरञ्जनम्.]

(२) कथं तेषां दुष्टत्वम्? इति चेत्, शृणु. शिवद्वेषो विप्रशप्तस्य प्रथमं लक्षणम् उक्तम्. तत्र लक्ष्यतावच्छेदकं ‘विप्रशप्तत्वं’, ‘शिवद्वेषो’ लक्षणम्. एवञ्च लक्ष्यतावच्छेदकनिष्ठावच्छेदकताकभेदवत्सु अन्धक-जालन्धरादिदैत्येषु शिवद्वेषस्य सत्त्वेन अतिव्याप्तिः. न तेषां विप्रशप्तत्वं पुराणेषु प्रसिद्धम्. “मनुष्यत्वे सति” इति विशेषणाद् न एवम् इति चेद्, बौद्धेषु अतिव्याप्तिः त्वयि अव्याप्तिश्च. विप्रत्वावच्छिन्न-यावद्-विप्रशप्तत्वस्य अप्रसिद्धत्वेन तत्तद्व्यक्तित्वावच्छिन्नशप्तत्वस्य च तत्तद्व्यक्तीनां ज्ञानासम्भवाद् दुर्ज्ञेयत्वेन यत् किञ्चिद् व्यक्तिशप्तत्वस्यैव लक्ष्यतावच्छेदकस्य वक्तव्यत्वेन ईदृशग्रन्थकर्तृत्वेन वैष्णवविप्रशप्ते त्वय्यपि एतादृशलक्ष्यतावच्छेदकाक्रान्ते लक्षणस्य असत्त्वाद् अव्याप्तिः स्यादेव.

(३) सहस्राक्षे तेन शिवद्वेषः... इत्यादिना अनभिरञ्जनम् इत्यन्तेन दर्शितं प्रथमलक्षणं दूषयन्ति **शिवद्वेषो विप्रशप्तस्य** इत्यादिना **शिवद्वेषो न लक्षणम्** इत्यन्तेन. **लक्ष्यतावच्छेदकनिष्ठावच्छेदकताके**ति. लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताको यो भेदः तद्वत्सु इति भावः. अवच्छेदकतायां

भेदस्य स्वनिरूपितप्रतियोगितावच्छेदकतात्वं संसर्गः. **अन्धकजालन्धधरादिदैत्येषु** इति अल्पाच्तरत्वाद् अन्धकस्य पूर्वनिपातः. अन्धकोहि हिरण्याक्षपुत्रः शिवं द्विष्टवान्. तथाच कौर्मएव पूर्वखण्डे षोडशाध्याये “**अभिषेकेन युक्तेन हिरण्याक्षम् अयोजयत्, स बाधयामास सुरान् रणे जित्वा मुनीनपि. लब्धान्धकं महापुत्रं तपसा आराध्य शङ्करम्**” (कूर्मपुरा.१।१६।७७-७८) इति तदुत्पत्तिः उक्ता. अग्रेच “**अवाप तद् महद् राज्यम् अन्धको असुरपुङ्गवः, हिरण्यनेत्रतनयः शम्भोः देहसमुद्भवः मन्दरस्थाम् उमां देवीं चकमे पर्वतात्मजाम्**” (कूर्मपुरा.१।१६।९५-९६) इत्यादिना विस्तरेण शिवद्वेषो वर्णितः. अतएव ‘अन्धकरिपुः’इति शिवस्य अभिख्या सुप्रसिद्धा. जालन्धरस्तु पुरन्दरोपरि क्रुद्धस्य शङ्करस्य नेत्रजन्मा वह्निः बृहस्पतिप्रसादितेन तेन गंगासागरसंगमे क्षिप्तः सागरपुत्रो भूत्वा दैत्यैश्वरतां प्राप्तः श्रियः प्रार्थनया हरिणापि रणे न हतः. सर्वसुरान् जित्वा नारदगिरा गिरिसुताकामी शिवं द्विष्टवान् इति पद्मपुराणे कार्तिकमाहात्म्ये नवमाध्यायम् आरभ्य सप्तदशाध्यायपर्यन्तं विस्तरेण निरूपितम्. **‘आदि’** पदेन श्रीभागवतादिप्रसिद्धा वृकासुरप्रभृतयः शिवद्वेषिणः संगृह्यन्ते **न तेषां विप्रशप्तत्वम्** इति, पुराणेषु तथाकथायाः अदर्शनात् प्रत्युत शिवप्रसादजन्यत्व-शम्भुदेहसमुद्भवत्वादिकथनेन शप्तत्वाभावनिश्चयाच्च तथा. किञ्चिद् आशंक्य परिहरन्ति **मनुष्यत्वे** इत्यादिना. बौद्धेषु वेदादिद्वेषिषु शिवद्वेषस्यापि सत्त्वाद् इति भावः. वस्तुतस्तु लक्षणसप्तकस्य कौर्मवचोभ्यएव अवगमस्य स्वीकारात् तेषु अस्य विशेषणस्य अनुपादानात् च “मनुष्यत्वे सति” इति वादिनः कल्पनमेव अयुक्तं, मानाभावात्. नच ऋषीन् प्रति “**युष्माकं वंशसम्भवाः** (कूर्मपुरा.१।२७।१८) इति उक्तिरेव तत्र मानम् इति वाच्यं, दैत्यानां दानवानां च कश्यपवंशसम्भवत्वेन, राक्षसानां पुलस्त्यकुलसम्भवत्वेन च, ऋषिवंशोद्भवतानपायात्. प्रत्युत ‘तासु योनिषु’इति बहुवचनेन दैत्यादेरपि संग्रहस्य औचित्यं प्रतीयते. **तत्तद्व्यक्तित्वावच्छिन्नशप्तत्वस्य** इत्यस्य दुर्ज्ञेयत्वेन इति उत्तरेण अन्वयः. **तत्तद्व्यक्तीनाम्** इत्यादिस्तु दुर्ज्ञेयत्वे हेतुः. **वैष्णवविप्रशप्त** इति, कौर्मे सप्तविंशे “**कर्मणा मनसा वाचा मद्भक्तेष्वपि यत्नतः**” (कूर्मपुरा.१।२७।१६) इति वैष्णवनिन्दायाः विशेषतः प्रतिषेधात्. त्रिंशेऽपि “**विनिन्दन्ति हृषीकेशं ब्राह्मणान् ब्रह्मवादिनः**” (कूर्मपुरा.१।३०।३०) इति भगवन्निन्दायां परमाणु-प्रधान-मायादिवादान् हित्वा

ब्रह्मवादम् आश्रयतां ब्राह्मणानां निन्दायाञ्च त्वद्रीत्यैव शप्तलक्षणतासिद्धेश्च तथा इति भाव:. किञ्च श्रीभागवते चतुर्थस्कन्धद्वितीयाध्याये “**भवव्रतधरा: ये च ये च तान् समनुव्रता: पाखण्डिन: ते भवन्तु सच्छास्त्रपरिपन्थिन:. नष्टशौचा: मूढधियो जटाभस्मास्थिधारिण: विशन्तु शिवदीक्षायां यत्र दैवं सुरासवम्. ब्रह्म च ब्राह्मणान् चैव यद् यूयं परिनिन्दथ, सेतुं विधारणं पुंसाम् अत: पाखण्डम् आश्रिता:. एषएव हि लोकानां शिव: पन्था: सनातनो, यं पूर्वे च अनुसन्तस्थु: यत्प्रमाणं जनार्दन:. तद् ब्रह्म परमं शुद्धं सतां वर्त्म सनातनं, विगर्ह्य यात पाखण्डं दैवं वो यत्र भूतराड्**” (भाग.पुरा.४।२।२८-३२) इति भृगो: शाप: पठ्यते. त्वयि तादृशधर्मसत्त्वन्तु त्वदीय-शैवसुधाकर-दर्शनाद् नि:संशयम् अवगम्यते.

> **(२) ननु न अहं ‘शिवद्वेष’ पदेन देवतात्मकेश्वरद्वेषं ब्रवीमि येन अन्धकादिषु अतिव्याप्ति: प्रसज्ज्येत; किन्तु, शिवावतारशङ्कराचार्यद्वेषम्. अतएव उक्तं श्रौतधर्मवक्तरि कलिमलहर्तरि इति चेत्; तथापि बौद्धेषु अतिव्याप्ति: स्यादेव, मण्डनमिश्रादौ अतिव्याप्तिश्च. किञ्च ‘अप्रीति’ पदेन [१]प्रीतिभेदो विवक्षित: [२]प्रीत्यत्यन्ताभावो वा [३]प्रीतिविरोधि वा ?. न आद्यो वृक्षादौ अतिव्याप्ते: शिवभक्तेषु अतिव्याप्तेश्च. नापि द्वितीयतृतीयौ, घटादौ अतिव्याप्ते: प्रीतिविरोधिनो द्विष्टसाधनता ज्ञानजन्यस्य अन्त:करणवृत्तिविशेषस्य शिवभक्तेषु रावणादिषु असत्त्वेन सनकादिशप्तेषु तेषु विप्रशप्तत्वरूप-लक्ष्यतावच्छेदकान्तेषु अव्याप्ते: दुर्वारत्वाच्च. तस्मात् शिवद्वेषो न लक्षणम्.**

(३) पुन: किञ्चिद् आशंक्य परिहरन्ति **ननु** इत्यादि. **बौद्धेषु** इति, इदम् उपलक्षणम्. तेन ये-ये वादिनो दिग्विजयादिषु शङ्कराचार्यै: समम् आग्रहपूर्वकवादादिकर्तृत्वेन प्रसिद्धा: तेषु सर्वेषु अतिव्याप्ति:. नच इष्टापत्ति:, अशेषस्य जगत: शप्ततायाः वक्तुम् अशक्यत्वात्. शङ्कराचार्यानुयायिष्वपि

अतिव्याप्तिम् आहुः **मण्डनमिश्रादौ** इति, प्रतिज्ञापूर्वकवादादिकरणात् स्पष्टैव तदादेः शङ्कराचार्येषु अप्रीतिः. अथ विधातृशप्तगीष्पत्यवतारपक्षाश्रयणाद् अदोषः इति चेत्, तदर्थं विधातुः विप्रत्वम् आश्रयणीयं शिष्यभावोत्तरम् अव्याप्तिश्च. दुर्वासः शप्तभारत्यामपि सा. वस्तुतस्तु "**द्विषन्तो देवम् ईशानम्**" (कूर्मपुरा.१।२७।१८) इति वाक्ये '**ईशान**' पदं न शङ्कराचार्यपरं भवितुम् अर्हति. सप्तविंशाध्याये शङ्कराचार्यावतारगन्धस्यापि अभावात्. ननु त्रिंशे तदवतारकथनं मया स्वीक्रियतइति एकपुराणस्थत्वाद् एतद्वाक्यमपि तत्परं भविष्यति इति चेत्, तर्हि "**एवं सम्बोधितो रुद्रो माधवेन मुरारिणा चकार मोहशास्त्राणि**"(कूर्मपुरा.१।१६।११८) इति कौर्मषोडशाध्यायवाक्यमपि तत्परं कुतो न भवेत्!. किञ्च श्रीभागवते "'**बुद्धो**'**नाम्ना जिनसुतः कीकटेषु भविष्यति**"(भाग.पुरा.१।३।२४) इति उक्तत्वात् तत्र प्रकरणान्तरे पठितानि "**तान् आनयध्वम् असतो अकृतविष्णुकृत्यान्**" (भाग.पुरा.६।३।२९) इत्यादि वचांसि अकृतबुद्धकृत्यपराणि कुतो न स्युः?. तस्माद् "**देवम् ईशानम्**" (कूर्मपुरा.१।२७।१८) इति उक्तेः देवतारूपशिवपरत्वमेव एतद् इति न त्वदुक्तं किञ्चित्, त्रिंशाध्यायवचसामपि वास्तवार्थस्य दर्शितचरत्वाच्च. यत्तु "**द्वेषो अप्रीतिः अनभिरञ्जनम्**" इति उक्तं, तदर्थं विकल्प्य दूषयन्ति **किञ्च 'अप्रीति' पदेन** इत्यादिना. अयं भाव : "**तत्सादृश्यम् अभावः च तदल्पत्वं तदन्यता अप्राशस्त्यं विरोधः च नञर्थाः षट् प्रकीर्तिताः**" (द्र.पाणि.सू.बा.म.६।३।७३) इति मनोरमादौ संगृहीतेषु मीमांसकग्रन्थप्रसिद्धेषु षट्सु नञर्थेषु 'अब्राह्मणो' 'अनुदरा कन्या' "**अपशवो वा अन्ये गो अश्वेभ्यः**" (तैत्ति.संहि.५।२।९।४) इत्यादिवत् प्रकृते सादृश्याल्पत्वाप्राशस्त्यानाम् अन्यतमस्य त्वदविवक्षितत्वप्रतीतेः भेदादयः त्रयएव अवशिष्यन्ते. तत्र न तावद् भेदः, तथासति 'अनश्वः' इत्यादिना अश्वभिन्नो गवादिरिव '**अप्रीति**' इत्यनेन प्रीतिभिन्नो धर्मो गृह्येत, शिवविषयकप्रीतिभिन्नधर्मश्च वृक्षादौ शिवभक्तेषु च अस्त्येवेति तत्र अतिव्याप्तिः. नापि 'अपापम्' - 'अविघ्नम्' इत्यादिवद् अत्यन्ताभावः, तथासति वक्ष्यमाणरीत्या जडे चिदानन्दयोः तिरोभावाद् घटादौ अतिव्याप्तिः. तत्र प्रीतिमात्रस्य असत्त्वेन शिवविषयकप्रीतेरपि अभावाद्, नापि 'अधर्मो' - 'असितः' इत्यादिवद् विरोधो

रावणादिषु सनकादिविप्रशप्तत्वे सत्यपि शिवविषयकप्रीतिविरुद्धधर्माभावाद् अव्याप्तेः. भगवन्तं दिदृक्षमाणैः द्वारि निरुद्धैः सनकादिभिः शप्तौ जय-विजयावेव हिरण्यकशिपु-हिरण्याक्षौ रावण-कुम्भकर्णौ शिशुपाल-दन्तवक्रौ च अभूताम् इति श्रीभागवततृप्तीयस्कन्धसप्तमस्कन्धादौ प्रसिद्धम्. वृक्षादिषु अत्यन्ततामसेषु प्रीतिविरोधिनो विषादस्य सत्त्वाद् अतिव्याप्तिरपि. तमसो विषादात्मकत्वन्तु आहुः सांख्याः **“प्रीत्यप्रीतिविषादात्मकाः प्रकाश-प्रवृत्ति-नियमार्थाः अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः”** (सां.का.१२) इति. तस्मात् शिवद्वेषो न विप्रशप्तानां लक्षणम्. अस्माकन्तु शिवे तदवतारशङ्कराचार्येषु च न द्वेषगन्धोऽपि. नच तन्मतखण्डनमात्राद् द्वेषः सम्भावनीयः, तथासति स्वभाष्यादौ विष्ण्ववतार-कपिल-नारदादिमतं खण्डयत्सु शङ्कराचार्येष्वपि विष्णुद्वेषितायाः तदवतारद्वेषितायाः वा प्रसक्तेः दुर्वारत्वात्. एतच्च मूले प्रपञ्चयिष्यते.

(१) [‘निन्दन्ति’ इत्यादि लट्प्रयोगः आर्षः अनेन तेषां द्वितीयं लक्षणम् उक्तम्. निन्दाच अविद्यमानदोषकथनम्. तच्च “शिवो मोहनाय अवतीर्ण” इत्येवं शुद्धाद्वैतमार्तण्ड-टीका-विद्वन्मण्डनाद्युक्तरीत्या प्रलपनम्. तन्निन्दाफलं धर्माचरणस्य वृथात्वम्. ‘त्रयीबाह्यत्वं’ नाम त्रयी-तदर्थग्रहणायोग्यत्वम् कथञ्चित् तद्ग्रहणेऽपि तत्फलानर्हत्वं च, मूर्खत्वात् शुद्रवद् अनधिकारात् च. तत्रापि “सर्वेऽपि ईश्वरविद्विषः” इत्यादिना एको हेतुः लक्षणं च उक्तम्. भागवतेऽपि “य एतन्मर्त्यम् उद्दिश्य भगवति अप्रतिद्रुहि द्रूहति अज्ञः पृथग्दृष्टिः तत्त्वतो विमुखो भवेद्” (भाग.पुरा.४।२।२१) इति उक्तम्. तत्त्वन्तु वेदार्थएव.]

(२) द्वितीयं लक्षणं शिवनिन्दा. सा च “शिवो मोहनाय अवतीर्णः” इत्येवं कथनम्. तत्र तादृशार्थकवाक्यस्य प्रणेतृत्वं लक्षणत्वेन अभिमतम् अनुवादकत्वं वा. आद्ये न अस्माभिः

> **तादृशं वाक्यं रचितं किन्तु अनूदितम्. प्रणीतञ्च पद्मपुराणे उत्तरखण्डे व्यासैः तथाच तत्र अतिव्याप्तिः. ननु न व्यासैः इदृशः श्लोको रचितः किन्तु केनचित् कायस्थेन तत्र प्रक्षिप्तः इति चेत्, तस्मिन् अतिव्याप्तिः, द्वितीये तु अनुवादकत्वेन सूतस्यापि विप्रशप्तत्वापत्तिः. किञ्च त्वयापि तादृशवाक्यस्य स्वग्रन्थे लिखितत्वात् तवापि अनुवादकत्वेन त्वयि अतिव्याप्तिः.**

(३) सहस्राक्षे निन्दन्ति इत्यादि ‘लट्’प्रयोगः इत्यादिना वेदार्थएव इत्यन्तेन उक्तं द्वितीयलक्षणं दूषयन्ति **द्वितीयं लक्षणम्** इत्यादिना **त्वयापि अंगीकरणीयत्वाद्** (पृ.१०१) इत्यन्तेन. अत्र शतृवद् लटो लक्षण-हेत्वोः विधानस्य अभावाद् निन्दन्ति इति उक्तनिन्दायाः लक्षणत्वकल्पने मानम् अन्वेष्टव्यम्. कलिप्रवृत्त्यनन्तरं “**कुर्वन्ति च अवताराणि**” इत्यादि कथनात् तत्रापि ‘कुर्वन्ती’ति लट्प्रयोगात् तदानीमपि शिवनिन्दकानां बौद्धादीनां सत्त्वात्. असत्त्वे चतुर्लक्षण्यां तर्कपादे स्वयं व्यासेन तेषां खण्डनस्य असम्भवाद् ‘निन्दन्ति’ इत्यस्य आर्षत्वकल्पनमपि अनत्यन्तप्रयोजनम्. वस्तुतस्तु “**पुरा दक्षाध्वरे द्विजा**” इति इदम् उत्तरश्लोकएव अन्वेति. कौर्मे दक्षाध्वरकाले देवीकर्तृकशापस्य अनिरूपणात्. नच यज्ञे देहम् उत्सृजन्त्याः दाक्षायण्याः शापः सम्भवति इति वाच्यं, तस्मिन्पुराणे तथाकथायाअपि अभावात्. प्रत्युत यज्ञतो बहुतिथात् कालात् प्रागेव दाक्षायणीभावं परित्यज्य हिमगिरिगेहे तस्याः प्रादुर्भावस्य सिद्धेः. अतएव पञ्चदशाध्याये दक्षयज्ञे प्रवर्तमाने “**दक्षो यज्ञेन यजते पिता मे पूर्वजन्मनि**” (कूर्मपुरा.१।१५।३५) इत्यादिना देवीकर्तृके तद्यज्ञविनाशनवरप्रार्थने “**पूर्वजन्मनि पिता**” इति उच्यते. द्वादशाध्याये हिमाचलं प्रति देवीवाक्येष्वपि तथैव फलति. अतो न देवीशापेन दक्षाध्वरस्य सम्बन्धः. केचित्तु तत्र देवी शापस्य अश्रुतत्वात् पञ्चदशाध्यायोक्तरीत्या देवीशा = चण्डीश्वरेण पविना = वज्रेण निर्दग्धाः देवीशाभ्यां पार्वती-महेश्वराभ्यां अपविनिर्दग्धा वा इति अर्थम् आहुः तत्र न अस्माकं निर्बन्धः. “**पुरा दक्षाध्वरे**” इत्यस्य अन्वयस्तु उत्तरत्रैव तथाच ये द्विजाः तमसाविष्टचेतसः

सन्तः पुरा दक्षाध्वरे महादेवं निन्दन्ति अनिन्दन्. “**पुरि लुङ् चास्म**” (पाणि.सू.३।२।१२२) इति चाल्लट्. “**वसन्तीह पुराच्छात्रा**” (पाणि.सू.का.३।२।१२२) इत्यादिवत्. ते तस्मिन्काले वृथाधर्मं षोडशाध्यायाद्युक्तं कापालिकाचरणादिरूपनिष्फलधर्मं चरिष्यन्ति इति कौर्मवाक्यस्य अर्थः. यत्तदोः अध्याहारस्तु त्वयापि कल्प्यः. अन्यथा तन्निन्दाफलं धर्माचरणस्य वृथात्वम् इत्यस्य असिद्धेः. अतो न कोऽपि अस्मासु चोद्यावकाशः. अभ्युपेत्य दूषयन्ति **तत्र तादृशार्थक**... इत्यादिना **उत्तरखण्डे** इति. तत्र द्विचत्वारिंशेऽध्याये इति प्रागेव अदर्शाम. सहस्राक्षकारेण वक्ष्यमाणां कल्पितकिंवदन्तीं हृदि निधाय शङ्कन्ते **ननु न व्यासैः**... इति. **तस्मिन्** कायस्थे, इदं समाधानं “**तुष्यतु दुर्जनः**” (लौकि.न्या.सा.१८१) इति न्यायात्. वस्तुतस्तु सा व्यासकृतिरेव इति आशयः. अतएव सूते अनुवादकत्वाद् दोषः स्वयम् उच्यते. प्रक्षिप्तत्वाभिप्रायेतु स न संगच्छेत. ननु कथं व्यासकृतित्वनिश्चयः इति चेद्, दर्शनान्तरग्रन्थकारैः शङ्कराचार्यानुयायिभिः च उदाहृतत्वाद् इति अवधारय. तथाहि : सांख्यसूत्रभाष्ये प्रथमाध्याये “**विजातीयद्वैतापत्तिश्च**” (सां.सू.भा.१।२२) इति सूत्रव्याख्याने “**एभिश्च सूत्रैः ब्रह्ममीमांसासिद्धान्तो निराक्रियते इति भ्रमो न कर्तव्यः**” (   ) इत्यादि उक्त्वा उच्यते “**यत्तु वेदान्तिब्रुवाणाम् आधुनिकस्य मायावादस्य अत्र लिंगं दृश्यते तत् तेषामपि विज्ञानवाद्येकदेशितया युक्तमेव. ‘मायावादम् असच्छास्त्रं प्रच्छन्नं बौद्धम् उच्यते मयैव कथितं देवि! कलौ ब्राह्मणरूपिणा**’ (पद्मपुरा.६।२३६।७) इत्यादि पद्मपुराणस्थशिववाक्यपरम्पराभ्यः नतु तद् वेदान्तमतम् “ ‘**वेदार्थवन्महाशास्त्रं मायावादम् अवैदिकम्**’ **(पद्मपुरा.६।२३६।११) इति तद्वाक्यशेषादिति. मायावादिनो अत्र च न साक्षात्प्रतिवादित्वम्. ‘विजातीय’इति विशेषणवैयर्थ्यात्. मायावादे सजातीयद्वैतस्यापि अनभ्युपगमादिति. तस्माद् अत्र प्रकरणे विज्ञानवादिनां बन्धहेतुव्यवस्थैव साक्षाद् निराक्रियते. अनयैवच रीत्या नवीनानामपि प्रच्छन्नबौद्धानां मायावादिनाम् अविद्यामात्रस्य तुच्छस्य बन्धहेतुत्वं निराकृतं वेदितव्यम्**” (सां.सू.भा.१।२२) इति. नागोजीभट्टोऽपि मार्कण्डेयपुराणस्थसप्तशतीविवरणे त्रयोदशाध्याये “**ददतुः तौ बलिं चैव**” (मार्क.पुरा.१३।९) इत्यस्य व्याख्याने पुराणेषु क्वाचित्कतान्त्रिकांशे वैदिकानादरणीयताया

बोधकानि पराशरोपपुराणादिवचांसि कौर्मे प्रसिद्धं गौतमशप्तोपकाराय शिवकेशवाभ्यां मोहशास्त्राणां निर्माणञ्च उक्त्वा पाद्मे पार्वतीश्वरसंवादे **"शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमम्"** (पद्मपुरा.६।२३६।२) इत्यादीनि पूर्वोक्तानि उत्तरखण्डवचनानि अनूदितवान्. तत्र **"वेदार्थवन्महाशास्त्रं मायावादम् अवैदिकम् मयैव कल्पितं देवि जगतां नाशकारणाद्"** (पद्मपुरा.६।२३६।११) इत्यन्तं लिखित्वा अग्रे अनुपदम् **"अस्य पूर्वार्धे 'आश्रित्य' इति शेषः. न्यायवैशेषिकयोः सुखदुःखादिमत्त्वम् आत्मनः श्रुतिविरुद्धं, निरीश्वरता सांख्यमीमांसयोः श्रुतिविरुद्धेति तदंशे तेषाम् अप्रामाण्यम्. 'मायावादो नास्तिकानाम्'"** ( ) इत्यादिना तद्वचनं नास्तिकवादपरतया अन्यथा नीत्वा समाहितवान्. काशी-पुण्यग्रामादिस्थलेषु प्राचीनेषु विद्वत्पुस्तकेषु सर्वत्र अयं ग्रन्थो उपलभ्यतएव. एतावता तद्वचसां व्यासकृतत्वन्तु तदभिमतमेव. एवं प्रामाणिकग्रन्थान्तरेष्वपि स्थलविशेषे एषाम् उपन्यासो द्रष्टव्यः.

अथ अनुवादो निन्दा इति द्वितीयपक्षं दूषयन्ति **द्वितीयेतु इत्यादिना.** इत्थंकारं कौर्मवाराहादिष्वपि **"चकार मोहशास्त्राणि"**(कूर्मपुरा.१।१६।११८) **"त्वञ्च रुद्र! महाबाहो! मोहशास्त्राणि कारय"** (वारा.पुरा.७०।३६) इत्यादिकथनाद् विष्णवतारेष्वपि श्रीभागवतादौ **"वादैः विमोहयति यज्ञकृतो अतदर्हान्"** (भाग.पुरा.११।४।२२) इत्यादिकथनात् च तत्र - तत्र तादृशवाक्यप्रणेतरि व्यासे तदनुवादकसूतादौ तदुदाहारकेषु निबन्धकारेषु च **"निन्दन्ति च महादेवं... विनिन्दन्ति हृषीकेशम्"** (कूर्मपुरा.१।३०।२८-३०) इति कौर्मोक्तस्य लक्षणस्य दोषस्य वा प्रसक्तिः द्रष्टव्या.

> **(२) किञ्च "शिवो मोहनाय अवतीर्ण" इत्यादि कथनमात्रस्य न** धर्माचरणस्य वृथात्वं...त्रयी-तदर्थग्रहणायोग्यत्वं कथञ्चिद् ग्रहणेऽपि तत्फलानर्हत्वम् **इत्यादिधर्मसम्पादकत्वम्. तादृश निन्दाकर्तृत्वरहितेष्वपि वेद-विष्णुतद्भक्तनिन्दाकर्तृषु तत्तद्धर्मसंपत्तिदर्शनेन व्यभिचारापत्तेः. स्वाव्यवहितोत्तरत्वस्य**

कार्यतावच्छेदकधर्मघटकतया निवेशेन तृणारणिमणिन्यायेन (लौकि.न्या.सा.४३३) कार्यतावच्छेदकवैजात्यकल्पनेन वा व्यभिचारवारणेऽपि त्वयापि एतत्कुत्सापरौ अस्मदीयौ श्लोकौ **(द्र.सहस्रा.२।पृ.५६) इत्यादिना निन्दायाः कृतत्वेन विष्णुभक्तनिन्दानिष्ठजनकतानिरूपित- जन्यतावच्छेदकवैजात्याक्रान्ततत्तद्धर्माणां त्वयि उत्पत्तेः दुर्वारत्वमेव इत्यपि विभावनीयम् .**

(३) किञ्च शिव इत्यादि. ‘**कथनमात्रस्य**’ इति पदं ... ‘**सम्पादकत्वम्**’ इति अग्रिमेण अन्वेति. ‘**ने**’ति निषेधोऽपि तत्रैव अन्वेति. अत्र ‘**मात्र**’ पदम् अवधारणार्थं विष्णवादिदेवविषयकं तथाकथनं व्यवच्छिनत्ति. “**मात्रं कार्त्स्न्ये अवधारणे**” (अम.को.३।३।१७७) इति अमरः. **तत्तद्धर्मः** इति, व्यर्थीभूतपुण्यत्व-त्रयीबाह्यत्व-तत्फलानर्हत्वादिधर्माणां संपत्तेः निश्चयेन इति अर्थः. **व्यभिचारापत्ते** इति गौतमपञ्चलक्षण्यां प्रथमाध्यायद्वितीयाह्निके “**अनैकान्तिकः सव्यभिचारः**” (गौ.न्या.सू.१।२।४६) इति सूत्रस्य भाष्ये “**व्यभिचारः एकत्र अव्यवस्था**” (गौ.न्या.सू.भा.१।२।४६) इति वात्स्यायनः. तत्रापि अयं व्यतिरेकव्यभिचारः, कारणे कार्यसमानाधिकरणात्यन्ताभावप्रतियोगित्वात्. तथाच व्यतिरेकव्यभिचारज्ञानरूपप्रतिबन्धकसत्त्वाद् नियतान्वयव्यतिरेकसहचारनिश्चयरूपकारणासम्भवेन तादृशकथनेन धर्माचरणवृथात्वादिनिरूपितकारणतासिद्धिः इति भावः. वस्तुतस्तु तादृशकथनशालिष्वपि व्यासादिषु पूर्वोक्ततत्तद्धर्मासम्पत्तिनिश्चयेन कार्ये कारणसमानाधिकरणात्यन्ताभावप्रतियोगित्वाद् अन्वयव्यभिचारोऽपि अग्रे सूचयिष्यते.

पूर्वपक्षिमतेन व्यतिरेकव्यभिचारमात्रस्य वारणम् अनूद्य दूषणान्तरम् आहुः **स्वाव्यवहितोत्तरत्वस्य** इत्यादिना. **निवेशेन** इति, यथा अनुमितित्वेन च कार्यकारणभावेऽपि धूमावगाहिपरामर्शजन्यवह्निविधेयकानुमितिस्थले वह्निव्याप्यालोकवान् इति परामर्शाभावाद् व्यभिचारः. एवम् आलोकावगाहिपरामर्शजन्यवह्निसाध्यकानुमितिस्थले धूमविषयकतदभावाद् व्यभिचारः. तद्वारणाय कार्यतावच्छेदककोटौ स्वाव्यवहितोत्तरत्वं निवेशयन्ति. स्वं कारणम् .

स्वाव्यवहितोत्तरत्वसम्बन्धेन धूमावगाहिपरामर्शविशिष्टवह्निसाध्यकानुमितित्वावच्छिन्नं प्रति तादृशपरामर्शएव कारणम्. तेन संसर्गेण आलोकविषयकपरामर्शविशिष्टतादृशानुमितित्वावच्छिन्नं प्रति तद्विषयकः सएव कारणमिति न व्यभिचारः. तथा अत्रापि स्वाव्यवहितोत्तरसम्बन्धेन शिवनिन्दाविशिष्टत्रयीबाह्यत्वादीन् प्रति तन्निन्दा हेतुः. तेन संसर्गेण विष्णुनिन्दाविशिष्टतद्धर्मान् प्रति सा हेतुरिति न व्यभिचारः. स्वाव्यवहितोत्तरत्वविशिष्टत्रयीबाह्यत्वादेरेव कार्यतावच्छेदकधर्मत्वात् तत्तद्घटकतया तस्य निवेशः. **तृणारणिमणिन्यायेन** इति, यथा तृणं मणिः अरणिः च इति एकैकमपि वह्निं प्रति कारणम्, इतरासमवधानदशायामपि कार्योत्पत्तेः. नतु काव्यहेतुतया उक्तानां कवित्वबीजभूतसंस्कारविशेषलोकशास्त्रकाव्याद्यवेक्षणजन्यनिपुणताकाव्यज्ञ-शिक्षापूर्वकाभ्यासानामिव त्रितयपर्याप्तसमुदायत्वं तत्र कार्योत्पत्तिप्रयोजकतावच्छेदकम्. स्पष्टञ्च इदं प्रथमाकारके व्युत्पत्तिवादे. तथा अत्र त्रयीबाह्यत्वादितत्तद्धर्मत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकं शिवनिन्दात्वादिकं स्वतन्त्रमेव नतु शिवनिन्दाविष्णुनिन्दादिघटितसमुदायत्वं कारणतावच्छेदकमिति न व्यभिचारः. **कार्यतावच्छेदकवैजात्यकल्पनेन** इति यथा अवयवचिन्तामणौ “**पञ्चावयवाद् विजातीयं शाब्दज्ञानमेव उत्पद्यतइति तद्धीजनकवाक्यत्वं न्यायत्वम्**” (चिन्ता.अव.प्रक.). *एवं प्रतिज्ञाद्यवयवादेरपि प्रत्येकं विजातीयं शाब्दज्ञानमिति तद्धीजनकशब्दत्वमेव तल्लक्षणम्* इति केषाञ्चिन्मतम् अनूदितम्. अत्र प्रतिज्ञादिनिष्ठजनकतानिरूपितजन्यतावच्छेदिका तत्तच्छाब्दबोधवृत्तिः विलक्षणैव जातिः स्वीक्रियतइति प्रतिज्ञाजन्यशाब्दबोधवृत्तिजातेः हेतुजन्यशाब्दबोधे तज्जन्यशाब्दधीवृत्तिजातेः प्रतिज्ञाजन्यबोधे च अभावात् परस्परात्यन्ताभावसमानाधिकरणतया न व्यभिचारः. तथा अत्र शिवनिन्दाजन्यत्रयीबाह्यत्वादिनिष्ठा विष्णुनिन्दादिजन्यत्रयीबाह्च्यत्वादितत्तद्धर्मनिष्ठा जातयश्च परस्परविलक्षणाएवेति कार्यतावच्छेदकवैजात्याद् न व्यभिचारः. वस्तुतस्तु “**तद् न, ज्ञानविशेषजनकत्वं तज्ज्ञानजनकत्वं वा न्याये प्रतिज्ञादौ अनतिप्रसक्तम् अनुगतरूपमन्तरेण दुर्निरूपम् तत्स्वीकारे तस्यैव लक्षणत्वाद् अन्यथा जातिसंकरप्रसंगम्**” (चिन्ता.अव.-प्रक.) इति वदता चिन्तामणिकृतैव तथाकल्पनं निरस्तम्. तथा प्रकृतेऽपि शक्यं निरसितुम्. तथाहि : जनकतावच्छेदकस्य निन्दात्वस्य एक्येन

त्रयीबाह्यत्वादिनिष्ठजन्यतावच्छेदकजातीनां नानात्वं न शक्यं प्रतिपत्तुम्. नच शिवसम्बन्धादिविशिष्टनिन्दात्वस्य अवच्छेदकत्वाद् अदोषः, विशिष्टनिन्दात्वे शुद्धनिन्दात्वानतिरेकात्. “**विशिष्टं शुद्धाद् न अतिरिच्यते**” (न्या.मु.प्रभा.अनु.६८) इति न्यायात्. अथापि जातिसंकरो दुर्निवारएव. शिवाद्येकैकनिन्दाजन्यत्रयीबाह्यत्वादितत्तद्धर्मनिष्ठजन्यतावच्छेदकजातीनां परस्परासमानाधिकरणानां शिवविष्णुवेदतद्भक्तादिसमुदायनिन्दाजन्यत्रयीबाह्यत्वादौ सर्वासां संकरापत्तेः. एवं शिवविष्ण्वादिद्वित्रादिनिन्दाजन्यतत्तद्धर्मे द्वित्रादिजातीनां सांकर्यम्. नच एकैकनिन्दासमुदायनिन्दाजन्यतत्तद्धर्मेषु जन्यतावच्छेदकजातीनां नानात्वकल्पनाद् न संकरावकाशः इति वाच्यं, समुदायनिन्दाजन्यतद्धर्मवृत्तेः शिवनिन्दानिरूपितजन्यतावच्छेदकजातेः विष्णुनिन्दानिरूपितजन्यतावच्छेदकतया विष्णुनिन्दानिरूपितजन्यतावच्छेदकजातेः शिवनिन्दादिनिरूपितजन्यतावच्छेदकतया च तत्तन्निन्दात्वेन तन्निरूपितजन्यतावच्छेदकजात्यवच्छिन्नतत्तद्धर्मत्वेन अभिमतस्य कार्यकारणभावस्य व्यभिचारेण भंगप्रसंगात्. उभयादिजन्यत्रयीबाह्यत्वादिधर्मे तत्तज्जात्यभावनिर्वाहकप्रतिबध्यप्रतिबन्धकभावकल्पने महागौरवात्. इतरदपि तत्र शिरोमणिगदाधरभट्टाचार्याद्युक्तं प्रकृते यथासम्भवम् अवगन्तव्यम्. तस्मात् पूर्वपक्षिणः कुशकाशावलम्बनमेव एतत्. एतत्कुत्सापरौ अस्मदीयौ श्लोकौ (द्र.सहस्रा.२।पृ.५६) इत्यादिना इति. इदं सहस्राक्षे द्वितीयभागारम्भे अस्ति. तत्रहि आत्तात्मार्थमनःसमर्पणपथा हर्तुं परस्त्रीधनम् इत्यादि श्लोकद्वयेन विष्णुभक्तेषु अविद्यमानदोषकथनरूपा निन्दा व्यधायि. वैजात्यकल्पनम् अभ्युपेत्य आहुः **विष्णुभक्तनिन्दा...** इत्यादि. कौर्मएव पूर्वखण्डे सप्तविंशे अध्याये भृग्वादीन् प्रति श्रीकृष्णः “**ये मां जनाः संस्मरन्ति कलौ सकृदपि प्रभुं तेषां नश्यति तत्पापं भक्तानां पुरुषोत्तमे**” (कूर्मपुरा.१।२७।१०) इत्यादिना वैष्णवान् प्रशस्य “**परात् परतरं यान्ति नारायणपरायणाः**” (कूर्मपुरा.१।२७।१३) इति तेषाम् अक्षरातीतवस्तुप्राप्तिलक्षणं मोक्षम् अभिधाय वैष्णवशिरोरत्ने गंगाधरे स्वाभिन्ने द्वेषवतां वैष्णवानामपि दुष्फलम् उक्त्वा “**तस्मात् सम्परिहर्तव्या निन्दा पशुपतौ द्विजाः. कर्मणा मनसा वाचा मद्भक्तेष्वपि यत्नतः**” (कूर्मपुरा.१।२७।१६) इति शिवनिन्दावद् वैष्णवनिन्दायापि कर्मणा मनसा वाचा यत्नतः सम्यक् परिहर्तव्यत्वं वक्ति. अनुपदमेव अग्रे “**ये च**

दक्षाध्वरे शप्ता दधीचेन द्विजोत्तमाः भविष्यन्ति कलौ भक्तैः परिहार्याः प्रयत्नतः" (कूर्मपुरा.१।२७।१७) इति त्वादृशप्रच्छन्नकापालिकादीनां वैष्णवैः प्रयत्नतः परिहरणीयत्वं बोधयति. तत्रैव त्रिंशे अर्जुनं प्रति व्यासः "**कुर्वन्ति च अवताराणि ब्राह्मणानां कुलेषु वै**" (कूर्मपुरा.१।३०।२७) इत्यादिना दक्षाध्वरे शिवं निन्दितवताम् अवतरणं वृथाधर्माचरणं च उक्त्वा "**विनिन्दन्ति हृषीकेशं ब्राह्मणान् ब्रह्मवादिनः. वेदबाह्यव्रताचाराः दुराचाराः वृथाश्रमाः**" (कूर्मपुरा.१।३०।३०-३१) इत्यादि आह. त्वद्रीत्या च इदमपि शप्तानां लक्षणमेव. तेन वृथाश्रमसम्पन्ने हृषीकेशनिन्दके ब्रह्मवादितद्भक्तनिन्दके च त्वयि शप्तत्वनिश्चयेन त्वदुक्तयुक्त्या त्वयिएव त्रयीबाह्यत्वादितत्तद्धर्मापत्तिः निश्चला अतो युक्तमेव उक्तं **दुर्वारत्वमेव** इति.

> **(२) अस्माभिः न शिवनिन्दा क्रियते किन्तु प्रसंगागतानां तादृशवचनानाम् अनुवादमात्रम्. सूत-वैशम्पायनादीनामपि अनुवादकत्वप्रयुक्त-तादृशधर्मवत्त्वापत्तिभिया अनुवादस्य त्रयीबाह्यत्वादिधर्माहेतुतायाः त्वयापि अंगीकरणीयत्वात्.**

(३) अस्माभिः इत्यादि अविद्यमानदोषकथनएव निन्दात्वस्य त्वयापि अंगीकृतत्वेन अस्माभिस्तु पुराणोक्तस्यैव अनूदितत्वेन च मा अस्मासु शिवनिन्दानिरूपितकार्यत्वेन अभिमतधर्माणां सङ्क्रान्तिः. अन्यथा व्यास-सूतप्रभृतिष्वपि तथाकथनशालितया तत्तद्धर्मसङ्क्रान्तिः दुर्वारा स्यात्. साच तवापि अनिष्टा इति भावः. अत्र इदं बोध्यं : परोक्तम् अभ्युपेत्य इह व्यभिचारादिकम् उक्तम्. धर्माचरणवृथात्वादौ तेन मानतया अवलम्बितानां कौर्मवचसां विचारेतु तदुक्तं सकलं जले विलेखनकौशलदेशीयमेव. तथाहि : वृथात्वे मानं "**वृथा धर्मं चरिष्यन्ति**" (कूर्मपुरा.१।३०।२८) इति वाक्यमेव त्वया अभिप्रेयते. वस्तुतस्तु तत्र "तेषां वृथा भवेद् धर्मः" इत्यादि कथनाभावाद् यथाश्रुतपाठे तदाचरितधर्मोद्देश्यकवृथात्वविधेयकशाब्दबोधानुदयात् पूर्वोक्तएव तस्य वाक्यस्य अर्थः इति न किञ्चिद् एतत्. यच्च कलिभुवां शिवनिन्दायाः फलं त्रयीबाह्यत्वमिति दधीचवचनबलाद्

दर्शितं तदेव “मोहयन्ति जनान्” इति वाक्यस्य विषयः. “**निन्दन्ति च महादेवम्**” (कूर्मपुरा.१।३०।२८) इत्यस्य त्रिंशे सत्त्वेन “**भविष्यन्ति त्रयीबाह्याः**” (कूर्मपुरा.१।१५।२९) इत्यस्य च पञ्चदशे सत्त्वेन तयोः परस्परसम्बन्धगन्धस्यापि अभावात्. ननु मा अस्तु अनयोः सम्बन्धः परं पञ्चदशाध्यायेऽपि इदं तन्निन्दाफलमेव पठ्यते इति चेत्, सत्यम् परन्तु; यज्ञकाले साक्षात् शिवे देव्यां च वेदाप्रतिपाद्यत्वलक्षणाविद्यमानदोषारोपणरूपायाः दक्षादिभिः कृतायाः निन्दायाएव फलं तत् पठ्यते नतु पाद्मादिवचनानुवादस्य. नापि तस्मिन् अध्याये कलौ शप्ता अवतीर्य शिवं निन्दिष्यन्ति निन्दातश्च त्रयीबाह्याः भविष्यन्तीति निरूप्यते. तत्रहि “**सर्वेष्वेव हि यज्ञेषु न भागः परिकल्पितः न मन्त्राः भार्यया सार्धं शङ्करस्य इति न इज्यते**” (कूर्मपुरा.१।१५।८) “**नहि अयं शङ्करो रुद्रः संहर्ता तामसो हरः नग्नः कपाली विदितो विश्वात्मा न उपपद्यते**” (कूर्मपुरा.१।१५।११) इत्यादिरूपायां निन्दायां दक्षेण कृतायां “‘**बाढम्’ इति उक्त्या मुनिभिः देवैश्च सा स्वीकृता**” (कूर्मपुरा.१।१५।१८) इत्यादि वर्णयित्वा उच्यते “**पुनः प्राह च तं दक्षं दधीचो भगवान् ऋषिः सम्प्रेक्ष्य ऋषिगणान् देवान् सर्वान् वै रुद्रविद्विषः**” (कूर्मपुरा.१।१५।२५) इति. ततः काञ्चिद् उक्तिम् अनूद्य पुनः अभिधीयते “**एवम् उक्त्वा स विप्रर्षिः शशाप ईश्वरविद्विषः समागतान् ब्राह्मणान् तान् दक्षसाहाय्यकारिणः. ‘यस्माद् बहिष्कृतो वेदाद् भवद्भिः परमेश्वरः. विनिन्दितो महादेवः शङ्करो लोकवन्दितः भविष्यन्ति त्रयीबाह्याः सर्वेऽपि ईश्वरविद्विषः निन्दन्ति इह ऐश्वरं मार्गं कुशास्त्रासक्तचेतसः’**” (कूर्मपुरा.१।१५।२८-३०) इत्यादि. अत्र यस्माद् बहिष्कृतो विनिन्दितः इति क्तान्तप्रयोगेण तत्कालकृतस्य अविद्यमानदोषकीर्तनस्यैव तत्फलम् इति निश्चाय्यते. यच्च तत्रापि ईश्वरविद्विषः...इत्यादिना एको हेतुः लक्षणं च उक्तम् इति अजल्पि तदपि न विद्वदादरणीयं, शतृवत् क्विपो अलळणहेत्वोः विधानस्य अभावात्. वचनेतु ‘**ईश्वरविद्विषः**’ इतिपदम् उद्देश्यबोधकं, “**सम्प्रेक्ष्य ऋषिगणान् देवान् सर्वान् वै रुद्रविद्विषः**” (कूर्मपुरा.१।१५।२५) इति “**शशाप ईश्वरविद्विषः**” इति च पूर्ववचनबलेन तथैव निश्चयात्. तथाच “**यस्मात् परमेश्वरो भवद्भिः वेदाद् बहिष्कृतो**”, “**न**

मन्त्रा भार्यया सार्धम्" (कूर्मपुरा.१।१५।२९, १।१५।८) इत्यादिना. अतो भवन्तएव त्रयीबाह्याः कापालिकादिमतानुयायिनो भविष्यन्ति इत्येव तदर्थः. अधिकन्तु मूले वक्ष्यते. एतेन त्रयीबाह्यत्वं नाम त्रयी-तदर्थग्रहणायोग्यत्वं कथञ्चित् तद्ग्रहणेऽपि तत्फलानर्हत्वं च मूर्खत्वात् शूद्रवद् अनधिकारात् च इति तस्य कपोलकल्पनामात्रमूलकम् अकाण्डताण्डवम् अपास्तम्. अत्र त्रयी-तदर्थयोः उभयोः ग्रहणायोग्यत्वे कथञ्चिद् ग्रहणेऽपि तयोः फलानर्हत्वे वा '**शूद्रवद्**' इति दृष्टान्तोपन्यासस्तु तस्यैव शास्त्रार्थापरिज्ञानम् अवगमयति. शूद्रस्य त्रयीग्रहणायोग्यत्वेऽपि पुराणादिद्वारा तदर्थग्रहणे योग्यत्वात्. अतएव बृहत्पराशरः "**कपिलाक्षीरपानेन ब्राह्मणीगमनेन च वेदाक्षरविचारेण शूद्रःपतति जातितः**" (परा.स्मृ.१।६७) इति '**अक्षर**'पदाद् आनुपूर्वीविचारस्यैव प्रतिषेधं गमयति. '**जातितः**' इत्यत्र '**तत्क्षणाद्**' इत्यपि पाठान्तरम्. श्रीभागवतादिष्वपि "**स्त्री-शूद्र-द्विजबन्धूनां त्रयी न श्रुतिगोचरा कर्मश्रेयसि मूढानां श्रेय एवं भवेद् इह इति भारतम् आख्यानं कृपया मुनिना कृतम्**" (भाग.पुरा.१।४।२४-२५) इति "**भारतव्यपदेशेनहि आम्नायार्थश्च दर्शितः**" (भाग.पुरा.१।४।२९) इतिच उच्यते. भारतादिषु "**श्रावयेत् चतुरो वर्णान् कृत्वा ब्राह्मणम् अग्रतः**" (महाभा.१२।३१४।४५) इति शूद्रस्यापि श्रावणम् अभिधीयते. स्मृतिकौमुद्यां स्कान्दे "**अस्ति शूद्रस्य शुश्रूषा पुराणेनैव वेदनम्. वदन्ति केचिद् विद्वांसः स्त्रीणां शूद्रसमानताम्. सिद्धान्तश्रवणं प्राहुः द्विजानां मुनिसत्तम! शूद्राणां च विरक्तानां तथा स्त्रीणां महामुने!**" (   ) "**सिद्धान्तश्रवणं प्रोक्तं पुराणश्रवणं बुधैः**" (यो.याज्ञ.२।१०) इति. एकादशस्कन्धेऽपि "**साधवे शुचये ब्रूयाद् भक्तिः स्यात् शूद्रयोषिताम्**" (भाग.पुरा.११।२९।३१) इति भगवद्वाक्यम्. श्रवणाध्ययनार्थप्रतिषेधोक्तिस्तु आनुपूर्वीपूर्वकार्थाभिप्रायाः, श्रवणादेः साहचर्यात् क्रमस्वारस्यात् च. नच प्रकृतेऽपि तादृशार्थग्रहणमेव विवक्ष्यत इति वाच्यं; तथा अर्थग्रहणायोग्यत्वमपि वेदबाह्यत्वम् इति आपत्त्या शूद्रस्य तद्बाह्यत्वापातात्. नच इष्टापत्तिः, "**न वेदबाह्ये पुरुषे धर्मलेशोऽपि शङ्कर! संगच्छते महादेव! धर्मो वेदाद् विनिर्बभौ**" (कूर्मपुरा.१।१६।११५) इति कौर्मपूर्वखण्डषोडशाध्यायादिवचोभिः सर्वथा निर्धर्मकत्वप्रसंगात्. तथासति निर्णयसिन्धुप्रथमपरिच्छेदाद्युदाहृतानां "**शूद्रो**

वर्णः चतुर्थोऽपि वर्णत्वाद् धर्मम् अर्हति” (नि.सिं.१।व्रत) इत्यादि व्यासादिवचसां व्याकोपात्. प्रकाशेतु पुराणादेः साकल्येन पठनस्यैव प्रतिषेधो नतु तद्द्वारा अर्थज्ञानस्य इति दिक्. विशेषस्तु मदीये सत्सिद्धान्तमार्तण्डे प्रथमाष्टके “**किं वर्णनिष्ठः ?**” (प्रश्नः.६) इत्यस्य उत्तरे तृतीयाष्टके “**शूद्राः चेद् उपदेश्या**” इत्यस्य उत्तरे च द्रष्टव्यः.

प्रकृतम् अनुसरामः. यच्च श्रीभागवतचतुर्थस्कन्धद्वितीयाध्यायस्थं “**य एतन् मर्त्यम् उद्दिश्य**” (भाग.पुरा.४।२।२१) इति वचनम् उदाहृतं तत्र ब्रूमः. तस्मिन्नेव अध्याये पठितेषु “**भवव्रतधरा येच...विशन्तु शिवदीक्षायां...विगर्ह्य यात पाखण्डं दैवं वो यत्र भूतराड्**” (भाग.पुरा.४।२।२८-३२) इत्यादिवचनेषु ‘**भव**’-‘**शिवा**’दिपदेन शङ्कराचार्याः गृह्यन्ते न वा. आद्ये “**स दीक्षया आचार्यमूर्तिस्थः**” ( ) इत्यादिवचनानुरोधात् तद्दीक्षाधरस्य तव पाखण्डित्वाद्यापत्तिः. ननु प्रकरणबलाद् ‘भवा’दिशब्दानां साक्षात् शिवपरतया न तत्र शङ्कराचार्याणां सम्बन्धो अतो न दोषः इति चेद्, युक्तमेव. तर्हि “**य एतद्**” (भाग.पुरा.४।२।२१) इति वाक्यमपि साक्षात् शिवपरमेव इति संतुष्येः. तत्रहि “**अयन्तु लोकपालानाम्**” (भाग.पुरा.४।२।१०) इत्यादिना दक्षेण कृतां शिवनिन्दां पार्वतीसम्बन्धायोग्यत्व-श्मशानवास-नग्नत्वादिलक्षणम् अनूद्य “**विनिन्द्यैवं सगिरिशम् अप्रतीपम् अवस्थितम्**” (भाग.पुरा.४।२।१७) इत्यादिना निन्दाश्रवणेऽपि शिवस्य अप्रतिद्रोहं दक्षकर्तृकं शापविसर्जनं च निरूप्य ततो रोषकषायितेन नन्दीश्वरेण कृतः प्रथमं दक्षाय शापविसर्गः पठ्यते “**य एतद् मर्त्यम् उद्दिश्य**” (भाग.पुरा.४।२।२१) इत्यादिभिः सार्धैः त्रिभिः श्लोकैः. यच्च स्वाभिमतत्रयीबाह्यत्वसमर्थनार्थं तत्त्वन्तु वेदार्थएव इति व्याख्यातं तदपि मोहनमात्रम्. तत्र ‘तत्त्व’शब्दस्य उत्तरकाण्डार्थब्रह्मतत्त्वपरत्वात्. अतएव अनुपदं “**गृहेषु कूटधर्मेषु सक्तो ग्राम्यसुखेच्छया कर्मतन्त्रं वितनुते वेदवादविपक्वधीः/विपन्नधीः बुद्ध्या पराभिध्यायिन्या विस्मृतात्मगतिः पशुः स्त्रीकामः सो अस्तु अतितरां दक्षो बस्तमुखो अचिरात्. विद्याबुद्धिः**

अविद्यायां कर्ममय्याम् असौ जडः'' (भाग.पुरा.४।२।२२-२४) इति केवलपूर्वकाण्डार्थे सकामतया प्रवृत्तिः उच्यते. अग्रे तदनुसारिणामपि पुष्पितवेदवाचा चित्तोन्मथनं वर्ण्यते. तस्माद् अत्रत्यं तत्त्वतो वैमुख्यं न त्रयीबाह्यत्वरूपम्. अतएव अत्र **''तत्त्वतः परमार्थाद्''** (भाग.पुरा.श्रीध.४।२।२१) इति श्रीधरस्वामी. **''य एतद् मर्त्यम्''** (भाग.पुरा.४।२।२१) इत्यस्य स्पष्टतया दक्षमात्रपरत्वं प्रतीयतइति तस्य सर्वसाधारणत्वावधारणमपि विचारणवारणकारणकम्. अस्माकन्तु शुद्धाद्वैतावलम्बितया क्वापि द्वेषस्य अनवसरात् कुतस्तरां महेश्वरावतारेषु शङ्कराचार्येषु तस्य सम्भावनापि. खण्डनादिकन्तु कापिलमतखण्डनादिवद् न दोषायेति दर्शितं प्राग् दर्शयिष्यते च पुरतः.

(१) [ऐश्वरमार्गश्च अत्र ईशसम्मत-श्रुत्यर्थ-वर्णनरूपएव, तन्निन्दयैव त्रयीबाह्यतायाः युक्तत्वाद्, ''यो यं निन्दति स तद्द्वेष्यो भवति'' इति न्यायानुकूल्यात्. अस्य वाक्यस्यापि कौर्मस्थत्वेन उक्तविध-शङ्करनिष्ठोपदेष्टृत्वबोधक-कौर्मवाक्यैः प्रत्यासत्त्या अत्रापि शिवनिन्दायाः प्रसंगेनच उक्तविधमार्गग्रहणस्यैव युक्तत्वात् च. ईश्वरसम्मत-मार्ग-निन्दापि त्रय्यनधिकारस्य हेतुः लक्षणञ्च. शप्तानान्तु इदं तृतीयं लक्षणम्.]

(२) ईश्वरसम्मतमार्गनिन्दा तृतीयं लक्षणम्. सापि विप्रशप्तत्वरूप-लक्ष्यताऽवच्छेदक-समनियता न भवति. रुद्रयामलादिषु उक्तत्वेन ईश्वरसम्मतस्य वाममार्गादेः निन्दाया वैदिकैः दक्षिणमार्गस्थैः क्रियमाणत्वेन विप्रशप्तत्वरूप-लक्ष्यतावच्छेदक-निष्ठावच्छेदकताक-भेदवत्त्वेन निश्चितेषु तेषु अतिव्याप्तत्वात्. एतेन ईश्वरसम्मतमार्गनिन्दायाः त्रय्यनधिकारहेतुत्वं लक्षणत्वं च इत्यादि प्रलापो व्यपास्तः. दक्षिणमार्गस्थानां वैदिकानां त्रय्यधिकारस्य सर्वसम्मतत्वात्.

(३) सहस्राक्षे ऐश्वरमार्गश्च अत्र इत्यादिना तृतीयं लक्षणम् इत्यन्तेन उक्तं तृतीयं लक्षणं खण्डयन्ति **ईश्वरसम्मतमार्गनिन्दा** इत्यादिना **अतिव्याप्त्यादिदोषग्रस्तत्वाद्** (पृ.११३) इत्यन्तेन. कौर्मवचने **''ऐश्वरं मार्गम्''** (कूर्मपुरा.१।१५।३०) इत्यत्र 'ऐश्वर' पदघटक-'इश्वर'पदेन साक्षाद्विरूपाक्षो विवक्ष्यते उताहो शङ्कराचार्याएव ? तत्र आद्यं दूषयन्ति **रुद्रयामलादिषु** इत्यादिना. अत्र **'आदि'** शब्दः प्रकारवचनः सजातीयानि तन्त्रान्तराणि पाशुपतशास्त्रप्रभृतीनिच संगृह्णाति. तत्र पाशुपतशास्त्रं नाम भगवता पशुपतिना पशुपाशविमोक्षणाय **''अथ अतः पाशुपतयोगविधिं व्याख्यास्यामः''** (पाशु.सू.१।१) इत्यादिना पञ्चाध्यायात्मकं प्रणीतम्. तत्र प्रथमे अध्याये कार्यरूपो जीवः पशुः, द्वितीये कारणः पशुपतिः ईश्वरः, तृतीये योगः पशुपतौ चित्तसमाधानम्, तुरीये विधिः भस्मना त्रिषवणस्नानादिः, पञ्चमे दुःखान्तसंज्ञको मोक्षः च तत्फलत्वेन निरूपितः. अतएव तस्य पञ्चाध्यायाः क्रमात् 'कार्य'[१]-'कारण'[२]-'योग'[३]-'विधि'[४]-'दुःखान्ता'[५]-ख्याः उच्यन्ते. अस्य शिवकर्तृकत्वं **''उमापतिः भूतपतिः श्रीकण्ठो ब्रह्मणः सुतः ऊचिवान्/उक्तवान् इदम् अव्यग्रो ज्ञानं पाशुपतं शिवः''** (महाभा.१२।३३८।-६२) इति मोक्षधर्मादावपि प्रसिद्धम्. तन्त्राणि च चतुःषष्टिः अत्यन्तविस्तरवन्ति सन्ति विशेषतो मोहनानि. तन्त्रार्थसंक्षेपस्तु व्युत्पादनाय प्रसंगात् प्रदर्श्यते. तत्र १. महामायाशम्बरं तन्त्रम्, अन्यस्मिन् पदार्थे अन्यथाप्रतिभानरूपमायाप्रपञ्चरचनोपायप्रतिपादकम् ऐन्द्रजालकविद्यारूपम्. २. योगिनीजालशम्बरतन्त्रं योगिनीजालदर्शनोपायप्रतिपादकम्. ३. तत्त्वतन्त्रम् इन्द्रजाल - विद्याविशेषः पृथिव्यादितत्त्वानाम् अन्यत्र अन्यबोधोपायप्रतिपादकम्. ४. सिद्धभैरवतन्त्रम्. ५. मायिकभैरवतन्त्रम्. ६. कंकालभैरवतन्त्रम्. ७. कालाग्निभैरवतन्त्रम्. ८. शक्तिभैरवतन्त्रम्. ९. योगिनीभैरवतन्त्रम्. १०. महाभैरवतन्त्रम्. ११. भैरवनाथतन्त्रम्. १२. भैरवाष्टकम् इदं कापालिकमतप्रतिपादकम्.

बहुरूपा शक्तिः तत्प्रतिपादकतन्त्राणां गणो बहुरूपाष्टकम्. यथा १. ब्रह्माणीतन्त्रम् इदमेव ब्राह्मीतन्त्रम्. २. माहेश्वरीतन्त्रम्. ३. कौमारीतन्त्रम्. ४. वैष्णवीतन्त्रम्. ५. वाराहीतन्त्रम्. ६. इन्द्राणीतन्त्रम्. ७. चामुण्डातन्त्रम्.

८. शिवदूतीतन्त्रं च इति. ब्राह्म्याद्यष्टकम् इदं प्राधान्येन तत्तद्देवताप्रतिपादकम्.

यामलानाम सिद्धान्तप्रतिपादकानि तन्त्राणि रुद्रयामलादीनि अष्टौ यथा १. रुद्रयामलम्. २. भैरवयामलम्. ३. शिवयामलम्. ४. विष्णुयामलम्. ५. स्कन्दयामलम्. ६. ब्रह्मयामलम्. ७. देवीयामलम्. ८. यामलम्. शाक्ततन्त्रतया चतुःषष्टितन्त्राणामपि यामलतया व्यवहारः. अतएव मूले **रुद्रयामलादिषु** इति प्राधान्येन तस्य निर्देशः.

१. चन्द्रज्ञानतन्त्रं कामेश्वर्यादिषोडशनित्याप्रतिपादकं कापालिकमतदर्शकं च. तिथिनामधेयं 'नित्या'इति. २. मालिनीतन्त्रं समुद्रयानोपायप्रतिपादकम्. ३. महासम्मोहनं तन्त्रं जाग्रतामपि निद्रितोपायप्रतिपादकम्. ४. वामजुष्टं वामकेश्वरं तन्त्रं चतुःशति इत्यपि कथ्यते. ५. महादेवतन्त्रं बटुकादिसिद्धकुलाचारप्रदर्शकम्.

१. वातुलम्. २. वातुलोत्तरम्. ३. कामिकं च इति त्रीणि एतानि तन्त्राणि क्षेत्रकर्षणादिविधिप्रतिपादकानि.

१. हृद्भेदतन्त्रं कापालिकाचारप्रदर्शकम्, तन्त्रभेदः गुह्यतन्त्रयोः. प्रकाशं रहस्यं वा परकृतमन्त्रतन्त्रप्रयोगाणां परावृत्त्युपायाः प्रदर्शिताः. २. कलावादं कामशास्त्रं वात्स्यायनादिमतम्. ३. कलासारं रूपादिवृद्ध्युपायप्रतिपादकम्. ४. कुण्डिकामतं गुटिकासिद्धिप्रदर्शकं, गुटिकापानपात्रम्. ५. मतोत्तरतन्त्रं रससिद्धिप्रकाशम्. ६. वीणातन्त्रं, 'वीणा'नाम योगिनी सम्भोगयक्षिणि इत्यस्य नामान्तरम् तस्याः साधनोपायप्रदर्शकम्. ७. त्रोतलतन्त्रं गुटिकाञ्जनपादुकासिद्धिप्रतिपादकम् त्रोतलोत्तरतन्त्रे चतुःषष्टिसहस्रयोगिनीनां दर्शनोपायः. ८. पञ्चामृततन्त्रं पृथिव्यादिपञ्चभूतानां साधनेन मरणाभावप्रतिपादकं कापालिकतन्त्रम्. ९. रूपभेदादिपञ्चतन्त्राणि उच्चाटनादिप्रतिपादकानि... १०. सर्वज्ञानादितन्त्रपञ्चकं कापालिकसिद्धान्तैकदेशिदिगम्बरमताचारप्रदर्शकम्.... १-८. पूर्वतन्त्रादिदेवीमतपर्यन्तं तन्त्राष्टकं दिगम्बरैकदेशि-क्षपणकमताचारप्रदर्शकम्....(६४).

एवम् एतानि सर्वाण्यपि त्रयीनिष्ठैः नितरां हेयानि.

एषां सर्वेषाम् ईश्वरकर्तृकत्वन्तु प्रायेण तेषु - तेषु तन्त्रभागेषु तत्र - तत्र पुराणेतिहासादौ च स्फुटमेव. **वाममार्गादेः** इति. अत्रापि 'आदि'शब्दः प्रकारवचनः. तेन वैदिकाः वैष्णवाः शैवाः शाक्ताः वामाः सैद्धान्ताः कौलाः इति सप्तापि शाक्तभेदाः तत्सब्रह्मचारिणः पाशुपतप्रभृतयश्च संगृह्यन्ते. अत्र आद्याः त्रयः शुद्ध-वैदिक-वैष्णव-शैवेभ्यो अतिरिक्ताएव. एषां स्वरूपं तत्त्वदीपनिबन्धादितो ज्ञेयम्. **क्रियमाणत्वेन** इति. **"पत्नीत्वदीक्षया रण्डाचण्डाअपि भजन्ति हि दिगम्बराः चर्मचिह्नाः सुरापानपरायणाः पापरूपाः दुराचाराः ते कौलाः परिकीर्तिताः"** इति निन्दादर्शनाद्, मिताक्षरायां **"उदक्याशुचिभिः स्नायाद्"** (याज्ञ.स्मृ.३।१।३०) इत्यस्य विवरणे ब्रह्माण्डपुराणे **"शैवान् पाशुपतान् स्पृष्ट्वा लौकायतिकनास्तिकान् विकर्मस्थान् द्विजान् शूद्रान् सवासा जलम् आविशेद्"** (द्र.याज्ञ.स्मृ.मिता.३।१।३०) इति निबन्धेषु एवमादिनिन्दादर्शनात् च **क्रियमाणत्वेन** इति अर्थः.

> **(२) किञ्च ईश्वरसम्मतमार्गप्रतिपादितानां पञ्च'म'कारत्वेन तन्मार्गस्थैः व्यवह्रियमाणानां मद्य-मत्स्य-मैथुनादीनां मनु-याज्ञवल्क्यादिभिः वैदिकत्वेन त्रय्यधिकारित्वेन विप्राशप्तत्वेन च निश्चितैः "ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः" (कूर्मपुरा.२।३२।२२) इत्यादिना "निषिद्धभक्षणं जैह्म्यम्" (याज्ञ.स्मृ.३।५।२२९) इत्यादिना "पारदार्यं पारिवित्त्यम्" (याज्ञ.स्मृ.३।५।२३५) इत्यादिना च महापातकातिपातकोपपातकत्वेन प्रतिपादितत्वेन ईश्वरसम्मतमार्गनिन्दकेषु तेषु अतिव्याप्त्यापत्तिः. शङ्कराचार्यसम्मतमार्गनिन्दायाः लक्षणत्वे पूर्वोक्तेषु मीमांसक-बौद्धादिषु अतिव्याप्तिः.**

(३) पञ्च'म'कारत्वेन इति. मद्यं मांसं मत्स्याः मैथुनं मुद्रा इति पञ्च मकाराः कुलार्णवादिषु मोक्षसाधनतया सुप्रसिद्धाः. ननु 'ऐश्वरमार्ग' शब्देन

मया ईश्वरसम्मतश्रुत्यर्थवर्णनरूपो मार्गः उच्यते. वामादिमार्गस्यतु तथात्वाभावात् सर्वम् एतत् कर्णे पृष्टे कटिचालनस्य सहोदरीभूतम् इति चेद्, मैवम्. तत्रापि “**मधुवाता ऋतायते**” (बृह.उप.६।३।६) इत्यादिश्रुतीनां मद्यपरतायाः, पश्वालभनविध्यादीनां मांसादिपरतायाश्च स्वयम् ईश्वरेण वर्णनाद् बहूनां श्रुतिवाक्यानां तत्तत्तन्त्रे तेनैव स्वयम् अन्यथानयनाच्च. तथाहि : कुलार्णवे द्वितीयोल्लासे पार्वतीं प्रति शिवो बहुलं कुलधर्ममाहात्म्यं वदन् “**कुलधर्मम् अजानन् यो मोक्षम् इच्छति दुर्मतिः पारावारम् अपारं सः पाणिभ्यां तर्तुम् इच्छति. यो वा अन्यदर्शनेभ्यश्च भुक्तिं मुक्तिं च कांक्षति स्वप्नलब्धधनेन अम्बे! धनवान् स भवेत् तदा**” (कुला.त.उल्ला.२।४७) इत्यादिना तद्धर्मवताम् अत्युत्कर्षं तद्रहितानाम् अत्यन्तगर्हणां च दर्शयित्वा “**पेयं मद्यं पलं खाद्यं समालोक्यं प्रियामुखम् इत्येवाचरणं जाप्यं परिप्राप्यं परं पदम्. गुरुकारुण्यलब्धव्यम् इदृशं कुलदर्शनं त्वद्भक्ताएव जानन्ति न इतरे भुक्तिमुक्तिदम्**” (कुला.त.उल्ला.२।११२-११३) इत्यादिना मद्य-मांस-मैथुनादिसेवनं धर्मत्वेन उक्त्वा सुरा-मांससेवनादौ दूषणानि प्रायश्चित्तानि च धर्मशास्त्रोक्तानि “**सुरा वै मलम् अन्नानाम्**” (कुला.त.उल्ला.२।१२७) इत्यादिना अनूद्य तेषां प्रायश्चित्तानां कौलशास्त्रदर्शितविधिं विना सेवनविषयकत्वं तद्विधिना सेवनेतु न दोषः इति आशयेन “**मांस सन्दर्शनं कृत्वा सुरादर्शनवत् चरेत्. तस्माद् न अविधिना मद्यं मांसं सेवेत् कदाचन. विधिवत् सेविते देवि! तरसा त्वं प्रसीदसि. नाशयस्यपि अविधिना सत्यम् एतद् वरानने! तृणं वापि अविधानेन छेदयेद् न कदाचन विधिवद् गां द्विजं वापि हत्वा पापैः न लिप्यते**” (कुला.त.उल्ला.२।१३४-१३६) इत्यादि अभिधाय तस्य मार्गस्य स्वसम्मतत्वं श्रुत्यर्थवर्णनरूपत्वं च आह “**कुलशास्त्राणि सर्वाणि मयैव उक्तानि पार्वति! प्रमाणानि न सन्देहो न हन्तव्यानि हेतुभिः, देवताभ्यः पितृभ्यश्च मधुवाता ऋतायते, स्वादिष्टयामदिष्टया क्षीरं सर्पिर्मधूदकं हिरण्यपात्रं मधोः पूर्णम्. ‘अबध्नन् पुरुषं पशुम्’** (तैत्ति.आर.३।१३।२) **...इत्याद्याः प्रमाणं श्रुतयः प्रिये**” (कुला.त.उल्ला.२।१३९-१४१) इति. अग्रेच चतुर्थोल्लासे “**अथ प्रातः समुत्थाय गुरुदेवात्मचिन्तनम् सकृन्मूलेन स्मृत्वा च कुर्याद् विण्मूत्रमोचनम् शौचास्यशोधनं स्नानं सन्ध्यातर्पणम् आचरेद्**”

(कुला.त.उल्ला.४।१०) इत्यादौ श्रौतस्मार्तकर्मणामपि अनुष्ठेयत्वं बोधयति. तथा पञ्चमोल्लासे **“अम्भसां द्वादशप्रस्थं प्रस्थार्धं तक्रमेव च”** (कुला.त.उल्ला.५।१०) इत्यादिना पैष्ट्यादिमदिरोत्पादनप्रकारान् प्रपञ्च्य **“मद्यानि एकादशैतानि भुक्तिमुक्तिप्रदानि च. द्वादशन्तु सुरा मद्यं सर्वेषाम् उत्तमं प्रिये! गौडी माध्वी च पैष्टि इति विज्ञेया त्रिविधा सुरा सर्वसिद्धिकरा पैष्टी गौडी भोगप्रदायिनी”** (कुला.त.उल्ला.५।३३-३४) इत्यादिना पैष्ट्यादीनां पृथक्-पृथक् फलविशेषं सर्वासां दर्शन-स्पर्शना-ऽऽघ्राणादिपुण्यविशेषं पूजायाम् उपयोगं च उक्त्वा **“मांसन्तु त्रिविधं प्रोक्तं ख-भू-जलचरं प्रिये! यथासम्भवम् एषु एकं तर्पणार्थं प्रकल्पयेद् मांससन्दर्शनेनापि सुरादर्शनवद् फलम्. पितृदैवतयज्ञेषु वेदे हिंसा विधीयते. आत्मार्थं प्राणीनां हिंसा कदाचिद् नोदिता प्रिये! अनिमित्तं तृणं वापि च्छेदयेद् न कदाचन. देवतार्थं द्विजं गां वा हत्वा पापैः न लिप्यते. माम् अनादृत्य पुण्येऽपि पापं स्यात् प्रत्यवायतः. मन्निमित्तं कृतं पापं पुण्यं भवति शाम्भवि! यैरेव पतनं द्रव्यैः सिद्धिः तैरेव चोदिता”** (कुला.त.उल्ला.५।४७-५२) इत्यादिना तत्र वेदानुकूल्यं दर्शयति. तथा **“सुरा शक्तिः शिवो मांसं तद्भोक्ता भैरवः स्वयं तयोः ऐक्यं समुत्पन्नम् आनन्दो मोक्षः उच्यते. आनन्दो ब्रह्मणो रूपं तच्च देहे व्यवस्थितम् तस्य अभिव्यञ्जकं द्रव्यं योगिभिः तेन पीयते”** (कुला.त.उल्ला.५।८३-८४) इत्यादौ **“अन्योऽन्तर आत्मा आनन्दमयः”** (तैत्ति.उप.२।५) **“आनन्दो ब्रह्म इति व्यजानात्.”** (तैत्ति.उप.३।६) **“आनन्दरूपम् अमृतं यद् विभाति”** (मुण्ड.उप.२।२।७) इत्यादिश्रुतीनाम् अर्थम् अद्वैतं च वर्णयति. **“देवान् पितॄन् समभ्यर्च्य वेदशास्त्रोक्तवर्त्मना गुरुं स्मरन् पिबन् मद्यं खादन् मांसं न दोषभाक्”** (कुला.त.उल्ला.५।८९) इत्यादिना वेदशास्त्रानुकूल्यं प्रकाशयन् निषेधानाम् अभिलाषपूर्वकावैधपानादिपरत्वं स्वसम्मतपानादेः सोमपानादिवद् अदूषितत्वं च प्रपञ्चयति. षष्ठोल्लासे च **“प्रथमः प्रकृतेः हंसः प्रतद् विष्णुः अनन्तरम्. त्र्यम्बकस्तु तृतीयः स्यात् चतुर्थः तत्पदाधिकः ‘विष्णुर्योनिक’ इत्याख्यः पञ्चमः कल्पतां मनुः”** (कुला.त.उल्ला.६।४७-४८) इत्यादौ तत्तद्वैदिकमन्त्रानुग्रहं स्फुटयति. एवं तत्र-तत्र तन्त्रग्रन्थेषु श्रुत्यादिप्रामाण्यादरणं श्रुत्यर्थवर्णनं च अवेक्षणीयम्.

विस्तरभयाद् विरम्यते.

अतः तादृशमार्गेषु ईश्वरसम्मतश्रुत्यर्थवर्णनरूपतायाः सत्त्वात् तन्निन्दकेषु वैदिकशिष्टेषु अतिप्रसंगो मूले यः उक्तः स युक्तएव. वस्तुतस्तु कौर्मवचने **'ऐश्वरमार्ग'** शब्देन ईश्वरस्य अयम् ईश्वरेण प्रोक्तो वा मार्गः इत्येव अर्थो लभ्यते नतु तत्सम्मतश्रुत्यर्थवर्णनरूपः इति कल्पने किञ्चिचिदपि लिङ्गं वचने अस्ति. मनसा कल्पनेऽपि अनिस्तारस्तु प्रकाशितः. ननु न ईश्वरसम्मतश्रुत्यर्थवर्णनरूपत्वमात्रं मार्गस्य आदरणीयत्वे बीजम् अपितु वास्तवतदर्थवर्णनरूपत्वमेव. अतो वामादिमार्गेषु ईश्वरसम्मतश्रुत्यर्थवर्णनरूपत्वे सत्यपि प्रयोजनविशेषार्थं शिवेन तथाकथनाद् न तेषाम् अनिन्द्यत्वम् इति चेत्, प्रियं नः परं को वास्तवः श्रुत्यर्थः कश्च अवास्तवः इत्यत्र किं निर्णायकम्?. वेदाङ्गादीनां पूर्वोत्तरमीमांसासिद्धन्यायानां च आनुकूल्यप्रातिकूल्येएव वास्तवावास्तवत्वयोः निर्णायके इति चेद्, ओं कुर्मः. श्रीमदाचार्यादीनां हि तदनुकूलवेदार्थज्ञापनार्थमेव प्रवृत्तिः. एवञ्च सति अस्मत्सम्मतश्रुत्यर्थः तदनुकूलो अन्यसम्मतो वा स तथा इत्यत्रैव आवयोः विवादः पर्यवस्यति नतु पुराणवचनैः अहं वा निन्द्यः त्वं वा निन्द्यः इत्यत्र वृथाकलहः. **"ब्रह्महत्यासुरापानम्"** (कूर्मपुरा.२।३२।२२) इत्यादि, मनुना एकादशाध्याये **"ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः महान्ति पातकानि आहुः संसर्गश्चापि तैः सह"** (मनुस्मृ.११।५४) इति सुराप्रतिषेधो बोधितः. याज्ञवल्क्येन तृतीयाध्याये कर्मविपाकपूर्वकप्रायश्चित्तप्रकरणे **"निषिद्धभक्षणं जैह्म्यम् उत्कर्षं च वचो अनृतम् रजस्वलामुखास्वादः सुरापानसमानितु"** (याज्ञ.स्मृ.३।५।२२९) इति निषिद्धस्य मांस-लशुनादेः स दर्शितः. मनुयाज्ञवल्क्यादिशास्त्रेषु अनुपाकृतमांसनिषेधाः स्पष्टतराएवेति किम् इह बहुना! तेनैव तत्रैव **"गोवधो व्रात्यता स्तेयम्"** (याज्ञ.स्मृ.३।५।२३४) इत्यादिना **"भार्याया विक्रयः च एषाम् एकैकम् उपपातकम्"** (याज्ञ.स्मृ.३।५।२४२) इत्यन्तेन उपपातकानि उक्तानि तत्र **"पारदार्यं पारिवित्त्यम्"** (याज्ञ.स्मृ.३।५।२३५) इति परदारसंगस्य प्रतिषेधः प्रकाशितः. एवं मत्स्यादिप्रतिषेधाअपि सन्त्येव. **महापातकातिपातक** इत्यादि यद्यपि प्रायश्चित्तेन्दुशेखरादिषु महापातकसमानि अनुपातकत्वेन उक्तानि

अतिपातकानि च अतिरिक्तान्येव उक्तानि तथापि अत्र महापातकसमानाम् अतिपातकत्वव्यवहारस्तु ‘‘**महापापं च अतिपापं तथा पातकमेव च प्रासंगिकं च उपपापम् इत्येवं पञ्चको गणः**’’ (याज्ञ.स्मृ.मिता.३।५।२४२) इति मिताक्षरायाम् उपपातकनिरूपणे उदाहृतस्मरणानुरोधात्. अतः उभयथापि व्यवहारो न विरुद्धः.

अथ ‘ईश्वर’शब्देन शङ्कराचार्याएव ग्राह्याः इति द्वितीयं कल्पं दूषयन्ति **शङ्कराचार्य...**इत्यादिना, मीमांसकादिभिः बहुभिरेव शांकरमतस्य खण्डितत्वात् तथा इति भावः. वस्तुतस्तु पञ्चदशाध्याये तथा परिग्रहे प्रकृतहान्यप्रकृताभ्यागमौ प्रसज्येयाताम्. भार्यासाहित्य-नग्नत्व-कपालित्वादिभिः दक्षाद्युक्तैः सूर्यमूर्तित्त्वादिभिः दधीचोक्तैः च धर्मैः साक्षाच्छिवस्यैव प्रकृतत्वात्. अग्रे देवीप्रार्थितेन तेनैव स्वगणद्वारा अध्वरस्य विध्वंसात्. तत्र शङ्कराचार्याणां कथायाः लेशतोऽपि अभावाद् दक्षस्य तेषु द्वेषस्यापि असम्भवात् च. यत्तु अस्य वाक्यस्यापि कौर्मस्थत्वेन उक्तविध-शङ्करनिष्ठोपदेष्टृत्व-बोधक-कौर्मवाक्यैः प्रत्यासत्त्या इत्यादि उक्तं तद् असत्. तथासति पञ्चदशापेक्षया षोडशस्य अधिकप्रत्यासन्नत्वात् तत्रत्येषु ‘‘**चकार मोहशास्त्राणि**’’ (कूर्मपुरा.१।१६।११८) इत्यादिवाक्येष्वपि आचार्याणां कर्तृतया अन्वयं स्वीकुर्याः. नच ‘‘**कापालं भैरवम्**’’ (कूर्मपुरा.१।१२।२६२) इत्यादिपरिगणनविरोधः शंक्यः ‘‘**तथा अन्यानि सहस्रशः**’’ (कूर्मपुरा.१।१६।१-१९) इत्यनेन संग्रहसम्भवात्. ननु प्रकरणाभावाद् विरुद्धलिङ्गदर्शनाच्च न स्वीक्रियते इति चेत्, प्रकृतेऽपि तुल्यम्. नच एकपुराणस्थत्वमात्रेण तथा अर्थः शक्यः कल्पयितुम्, श्रीभागवतादिषु बुद्धस्य भगवदवतारतया वर्णितत्वेन तत्पुराणस्थेषु हरिभक्त्यावश्यकत्वबोधकवचस्सु ‘‘**धिग् जन्म नः त्रिवृद्विद्याम्**’’ (भाग.पुरा.१०।२०।३९) इत्यादिषु तद्रहितनिन्दावचस्सु च बुद्धभक्तिपरतायाः बुद्धविरुद्धवैदिकनिन्दापरतायाः च आपातात्. वस्तुतस्तु त्रिंशाध्यायवचांस्यपि न शङ्कराचार्यविषयाणीति प्रकाशितं प्राक्. **ऐश्वरमार्गश्च** अत्र ईश्वरस्य तद्भार्यायाश्च वैदिकमन्त्रपूर्वकाहुतिभिः यजनीयत्वादिलक्षणएव

नतु शङ्कराचार्यकृतश्रुत्यर्थवर्णनरूपः, दक्षादिकाले तस्य अभावाद् उपक्रमोपसंहार-विरोधात् च. कौर्मवचनानान्तु अयम् अक्षरलभ्यो अर्थः. यस्मात् परमेश्वरो भवद्भिः वेदाद् बहिष्कृतो अतो भवन्तः त्रयीबाह्या भविष्यन्ति इह यज्ञे सर्वेऽपि ईश्वरविद्विषो भवन्तः ऐश्वरं मार्गं **"न मन्त्राः भार्यया सार्धं शङ्करस्य इति न इज्यते"** (कूर्मपुरा.१।१५।८) इत्यादिना निन्दन्ति अतो यज्ञरक्षार्थं स्वाश्रितोऽपि हृषीकेशः पराङ्मुखो भविष्यतीति. तदेतद् अग्रे प्रपञ्चयिष्यते इति आहुः.

(२) कौर्मवाक्यानितु न निन्दादीनां लक्षणत्वेन प्रतिपादकानि किन्तु अन्यपराणि इति अग्रे वक्ष्यते. स्वकपोलकल्पनया तु तेषां लक्षणत्वं न सम्भवति अतिव्याप्त्यादिदोषग्रस्तत्वात्.

(३) कौर्मवाक्यानि इति तथाच **"निन्दतो ह ऐश्वरं मार्गम्"** इति शत्रन्तघटितपाठस्य केवलस्वकपोलकल्पितत्वात् तन्मूलिका ईश्वरसम्मतमार्ग-निन्दापि त्रय्यनधिकारस्य हेतुः लक्षणं च इति उक्तिरपि केवल व्योम्नि चित्रारम्भमेव अनुकरोति. यच्च शप्तानान्तु इदं तृतीयं लक्षणम् इति तदपि असत्. सप्तविंशे प्रथमं तेषां लक्षणं, त्रिंशे द्वितीयं, पञ्चदशे तृतीयम् इति कल्पने मानलेशस्यापि अभावात्.

यश्च यो अयं निन्दति स तद्द्वेष्यो भवति इति न्यायः उक्तः सोऽपि जीवन्मुक्तानां स्वनिन्दकेषु द्वेषाभावाद् अनैकान्तिकः. 'यच्'छब्दयोः 'तच्'छब्दयोः च क्रमानपेक्षसामानाधिकरण्याङ्गीकारे तु शिक्षार्थं पित्रादिना निन्द्यमानेऽपि पुत्रादौ द्वेषस्य अभावाद् अनैकान्तित्वम्.

(१) [कुशास्त्रमपि उक्तविधैश्वरमार्ग-भिन्नमार्गरूपम्, प्रकरणस्वारस्यात्. एवं मिथ्याधीत-समाचारत्वमपि शङ्करानभिमताधीत-समाचारत्वं, मिथ्याज्ञान-प्रलापित्वमपि शिवानभिमतज्ञान-प्रलापित्वमेव. शप्तानाम् इदमपि

लक्षण-त्रयम्.]

(२) कुशास्त्रासक्तमानसत्वं चतुर्थं लक्षणम्. कुशास्त्रमपि उक्तविधै-श्वरमार्ग-भिन्नमार्गरूपम्. उक्तश्च त्वया शङ्कराचार्यसम्मतश्रुत्यर्थवर्णनरूपो मार्गः. तथाच तादृशश्रुत्यर्थवर्णनरूपमार्गभिन्नशास्त्राभ्यासकर्तृत्वं लक्षणं सम्पन्नम्. तच्च तत्प्राक्तनेषु सर्वेषु अतिव्याप्तम्. किञ्च तादृशश्रुत्यर्थानभिज्ञेषु शिवभक्तेषु पुराणाद्यभ्यासशालिषु अतिव्याप्तिश्च. किञ्च अधिगतपाणिनीयगौनर्दीयसर्वस्वे नवद्वीपगमनेन सम्पादितकणभुक्चरणाक्षसिद्धान्तसम्पदि भाट्टप्राभाकरमतपारावारपारदृश्वनि तादृशशास्त्राभ्यासशीले त्वयि अतिव्याप्तिश्च.

(३) अथ सहस्राक्षे कुशास्त्रम् इत्यादिना लक्षणत्रयम् इत्यन्तेन दर्शितानि तुर्य-पञ्चम-षष्ठ-लक्षणानि क्रमेण युगपत् च दूषयिष्यन्तः कुशास्त्रासक्तचेतस्त्वरूपं तुर्यं तावत् प्राधान्येन परिहरन्ति **कुशास्त्रासक्तमानसत्वम्** इत्यादिना **चतुष्टयं तु पूर्वनिरस्तम्** इत्यन्तेन. **उक्तश्च** इति उक्तविधैश्वर...इत्याद्युक्त्या सूचितः इति अर्थः. अत्र अयं भावः : यद्धि कुशास्त्रमपि उक्तविधैश्वरमार्ग-भिन्नमार्गरूपम्. प्रकरणस्वारस्याद् इति उक्तं तद् असत्. नहि तस्मिन् अध्याये पूर्वापराध्यायेषु वा लेशमात्रमपि शङ्कराचार्याणां प्रकरणस्य अस्ति, तत्र दक्षयज्ञादिनिरूपणे तद्द्वेष्यत्व-तदध्वरविध्वंसकत्वादिभिः साक्षात् त्र्यक्षस्यैव प्रकरणाद्, नग्नत्व-कपालित्व-अष्टमूर्तित्वादि-तन्मात्रलिङ्गदर्शनात् स्पष्टः 'रूद्र'-'महादेवा'दिशब्दश्रुतेश्च. अतो न 'कुशास्त्र' शब्देन शङ्कराचार्यमार्गभिन्नमार्गएव आहत्य ग्रहीतुं शक्यः. ननु 'कुशास्त्र'शब्देनतु शिवप्रवर्तितातिरिक्तमार्गएव गृह्यते शङ्कराचार्याणामपि शिवावतारत्वाद् इष्टसिद्धिः इति चेत्, तथासति पाशुपतशास्त्रमपि शिवप्रवर्तितम् अस्ति प्रशंसितं च तत् कथञ्चिद् मोक्षफलकतया महाभारतादौ, तद्भिन्नं कुशास्त्रं न वा. आद्ये शांकरमतं तच्चोभयमपि कुशास्त्रतया अङ्गीकरणीयं स्यात्, परस्परप्रतियोगिकभेदवत्त्वात् परस्परविरुद्धत्वाद् उभयस्यापि श्रुत्यर्थवर्णन-

रूपत्वात् च. न द्वितीयः, शिवप्रवर्तितम् इतरत् सर्वमपि विहाय केवल शांकरभिन्नमार्गपरिग्रहे मानाभावात्. ननु प्रकृताध्याये तत्प्रकरणाभावेऽपि त्रिंशे तदवतारकथासत्त्वात् प्रकृते तथा व्याख्यायते इति चेद्, अत्र प्रक्रान्तस्य त्यागे अप्रक्रान्तस्य दवीयस उपादाने च किं मानम्? किञ्च एवंसति षोडशाध्याय-द्वादशाध्याययोः स्पष्टतरम् उक्तमेव अत्र 'कुशास्त्र' शब्देन उपादीयताम्, अतिसान्निध्यात् कण्ठरवेण कुशास्त्रत्वकथनात् च. तथाहि : तत्र पूर्वखण्डे षोडशाध्याये "**पुरा दारुवने पुण्ये मुनयोः गृहमेधिनः**" (कूर्मपुरा.१।१६।९७) इत्यादिना दारुवनस्थतापसानाम् अनावृष्टिज-तापतो अन्नार्थं गौतमं प्रति प्रार्थनं तेन द्वादशवर्षपर्यन्तम् अन्नादिना तेषां निर्वहणं ततो द्वादशे वर्षे दुःखनिवारिवारिवर्षे सम्पन्ने पुनः देवदारुवनं जिगमिषतां तेषाम् आदरणविशेषाद् गौतमेन कृतम् उपरोधं स्वनिर्मोकार्थं मायया गां विधाय तस्यां गौतमकृतस्पर्शमात्रेण मृतायां गौतमे वृथादुरितम् आरोप्य तेषां पुनः देवदारुवनप्राप्तिं च वर्णयित्वा उच्यते "**स तेषां मायया जातां गोवध्यां गौतमो मुनिः केनापि हेतुना ज्ञात्वा शशाप अतीवकोपतः 'भविष्यन्ति त्रयीबाह्या महापातकिभिः समाः'. बहुशः ते तथा शापाद् जायमानाः पुनः पुनः. सर्वे सम्प्राप्य देवेशं शङ्करं विष्णुम् अव्ययम् अस्तुवन् लौकिकैः स्तोत्रैः उच्छिष्टाइव 'सर्वगौ! देवदेवौ! महादेवौ! भक्तानाम् आर्तिनाशिनौ! कामवृत्त्या महायोगौ! पापात् नः त्रातुम् अर्हतः.' तदा पार्श्वस्थितं विष्णुं सम्प्रेक्ष्य वृषभध्वजः 'किम् एतेषां भवेत्कार्यं प्राह पुण्यैषिणाम्' इति. ततः स भगवान् विष्णुः शरण्यो भक्तवत्सलः गोपतिं प्राह विप्रेन्द्रान् आलोक्य प्रणतो हरिः 'न वेदबाह्ये पुरुषे पुण्यलेशोऽपि शङ्कर! संगच्छते महादेव! धर्मो वेदाद् हि निर्बभौ. तथापि भक्तवात्सल्याद् रक्षितव्याः महेश्वर! अस्माभिः सर्वएव एते गन्तारो नरकानपि. तस्माद् हि वेदबाह्यानां रक्षणार्थाय पापिनां विमोहनाय शास्त्राणि करिष्यावो वृषध्वज!' एवं सम्बोधितो रुद्रो माधवेन मुरारिणा चकार मोहशास्त्राणि केशवोऽपि शिवेरितः. कापालं नाकुलं वामं भैरवं पूर्वपश्चिमं पञ्चरात्रं पाशुपतं तथा अन्यानि सहस्रशः सृष्ट्वा तानि आह निर्वेदाः कुर्वाणाः शास्त्रचोदितं पतन्तो नरके घोरे बहून् कल्पान् पुनः पुनः. जायन्ते मानुषे लोके क्षीणपापचयाः ततः.**

ईश्वराराधनबलाद् गच्छध्वं सुकृतां गतिम्. वर्तध्वं मत्प्रसादेन न अन्यथा निष्कृतिर् हि वः. एवम् ईश्वर-विष्णुभ्यां चोदिताः ते महर्षयः आदेशं प्रत्यपद्यन्त शिवस्य असुरविद्विषः. चक्रुः ते अन्यानि शास्त्राणि तत्र तत्र रताः पुनः शिष्यान् अध्यापयामासुः दर्शयित्वा फलानि च. मोहाय स इमं लोकम् अवतीर्य महीतले. चकार शङ्करो भिक्षां हिताय एषां द्विजैः सह” (कूर्मपुरा.१।१६।१०९-१२५) इत्यादि. तथा द्वादशाध्याये जननोत्तरं हिमालयेन स्तुता गिरिसुता तं प्रति “**शृणुष्व च एतत् प्रथमं गुह्यम् ईश्वरगोचरम्**” (कूर्मपुरा.१।१२।२४७) इत्यादिना ईश्वरस्वरूप-तद्भक्त्यादिकं निरूप्य “**श्रुतिस्मृत्युदितं सम्यक्कर्म वर्णाश्रमात्मकम् अध्यात्मज्ञानसहितं मुक्तये सततं कुरु. धर्मात् संजायते भक्तिः भक्त्या सम्प्राप्यते परम्. श्रुतिस्मृतिभ्याम् उदितो धर्मो यज्ञादिको मतः**” (कूर्मपुरा.१।१२।२५४-२५५) इत्यादिना ज्ञानकर्मसमुच्चयादेव फलसिद्धिं भक्तेरेव प्राधान्यं च सर्वं तावकमतातिरिक्तप्रकारकं प्रतिपाद्य वेदस्यैव मुख्यत्वं च उक्त्वा आह “**नच वेदादृते किञ्चिद् शास्त्रं धर्माभिधायकम्. यो अन्यत्र रमते सो असौ न सम्भाष्यो द्विजातिभिः यानि शास्त्राणि दृश्यन्ते लोके अस्मिन् विविधानितु श्रुतिस्मृतिविरुद्धानि निष्ठा तेषां हि तामसी. कापालं भैरवं चैव यामलं वामम् आर्हतम्. एवं विधानि च अन्यानि मोहनार्थानि तानि तु. ये कुशास्त्राभियोगेन मोहयन्ति इह मानवान् मया सृष्टानि शास्त्राणि मोहाय एषां भवान्तरे**” (कूर्मपुरा.१।१२।२६०-२६३) इति. ततः “**वेदार्थवित्तमैः कार्यं यत् स्मृतं कर्म वैदिकम्**” (कूर्मपुरा.१।१२।२६४) इत्यादिना स्वायम्भुवादिस्मृत्यष्टादशपुराणोपपुराण-शिक्षाद्यङ्गप्रभृतीनां प्रादुर्भावं प्रादिदेश. अतो अत्र ‘कुशास्त्र’ शब्देन वेदविरुद्धं कापालादिकमेव उपादातुम् उचितं तस्मिन् पुराणे निःसंदिग्धप्रसिद्धत्वाद्, अतिसन्निहितत्वाद्, द्वादशाध्याये तानि नामतो निर्दिश्य “**ये कुशास्त्राभियोगेन**” (कूर्मपुरा.१।१२।२६३) इति कथनात् च. नतु वेद-गीता-व्याससूत्रादिमूलको अनादिसिद्धो वैष्णवसिद्धान्तः शङ्कराचार्यमार्गप्रतियोगिकभेदमात्रेण ‘कुशास्त्र’ शब्देन उपादातुं शक्यः. अतएव एकादशाध्याये “**असच्छास्त्राधिगमनं कौशीलव्यस्य च क्रिया**” (मनुस्मृ.११।-६५) इति मनुवचने, तृतीयाध्याये कर्मविपाकपूर्वकप्रायश्चित्तप्रकरणे

''असच्छास्त्राधिगमनम् आकरेषु अधिकारिता'' (याज्ञ.स्मृ.३।५।२४२) इति याज्ञवल्क्यवचने च तादृशस्यैव असच्छास्त्रत्वम् अभिप्रेयते. **''श्रुतिस्मृतिविरुद्ध-शास्त्रशिक्षणम्''** (शब्द.उप.४०) इति कुल्लूकभट्टेन **''असच्छास्त्रस्य चार्वाकादिग्रन्थस्य अधिगमः''** (याज्ञ.स्मृ.मिता.३।५।२४२) इति विज्ञानेश्वरेण च विवरणात्. एवम् **''असच्छास्त्राभिगमनं नास्तिकता कुशीलवता मद्यपरस्त्रीनिषेवणम् इति उपपातकानि''** (वि.ध.सू.३७।३१-३४) इत्यादिषु बृहद्विष्ण्वादिवचनेष्वपि द्रष्टव्यम्. विशेषस्तु कश्चिद् अग्रे वक्ष्यते. अथ प्रसह्य 'कुशास्त्र' शब्देन शांकरमार्गभिन्नमार्गस्यैव परिग्रहे लक्षणे दोषम् आहुः **तथाच** इत्यादिना. **अभ्यासकर्तृत्वम्** इति अभ्यासोहि पुनः-पुनः कीर्तनरूपो व्यासंगः सच आसक्त्या सम्भवति तामन्तरा पठनानिष्पत्तेः. यथोक्तं केनचिद् अभियुक्तेन **''संस्कार-बुद्धि-विनयोद्यम-शास्त्ररागाः पञ्च आन्तराः पठनसिद्धिकरा भवन्ति. आचार्य-पुस्तक-निवास-सहाय-भिक्षा बाह्यास्तु पञ्च पठनं परिवर्धयन्ति''** इति. **''यथा यथा हि पुरुषः शास्त्रं समधिगच्छति तथा तथा विजानाति विज्ञानञ्च अस्य रोचते''** (मनुस्मृ.४।२०) इति मनुनापि रुचिनियमः स्मर्यते. अतः कुशास्त्रसक्तचेतस्कत्वम् एतैः संगृहीतं भवति. **तत्प्राक्तनेषु** इति शङ्कराचार्यतः प्राचीनेषु वसिष्ठ-व्यासप्रभृतिषु गौडपाद-गोविन्द-योगीन्द्रपर्यन्तेषु सर्वेष्वपि महर्षिषु निबन्धादिकारेषु मानुषविद्वत्सु च अतिव्याप्तम् इति अर्थः. **'प्राग्'** इति कालार्थकम् अव्ययम्. ततः सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौतुट्चेतिट्युष्ट्युल्वा तुडागमश्च. अनद्यतनइ-त्यादिनिर्देशात् तुटः प्रागनादेशः. इदानींत्वेऽपि लक्षणस्य दुष्टत्वम् आहुः **किञ्च तादृश** इति अलक्ष्यत्वं स्पष्टयितुं **'शिवभक्त'** पदम्. **अतिव्याप्तिश्च** इति **'च'**कारो दोषान्तरसमुच्चायकः. तथाच तदुक्तमार्गासम्मतं परस्य सविशेषत्वं ज्ञानापेक्षया भक्तेः प्राधान्यं तयैव परपदप्राप्तिम् एवमादि इतरदपि आम्रेडयत् कौर्मादिपुराणमपि 'कुशास्त्र'तया अभिलप्यं स्याद् इति भावः. एवञ्च अनेन वचनेन कौर्मस्य कुशास्त्रत्वं ततश्च अस्यापि कुशास्त्रवचनत्वाद् अप्रामाण्यं प्रसज्येत इति स्वारूढशाखाच्छेदनम्. तत्र तथा निरूपणन्तु पूर्वखण्डे द्वादशाऽध्यायादौ उत्तरखण्डे ईश्वरगीतादौ च अपाणिपिहितमेव. प्रस्तावनोक्तम् अनुवदन्तः प्रतिवादिनि अतिव्याप्तिम् आहुः **किञ्च**

अधिगत...इति पाणिनिना प्रोक्तं पाणिनीयं व्याकरणम् "**वृद्धाच्छः**" (पाणि.सू.४।२।११४). गोनर्दे काश्मीरमण्डले देशविशेषे भवो **गोनर्दीयः** पतञ्जलिः "**एङ्प्राचां देशे**" (पाणि.सू.१।१।७५) इति, पाक्षिकवृद्धत्वात् छः. "**न बहुव्रीहौ**" (पाणि.सू.१।१।२९) इति सूत्रे भाष्ये "**गोनर्दीयस्तु आह**" (पातं.महाभा.१।१।२९) इति पतञ्जलौ 'गोनर्दीय' शब्दः प्रयुज्यते. तेन प्रोक्तं गौनर्दीयं महाभाष्यम् "**याज्ञवल्क्यानि ब्राह्मणानि आश्मरथः कल्पः**" (पाणि.सू.सि.कौ.४।३।१०५) इत्यादिवत् प्राग्दीव्यतीयो अण्. अधिगतं पाणिनीयगोनर्दीययोः सूत्रमहाभाष्ययोः सर्वस्वं येन इति तथा. **नवद्वीपो** लोके 'नदिया' इति प्रसिद्धः प्राच्यः स्थलविशेषः. **कणभुक्** कणादः सप्तपदार्थनिरूपकदशाध्यायवैशिषिकदर्शनस्य प्रणेता. चरणे अक्षि यस्य इति **चरणाक्षो** गौतमः षोडशपदार्थनिरूपकपञ्चाध्यायन्यायदर्शनस्य निर्माता. "**बहुव्रीहौ सक्थ्यक्ष्णोःस्वाङ्गात् षज् इति षच्**.(पाणि.सू.५।४।१-१३). भट्टः कुमारिलभट्टाचार्यः तस्य इदं **भाट्टम्**. प्रभाकरो 'गुरुः' इति व्यवह्रियमाणः तस्य इदं **प्राभाकरम्**. इमे द्वे मते पूर्वतन्त्रविषयके तद्रूपयोः पारावारयोः समुद्रयोः पारं दृष्टवान् इति तथा. "**दृशेः क्वनिप्**" (पाणि.सू.३।२।-९४) इति क्वनिप्. **तादृशशास्त्र** इति शाङ्करभिन्नतत्सदृशश्रीविष्णुस्वामि-श्रीरामानुज-श्रीपूर्णप्रज्ञादि-प्रकाशित- वेदान्तशास्त्राभ्यसनशीले. अन्यथा निखिलनिगमान्तपयःपयोधिपारीणत्वासिद्धेः, खण्डनोत्साहेनापि तदभ्यासस्य अनुमितेश्च. अत्र 'गौनर्दीय''इति प्रयोगेण प्रस्तावनायां 'गोनर्द्दीय' इति अपप्रयोगः सूचितः. 'गोनर्दीय'शब्देन तत्प्रोक्तग्रन्थस्य अलाभात्. पतञ्जलिमात्रपरत्वेतु 'अधिगतपाणिनिगोनर्दीयसर्वस्व'इत्येव वक्तव्यम्. **अतिव्याप्तिश्च** इति '**च**'कारः शाङ्करवेदान्तानध्येतृषु व्याकरणन्यायपूर्वमीमांसाद्यासक्तहृदयेषु शङ्कराचार्यतः प्राचीनार्वाचीनेषु बहुषु स्मार्तविद्वत्सु अतिप्रसंगं समुच्चिनोति. नहि सर्वेषां विदुषां तदध्ययननियमो अस्ति.

(२) तथाच प्रतिलक्षणं "परोद्देशेन प्रक्षिप्तं शस्त्रं दुर्बलं प्रक्षेप्तारमेव हन्ति" इतिन्यायः आपततीति कौतूहलम्. यत्तु प्रकरणस्वारस्यात् **तादृशार्थलाभः इति उक्तं तदपि**

प्रकरणाज्ञानम् अनुमापयति. तथाहि कूर्मपुराणे पूर्वखण्डे पञ्चदशे अध्याये. ‘‘स शप्तः शम्भुना पूर्वं दक्षः प्राचेतसो नृपः किम् अकार्षीद् महाबुद्धे! श्रोतुम् इच्छाम साम्प्रतम्’’ (कूर्मपुरा.१।१५।२) इत्येवं शौनकादिभिः पृष्टः सूतो दक्षस्य चरितं प्रोक्तवान् ‘‘वक्ष्ये नारायणेन उक्तम्’’ इत्यादिना. तत्र पूर्ववैरम् अनुस्मरता दक्षेण यज्ञः आरब्धः. तत्र विष्णुप्रमुखाः देवाः शङ्करं विना समागताः ऋषयः च. तत्र दधीचो महादेवम् अदृष्ट्वा ‘‘स देवः साम्प्रतं रुद्रो विधिना किं न पूज्यते?’’ (कूर्मपुरा.१।१५।७) इति दक्षं पृष्टवान्. ततो ‘‘दक्षः उवाच ‘सर्वेष्वेव हि यज्ञेषु न भागः परिकल्पितः न मन्त्राः भार्यया सार्द्धं शङ्करस्य इति न इज्यते’’ (कूर्मपुरा.१।१५।८) एवं दक्षेण उक्ते पुनर् दधीचेन ‘‘यतः प्रवृत्तिः विश्वात्मा’’(कूर्मपुरा.१।१५।१०) इत्यादि उक्त्वा ‘‘संस्तूयते सहस्रांशु सामगा-ध्वर्यु-होतृभिः पश्य एनं विश्वकर्माणं रुद्रमूर्तिं त्रयीमयम्’’ (कूर्मपुरा.१।१५।१६) इति उक्तम्. ततो ‘‘दक्षः उवाच ‘‘य एते द्वादश आदित्याः आगता यज्ञभागिनः सर्वे सूर्याः इति ज्ञेया नहि अन्यो विद्यते रविः.’’ (कूर्मपुरा.१।१५।१७) दक्षेण एवम् उक्ते ‘‘ये ब्राह्मणाः तत्र समायाताः तेऽपि तमसाविष्टमनसो न मन्यन्ते वृषध्वजं सहस्रशो अथ शतशो बहुशो भूयएव ते निन्दन्तो वैदिकान् मन्त्रान् सर्वभूतपतिं हरम् अपूजयन् दक्षवाक्यं मोहिता विष्णुमायया’’ (कूर्मपुरा.१।१५।१७-२०) ततो दक्षेण ब्राह्मणैश्च कृतां निन्दां श्रुत्वा ब्रह्मा अन्तर्हितः. ततो दक्षो नारायणं शरणं जगाम यज्ञञ्च विष्णुना रक्षितः प्रवर्तयामास. तदनन्तरं च दधीचो दक्षसाहाय्यकारिणो ब्राह्मणान् शशाप ‘‘भविष्यध्वं त्रयीबाह्याः सर्वेऽपि ईश्वरविद्विषः निन्दन्तो हि ऐश्वरं मार्गं कुशास्त्रासक्तमानसाः मिथ्याधीत-समाचाराः मिथ्याज्ञान-प्रलापिनः प्राप्य घोरं कलियुगं कलिजैः परिपीडिताः, त्यक्त्वा तपोबलं कृत्स्नं गच्छध्वं नरकात्

पुनः, भविष्यति हृषीकेशः स्वाश्रितोऽपि पराङ्मुखः'' (कूर्मपुरा.-१।१५।३०-३२) इत्यन्तेन सूतैः सर्वं व्याख्यातम्. तथाच दक्षयज्ञे समागतैः ब्राह्मणैः यः शिवद्वेषः शिवनिन्दा शिवमार्गनिन्दा च कृता तत् सर्वम् अनूद्य तदनु कुशास्त्रासक्तचेतस्त्व-मिथ्याधीतसमाचारत्वादिकं च अनूद्य त्रयीबाह्यत्व-घोरकलिकल्मषाभ्यर्दितत्व-तपोबलहानि-नरकप्राप्तिरूपान् शापान् दत्तवान्. नतु तत्र शङ्करोक्तश्रुत्यर्थस्य प्रकरणम् अस्ति नापि लक्ष्यलक्षणभावस्य येन मिथ्याधीतसमाचारत्वादीनां लक्षणत्वं त्वदुक्तसमाचारत्वादिपरत्वं वा भवेत्. एवं यज्ञकाले दक्षेण यज्ञोपकारिब्राह्मणरक्षणार्थं नियुक्तोऽपि श्रीविष्णुः भवद्भिः आश्रितोऽपि मद्वाक्यात् पराङ्मुखो भविष्यति समर्थोऽपि मच्छापम् अन्यथा न करिष्यति इति अर्थः. अयमपि शापएव दधीचेन दत्तः. एतेन विष्णोः सम्यग् असम्यग् वा आश्रितत्वं शप्तानां लक्षणम् इति प्रलपितम् अपास्तम्.

(३) तथाच प्रतिलक्षणम् इत्यादि, परदूषणाय कल्पितेषु लक्षणेषु प्रत्युत तस्यैव दोषः आपद्यते इति भावः. अत्र 'शास्त्रम्' इति उपलक्षणम्. तेन यथा परोपद्रवायैव शङ्करभक्तिं भावयता सुदक्षिणेन भगवति तदनुयायिषु च प्रयुज्यमानः कृत्याभिचारः सुदर्शनेन परिभूतः परावृत्य प्रत्युत तमेव सपरिवारं समदं समदहद्, अनन्तरं च अनुप्रविष्टं सुदर्शनं तदाश्रयस्थलं दग्ध्वा तं समूलघातं जघान, तथा वैष्णवाचार्येषु वैष्णवेषु च प्रयुक्तो दूषणाभिचारो वैष्णवसुदर्शनाभिभूतः सएव ज्ञानदुर्बलं तमेव प्रथमं प्रमथ्नाति. तदनु वैष्णवसुदर्शनं तदवलम्बं सकलं समूलम् उन्मूलयति इति गूढो अभिसन्धिः. अथ तदुक्तहेतुदूषणमुखेन वास्तवं कौर्मवचसाम् अर्थं समर्थयन्ति **यत्तु** प्रकरणस्वारस्याद् इत्यादिना. अत्र आरम्भात् प्रभृति तावान् तदध्यायभागो अत्यपेक्षितव्याख्यानं मध्येकृत्य अनूद्यते, तत्र चतुर्दशाध्यायान्ते ''**दशभ्यस्तु प्रचेतोभ्यो मारिषायां प्रजापतिः दक्षो जज्ञे महाभागो यः पूर्वं ब्रह्मणः**

सुतः. सतु दक्षो महेशेन रुद्रेण सह धीमता कृत्वा विवादं रुद्रेण शप्तः प्राचेतसो अभवद्'' (कूर्मपुरा.१।१४।५४-५५) इत्यादिना संक्षेपेण सतीदेहत्यागः शिवप्रत्तः क्षत्रियकुले अवतरणरूपः शापः च निरूपितः. ततः पञ्चदशाध्यायारम्भे **''नैमिषेया ऊचुः : 'देवानां दानवानां च गन्धर्वोरगरक्षसाम् उत्पत्तिं विस्तरात् सूत! ब्रूहि वैवस्वतेन्तरे. स शप्तः शंभुना पूर्वं दक्षः प्राचेतसो नृपः किम् अकार्षीन्? महाबुद्धे! श्रोतुम् इच्छामि साम्प्रतम्.'** सूतः उवाच **'वक्ष्ये नारायणेन उक्तं पूर्वकल्पानुषंगिकं त्रिकालबद्धं बत पापघ्नं प्रजासर्गस्य विस्तरम्. स शप्तः शंभुना पूर्वं दक्षः प्राचेतसो नृपः विनिन्द्य पूर्ववैरेण गंगाद्वारे अयजद् भवम्** (भवं विनिन्द्य इति अन्वयः). **देवाः च सर्वे भागार्थम् आहूता विष्णुना सह सहैव मुनिभिः सर्वैः आगता मुनिपुंगवा''** (कूर्मपुरा.१।१५।१-५) **'मुनिपुंगवा'**: इति संबोधनम् अतो न पुनरुक्तिः **''दृष्ट्वा देवकुलं कृत्स्नं शङ्करेण विना आगतम्. दधीचो नाम विप्रर्षिः प्राचेतसम् अथ अब्रवीत्.** दधीचः उवाच **'ब्रह्माद्यास्तु पिशाचान्ता यस्य आज्ञानुविधायिनः स देवः साम्प्रतं रुद्रो विधिना किं न पूज्यते.** दक्षः उवाच **'सर्वेष्वेव हि यज्ञेषु न भागः परिकल्पितः, न मन्त्राः भार्यया सार्धं शङ्करस्येति न इज्यते' ''** (कूर्मपुरा.१।१५।६-८) यतो यज्ञेषु न भागो नापि मन्त्राः इति हेतोः न इज्यते. मन्त्राभावकथनेन शिवस्य वेदाद् बहिर्भावो यज्ञेषु भागाभावभाषणेन ऐश्वरयजनमार्गस्य निन्दा च अबोधि. ततः कुपितो दधीचः तत्तद्देवरूपेण स्वरूपेण च शिवस्य यज्ञभागभाग्भावं बोधयितुम् आहः इति उच्यते **''विहस्य दक्षं कुपितो वचः प्राह महामुनिः शृण्वतां सर्वदेवानां सर्वज्ञानमयः स्वयम्.** दधीचः उवाच **'यश्च प्रसूतिः विश्वात्मा यश्च असौ परमेश्वरः सम्पूज्यते सर्वयज्ञैः** विदितः **किं न शङ्करः!''** (कूर्मपुरा.१।१५।९-१०) आद्यपादे ''यतः प्रवृत्तिः'' इति 'विश्वस्य' इति च पाठान्तरम्. 'विदितः'इत्यत्र विदित्वा इत्यपि. अथ वेदे विश्वात्मत्वादिधर्मैः स्तूयमानो रुद्रो अन्यएव नतु अयं पार्वतीपतित्वादिविशिष्टः इति आशयेन **''दक्षः उवाच 'नहि अयं शङ्करो रुद्रः संहर्ता तामसो हरः नग्नः कपाली विदितो विश्वात्मा न उपपद्यते' ''** (कूर्मपुरा.१।१५।११) संहर्तृत्वेन सुखकरत्वाभावाद् न अयं शङ्करः किन्तु अयं सर्वसंहारकः

तामसो हरएव. संहर्तृत्व-नग्नत्वाद्ययोग्यधर्मशालिनः विश्वात्मत्वादिकं न घटते तस्य आत्महिताकरणप्रसंगात्, तमसो मुख्यत्वापत्तेः, सर्वस्य नग्नत्वादिप्रसक्तेः च इति भावः. किन्तु 'ईश्वरा'दिशब्दाभिधेयः सर्वदेवाद्यात्मना सर्वैः इज्यमानः सत्त्वोपहितो विष्णुरेव इति आह "**ईश्वरो हि जगत्स्रष्टा प्रभुः नारायणो हरिः, सत्त्वात्मको असौ भगवान् इज्यते सर्वकर्मसु**" (कूर्मपुरा.१।१५।१२).

अथ वेदत्रयस्यापि शिवपरत्वं तत्तद्देवरूपेण शिवस्यैव आराध्यत्वं च स्थालीपुलाकन्यायेन दर्शयितुं तदीयाष्टमूर्त्यन्तर्भूते भास्करे तथात्वं दर्शयन्. "**दधीचः उवाच 'किं त्वया भगवान् एषः सहस्रांशुः न दृश्यते सर्वलोकैकसंहर्ता कालात्मा परमेश्वरः? यं गृणन्ति इह विद्वांसो धार्मिकाः ब्रह्मवादिनः, सो अयं साक्षी तीव्ररोचिः कालात्मा शाङ्करीतनुः. एष रुद्रो महादेवः कपाली च घृणी हरः आदित्यो भगवान् सूर्यो नीलग्रीवो विलोहितः. संस्तूयते सहस्रांशुः सामगा-ऽध्वर्यु-होतृभिः. पश्य एनं विश्वकर्माणं रुद्रमूर्तिं त्रयीमयम्**" (कूर्मपुरा.१।१५।१३-१६) '**संस्तूयते**' इत्यत्र '**संश्रूयते**' इत्यपि पाठः. अत्र सूर्येऽपि संहर्तृत्वादिकं वर्णितम् सामगा-ऽध्वर्यु-होतृभिः इति **सामगाः** प्रसिद्धाः, **अध्वर्यवो** याजुषाः, **होतारो** बह्वृचाः. तेन संपूर्णत्रय्याः तत्रैव तात्पर्यं बोधितम्. तैत्तिरीयाणां नारायणोपनिषदि "**आदित्यो वा एष एतन् मण्डलं तपति तत्र ता ऋचः**" (महाना.उप.१२।२) इत्यादि उक्त्वा "**सैषा त्रय्येव विद्या तपति**" (शतप.ब्रा.१०।५।२।२) इति श्रावणात्. तैत्तिरीयब्राह्मणे "**ऋग्भिः पूर्वाह्ने दिवि देव ईयते, यजुर्वेदे तिष्ठति मध्ये अह्नः, सामवेदेन अस्तमये महीयते, वेदैर् अशून्यैः स्त्रिभिः एति सूर्यः**" (तैत्ति.ब्रा.३।१२।९।१) इति आम्नानाच्च. अथ अत्र द्वादशाः आदित्याः समागताः एतेतु न शिवमूर्तयः एतदतिरिक्तश्च सूर्यो नैव अस्ति यः तन्मूर्तित्वेन सम्भाव्येत. तस्माद् न शिवस्य वेदगोचरत्वम् इति आशयेन "**दक्षः उवाच 'य एते द्वादशाः आदित्याः आगताः यज्ञभागिनः सर्वे सूर्याः इति ज्ञेयाः नहि अन्यो विद्यते रविः.' एवम् उक्तेतु मुनयः समायाताः दिदृक्षवः 'बाढम्' इति अब्रुवन् दक्षं तस्य साहाय्यकारिणः तमसाविष्टमनसो न मन्यन्ते वृषध्वजम्. सहस्रशो अथ शतशो बहुशो भूयएव हि**"

(कूर्मपुरा.१।१५।१७-१९) द्वितीयचरणे ‘‘**न पश्यन्ति महेश्वरम्**’’ इति पाठान्तरम् श्लोकान्ते ‘‘**भूयएव ते**’’ इत्यपि ‘‘**निन्दन्तो वैदिकान् मन्त्रान् सर्वभूतपतिं हरम् अपूजयन् दक्षवाक्यं मोहिताः विष्णुमायया देवाश्च सर्वे भागार्थम् आगता वासवादयः. न अपश्यन् देवम् ईशानम् ऋते नारायणं हरिम्**’’ (कूर्मपुरा.१।१५।२०-२१) नारायणं विना अन्ये न अपश्यन् नारायणस्तु सर्वात्मा अपश्यदेव इति भावः. एवम् अवास्तववेदार्थकथनं तत्र अनुमतिञ्च आलोक्य वेदगर्भो अन्तरधाद् इति आह ‘‘**हिरण्यगर्भो भगवान् ब्रह्मा ब्रह्मविदां वरः पश्यतामेव सर्वेषां क्षणाद् अन्तरधीयत**’’ (कूर्मपुरा.१।१५।२२) पश्यतः सर्वान् अनादृत्य इति अर्थः. ‘‘**षष्ठी च अनादरे**’’ इति षष्ठी. अथ शिवमाहात्म्यप्रकाशनाय विष्णुना विधापितां यज्ञप्रवृत्तिम् आहः ‘‘**अन्तर्हिते भगवति दक्षो नारायणं हरिं रक्षकं जगतां देवं जगाम शरणं स्वयम्. प्रवर्तयामास च तं यज्ञं दक्षो अथ निर्भयः. रक्षको भगवान् विष्णुः शरणागतरक्षकः.**’’ (कूर्मपुरा.१।१५।२३-२४) एतावता अत्र अध्याये साक्षात् त्र्यक्षस्यैव प्रकरणं लिंगं श्रुतिः च उत्तरोत्तरं बलिष्ठानि स्पष्टतराणि उपलभ्यन्ते. नतु इह कलिभवभवावतारविशेषश्रीशङ्कराचार्यकथायाः गन्धोऽपि अस्ति. पातकस्य दण्डयोग्यतायाः च सत्त्वं शापबीजभूतं दर्शयति ‘‘**पुनः प्राह च तं दक्षं दधीचो भगवान् ऋषिः संप्रेक्ष्य ऋषिगणान् देवान् सर्वान् वै रुद्रविद्विषः ‘अपूज्यपूजने चैव पूज्यानां चापि अपूजने नरः पापम् अवाप्नोति महद् वै न अत्र संशयः. असतां प्रग्रहो यत्र सतां चैव अवमानना दण्डो दैवकृतः तत्र सद्यः पतति दारुणः**’ ’’ (कूर्मपुरा.१।१५।२५-२७) ऋषिगणान् वृषध्वजम् अमन्यमानान् देवान् च यज्ञभागार्थम् आगतान् वासवादीन् देवम् ईशानम् अपश्यतः सर्वानपि ईश्वरविद्विषः सम्यक् प्रेक्ष्य प्राह एतेन कलौ ईश्वरविद्विषः शङ्कराचार्यद्वेषिणो भविष्यन्ति इति व्याख्यानमनोरथो अपास्तः. ईशानादर्शित्वाद् **अपूज्यानां** वासवादीनां **पूजने**, **पूज्यानां** रुद्रादीनाम्, **असतां** तमसा आविष्टत्वाद् वैदिकमन्त्रनिन्दकानाम् ऋषीणाम्, **सतां** वास्तववेदार्थवादिनाम्, **दारुणो दण्डः** पुरस्ताद् अध्वरविध्वंसनरूपः. इत्थं दक्षे दण्डसम्भवं प्रदर्श्य तदनुयायिनो ब्राह्मणान् शशाप इति आह ‘‘**एवम् उक्त्वा स विप्रर्षिः शशाप ईश्वरविद्विषः समागतान् ब्राह्मणान् तान्**

दक्षसाहाय्यकारिणः’’ (कूर्मपुरा.१।१५।२८) अयोग्यस्यापि दक्षवचनस्य **‘बाढम्’** इति उक्त्या स्वीकारेण साहाय्यकारिणः **ईश्वरविद्विषः शशाप** इत्यनेनापि तात्कालिकशिवद्वेषशालिनामेव शापोद्देश्यत्वं स्पष्टं बोधितं नतु त्वदिष्टम्. पूर्वश्लोकद्वयं दक्षं प्रति उक्तम् इदन्तु समागतान् ब्राह्मणान् प्रति उच्यते तेन दक्षं प्रति दधीचेन इति सहस्राक्षोक्तिः प्रत्युक्ता. सहेतुनिर्देशं शापाकारम् आहः ‘‘**यस्माद् बहिष्कृतो वेदाद् भवद्भिः परमेश्वरः, विनिन्दितो महादेवः शङ्करो लोकवन्दितः, भविष्यन्ति त्रयीबाह्याः सर्वेऽपि ईश्वरविद्विषः निन्दन्ति इह ऐश्वरं मार्गं कुशास्त्रासक्तचेतसः, मिथ्याधीतसमाचाराः मिथ्याज्ञान-प्रलापिनः, प्राप्य घोरं कलियुगं कलिजैः परिपीडिताः, त्यक्त्वा तपोबलं कृत्स्नं गच्छध्वं नरकान् पुनः. भविष्यति हृषीकेशः स्वाश्रितोऽपि पराङ्मुखः.’ एवम् उक्त्वा तु विप्रर्षिः विरराम तपोनिधिः जगाम मनसा रुद्रम् अशेषाघविनाशनम्**’’ (कूर्मपुरा.१।१५।२९-३३) परमेश्वरः सर्वमूलभूतोऽपि भवद्भिः यस्माद् ‘‘**न मन्त्राः भार्यया सार्धम्**’’ इत्यादिदक्षवाक्यपूजनेन वेदाद् बहिष्कृतः तथा सूर्यादिमूर्तिभिः शङ्करः सर्वेषां शुभकर्ता सर्वलोकैः वन्दितोऽपि महादेवो ‘‘**नग्नः कपालि**’’ इत्यादिवाक्यपूजनेन **विनिन्दितः.** ‘‘**निन्दन्तो वैदिकान् मन्त्रान् सर्वभूतपतिं हरम्**’’ इति पूर्वम् उक्तेः च. तस्माद् भवन्तएव त्रयीबाह्याः भविष्यन्ति. पूर्वश्लोकोक्तस्य ‘भगवच्छ’ब्दस्यैव अत्र विभक्तिविपरिणामेन अन्वयात् समक्षवचनेऽपि **‘भविष्यन्ति’** इति प्रथमपुरुषः. ‘भगवच्छ’ब्दान्वयम् अन्तरेण **‘यस्माद्’** इति हेतुहेतुमद्भावानुपपत्तेः. कतिषुचित् पुस्तकेषु ‘‘भविष्यध्वं त्रयीबाह्याः’’ इति पाठः. आत्मनेपदं ‘‘**गच्छध्वं नरकान् पुनः**’’ इत्यत्रैव आर्षम्. अतोऽपि वैष्णवाग्रे शाङ्करमतखण्डनात् त्रयीबाह्याः भविष्यन्ति इति वचनाशयो नैव शक्यकल्पनः. ‘त्रयीबाह्य’ शब्दश्च उक्तचरकापालिकादिपरएव. ‘‘**न वेदबाह्ये पुरुषे**’’ इत्याद्युदाहृतपूर्वकौर्मवचनसन्दर्भात्. ‘‘**तथा पाशुपतं शास्त्रं त्वमेव कुरु सत्कृतः! कंकालशैवपाषण्डमहाशैवादिभेदतः अलक्ष्यं मतं सम्यग्वेदबाह्यं नराधमाः भस्मास्थिधारिणः सर्वे भविष्यन्ति न संशयः. त्वां परत्वेन वक्ष्यन्ति सर्वशास्त्रेषु तामसाः**’’ (पद्मपुरा.६।२३५।३१-३३) इत्यादिभ्यो निर्दिष्टस्थलपाद्मादिवचनेभ्यः च. तथा इह यज्ञे **सर्वेऽपि** ऋषयो देवाः च **ईश्वरविद्विषः** शिवद्वेषिणः सन्त **ऐश्वरं**

मार्गं वैदिकाहुतिभिः **शिवयजनादिलक्षणं** निन्दति. “**सर्वेष्वेव हि यज्ञेषु न भागः परिकल्पितः**” (कूर्मपुरा.१।१५।८) इति दक्षवाक्यस्य पूजनेन तमसाविष्टतया वृषध्वजस्य अवमानेन च अविद्यमानदोषारोपविषयं कुर्वन्ति. अतो “**हृषीकेशः पराङ्मुखो भविष्यति**” इति अग्रे वक्ष्यते. अत्र हेतून् अनुवदति ‘**कुशास्त्र**’ इत्यादिपदत्रयेण. कुशास्त्राणि तामसानि वेदबाह्यशास्त्राणि इति दर्शितं प्राक्. तदासक्तिमन्तरा मनसि तमआवेशायोगात्. पूर्वं तदाविष्टमनस्कताकथनेन निष्पद्यमानस्यैव अयम् अनुवादः. वस्तुतस्तु कुशास्तरि “**सर्वेष्वेव हि यज्ञेषु**” इत्यादिना कुत्सितशासनकर्तरि दक्षासक्तं चेतो येषां ते इत्येव युक्ततरं भाति. शास्त्राणाम् इह विशेषतः प्रसक्त्यभावात्, तस्यैव साहाय्यकरणाद्, वैदिकमन्त्रान् सर्वभूतपतिं हरञ्च निन्दित्वापि तद्वाक्यस्यैव पूजनात् च, सिद्धमेव एतद् अनूद्यते. ‘**चेतसः**’ इत्यत्र ‘मानसाः’ इति पाठान्तरम्. यद्यपि “**तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां च अनिटौ**” (पाणि.सू.बा.म.६।४।१) इति औणादिकसूत्रेण “**शासेः क्षदादित्वात् शासि क्षदादिभ्यः**” (पाणि.सू.६।४।११) इति शेखरोक्तपाठान्तराद् वा शासेः तृचि संज्ञायामेव शास्ता इति युक्तं. “**मुनीन्द्रः श्रीघनः शास्ता**” (अम.को.१।१।१४) इति अमरोक्तेः. तथापि बुद्धसंज्ञायामेव इति न शक्यं वक्तुम्. ‘मैत्रावरुणा’ख्यः ऋत्विग्विशेषपर्याये ‘प्रशास्तृ’शब्दे इडभावानुपपत्तेः. बाहुलकात् संज्ञायां च अनिटौ इति चकाराद् वा असंज्ञायामपि स्वीकारेतु नियामकपर्यायोऽपि साधुः. अतएव “**शास्ता सम्मतभद्रेन अशासके पुनः अन्यवद्**” (   ) इति विश्वमेदिन्यौ. प्रकृतसूत्र-मनोरमा-तत्त्वबोधिन्यादिष्वपि अस्य कोशस्य प्रमाणत्वेन संग्रहात् शासकवाचित्वमपि असन्दिग्धमेव. “**चान्द्रे शासेःक्तिचिशिष्टिः**” इत्यत्र ‘शास्ते’ति प्रत्युदाहरता रत्नमतिनातु “**अनौणादिकतृचोपि इडभावो व्याकरणान्तरसम्मतः**” इति दर्श्यते. पुराणादिषुतु श्रीभागवतादिषु “**शास्ता च उत्पथगामिनाम्**” (भाग.पुरा.१।१२।२६) “**खलानां मयि शास्तरि**” (भाग.पुरा.१।१७।९) “**शास्ता अभिगोप्ता नृपतिः प्रजानाम्**” (भाग.पुरा.५।१०।२३) “**कति सन्ति इह शास्तारः?**” (भाग.पुरा.६।३।५) “**शास्तारो दण्डधारिणः**” (भाग.पुरा.६।३।५) इत्यादिस्थलेषु ‘शास्तृ’ शब्दस्य प्रचुरप्रयोगदर्शनात् पौराणिकपरिभाषयापि अत्र

तत्प्रयोगो निर्बाधएव. ननु अध्ययन-सदाचाराभ्यां सम्पन्नानां कथं कुशास्त्रेषु कुशास्तरि वा आसक्तिः ? इत्यतः आह **मिथ्याधीत** इति, **अधीतं** वेदादिकम् अध्ययनं वा नपुंसके भावे क्तः, **समाचारः** सन्ध्यावन्दनाद्यनुष्ठानं, मिथ्या अधीतः समाचारौ येषां ते तथा, अथवा मिथ्यैव अधीतः समाचारो वेदव्रतोपदेशपरो ग्रन्थो यैः इत्येव मुख्यो अर्थः. अन्यथा "**सहस्रशो अथ शतशो बहुशो भूयएव हि निन्दन्तो वैदिकान् मन्त्रान्**" (कूर्मपुरा.१।१५।२०) इत्यस्य अयोगात्. ननु ज्ञानिनाम् अध्ययनानुष्ठानयोः समाचाराध्ययनस्य वा कथं वैयर्थ्यम् इति चेत्, तत्र आहः **मिथ्याज्ञान** इति. "**नग्नः कपाली विदितो विश्वात्मा न उपपद्यते**" (कूर्मपुरा.१।१५।११) इत्यादिदक्षवाक्यस्य '**बाढम्**' इति स्वीकारात् पूजनात् च, वास्तवज्ञानिनां तमआवेशस्य मायया मोहस्य च अयोगात्. इहतु "**तमसाविष्टमानसाः**" (कूर्मपुरा.१।१५।११) इति "**मोहिता विष्णुमायया**" (कूर्मपुरा.१।१५।२०) इति च उक्तत्वात् तथा इति भावः. अतः इदं पदद्वयमपि सिद्धस्यैव अर्थस्य अनुवादकम्. एवम् अनूद्य तत्फलं दर्शयितुं पुनः शपति **प्राप्य घोरम्** इति. अनूदितहेतूनाम् इह अवरोहक्रमेण फलानि उच्यन्ते. यस्माद् एवं तस्माद् **घोरं कलियुगं प्राप्य** मिथ्याज्ञान-प्रलापित्वेन दोषप्लोषकतात्त्विकज्ञानाभावात् **कलिजैः** दोषैः मद्यपानादिभिः परितः पीडिताः सन्तो मिथ्याधीतसमाचारत्वाद् अशेषं **तपोबलं त्यक्त्वा** तत्त्यागात् कुशास्त्रेषु कुशासनकर्तरि वा आसक्तमानसत्वाच्च नरकान् प्राप्नुत. यस्माच्च भवन्तः **सर्वेऽपि ईश्वरविद्विषः** सन्तः **ऐश्वरं मार्गं निन्दन्ति** तस्माद् इदानीं स्वाश्रितः यज्ञरक्षार्थं स्वेन आत्मना आत्मीयेन दक्षेण वा **आश्रितोऽपि हृषीकेशः पराङ्मुखो भविष्यति**. हरिहरयोः अभेदेन हरद्वेषे हरिद्वेषस्य हरेज्यायाम् अविद्यमानदोषारोपेण हरीज्यानिन्दनस्य च सिद्धेः इति भावः. अयमपि शापएव. स्वाभिन्नशिवद्वेषिषु भवत्सु प्रवृत्तं मच्छापं समर्थोऽपि सो अन्यथा न करिष्यति इति निगर्वः. हृषीकेशे पराङ्मुखे भवताम् अन्तःकरणं बाह्येन्द्रियाणि च सत्कर्मसु न प्रवर्तिष्यन्ते. तद्वैमुख्ये सकलदुष्फलसम्भवइति न अतः परं शप्तव्यम् अतो **विरराम** इति **सूतः आह** "**एवम् उक्त्वा**" इति. "**भविष्यति हृषीकेशः**" (कूर्मपुरा.१।१५।३२)

इति शापानुरोधादेव तस्मिन् यज्ञे विष्णोः गरुडरूपेण पराङ्मुखीभावः स्वयमपि यज्ञस्य अनिर्वहणं च अग्रे अस्मिन्नेव अध्याये वर्ण्यते. एवञ्च इह त्रयीबाह्यत्वं[१] कलिजदोषपरिपीडितत्वं[२] तपोबलत्यागो[३] नरकप्राप्तिः[४] यज्ञरक्षार्थं प्रार्थितस्यापि विष्णोः पराङ्मुखत्वं[५] च इति पञ्चैव दक्षयज्ञे शिवद्वेषादिकर्तृषु शापस्य विषयाः. ईश्वरद्वेषादेः तद्धेतुतयैव अनुवादः इति सिद्धम्. तदेतत्सर्वम् अनुसन्धाय उक्तं मूले **तथाहि कूर्मपुराण** इत्यादिना **प्रलपितम् अपास्तम्** इत्यन्तेन. अत्र **यः शिवद्वेषः** इति वेदाप्रतिपाद्यत्वादिकथनरूपः सः, प्रकरणस्वारस्यात्. तेन कलिमलहर्तरि श्रौतधर्मवक्तरि च तस्मिन् अनभिरञ्जनम् इति कल्पनम् अपास्तम्. 'यच्छ'ब्दो लिंगविपरिणामेन शिवनिन्दा-शिवमार्गनिन्दयोरपि अन्वेति. **तत्सर्वमनूद्य** इति, ''**यस्माद् बहिष्कृतो वेदाद्**'' इत्यनेन ''**शिवद्वेषं विनिन्दितो महादेव**'' (कूर्मपुरा.१।१५।२९) इत्यनेन तन्निन्दां ''**निन्दन्ति इह ऐश्वरं मार्गम्**'' (कूर्मपुरा.१।१५।३०) इत्यनेन तद्यजनलक्षणमार्गनिन्दां च अनूद्य इति अर्थः. **कुशास्त्र...** इत्यादि '**आदि** पदं मिथ्याज्ञानप्रलापित्वसंग्राहकम्. 'यच्छ'ब्दनियन्त्रितप्रकृतशिवद्वेषादिपरामर्शिना तत् सर्वम् इति 'तच्छ'ब्देन ''शिवो मोहनाय अवतीर्णः'' इतिकथनात् शाङ्करमतखण्डनादेः न इह सम्बन्धगन्धोऽपि इति द्योतितम्. तदेव आहुः **ननु तत्र शङ्करोक्त**...इति शङ्कराचार्यव्याख्यातश्रुत्यर्थस्य इति अर्थः.

इदम् उपक्रमबलात् समर्थितम् उपसंहारबलाद् भूयः समर्थ्यते. तथाहि : ''**जगाम मनसा रुद्रम्**'' (कूर्मपुरा.१।१५।३३) इति शापदानजन्यपापलोपनार्थं शापनिर्वहणार्थं च शिवं प्रत्येव मनसा गमनं ज्ञायते. एतदग्रेच अनुपदमेव ''**एतस्मिन् अन्तरे देवी महादेवं महेश्वरं पतिं पशुपतिं देवं ज्ञात्वा एतत् प्राह सर्वदृक्**'' (कूर्मपुरा.१।१५।३४) एतद् दाधीचशापादिदक्षयज्ञवृत्तं ज्ञात्वा तद्वचननिर्वाहार्थं प्राह इति अर्थः यतः सर्वदृक्. ''**देव्युवाच 'दक्षो यज्ञेन यजते पिता मे पूर्वजन्मनि विनिन्द्य भवतो भावम् आत्मानं चापि शङ्कर!**'' (कूर्मपुरा.१।१५।३५) **भवतो भावं** वेदेषु सत्तां, संहरणस्वभावं नग्नतयावस्थान-कपालधारणादिचेष्टां च विनिन्द्य तथा **भवतः आत्मानं**

विश्वात्मत्वाष्टमूर्तित्वादिगुणविशिष्टं विग्रहं च **विनिन्द्य** इति अर्थः. ‘‘**देवाः महर्षयश्च आसन् तत्र साहाय्यकारिणः विनाशय आशु तं यज्ञं वरम् एतं वृणोमि अहम्**’’ (कूर्मपुरा.१।१५।३६) **तत्र** पूर्वोक्तनिन्दापूर्वकयज्ञे. एतेन महर्षिकृता शापहेतुभूता निन्दापि साक्षाच्छिवस्यैव इति निश्चीयते. ‘‘**दण्डो दैवकृत**’’ इति दाधीचवचननिर्वाहार्थं ‘**विनाशय**’ इति प्रार्थनम्. ‘‘**एवं विज्ञापितो देव्या देवदेवः परः प्रभुः ससर्ज सहसा रुद्रं दक्षयज्ञजिघांसया**’’ (कूर्मपुरा.१।१५।३७) एतेनापि असन्दिग्धं साक्षाच्छिवस्यैव प्रकरणम्. ततः श्लोकद्वयेन सृष्टस्य स्वरूपम् आयुधानि च निरूप्य उच्यते. ‘‘‘**वीरभद्र**’**इतिख्यातं देवदेवसमन्वितम्. स जातमात्रो देवेशम् उपतस्थे कृताञ्जलिः. तम् आह ‘दक्षस्य मखं विनाशय शिवो अस्तु ते. विनिन्द्य मां स यजते गंगाद्वारे गणेश्वरः**’’’ (कूर्मपुरा.१।१५।४०-४१) द्वितीयान्तानां **ससर्ज** इति पूर्वेण अन्वयः. **देवेशं** शिवम्. ‘‘**शिवो अस्तु**’’ इति पुंस्त्वम् आर्षम्. विनाशने हेतुः ‘**विनिन्द्य**’ इति. **सः मां विनिन्द्य यजते** इति उक्त्यापि पूर्वोक्तनिन्दादीनां श्रीमहादेवविषयकत्वमेव दृढीभवति. अग्रे ‘‘**ततो बन्धप्रमुक्तेन सिंहेन एकेन लीलया वीरभद्रेण दक्षस्य विनाशम् अगमत् क्रतुः. मन्युना च उमया सृष्टा भद्रकाली महेश्वरी. तया च सार्धं वृषभं समारुह्य ययौ गणः**’’ (कूर्मपुरा.१।१५।४२-४३) अत्र भद्रकालीसाहित्यकथनेन ‘**देवीशापविनिर्दग्धाः**’ (कूर्मपुरा.१।३०।२७) इति त्रिंशाध्यायस्थव्यासवचने **देवीशा(?)** देवीशेन वा भद्रकालीपतिना वीरभद्रेण **अपविनिर्दग्धाः** इति अर्थः साधुः, देवीशेन शिवेनैव वीरभद्रद्वारा इति वा. अग्रे श्लोकचतुष्टयेन रोमजाख्यैः अन्यैः रुद्रगणैः सपत्नीकैः परिवारितस्य तस्य यज्ञदेशं प्रति ससमारम्भं गमनं वर्णयित्वा उच्यते, ‘‘**उवाच सप्रियो रुद्रैः वीरभद्रः स्मयन्निव ‘वयंहि अनुचराः सर्वे शर्वस्य अमिततेजसः भागार्थं लिप्सया प्राप्ताः भागान् यच्छध्वम् इप्सितान्. अथ चेत् कस्यचिद् इयं माया मुनिवरोत्तमाः भागो भवद्भ्यो देयस्तु न अस्मभ्यम् इति कथ्यताम् तं ब्रूत आज्ञापयति यो विनङ्क्ष्यामो वयं ततः**’’ (कूर्मपुरा.१।१५।५०-५३) **सप्रियः** भद्रकालीसहितः, ‘रुद्रैः सह’ इति शेषः. स्वस्य सवर्गस्य शर्वानुचरत्वं प्रकाश्य यज्ञभागानां प्रार्थनेन पूर्वम् उक्ता **ऐश्वरमार्गनिन्दा** रुद्रभागप्रतिबन्धरूपैव

नतु शङ्कराचार्यमतखण्डनरूपा इति असन्दिग्धम् अवगम्यते. **“अथ चेद्”** इत्यत्र इयं सगणरुद्रभागावरोधनरूपा यदि **कस्यचिद् माया** कपटं दम्भो दर्पो वा स्यात् तदा भवद्भ्योः रुद्रानुचरेभ्यस्तु “भागो न देय” इति **अस्मभ्यं कथ्यतां** तथा चेद् यो अस्मद्भागप्रतिषेधम् **आज्ञापयति तं** निर्दिशत ततो वयं तं **विनंक्ष्यामो** विनाशयिष्यामः अन्तर्भावितण्यर्थः प्रयोगः. चतुर्थचरणे “वेत्स्यामो हि वयन्तु तम्” इति पाठान्तरम्. तं शिवयजनस्य प्रतिषेद्धारं वेत्स्यामः कीदृक् समर्थः सइति परीक्षिष्यामहे. ततः एवम् उक्ता गणेशेन प्रजापतिपुरःसराः **“देवा ऊचुः ‘प्रमाणं वो न जानीमो भागे मन्त्रा इति प्रभुम्”** (कूर्मपुरा.१।१५।५४) **प्रजापतिः** दक्षः **मन्त्राः वो** युष्माकं **भागे प्रमाणं** सन्ति इति **न जानीमः**. यज्ञेषु रुद्रभागो मन्त्रप्रमितो न अस्ति इति भावः. इति **प्रभुं** वीरभद्रम् ऊचुः इति अर्थः. ततः मन्त्रा ऊचुः **“सुराः यूयं तमोपहतचेतसः ये न अध्वरस्य राजानं पूजयेयुः महेश्वरम्. ईश्वरः सर्वभूतानां सर्वदेवतनुः हरः पूज्यते सर्वयज्ञेषु सर्वाभ्युदयसिद्धिदः. एवम् उक्ता महेशानं मायया नष्टचेतसः. न मेनिरे ययुः मन्त्रा देवान् मुक्त्वा स्वम् आलयम्”** (कूर्मपुरा.१।१५।५४-५७). **ये न अध्वरस्य** इति, ये यूयं अध्वरस्य राजानमपि महेश्वरं न पूजयेयुः पूजयेत. **‘पूजयेयुः’** इति पुरुषव्यत्ययः आर्षः, अन्यत् स्पष्टम्. एवं साक्षान्मन्त्रैः उक्ताः अपि देवाः भगवन्मायया नष्टचेतस्त्वाद् महेशानं तथात्वेन न मेनिरे. ततो मन्त्राः देवान् मुक्त्वा स्वस्थानं ययुः. एतेनापि साक्षात् शिवे विद्यमाना अध्वरराजत्व-सर्वभूतेश्वरत्व-सर्वदेवाभिन्नत्व-सर्वयज्ञपूज्यत्वादयः धर्माः मन्त्र-प्रतिपादिताअपि देवैः न स्वीकृताः इति वर्णनेन साक्षात् शिवस्यैव उक्तविधैव निन्दा प्रकृतकलहबीजमिति फलति. नतु एतत् शंङ्कराचार्यपरतया उपपद्यते नापि निर्विशेषवाद-विवर्तवादादिखण्डनम् इह तद्बीजं प्रतीयते. अग्रे च **“ततः स रुद्रो भगवान् सभार्यः सगणेश्वरः स्पृशन् कराभ्यां विप्रर्षिं दधीचं प्राह देवता ‘मन्त्राः प्रमाणं न कृता युष्माभिः बलदर्पितैः यस्मात् प्रसह्य तस्माद् वो नाशयामि अद्य गर्विताम्.’ इति उक्त्वा यज्ञशालां तां ददाह गणपुंगवो गणेश्वराश्च संक्रुद्धाः यूपान् उत्पाट्य आचिक्षिपुः. वीरभद्रोऽपि दीप्तात्मा शक्रस्यैव उद्यतं करम् व्यष्टं भयददीनात्मा तथा**

अन्येषां दिवौकसाम्'' (कूर्मपुरा.१।१५।५७-६२) इत्यादिना ''**मुनीनपि मुनीश्वराः**'' (कूर्मपुरा.१।१५।६५) इत्यन्तेन यज्ञभंगो वर्णितः. अत्र वज्रस्तम्भनस्य वर्णनेन ''**देवीशापविनिर्दग्धा**'' (कूर्मपुरा.१।३०।२७) इति त्रिंशाध्यायवाक्यस्य '**अपविः**' निर्वज्रं यथा स्यात् तथा इति अर्थान्तरमपि निर्बाधमेव. ततः ''**भविष्यति हृषीकेशः**'' (कूर्मपुरा.१।१५।३२) इति शापस्य फलं प्रदर्श्यते ''**तथा विष्णुं सगरुडं समायान्तं महाबलः विव्याध निशितैः बाणैः स्तम्भयित्वा सुदर्शनम्. समालोक्य महाबाहुः आगत्य गरुडो गणं जघान पक्षैः सहसा ननाद अम्बुनिधिः यथा. ततः सहस्रशो रुद्रः ससर्ज गरुडान् स्वयं वैनतेयाद् अभ्यधिकान् गरुडं तं प्रदुद्रुवुः. तान् दृष्ट्वा गरुडो धीमान् पलायत महाजवः विसृज्य माधवं वेगात् तद् अद्भुतमिव अभवत्. अन्तर्हिते वैनतेये भगवान् पद्मसम्भवः आगत्य वारयामास वीरभद्रं च केशवम्**'' (कूर्मपुरा.१।१५।६४-७०). अत्र सुदर्शनस्तम्भनं विष्णुनापि यज्ञरक्षायाः अनिर्वाहः च निरूपितः. तदेतत् सर्वं विष्णोः सामर्थ्याभावमूलकमिति नहि केनापि निर्मत्सरेण शक्यं वक्तुम्, किन्तु भेदबुद्धेः फलं दर्शयितुं शापं सार्थकयितुं च हरेः एतत्पाराङ्मुख्यमेव. अतएव गरुडरूपेणापि पराङ्मुखतया गमनम्. अन्यथा ''**वैनतेयश्च पक्षिणाम्**'' (भग.गीता १०।३०) इति गीतावाक्याद् भगवद्रूपस्य तस्य तथा पाराङ्मुख्यं न संगच्छेत. अतएव तद् **अद्भुतमिव अभवद्** इति तादृश वृत्तान्तस्य अद्भुतत्वम् उच्यते. वस्तुतस्तु शापं सफलयितुं भगवतैव तथाकृतम् अतो न अद्भुतम् इति ज्ञापनाय '**इव**' शब्दः. **धीमान्** इति गमनस्य बुद्धिपूर्वकत्वज्ञापनार्थम्. देवैः मन्त्राणां तिरस्करणात् छन्दोमयगरुडरूपेणैव पराङ्मुखतया गमनम्. स्वयन्तु अनिर्वहणरूपं पराङ्मुखत्वम् अवलम्बितम्. स्वातन्त्र्यबोधनायैव **अन्तर्हिते वैनतेये** इति स्वेच्छया अन्तर्धानं वर्ण्यते. अथ भगवतएव स्वाभिन्नशिवमाहात्म्यं प्रचिकाशयिषतो मायया देवादीनां व्यामोहाद् इदम् अभूद् अतः शिवस्य तत्र आगमनं विष्णुमायारूपायाः उमायाः विशेषतः स्तवनं ततः क्लेशोपशमनं च प्रतिपाद्यते ''**प्रसादयामास**'' इत्यादिना. तस्या विष्णुमायारूपत्वन्तु ''**या देवी सर्वभूतेषु 'विष्णुमाये'ति शब्दिता**'' (देवीसू.६) इति सप्तशतीवाक्याद् ''**विष्णोः माया भगवती यया सम्मोहितं जगद् आदिष्टा प्रभुणा अंशेन**

कार्यार्थे सम्भविष्यति” (भाग.पुरा.१०।१।२५) इति भागवतवाक्याच्च. श्लोकास्तु “**प्रसादयामास च तं गौरवात् परमेष्ठिनः संस्तूय भगवान् ईशं शम्भुः तत्र अगमत् स्वयम्. वीक्ष्य देवाधिदेवं तम् उमां सर्वगणैः वृतां तुष्टाव भगवान् ब्रह्मा दक्षः सर्वे दिवौकसः. विशेषात् पार्वतीं देवीं शङ्करार्द्धशरीरिणीं स्तोत्रैः नानाविधैः दक्षः प्रणम्य च कृताञ्जलिः. ततो भगवती देवी प्रहसन्ती महेश्वरं प्रसन्नमनसा रुद्रं वचः प्राह घृणानिधिः ‘त्वमेव जगतः स्रष्टा शासिता चैव रक्षिता. अनुग्राह्यो भगवता दक्षश्चापि दिवौकसः.’ ततः प्रहस्यन् भगवान् कपर्दी नीललोहितः उवाच प्रणतान् देवान् प्राचेतसम् अथो हरः ‘गच्छध्वं देवताः सर्वाः प्रसन्नो भवताम् अहम् सम्पूज्यः सर्वयज्ञेषु न निन्द्यो अहं विशेषतः. त्वं चापि शृणु मे दक्ष! वचनं सर्वरक्षणं ‘त्यक्त्वा लोकैषणाम् एतां मद्भक्तो भव यत्नतः भविष्यसि गणेशानः कल्पान्ते अनुग्रहाद् मम. तावत् तिष्ठ मम आदेशात् स्वाधिकारेषु निर्वृतः.’ एवम् उक्त्वातु भगवान् सपत्नीकः सहानुगः अदर्शनम् अनुप्राप्तो दक्षस्य अमिततेजसः**” (कूर्मपुरा.१।१५।७०-८०). अत्रापि **‘सम्पूज्यः सर्वयज्ञेषु न निन्द्यो अहम्’**’ इति उक्त्या यज्ञभागराहित्यकथनलक्षणनिन्दायाः त्यागः सर्वयज्ञेषु आहुतिभिः सत्करणं च इत्येव प्रसादबीजम् अवगम्यते, नतु विवर्तवादादिरूपमतविशेषस्वीकरणम्. यच्च यज्ञस्य अरक्षणं तत् शापानुरोधेन हरेः पाराङ्मुख्यादेव नतु सामर्थ्याभावाद् इति ज्ञापयितुम्. हरिहरयोः अभेदो भगवतः प्रचिकाशयिषितं शिवमाहात्म्यं च ब्रह्ममुखेन प्रकाश्यते “**अन्तर्हिते महादेवे शङ्करे पद्मसम्भवः व्याजहार स्वयं दक्षम् अशेषजगतो हितम्. ब्रह्मोवाच ‘किन्तु अयं भवतो मोहः प्रसन्ने वृषभध्वजे! यद् आचष्टे स्वयं देवः पालयेत् त्वाम् अतन्द्रितः. सर्वेषामेव भूतानां सबीजं परमा गतिः स्तूयते वैदिकैः मन्त्रैः देवदेवो महेश्वरः. तम् अर्चयन्ति ये रुद्रं स्वात्मना च सनातनं चेतसा भावयुक्तेन ते यान्ति परमं पदम्. तस्माद् अनादिमध्यान्तं विज्ञाय परमेश्वरं मनसा कर्मणा वाचा समाराधय यत्नतः. यत्नात् परिहर ईशस्य निन्दां स्वात्मविनाशिनीम्. भवन्ति सर्वदोषाय निन्दकस्य क्रियाहि ताः. यस्तु चैष महायोगी रक्षको विष्णुः अव्ययः स देवो भगवान् रुद्रो महादेवो न संशयः. मन्यन्ते ये जगद्योनिं विभिन्नं विष्णुम्**

ईश्वराद् मोहाद् अवेदनिष्ठत्वात् ते यान्ति नरकं नराः. वेदानुवर्तिनो रुद्रं देवं नारायणं तथा एकीभावेन पश्यन्ति मुक्तिभाजो भवन्ति ते. यो विष्णुः स स्वयं रुद्रो यो रुद्रः स जनार्दनः इति मत्वा भजेद् देवं स याति परमां गतिम्. सृजत्येव जगत् सर्वं विष्णुः तस्य महेश्वरः इत्थं जगत् सर्वम् इदं जगद् नारायणोद्भवम्. तस्मात् त्यक्त्वा हरौ निन्दां हरेचापि समाहितः समाश्रय महादेवं शरण्यं ब्रह्मवादिनाम्.' उपश्रुत्या अथ वचनं विरञ्चस्य प्रजापतिः जगाम शरणं देवं गोपतिं कृत्तिवाससम्'' (कूर्मपुरा.१।१५।८०-९४). इत्येतावता साक्षात् शिवस्यैव इदं प्रकरणं नतु तदवतारपरिव्राड्विशेषवृत्तस्य अत्र सम्बन्धगन्धोऽपि इति उपसंहारबलादपि असन्दिन्धं सिद्धम्.

अग्रे च अनुपदं **''ये अन्ये शापाग्निनिर्दग्धाः दधीचस्य महर्षयः द्विषन्तो मोहिताः देवं सम्बभूवुः कलिषु अथ त्यक्त्वा तपोबलं कृत्स्नं विप्राणां कुलसम्भवाः पूर्वसंस्कारमाहात्म्याद् ब्रह्मणो वचनाद् इह. मुक्तशापाः ततः सर्वे कल्पान्ते रौरवादिषु निपात्यमानाः कालेन सम्प्राप्य आदित्यवर्चसम्. ब्रह्माणं जगताम् ईशम् अनुज्ञाताः स्वयम्भुवा. समाराध्य तपोयोगाद् ईशानं त्रिदशाधिपम्. सम्बभूवुः यथा पूर्वं शङ्करस्य प्रसादतः.''** (कूर्मपुरा.१।१५।९०-९३) इति शप्तानां मुनीनाम् अतिक्रान्तकलियुगेषु जन्मादिकं शापमुक्तिं च वर्णयित्वा अध्यायः उपसंहृतः. एतद्विषये मूले अग्रे किञ्चिद् वक्ष्यते तत्रैव विशेषं दर्शयिष्यामः.

> **(२) यदि ''शप्ताः कीदृशा?'' इति कस्यचिद् जिज्ञासा स्याद् ''इत्थंभूताः शप्ताः ज्ञेयाः'' इति उत्तरं वा भवेत् तदा लक्षणपरत्वं तादृशप्रकरणस्य स्यात्. तस्माद् लक्षणपरत्वं तादृशानां वर्णयन् प्रतारकएव इति अवधेयम्. स्वकपोलकल्पनयापि तेषां लक्षणत्वं न सम्भवति. अतिव्याप्त्यादिदोषग्रस्तत्वाद् इति उच्यते. लक्षणचतुष्टयन्तु पूर्वं निरस्तम्.**

(३) प्रकृतसन्दर्भस्य लक्षणपरत्वं वारयितुं स्पष्टं युक्त्यन्तरम् आहुः **यदि शप्ताः** इत्यादि. **तादृशानाम्** इति उक्तरीतिकार्थान्तरपरवचनानाम्. **प्रतारकएव** इति **“मोहयन्ति जनान् सर्वान्”** (कूर्मपुरा.१।३०।३१) इति कौर्मवाक्यार्थानुगमात् सएव तथा इति अर्थः. एवं चतुर्थलक्षणदूषणे प्रसंगात् पञ्चमषष्ठसप्तमलक्षणान्यपि निरस्तानि.

> **(२) पञ्चमलक्षणं मिथ्याधीत-सामाचारत्वं. तदपि न सम्भवति. तत्र मिथ्यैव अधीतः समाचारो यैः इति विग्रहः, तद्भावः तत्त्वम्. मिथ्या शब्दो भवन्मते अनिर्वचनीयवचनः, अतएव भवदीयैः मिथ्यात्वं सदसत्त्वानधिकरणत्वम् अनिर्वचनीयत्वम्. तद्धि किम् असत्त्वविशिष्टसत्त्वाभावः[१] उत सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावरूपं[२] धर्मद्वयं? सत्त्वात्यन्ताभाववत्त्वे सति असत्त्वात्यन्ताभावरूपं विशिष्टं[३] वा इति विकल्पत्रयम् उद्भाव्य तच्च सिद्धसाधनसाध्यवैकल्यादिदोषैः दूषयित्वा मैवम्, इत्यादिना सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावरूपधर्मद्वयएव निर्भरः कृतः. एवञ्च सदृशार्थं त्यक्त्वा शङ्करानभिमत इति अर्थं कुर्वतो अपसिद्धान्तः. समाचारो = वेदव्रतोपदेशपरो ग्रन्थः. अतएव श्रीशङ्कराचार्यैः “स्वाध्यायस्य तथात्वेनहि समाचारे अधिकाराच्च सववच्च तन्नियमः” (ब्र.सू.३।३।३) इति सूत्रे “स्वाध्यायस्यैष धर्मो न विद्यायाः. कथम् इदम् अवगम्यते? यतः तथात्वेन स्वाध्यायधर्मत्वेन समाचारे वेदव्रतोपदेशपरे ग्रन्थे, आथर्वणिका इदमपि वेदव्रतत्वेन समाख्यातम् इति समामनन्ति” (ब्र.सू.शां.भा.३।३।३) इति उक्तं. तत्रच शङ्करानभिमतत्वं दुरुपपादम् सर्वस्यैव वेदव्रतोपदेशपरस्य ग्रन्थस्य शङ्कराभिमतत्वात्. तदर्थावर्णनमात्रेणैव तदनभिमतत्वं चेत्, शङ्करावर्णितार्थकवेदव्रतग्रन्थाद्यध्ययनकर्तृषु दधीचादिषु अतिव्याप्तिः. दधीचोक्तिस्तु न शङ्कराभिमतसमाचाराभिप्रायेण किन्तु यतो भवद्भिः ईश्वरस्य निन्दा कृता अतो भवतां**

समाचाराध्ययनादिकं मिथ्या वृथैव इति उपालम्भः. यथा कश्चिद् धर्माचरणशीलः कुत्सितं कर्म कुर्यात् चेत् तदा तम् अन्यो उपालभेत ''तव धर्माचरणं वृथैव'' इति तथा इयम् उक्तिः. यदिच सम्यगाचारः समाचारो यथार्थः आचारः इति यावद्, धनार्जनादिरूपो नृपसेवादिरूपो गृहस्थाश्रमिणां विहितः इति उच्यते तदातु तत्तत्प्रतिपादकस्मृत्यध्ययनमपि तेषामेव शङ्कराभिमतं नतु संन्यासिनां तेषां सर्वसंन्यासस्यैव अभिमतत्वात्. तथाच धनार्जन-राजसेवादिपरे त्वयि अतिव्याप्तिः.

(३) पुनः प्रत्येकं तानि निराकरिष्यन्तः सहस्राक्षे एवं मिथ्याधीत-समाचारत्वमपि शङ्करानभिमताधीत-समाचारत्वम् इत्युक्तं पञ्चमलक्षणं दूषयन्ति **पञ्चमलक्षणम्** इत्यादिना **त्वयि अतिव्याप्तिः** इत्यन्तेन. **अनिर्वचनीयवचन** इति, ''**मिथ्याशब्दो... अनिर्वचनीयतावचनः**'' (ब्र.सू.शां.भा.पञ्चपा.१।१।१) इति पञ्चपादिकादिषु कथनात् तथा इति अर्थः. **भवदीयैः** इति अद्वैतसिद्धिकारादिभिः अस्य कृतः इति उत्तरेण अन्वयः. **तद्धि** सदसत्त्वानधिकरणत्वं हि **असत्त्वविशिष्ट**... इति, वैशिष्ट्यं सत्त्वस्य अभावस्य वा विशेषणम् अयं प्रथमः कल्पः, **धर्मद्वयम्** इति द्वितीयः, **विशिष्टम्** इति तृतीयः. तच्च विकल्पत्रयम्. **दूषयित्वा** इति, अद्वैतसिद्धौ प्रथमपरिच्छेदारम्भएव विप्रतिपत्तिप्रतिपादनोत्तरं ''**विमतं मिथ्या, दृश्यत्वाद्, जडत्वात्, परिच्छिन्नत्वात्, शुक्तिरूप्यवद्**'' (अद्वै.सि. परि.१) इति प्राचां प्रयोगान् उपन्यस्य ''**ननु किम् इदं मिथ्यात्वं साध्यते**'' इत्यादिना विकल्पत्रयम् उद्भाव्य ''**न आद्यः, सत्त्वमात्राधारे जगति असत्त्वविशिष्टसत्त्वानभ्युपगमाद्; विशिष्टाभावसाधने सिद्धसाधनात्. न द्वितीयः, सत्त्वासत्त्वयोः एकाभावे अपरसत्त्वावश्यकत्वेन व्याघाताद्, निर्धर्मकब्रह्मवत्सत्त्वासत्त्वराहित्येऽपि सद्रूपत्वेन अमिथ्यात्वोपपत्त्या अर्थान्तरात् च. शुक्तिरूप्ये अबाध्यत्वरूपसत्त्वव्यतिरेकस्य सत्त्वेन बाध्यत्वरूपासत्त्वस्य व्यतिरेकासिद्ध्या साध्यवैकल्यात् च. अतएव न तृतीयः, पूर्ववद् व्याघाताद्**

अर्थान्तरात् साध्यवैकल्यात् च" (अद्वै.सि.परि.१) इति दूषयित्वा इति अर्थः. **मैवम् इति**, "**मैवम्. सत्त्वात्यन्ताभावासत्त्वात्यन्ताभावरूपधर्मद्वयविवक्षायां दोषाभावाद्**" (अद्वै.सि.परि.१) इत्यादिना व्याहत्यादिकं परिहृत्य 'मिथ्या' शब्दस्य तादृशार्थकत्वे निर्भरः कृतः इति अर्थः. तथाच 'मिथ्या' शब्दस्य शङ्करानभिमतार्थकत्वमेव शङ्करानभिमतम् इति भावः. अत्र इदं बोध्यम्. **मिथ्याधीत-समाचारा** इत्यत्र किं मिथ्या अधीतं वेदादिकं समाचारो अनुष्ठानं च येषाम् इति अर्थः? आहोस्विद् भावप्रत्ययान्तसाहचर्येण भावार्थक-'क्त'स्वीकरणाद् अधीतम् अध्ययनम् इति उताहो पूर्वोक्तः? न आद्यौ, वेदादेः तदध्ययनस्य सन्ध्यावन्दनाद्यनुष्ठानस्य च शङ्करानभिमतत्वाभावात्. नच वैष्णवग्रन्थ-तदाचरणएव अत्र अधीत-समाचारौ कल्प्यौ मानाभावात् कपोलकल्पनामात्रस्य अनुपादेयत्वाद्, वैष्णवानां सिद्धान्ताचरणयोः वेदादिमूलकतायाः उपपादयिष्यमाणत्वात् च. तदध्ययनन्तु त्वयापि कृतम् अतः त्वयि अतिव्याप्तिः. समाचाराभावाद् अदोषः इति चेद्, वैष्णवानां भगवत्सेवाद्याचरणं वेदादिप्रमितं मनुषे न वा? आद्ये शङ्कराभिमतत्त्वं स्वीकुरु. द्वितीये त्वद्बुद्ध्या पापरूपे 'समाचार'शब्दो अशक्यः प्रयोक्तुम्. पातञ्जलाद्यनुयायिषु च अतिव्याप्तिः. "**एतेन योगः प्रयुक्त**" (ब्र.सू.२।१।३) इत्यादि स्थले योगस्य शङ्कराचार्यैः प्रत्युक्तत्वात्. नहि सकले जगति शप्तता सुवचा. एतेनैव पातञ्जलादिसूत्रव्याख्यातृषु वैष्णवाचारप्रतिपादकेषु भगवन्मन्त्रग्रहणाद्याचारवत्तया पुराणादौ प्रसिद्धेषु व्यासनारदादिषु अतिव्याप्तिः अवधेया. वस्तुतस्तु 'समाचार' शब्दस्य तथा व्याख्यानमेव शङ्करानभिमतम् अतः तृतीयएव विग्रहः आदर्तव्यः इति आशयेन आहुः **समाचार** इत्यादि, **शङ्कराचार्यैः** इति उक्तम् इति अग्रिमेण अन्वयः. "**स्वाध्यायस्य एषः इत्यादिः समामनन्ति**" (ब्र.सू.शां.भा.३।३।३) इत्यन्तः साधनाध्याये गुणोपसंहारपादे "**स्वाध्यायस्य**" (ब्र.सू.३।३।३) इति सूत्रस्य शङ्करभाष्यस्थो ग्रन्थः. वादिनि शङ्करानभिमताधीत-समाचारत्वं स्पष्टयितुं शङ्कराचार्याणामेव निर्देशः. वस्तुतस्तु रामानुजानां श्रीभाष्ये, भास्कराचार्याणां भेदाभेदभाष्ये, श्रीकण्ठशैवभाष्ये, भिक्षोः अविभागाद्वैतभाष्ये, तत्तदनुयायिवृत्तिषु च सएव **समाचार**शब्दार्थः. यद्यपि अस्माकीनभाष्ये मध्वभाष्यतत्त्वप्रकाशिकायां च सम्यगाचारइति अर्थोऽपि दृश्यते तथापि तत्

तव अनभिमतमेव इति किं तेन ते. तथाच कौर्मवाक्ये सम्यगाचारः समाचारः इति योगेन ‘**समाचार**’ शब्दो अनुष्ठानपरो भवता न शक्यो व्याख्यातुम्. भवन्नये ग्रन्थविशेषे तस्य रूढेः योगरूढेः वा सत्त्वात्. “**योगाद् रूढिः बलीयसि**” (लौकि.न्या.सा.६५६) इति सिद्धान्तात्. अन्यथा सूत्रेऽपि सो अर्थो माभूत. **तत्र च** इति समाचारग्रन्थे. **तदर्था...** इत्यादि समाचारग्रन्थार्थस्य. **तदनभिमतत्वम्** इति शङ्कराचार्यानभिमतत्वम्. **वेदव्रतग्रन्थादि...** इति ‘आदि’पदेन द्वादशोपनिषदतिरिक्तसकलवेदभागस्य संग्रहः. शङ्कराचार्यैः ईशावास्यादिदशोपनिषदां श्वेताश्वतर-नृसिंहतापनीययोः च इति द्वादशानामेव व्याख्यातत्वात्. तथाच तत् तत् शाखाध्यायिषु सर्ववैदिकेषु अतिप्रसङ्गः. वेदप्रामाण्यवादिनां तेषां वैदिकभागो न अनभिमतः इति चेद्, आथर्वणानां समाचारेऽपि तुल्यम्. एवञ्च असम्भवो लक्षणदोषः. अथ “**स्तोकं पाकः स्तोकं स्पृष्टः**” इत्यादिवद् ‘**अधीत**’इति कृदन्तस्य एकदेशेऽपि धात्वर्थे मिथ्याशब्दान्वयं स्वीकुर्याः तदापि असम्भवः तदवस्थः. तदध्ययने तदनभिमतत्वाभावात्. अध्ययने **तदनभिमतत्वं** नाम तदनभिमते इतिकर्तव्यताकत्वम् इति चेत् क्व तैः तदध्ययने इतिकर्तव्यता निरणायि इति दर्शय. अथ कौर्मवाक्यस्य वास्तवार्थम् आहुः. **दधीचोक्तिस्तु** इति. अतो वैदिकमन्त्रादिनिन्दानुमितसमाचाराध्ययनवैयर्थ्यानुवादाभिप्रायमेव **मिथ्याधीतसमाचाराः** इति सम्बोधनम् इति भावः. समाचारे शिरोव्रतस्यापि आम्नातत्वात् तस्यच रुद्रदेवताकतायाः कैश्चिद् अभ्युपगमाद् ऐश्वरमार्गं निन्दतां भवतां समाचाराध्ययनं वृथैव इति सम्बोधनाभिसन्धिः. त्वयातु आथर्वणभागप्रसिद्धस्य शिरोव्रतस्य भस्मोद्धलनरूपत्वमेव अभ्युपगतं स्वकृतशैवसुधाकरे द्वितीयकिरणे. अतो अत्र सन्तोष्टव्यम्. वस्तुतः तत्रत्य त्वदुक्तेः अयुक्ततातु सत्सिद्धान्तमार्तण्डादौ मया प्रपञ्चितइति कृतं प्रासङ्गिकेन. प्रस्तावनोक्तं छत्र-चामरादि-धनार्जनराजसेवादिकं स्मारयन्तो वादिन्येव लक्षणातिप्रसक्तिं वक्तुम् आहुः **यदिच** इत्यादि. ...**स्मृत्यध्ययनमपि** इति. नच तत्प्रतिपादकस्मृत्यभावः शङ्क्यः. “**राजान्तेवासियाज्येभ्यः सीदन् इच्छेद् धनं क्षुधा**” (याज्ञ.स्मृ.१।६।१३०) इति याज्ञवल्क्यादिभिः गृहस्थधर्मेषु तस्य स्मरणात्. **तेषामेव** इति गृहस्थानामेव. शेषे षष्ठी.

(२) मिथ्याज्ञानप्रलापित्वं शप्तानां षष्ठं लक्षणम् उक्तं तदपि लक्षणाभासएव दोषदुष्टत्वात्. कथम् इति चेत्, शृणु. ‘मिथ्या’पदस्य शङ्करानभिमतपरत्वं वर्णयतः तव पूर्वोक्तयुक्त्याः निगृहीतत्वसम्पादकत्वेन इति अवेहि. अन्येऽपि दोषाः यैः दुष्टत्वं लक्षणस्य तेऽपि उच्यन्ते. शङ्करानभिमतस्य प्रमाणादिषोडशपदार्थतत्त्वज्ञानस्य मोक्षहेतुत्वेन प्रतिपादके गौतमे अतिव्याप्तिः. नहि ‘‘शप्ताश्च गौतमेन ऊर्व्याम्’’ इति वदतः तव गौतमस्यापि विप्रशप्तत्वम् अभिमतं, ‘गौतमेन’ इति तृतीयया तस्य कर्तृत्वावगमात्. किञ्च ‘‘स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः’’ (पातं.यो.सू.२।२३) इति योगसूत्रस्य भाष्ये ‘‘पुरुषः स्वामी दृश्येन स्वेन दर्शनार्थं संयुक्तः तस्मात् संयोगाद् दृश्यस्य उपलब्धिः या स भोगः, या तु द्रष्टुः स्वरूपोपलब्धिः सो अपवर्गः’’ (पातं.यो.सू.भा.२।२३) इत्यादिना शङ्करानभिमततादृशज्ञानप्रतिपादकेषु व्यासेषु अतिव्याप्तिः च. एवं ‘‘धर्मविशेषप्रसूताद् द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायानां पदार्थानां साधर्म्य-वैधर्म्याभ्यां तत्त्वज्ञानाद् निःश्रेयसम्’’ (वैशे.सू.१।१।४) इत्यादिना पदार्थतत्त्वज्ञानस्य मोक्षहेतुत्वं वदति कणभुजि अतिव्याप्तिः. किञ्च तत्तदुक्तज्ञानाध्येतरि तत्तज्ज्ञानप्रलापिनि त्वयि अतिव्याप्तिः दुर्वारैव.

(३) अथ सहस्राक्षे मिथ्याज्ञानप्रलापित्वमपि शिवानभिमतज्ञानप्रलापित्वमेव इति उक्तं षष्ठं लक्षणं दूषयन्ति. **मिथ्याज्ञानप्रलापित्वं शप्तानां षष्ठं लक्षणम्** इत्यादिना **दुर्वारैव** इत्यन्तेन. **लक्षणाभासएव** इति, ‘‘**घञजपाः पुंसि**’’ ( ) इति ‘आभास’शब्दस्य क्लीबविशेषणत्वेऽपि पुंस्त्वानपायः. अयं भावः : पूर्वत्र ‘शङ्कर’शब्दस्य अत्र ‘शिव’शब्दस्य च प्रयोगेण शब्दभेदात् ‘‘**सोमेन यजेत**’’ ‘‘**दाक्षिणानि जुहोति**’’ ‘‘**हिरण्यमात्रेयाय ददाति**’’ (द्र.जै.मी.सू.शा.भा.२।२।१) इत्यादिवद्

वस्तुभेदम् अभिप्रेत्य साक्षात् शिवो अत्र विवक्ष्यते उत शङ्कराचार्यएव. आद्ये अस्माभिः उच्यमानं ज्ञानं न शिवानभिमतम्. चतुर्षु वैष्णवसम्प्रदायेषु अस्माकीनसम्प्रदायस्य शिवप्रवर्तितत्वात्. ‘‘**श्री-ब्रह्म-रुद्र-सनक-वैष्णवाः क्षितिपावनाः**’’(पद्मपुरा.   ) इति वक्ष्यमाणपद्मादिवचनेभ्यः. द्वितीयस्मिन् उभयत्र ‘मिथ्या’शब्दस्य त्वदुक्तार्थकत्वे मानाभावाद् अनास्थेयं पूर्वापरतदध्यायसन्दर्भविरोधाद् बाधितं च तथापि अभ्युपेत्य दूषयन्ति **पूर्वोक्तयुक्त्याः** इत्यादि, अपसिद्धान्तः इति पूर्वोक्तयुक्त्याः. **निगृहीतत्व...** इति, अपसिद्धान्तस्यापि निग्रहस्थानत्वाद् इति भावः. अतएव गौतमपञ्चलक्षण्यां ‘‘**प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञान्यासो हेत्वन्तरम् अर्थान्तरं निरर्थकम् अविज्ञातार्थम् अपार्थकम् अप्राप्तकालं न्यूनम् अधिकं पुनरुक्तम् अननुभाषणम् अज्ञानम् अप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगो अपसिद्धान्तो हेत्वाभासाः च निग्रहस्थानानि**’’ (गौ.न्या.सू.५।२।१) इति द्वात्रिंशद् निग्रहस्थानेषु अपसिद्धान्तमपि तत्त्वेन गणयित्वा ‘‘**सिद्धान्तम् अभ्युपेत्य अनियमात् कथाप्रसङ्गो अपसिद्धान्तः**’’ (गौ.न्या.सू.५।२।२३) इति सः लक्षितः. **प्रमाणादि...** इति, गौतमसूत्रेषुहि ‘‘**प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्ता-ऽवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानाद् निःश्रेयसाधिगमः**’’ (गौ.न्या.सू.१।१।१) इति षोडशपदार्थतत्त्वज्ञानाद् मोक्षाधिगमं प्रतिज्ञाय, कथं तेषां तत्त्वज्ञानाद् निःश्रेयसम्? इति आकाङ्क्षायां तेन मिथ्याज्ञानस्य नाशात् तन्नाशेन दुःख-जन्म-प्रवृत्ति-दोषाणाम् अवरोहक्रमेण नाशात् च तद् इति आशयेन ‘‘**दुःख-जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानानाम् उत्तरोत्तरापाये तदनन्तराभावाद् अपवर्गः**’’ (गौ.न्या.सू.१।१।१२) इति सूत्रयित्वा तेषां तत्त्वज्ञानसम्पादनाय ‘‘**प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि**’’ (गौ.न्या.सू.१।१।३) इत्यादिभिः एकोनचत्वारिंशता सूत्रैः प्रथमसूत्रोद्दिष्टपदार्थेषु निर्णयान्तान् नवपदार्थान् प्रथमाध्यायस्य प्रथमाह्निके लक्षयित्वा द्वितीयाह्निके वादादीन् सप्तपदार्थान् विंशत्या सूत्रैः लक्षयित्वा ‘‘**समानानेकधर्माध्यवसायाद् अन्यतरधर्माध्यवसायाद् वा न संशयः**’’ (गौ.न्या.सू.२।१।१) इत्यादिना ‘‘**हेत्वाभासाः च यथोक्ताः**’’ (गौ.न्या.सू.५।२।२४) इत्यन्तेन अध्यायचतुष्टयेन तएव पदार्थाः सप्रपञ्चं

परीक्षिताः. तत्र “**इच्छा-द्वेष-प्रयत्न-सुख-दुःख-ज्ञानानि आत्मनो लिङ्गम् इति**” (गौ.न्या.सू.१।१।१०) इत्यादौ शङ्कराचार्यानभिमतम् आत्मस्वरूपादिकं प्रतिपादयति इति युक्तः तत्र अतिप्रसङ्गः नच गौतमस्य देवीशप्तत्वं मानाभावात्.

सर्वर्षिशिरोरत्नेषु व्यासचरणेषु अतिव्याप्तिम् आहुः **किञ्च** इति. पातञ्जलसूत्रेषु साधनपादे “**हेयं दुःखम् अनागतम्**” (पातं.यो.सू.२।१६) इति दुःखस्य त्याज्यत्वम् उक्त्वा “**द्रष्टृदृश्ययोः संयोगो हेयहेतुः**” (पातं.यो.सू.२।१७) इति दुःखहेतुम् उक्त्वा किं तद्दृश्यम् इति आकाङ्क्षायां सूत्रद्वयेन भूतेन्द्रियरूपं दृश्यं, सूत्रद्वयेन द्रष्टुः स्वरूपं भोक्तृत्वं च अभिधाय “**कृतार्थं प्रतिनष्टमपि अनष्टं तदन्यसाधारणत्वाद्**” (पातं.यो.सू.२।२२) इति एकस्यैव प्रधानस्य सर्वपुरुषसाधारणत्वं सर्वथा नाशाभावं च प्रतिपाद्य संयोगस्वरूपं निरूप्यते. “**स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः**” (पातं.यो.सू.२।२३) इति. संक्षेपतः एतदर्थन्तु ‘राजमार्तण्डा’ख्यतद्वृत्तौ भोजराजः. “**स्वशक्तिः दृश्यस्य स्वभावः, स्वामिशक्तिः द्रष्टुः स्वरूपं, तयोः द्वयोरपि संवेद्य-संवेदकत्वेन व्यवस्थितयोः या स्वरूपोपलब्धिः तस्याः कारणं यः स संयोगः. सच सहज-भोग्य-भोक्तृ-स्वभावस्वरूपाद् न अन्यः. नहि तयोः नित्ययोः व्यापकयोः च स्वरूपाद् अतिरिक्तः कश्चित् संयोगः अस्ति. यदेव भोग्यस्य भोग्यत्वं भोक्तृः च भोक्तृत्वम् अनादिसिद्धं सएव संयोगः**” (पातं.यो.सू.भो.२।२३) इति आह. तथाच पुरुषाणाम् अनौपाधिकं नानात्वं, द्रष्टृ-दृश्ययोः वास्तवं भेदं नित्यत्वं च श्रीशङ्कराचार्यानभिमतं स्वीकुर्वति पतञ्जलौ अतिव्याप्तिः. न केवलं तत्र किन्तु परमाचार्येषु व्यासेष्वपि स इत्याहुः **भाष्ये** इति. “**पुरुषः स्वामी...**” (पातं.यो.सू.भा.२।२३) इत्यादिः “**अपवर्गः**” इत्यन्तः पातञ्जलभाष्यग्रन्थे. **इत्यादिना** इति, अनूदितग्रन्थाद् अग्रे अनुपदं “**दर्शनकार्यावसानः संयोगः इति दर्शनं वियोगस्य कारणम् उक्तं, दर्शनम् अदर्शनस्य प्रतिद्वन्द्वि इति अदर्शनं संयोगनिमित्तम् उक्तं, न अत्र दर्शनं मोक्षकारणम् अदर्शनाभावादेव बन्धाभावः स मोक्षः इति**” (पातं.यो.सू.भा. २।२३) इत्यादिना ज्ञानस्य मोक्षं प्रति अकारणत्वम् औपचारिककारणत्वं च शङ्कराचार्यानभिमतप्रायम् उक्तम्. द्रष्टृदृश्ययोः सार्वदिकः

स्वस्वामिभावश्च तदनभिमतएव उक्तः. इतः पूर्वसूत्रे भाष्ये "**अतश्च दृग्दर्शनशक्त्योः नित्यत्वाद् अनादिः संयोगो व्याख्यातः इति**" (पातं.यो.सू.-भा.२।२२) इत्यादि तदनभिमतमेव उदितम्. एतद् व्याख्याने च वाचस्पतिमिश्रः "**नच प्रधानवद् एकएव पुरुषः तन्नानात्वस्य जन्म-मरण-सुख-दुःखोपभोग-मुक्ति-संसारव्यवस्थया सिद्धेः. एकत्वश्रुतीनाञ्च प्रमाणान्तरविरोधात् कथञ्चिद् देशकालविभागाभावेन भक्त्यापि उपपत्तेः प्रकृत्येकत्व-पुरुषनानात्वयोः च श्रुत्यैव साक्षात्प्रतिपादनाद्**" (पातं.यो.सू.भा.तत्त्व.२।२२) इति उक्त्वा "**अजाम् एकाम्**" (महाना.उप.९।२) इति श्रुतिम् उदाहरति. शङ्कराचार्यैस्तु इयं श्रुतिः समन्वयस्य तुरीये "**चमसवद् अविशेषाद्**" (ब्र.सू.१।४।८) इति अधिकरणे अन्यथैव व्याख्याता. तथा प्रकृतसूत्रे भाष्ये "**किञ्च इदम् अदर्शनं नाम**" (पातं.यो.सू.व्या.भा.२।२३) इत्यादिना तद्विषयकान् अष्टौ कल्पान् उपन्यस्यता भगवता व्यासेन "**कारणान्तरेष्वपि कल्पितेष्वेव समानः चर्चः**" (पातं.यो.व्या.भा.२।२३) इति अभ्यधायि. एतच्च "**न केवलं प्रधाने कारणान्तरेष्वपि परब्रह्म-तन्माया-परमाण्वादिषु कल्पितेषु समानः चर्चो विचारः**" (पातं.यो.सू.वा.२।२३) इति विवृण्वता वाचस्पतिमिश्रेण अस्माकं शङ्कराचार्याणां नैयायिकादीनां च सिद्धान्ताद् अन्यदेव तत्रत्यम् इति स्पष्टीकृतम्. तस्माद् व्यासेषु तद्विवरणे सांख्यकौमुद्यादिषु च तदनभिमतं निरूपयति वाचस्पतिमिश्रे सर्वदर्शनसंग्रहादिप्रणेतृविद्यारण्यादिषु च अतिप्रसङ्गः सुस्थः. एतदेव **अतिव्याप्तिः च** इति '**च**'कारेण बोध्यते.

एवं धर्मविशेषप्रसूताद् इत्यादि. अत्र इदं ज्ञेयं : कणादोहि तर्काचार्यो वैशेषिकदशलक्षणीं प्रणिनाय "**अथातो धर्मं व्याख्यास्यामः**" (वैशे.सू.१।१।१) इति धर्मव्याख्यानं प्रतिज्ञाय "**यतो अभ्युदय-निःश्रेयससिद्धिः स धर्मः**" (वैशे.सू.१।१।२) इति तं लक्षयित्वा "**तद्वचनाद् आम्नायस्य प्रामाण्यम्**" (वैशे.सू.१।१।३) इति वेदप्रामाण्यम् अभिधाय "**धर्मविशेषप्रसूताद् द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायानां पदार्थानां साधर्म्य-वैधर्म्याभ्यां तत्त्वज्ञानाद् निःश्रेयसम्**" (वैशे.सू.१।१।४) इति सुकृतविशेषजन्याद् द्रव्यादितत्त्वज्ञानादेव मोक्षं प्रतिपादयति. अत्र "'**साधर्म्यं' समानो**

धर्मः...‘वैधर्म्यं’ विरुद्धो धर्मः’’ (न्या.मु.१।१३०) इति मुक्तावलीकारादयः. एतदुपस्कारे शङ्करमिश्रः ‘‘**सर्वपदार्थप्रधानो द्वन्द्वश्च अत्र समासः. सर्वपदार्थतत्त्वज्ञानस्य निःश्रेयसहेतुत्वात्. तदत्र शास्त्र-निःश्रेयसयोः हेतु-हेतुमद्भावः. शास्त्र-तत्त्वज्ञानयोः व्यापार-व्यापारिभावः. निःश्रेयस-तत्त्वज्ञानयोः कार्य-कारणभावः. द्रव्यादिपदार्थ-शास्त्रयोः प्रतिपाद्य-प्रतिपादकभावः सम्बन्धो अवगम्यते. एतेषाञ्च सम्बन्धानां ज्ञानाद् निःश्रेयसार्थिनाम् इह शास्त्रे प्रवृत्तिः**’’ (वैशे.सू.उप.१।१।४) इति वक्ति. मुक्तिस्वरूपञ्च ‘‘**अशेष-विशेष-गुणध्वंसावधिक-दुःख-प्रागभावः**’’ (वैशे.सू.उप.१।१।४) इति सिद्धान्तयति. एतच्च सर्वं शङ्कराचार्यानभिमतमेव. तथा तृतीयाध्यायद्वितीयाह्निके सूत्रकारः ‘‘**प्राणापान-निमेषोन्मेष-जीवन-मनोगतीन्द्रियान्तरविकाराः सुख-दुःखेच्छा-द्वेष-प्रयत्नाः च आत्मनो लिङ्गानि**’’ (वैशे.सू.३।२।४) इति सूत्रे आत्मनां नित्यसविशेषत्वम् अभिधाय ‘‘**तस्य द्रव्यत्व-नित्यत्वे वायुना व्याख्याते**’’ (वैशे.सू.३।२।५) इति तेषां द्रव्यत्वं स्वीकृत्य सूत्रत्रयेण आगमिकत्वं पूर्वपक्षीकृत्य ‘‘‘**अहम्’ इति शब्दस्य व्यतिरेकाद् न आगमिकम्**’’ (वैशे.सू.३।२।९) इत्यादिना सूत्रदशकेन निराकरोति. तथा ‘‘**सुख-दुःख-ज्ञाननिष्पत्त्यविशेषाद् ऐकात्म्यम्**’’ (वैशे.सू.३।२।१९) इति आत्मैक्यं पूर्वपक्षीकृत्य ‘‘**व्यवस्थातो नाना, शास्त्रसामर्थ्यात् च**’’ (वैशे.सू.३।२।२०-२१) इति आत्मनां नानात्वमेव सिद्धान्तयति. एतद्वृत्तिकाराः जयनारायणतर्कालङ्कारप्रभृतयः च अत्र मायावादस्य अनुवादपुरःसरनिरासं स्पष्टमेव दर्शयन्ति. चतुर्थाध्याये च ‘‘**सदकारणवद् नित्यम्**’’ ‘‘**तस्य कार्यं लिङ्गम्**’’ (वैशे.सू.४।१।१-२) इत्यादिना नित्यानां परमाणूनां प्रपञ्चोपादानतया विवर्तवादविरोधिनम् आरम्भवादमेव उरीकरोति. अतो युक्तेव तत्र तदनुयायिषु च अतिव्याप्तिः. अथ पाद्मोत्तरखण्डवचनाश्रयणाद् असच्छास्त्रत्वम् अङ्गीकृत्य इष्टापत्तिः अभ्युपेयाः तर्हि मायावादेऽपि तुल्यम्. **किञ्च तत्तदुक्त...** इति. प्रस्तावनायां तेन न्यायादिशास्त्रं सम्यगभ्यस्तम् इति प्रतिपादनात् पञ्चमलक्षणस्य प्रकृतग्रन्थे शैवसुधाकरे च क्वचित् तदनुवादात् षष्ठलक्षणस्य च त्वयि अतिव्याप्तिः इति भावः. नच अभिनिवेशपूर्वकत्वम् उभयत्र अभिनिवेश्यते इति अदोषः शक्यवचनः, लक्षणग्राहकमानतया अभिमते

कौर्मवाक्ये विशेषणस्य अनुक्त्या तन्निवेशे मानाभावात्. अस्माभिस्तु तयोः शप्तलक्षणत्वमेव पुरा निराकारि इति न अस्मासु तत्संक्रमप्रसङ्ग इति भावः.

(१) [ननु वैष्णवानां नः कथं नरके पातो विष्णो रक्षायां समर्थत्वाद् अतः आहुः 'भविष्यन्ति' इति. सत्यं तस्य अस्ति तत्र सामर्थ्यं सोऽपि चेत् पराङ्मुखः स्यात् कः तर्हि त्राता इति भावः. 'स्वाश्रितोऽपि' (कूर्मपुरा. १।१५।३२) इति 'अपि'शब्देन कथञ्चिदाश्रितस्य ग्रहणं नतु अनाश्रितस्य. तथाभूतस्य पराङ्मुखतायाः प्राप्तत्वेन तत्कथनस्य निष्फलत्वापत्तेः, 'सु'-शब्द-स्वारस्यभंगापत्तेश्च. एवञ्च तादृशानां सम्यग् विष्णोः आश्रयणमेव न सम्भवति. यदि केषांचित् तत् स्यात् तथापि स पराङ्मुखो भविष्यति इति 'अपि'ना सूचितम्. तथाच विष्णोः सम्यग् असम्यग् वा यद् आश्रयणं तत् तेषां सप्तमं लक्षणम्. परन्तु इदं लक्षणम् इतरस्य कस्यचित् सन्दिग्धस्यापि सत्त्वेएव शप्तत्वनिर्णायकम्. मुक्ति-भुक्ति-साधन-विष्णुभक्तिमात्रस्य तल्लिंगतायाः वक्तुम् अनुचितत्वात्. विष्णोः पराङ्मुखता शिवद्वेषादेः फलम्.]

(२) विष्णोः सम्यग् असम्यग् वा यद् आश्रयणं तदपि शप्तानां लक्षणम् उक्तं तदपि न लक्षणम्. अत्र सम्यगाश्रितत्वम् असम्यगाश्रितत्वं प्रत्येकं लक्षणं मिलितं वा? न आद्यः, सम्यगाश्रितेषु अतिभक्तेषु नारदोद्धवसनकादिषु अतिव्याप्तेः. नहि तत्र शप्तत्वसम्भावनमपि येन इष्टापत्तिं कुर्याः. असम्यगाश्रयणं च अन्यदेवताभक्तानामेव सम्भवति. ''येऽपि अन्यदेवताभक्ताः यजन्ते श्रद्धयान्विताः तेऽपि मामेव कौन्तेय!

यजन्ति अविधिपूर्वकम्'' (भग.गीता ९।२३) इत्यनेन तेषामेव असम्यगाश्रयणस्य भगवता प्रतिपादितत्वात्. तथाच सर्वेषु अन्यदेवताभक्तेषु अतिव्याप्तिः स्यात्. किञ्च ''विनिन्दन्ति हृषीकेशं ब्राह्मणान् ब्रह्मवादिनः'' अस्यापि श्लोकस्य तादृशप्रकरणस्थत्वेन हृषीकेशनिन्दकतद्भक्तब्राह्मणनिन्दकानां शप्तत्वस्य त्वयापि अङ्गीकरणीयतया विष्णुपराङ्मुखेषु तेषु विष्णोः सम्यग् असम्यग् वा आश्रयणस्य स्वाश्रितोऽपि इति 'अपि'शब्देन कथञ्चिद् आश्रितस्य ग्रहणं नतु अनाश्रितस्य **इति वदतः तवापि अभिप्रेततया तत्र अव्याप्तिः स्यात्. किञ्च व्यावृत्तिः वा व्यवहारो वा लक्षणस्य प्रयोजनम्. तत्र व्यावृत्तिः इतरभेदानुमितिः तज्जनकत्वेन अभिमतस्य लक्षणद्वयस्य कुत्रापि असत्त्वेन प्रत्येकं च तयोः सम्यगाश्रितेषु असम्यगाश्रितत्वस्य असम्यगाश्रितेषु सम्यगाश्रितत्वस्य असत्त्वेन भागासिद्धतया पक्षतावच्छेदकावच्छेदेन इतरभेदानुमित्यजनकतया निष्फलत्वमेव. एवं व्यवहारजनकत्वमपि प्रत्येकं सर्वत्र न सम्भवति परस्पराव्याप्तत्वात्. न द्वितीयो मिलितयोः द्वयोः एकत्र असम्भवस्य उक्तत्वेन लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वेन असम्भवापत्तेः.**

तस्मात् सप्तानामपि लक्षणत्वेन अभिमतानाम् अव्याप्त्यतिव्याप्त्यादिदोषग्रस्तत्वेन अनिश्चायकतया तैः लक्षिते व्यवहारं कुर्वन् भ्रान्तएव शिष्टैः अनादेयवचनः च इति.

(३) सहस्राक्षे ननु वैष्णवानाम् इत्यादिना अनुचितत्वाद् इत्यन्तेन दर्शितं सप्तमं लक्षणं दूषयन्ति. **विष्णोः सम्यग्** इत्यादिना **असम्भवापत्तेः** इत्यन्तेन. : अत्र इदं ज्ञेयम्. ''**भविष्यति हृषिकेशः**'' (कूर्मपुरा.१।१५।३२) इति वाक्यस्य अर्थः प्रकरणादिलभ्यो असन्दिग्धः प्रकाशतएव अतो ननु वैष्णवानाम् इत्यादिशङ्का तदुत्तरपरत्ववर्णनं च प्रलापएव. यच्च '**स्वाश्रितोपि**'

इत्यत्र प्रलपितं तद् न, अनाश्रितस्य औदासीन्यमात्रसम्भवेन पाराङ्मुख्यानियमात्. स्वतः सर्वानुग्राहके सर्वपालके विष्णौतु औदासीन्यस्यापि असम्भवात्. स्वेन स्वैः वा आश्रितः इति व्याख्यानस्य औचित्येन तत्र ‘सु’उपसर्गस्यापि अभावात् च. अत्रापि शब्दस्वारस्यन्तु “**विष्णो हव्यं रक्षस्व**” (तैत्ति.संहि.१।१।३) इत्यादिमन्त्रलिङ्गाद् अकृताश्रयोपि स यज्ञवस्तु रक्षेदेव किं पुनः यजमानादिना कृताश्रयः. प्रकृतेतु उक्तकारणवशात् कृताश्रयोऽपि पराङ्मुखो यज्ञरक्षाविमुखो भविष्यति इति बोध्यम्. इतरस्य शप्तलक्षणस्य सन्दिग्धस्य सत्त्वे शप्तत्वसंदेहे श्रीविष्णुभक्तेः शप्तत्वनिर्णायकत्वं वदन् श्रीमान् महानास्तिकएव. भगवद्गीतादयस्तु दुराचारदर्शनाद् असाधुत्वसन्देहेऽपि भगवतः सम्यगाश्रयणात् साधुत्वनिश्चयं बोधयन्ति. “**अपि चेत् सुदुराचारो भजते माम् अनन्यभाक् साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः**” (भग.गीता ९।३०) इत्यादौ. अतो अयं प्रलापो विष्णुभक्तानां द्वेषादेव. षट्सु लक्षणेषु अन्यतमस्य कस्यचिदपि सन्दिग्धस्य सर्वत्र आनेतुं शक्यतया शप्ततायां विष्णुभक्तिव्यापकतायाः कथनएव पर्यवसानसिद्धेः. तस्माद् मुक्तिभुक्तिसाधन...इत्यादिकथनं व्यामोहनमात्रम्. तथाच विष्णोः सम्यग् असम्यग् वा यद् आश्रयणं तत् तेषां सप्तमं लक्षणम् इति रभसोक्तिं विकल्प्य दूषयन्ति **अत्र** इति. सम्यगाश्रितो यैः तद्भावः तत्त्वं सम्यगाश्रयणम् इति अर्थः. सम्यगाश्रितम् आश्रयणं येषां तत्त्वं वा. एवम् असम्यगाश्रितत्वम् असम्यगाश्रयणम्. **सम्यग् असम्यग् वा** इति परोक्तौ ‘वा’शब्दस्य विकल्पार्थत्वाभिप्रायात् प्रथमः कल्पः. अवधारणाद्यर्थत्वाभिप्रायाद् द्वितीयः. **नारदोद्धव**...इत्यादि. नच लक्षणान्तराभावाद् अदोषः शङ्क्यः, पञ्चरात्रैकादशस्कन्धादिषु तैः शङ्कराचार्यानभिमतसाकारवादादेः वर्णिततया त्वद्रीत्या निश्चितस्य तस्य सत्त्वात्. **प्रतिपादितत्वाद्** इति, गीतानवमाध्यायवाक्ये ‘**मामेव**’ (भग.गीता ९।२३) इति सावधारणोक्त्या “**यो यो यां यां तनुम्**” (भग.गीता ७।२१) इति युक्त्या च अन्यदेवताकर्मकस्यापि आश्रयणस्य भगवत्कर्मकत्वम्. “**अविधिपूर्वकत्वो**” (भग.गीता ९।२३) क्त्या “**कामैः तैस्तैः हृतज्ञानाः**” (भग.गीता ७।२०) इति उक्त्या च असम्यक्त्वम् इति भावः. **किञ्च** इति. “**विनिन्दन्ति हृषीकेशम्**” इतिवाक्यं

कौर्मपूर्वखण्डत्रिंशाध्यायस्थम्. **तादृश** इति शप्तनिरूपकः इति अर्थः. **तद्भक्तः**इतिवाक्ये 'ब्रह्मवादि'पदाद् "**मद्भक्तेष्वपि यत्नतः**" (कूर्मपुरा.१।-२७।१६) इति सप्तविंशाध्यायवाक्यात् च तद्भक्तत्वलाभः प्राग् दर्शितः. **तेषु** इति शप्तेषु. **इतरभेदानुमितिः** इति, "**व्यावृत्तिः इतरभेदः**" (तर्कदी.३९) इति दीपिका. **इतरभेदानुमितिः** इति वाक्यवृत्त्यादयः, यथा "गौः इतरेभ्यो भेदवती शृङ्गवत्त्वे सति सास्नावत्त्वाद्" इत्यादौ गवीतरभेदानुमितिः. **असत्त्वेन** इति परस्परप्रतिद्वन्द्वितया तेजस्तिमिरयोरिव तयोः सामानाधिकरण्यासम्भवात् संयोगवद् आश्रयणस्य अव्याप्यवृत्तित्वाभावाद् युक्तं द्वयोः कुत्रापि असत्त्वम्. **निष्फलत्वम्** इति अग्रिमे हेतुतया तृतीयान्तस्य अन्वयः. **तयोः** इति लक्षणयोः. इदं भागासिद्धतया इत्यनेन अन्वेति. **भागासिद्धतया** इति. "**पक्षतावच्छेदकसामानाधिकरण्येन हेत्वभावो भागासिद्धिः**" ( ) इति गदाधरभट्टादयः, यथा "**पृथिवी गन्धवती घटत्वाद्**" ( ) इत्यादौ पृथिवीत्वसामानाधिकरण्येन पटादौ घटत्वाद्यभावः. यथा वा "**पृथिव्यादयः चत्वारः परमाणवो नित्याः गन्धवत्त्वाद्**" ( ) इत्यत्र गन्धवत्त्वस्य पार्थिवपरमाणुषु सत्त्वाद् जलादिपरमाणुषु असत्त्वाद् भागासिद्धिः. **पक्षतावच्छेदकं...** इति, पक्षतावच्छेदकं शप्तत्वं तद्व्यापिकाम् इतरभेदानुमितिविषयतां लक्षणद्वयमपि न जनयति. शप्ताः इतरेभ्यो भिद्यन्ते विष्णोः सम्यगाश्रयणाद् इति प्रयोगे असम्यगाश्रयणवत्सु शप्तेषु अनुमितेः असिद्धेः असम्यगाश्रयणलिङ्गकप्रयोगे सम्यगाश्रयणवत्सु तदसिद्धेः च इति भावः. **परस्पराव्याप्तत्वाद्** इति, सम्यगाश्रयणवति शप्ते असम्यगाश्रयणस्य तद्वति सम्यगाश्रयणस्य च अव्याप्तत्वात्. सम्यगाश्रयणासम्यगाश्रयणे मिलिते लक्षणम् इति पक्षं दूषयन्ति. **न द्वितीयः** इति.

एवं सप्त लक्षणानि दूषयित्वा सिद्धम् अर्थम् आहुः **तस्माद्** इति. **व्यवहारं** विप्रशप्तत्वव्यवहारम्. ननु लक्षणसप्तकसन्दर्भे 'लक्षण'शब्देन मया न असाधारणधर्मो विवक्ष्यते किन्तु इत्थंभूतलक्षणे "**लक्षणेत्थंभूताख्यानभागवीप्सासु**" "**लक्षणहेत्वोः**" (पाणि.सू.१।४।९०,३।२।१२६) इत्यादिवद् ज्ञानजनकज्ञानविषयो वा परिचायकं वा अभिप्रेयते. अतो भवदुक्तदोषाणाम्

अनवकाशएव इति चेद्, मा एवम्; तथासति लक्ष्यतावच्छेदकसमनियतत्वाभावेन अव्याप्तिपरिहारेऽपि अतिव्याप्तिदोषापरिहारात्. तत्रापि अव्यभिचारिणएव लक्षणत्वात्. तथाहि ज्ञानजनकज्ञानविषयः परिचायकम् इतितु अनर्थान्तरम्. तत्र 'लक्षण'शब्देन च करणव्युत्पत्या ज्ञापकम् उच्यते. ज्ञापकत्वं च व्यभिचारिणो न सम्भवति. नहि व्यभिचारिविषयकज्ञानेन सन्दिग्धलक्ष्यनिर्णयो जन्यते. "जटाभिः तापसः" इत्यत्र विवक्षितजटाविशेषस्य तापसाव्यभिचारित्वम् अस्त्येव. अन्यथा मात्र जटाज्ञानेन तापसत्वनिश्चयस्य अयोगात्. "**वृक्षं प्रति विद्योतते विद्युद्**" (पाणि.सू.का.१।४।९०) इत्यत्र तत्कालसम्बन्धविशिष्ट-तद्-वृक्षव्यक्तेः विद्युत्प्रकाशदेशव्याप्यत्वम् अस्त्येव. अन्यथा प्रकाशानधिकरण-दवीयःप्रदेशस्थवृक्षान्तरेणापि प्रकाशदेशो लक्ष्येत. एवं "**'तिष्ठन् मूत्रयति' इत्यादौ, 'तिष्ठति'क्रिया 'मूत्रयति'क्रियायाः लक्षणम्**" (पातं.महाभा.३।२।१-२६) इत्यादि उक्तं भाष्यकृता. तेन वर्तमानकालिकमूत्रणक्रियाज्ञानजनकज्ञानविषयः तात्कालिकस्थितिक्रिया तद्व्याप्यैव. अथवा अस्तु तत्र कथञ्चिद् व्यभिचारिणोऽपि लक्षणत्वम्. तथापि तादृशलक्षणत्वाश्रयणे प्रकृते तव न कापि इष्टसिद्धिः. तत्र वृक्षप्रत्यक्षोत्तरं विद्युद्विद्योतनप्रत्यक्षमिव 'तिष्ठति'क्रियादि-प्रत्यक्षोत्तरं कदाचिद् मूत्रणक्रियादिप्रत्यक्षमिव च नहि अत्र निन्दादिप्रत्यक्षोत्तरमपि विप्रशप्तत्वप्रत्यक्षं भवति, किन्तु अनुमितिरेव त्वया वाच्या. साच व्याप्तिनिश्चयमन्तरा न सम्भवतीति स्वसम्मतलक्षणानां विप्रशप्तत्वव्याप्यत्वमेव वाच्यम् आयुष्मता. एवञ्च सति पूर्वोक्तातिव्याप्तिदोषाः सुस्थाः. "**अनुर्लक्षणे**" (पाणि.सू.१।४।८३) इति सूत्रे च "**अपि भवान् कमण्डलुपाणिं छात्रम् अद्राक्षीद्?**" (पातं.महाभा.१।४।८३) इति उदाहरता भाष्यकृता "**काकवद् देवदत्तस्य गृहम्**" (द्र.पातं.महाभा.१।१।२६) इत्यादौ काकतत्संयोगादेरिव उपलक्षणस्यापि कमण्डलोः तत्पाणित्वस्य वा छात्रज्ञानजनकज्ञानविषयत्वात् लक्षणत्वम् उक्तम्. तच्च लक्षणं पूर्वं कमण्डलुपाणिं तं चक्षुः विषयीकृतवत्येव पुरुषे तज्ज्ञानं जनयितुं प्रभवति नतु तथा तम् अदृष्टवति. अतएव भाष्ये "**सकृद् असौ कमण्डलुपाणिः छात्रो दृष्टः तस्य तदेव लक्षणम्**" (पातं.महाभा.-१।४।८३) इति उक्तम्. तथाच अत्र येन पुरा निन्दादिकं विप्रशप्तत्वं च उभयमपि अनुभूतं स्यात् तस्यैव निन्दादिराहित्यकालेऽपि तत्र "शप्तो

अयम्’’ इति निश्चयो नतु शापम् अदृष्टवतः तत्साहित्यकालेऽपि तत्र तथा निश्चयः. अतः प्रकृते तादृशलक्षणत्वाश्रयणम् अपार्थकमेव इति अतिदुर्बलत्वाद् न मूले अनूद्य दूषितम्. ‘‘**लक्षणहेत्वोः...**’’ इति शास्त्रविचारे च अग्रे स्वतो दूषितं तत् स्याद् इति.

> **(२) ननु कूर्मपुराणे पूर्वखण्डे एकोनत्रिंशे अध्याये अर्जुनं प्रति व्यासेन ‘‘कुर्वन्ति च अवताराणि ब्राह्मणानां कुलेषु वै देवीशापविनिर्दग्धाः पुरा दक्षाध्वरे द्विजाः निन्दन्ति च महादेवं तमसाविष्टचेतसः वृथाधर्मं चरिष्यन्ति तस्मिन् काले युगान्तके... ये च अन्ये-शापनिर्दग्धाः गौतमस्य महात्मनः सर्वे ते अवतरिष्यन्ति ब्राह्मणाः तासु योनिषु’’ (कूर्मपुरा.१।३०।२७) इत्यादि उक्त्वा उक्तं ‘‘मोहयन्ति जनान् सर्वान् दर्शयित्वा फलानि च’’ (कूर्मपुरा.१।३०।३१) इत्येवमादिवाक्यैः तादृशानि लक्षणानि दर्शितानि तैरेव अस्माभिरपि व्यवहारः क्रियतइति कुतो अस्माकं भ्रान्तत्वम् इति चेद्, न; तादृशप्रकरणस्य लक्षणपरत्वाभावात्. नहि अर्जुनस्य विप्रशप्ताः कीदृशाः इत्याकारकः प्रश्नः किन्तु ‘‘कृतं त्रेता द्वापरं च कलिः च इति चतुर्युगम् एषां स्वभावं सूत! अद्य कथयस्व समासतः’’ (कूर्मपुरा.१।२८।१) इति ऋषिभिः शौनकादिभिः पृष्टः सूतो युगधर्मान् वक्तुम् अर्जुनप्रश्नं युगधर्मविषयकम् अवतारितवान्. ‘‘गते नारायणे कृष्णे स्वमेव परमं पदं पार्थः परमधर्मात्मा पाण्डवः शत्रुतापनः’’ (कूर्मपुरा.१।२८।२) ‘‘पृष्टवान् प्रणिपत्य असौ युगधर्मान् द्विजोत्तमाः तस्मै प्रोवाच सकलं मुनिः सत्यवतीसुतः प्रणम्य देवम् ईशानं युगधर्मान् सनातनान्’’ (कूर्मपुरा.१।२९।६-७) इत्यादिना. एवञ्च अर्जुनस्य युगधर्मजिज्ञासया प्रश्ने कथं विप्रशप्तलक्षणानि व्यासो ब्रूयात्. अनाकांक्षिताभिधाने अर्थान्तरं च कथं न स्यात्. अतएव ‘‘वक्ष्यामि ते समासेन युगधर्मान् नरेश्वर न शक्यते मया पार्थ विस्तरेण अभिभाषितुम्.**

आद्यं कृतयुगं प्रोक्तं ततः त्रेतायुगं बुधैः तृतीयं द्वापरं पार्थ चतुर्थः कलिः उच्यते’’ (कूर्मपुरा. १।२९।८-९) इति उपक्रम्य ‘‘कृतेतु मिथुनोत्पत्तिः’’ (कूर्मपुरा. १।२९।१४) इत्यादिना सत्ययुगधर्मान् उक्त्वा ‘‘वर्तयन्ति स्म तेभ्यः ताः त्रेतायुगमुखे प्रजाः’’ (कूर्मपुरा. १।२९।२२) इत्यादिना त्रेतायुगधर्मान् उक्त्वा ‘‘द्वापरेऽपि अथ विद्यन्ते मतिभेदात् तथा नृणां रागो लोभः तथा युद्धं सत्त्वानाम् अविनिश्चयम्’’ (कूर्मपुरा. १।२९।४३) इत्यादिना द्वापरधर्मान् उक्त्वा ‘‘तिष्ये मायाम् असूयां च वधश्चैव तपस्विनां साधयन्ति नराः नित्यं तमसा व्याकुलीकृताः’’ (कूर्मपुरा. १।३०।१) इत्यादिना कलिधर्मा उक्ताः. अन्ते च ‘‘इत्येतद् लक्षणं प्रोक्तं युगानां वै समासतः अतीतानागतानां वै यावद् मन्वन्तरक्षयः’’ (कूर्मपुरा. १।३०।५३) इति उपसंहृतम्. तथाच उपक्रमोपसंहाराभ्यां युगधर्मबुबोधयिषयैव व्यासैः तादृशवाक्यानि प्रणीतानि इति निश्चीयते. तादृशग्रन्थस्य संदर्भम् अज्ञात्वा विप्रशप्तलक्षणपरत्वं वर्णयन् भ्रान्तएव. त्रिंशाध्यायान्तर्गतान् तादृशश्लोकान् तत्रैव इत्यादिना एकोनत्रिंशेध्याये वर्णयन् भ्रान्तत्वे सति अदृष्टकूर्मपुराणः च इति शिष्टापरिगृहीतएव. किञ्च तादृशप्रकरणस्य विप्रशप्तलक्षणपरत्वे ‘‘शुक्लदन्ताजिताक्षाः चामुण्डाः काषायवाससः’’ (कूर्मपुरा. १।३०।१३) तथा ‘‘काषायिनो अन्ये निर्ग्रन्थाः’’ (   ) तथा ‘‘कापालिकाः च ये वेदविक्रयिणः च अन्ये तीर्थविक्रयिणः परे’’ (कूर्मपुरा. १।३०।१६) तथा ‘‘यतयः च भविष्यन्ति शतशो अथ सहस्रशः नाशयन्ति स्वधीतानि न अधिगच्छन्ति चापरे/नाशयन्ति ह्यधितानि गच्छन्ति च अनघे...वामाः पाशुपताचाराः तथा वै पाञ्चरात्रिकाः भविष्यन्ति कलौ तस्मिन् ब्राह्मणाः क्षत्रियाः तथा’’ (कूर्मपुरा. १।३०।२३-२५) इत्यादिवचनानामपि तादृशप्रकरणस्थत्वात् तादृशयतीनामपि विप्रशप्तत्वं कथं न स्यात्! भवतु तेन किं स्यात्?

इति चेत्; तन्मध्यपातिनः तवापि स्याद् इति अवधारय.

(३) अथ सहस्राक्षे एकोनत्रिंशाध्यायस्थतया उक्तानां वस्तुतः त्रिंशाध्यायस्थानां “**कुर्वन्ति च अवताराणि**” इत्यादिवचसाम् आशयं प्रकाशयिष्यन्तः शङ्कन्ते. **ननु कूर्मपुराणे** इत्यादिना. परिहरन्ति **तादृशप्रकरणस्य** इति, व्यासार्जुनसंवादरूपप्रकरणस्य लक्षणपरत्वाभावमेव उपपादयन्ति **नहि अर्जुनस्य** इत्यादिना. कौर्मे पूर्वखण्डे अष्टाविंशाध्यायारम्भे “**कृतं त्रेता द्वापरं च...**” (कूर्मपुरा.१।२८।१) इति प्रश्नः. सूतस्तु “**गते नारायणे**” (कूर्मपुरा.१।२८।२) इत्यादिना व्यासार्जुनसमागमादि वर्णयित्वा एकोनत्रिंशे “**एवम् उक्तो भगवता पार्थः परपुरञ्जयः पृष्टवान् प्रणिपत्य असौ युगधर्मान् द्विजोत्तमाः**” (कूर्मपुरा.१।२९।६) इति युगधर्मविषयकं प्रश्नं “**तस्मै प्रोवाच**” (कूर्मपुरा.१।२९।७) इत्यादिना व्यासोक्तान् तद्धर्मान् च उक्तवान्. तद् एतद् अनुसन्धाय आहुः **अवतारितवान्** इति. **कथम्** इति “**नापृष्टः कस्यचिद् ब्रूयाद् नच अन्यायेन पृच्छतः**” (मनुस्मृ.२।११०) इति मनुना प्रतिषेधात् कथं ब्रूयाद् इति भावः. बाधकान्तरमपि आहुः **अनाकाङ्क्षित...** इत्यादि “**अर्थान्तरं हि निग्रहस्थानं**” गौतमेन पञ्चलक्षण्यां “**प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः...**”प्रभृति (गौ.न्या.सू.५।२।१) द्वात्रिंशद् निग्रहस्थानेषु अर्थान्तरमपि निर्दिश्य “**प्रकृताद् अर्थाद् अप्रतिसम्बद्धार्थम् ‘अर्थान्तरम्’**” (गौ.न्या.सू.५।२।७) इति तस्य लक्षणम् उक्तम्. लक्षणपरत्वपक्षे प्रतिज्ञाहानिमपि सूचयन्ति **अतएव** इति “**वक्ष्यामि...**” (कूर्मपुरा.१।२९।८) इति प्रतिज्ञावाक्ये “**युगधर्मान् वक्ष्यामि**” (कूर्मपुरा.१।२९।८) इति उक्त्वा युगधर्माणामपि संक्षेपेण कथनं प्रतिज्ञाय विस्तरेण कथनस्य अशक्यतां च अभिधाय वक्तुं प्रवृत्तेन भगवता श्रोतृजिज्ञासाविषयाः युगधर्माअपि समासेनैव निरूपणीयाः क्व पुनः तत्र अपृष्टशप्तलक्षणप्रपञ्चनस्य अवसरः इति भावः. “**कृतेतु**” (कूर्मपुरा.१।२८।१) इत्यादिना “**वर्तयन्ति**” (कूर्मपुरा.१।२८।१२) इत्यादिना “**द्वापरेऽपि अथ**” (कूर्मपुरा.१।२८।४२) इत्यादिना च यावद् अध्यायसमाप्तिं त्रियुगीधर्माः निरूपिताः **अत्र तेभ्यः** इति. कृतयुगे प्रजानां निर्वाहकाः वृक्षाः तत्र अध्याये वर्णिताः तेभ्यः ‘सत्त्वानाम्’ इति प्राणिनाम्. क्वचित्

'**तत्त्वानाम्**' इति पाठः. अथ त्रिंशे ''**तिष्ये मायाम्**'' (कूर्मपुरा.१।३०।१) इत्यादिना कलिधर्मान्, ''**तस्मात् सर्वप्रयत्नेन**'' (कूर्मपुरा.१।३०।३८) इत्यादिना कलौ शिवप्रपत्त्यादितः सिद्धिं च प्रदर्श्य ''**इत्येतद् लक्षणं प्रोक्तम्**'' (कूर्मपुरा.१।३०।५३) इति चतुर्युगधर्मनिरूपणम् उपसंहृतम्. अत्रापि समासतएव प्रवचनं वर्णितं **उपक्रमोपसंहाराभ्याम्** इति. ''**उपक्रमोपसंहारौ अभ्यासो अपूर्वता फलम् अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये**'' (द्र.सर्वदर्श.पूर्णप्र.) इति उक्तेः ताभ्यां तथा निश्चीयते इति भावः. **शुक्लदन्ताजिताक्षाः** इति सवर्णदीर्घः आर्षः शुक्लदन्ताः च ते अजिताक्षाः च इति 'शीतोष्णम्'इतिवद् विशेषणयोः समासो वा. तत्र महाकोपाल्पतेजसः इत्यादावपि तथा प्रयोगो दृश्यते. शूद्रसंन्यासिनस्तु त्वादृशा 'विरागि'शब्दवाच्या वृथा 'गिरि'-'पुरी'त्याद्यभिख्यावन्तो वर्णादिविभागरहिताः प्रसिद्धाएव. **काषायिनो अन्ये** इति ''**कृतसंन्यासाः ब्राह्मणाभासाः नाशयन्ति स्वधीतानि**'' इत्यत्र ''**नाशयन्तः स्वकं धर्मं न अधिगच्छन्ति तत्पदम्**'' इत्यपि पाठः. **पाञ्चरात्रिकाः** कापिलादिपञ्चरात्रानुयायिनः. नारदपञ्चरात्रस्य श्रीभागवतभारतमोक्षधर्मादिषु प्रशंसिततया भगवच्छास्त्रत्वसिद्धेः इति अन्यत्र विस्तरः. अत्र मध्ये-मध्ये अनुपयुक्तश्लोकान् विहाय उपयुक्तश्लोकाएव संगृह्यन्ते. तथाच ''**शुक्लदन्ताः**'' (कूर्मपुरा.१।३०।१३) ''**काषायिनो अन्ये**'' यतयः इति **वामा...** इति. एवमादिषु स्पष्टतया निरूपणात् त्वादृशविरागिष्वेव विप्रशप्तत्वम् आपतेत्. **तवापि स्याद्** इति. स्वस्य ब्राह्मणत्वेन स्वयं वर्ण्यमानेऽपि वर्णादिविभागविरहितविरागिवर्गान्तःपातितया तथात्वं सुस्थम् इति भावः. नच पञ्चदशाध्यायवचस्सु उत्प्रेक्षितलक्षणानाम् अत्र असमन्वयात् तदभावः शङ्क्यः. त्रिनेत्रत्वपञ्चाननत्वादिविशिष्टविग्रहस्य अनित्यत्वाभ्युपगमेन तदाराधनस्यापि साधनविशेषत्वमात्रस्वीकारेण च शिवद्वेषतन्मार्गनिन्दयोः अनपायात्, तादृशशास्त्रासक्तत्वाद्, वेदसमाचारादावपि मिथ्यात्वोरीकारात् ''सर्वं मिथ्या'' इत्येव आलपनाद् भागवतनिन्दादिलिङ्गानुमितहृषीकेशपराङ्गुख्यात् च तस्मिन् तत्समन्वयसिद्धेः. इदञ्च अत्र ज्ञेयम् : तस्मिन् अध्याये ''**अधार्मिकाः निराहाराः महाकोपाल्पतेजसः अनृतं ब्रुवते लुब्धाः तिष्ये जाताः सुदुष्प्रजाः दुरिष्टैः दुरधीतैः च दुराचारैः दुरागमैः विप्राणां कर्मदोषैः च प्रजानां**

जायते भयम्, न अधीयते तदा वेदान् न यजन्ति द्विजातयः यजन्ति यज्ञान् वेदान् च पठन्ते च अल्पबुद्धयः” (कूर्मपुरा.१।३०।३-५) तथा “**स्नानं होमं जपं दानं देवतानां तथा अर्चनं तथा अन्यानि च कर्माणि न कुर्वन्ति द्विजातयः विनिन्दन्ति महादेवं ब्राह्मणान् पुरुषोत्तमम् आम्नायं धर्मशास्त्राणि पुराणानि कलौ युगे कुर्वन्ति अवेददृष्टानि कर्माणि विविधानि तु स्वधर्मेतु रुचिः नैव ब्राह्मणानां प्रजायते**” (कूर्मपुरा.१।३०।८-१०) इत्यादिकथनाद् अधार्मिकाः कापालिकादि-दुरागम-दुराचार-दुरध्ययन-तज्जन्यदुरिच्छादि-शालिनो वेदाध्ययन-स्नान-जपादि-रहिताः शिवकेशवयोः निन्दकाः श्रुति-स्मृति-पुराणगर्हिणो भवादृशाः प्रच्छन्नकापालिकादयएव “**कुर्वन्ति च अवताराणि**” इत्यादिवचसां गोचराः, एवं तथा “**कापालिकाः च ये**” इत्याद्युक्तेः साक्षात्कापालिकप्रभृतयः च तद्विषयाः. वेदाद्यध्यायिनः तदुक्त्यनुयायिनः श्रीहरिसम्प्रदायिनस्तु न अमीषां विषयाः, अनुपदं “**विनिन्दन्ति हृषीकेशं ब्राह्णाः ब्रह्मवादिनः वेदबाह्यव्रताचाराः दुराचाराः वृथाश्रमाः मोहयन्ति जनान् सर्वान् दर्शयित्वा फलानि च तमसाविष्टमनसो वैडालव्रतिकाधमाः**” (कूर्मपुरा.१।३०।३०-३२) इति कथनेन वैष्णवेषु तदप्रवृत्तेः षोडशाध्यायादौ मोहकत्वादिना वर्णितेषु तत्प्रवृत्तेः च निश्चयात्. किञ्च तत्र “**ज्ञाने कर्मण्यपगते लोके निष्क्रियतां गते कीट-मूषक-सर्पाः च धर्षयिष्यन्ति मानुषान् कुर्वन्ति च अवताराणि**” (कूर्मपुरा.१।३०।२६-२७) इत्यादि पठ्यते. तथाच “**सर्वथा ज्ञानकर्मापगमलोकनिष्क्रियत्वयोः अधिकरणे कलियुगान्तएव तेषाम् अवतरणं सिद्ध्यति.**” (कूर्मपुरा.१।३०।२८) “**तस्मिन् कलियुगान्तके**” इति उक्त्यापि तदेव दृढीक्रियते. बहुषु पुस्तकेषु एवमेव पाठः. “**तस्मिन् काले युगान्तके**” इति पाठेपि एतद् अक्षतम्. एवं सति “**कुर्वन्ति च**” इति वचसाम् अद्यत्वे न अवसरः. अपिच “**कुर्वन्ति च...**” इत्यत्र ‘**अवतार**’शब्दं क्लीबत्वसाधुत्वाय स्वरीत्या अधिकरणघञन्तं स्वीकरोषि न वा? आद्ये अवतारक्रियाधिकरणानामेव करणं प्राप्यते नतु अवतरणम्. द्वितीये लिङ्गविरोधः तदवस्थः. “**ब्राह्मणाः तासु योनिषु**” इति बहुवचनेन शप्तानां पश्वादियोनिष्वपि अवतारो गम्यते. वाक्यार्थस्तु प्रागेव व्याख्यातः.

(२) वस्तुतस्तु न अस्मन्मते शिवनिन्दा नापि शिवद्वेषः. अतएव अस्मदाचार्यैः तत्र-तत्र श्रीशिवस्य उत्कृष्टतयैव वर्णनं कृतम्. स्वस्वमतं व्यवस्थापयितुम् अवतीर्णानां वास्तवीम् आचार्यपदवीम् उद्वहतां तेषां तत्तन्मतव्यवस्थापनस्य परमतखण्डनं विना दुर्विभाव्यतया तत्तन्मतखण्डनावरे खण्डनयुक्तिसहकारित्वेन उत्कर्षापकर्षबोधकवचनानितु न देवनिन्दात्वेन व्यवह्रियन्ते. अतएव कापिलमतखण्डनावसरे शङ्कराचार्याणां "ईक्षतेः न अशब्दम्" (ब्र.सू.१।१।४) इति सूत्रे "न साङ्ख्यपरिकल्पितम् अचेतनं प्रधानं जगतः कारणं शक्यं वेदान्तेषु आश्रयितुं अशब्दंहि तद्" (ब्र.सू.शां.भा.१।१।५) अग्रेच "गौणः चेद् न 'आत्म'शब्दाद्" (ब्र.सू.१।१।५) इति सूत्रे "प्रधानम् अचेतनं 'सत्' शब्दवाच्यम्" (ब्र.सू.शां.भा.१।१।६) इति यद् उक्तं तद् असद् इति. द्वितीयाध्यायारम्भे च "स्मृत्यनवकाशदोषप्रसङ्गः इति चेद्, न अन्यस्मृत्यनवकाशदोषप्रसंगाद्" (ब्र.सू.२।१।१) इति सूत्रव्याख्याने "परतन्त्रप्रज्ञास्तु प्रायेण जनाः" (ब्र.सू.शां.भा.२-।१।१) इत्यादि उक्त्वा "अस्मत्कृते च व्याख्याने न विश्वसेयुः बहुमानात् स्मृतीनां प्रणेतृषु कपिलप्रभृतीनां च आर्षं ज्ञानम् अप्रतिहतं स्मर्यते, श्रुतिश्च भवति ऋषिं प्रसूतं कपिलम्" (ब्र.सू.शां.भा.२।१।१) इत्याद्या. अग्रे "या तु श्रुतिः कपिलस्य ज्ञानातिशयं प्रदर्शयन्ती प्रदर्शिता न तया श्रुतिविरुद्धमपि कापिलं मतं श्रद्धातुं शक्यम्" (ब्र.सू.शां.भा.२।१।१) इति "श्रुतिसामान्यमात्रत्वाद् अन्यस्य च कपिलस्य सगरपुत्राणां प्रतप्तुः 'वासुदेव'नाम्नः स्मरणाद्" (ब्र.सू.शां.भा.२।१।१) इति. ततः पूर्वञ्च प्रधानादिकारणवादाः अशब्दत्वेन निराकृताः. एवमादिस्थलेषु कापिलं मतं वेदविरुद्धम् इत्यादि प्रतिपादनं न निन्दात्वेन व्यवह्रियते. एवं "बलाद् आपतितो मायावादः साङ्ख्यस्य दुर्मतेः" (पञ्चद.६।२३२) इत्यादि विद्यारण्यस्य

> **वचनमपि. अन्यथा विष्णोः अवतारत्वेन निश्चितस्य कपिलस्य दुर्मतित्वेन वर्णनं तन्मतस्य वेदबाह्यत्ववर्णनं च कथं न विष्णुनिन्दा स्यात्. यच्चापि** एतत् कुत्सापरौ अस्मदीयौ श्लोकौ **(सह.मु.पृ.२।५६) इत्यादिनिर्बन्धेन कथनं तत्तु निन्दैव. अतएव तस्य ‘‘विनिन्दन्ति हृषीकेशं ब्राह्मणाः ब्रह्मवादिनः’’ इति तदङ्गीकृतविप्रशप्तलक्षणप्रकरणमध्यपतित-श्लोकप्रतिपाद्यब्रह्मवादिनिन्दाकर्तृत्वेन तस्मिन् विप्रशप्तत्वं दुरुद्धरमेव.**

(३) सहस्राक्षे विष्णोः पराङ्मुखता शिवद्वेषादेः फलम् इति उक्तिं दूषयन्तः तत्कल्पितलक्षणसप्तकस्य स्वेषु सर्वथैव अप्रवृत्तिं प्रकाशयन्ति **वस्तुतस्तु न अस्मन्मते** इत्यादिना **दुरुद्धरमेव** इत्यन्तेन. एवञ्च यदि शिवद्वेषादिकं स्यात्, स्यान्नाम तर्हि अस्मासु यथा कथञ्चित् प्रभुपाराङ्मुख्योत्प्रेक्षणस्य अवसरः. तदेवतु न अस्ति कुतस्तरां तदा तदारोपणस्य अवकाशः इति भावः. द्वेषनिन्दयोः अभावमेव उपपादयन्ति **अतएव** इत्यादिना. **तत्र तत्र** इति बालबोध-सिद्धान्तमुक्तावल्यादिषु प्रकरणग्रन्थेषु ‘‘**अतः शिवश्च विष्णुश्च जगतो हितकारकौ**’’ (बा.बो.११) इति ‘‘**ब्रह्म-विष्णु-शिवाः ततः देवतारूपवत् प्रोक्ताः**’’ (सि.मु.१०) इत्यादि उक्तम्. तथा चतुर्थस्कन्धनिबन्धे ‘‘**तस्माद् अन्यतरद्द्वेषे न इतरत् कर्म सिध्यति**’’ (त.दी.नि.३।४।२४) इति ‘‘**शिवद्वेषनिवृत्त्यातु धर्मः सिध्येदपि क्वचिद्**’’ (त.दीनि.३।४।४३) इति च उक्तम्. एतद्विवरणे श्रीविठ्ठलाचार्याः ‘‘‘**संमुह्यन्तु हरद्विषः**’ **(भाग.पुरा.३।४।२५) इति वाक्यात् तद्द्वेषयुक्तेष्वेव तस्य शापात् तन्निवृत्तौ धर्मः सिध्येद् इति अर्थः. ‘अपि’ इति सम्भावनायाम्. पूर्वोक्तवैपरीत्ये सम्भावनापि न अस्ति इति भावः**’’ (त.दी.नि.प्र.३।४।४३) इति आहुः. अस्य आवरणभङ्गे च श्रीपुरुषोत्तमचरणाः ‘‘‘**अपि’ इति सम्भावनायाम् इत्यादि. तथाच शिवद्वेषो न कार्यः इत्येव मुख्यः पक्षः इति अर्थः**’’ (त.दी.नि.आ.३।४।४३) इति व्याचक्षते. अष्टमस्कन्धनिबन्धे च ‘‘**विष्णुः ब्रह्मा महेशः च सर्वत्रैवहि कारणम्. एकम् एकतराभावे न कार्यं जनयेत्**

क्वचिद्” (त.दी.नि.३।८।४७) इति अभिहितम्. एतद्योजनायां च श्रीपुरुषोत्तमचरणाः “ ‘**आत्मेश्वरः उपद्रष्टा स्वयं दृगविशेषण**’ (**भाग.पुरा.४।७-।५८) इति दक्षं प्रति भगवद्वाक्यात् कार्यमात्रं प्रति त्रयाणां कारणत्वेन तत्रापि त्रयाणां कारणत्वम् अनुसन्धेयम् इति अर्थः**” (त.दी.नि.आ.८।७।४७) इति विवृण्वन्ति. पत्रावलम्बनग्रन्थसमाप्तौ च “**काशीपतिः त्रिलोकेशो महादेवस्तु तुष्यतु**” (पत्रा.३७) इति स्वयं विहितेन वेदविरुद्धवादव्युदासेन ब्रह्मवादस्थापनेन च श्रीमहादेवस्य तोषो अभ्यर्थितः. एवं सुबोधिन्यादिषु ग्रन्थान्तरेष्वपि द्रष्टव्यम्. चतुर्थस्कन्धनिबन्धादौ शिवस्य स्वमार्गप्रथमाचार्यत्वमपि वर्णितं तदग्रे दर्शयिष्यामः. तस्माद् अस्मासु शिवद्वेषादिकं सम्भाव्य तस्य लक्षणत्वं च उत्प्रेक्ष्य शप्तत्वम् आरोपयन् शशं तच्छृङ्गप्राप्तये पुष्करप्रसूनैः पिपूजयिषन्तम् अनुकरोति. ननु मा अस्तु! शिवद्वेषः शङ्कराचार्यद्वेषस्तु विद्यतएव तन्मतखण्डनात्, खण्डनावसरे क्वचिद् अपकर्षबोधकशब्दानां प्रयोगात् च इति चेद्; लक्षणग्राहकमानतया अभिमते शङ्कराचार्याणां “**न सम्बन्धगन्धोऽपि**” इति प्रागेव प्रत्यपादयाम. नापि वयं तेषामपि द्वेषाद् उन्मेषयामः इति आशयेन आहुः **स्वस्वमतम्** इत्यादि. **अतएव** इति. अयं भावः : “**ईक्षति...**”(ब्र.सू.१।३।४) सूत्रे पूर्वं साङ्ख्यादीन् निर्दिश्य “**एवम् अन्येऽपि तार्किकाः वाक्याभास-युक्त्याभासावष्टम्भाः पूर्वपक्षवादिनः इह उत्तिष्ठन्ते**” (ब्र.सू.शां.भा.१।१।४) इति तेषु अपकर्षबोधकशब्दाः प्रयुक्ताः. सूत्रव्याख्याने च “**अशब्दंहि तद्**” (ब्र.सू.शां.भा.१।१।५) इत्यन्तेन साङ्ख्यस्य अवैदिकत्वम् उक्तं “**गौणः चेद्**” (ब्र.सू.१।१।५) इति सूत्रेऽपि तदुक्तस्य असत्त्वम् उक्तम्. द्वितीयाध्यायारम्भसूत्रे च प्रधानादिवादानां न्यायाभासोपबृंहितत्वप्रतिपादनमपि द्वितीयाध्यायप्रयोजनं कण्ठरवेण उक्त्वा पूर्वपक्षे “**परतन्त्रप्रज्ञास्तु**” इत्यादि “**ऋषिं प्रसूतम्**” (ब्र.सू.शां.भा.२।१।१) इत्यन्तम् उक्त्वा सिद्धान्ते श्रुतिविरोधात् कापिलादिस्मृतीनां सर्वथा अनादरणीयत्वं प्रपञ्च्य या च श्रुतिः इत्यादिना “**ऋषिं प्रसूतम्**” इति श्रुतिः अन्यथा नीता. अत्र **प्रतप्तुः** इति ‘प्रदाहकस्य’ इति रत्नप्रभादयः. **ततः पूर्वम्** इति, “**स्मृत्यनवकाश...**”(ब्र.सू.२।१।१) सूत्रात् पूर्वं प्रथमाध्याये इति अर्थः. तत्र प्रथमे पादे “**कामाच्च न अनुमानापेक्षा**” (ब्र.सू.१।१।१८) इत्यादौ भाष्ये शङ्कराचार्यैः सांख्यपरिकल्पिताचेतनप्रधानस्य अनपेक्षितव्यत्वस्य

(द्र.ब्र.सू.शां.भा.१।१।८) कथनाद् द्वितीयपादे **''नच स्मार्तम् अतद्धर्माभिलापाद्''** (ब्र.सू.१।२।१९) इत्यादौ कण्ठरवेण साङ्ख्यस्य निराकरणात् तृतीयपादे **''द्युभ्वाद्यायतनं 'स्व'शब्दाद्''** इत्याद्यधिकरणेषु तथा करणात् चतुर्थपादे **''आनुमानिकमपि एकेषां''** (ब्र.सू.१।४।१) **''चमसवद् अविशेषाद्''**(ब्र.सू.-१।४।८) इत्यादौ तदनुकूलतया प्रतीयमानश्रुतीनां तदननुकूलत्वादेः कथनात् च निराकृताः इति भावः. तथाच तेषु कपिलादिद्वेषिता कथं न स्यात्. अथ स्वसिद्धान्तस्थापनावसरे खण्डनं, खण्डने सहकारितया अपकर्षबोधकशब्द-प्रयोगश्च न दोषः इति चेत् तुल्यम्. **बलाद् आपतितः** इति. इदं पञ्चदश्यां चित्रदीपाख्ये षष्ठप्रकरणे **''अविवेककृतः सङ्गो नियमः च''**(पंचदशी.६।२३२) इति चेत् तद् इति पूर्वार्धस्य उत्तरार्धम् अस्ति. **वचनमपि** इति न निन्दात्वेन व्यवह्रियते इति अनुषज्ज्यते. तदुक्तवाक्यैः तस्यैव शप्तत्वं निर्धारयन्ति **यच्चापि** इत्यादिना. **तत्तु निन्दैव** इति. अविद्यमानदोषकथनरूपत्वाद् इति भावः. इदं तत्रैव स्फुटीभविष्यति.

(२) यत्तु ''द्विषन्तो देवम्'' (कूर्मपुरा.१।२७।१८) इत्यत्र ''लक्षणहेत्वोः क्रियायाः'' (पाणि.सू.३।२।१२६) इति सूत्रेण लक्षणे हेतौ वा शत्रा, ''अदन् विप्रो न नमनीयः'' ''पचन् विप्रो न श्राद्धे भोजनीयः'' इत्यादिवत्, तेन शिवद्वेषः शप्तानाम् एकं लक्षणम् **इति उक्तं तद् अत्यन्तम् असत्. तेन सूत्रेण क्रियायाः परिचायके हेतौ च अर्थे वर्तमानाद् धातोः लटः शतृशानचौ विधीयेते (द्रष्ट.पाणि.सू.-काशि.३।२।१२६) नतु कारकपरिचायकार्थात्. अतएव तत्सूत्रभाष्ये ''लक्षणहेत्वोः क्रियायाः'' इति उक्त्या कारकार्थे ''गुणः उपसङ्ख्यानं कर्तव्यं, तिष्ठन् मूत्रयति गच्छन् भक्षयति'' (पातं.महाभा.३।२।१२६) इति. अग्रेच ''इह तावत् तिष्ठतिक्रिया मूत्रयतिक्रियायाः लक्षणम्. गच्छन् भक्षयति इति गच्छतिक्रिया भक्षयतिक्रियायाः लक्षणं यो अधीयानः आस्ते सः देवदत्तः इति अध्ययनक्रिया आसनक्रियायाः लक्षणं''**

> **(पाणि.सू.वा.३।२।१२६) इति उक्तं. तदुपरि कैयटेन “‘गुण’शब्देन अत्र साधनम् उच्यते “तिष्ठन् मूत्रयति” इति यदा स्थानादिना मूत्रादिक्रिया लक्ष्यते तदा सूत्रेणैव आदेशसिद्धिः, यदातु कारकं लक्ष्यते तदर्थम् इदं वचनं” (पातं.महाभा.प्र.३।२।१२६) इति उक्तम्. अतः तादृशभाष्यकैयटोक्तरीत्या “क्रियायाः लक्षणएव वर्तमानाद् धातोः परस्य लटः शत्रादेशः तादृशसूत्रेण भवति” इति तत्सूत्रानुसारेण शिवद्वेषो विप्रशप्तानाम् एकं लक्षणम् इति वदन् भाष्यानभिज्ञएव. किञ्च “यो अधीयानः आस्ते सः देवदत्तः” (पाणि.सू.वा.३।२।१२६) इत्यादिवत् तादृशश्लोके ‘यत्-तत्’पदघटिताख्यातान्तद्वितीयधातुयुक्त-वाक्यस्य अभावात् तादृशसूत्रस्य प्राप्तिरेव न सम्भवति. तिङन्त समभिव्याहारस्थलएव सर्वोदाहरणेषु भाष्ये शत्रादेशस्य दर्शितत्वेन भाष्यानारूढे “अदन् विप्रो न नमनीयः, पचन् विप्रो न श्राद्धे भोजनीयः” इति उदाहरणे दृष्टान्तविधया प्रदर्शयन् उपेक्षणीयः. वस्तुतस्तु तादृशप्रकरणालोचने शिवद्वेषस्य शिवनिन्दायाः च मुनिकोपोत्पादनद्वारा शापहेतुत्वं सम्भवति. अतो अत्र तादृश-तिङन्त-क्रियाध्याहारे हेत्वर्थक-धातोः लटः शत्रादेशस्तु सम्भावितः तदनध्याहारेतु न सम्भवति इति.**

(३) यश्च सहस्राक्षे लक्षणसप्तकप्रतिपादनात् प्राक् तद्बोधकतया उपन्यस्तेषु वाक्येषु (मु.पृ.५६) द्विषन्तः इत्यादौ लक्षणे हेतौ वा शत्रा स्वप्रतिपिपादयिषितार्थसमर्थनार्थम् उक्तः स न युक्तः इति सिंहावलोकनन्यायेन अनूद्य दूषयन्ति. **यत्तु लक्षणम्...** इत्यादिना **न सम्भवति** इत्यन्तेन. अयम् अर्थः “**लक्षणहेत्वोः**” इत्यत्र “**लक्ष्यते अनेन इति लक्षणं परिचायकम्.**” (पाणि.सू.त.बो.३।२।१२६). ‘हेतु’शब्दश्च फलकारणोभयपरः ‘क्रियायाः’ इत्यस्य सर्वत्र सम्बन्धः. तथाच “क्रियायाः परिचायके क्रियायाः फले क्रियायाः कारणे च वर्तमानाद् धातोः परस्य लटः शतृशानचौ

स्तः'' इति अर्थः. तत्र ''**लक्षणे यथा शयानाः भुञ्जते यवनाः**'' (पाणि.सू.काशि.३।२।१२६). अत्र शेखरे ''**शयनं भुज्यर्थपरिचायकं तदुपलक्षितभुज्यर्थेनच यवनाः परिचाय्यन्ते**'' (परिभाषेन्दु.) इति उक्तम्. एवञ्च प्रकृते लक्षणे शतः इति चेत् शेतिक्रिया भुजिक्रियायाइव द्वेष्टिक्रिया कस्याः परिचायिका यया च शप्ताः परिचाय्येरन्. नहि शप्तानामेव लक्षणं द्वेष्टि क्रिया शक्या वक्तुं तेषाम् अक्रियात्वात्. ननु ''**लक्षणहेत्वोः क्रियायाः गुणः उपसङ्ख्यानम्**'' (पातं.महाभा.३।२।१२६) इति वार्तिकेन ''शप्ताः'' इति कर्मणोऽपि लक्षणे स्यात्. 'गुण'शब्दस्य कारकपरत्वात्. कैयटेन ''**'गुण'शब्देन अत्र साधनम् उच्यते**'' (पातं.महाभा.प्र.३।२।१२६) इति व्याख्यानात्. तत्रैव विवरणे भाष्ये ''**'क्रियायाः गुणे' इति क्रियायाः कारके इति अर्थः**'' (पातं.महाभा.प्र.३।२।१२६) इत्यादिव्याख्यानात् च इति चेद्, मा एवं! वार्तिकेन प्रत्ययाङ्गीकारे ''**लक्षणहेत्वोः क्रियायाः**'' इति सूत्रेण 'शत्रा'इति स्वोक्तेः बाधात्. तत्रैव कैयटेन ''**'तिष्ठन् मूत्रयति' इत्यादौ यदा स्थानादिना मूत्रादिक्रिया लक्ष्यते तदा सूत्रेणैव आदेशसिद्धिः. यदातु कारकं लक्ष्यते तदर्थम् इदं वचनम्. बहुषु मूत्रयत्सु ''को देवदत्तः?'' इति उक्ते ''यः तिष्ठन् मूत्रयति'' इति प्रतिवचनेन देवदत्तो लक्ष्यते अथवा अशौचादिगुणो गृह्यते**'' (पातं.महाभा.प्र.३।२।१२६) इति सूत्रवार्तिकयोः विषयस्य विभागात्. वस्तुतस्तु कारकलक्षणेऽपि स्थिति-गमनादिक्रियायां मूत्रण-भक्षणादिक्रियायाइव द्वेष्टिक्रियायां क्रियान्तरस्य सहकारो अपेक्षितएव. अतएव विवरणे ''**'देवदत्तो लक्ष्यते' इति मूत्रणसमानकालिक-स्थानक्रियया इति अर्थः**'' (पातं.महाभा.प्र.३।२।१२६) इति व्याख्यातम्. किञ्च अस्मिन् वार्तिके 'गुण'शब्देन कर्तृरूपकारकमेव गृह्यते. भाष्ये ''**तिष्ठन् मूत्रयति, गच्छन् भक्षयति**'' इति तथैव उदाहरणात्. एवम् अरुच्या स्वीकृते ''**अशौचादिगुणो गृह्यते**'' इति पक्षान्तरेतु प्रकृते अप्रसक्तिरेव. ''**कर्तुश्च लक्षणयोः पर्यायेण अचयोगे**'' (पाणि.सू.वा.३।२।१२६) इति अग्रिमवार्तिकेऽपि ''**यदा पूर्ववाक्ये गुणः साधनं गृह्यते तदा तेनैव सिद्धेः पर्यायार्थः, यदातु अशौचादेः गुणस्य तत्र-तत्र ग्रहणं तदा विध्यर्थः**'' (पातं.महाभा.प्र.३।२।१२६) इति वदता कैयटेन पूर्वत्र वार्तिके प्रथमपक्षे

कर्तुरेव ग्रहणं द्वितीयपक्षस्य मुख्यत्वं च ध्वनितम्. अन्यथा ‘‘**कर्तुश्च**’’ इति वार्तिकम् अपार्थकमेव स्यात्. ‘‘**यो अधीयानः आस्ते सः देवदत्तः, यः आसीनो अधीते सः देवदत्तः**’’ (पाणि.सू.वा.३।२।१२६) इति पर्यायेऽपि प्रत्येकं पूर्वेण सिद्धौ बाधकाभावात्. एवं सति अशौचादिगुणस्य लक्षणे प्रथमं कर्तुः लक्षणे द्वितीयं वार्तिकं प्रवर्तते इति न प्रकृते तयोः प्रवृत्तिः नापि तत्त्वाख्याने च इत्यनेन ‘‘**शयाना वर्धते दूर्वा, आसीनं वर्धते विसम्**’’ (पाणि.सू.वा.३।२।१२६) इत्यादिवत् स्वभावमात्रकथने शत्रा शङ्क्यः लक्षणे हेतौ वा शत्रा इति स्वोक्तेरपि विरोधात्. ‘‘**नहि आसनं वृद्धेः लक्षणं किं तर्हि? स्वभावमात्रकथनम्**’’ (पातं.महाभा.प्र.३।२।१२६) इति कैयटोक्तेः ‘**वर्धते**’ इत्यादेरिव समानकर्तृकक्रियोपस्थापकतिङन्तपदस्य प्रकृते अनुपलम्भाच्च. वस्तुतस्तु भाष्यकृता ‘‘**तत् तर्हि वक्तव्यं**’’ (पाणि.सू.वा.३।२।१२६) ‘‘**न वक्तव्यम्. लक्षणहेत्वोः क्रियायाः इत्येव सिद्धम्. इह तावत् ‘तिष्ठन् मूत्रयति’ इति तिष्ठतिक्रिया मूत्रयतिक्रियायाः लक्षणं, ‘गच्छन् भक्षयति’ इति गच्छतिक्रिया भक्षयतिक्रियायाः लक्षणं, ‘यो अधीयानः आस्ते सः देवदत्तः’ इति अध्ययनक्रिया आसनक्रियायाः लक्षणम्**’’ (पाणि.सू.वा.३।२।१२६) इत्यादिना प्रत्याख्यातं वार्तिकजातं तदिति न ततोऽपि तव इष्टसिद्धिः. अत्र कैयटः ‘‘**‘तिष्ठतिक्रिया’ इति स्थितिक्रियालक्षितातु मूत्रणक्रिया, ‘यः तिष्ठन् मूत्रयति सः देवदत्तः’ इति सर्वनामपरामर्शे देवदत्तस्य लक्षणं तद्गतस्य वा अशौचादेः इति भावः**’’ (पाणि.सू.वा.३।२।१२६) इति व्याचष्टे. एतच्च नागोजीभट्टः ‘‘**ननु क्रिययोरेव लक्ष्यलक्षणभावे ‘को देवदत्तः’ इति प्रश्ने इदम् उत्तरं न स्याद् अतः आह ‘स्थितिक्रिया’ इति सर्वनामपरामर्शे इति. यत् तद्रूपसर्वनामपरामृष्टदेवदत्तस्य लक्षणम् इति फलितम्. अन्यथा वचनान्तरारम्भेऽपि तिष्ठतेः शत्रनापत्तिः. नहि तद्वाच्या क्रिया देवदत्तस्य लक्षणं किन्तु तदुपलक्षितमूत्रणक्रिया इति बोध्यम्**’’ (पाणि.सू.वा.३।२।१२६) इति विवृणोति. एवं सति प्रकृते ‘‘**लक्षणहेत्वोः**’’ इति क्रियालक्षणे शतुः अङ्गीकारे द्वेष्टिक्रियया लक्षितं क्रियान्तरमेव शप्तानां लक्षणं भवितुम् अर्हति नतु द्विष्यर्थक्रियैव. नच क्रियान्तरं वाक्ये श्रूयते तेषां कर्मत्वात्तु सत्यपि क्रियान्तरे प्रयोगो न

स्यात्. भाष्यादिषु सर्वत्र “**तिष्ठन् मूत्रयति**” इति उदाहरणेषु लक्ष्यक्रियायां समानकर्तृकतायाः तिङन्तपदोपस्थाप्यतायाः च नियमदर्शनात्. नहि केनापि प्रामाणिकेन “**अदन् विप्रो न नमनीयः**” इत्यादि उदाहृतम्. शप्तजीवलक्षणे “**शतुः स्वीकारे च सूत्रे क्रियायाः**” इति पदम् अपार्थकमेव स्यात्. अतएव काशिकायां “**लक्षणे हेतौ च अर्थे वर्तमानाद् धातोः परस्य लटः शतृशानचौ आदेशौ भवतः तौ चेद् लक्षणहेतू क्रियाविषयौ भवतः, लक्षणे ‘शयाना भुञ्जते यवनाः’ ‘तिष्ठन्तो अनुशासति गणकाः’. हेतौ ‘अर्जयन् वसति’, ‘अधीयानो वसति’. लक्षणहेत्वोः इति किम्? पचति, पठति. क्रियायाः इति किम्? द्रव्यगुणयोः मा भूद्! ‘यः कम्पते सो अश्वत्थः’ ‘यद् उत्प्लवते तद् लघु यद् निषीदति तद् गुरुः’**” (पाणि.सू.काशि.३।२।१२६) इति उक्तम्. एतदेव हृदि निधाय शेखरकारोऽपि. “**क्रियायाः इति किम्? यः कम्पते सो अश्वत्थः**” इत्यादौ “**मा भूद्!**” इति आह. एवं हेतौ शतुः अङ्गीकारेऽपि “अर्जयन् वसति” इत्यादौ हेतुमत्क्रियायाः तिङन्तपदोपस्थाप्यत्व-समानकर्तृकत्वयोः दर्शनाद् इह तादृशपदाभावात् च फले शतरि द्वेष्टिक्रिया कस्याः क्रियायाः फलम्? कारणे शतरि सा कस्याः कारणम् इति चिन्त्यम्. समानकर्तृकत्वानियमे चैत्रस्य लाभार्थं भोजनार्थं वा मैत्रस्य वासेऽपि अर्जयन् वसति भुञ्जानो वसति इति प्रयुज्येद् इति दिक् **तादृशतिङन्तः...** इति. अत्र यत्तदोरपि अध्याहारो बोध्यः. तिङन्तन्तु ‘अकोपयन्’ ‘अनिन्दन्’ इत्यादिरूपं किञ्चिद् अध्याहर्तव्यम्. तथाच “ये शिवं द्विषन्तो दधीचं गौतमं वा मुनिम् अकोपयन् द्वेषाद् देवम् ईशानम् अनिन्दन् वा ते शप्ताः ते च न सम्भाष्याः” इति अर्थः. “**यो अधीयानः आस्ते सः देवदत्तः**” इतिवत् प्रयोगः “इह हेतावेव शतृ” इति आग्रहे असौ अध्याहारक्लेशः. क्लेशानादरेतु आहुः **तदनध्याहार** इति. तथाच अस्मिन् पक्षे “**लटः शतृशानचौ...**” (पाणि.सू.३।२।१२४) इति शत्रा “**वर्तमाने लड्**” इत्यतो ‘लड्’ इति अनुवर्तमानेऽपि पुनः लड्ग्रहणम् अधिकवचनार्थम्. तेन “**अप्रथमासामानाधिकरण्येऽपि**” क्वचिद् इति व्याख्यानात्. गौतमकर्तृकशापे शिवद्वेषस्य अकारणत्वमपि “**द्विषन्तो देवम्**” इत्यत्र हेतौ शतुः अनादरे बीजं द्रष्टव्यम्.

(२) इदं पुनः अत्र बोध्यम् : पूर्वोक्तरीत्या दोषपरिहारः अस्माभिः परोक्तं यथाश्रुतं दोषम् अङ्गीकृत्य कृतो वस्तुतस्तु दोषएव न अस्ति. तथाहि कूर्मपुराणे पञ्चदशेऽध्याये दधीचशापम् उक्त्वा ततः उक्तं ''ये अन्ये शापाग्निनिर्दग्धाः दधीचस्य महर्षयः द्विषन्तो मोहिता देवं सम्बभूवुः कलिषु अथ'' (कूर्मपुरा.१।१५।९४) अत्र 'सम्बभूवुः' इति उक्तं नतु 'भविष्यन्ति' इति उक्तम्. अग्रे च ''कलिषु'' इति बहुवचनम् उक्तम्. एवञ्च सूतशौनकसंवादात् प्राक्तनकलिष्वेव ते जाताः नतु वर्तमानकलियुगे. कथम् अन्यथा सूतेन व्यासैः वा भविष्यन्ति इति न उक्तं स्यात्. तस्मात् तादृश कौर्मप्रकरणं व्यतीतकलिविषयकमेव.

(३) अथ युक्त्यन्तरेणतु त्वदुक्तदोषप्रसक्तिरेव न अस्ति इति आहुः. **इदं पुनः** अत्र इत्यादिना **...विषयकमेव** इत्यन्तेन. अत्र कौर्मे उक्तचरस्थले ब्रह्मणा शुद्धाद्वैतावलम्बेन विष्णुशिवयोः अभेददृष्टौ मुक्त्यादिकं, भेददृष्टौ नरकप्राप्त्यादिकं च अभिहितं निशम्य दक्षः त्र्यक्षं शरणं जगामः इति वर्णयित्वा ब्रह्मवचनश्रवणेऽपि शुद्धम् अद्वैतम् अनादृत्य साक्षात् शिवं द्विषतां सप्तमहर्षीणां वृत्तान्तो वर्ण्यन्ते ''**ये अन्ये शापाग्निनिर्दग्धाः दधीचस्य महर्षयः द्विषन्तो मोहिता देवं सम्बभूवुः कलिषु अथ त्यक्त्वा तपोबलं कृत्स्नं विप्राणां कुलसम्भवाः पूर्वसंस्कारमाहात्म्याद् ब्रह्मणो वचनाद् इह मुक्तशापाः ततः सर्वे कल्पान्ते रौरवादिषु निपात्यमानाः कालेन सम्प्राप्य आदित्यवर्चसं ब्रह्माणं जगताम् ईशम् अनुज्ञाताः स्वयंभुवा समाराध्य तपोयोगाद् ईशानं त्रिदशाधिपं सम्बभूवुः यथा पूर्वं शङ्करस्य प्रसादतः**'' (कूर्मपुरा.१।१५।९४-९८) इति. इह ''**महर्षयः**'' इत्यत्र ''**महात्मनः**'' इत्यपि पाठः. **प्राक्तनकलिषुएव** इति ''**सम्बभूवुः**'' इति अनद्यतनपरोक्षभूतार्थक'लकार'प्रयोगात् ''**कलिषु**'' इति बहुवचनस्वारस्यात् च इति हृदयम्. क्वचित् पुस्तके चरमश्लोके ''**भविष्यन्ति यथापूर्वम्**'' इति पाठेऽपि शापमुक्तिब्रह्मलोकप्राप्त्यन्तस्य पूर्वकालिकत्वं न अपैति किन्तु अस्मिन् लोके पुनः तपोभिलाषाद्

यथापूर्वं जननमेव तादृशपाठे अर्थः. अन्यथा ''**सम्बभूवुः कलिषु**'' इति वचनं विरुध्येतैव. त्वदनुकूलो व्यासाभिप्रायः चेत् पूर्ववाक्ये ''**भविष्यन्ति कलौ**'' इह इत्येव वदेत्. ''**गृहिलतया एवं न आद्रियमाणे तु प्रागुक्तया असन्दिग्धया व्यवस्थया सन्तुष्य सम्भूताः ते कलिषु अथ**'' इति त्वन्मात्रकल्पितपाठेऽपि भूतत्वं तदवस्थमेव. एतेन सहस्राक्षे पूर्वं द्विषन्तो मोहिता इत्यादिना कालेन इति उक्तम् इत्यन्तेन विहितं व्यामोहनवैदग्ध्यं व्यर्थितम्.

> (२) श्वेतवाराहकल्पे वैवस्वतमन्वन्तरगताष्टाविंशतितमकलिविषयकाणितु ब्रह्माण्डादिपुराणवाक्यानि ''कलौ दशसहस्रेण विष्णुः त्यक्ष्यति मेदिनीं तदर्द्धे जान्हवीतोयं तदर्द्धे ग्रामदेवताः'' श्रीभागवते च ''कलिं सभाजयन्ति आर्याः गुणज्ञाः सारभागिनः यत्र सङ्कीर्तनेनैव सर्वः स्वार्थो अभिलभ्यते'' (भाग.पुरा.११।५।-३६) तथा ''कृते यद् ध्यायतो विष्णुं त्रेतायां यजतो मखैः द्वापरे परिचर्यायां कलौ तद् हरिकीर्तनात्, कलेः दोषनिधे राजन्! अस्ति हि एको महान् गुणः कीर्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत्'' (भाग.पुरा.१२।३।५१-५२) पुनः तत्रैव ''कृतादिषु प्रजा राजन्! कलौ इच्छन्ति सम्भवं कलौ खलु भविष्यन्ति नारायणपरायणाः क्वचित्-क्वचिद् महाराज द्रविडेषु च भूरिशः ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी कावेरी च महापुण्याः प्रतीची च महानदी ये पिबन्ति जलं तासां मनुजा मनुजेश्वर! प्रायो भक्ताः भगवति वासुदेवे अमलाशयाः'' (भाग.पुरा.११।५-।३८-४०) स्कन्दपुराणे च ''कर्मणा मनसा वाचा श्रीकृष्णं हि भजन्ति ये सम्प्रदायिगुरोः वाक्यात् ते विष्णोः न कलेः नराः वेदोक्तधर्महीनत्वात् सर्वे निरयगामिनः अनाश्रित्य हरिं जीवाः कलौ पाषण्डसङ्कुले'' (स्क.पुरा.) पद्मपुराणे च ''यदा भागवती सृष्टिः कलौ भवति वै तदा अंशेन भगवान् विष्णुः स्वात्मानं सृजति स्वयं तमाश्रित्य जनाः सर्वे भक्तिभाजो

भवन्तिहि'' (पद्मपुरा.) तथा तत्रैव ''चत्वारः ते कलौ भाव्याः सम्प्रदायप्रवर्तकाः भविष्यन्ति प्रसिद्धाः तेहि उत्कले पुरुषोत्तमाद्'' ( ) इत्यादीनि द्रष्टव्यानि.

(३) अतः परं वैष्णवसम्प्रदायानां तत्प्रवर्तकाचार्याणां च जगदुद्धारकारणत्वं तत्सम्मतहरिसेवनाद्याचार-तत्स्वरूपविषयकज्ञानयोः हरिपरितोषपुरःसरमोक्षफल-कत्वं च पुराणादिषु प्रसिद्धम् इति बोधयितुम् आहुः **श्वेतवाराहकल्पे** इत्यादि **द्रष्टव्यानि** इत्यन्तम्. अत्र **विष्णुः त्यक्ष्यति** इति दशसहस्रवर्षपर्यन्तमेव विशेषतो विष्णुः स्वसेवादिधर्मप्रचारं स्थापयिष्यति इति भावः. श्रीभागवतवचनेषु हरिकीर्तनमात्रेणापि बन्धमोक्षपुरःसरपरप्राप्तिपर्यन्तसर्वस्वार्थलाभस्य कथनात् तदनन्यभक्तानां वैष्णवानां प्रत्युत नरकप्राप्त्यन्तदुष्फलप्राप्तेः खण्डयिष्यमाण सहस्राक्षे प्रलपनं प्रद्वेषमात्रमूलकम्. स्कान्दवचस्सु **सम्प्रदायिगुरोः** इति. विष्णुस्वाम्यादिप्रकाशितानादिसिद्धचतुर्विधवैष्णवसंप्रदायान्यसम्बन्धिनो गुरोः इति भावः. अत्र मूलम् अनुपदं वक्ष्यते **ते विष्णोः** इति. तादृशगुरुतो दीक्षां लब्ध्वा सर्वात्मना भगवन्तं सेवमानाः ये तएव विष्णोः सम्बन्धिनो वैष्णवाः नतु ते कलेः सम्बन्धिनः तदधीनाः. कलिकल्मषकषणसाधनसंपन्नत्वाद् अतो न ते कलिजैः परिपीडिताः भवन्ति. **वेदोक्तधर्महीनत्वाद्** इति हरिम् अनाश्रित्य वैष्णवत्वम् अप्राप्य वेदोक्तैः तत्सेवासङ्कीर्तनादिधर्मैः हीनत्वादेव जीवाः निरयं गच्छन्ति. भगवद्धर्मास्तु मुक्तिसाधनतयैव ऋगादिषु चतुर्ष्वपि वेदेषु ''**तमु स्तोतारः पूर्व्यं यथाविदः ऋतस्य गर्भं जनुषा पिपर्तन**'' (ऋक्.संहि.१।१५६।३) इत्यादिना ''**भर्ता सन् भ्रियमाणो बिभर्ति**''(चित्युप.-७।१) इत्यादिना ''**ब्रह्मसंस्थो अमृतत्वम् एति**'' (छान्दो.उप.२।२३।१) इत्यादिना ''**भक्तिः अस्य भजनम्**'' (गो.पू.ताप.उप.१।३) इत्यादिना च वचःशतेन सप्रपञ्चं निरूपिता इति किं बहुना. नरकप्राप्तिस्तु तद्रहितानामेव. षष्ठस्कन्धादिषु ''**जिह्वा न वक्ति भगवद्गुणनामधेयम्**'' (भाग.पुरा.६।३।२९) इत्यादिवचनेभ्यः. विष्णुपुराणादिष्वपि ''**स्वपुरुषम् अभिवीक्ष्य पाशहस्तं वदति यमः खलु तस्य कर्णमूले परिहर मधुसूदनप्रपन्नान् प्रभुः अहम् अन्यनृणां न वैष्णवानाम्**'' (विष्णुपुरा.३।७।१४) इत्यादिसन्दर्भदर्शनात् च इतिदिक्.

पाद्मवचनेषु **यदा** इति **भागवती** दैवी सृष्टिः ‘‘**दैवी संपद् विमोक्षाय**’’ (भग.गीता१६।५) इति भगवद्वाक्याद् मोक्षयोग्यापि यदा **कलौ भवति** तद्दोषवती सम्पद्यते तदा ‘‘**भगवान् विष्णुः**’’ अंशरूपेण वा अंशेन सह ‘‘**स्वयमेव**’’ वा स्वस्वरूपं प्रकटयति तं प्रकटितात्मानम् आश्रित्य ततः उपदेशादिकं प्राप्य इति भावः. ‘‘**सर्वे जनाः**’’ ब्राह्मणादयो भगवद्भक्तिभाजो भवन्ति ‘‘**इह विष्णुः**’’ इति निर्देशाद् इदं विष्णुस्वाम्याख्यभगवदवतारपरम् इति केचित् शिष्टाः. भगवान् स्वयं विष्ण्वाख्यं स्वात्मानं सृजति इति तेषाम् आशयः. ‘‘**अनचि च**’’ (पाणि.सू.८।४।४७) इति सकारद्वित्वम् ‘‘**शङ्करो नीललोहित**’’ इत्यस्य शङ्कराचार्यपरत्वं वदता भवतातु इदं न शक्यं प्रत्याख्यातुम्. अस्माकन्तु न एवं व्याख्याने निर्बन्धः. **चत्वारः ते** इति इतः पूर्वं ‘‘**सम्प्रदायविहीना ये मन्त्राः ते निष्फलाः मताः अतः कलौ भविष्यन्ति चत्वारः सम्प्रदायिनः श्री-ब्रह्म-रुद्र-सनक-वैष्णवाः क्षितिपावनाः चत्वारः ते कलौ भाव्या**’’ (पद्मपुरा.) इति पठ्यते. ‘‘**उत्कले**’’ देशविशेषे ‘‘**पुरुषोत्तमात्**’’ श्रीजगन्नाथक्षेत्रात् तदधिष्ठातृ-जगन्नाथतो वा ‘‘**प्रसिद्धाः**’’ भविष्यन्ति इति अर्थः. इह दिसम्बन्धिनः सम्प्रदायाः क्रमेण रामानुज-माध्व-विष्णुस्वामि-निम्बार्का-ख्याभिः विदिताः ज्ञेयाः. ‘‘**रामानुजानां सरणी रमातो गौरीपतेः विष्णुमतानुगानां निम्बार्कगानां सनकादितः च माध्वानुगानां परमेष्ठितः च**’’ इति उक्तेः. तत्र अस्माकं रुद्रसम्प्रदायः. अतएव तस्य भक्तिदातृत्वं तत्र-तत्र वर्णयन्ति श्रीमदाचार्याः. यथा पुरुषोत्तमनामसहस्रे ‘‘**महादेव-स्वरूपः च भक्तिदाता कृपानिधिः**’’ (पु.ना.स.१२।२४७) इति. निबन्धे चतुर्थस्कन्धविवरणेऽपि सायुज्याधिकारिणां प्रचेतसां श्रीशिवकर्तृकोपदेशादेव सिद्धिः दर्शिता. ‘‘**तपसा साधने तस्य न बन्धो भवति इतिहि तत्रापि कृष्णसेवायां कृतार्थत्वं हि सर्वथा इति तान् सर्वथा शुद्धान् विलोक्य ईशो हरिप्रियः प्रोवाच सर्वसन्देहवारकं सर्वबोधकं हेतुपूर्वं स्तोत्रम् आह शीघ्रं तुष्यति यद्धरिः अयमेव उपदेशोहि विश्वासार्थं परम्परा**’’ (त.दी.नि.३।४।१६४-१६६) इति. एतद्विवरणेच श्रीप्रभुचरणाः ‘‘**तत्रापि विशेषम् आहुः तपसा इति. तस्य पित्रादेशस्य तपसा साधने प्रवृत्तिमार्गत्वेन स्वस्य सर्गकरणजबन्धो यः स न भविष्यति**

इति तपसि प्रवृत्ता:. तत्रापि न केवलं तावन्मात्रत्वं किन्तु तपस्यपि पुरुषोत्तमभजनं करिष्याम: तेन कृतार्था: भविष्याम: इति निश्चयवन्त: अत: इत्थंभूतत्वेन आधिदैविक्यपि शुद्धि: संपन्ना: इति सर्वप्रकारेण शुद्धान् ज्ञात्वा तान् प्रति प्रोवाच इति अर्थ:. ईशत्वेन आन्तरज्ञानं, तत्रापि हरिभक्तिज्ञानं हरिप्रियत्वेन अन्यथा कथम् अकस्माद् बहि: आगच्छेद्” (त.दी.नि.प्र.३।४।१६४-१६५) इत्यादि आहु:. द्वादशस्कन्धनिबन्धेच श्रीमदाचार्या: **“यो अधिकारी भक्तिमार्गे तत्प्रसादम् अवाप्यहि भक्त: चेत् सर्ववित् सुस्थ: तृतीय: स: उदाहृत: भक्तियुक्तो महादेव: तां दातुं शक्नुयात् तथा भक्तस्य यावान् सङ्क्लेश: स: माया इत्यपि रूपितम्. भक्तिमार्गानुसारेण भक्तिनिष्ठा इयम् ईरिता”** (त.दी.नि.३।१२।३१-३३) इति. एतद्व्याख्याने च श्रीपुरुषोत्तमचरणा: **“एवं द्वितीयाध्यायार्थ: उक्त:. तृतीयस्य आहु: य इत्यादि, एतेन ‘नारायणपर: प्रशान्तात्मा तृतीय:’ इति उक्तं भवति. ननु अत्र शिवदर्शनसंवादाद्युपनिबन्धनस्य किं प्रयोजनम् अत: आहु: भक्तियुक्त: इत्यादि. एतेन महादेवे गुरुत्वबोधनाय तदुपनिबन्धनम् इति उक्तम्”** (त.दी.नि.यो.३।१२।३१-३३) इत्यादि व्याचक्षते. एतेन शिवस्य भक्तिमार्गाचार्यत्वं प्रद्विषन्त: स्वमार्गानभिज्ञा: अस्मासु शिवद्वेषस्य आरोपका: च सर्वथैव प्रत्युक्ता: परेषां **“नारायणं पद्मभवं वसिष्ठम्”** इत्यादिवद् अस्माकम् आचार्यपरम्परातु **“आदौ श्रीपुरुषोत्तमं पुरहरं श्रीनारदाख्यं मुनिं कृष्णव्यासगुरुं शुकं तदनुविष्णुस्वामिनं द्राविडं तच्छिष्यं किल बिल्वमङ्गलम् अहं वन्दे महायोगिनं श्रीमद्वल्लभनामधाम: च भजे अस्मत्सम्प्रदायाधिपम्”** इति बोद्धव्या. इयञ्च मिताक्षरादौ विज्ञानेश्वरादिभि: उदाहृतवचनान्तरायां शाण्डिल्यसंहितायां भक्तिखण्डे पञ्चमाध्यायेऽपि दृश्यते यथा

अथात: श्रूयतां विप्रा: सम्प्रदाय: पुरद्विष: ।।
यत्र प्रसन्नो मनुजो हरे: प्रियतमो भवेत् ।।१।।
एकदा शङ्करो देवो गतो गोकुलमण्डलम् ।।
तत्र वृन्दावने रम्ये सच्चिदानन्दमन्दिरे ।।२।।
त्रिभङ्गललितं देवं कोटिमन्मथसुन्दरम् ।।

अनौपम्यं वेणुधरं व्रजस्त्रीगणसेवितम्।।३।।
श्रुतिभिः मुनिभिः चैव सेव्यमानं मुदान्वितम्।।
प्रणिपत्य मुदा देवं सामगानाद् अतोषयत्।।४।।
जगतोहि समुद्धर्त्तुं सम्प्रदायस्य लब्धये।।
तस्मै ददौ प्रसन्नात्मा तत्रत्यानाम् अनुग्रहात्।।५।।
सः लब्ध्वा परमं लाभं स्वधाम संन्यवर्तत।।
परमानन्दसंमग्नो नृत्यं चक्रे दिगम्बरः।।६।।
समुपासतः तं देवं तत्प्रष्टुं भृतकौतुकः।।
नचाचष्ट तदा देवाः हत्वा त्रिपुरम् आहवे।।७।।
तदा हर्षसमाविष्टो नारदेन प्रसादितः।।
जगौ तमेव सन्मार्गं श्रुतं यच्छ्रीपतेः मुखात्।।८।।
(नारायणात् च शेषात् च मन्त्रभागैः निजात्मनः)।।
नारदोऽपि महायोगी परमानन्दपूरितः।।९।।
अलं प्रसादतः प्रादाद् व्यासाय अमिततेजसे।।
कौण्डिन्याय मया प्रोक्तो गर्गाचार्य महात्मने।।१०।।
व्यासस्तु वक्ति पुत्राय ब्रह्मराताय विष्णवे।।
अथो कलौ सम्प्रवृत्तेः पूर्वाचार्येरथागतैः।।११।।
भविष्यति परा भक्तिः किञ्चित्कालं मुनीश्वराः।।
वेदवेदान्ततत्त्वज्ञैः वैष्णवैः ब्राह्मणोत्तमैः।।१२।।
निर्वाहिता ततो भक्तिः लुप्तप्रायाः भविष्यति।।
ततोऽपि श्रीपतेः अस्य स्वीयानुग्रहतो हरेः।।१३।।
माथुरे मण्डले तत्र गोकुले अस्मिन् गिरावपि।।
प्रादुर्भविष्यति महापुरुषैः उपभाविता।।१४।।
तस्याः सम्प्रीतये तत्र सम्प्रदायं रिरक्षिषुः।।
महात्मा सुमहातेजा भगवद्वदनोदितः।।१५।।
प्रादुर्भविष्यति ततः सर्वश्रुतिविशारदः।।
योगी योगीश्वरः तं वै सम्प्रदायं वदिष्यति।।१६।।
भगवानपि तं साक्षादुपदेष्टा निजागमम्।।

आसाद्य गोकुलं धामं भक्तिं संवर्धयिष्यति ॥१७॥
गिरिराजं ततः प्राप्य महात्मैकान्तसंश्रयैः ॥
निर्गुणं भक्तिमार्गं हि वर्धयित्वा चरिष्यति ॥१८॥
निजात्मप्रेमसम्पूर्णैः भगवद्ध्यानतत्परैः ॥
तद्रसाप्लुतचित्तानां स्वाचारपरिवर्तिनाम् ॥१९॥
सर्वभूतैकसुहृदां वेदप्रामाण्यम् ईयुषाम् ॥
विरलेष्वेव भविता सम्प्रदायो अनुत्तमः ॥२०॥
आश्चर्याणि चरित्राणि कृत्वा नानाविधानि असौ ॥
स्थापयिष्यति वै तस्याः पारम्पर्याक्रमं कुलम् ॥२१॥
समुद्धृत्य ततो जीवान् हरेः प्रीतिं करिष्यति ॥
ततः कतिपये काले कालदोषप्रभावतः ॥२२॥
विलयं यास्यति पन्थाः कापट्र्येन आकुलः परः ॥
परदोषान्वितैः/द्वेषान्वितैः पुम्भिः निजाचार्यपराङ्मुखैः ॥२३॥
(परस्त्रीलम्पटैः लुब्धैः कोपनैः बालिशैः शठैः ॥)
इत्येवं हि सामाख्यातः सम्प्रदायः पुरद्विषः ॥२४॥
अयमेव परः पुण्यो भक्तिशास्त्रैक सम्मतः ॥
एतन्माहात्म्यम् अतुलं नालं वक्तुं चतुर्मुखः ॥२५॥
अयं हरेः श्रीव्रजदेवतायाः अनुगृहीतः किल सम्प्रदायः ॥
आविर्बभौ वेणुगृहीतवेदैः विभावयध्वं त्रिपुरारि सम्मतम् ॥२६॥
(शांडि.सं.भ.खं.५)

अत्र "**विष्णवे**" विष्णुस्वामिनाम्ने इति अर्थः. भगवद्वदनोदितः श्रीवल्लभाचार्यः श्रीमद्गोवर्द्धनधरवदनवैश्वानररूपत्वात् . एतदनुकूलैः श्रुति-स्मृति-पुराण-नारदपञ्चरात्रादिवाक्यैः विस्तरस्तु चरित्रचिन्तामणिसम्प्रदायप्रदीपश्रुतिरहस्यादिषु मामके सत्सिद्धान्तमार्तण्डे च द्रष्टव्यः.

(१) [एवञ्च शापेन चेतसि तमसः प्रवेशः तासु योनिषु कलौ जन्म च. तमःप्रवेशेन मोहः. तेन परस्त्र्यासक्त्यादि-

प्रयुक्त-कलिज-पाप-परिपीडितत्वं कुशास्त्रासक्त-चेतस्कता च. तया मिथ्याधीतसमाचारता मिथ्याज्ञानप्रलापिता शिवद्वेषः शिवनिन्दा शिवोक्त-वेदार्थ-निन्दा ऐहिकामुष्मिकानां फलानां बोधनेन जनमोहकत्वं च मिथ्याधीत-समाचारत्वादिभिश्च यथायथं ब्राह्मणैः असम्भाष्यत्वं, धर्माचरणस्य वृथात्वं, तपोबलहानिः, त्रयी-बाह्यत्वं, विष्णोः पराङ्मुखत्वं ततो नरके पातः इति. नच ‘‘नहि निन्दा निन्द्यं निन्दितुं प्रवृत्ता किन्तु स्तुत्यं स्तोतुम्’’ इति न्यायेन शप्तविप्र-निन्दायां न एतत्तात्पर्यम् इति वाच्यम्, तत्र-तत्र स्तुत्यन्तराभावेन एतन्न्यायानवतारात्. किञ्च शापादिविषयेऽपि तन्न्यायावतारे पुराणकथानां बहुविप्लवः स्याद् इति दिक्. अत्र ‘ब्राह्मणैः’ इति उपलक्षणं, तेन देव्या शप्तैः इत्यपि बोध्यम्. अत्रच ‘इदानीं’पदम् अध्याहृत्य ‘पुरा’ ‘ब्राह्मणैः’ इति पदद्वयम् आवर्त्य इत्थं व्याख्येयम् : ‘पुरा’ पूर्वजन्मनि ‘ब्राह्मणैः’ तत्रैव ब्राह्मणैः शप्तैः इदानीं विप्रकुलोद्भवैः इति. अनेन इदानीं विप्रकुले जन्मसत्त्वेऽपि ब्राह्मण्यनियमो न इति सूचितम्. अतएव कौर्मे ‘‘विप्राणां कुलसम्भवाः’’ (कूर्मपुरा.१।१५।९५) इति ‘‘तासु योनिषु’’ (कूर्मपुरा.१।३०।३०) इति च उक्तम्.]

(२) एतेन शापेन चेतसि तमसः प्रवेशः तासु योनिषु कलौ जन्म च तमःप्रवेशेन मोहः **इत्यादिकं सर्वम् अपास्तम्. शप्तब्राह्मणसम्भवस्य कूर्मपुराणे ‘सम्बभूवुः’ इत्यादिना पूर्वमेव उक्तत्वात्.**

(३) सहस्राक्षे एवञ्च शापेन इत्यादिं तासु योनिषु इति च उक्तम् इत्यन्तं भागं दूषयन्ति. **एतेन** इत्यादिना **पूर्वमेव उक्तत्वाद्**

इत्यन्तेन. अयं भावः : तदुक्तः क्रमः केवलं कपोलकल्पितएव. तथाहि अत्र शापेन तमःप्रवेशः उक्तः कौर्मेतु "**तमसाविष्टमनसो**" निन्दकान् दृष्ट्वा शशाप इति उक्तम्. अत्र तासु योनिषु जन्म द्वितीयं फलम् उक्तम्, पुराणेतु द्वेषाद्युत्तरकालिकं तत्. एवं पुराणे कुशास्त्रासक्त्यादित्रयस्य कलिजपरिपीडाकारणत्वं बोधितम्, इहतु प्रत्युत तस्य तत्कार्यत्वम्. पुराणे शिवद्वेषः शिव-तन्मार्गयोः निन्दा च शापहेतुतया उपात्ता. अत्रतु शापजन्यतया जनमोहकत्वन्तु पुराणोक्तान् हृषीकेश-तद्भक्त-निन्दकत्वादिधर्मान् अप्रकाश्य मध्यतएव उपात्तम्. पुराणे "**वृथाधर्मं चरिष्यन्ति**" इत्यनेन कापालिकादिषु व्यर्थधर्मस्य आचरणमेव बोध्यते नतु श्रौत-स्मार्तधर्मस्य वृथात्वम्. अतः पूर्वोक्तरीत्या तदुदाहृतपुराणस्यैव विरोधः तदुक्तक्रमे अवर्णितोऽपि सुबोधएव सुधियाम्. तस्माद् वैष्णवप्रद्वेषादेव इदं कपोलकल्पितनानाफलकथनं सर्वजनमोहनार्थं "**मोहयन्ति जनान् सर्वान् दर्शयित्वा फलानि वै**" (कूर्मपुरा.१।३०।३१) इति तत्रैव उक्तेः इति दिक्. यश्च कौर्मस्थे शापप्रकरणे "नहि निन्दे"तिन्यायस्य अनवतारः तत्र-तत्र स्तुत्यन्तराभावाद् उक्तः सोपि अविचारात्. यत्र-यत्र प्रकरणे स्थितानि वचांसि त्वया उपात्तानि तत्र-तत्र "**तस्मात् सम्परिहर्तव्या निन्दा पशुपतेः द्विजाः**" (कूर्मपुरा.१।२७।१६) इति. "**तस्मात् सर्वप्रयत्नेन प्राप्य माहेश्वरं युगं विशेषाद् ब्राह्मणान् रुद्रम् ईशानं शरणं व्रजेद्**" इति. (कूर्मपुरा.१।३०।३८) "**तस्माद् अनादिमध्यान्तं विज्ञाय परमेश्वरं मनसा कर्मणा वाचा समाराधय यत्नतः यत्नात् परिहर ईशस्य निन्दां स्वात्मविनाशिनीं भवन्ति सर्वदोषाय निन्दकस्य क्रिया हि ताः**" (कूर्मपुरा.१।१५।८५-८७) इति यथायथं निन्दानिषेधादिविधीनां सत्त्वेन शापादिकथनस्य तत्तत्द्विधिवाक्यविधेयार्थस्तुतौ तात्पर्यम् इति कल्पनेऽपि बाधकाभावात्. यथा "**स्तेनं मनो अनृतवादिनी वाक्**" (मैत्रा.संहि.४।५।२) इति निन्दावचनस्य हिरण्यस्तुत्यर्थत्वम्. अतएव प्रमाणाध्याये अर्थवादपादे "**रूपात् प्रायाद्**" (जै.मी.सू.१।२।११) इत्यत्र शबरस्वामी : "'**हिरण्यं हस्ते भवति अथ गृण्हाति' इति साकाङ्क्षत्वाद् अस्य विधेः शेषः. 'स्तेनं मनो अनृतवादिनी वाक्'** इति निन्दावचनं "**हिरण्यस्तुत्यर्थेन यथा किम् ऋषिणा देवदत्तएव भोजयितव्यः**" (जै.मी.सू.शा.भा.१।२।११) इति आह.

यथा वा तैत्तिरीयसंहितायां “**सो अरोदीद् यद् अरोदीत् तद् रुद्रस्य रुद्रत्वं यद् अश्रु अशीयत तद् रजतं हिरण्यम् अभवत् तस्माद् रजतं हिरण्यम् अदक्षिण्यम् अश्रुजंहि यो बर्हिषि ददाति पुरास्य संवत्सराद् गृहे रुदन्ति**” (तैत्ति.संहि.१।५।१।२-३) इति निन्दायाः “**तस्माद् बर्हिषि न देयम्**” इति विधेः शेषत्वम्. तेन च देयस्य हिरण्यस्य स्तुतिः. अतएव तत्र “**गुणवादस्तु**” (जै.मी.सू.१।२।१०) इत्यत्र भाष्ये “‘**अथ सो अरोदीद्’ इति कस्य विधेः शेषः? तस्माद् ‘बर्हिषि रजतं न देयम्’ इत्यस्य**” (जै.मी.सू.शा.भा.१।२।१०) इत्यादिना पदानां साकाङ्क्षत्वं प्रदर्श्य “‘**यो बर्हिषि रजतं दद्यात् पुरा अस्य संवत्सराद् गृहे रोदनं भवति’ इत्यस्य हेतुत्वेन अयं प्रति निर्दिश्यते ‘तस्माद् बर्हिषि रजतं न देयम्’ इति. एवं सर्वाणि साकाङ्क्षाणि कथं विधेः उपकुर्वन्ति इति गुणवादे न रोदनप्रभवं रजतं बर्हिषि ददतो रोदनम् आपद्यते तत्प्रतिषेधस्य गुणः यद् अरोदनम् इति**” (जै.मी.सू.शा.भा.१।२।१०) इत्यादि उक्तम्. तथा अत्रापि शिवनिन्दादिकरणे दुष्फलसम्भवात् तद् न कार्यम् इति. तेन च शिवाराधनं स्तुत्यम् इत्येव तात्पर्यं नतु वैष्णवसम्प्रदायवर्तिनां निन्दायाम्. एवम् उदितानुदितहोमस्थलेऽपि “**आग्नेयी वै रात्रिः ऐन्द्रम् अहः यद् अनुदिते सूर्ये प्रातः जुहुयाद् उभयमेव आग्नेयं स्याद्**” (तैत्ति.ब्रा.१।१।४।२) इति अनुदितहोमनिन्दायाः “**उदिते सूर्ये प्रातः जुहोति तथा अग्नये सायं हूयते सूर्याय प्रातः**” (तैत्ति.ब्रा.२।१।२।७) इति विहितोदितहोमस्तुतावेव तात्पर्यं नतु निन्द्यमानानुदितहोमनिन्दने तथा अत्रापि शिवसमाराधनएव तात्पर्यं नतु शिवनिन्दने इति शिवम्. वेदे “**अग्नेः त्रयोः ज्यायांसो भ्रातरः आसन्**” इति उपक्रम्य “**तं मत्स्यः प्राब्रवीत् तम् अशपद् धियाधिया त्वावध्यासुर्यो मा प्रावोच इति तस्माद् मत्स्यं धियाधिया घ्नन्ति शप्तोहि**” (तैत्ति.संहि.२।६।६) इति आम्नातासु शापादिकथास्वपि मीमांसकैः पुराकल्पार्थवादतायाः अङ्गीकारात् च. पुराणेषु शापस्थलेषु तन्न्यायानवतारं वदन् “**भवव्रतधरा ये च**’ (भाग.पुरा.४।२।२८) इत्यादिसन्दर्भमपि निर्बाधमेव मन्यते भवान्. यत्तु देव्या शप्तैः इत्यपि बोध्यम् इति उक्तं तत्र देवीकर्तृकशापाख्यायिकातु न कौर्मे प्रसिद्धाः प्रत्युत तद्विरुद्धाः च. अतो अत्र मानभूता सा

अन्वेष्टव्यैव. यच्च **“प्रद्विषन्तो अभ्यसूयका”** इत्याद्युक्तासुरधर्मशालितया वैष्णवप्रद्वेषादेव तेषु अब्राह्मण्यं ध्वनयितुं प्रलपितं तत्तु स्वस्य तथात्वादेव. **“चोरो वेत्ति जगत् चोरम्”** इति न्यायात्. नहि ‘विरागि’पदवाच्येषु नाममात्रयतिषु आधुनिकेषु वर्णादिनियमः कोऽपि अस्ति इति सुप्रसिद्धमेव एतत्. **“तासु योनिषु”** (कूर्मपुरा.१।३०।३०) इति वाक्यात्तु पश्वादियोनिष्वेव जन्मः स्वरसतो अवगम्यते नतु वर्णसाङ्कर्यम्. अतः स्वजातिख्यापनमात्रफलको अयं प्रयासः. तदुक्तवचसां वयन्तु अविषयाएव इति प्रागेव समर्थितम् अतो अस्माभिः अत्र यदि “चोरस्य जननीं भण्डः परिणयेत् क्वचित् तर्हि लाभोऽपि अलाभो वा शिष्टानां तेन को भवेद्!” इति न्यायएव[1] अनुसरणीयः.

(१) [मा प्रच्याविषत इति. “मोहयन्ति जनान्” (कूर्मपुरा.१।३०।३१) इति कौर्मवाक्येन तेषां मोहनसामर्थ्यस्य अवधारणात्. तान् प्रति इति नरान् प्रति इति अर्थः, एतेन शप्तानाम् असम्भाष्यत्वं सूचितम्. तत्र मानन्तु “द्विषन्तो देवम्” (कूर्मपुरा.१।२७।१८) इत्यादिकौर्मवाक्यम् उदाहृतमेव.]

(२) यत्तु “मोहयन्ति जनान् सर्वान्” इति कौर्मवाक्येन तेषां मोहनसामर्थ्यावधारणाद् **इति उक्तं तदपि तादृशवाक्यतः पूर्वं पठितानां “कुर्वन्ति अवेददृष्टानि कर्माणि विविधानि च. स्वधर्मेतु रुचिः नैव ब्राह्मणानां प्रजायते. कुशीलचर्यापाषण्डैः वृथारूपैः समावृताः विनिन्दन्ति हृषीकेशं ब्राह्मणान् ब्रह्मवादिनः वेदबाह्यव्रताचाराः दुराचाराः वृथाश्रमाः...तमसाविष्टमनसो वैडालव्रतिकाधमाः” (कूर्मपुरा.१।३०।३०-३२) इत्यादिवाक्यानां पर्यालोचनया धनार्जनादिनिरतेषु शान्तिदान्त्यादिस्वधर्मरुचिहीनेषु फलाजनक-काषायवस्त्रधारण-शिखासूत्र-**

---

[1] द्रष्ट.बीजानां काममां माथुं मारवुं नहीं. चोरनी मांने भांड परणे सहु सहुनूं कूटी लेशे आपणुं शुं? (गुज.कहेवतसंग्रह.५६२)

> **वर्जनादिना वृथारूपधरेषु ब्रह्मवादिब्राह्मणनिन्दकेषु स्वाश्रमधर्मानाचरणेन निष्फलीभूताश्रमेषु वाममार्गीयमारणोच्चाटनविद्वेषणाद्यनेकफलप्रदर्शकेषु केषुचिद् उभयभ्रष्टेष्वेव तादृशप्रकरणोक्तसर्वधर्मसम्पन्नेषु मोहनसामर्थ्यम् अवधार्यते नतु मोक्षरूपफलप्रदर्शकेषु अस्मासु. अस्मद्दर्शितमोक्षरूपफलस्य एकत्वेन तत्र 'फलानि' इति बहुवचनस्य अनुपपन्नत्वात्.**

(३) सहस्राक्षे मा प्रच्याविषतेति इत्यादि उदाहृतमेव इत्यन्तं भागं दूषयन्ति. **यत्तु मोहयन्ति** इत्यादिना **अनुपपन्नत्वाद्** इत्यन्तेन. **मोक्षरूपफलप्रदर्शकेषु** इति स्वस्य व्यासदर्शनानुसारित्वात्. तत्र च "**अथातो ब्रह्मजिज्ञासा**" (ब्र.सू.१।१।१) इति प्रथमसूत्रएव '**अतः**'शब्देन यस्मात् कर्मादिभ्यो ब्रह्मज्ञानमेव पुरुषार्थसाधकम् अतः तज्ज्ञानाय विचारारम्भस्य प्रतिज्ञानाद् (द्रष्ट.ब्र.सू.भा.१।१।१) इति भावः. यत्तु सहस्राक्षे असम्भाष्यत्वम् उक्तं तत्तु भगवद्भक्तद्विषि तन्निन्दैकजीविते तस्मिन्नेव जाघटि इति. कौर्मपूर्वखण्डे यत्र सप्तविंशाध्याये "**द्विषन्तो देवम्**" इति वाक्यं पठ्यते तत्रैव "**तस्मात् सम्परिहर्तव्या निन्दा पशुपतौ(तेः) द्विजाः कर्मणा मनसा वाचा मद्भक्तेष्वपि यत्नतः**" (कूर्मपुरा.१।२७।१६) इति वदता भगवता शिवनिन्दावत् स्वभक्तमात्रनिन्दायाः विशेषतः प्रतिषेधाद् नतु अस्मासु. अस्माकं शिवे द्वेषलेशस्यापि अभावात् प्रत्युत पूर्वोक्तरीत्या श्रीशिवोक्तमार्गस्यैव अस्माभिः अनुसरणाच्च. कौर्मे च पूर्वखण्डद्वादशाध्याये हिमाचलं प्रति गिरिजया "**श्रुतिस्मृत्युदितं सम्यक्कर्मवर्णाश्रमात्मकम् अध्यात्मज्ञानसंहितं मुक्तये सततं कुरु. धर्मात् सञ्जायते भक्तिः भक्त्या सम्प्राप्यते परम्**" (कूर्मपुरा.१।१२।२५४) इत्यादिना भवदनभिमतम् अस्माभिरेव अभिमतं ज्ञानकर्मसमुच्चयं भक्तेरेव परप्राप्तिसाधनत्वम् इत्यादि यावदध्यायसमाप्तिः उपदिशन्त्या "**नच वेदादृते किञ्चित् शास्त्रं धर्माभिधायकम्. यो अन्यत्र रमते सो असौ न सम्भाष्यो द्विजातिभिः**" (कूर्मपुरा.१।१२।२६०) इति कथनात् कौर्मपाद्मोत्तरखण्डादिप्रसिद्धवेदविरुद्धकुशास्त्ररतानां त्वादृशामेव असम्भाष्यत्वं प्राप्यते नतु सर्वात्मना वेदम् अनुसरतां वैष्णवानाम् इति किं बहुना ?

(१) [नच वैष्णवग्रन्थेषु धृतेन ‘‘मात्स्यं कौर्मं तथा लैङ्गं शैवं स्कन्दं तथैव च आग्नेयं च षडेतानि तामसानि निबोधः मे’’ (पद्मपुरा.६।२३६।१८) इति पाद्मोत्तरखंडवाक्येन कौर्मस्य तामसतया ‘‘सात्त्विकाः मोक्षदाः प्रोक्ताः राजसाः स्वर्गदाः शुभाः तथैव तामसा देवि निरयप्राप्तिहेतवः’’ (पद्मपुरा.६।२३६।२१) इति तत्र धृतेन पाद्मवाक्येन तामसस्य निरयहेतुत्वेन च शिष्टैः तदुक्तार्थस्य अग्राह्यत्वं इति वाच्यं लिङ्गार्चनचन्द्रिकादिशैवग्रन्थधृतेन ‘‘तत्र शैवानि शैवञ्च भविष्यञ्च द्विजोत्तमाः मार्कण्डेयं तथा लैङ्गं वाराहं स्कान्दमेव च, मात्स्यम् अन्यत् तथा कौर्मं वामनं च मुनीश्वराः, ब्रह्माण्डं च दश इमानि’’ इति ‘‘ब्राह्मं पाद्मं ब्रह्मणो द्वे’’ इति च उपक्रम्य पठितेन ‘‘दश शैवपुराणानि सात्त्विकानि विदुः बुधाः’’ इत्यनेन ‘‘ब्राह्मेतु राजसे वैश्यसेव्ये’’ इत्यनेन च स्कान्दवाक्येन सात्त्विकतया निश्चितस्य कौर्मस्य राजसतया निश्चितेन पाद्मेन शिष्टानादेयार्थकतायाः वक्तुम् अशक्यत्वात्. अतएव वैष्णवग्रन्थधृतेन ‘‘वैष्णवं नारदीयं च तथा भागवतं शुभं, गारूडं च तथा पाद्मं वाराहं शुभदर्शने, षड् एतानि पुराणानि सात्त्विकानि मतानि मे’’ इति पाद्मेनैव सात्त्विकतया उक्तेः नारदीये ‘‘एतत् कूर्मपुराणन्तु चतुर्वर्गफलप्रदः पठतां श्रुण्वतां नृणां सर्वोत्कृष्टगतिप्रदम्’’ इत्यादिना उक्तः कौर्मपुराणतच्छ्रवणादिमहिमासङ्गतः तस्य तामसत्वेतु सः न सङ्गच्छेत. ‘‘येषां श्रवणमात्रेण’’ इति वक्ष्यमाणतदध्यायोपक्रमवाक्यविरोधात्, तामसस्य निरयप्राप्तिहेतुत्वात् च. एवञ्च पुराणनिन्दावाक्यं पाद्मे प्रक्षिप्तमेव.

किञ्च पाद्मे मात्स्यमपि तामसेष्वेव गणितम्. तत्र

सात्त्विकेषु गणिते भागवतेतु मात्स्यम् उपक्रम्य "पुराणं वेदसम्मितम्" इति उक्तं. अतएव "अस्य महतो भूतस्य निःश्वसितम् एतद् यद् ऋग्वेदो यजुर्वेदः सामवेदो अथर्वाङ्गिरसः इतिहासपुराणं विद्योपनिषदः" (बृह.उप.-२।४।१०) इत्यादिना बहुषु स्थलेषु उपनिषत्सु सामान्यतो वेदवत्पुराणानामपि ब्रह्मनिःश्वसितत्वादि श्रूयते. अतएव च "पुराण-न्याय-मीमांसा-धर्मशास्त्राङ्ग-मिश्रिताः वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दशः" (याज्ञ.स्मृ.१।१-।३) इति याज्ञवल्क्यस्मृतौ अविशेषेण पुराणानां विद्या-धर्मयोः स्थानत्वम् उक्तम्. अतएव सात्त्विकतया त्वदभिमते नारदीये अष्टादशानामपि प्रत्येकं महिमा वर्णितः. तत्सर्वञ्च तादृशवाक्यस्य प्रामाणिकत्वे न सङ्गच्छते. अतएव पाद्मे "वङ्गदेशजकायस्थविशेषेण प्रक्षेपः कृतो अस्ति" इति विदुषां किंवदन्ती सङ्गता. अतएव व्यासवाक्येषु न विश्वासोच्छेदः. प्रक्षेपकर्ता मूर्खः इत्यपि भाति. अतएव "तथैव स्मृतयः प्रोक्ताः ऋषिभिः त्रिगुणान्विताः सात्त्विकाः राजसाः चैव तामसाः शुभदर्शने वासिष्ठं चैव हारीतम्" (पद्मपुरा.६।२३६।२२-२३) इति तदीयसर्वपुस्तकस्थपाद्मपाठे लिङ्गनियमो न दृश्यते. अग्रेऽपि "भारद्वाजं काश्यपं च सात्त्विकाः मुक्तिदाः शुभाः" (पद्मपुरा.६।२३६।२४) इत्यादिना स्मृतीनां क्लीबत्वेन निर्देशः सात्त्विक-राजस-तामस-शब्दानां पुलिङ्गेनैव निर्देशो अस्ति.

एवञ्च स्थालीपुलाकन्यायेन विज्ञानभिक्ष्वादि-धृत-तदध्यायस्थ-श्लोकान्तरोक्त- शास्त्रान्तर-निन्दापि हेयैव. प्रधानकारणवादाद्यप्रामाण्यन्तु व्यासादिदर्शितप्रकारान्तरेण बोध्यम्. तस्माद् येषु पुराणादिषु विदुषां प्रक्षेप-सम्भावना

प्रमाणान्तरविरुद्धांशोपलब्धिः वा तेषु प्रमाणान्तरविरुद्धांशो हेयएव अंशान्तरन्तु सति संवादे ग्राह्यम्. एवञ्च लिङ्गार्चनचन्द्रिकादिधृतस्कान्दवाक्यस्यापि यदि प्रक्षिप्तत्वम् उच्यते नारदादिपुराणान्तरविरोधात् तर्ह्यपि न नो विद्वेषः. यत्तु "स्मृति-निन्दा-रूप-द्विविध-वाक्यदर्शनेन कश्चिद् अंशो हेयः कश्चिद् ग्राह्यः" इति. तन्न, स्कान्दवाक्ये शैवेतरांशनिन्दायां पाद्मवाक्ये वैष्णवेतरांशनिन्दायां च तात्पर्येण बहुविप्लवापत्तेः. अतात्पर्यविषयहानोपादानस्वीकारस्तु न युक्तो, निर्मूलत्वात्. पाद्मवाक्यानाम् अत्यसङ्गत्या तद्विरोधस्य अकिञ्चित्करत्वात् च "नहि निन्दा निन्द्यम्" इति न्यायेनापि न पाद्मवाक्यम् उदाहरतां सन्तोषसम्भावना. "शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमं येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि" (पद्मपुरा.६।२३६।२-३)इति उपक्रम्य "निन्दायामेव" समाप्त्या स्तुत्यलाभाद् इति दिक्.]

(२) पुराणानां तामसत्वेन अनादेयत्वं राजसत्वेन सात्त्विकत्वेन वा आदेयत्वम् इत्यत्रापि न आग्रहो अस्माकं सर्वेषामेव पुराणानां व्यासप्रणीतत्वेन समत्वात्. "पुराण-न्याय-मीमांसा-धर्मशास्त्राङ्गमिश्रिताः वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश:" (याज्ञ.स्मृ.१।१।३) इति याज्ञवल्क्यवाक्याच्च सर्वेषां धर्मस्थानत्वबोधनात्. ननु सर्वेषां पुराणानां समत्वेन तुल्यबलतया तत्तत्पुराणस्थपरस्परविरुद्धवाक्यैः सत्प्रतिपक्षवत् परस्परप्रतिबद्धकार्यैः प्रमितिरेव न स्याद् उभयत्र अप्रामाण्यज्ञानात् संशयो वा स्याद् इति चेद् न, कल्पभेदेन विरोधपरिहारस्य सर्वत्रैव सम्भवात्. अतएव नच वैष्णवग्रन्थेषु **इत्यारभ्य** स्तुत्यलाभाद् **इत्यन्तो वाक्यनिचयः स्वकल्पितपूर्वपक्षसमाधानरूपः उन्मत्तप्रलपिततुल्यो न आदेयः 'सति कुड्ये चित्रम्'**

(लौ.न्या.सा.४३२) इति न्यायाद् इति अलं पल्लवेन.

(३) सहस्राक्षे नच वैष्णवग्रन्थेषु इत्यादिं स्तुत्यलाभाद् इति दिग् इत्यन्तं भागं ‘‘मूलच्छेदे वृक्षच्छेद:’’ इति न्यायेन परिहरन्ति **पुराणानां तामसत्वेन** इत्यादिना **अलं पल्लवेन** इत्यन्तेन. **पल्लवेन** विस्तरेण, ‘‘**पल्लवोऽस्त्री किसलये विटपे विस्तरे वने**’’ इति मेदिनी. अयं भाव: : नहि पाद्मसम्मत: सात्त्विकादिभाव: पुराणानां प्रतिषिध्यते. व्यासोक्तस्य प्रतिषेधायोगात् किन्तु तामसभावकथनम् उपलभ्य कैश्चित् कल्प्यमानं तेषां पुराणानाम् अनादेयत्वमेव प्रतिषिध्यते, व्यासस्य अनादेयत्वे तात्पर्याभावात्, सर्वथा अनादेयत्वे तन्निर्माणस्यैव आनर्थक्यप्रसङ्गात्. वक्ष्यमाणतैत्तिरीय-शतपथ-छान्दोग्यश्रुतिभ्य: ‘‘**पुराण-न्याय-मीमांसा**’’ (याज्ञ.स्मृ.१।१।३) इत्यादिस्मृतिभ्य: च साधारण्येन यावत्पुराणानां प्रामाण्यसिद्धे: च. नच उपादेयत्वे ‘‘**शृणु देवि! प्रवक्ष्यामि तामसानि यथाक्रमं येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि**’’(पद्मपुरा.६।२३६।२) इति पाद्मोत्तरखण्डवाक्यविरोध: शङ्क्य:, तदर्थानवबोधात्. अत्रहि ‘**येषाम्**’इति कर्मणि षष्ठी यत्कर्मकश्रवणमात्रेण इति अर्थ:. ‘**मात्र**’पदं सात्त्विकादिश्रवणं वेदसात्त्विकपुराणाद्यविरोधेन तामसानामपि मननं च व्यवच्छिनत्ति. तथाच यदि सर्वाणि श्रूयेरन् यदि वा वेदोपबृंहकतया वेदाविरोधेन सात्त्विकपुराणाद्येकवाक्यतया च तामसानि मननविषयीक्रियेरन् तदा न पातित्यम्. यदातु केवलान्येव श्रूयेरन् नापि उक्तरीत्या मन्येरन् तदातु आपाततो विरुद्धार्थबोधात् शब्दज्ञानवतामपि स्वार्थच्यवनात् पातित्यम् इति हृदयम्. वस्तुतस्तु ‘‘**शृणु देवि! प्रवक्ष्यामि**’’ इति प्रतिज्ञा न तामसस्मृतिपुराणविषयका, तत्र ‘‘**तामसानि च शास्त्राणि समाचक्ष्व मम अनघ सम्प्रोक्तानि च तै: विप्रै: भगवद्भक्तिवर्जितै: तेषां नामानि क्रमश: समाचक्ष्व सुरेश्वर:**’’ (पद्मपुरा.६।२३६।१) इति पार्वत्या तम:समाविष्टऋषिविशेषप्रणीतशास्त्राणामेव पृष्टत्वात्. शिवेनापि ‘‘**शृणु देवि!**’’ इति प्रतिज्ञाय ‘‘**प्रथमंहि मया प्रोक्तं शैवं पाशुपतादिकं मच्छक्त्यावेशितै: विप्रै: सम्प्रोक्तानि तत: परं कणादेनतु सम्प्रोक्तम्**’’ (पद्मपुरा.६।२३६।४) इत्यादिना तेषामेव कथनाच्च. अग्रेच तद् उपसंहृत्य तामसपुराणकथनं

तादृशस्मृतिकथनं च पृथक् प्रतिज्ञातम् ‘‘**शास्त्राणि चैव गिरिजे तामसानि निबोध मे पुराणान्यपि वक्ष्यामि तामसानि यथाक्रमम्**’’ (पद्मपुरा.६।२३६।१३) इति ‘‘**तथैव स्मृतयः प्रोक्ताः ऋषिभिः त्रिगुणान्विताः**’’ (पद्मपुरा.६।२३६।२२) इति च. अत्र एवम् अनेन प्रकारेण उक्तानि शास्त्राणि तामसानि निबोध जानीहि इति निन्द्यशास्त्रकथनस्य उपसंहारः.

ननु तर्हि सात्त्विकत्वादिना विभागः किम्प्रयोजनकः ? इति चेद्, उच्यते, सर्वेषामेव जीवानां भगवदंशत्वादिना तौल्येऽपि व्युच्चरणोत्तरं क्रीडाहेतुवैचित्र्यार्थं प्राधान्येन तत्तद्गुणोपहिततया तेषां त्रैविध्यस्य ‘‘**त्रयाः प्राजापत्याः**’’ (बृह.उप.७।२) ‘‘**त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा**’’ (भग.गीता १७।२) ‘‘**त्रिविधा जीवसंघास्तु**’’ (नारदपञ्च.) इत्यादिश्रुति-स्मृति-नारदपञ्चरात्रादिवचनैः सिद्धत्वेन व्यासस्य च सर्वक्षेमार्थं प्रवृत्तत्वेन तादृश-तादृशजीवबोधानुकूलः तत्तदधिकृतविषयविशिष्टो वेदार्थः तैस्तैः पुराणैः तेन निरूपितः. अतः उत्तमैस्तु वेदाविरोधेन सर्वैकवाक्यतया सिध्यन् अर्थएव ग्राह्यः इत्येव योग्यम्. केवलतामसश्रवणे मननाभावे च तामसानुकूलविषयएव सिद्धान्ततया गृह्येत. यथा केवलकौर्मश्रवणे ‘‘शिवाद् उत्पन्नयोः परस्परानपेक्षयोः विधातृ-नारायणयोः अन्योन्यम् अहमेव ईश्वरः कस्त्वम्’’ इति विवादादिः. ‘‘**वस्तुतस्तु बहुश्रुतिबाधितम् इदम्**’’ (अव.प्रह.वा) इति प्रहस्तवादादौ विस्तरः. तस्य सिद्धान्ततया ग्रहणे च तदनुकूलमात्रानुष्ठाने वेदविरोधे निरयप्राप्तिरपि न असम्भाविता. एतेन तथैव ‘‘**तामसाः देवि निरयप्राप्तिहेतवः**’’ इति स्मृतिविशेषविषयकवाक्यमपि व्याख्यातम्. ‘‘**एतत्कूर्मपुराणन्तु**’’ (   ) इति नारदीयविरोधोऽपि एतेन परिहृतः. ‘‘**पठतां शृण्वताम्**’’ इति केवलश्रवणस्य अनुपादानात्. सर्वस्य शिवस्य सम्बन्धिन्याः उत्कृष्टगतेः प्रदायकम् इतितु युक्तमेव. ‘सर्व’शब्दोऽपि शिवपर्यायः. ‘‘**ईश्वरः शर्वः ईशानः**’’ (अम.को.१।१।३०) इत्यत्र अमरविवेकादिव्याख्यासु ‘शर्वः’ ‘सर्वः’ इति शब्दद्वयस्वीकारात्. ‘‘**सर्वस्तु शर्वो भगवान् शम्भुः कालञ्जरः शिवः**’’ (अम.को.रामा.१।१।३०) इति तत्रैव रामाश्रम्याम् उदाहृताद् नामविधानात् च. यत्तु ‘‘**पुराणं वेदसम्मितम्**’’ (ब्रह्मपुरा.१।२९) इति मात्स्यविषयकं

भागवतवाक्यतया उक्तं तत् प्रमादात्. भागवते तस्य वाक्यस्य अभावात्. भागवते ‘‘**पुराणसंहितां दिव्यां सांख्ययोगक्रियावतीम्**’’ (भाग.पुरा.८।२४।५५) इत्यादिना वर्णितो मात्स्योत्कर्षस्तु निर्दिष्टचरदिशा नैव विरुद्धः. अतो न कोऽपि निन्दावकाशो नापि प्रक्षिप्तत्वसम्भावना-गंधोऽपि. नच ‘‘**तथैव स्मृतयः प्रोक्ताः ऋषिभिः त्रिगुणान्विताः सात्त्विका-राजसाः चैव तामसाः शुभदर्शने वासिष्ठं चैव हारीतं व्यासं पाराशरं तथा भारद्वाजं काश्यपं च सात्त्विकाः मोक्षदाः (मुक्तिदा) शुभाः**’’ (पद्मपुरा. ६।२३६।२२) इत्यादौ लिङ्गनियमाभावात् प्रक्षिप्तत्वं शङ्क्यम्. कौर्मेऽपि ‘‘**करिष्यति अवताराणि शङ्करो नीललोहितः**’’ (कूर्मपुरा.१।३०।३३) इति ‘‘**कुर्वन्ति च अवताराणि ब्राह्मणानां कुलेषु वै**’’ इत्येवमादिषु ‘अवतारादि’शब्दलिङ्गनियमाभावेन प्रक्षिप्तत्वापातात्. तद् युक्त्यन्तरेण समाहितम् इति चेत् तद् निरस्तं प्राग् अस्ति च अत्रापि समाधायिका युक्तिः ‘‘**शास्त्राणि चैवं गिरिजा**’’ इति पूर्ववाक्यानुरोधेन ‘‘**वासिष्ठं चैव हारीतम्**’’ इत्यादौ शास्त्रम् इति विशेषस्य अभिप्रेततया क्लिबनिर्देशो न बाधितः. सात्त्विकाराजसास्तामसाः इतितु टाबंतानि स्मृतिविशेषणानि स्त्रीलिंगान्येव नतु पुल्लिंगानि. नच ‘‘**टिड्ढाण**’’ (पाणि.सू.४।१।१५) इति ङीबभावो दोषः. सात्त्विकं प्रमेयं सात्त्विको विषयो वा विद्यते अत्र इति सात्त्विकाः अर्शआदेः आकृतिगणत्वाद् मत्वर्थीयो अच्. एवं राजसाः तामसाः च.

यातु कायस्थेन प्रक्षिप्तम् इति किंवदन्ती कथिता सा केवलकपोलकल्पितैव, अद्यावधि विदुषः कस्यापि मुखात् तस्याः अवगमाभावात्, शैवग्रन्थेष्वपि क्वापि तदनुपलम्भात् च. अतो द्राविडेषु प्रसिद्धां रामानुजादिग्रन्थेषु अध्यात्मरामायणादिविचारस्थले दर्शितां कौर्मादौ प्रक्षेपस्य किंवदन्तीम् उपलभ्य पाद्मविषयिकां तादृश जनश्रुतिं प्रकल्प्य तत्कर्तरि मूर्खत्वं वदन् प्रच्छन्नो व्यासनिंदकोऽसि. नच लिंगार्चनचंद्रिकाधृतवचनविरोधात् प्रक्षिप्तत्वं कल्पभेदादिना तदविरोधसिद्धेः, अन्यथा विनिगमनाविरहाद् अनिर्णयप्रसक्तेः.

वस्तुतस्तु नारदीयविरोधात् शतपथश्रुति-याज्ञवल्क्यविरोधात् च तद्वचसां प्रक्षिप्तत्वं त्वयैव स्वीकृतमिति विराधवहनन्यायावतारः. युक्तञ्च एतद् लिंगार्चनचन्द्रिकायां **"तत्र शैवानि शैवं च "** (   ) इत्यादिना दशानां शैवत्वम् उक्त्वा **"दश शैवपुराणानि सात्त्विकानि विदुः बुधा"** (   ) इति शैवानां सात्त्विकत्वं कथ्यते. एकस्यैव परब्रह्मणो लीलावताराणां ब्रह्म-विष्णु-महेश्वराणाम् ऐश्वर्यतः तौल्येऽपि शिवस्य तमोगुणोपाधिकतायाः **"अथ यो ह खलु वाव अस्य तामसो अंशो असौ स ब्रह्मचारिणो यो अयं रुद्रो. अथ यो ह खलु वाव अस्य राजसो अंशो असौ स ब्रह्मचारिणो यो अयं ब्रह्मा. अथ यो ह खलु वाव अस्य सात्त्विको अंशो असौ स ब्रह्मचारिणो यो अयं विष्णुः"** (मैत्रा.उप.५।२) इति मैत्रायण्यादिश्रुतिभ्यः **"सत्त्वं रजः तम इति प्रकृतेः गुणाः तैः"** (भाग.पुरा.१।२।२३) इति श्रीभागवतादिपुराणेभ्यः च सिद्धतया शैवेषु सात्त्विकतायाः वक्तुम् अशक्यत्वेन सुगमं तत्र आग्रहकल्पितत्वं निष्पक्षधियाम्. नापि पाद्मवत् षण्णां षण्णां विभागसौकर्यं दृश्यते. नापि तत्तत्पुराणपर्यालोचने भगवद्गीताद्युक्तसात्त्विकादिविषयाणां तत्र तत्र पाद्मोक्तेष्विव बाहुल्यं दृश्यते. किञ्च पुराणान्तराणां तत्तद्वर्णान्तरसेव्यत्वकथनमपि नारदीयादिसन्दर्भेभ्यः सुतरां विरुद्धम्. हेमाद्रिमाधवादिप्रामाणिकनिबन्धेषु ब्राह्मणादिनिर्णयस्थले बहूनामेव पाद्मादिवचसाम् उपन्यासोऽपि भ्रमप्रमादादिमूलकताम् आपद्येत, तस्मात् तदेव प्रक्षिप्तम् इति युक्तम्. नच अस्माकम् इदृशविषये निर्बन्धः, तवेव विद्वेषकलुषहृदयत्वस्य अभावात्. एवं पाद्मस्थवचसाम् अप्रक्षिप्तत्वनिश्चये विज्ञानेन्द्रभिक्ष्वादिधृतवचसामपि सिद्धं साकरत्वम्. एतच्च प्रागेव दृढीकृतम्. प्रधानकारणवादादीनाम् अप्रामाण्यमपि ततएव सम्यग् अवबुध्यते. सूत्राणाम् अतिसंक्षिप्तत्वेन अनेकैः अनेकधा व्याख्यातत्वेन च तादृशवादादिकं व्यासानभिप्रेतमेव तादृशसूत्राणाञ्च प्रधानकारणवादादिखण्डनपरत्वमेव इति व्यासतात्पर्यस्य पाद्मसन्दर्भतः सुखेन निश्चयसिद्धेः. महर्षीणामपि तादृशवेदविरुद्धवादप्रवर्तने कारणन्तु ततएव निश्चीयते नतु सूत्रेभ्यः. नापि पाद्मवचसां पुराणनिन्दायां तात्पर्यम् **"एतत् ते सर्वम् आख्यातं प्रसंगात् शुभदर्शने"** इति उपसंहारवाक्ये स्मृतिपुराणानां

सात्त्विकादिविभागवर्णनस्य प्रासंगिकत्वकथनात्.

“**शृणु देवि**” (पद्मपुरा.६।२३६।२) इति वाक्यन्तु तामसशास्त्रपरमेव इति उक्तं प्राक्. सामान्यतः पुराणानां सर्वेषां श्रुतिसम्मतत्वम् अस्मदभिप्रेतमेव तैत्तिरीयब्राह्मणे काठकचयनमन्त्रेषु “**ऋचो यजूंषि सामानि अथर्वांगिरसश्च ये सर्वास्ताः**” (तैत्ति.ब्रा.३।१२।८।१-२) इति चतुरो वेदान् उक्त्वा “**इतिहास-पुराणं च सर्पदेवजनाश्च ये सर्वास्ताः**” (तैत्ति.ब्रा.३।१२।८।२) इति इतिहास-पुराणयोः पृथग्ग्रहणात्. सायणमाधवीयभाष्येऽपि अत्र ‘**इतिहास**’-‘**पुराण**’शब्दयोः भारतादि-ब्राह्मादिपरतया व्याख्यातत्वात्. छान्दोग्ये भूमविद्यायां “**स होवाच ऋग्वेदं भगवो अध्येमि यजुर्वेदं सामवेदम् आथर्वणं चतुर्थम् इतिहास-पुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिम्**” (छान्दो.उप.७।१।२) इत्यादि पठ्यते. शतपथब्राह्मणेऽपि चतुर्दशकाण्डे मैत्रेयीब्राह्मणे “**स यथा आर्द्रैधाग्नेर् अभ्याहितात् पृथग्धूमाः विनिश्चरन्ति एवं वा अरे अस्य महतो भूतस्य निःश्वसितम् एतद् यद् ऋग्वेदो यजुर्वेदः सामवेदो अथर्वांगिरसः इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राणि अनुव्याख्यानानि व्याख्यानानि अस्यैव एतानि सर्वाणि निःश्वसितानि**” (शतप.ब्रा.१७।७।३।११) इति आम्नायते. ब्रह्मयज्ञप्रकरणेऽपि तैत्तिरीय-शतपथादिषु तत् पठचते इति किं बहुना! यत्तु निःश्वसितश्रुतौ बहुतरो अपपाठः उपन्यस्तः सतु श्रुतीनामपि गुरुसन्निधौ अध्ययनाभावात् पुस्तकप्रत्ययाधीतत्वात्. उक्तंहि “**पुस्तकप्रत्ययाधीतं नाधीतं गुरुसन्निधौ शोभते न सभामध्ये जारगर्भइव स्त्रियाः**” (हितोप.३९) इति. यत्तु सामान्यतः पुराणानां ब्रह्मनिःश्वसितत्वनिरूपकत्वम् अस्याः श्रुतेः त्वया उक्तं तत्तु शङ्कराचार्यविरोधात् त्वदुक्तरीत्या तवैव शप्तत्वापादकम्. शङ्कराचार्यास्तु अत्रैव उपनिषद्भाष्ये “**यद् ऋग्वेदो यजुर्वेदः सामवेदो अथर्वाङ्गिरसः चतुर्विधं मन्त्रजातं, ‘इतिहास’इति उर्वशीपुरूरवसोः संवादादिः ‘उर्वशी ह अप्सरसः(अप्सराः)’ (शतप.ब्रा.११।५।१।१) इत्यादि ब्राह्मणमेव, पुराणम् ‘असद्वा इदमग्र आसीद्’ (तैत्ति.उप.२।७।१) इत्यादि**” (बृह.उप.शां.भा.२।४-।१०) इत्यादिना “**एवम् अष्टविधं ब्राह्मणम्. एवं मन्त्रब्राह्मणयोरेव**

ग्रहणं नियतरचनावतो विद्यमानस्यैव वेदस्य अभिव्यक्तिः पुरुषनिःश्वासवद्'' (बृह.उप.शां.भा.२।४।१०) इति व्याचक्षणाः श्रुतौ **'इतिहासादि'** अष्टशब्दैः ब्राह्मणभागविशेषानेव गृह्णन्ति नतु महाभारतादिब्राह्मादिसन्दर्भान्. अतः शङ्कराचार्यविरोधः स्पष्टएव.

(१) [सहस्रेक्षणः इन्द्रः तत्सादृश्यन्तु अस्य ग्रन्थस्य सयुक्तिक-वेदान्तवाक्यरूप-मेघैः शुद्धाद्वैत-मार्तण्डस्य तिरस्कारेण तादृश-मेघोद्भूत-भङ्ग्यन्तररूप-वज्रेण विद्वन्मण्डनस्य चूर्णीकरणेन च इति ग्रन्थान्ते वक्ष्यते. किञ्च सहस्रेक्षणो विष्णुः ''सहस्राक्षः सहस्रपाद्'' (तैत्ति.आर.३।१२।१) इति श्रुतेः. स मया तदर्थं ज्ञाप्यः ''इमे नराः रक्ष्यन्ताम्'' इति प्रार्थ्यः इति वाक्यान्तर-कल्पनया आवृत्त्यादिनार्थ इति. विष्णोः स्मृत्या च मंगलम्]

(२) अग्रेच सहस्रेक्षण इन्द्रः तत्सादृश्यन्तु अस्य ग्रन्थस्य सयुक्तिकवेदान्तवाक्यरूपमेघैः शुद्धाद्वैतमार्तण्डस्य तिरस्कारेण **इति उक्तं तदपि न शोभते. वेदान्तवाक्यैः अद्वैतमार्तण्डस्य प्रकाशएव भवति नतु तिरस्कारो, अन्यथा सर्वेषाम् आचार्याणाम् अद्वैतप्रकाशनार्थं वेदान्तवाक्यप्रदर्शनं विपरीतफलमेव स्यात्. भवति च तामसासुरविनिर्मितकुयुक्तिमायामेघैः अद्वैतमार्तण्डस्य लोकबुध्या आच्छादनद्वारा तिरोभावइव. तदुक्तम् ''घनच्छन्नदृष्टिः घनच्छन्नम् अर्कम् यथा आलोकते निष्प्रभञ्च अतिमूढः/निष्प्रभं मन्यते च'' (हस्ता.स्तो.१३) इति. तादृशकुयुक्तिमेघस्य सयुक्तिकवेदान्तवाक्यमहावायुना निवारणे शुद्धाद्वैतमार्तण्डस्य प्रकाशो भवति अतएव अस्य अस्मन्निर्मितस्य ग्रन्थस्य प्रभञ्जनो महावायुः तत्सादृश्यात् 'प्राभञ्जन' इति आख्या.**

(३) सहस्राक्षे सहस्रेक्षणः इन्द्रः इत्यादिं स्मृत्या च मंगलम् इत्यन्तं भागं दूषयन्ति **अग्रेच** सहस्रेक्षणः इत्यादिना **‘प्राभञ्जन’ इति आख्या** इत्यन्तेन. परेण ‘तिरस्कार’शब्दो अनादराच्छादनोभयार्थतया प्रयुक्तः. ‘‘**परीभावस्तिरस्क्रिया**’’ (अम.को.१।७।४५३) इति अमरोक्तेः, ‘तिरस्करिणि’-इत्यादिव्यवहारात् च उभयार्थकत्वम्. तत्र मार्तंडे अनादरस्तु कौशिकदेशीयभिन्नानां नैव सम्भवति. अथ आच्छादनमपि अद्वैतमार्तण्डस्य वेदान्तवाक्यैः न सम्भवति. सर्वेषां वेदान्तानाम् अद्वैतएव तात्पर्यस्य उभयवादिसम्मतत्वात्. बृहदारण्यके ‘‘**यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति**’’ (बृह.उप.२।४।१४) इत्यादि उक्त्वा ‘‘**यत्रतु अस्य सर्वम् आत्मैव अभूत् तत् केन कं पश्येद्**’’(बृह.उप.२।४।१४) इत्यादिना तत्प्रतिषेधात्. ‘‘**ब्रह्म तं परादाद् यो अन्यत्र आत्मनो ब्रह्म वेद**’’ (बृह.उप.२।४।६) इत्यादिश्रवणात् तैत्तिरीये ‘‘**यदा ह्येव एषः एतस्मिन् उदरम् अन्तरं कुरुते अथ तस्य भयं भवति**’’ (तैत्ति.उप.२।७) इति द्वैतदर्शिनो भयश्रवणात् च इति अलम्. ननु शुद्धाद्वैतमार्तण्डस्यैव तिरस्कारो नतु अद्वैतमार्तण्डस्य इति चेत्, ‘शुद्ध’ पदेन किञ्चिद् व्यावर्त्यते न वा? द्वितीये दोषः तदवस्थः. आद्ये किं तद् व्यावर्त्यम्? नहि त्वन्मते अतिरस्करणीयम् अशुद्धम् अद्वैतम् अन्यत् प्रसिद्धम् अस्ति. परोक्तम् अनूद्य दूष्यते इति चेद्, अस्माभिरपि परेषाम् अभिमतं व्यवछेत्तुं ‘शुद्ध’ पदं निवेशितम् इत्यादि अग्रे वक्ष्यामः. वस्तुतस्तु मायासम्बन्धरहितस्य शुद्धस्यैव अद्वैतस्य सर्ववेदान्तसम्मतत्वात् तस्य तैः न तिरस्कारः किन्तु मायावादमेघैरेव. सोऽपि लोकदृष्टीनां तिरस्कारो भास्करे उपचर्यते. अत्र तदीयाचार्यपरम्परास्थहस्तामलकाचार्यसम्मतिम् आहुः **घनच्छन्न...** इति, अस्य उत्तरार्धन्तु ‘‘**तथा बद्धवद् भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपो अहम् आत्मा**’’ इति अस्ति, तत् प्रयोजनाभावाद् मूले न आलेखि. **प्रकाशो भवति** इति, ‘‘**घनो यदा अर्कप्रभवो विदीर्यते चक्षुःस्वरूपं प्रतिपद्यते तदा यदा हि अहंकार उपाधिरात्मनो जिज्ञासया नश्यति तर्हि अनुस्मरेद्**’’ (भाग.पुरा.१२।४।३३). इत्यादिभिः द्वादशस्कंधादिवाक्यैः इति भावः. मेघविस्तारे खण्डिते च ततः उद्भाविभंग्यन्तरवज्रमपि स्वतो दूरापास्तं भवति. यत्तु असौ ‘सहस्राक्ष’इति विष्णुसादृश्यारोपविषयो

ग्रन्थो न खंडनार्ह इति कश्चित् तद् आहोपुरुषिकामात्रं, ग्रन्थे तेन इन्द्रसादृश्यस्यैव अंगीकारात्. इह ग्रन्थान्ते च तथैव वर्णनात्. आवृत्त्या वाक्यभेदेन कृतेन विष्णुप्रार्थनरूपार्थान्तरवर्णनेन ग्रन्थे विष्णुसादृश्यारोपस्य अनापत्तेः. यदि च सादृश्यम् आरोपितं भवेत् तदापि प्रत्यवस्थानम् अदुष्टम्. अन्यथा अस्माकीनग्रन्थेऽपि शङ्कररूपतायाः अन्ते वर्णयिष्यमाणतया शैवस्मार्तैरपि न प्रत्यवस्थातव्यम्. प्रकृतेतु आरोपस्यापि अभावः. मेघविस्तारेण मार्तण्डम् आच्छादयन्नपि भगवत्साक्षात्कारिमण्डनं चिचूर्णयिषन्नपि सहस्राक्षः श्रीगोवर्धनधरचरणैकशरणैः शक्यः तृणमिव लंघयितुम्. अत्र तत्कृतं विष्णुप्रार्थनमपि लोकव्यामोहायैव. शैवसुधाकरे अत्र च तस्मिन् विष्णुद्वेषिताया निश्चयात्.

तथाच अयं प्रथमश्लोकखण्डनस्य निष्कर्षः : श्रीमद्वैष्णवाचार्याः तदनुयायिनः च न शप्ताः किन्तु भवभङ्गादिभूयोभावुकभावकभक्तिमार्गस्य भगवदाज्ञया दैवोद्धारार्थं प्रवर्तकाः तत्र प्रवृत्ताश्च. श्रीशङ्कराचार्याअपि साक्षात् शिवावताराः स्वयं परमतत्त्वज्ञान-परमभक्तिशालिनः, तत्कृततत्तत्स्तोत्राद्यालोचनेन निश्चीयमानतथाभावाश्च, तेषाम् अवतारादिकमपि तादृशभगवदाज्ञानुरोधादेव. वादाश्च सर्वे प्रायो अनादिसिद्धाः ब्रह्मसूत्रादिषु पुराणेषु च तत्तद्वादानुवादखण्डनमण्डनादिदर्शनात्. वेदेऽपि छान्दोग्ये "**सदेव सोम्य इदम् अग्रे आसीद् एकमेव अद्वितीयम्. तद्धैक आहुः असदेव इदम् अग्र आसीद् एकमेव अद्वितीयं तस्माद् असतः सद् जायत. कुतस्तु खलु सोम्यैवं स्याद् इति होवाच कथम् असतः सद् जायेत इति सत्त्वेव सोम्य इदम् अग्र आसीद् एकमेव अद्वितीयम्**" (छान्दो.उप.६।२।१-२) इत्यादौ तथा श्रवणात् च. अतो भगवतो अनुज्ञया अवतीर्णैः तैः-तैः दिव्यैः आचार्यैः तस्य क्रीडेच्छानुरोधेन तस्मिन्-तस्मिन् अवसरे तत्तत्प्रयोजनसिद्धये स-स वादः प्रकाश्यतेइति सर्वम् अविरुद्धम्.

॥ इति सहस्राक्षस्थप्रथमश्लोकस्य खण्डनम् ॥

* * *

(१)[नानात्वेऽपि च शप्त-विप्र-वचसां जिज्ञासया कस्यचित्
शुद्धाद्वैत-निरूपणं प्रथमतः संखण्ड्यते अत्रापि तु ।।
शुद्धाद्वैत-मतोष्णरश्मिर् अवरे प्रायेण टीकायुतो
भागे अन्यत्र तथैव वाल्लभिकृतं विन्मण्डनं खण्ड्यते।।२।।

ननु गौतमादि-शप्त-विप्र-वचांसि शुद्धाद्वैत-विशिष्टाद्वैत-भेदाभेद-तदवान्तरभेदैः विभिन्नानां मिथ्या-ज्ञानानां प्रलापरूपाणि नाना उपलभ्यन्ते. तथाच कथं मतान्तराणि विहाय शुद्धाद्वैतमेव खण्ड्यते ? इत्यतः आह नानात्वेऽपि इति. कस्यचिद् भावनगरवासिनो नागरस्य सन्तोषराम-शर्मणः जिज्ञासया खण्डन-ज्ञानेच्छया, अत्रापि शुद्धाद्वैतमत-खण्डनेऽपि, अवरे पूर्वभागे, टीकायुतः सटीकः शुद्धाद्वैतमतोष्णरश्मिः शुद्धाद्वैतमार्तण्डः, कस्यचिद् जिज्ञासया इति इहापि सम्बध्यते. प्रायेण बाहुल्येन खण्ड्यते. अन्यत्र उत्तरभागे, तथैव सटीकं प्रायेण च विन्मण्डनं विद्वन्मण्डनम्. 'मार्तण्ड' शब्दं विहाय 'उष्णरश्मि' शब्दोपादानम् उक्तरीत्या मोहकत्वेन तन्मताश्रयिणां सन्तापएव फलम् इति बोधनाय. 'वल्लभ' शब्दस्य नानार्थकोशेषु अश्वाध्यक्षादि-वाचित्वकथनात् तदपत्यस्यापि तद्वत् साधारणजनतायाः तत्कृतग्रन्थस्य "अन्धेषु काणो राजा" इति न्यायेन तादृशेषु ये विद्वांसः तन्मण्डनतायाः च बोधनाय वाल्लभि-कृतम् इति विन्मण्डनस्य विशेषणं दत्तम्. अस्मिन् ग्रन्थे क्वचित् सटीकैतद्ग्रन्थद्वयस्य उक्तिभ्यो अन्याः उक्तयोऽपि खण्डिताः, क्वचित्तु नैयायिकादिमत-दूषण-पराः संरम्भेण प्रवृत्त्या प्रपञ्चमात्र-पराः च तदुक्तयः प्रयोजनाभावाद् उपेक्षया न खण्डिताः इति आधिक्य-न्यूनतयोः परिहाराय प्रायेण इति उक्तम्.

तत्र तावत् शुद्धाद्वैतमार्तण्डोक्तः शुद्धाद्वैतपदार्थो असंगतः. तथाहि : ‘‘द्विधा ज्ञानन्तु यद्यत् स्याद् नाम-रूपात्मना मुहुः ईशजीवात्मना वाऽपि कार्य-कारणतो अथवा द्वीतं तदेव द्वैतं स्याद् अद्वैतन्तु ततो अन्यथा’’ (शु.मा.३-४) इति शुद्धाद्वैत-पदार्थः उक्तः. तट्टीकाकृतातु ‘‘ये गत्यर्थकाः ते ज्ञानार्थकाः इति न्यायेन गत्यर्थकाद् ‘इण्’धातोः भावे क्ते ‘इतम्’ इति सिद्धौ द्विधा इतं ‘द्वीतं’ तस्मात् स्वार्थे अणि ‘द्वैतम्’ इति निष्पन्नम्. तस्यच द्विप्रकारकं ज्ञानम् इति अर्थः. ‘अन्यथा’ = भेदज्ञानाभावो न द्वैतम् अद्वैतम्’’ (शु.मा.प्र.४) इति व्याख्यातम्.]

(२) **अग्रेच** नानात्वेऽपि च **इति आरभ्य** संक्षेपः (सह.मु.पृ.९) **इत्यन्तेन शुद्धाद्वैतपदार्थनिर्वचनखण्डनम्. तत्प्रकारश्च** तत्र तावत् शुद्धाद्वैतमार्तण्डोक्तः शुद्धाद्वैतपदार्थो असंगतः **इति उपक्रम्य प्रदर्शितः ‘‘भेदज्ञानाभावे’’ इत्यस्य** भेदज्ञानाभावः **इति पाठः प्रकल्पितः.**

(३) अथ सहस्राक्षे नानात्वेऽपि च इति द्वितीयं श्लोकं, ननु गौतमादि... इत्यादिना तव इष्टसिद्धिः इति संक्षेपः इत्यन्तेन व्याख्यानेन सहितं दूषयितुं सारार्थकथनमुखेन गृह्णन्ति **अग्रे च नाना...इति. ...खण्डनम्** इति ‘‘तेन कृतम् अस्ति’’ इति शेषः. अत्र सहस्राक्षे नानात्वेऽपि च इत्यादिः प्रायेण इति उक्तम् इत्यन्तो भागः क्रुद्धविधवाविविधवादसगंध-त्वाद् उपेक्षितो मूले. अथापि तत्र तथात्वस्फुटीकाराय किञ्चिद् ब्रूमः. तत्र श्लोके ‘च’‘तु’प्रभृतिनिरर्थकपदबाहुल्यं द्रष्टव्यम्. व्याख्याने शुद्धाद्वैत-विशिष्टाद्वैत... इत्यादिना श्रीविष्णुस्वामि-रामानुज-मध्व-निम्बार्कसिद्धान्तानां मिथ्याज्ञानत्वं, तन्निरूपणस्य प्रलापरूपत्वं, तत्प्रवर्तकानां चतुर्णाम् आचार्याणां गौतमादिशप्तत्वं च, अपाणिपिहितमेव अभाणि, तत्तु प्रागेव पाद्मादिवचोभिः निराकृतम्. **‘‘रामानुजानां सरणी रमातो, गौरीपतेः विष्णुमतानुगानां,**

निम्बार्कगानां सनकादितः च, माध्वानुगानां परमेष्ठितः च'' (   ) इत्यादौ तेषां प्रसिद्धत्वाच्च. अतो हरिभक्तमात्रद्वेषलिंगात् स्वस्मिन् आसुरभावनिश्चायनाय इदम्. 'खण्डनज्ञानेच्छया' इत्यत्र खण्डनकथंभावविषयिणी बुभुत्सा वक्तव्या. खण्डनमिति ज्ञानस्य 'खण्डन' शब्दमात्रेणापि सम्भवात्. ज्ञानेच्छायाः जीवान्तरसमवेततया खण्डनव्यापारस्य च स्वसमवेततया हेतुकार्ययोः वैयधिकरण्यम् अत्रापि शुद्धाद्वैतमतखण्डनेऽपि इति व्याख्यानमपि न मनोरमम्. संखण्ड्यते इति पूर्वम् उक्तायां खण्डनक्रियायां पूर्वोत्तरभागयोः अभावात्, तद्बोधकग्रन्थएव तयोः सत्त्वात्. शुद्धाद्वैतमतस्य खण्डनं यत्र इति व्यधिकरणबहुव्रीह्याश्रयणेन ग्रन्थपरत्वकल्पनेतु मूलश्लोकविरोधः. श्लोके 'संखण्ड्यते' इतिपदसमभिव्याहृतेन 'अत्र' इति पदेन खण्डनक्रियायाएव परामर्शस्य शीघ्रोपस्थितिकतया तत्परामर्शस्य अयोगात्. पूर्वार्थकतया 'अवर' शब्दस्य प्रयोगस्तु प्रमादाद्, अन्यथा 'ब्राह्मण'-'ज्येष्ठभ्रातृ'प्रभृतयोः 'अवरवर्णा'-'ऽवरजन्मा'दिशब्दैः व्यवह्रियेरन्. व्यवह्रियन्तेतु 'शूद्र'-'कनीयः'प्रभृतयः. 'उपेन्द्र'-'इन्द्रावरज' इत्यादौच इन्द्रस्य पूर्वजः इत्यादि अर्थः आपद्येत. ग्रन्थकारप्रयुक्तं 'मार्तण्ड'पदं विहाय स्वयम् 'उष्णरश्मि' पदम् उपादाय तादृशपदतोऽपि लभ्यं जाड्यनिवर्तकत्वादिकं परिहाय ग्रन्थनिन्दायाः करणन्तु जलौकःस्वभावादेव. यथा उक्तम् ''**दुग्धं विहाय रुधिरं पिबति जलौका: स्तनेषु संलग्ना**'' (द्र.श.कल्प) इति. परैरपि 'सहस्राक्ष' शब्दं विहाय मार्तण्डद्वेषितया 'कौशिक' शब्दो वा 'गौतमस्त्रीजार' शब्दो वा 'विश्वरूपादिब्रह्महृ'शब्दो वा शक्येत ग्रहीतुं यदि तुभ्यमिव अशिष्टालापएव तेभ्यो रोचेत. अस्मन्मतग्रन्थे मार्तण्डत्वारोपतात्पर्यन्तु ''सूर्योदये शीतम् अपैति सर्वं मार्गावलोको जलजप्रकाशः तमोनिवृत्तिः द्विजकर्मवृत्तिः तथैव मार्तण्डनिबन्धबोधे'' (शु.मा.उप) इति तत्समाप्तिश्लोकाद् ज्ञेयम्. सद्ग्रन्थेषु मोहकत्वारोपस्तु प्रागेव मनोरथमात्रविषयतां नीतः.

'वल्लभ' शब्दस्य नानार्थकोशेषु इत्यादिः भगवद्रूपेषु महानुभावेषु साक्षाद्गालिप्रयोगस्तु ''**न जारजातस्य ललाटशृङ्गं कुलप्रसूतस्य न पाणिपद्मम् यदा-यदा मुञ्चति वाक्यबाणं तदा-तदा तस्य कुलप्रमाणम्**'' इति

अभियुक्तोक्तिं स्मारयत्येव. यदि त्वादृशः कश्चिद् अशिष्टः त्वां प्रत्यवास्थास्यत तर्हि त्वदीयप्रथमश्लोकखण्डनावसरएव ‘मलहृत्’ शब्दस्य (सहस्रा.१) चाण्डालाद्यर्थकताम् आदाय त्वदनुरूपं त्वां प्रत्यवक्ष्यत्. अस्माकन्तु गिरं निरन्तरं निजनामभिः निर्मलनीयां कदाचिदपि महानुभावेषु मा दुर्वादप्रादुर्भावभाजं बीभवद् भगवान्. यच्च ‘वल्लभ’ शब्दस्य अश्वपालार्थकताज्ञापनं तत्तु धौर्त्याद् व्यामोहनमेव. हैमानेकार्थ-हैमनाममाला-हलायुधहारावली-विश्व-वररुचि-धरणि-धनञ्जय-द्विविधद्विरूपमहीप-मेदिन्य-ऽमर-त्रिकांडशेष- हरदत्तीयनाममाला-ऽनेकार्थध्वनि-मञ्जरीप्रभृतिषु इदानीम् उपलभ्यमानेषु कोशेषु तस्य तदर्थकतायाः अनुपलम्भात्. अतएव न तेन कोशवचनम् उदाहारि, नापि कोशनाम निरदेशि. मेदिन्यादौ सल्लक्षण-तुरंगमादिवाचितावर्णनेऽपि नाममात्रेण साम्यं न दोषाय. “**अथ हरिः दिवाकर-समीरयोः यम-वासव-सिंहांशु-शशाङ्क-कपि-वाजिषु पिङ्गवर्णे हरिद्वर्णे भेकोपेन्द्र-शुकाहिषु लोकान्तरे च**” इति हैमोक्त्या ‘हरि’ शब्दस्य वानर-भेकाद्यर्थकत्वेऽपि “**हरिः हरति पापानि**” “‘**हरये नमः’ इति उक्त्वा मुच्यते सर्वपातकाद्**” इत्यादौ न कोऽपि शिष्टो वानरादिपरताम् आद्रियते नापि “हरिश्रिताः देवाः” “हरिपुत्रो जयन्तः” इत्यादौ, आत्मविद्वत्तानुरूपं प्रलापान्तरमपि अपास्तम्. शुद्धाद्वैतमार्तण्डे तत्प्रकाशे च मायावादोच्छेदपरः तद्विरुद्धसिद्धान्तप्रतिपादकोऽपि बहुतरो भागः खण्डनयुक्त्यस्फूर्त्या न दूषितः, विद्वन्मण्डने तद्विवरणे च अनेकत्र पूर्वपक्षेषु सूचिता युक्तयः सिद्धान्ततया सहस्राक्षे उपन्यस्ताः, एतद् न्यौन्यम् आच्छादयितुं श्लोके प्रायेण इति उक्त्वा धाष्टर्याद् इतरथा व्याख्यातम्. तत्र सप्रकाशस्य मार्तण्डस्य अङ्कनादिना सति सौलभ्ये स्वयमेव तद् भोत्स्यते सर्वैः संख्यावद्भिः. मूलविद्वन्मण्डनन्तु तेन अनूदितत्वात् सकलम् इह पृथक् अनुवदिष्यतइति करकंकणपरीक्षणक्षणे न दर्पणम् अर्पणीयम्. तद्विवरणस्यापि विलोकने वर्णितचरं व्यक्तमेव वेत्स्यन्ति विद्वांसः.

इतः परं ग्रन्थस्य पूर्वार्धे सप्रकाशः शुद्धाद्वैतमार्तण्डः समर्थ्यते.

मार्तण्डमण्डलाखण्डमण्डनाः खण्डयन्ति अथ॥
वितण्डोद्दण्डपाषण्डपण्डिताकाण्डताण्डवम्॥१॥

सहस्राक्षे तत्र तावत् शुद्धाद्वैत... इत्यादिम् इष्टसिद्धिः इति संक्षेपः इत्यन्तं भागम् अर्थतो अनूद्य दूषयन्ति **तत्प्रकारश्च** इत्यादिना **...विनिर्णयः इति संक्षेपः** (प्राभं.मु.पृ.१४१) इत्यन्तेन. **प्रकल्पितः** इति मार्तण्डटीकायाम् "अद्वैतन्तु ततो अन्यथा" (शु.मा.४) इत्यस्य व्याख्याने प्रकल्पितः. तेन वास्तवे सप्तम्यन्तपाठेतु तदुक्ता सर्वापि अनुपपत्तिः मृगतृष्णातोयावगाहनकल्पैव इति वक्ष्यामः. एवं "सांकर्यं कार्यकारणे" (शु.मा.२६) इत्यत्र सांकर्यं क्षयकारणम् इति पाठः प्रकल्पितः. तादृशपूर्वोक्तपाठसत्त्वादेव कार्यं च कारणं च इति अनयोः समाहारम् अभिप्रेत्य तट्टीकायाम् "अविद्यावच्छिन्नं चैतन्यं कार्यं मायावच्छिन्नं चैतन्यं कारणम् इति सांकर्यम्" (शु.मा.प्र.२६) इति व्याख्यातम्. तथा "द्विधा ज्ञानन्तु यद्यत् स्याद्" (शु.मा.३) इत्यादौ "यत्तत् स्याद्" इत्यादीनि तत्कृतपाठान्तराणि विशेषतः प्रयोजनाभावाद् न चिन्त्यन्ते. 'द्विधा ज्ञानम्' इत्यस्य टीकायां कृतं नामरूपमायिकत्वस्य खण्डनादिकन्तु स्वमतोपमर्दकत्वाद् न अनूदितम्.

अथ सप्तम्यन्तपाठेतु न कापि अनुपपत्तिः. तथाहि : द्वैतं हि द्विप्रकारकं ज्ञानम्. 'इतम्'इति भावे 'क्त'स्य अंगीकारात्. प्रज्ञादेः आकृतिगणत्वाद् अणि पूर्वार्थानपायात्. अद्वैतम् इतितु पर्युदासो लाघवात्. एवञ्च 'अब्राह्मणा'दिशब्दैः ब्राह्मणादिभिन्नतत्सदृशइव 'अद्वैत' शब्देन द्वित्वप्रकारकज्ञानभिन्नं ज्ञानत्वेन तत्सदृशम् एकत्वप्रकारकज्ञानम् अभिधीयते. पर्युदासस्थले "**नञिव युक्तम् अन्यसदृशाऽधिकरणे तथाहि अर्थगतिः**" इति अंगीकारात्. तथाच "**भृशादिभ्यो भुव्यच्वेः लोपश्च हलः**" (पाणि.सू.३।१।१२) इत्यत्र महाभाष्यं "**यथान्यासमेव अस्तु. ननु च उक्तम् इह कस्माद् न भवति?. क्व दिवा भृशा भवन्ति? इति. नञिव युक्तम् अन्यसदृशाधिकरणे तथाहि अर्थगतिः. नञ्युक्तमिव युक्तं वा यत्किञ्चिद् इह दृश्यते. ततः अन्यस्मिन् तत्सदृशे कार्यं विज्ञायते तथाहि अर्थो गम्यते. 'अब्राह्मणम् आनय' इति उक्ते ब्राह्मणसदृशएव आनीयते न असौ लोष्टम् आनीय कृती भवति. एवम् इहापि अच्वेरिति प्रतिषेधाद् अन्यस्मिन् न च्व्यन्ते च्विसदृशे कार्यं**

विज्ञायते. किञ्च अन्यद् अतो अच्व्यन्तं च्विसदृशम् अभूततद्भावः” (पातं.महाभा.३।१।१२) इति. अत्र “**यथा न्याससमेव अस्तु अच्वेरिति पर्युदासाश्रयणे दोषद्वयस्यापि परिहारः इति अर्थः**” (पातं.महाभा.प्र.३।१।१२) इति कैयटः. एवं “**सुडनपुंसकस्य**” (पाणि.सू.१।१।४३) इत्यत्रापि “**कुण्डानि तिष्ठन्ति वनानि तिष्ठन्ति**” (पातं.महाभा. १।१।२१) इत्यादौ जसि संज्ञार्थं पूर्वं पर्युदासाश्रयणात् तत्सदृशयोः स्त्रीपुंसयोरेव प्रवृत्तिः साधिता भाष्यकृता “**नायं प्रसज्यप्रतिषेधो नपुंसकस्य न इति. किं तर्हि? पर्युदासो अयं यदन्यद् नपुंसकाद् इति. नपुंसके न व्यापारः**” (पातं.महाभा.१।१।४३) इति. अथच विरोधो अत्र नञर्थः, अविद्या इत्यादिवत्. उक्तञ्च योगभाष्ये साधनपादे “**अनित्या-ऽशुचि-दुःखा-ऽनात्मसु नित्य-शुचि-सुखा-ऽत्मख्यातिर् अविद्या**” (पातं.यो.सू.२।५) इति सूत्रं व्याचक्षाणैः व्यासपादैः “**तस्याः च अमित्रा-ऽगोष्पदवद् अवस्तुत्वं विज्ञेयं, यथा न अमित्रो मित्राभावो न मित्रमात्रं किन्तु तद्विरुद्धः सपत्नः. यथा वा अगोष्पदं न गोष्पदाभावो न गोष्पदमात्रं किन्तु देशएव ताभ्याम् अन्यद् वस्त्वन्तरम्. एवम् अविद्या न प्रमाणं न प्रमाणाभावः किन्तु विद्याविपरीतं ज्ञानान्तरम् अविद्या इति**” (पातं.यो.सू.भा.२।५) इति. भवन्मतस्थाअपि भावरूप अज्ञानम् अविद्यापदार्थं मन्यन्ते. इत्थञ्च प्रकृते अभेदावगाहिज्ञानमेव ‘अद्वैत’ शब्दार्थः. तेन शुद्धपदार्थमायासम्बन्धरहितकार्यकारणात्मकब्रह्मणो अभेदसंसर्गेण तत्र अन्वयो न अनुपपन्नः, “**सत्यं ज्ञानम् अनन्तं ब्रह्म**” (तैत्ति.उप.२।१) इति स्वरूपलक्षणवाक्येन तस्य अज्ञानरूपत्वनिश्चयात्. “**तद् आत्मानं स्वयम् अकुरुत**” (तैत्ति.उप.२।७) “**एकमेव अद्वितीयम्**” (छान्दो.उप.६।२।१) इत्यादिश्रुतिशतैकवाक्यतया मायासम्बन्धरहितयोरेव कार्यकारणयोः अभेदसिद्धेः च, धर्मधर्मिणोः प्रकाशाश्रयन्यायेन अभेदस्य वक्ष्यमाणतयापि ज्ञानरूपतायाः अबाधात् च. ज्ञानगुणएव इतितु न आवयोः अभ्युपगमः. तादृशज्ञानञ्च भेदभ्रमनिवृत्तावेव प्रकाशते इति युक्तम् उक्तं “भेदज्ञानाभावे” (शु.मा.प्र.४) इति.

(१) [अग्रे “एतन्मते सुनिष्पन्नं सांकर्यं क्षयकारणं

तन्निवृत्त्यर्थम् आचार्यैः पदं ‘शुद्धं’ विशेषितम्. ‘शुद्धाद्वैत’पदे ज्ञेयः समासः कर्मधारयः अद्वैतं शुद्धयोः प्राहुः षष्ठीतत्पुरुषं बुधाः. माया-सम्बन्ध-रहितं ‘शुद्धम्’ इति उच्यते बुधैः कार्य-कारणरूपंहि शुद्धं ब्रह्म न मायिकम्’’ (शु.मा.२६-२८) इति उक्तम्. एतदपि तट्टीकाकृता ‘‘एतन्मते = शंकराचार्यमते ...अविद्यावच्छिन्नं चैतन्यं कार्यं, मायावच्छिन्नचैतन्यं कारणम् इति सांकर्यं....तन्निवृत्त्यर्थं = सांकर्यनिवृत्त्यर्थम्. कर्मधारय इति, शुद्धं च तद् अद्वैतम् इति विग्रहः. नच अद्वैते सति सांकर्याभावः स्पष्टएव इति ‘शुद्ध’-पदम् अपार्थकम् इति वाच्यम्. परेषां मते पूर्वं सांकर्यं ततो अद्वैतम्, अस्मन्मतेतु सदैव शुद्धत्वम् इति ज्ञेयम्. अतएव स्पष्टतया बोधाय षष्ठीतत्पुरुषम् आहु’’ (शु.मा.प्र.२६-२७) इत्यादिना व्याख्यातम्. तद् न युक्तं, समास-द्वयस्यापि असंगतेः. तथाहि : स्वसम्मततया उपन्यस्ते कर्मधारयपक्षे तावत् शुद्ध-पदार्थ-मायासम्बन्धरहित-कार्यकारणात्मकस्य ब्रह्मणो अद्वैतपदार्थेन भेदज्ञानाभावेन तादात्म्यस्य बाधाद् असंगतिः.]

(२) अत्र ‘शुद्धाद्वैत’ पदे कर्मधारयः समासः सम्भवति षष्ठीतत्पुरुषोऽपि. अथ कर्मधारयपक्षे शुद्धपदार्थस्य मायासम्बन्धरहितकार्यकारणात्मकब्रह्मणो अद्वैतपदार्थेन भेदज्ञानाभावेन तादात्म्यस्य बाधाद् असंगतिः इति चेत्, सत्यं; नहि नैयायिकवैशेषिकादीनां मतइव अस्मन्मतेऽपि अभावो अतिरिक्तः पदार्थो येन तत्र कार्यकारणात्मकब्रह्मणः तादात्म्यस्य बाधः स्यात् किन्तु अधिकरणात्मकएव. ब्रह्मनिष्ठस्य भेदज्ञानाभावस्य ब्रह्मरूपत्वेन कार्यकारणात्मकब्रह्माभिन्नतया कथं तादात्म्यासंगतिः? नच अभावस्य

अधिकरणात्मकत्वे आधाराधेयभावानुपपत्तिः इति वाच्यं; न्यायमते अभावाधिकरणकाभावस्य अधिकरणभिन्नत्वे तद्भेदस्यापि भिन्नत्वे अनवस्थापत्त्या तादृशाभावस्य अधिकरणीभूताभावाभिन्नत्वेऽपि आधाराधेयभाववद् भवन्मते च अविद्याध्वंसस्य ब्रह्माधिकरणकस्य ब्रह्मस्वरूपत्वेन अभ्युपगमेऽपि आधाराधेयभाववद् अत्रापि तत्स्वीकारे विरोधाभावात्.

(३) अथ रामकृष्णभट्टकृतपरिष्काराद्यनुरोधाद् ‘**भेदज्ञानाभावः**’ इति प्रथमान्तपाठम् अभ्युपगम्यापि समासद्वयं समर्थयितुम् उपक्रमन्ते **अत्र** इति. तत्र तावत् कर्मधारयपक्षे सहस्राक्षे तथाहि स्वसम्मततया इत्यादिना तन्मते अभावाद् इत्यन्तेन परेण आपादितदोषाभासान् **अथ कर्मधारय** इत्यादिना **किञ्च इत्यादिकम् असंगतमेव** इत्यन्तेन उद्धरिष्यन्तः प्रथमं तदुक्तम् असंगतिदोषं परिहरन्ति **दूरादेव निरस्तः** इत्यन्तेन. प्रश्नार्थो ‘अथ’ शब्दः. **नैयायिक-वैशेषिकादीनाम्** इति. अत्र वैशेषिकग्रहणं ‘‘**धर्मविशेषप्रसूताद् द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायानां पदार्थानां साधर्म्य-वैधर्म्याभ्यां तत्त्वज्ञानाद् निःश्रेयसम्**’’ (वैशे.सू. १।१।४) इति काणादसूत्रे उपलक्षणविधया अभावमपि संगृह्णतां केषाञ्चित् तद्व्याख्यातॄणाम् ‘‘**अत्र षट्पदार्थकीर्तनं भावाभिप्रायेण वस्तुतो अभावोऽपि पदार्थान्तरतया मुनेः अभिप्रेतः**’’ (वैशे.सू.वृ.१।१।४) इत्यादि वदतां वृत्तिकारादीनाम् अनुरोधेन. वस्तुतस्तु अत्रापि षडेव पदार्थाः सूत्रकाराभिप्रेताः इति कणादमतेऽपि प्रकृते न बाधः. नच प्रथमाध्यायद्वितीयाह्निके ‘‘**कारणाभावात् कार्याभावः**’’ (वैशे.सू. १।२।१) नवमाध्याये ‘‘**क्रियागुणव्यपदेशाभावाद्**’’ (वैशे.सू.९।१-।१) इत्यादीनाम् असंगतिः शंक्या. पूर्वोत्तरमीमांसकानाम् ‘अभाव’पदघटितप्रयोगवद् निषेधमात्रपरतया तदुपपत्तेः. अन्तर्भावस्तु गुणादौ यत्र विधेः कल्प्येत तत्र निषेधस्यापि स्यात्. एतेन ‘‘**अभावश्च वक्तव्यो निःश्रेयसोपयोगित्वाद् भावप्रपञ्चवद्**’’ (न्या.लीला) इत्यादि वदन् न्यायलीलावतीकारः, ‘‘**एतेच पदार्थाः प्रधानतया उपदिष्टाः अभावस्तु स्वरूपवानपि नोद्दिष्टः**’’ (न्या.लीला)

‘‘**प्रतियोगिनिरूपणाधीननिरूपणत्वाद् नतु तुच्छत्वाद्**’’ (द्रव्यकि) इति वदन्तो द्रव्यकिरणावल्यादयोऽपि सूत्रविरोधात् प्रत्युक्ताः . परं तेषामपि वैशेषिकपदाभिलप्यत्वात् तद्ग्रहणम् . वैशेषिकसूत्रोपन्यासकारः शंकरमिश्रादयस्तु ‘‘**अत्रच द्रव्यादिपदार्थानाम् उद्देशएव विभागः पर्यवसन्नः सच न्यूनाधिकसंख्याव्यवच्छेदफलकः तेन षडेव पदार्थाः इति नियमः पर्यवस्यति**’’ (वैशे.सू.उप.१।१।४) इति षडेव पदार्थान् मन्यन्ते. मूले ‘**आदि**’पदेन बौद्धभेदाः ग्राह्याः, वैधर्म्येण दृष्टान्तो अयम् . बहुभिः पूर्वोत्तरमीमांसकैः निर्णीतम् अभावस्य अधिकरणात्मकत्वम् अभिप्रेत्य समादधते **किन्तु** इति. एवञ्च अभावस्य अधिकरणात्मकतया ब्रह्मणिच भेदज्ञानस्य अभावेन कर्मधारयसमासे च पूर्वोत्तरपदार्थयोः अभेदस्य प्रवृत्तिनिमित्तत्वेन प्रकृते शुद्धपदार्थमायासम्बन्धरहितकार्यकारणात्मकब्रह्माभिन्ने अद्वैतपदार्थे द्वित्वप्रकारकज्ञानाभावे ‘‘तदभिन्नाभिन्नस्य तदभिन्नत्वम्’’ इति नियमानुरोधात् शुद्धपदार्थभेदस्यापि सत्त्वेन पूर्वोत्तरपदार्थयोः अभेदान्वयो न अनुपपन्नः इति ‘‘कृष्णसारंगो मृगः’’ इत्यादिवत् कर्मधारयो निर्बाधः. अथवा ‘नीलोत्पलम्’ इत्यादौ प्रथमं भेदेन गृहीतं नीलत्वोत्पलत्वरूपधर्मद्वयमिव शुद्धत्वा-ऽद्वैतत्वरूपधर्मद्वयं लोकदृष्ट्या भिन्नत्वेन कल्पितम् आदाय तयोः धर्मयोः सामानाधिकरण्येन शुद्धत्वाऽद्वैतत्वसमुदायवद् ब्रह्म इति मञ्जूषारीत्या बोधः. ननु ‘‘घटाभाववद् भूतलं’’ ‘‘भूतले घटाभावः’’ इत्यादौ भूतलादिविशेषणतया तद्विशेष्यतया वा प्रतीयमानो अभावपदार्थः कथं भूतलादिस्वरूपतया शक्यवचनः? इति चेद्, उच्यते. यथा अभावविशिष्टबुद्धिः विशेषणविशेष्यसम्बन्धविषया विशिष्टबुद्धित्वाद्, ‘दण्डीपुरुष’इति विशिष्टबुद्धिवद् इति अनुमाने संयोगादिबाधाद् गुणक्रियादिसमवायवद्भूतलादौ सिध्यदपि वैशिष्ट्यं, तस्य नित्यत्वे भूतले घटानयनान्तरमपि घटाभावबुद्धिप्रसंगं, तस्याः अनित्यत्वेच अनन्तवैशिष्ट्यकल्पनगौरवं प्रदर्श्य न अंगीक्रियते. किन्तु ‘‘घटाभाववद् भूतलम्’’ इत्यादि प्रमितिकालिकं तत्तद्भूतलादिकमेव तत्तदभावानां सम्बन्धः’’ इति वदद्भिः अभाववादिभिः तत्र स्वरूपविशेषस्यैव सम्बन्धत्वं स्वीक्रियते. तथा अत्र घटाद्यनुपलब्धिकालिकभूतलादिस्वरूपमेव तत्तदभावत्वेन कल्प्यते इति निरवद्यम् . वैशिष्ट्यनित्याऽनित्यत्वपक्षयोः उक्तदूषणानाम् अभावनित्या-ऽनित्यत्वयोरपि दुर्वारत्वात् . नच

अभावनित्यत्वेऽपि तद्बुद्धिं प्रति तद्वत्ताबुद्धेः प्रतिबन्धकतया घटादिसमवधानस्थले न अभावबुद्धिः इति वाच्यं, वैशिष्ट्यनित्यत्वेऽपि तथा परिहारसम्भवात्. येतु नव्याः वैशिष्ट्यं पदार्थान्तरं स्वीकुर्वन्ति तैः अष्टपदार्थवादिभिः सम्यक् स्वशास्त्रम् उज्ज्वलितम् इति किं तैः! तन्मतेऽपि अस्वरसस्तु रामरुद्रादिभिः दर्शितएवेति अलम्. एतेन अभावस्य अधिकरणात्मकत्वे भूतले घटसमवधानदशायामपि घटाभावबुद्धिप्रसंगः इति कुचोद्यम् अपास्तम्. तथा **“अधिकरणात्मकत्वपक्षे अनन्ताधिकरणकल्पने गौरवाद् भावातिरिक्तकल्पनैव लघीयसि”** ( ) इति तार्किकोक्तिरपि अनेनैव निरस्ता. भावसमुदायविलक्षणातिरिक्तकल्पने महागौरवात्. प्रतियोगिभेदाद् अनन्ताभावान् कल्पयित्वापि तदनित्यत्वेतु अत्यन्तगौरवभिया तन्नित्यत्वं प्रकल्प्य तथासति सर्वदा घटाभावबुद्धिप्रसक्त्याधिकरणस्वरूपविशेषस्यैव सम्बन्धत्वस्वीकारे कण्ठगडुभूतातिरिक्ताभावकल्पनैव गरीयसीति तदपेक्षया अभावस्य अधिकरणस्वरूपविशेषत्वस्वीकारएव लाघवमिति शुभम्. किञ्च किम् इदम् अभावत्वं नाम? न तावद् द्रव्यादिषट्कान्योन्याभाववत्त्वं, द्रव्यत्वादेः प्रतियोगितावच्छेदकत्वे गुणत्वद्रव्यत्वादिकम् आदाय द्रव्यगुणादिषु अतिप्रसंगात् षट्त्वावच्छिन्नभेदस्य अभावत्वत्वे घटपटोभयभेदस्य प्रत्येकं घटपटयोरिव तस्य प्रत्येकं द्रव्यादावपि सत्त्वात् पर्याप्तिसम्बन्धेन षट्त्वावच्छिन्नभेदस्य प्रत्येकं द्रव्यादिषु सत्त्वस्य वारयितुम् अशक्यत्वात्. नच अपेक्षाबुद्धिरूपं द्रव्यादिगतषट्त्वमेव प्रतियोगितावच्छेदकम् द्विप्रतियोगिकभेदस्य द्वित्वमिव इति वाच्यम्. व्यासज्यवृत्तिधर्माणां पर्याप्तिसम्बन्धेनैव प्रकारत्वनियमांगीकारात्. अन्यथा द्वित्वस्य समवायेन प्रत्येकमपि सत्त्वेन एकोद्वौ इति एकविशेष्यक-द्वित्वप्रकारकप्रमितिप्रसंगात्. एको द्वित्ववान् इति प्रतीतौतु मत्वर्थसमवायस्यैव प्रकारत्वम् अंगीकृत्य व्यासज्यवृत्तिधर्माणां समवायेन प्रकारतायाः तार्किकैरेव निराकृतत्वाच्च. एवञ्च षडभिन्नम् इति प्रतीतौ पर्याप्तिसम्बन्धेनैव षट्त्वस्य प्रकारता अनुभूयतइति षट्त्वावच्छिन्नभेदो असंगतः. नच द्रव्यादिभेदषट्कम् अभावत्वम् इति कल्प्यं गौरवात्. लोके सर्वेषां विशेषान्तपदार्थषट्कनिश्चयानियमेन तदनिश्चयवताम् अभावाप्रतीतेः प्रसंगाच्च. नच तर्हि भावभिन्नत्वं तत्त्वं शंक्यं भावत्वेन भावम् अजानतः तदप्रत्ययापातात्. वस्तुतश्च

भावत्वावच्छिन्नप्रतियोगिताकभेदस्यैव अप्रसिद्धतायाः परैः अंगीकाराद्, अभावरूपधर्मिसिद्धौ तद्वृत्तितादृशभेदसिद्धिः तत्सिद्धौच अभावसिद्धिः इति अन्योन्याश्रयात् च. किञ्च भेदः त्वन्मते अन्योन्याभावएव. अन्योन्याभावत्वञ्च अभावत्वगर्भभूतोधर्मः. तथाच भावान्योन्याभाववत्त्वम् अभावत्वम् इति उररीकारे अभावत्वज्ञानम् अन्योन्याभावत्वज्ञानाधीनं तज्ज्ञानञ्च अभावत्वज्ञानाधीनम् इति अन्योन्याश्रयः. अन्योन्याभावे अभावलक्षणसमन्वयः आत्माश्रयः च. अपिच एवं सति ‘‘अभावो न भावः’’ इति वाक्यात् शाब्दबोधो न स्याद् उद्देश्यतावच्छेदकस्य भावभेदस्यैव विधेयतायाः अनौचित्यात्. यत्तु नव्याः भावभिन्नत्वं समवाय-सामानाधिकरण्या-ऽन्यतरसम्बन्धावच्छिन्न- प्रतियोगिताकसत्ताभावरूपम्. सामान्यादित्रिके द्रव्यादित्रिके च अतिप्रसंगवारणाय समवाय-सामानाधिकरण्योः उभयोः ग्रहणम् इति आहुः, तद् न; सत्ताभावरूपत्वोक्तावपि आत्माश्रयानपायात्, सत्तानुपस्थितिदशायाम् अभावाप्रत्ययस्य आपत्तेश्च. सत्ताऽभावनिष्ठम् अभावत्वमपि सत्ताभावरूपं पुनः तन्निष्ठम् अभावत्वमपि तद्रूपम् इति अनवस्थापत्तेश्च. नच सत्तात्यन्ताभावव्यक्तेः स्वरूपतएव प्रकारत्वम् उपगम्यते. अतएव सत्तारूपप्रतियोगिज्ञानं विनापि ‘‘घटो नास्ति’’ इति बुद्धौ सोऽत्यन्ताभावः प्रकारः अभावत्वप्रकारकप्रत्यक्षएव. प्रतियोगिधियो हेतुत्वात्. अन्यथा ‘‘इदं तमः’’ इति प्रतीत्यनापत्तिः इति वाच्यं, कल्पने मानाभावात्. प्रतियोगिज्ञानमन्तरेण अभावज्ञानस्य अनिष्पत्तिनियमेन सत्तोपस्थितिमन्तरा सत्ताभावज्ञानाऽसम्भवात्. ‘‘इदं तमः’’ इति ज्ञानन्तु न तेजोऽभावविषयकम्. मीमांसकैः तमसः स्वतन्त्रद्रव्यतायाः स्वीकारात्. वस्तुतस्तु मायिकं पदार्थान्तरं तदिति **‘‘यथा भासो यथा तमः’’** (भाग.पुरा.२।९।३३) इत्यत्र सुबोधिनीतत्प्रकाशयोः अन्धकारवादादौ च प्रपञ्चितम्. तेन तेजोधियं विनापि ‘‘इदं तमः’’ इति धीः निर्बाधा. तव सत्ताभावरूपस्य अभावत्वस्य अनुपस्थितस्य प्रकारत्वे **नागृहीतविशेषणे**ति न्यायव्यभिचारादिकमपि द्रष्टव्यम्. अथ अभावस्य अधिकरणात्मकत्वपक्षे नैयायिकोक्तदोषाभासान् उद्धर्तुम् आशंकन्ते **नच** इति, **आधाराधेयभाववद्** इति लोकदृष्ट्या कल्पितं भेदम् आदाय आधाराधेयभावव्यवहारवद् इति अर्थः. भवन्मतेऽपि अभावस्य अधिकरणात्मकतांगीकारः आवश्यकएव इति

आहुः **भवन्मते च** इति, अन्यथा अविद्याध्वंसस्य साद्यनन्ततया मोक्षे अनुच्छेद्यद्वैतमेव प्रसज्येत इति भावः. ननु एवम् आधाराधेयभावानुपपत्तिरूपदोषपरिहारेऽपि ‘‘येन इन्द्रियेण या व्यक्तिः गृह्यते तेनैव इन्द्रियेण तद्गता जातिः तदभावः च’’ इति नियमेन जलादौ गन्धाद्यभावस्य जलादिरूपतया जलादेः घ्राणादिजन्यप्रत्यक्षविषयत्वं चाक्षुषाद्यविषयत्वं च आपद्येत इति चेद्, अत्र ब्रूमः : यथा जलम् अभास्वरशुक्लरूपवत्त्वेन चक्षुषा गृह्यते, शीतस्पर्शवत्त्वेनतु त्वगिन्द्रियेण एवं गन्धाभावत्वेन रूपेणतु जलादेः घ्राणग्राह्यत्वेऽपि न किञ्चिद् बाधकम् इति प्राभाकराः. अतएव ‘‘**गन्धाभावस्य जलादिरूपत्वे जलत्वादिनैव तेषां न घ्राणेन्द्रियग्राह्यता गन्धाभावत्वेनतु तेषामपि तथात्वम् इष्टमेव इति प्राभाकराणाम् अभिप्रायः**’’ (न्या.मु.रा..प्र.खं.१।१२) इति रामरुद्रोऽपि आह. अन्येतु मन्यन्ते जलस्य चक्षुर्ग्राह्यत्वेऽपि जलत्वजातेः त्वगिन्द्रियग्राह्यत्वमेव. शीतस्पर्शस्य त्वग्ग्राह्यत्वेन तत्समानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातेः ततएव निश्चयस्य औचित्याद् अन्यथा अनुमेयत्वापत्तेः. दृश्यतेच प्रज्ञाचक्षुषामपि स्पर्शमात्रेण अत्र पात्रे जलम् इति ज्ञानम्. नहि तद् जलत्वानुपस्थितौ सम्भवति ‘‘**नागृहीतविशेषण...**’’ (लौकि.न्या.सा.४।६१) इति न्यायात्. यत्रतु जलचाक्षुषमात्रं तत्र स्पार्शनानुभवविषयजलत्वस्मरणमेव सामान्यतो दर्शनोद्बुद्धं ‘‘जलम् इदम्’’ इति निश्चयजनकम् अतो न उक्तन्यायविरोधः इति. तस्माद् जलत्व-तेजस्त्वयोः त्वग्ग्राह्यत्वपक्षे ‘‘**येन इन्द्रियेण**’’ इति नियमो न एकान्तिकः. किञ्च अभावानां प्रत्यक्षविषयत्वाभ्युपगमे तार्किकनियमव्यभिचारशङ्कावकाशः. मीमांसकनयेतु अधिकरणानाम् अभावत्वेन रूपेण अनुपलब्धिरूपप्रमाणगम्यत्वस्य अंगीकाराद् न सः तार्किकैरपि प्रत्यक्षस्थलएव तादृशनियमस्य उरीकारात्. नच प्रमाणान्तराभ्युपगमे गौरवं शंक्यं प्रत्यक्षवादिभिरपि अभावप्रत्यक्षकारणीभूत-‘विशेषणविशेष्यभावा’ख्य षष्ठसन्निकर्षस्य कल्पनीयतया तौल्यानपायाद् नच वैशिष्ट्यं स्वरूपसम्बन्धरूपत्वाद् अधिकरणात्मकम् इति नातिरिक्तं कल्प्यते इति वाच्यम् अभावानाम् अधिकरणात्मकत्वेन प्रकृतेऽपि गौरवाभावात् तन्मते अभावज्ञानं प्रति इन्द्रियाणामपि कारणत्वकल्पनस्य आधिक्याच्च. अपिच ‘‘**येन इन्द्रियेण**’’ इत्यस्य एकान्तिकत्वाभ्युपगमे रूपादिप्रतियोगिकाभावानामपि चक्षुर्मात्रग्राह्यता-

पत्त्या वायौ रूपाभावबुद्धिः चक्षुर्व्यापारमन्तरैव जायमाना न उपपद्येत. एवं परमाण्वादिषु महत्त्वाद्यभावबुद्धिरपि वाय्वादेः चाक्षुषविषयत्वं च आपद्येत. तस्माद् अनुपलब्धिप्रमाणेनैव अधिकरणम् अभावत्वेन गृह्यते. ‘‘घटाभाववद् भूतलम्’’ इति ज्ञानस्यापि भूतलांशे प्रत्यक्षत्वम् अभावांशे परोक्षत्वम्. ‘‘पर्वतो वह्निमान्’’ इत्यादेः पर्वतांशे प्रत्यक्षत्वं वह्निमत्त्वांशे परोक्षत्वमिव इति ध्येयम्. वस्तुतस्तु द्वितीयस्कन्धसुबोधिन्याम् **‘‘अहमेव आसमेव अग्रे’’** (भाग.पुरा.२।९।३२) इत्यत्र **‘‘अभावास्तु अस्मन्मते तिरोभावातिरिक्ता न भवन्ति’’** (सुबो.२।९।३२) इति उक्तम्. तेन तिरोभवनं तिरोभावः इति पक्षे तस्य वस्तुधर्मत्वाद् धर्मधर्मिणोश्च अभेदाद् गुणादीनां द्रव्यात्मकतायाः वाक्यप्रदीपे हरिणापि **‘‘द्रव्यात्मानः त्रयः तस्माद् बुद्धौ नानाव्यवस्थिताः. आश्रयाश्रयिभावेन इति अयं पूर्वेभ्यः आगम’’** (वा.प्र.३।१४।२०) इति कथनात्. ‘‘तिरोभावयति इति तिरोभावः’’ इति व्युत्पत्या शक्तित्वेऽपि तादात्म्यानपायाच्च स्वमतेऽपि अभावस्य अधिकरणात्मकत्वकथनं न विरुद्धम्. तस्मात् पदार्थान्तरतया अभावस्य अंगीकारो अभिमानमात्रम्, तस्य अलीकत्वात्. अयम् इति निर्देष्टुम् अशक्यत्वाद् अतएव लोके वेदे च ‘‘घटो नास्ति’’ **‘‘यस्मात् परं न अपरम् अस्ति किञ्चिद्’’** (श्वेता.उप.३।९) इत्यादिः ‘न’ पदघटितवाक्यप्रयोगव्यवहारएव प्रायो दृश्यते. नतु ‘‘घटाभाववद् भूतलम्’’ इति कोपि लौकिकः प्रयुङ्क्ते. किं बहुना ‘अभाव’पदेऽपि न भावो अभावः इति नञ्समासएव. नञर्थस्य पृथक्पदार्थताभिमानेतु ‘अब्राह्मणो’ ‘अधर्मः’ इत्यादौ प्रतीयमानसादृश्य-विरोधादिनञर्थानामपि पदार्थान्तरत्वं स्वीकुरु. तेन बहुपदार्थसिध्या सप्तपदार्थवादो दत्ततिलाञ्जलिः स्यात्. वस्तुतस्तु नञः समभिव्याहृतपदार्थद्योतकत्वादेव न पृथक्पदार्थवाचकता किन्तु पदार्थएव आविर्भूत-तिरोभूतत्वाभ्यां द्विविधः. तत्र पदार्थस्य तिरोभूतस्वरूपद्योतको नञ्. आविर्भावतिरोभावौतु पुरस्तात् प्रपञ्चयिष्येते. अभावस्य तिरोभावानतिरिक्ततया अस्मन्मते तदनंगीकारस्य शुद्धाद्वैतमार्तण्डे ‘‘प्रागभावादयो न अंगीकार्याः आभ्यां यतो अखिलम्. तद्विस्तरभिया न अत्र लिख्यते अन्यत्र दृश्यताम्’’ (शु.मा.१७) इति दर्शितत्वेऽपि तदप्रकाशयन् भेदज्ञानाभावः इति प्रथमान्तपाठञ्च कल्पयन् ग्रन्थानभिज्ञजनव्यामोहकएव इति उपेक्ष्यः.

(२) ननु कार्य-कारणयोः भेदस्य प्रत्यक्षसिद्धत्वाद् ब्रह्मणः कार्य-कारणात्मकत्वं न सम्भवति. किञ्च तद्भेदज्ञानाभावस्य ब्रह्मणि स्वीकारे ब्रह्मणो अल्पज्ञत्वापत्तिः इति चेत्, स्याद् एवं यदि ब्रह्मणो निमित्तकारणत्वमेव स्याद्, अभ्युपगम्यतेतु उपादानकारणत्वमपि. तत्रच कार्यस्य कारणात्मत्वं बहुवादिसम्मतम् अतो भवत्येव कार्यकारणात्मकत्वम्. अल्पज्ञत्वन्तु भेदासम्भवेनैव अपास्तम्. नच ब्रह्मणः समवायिकारणत्वे मानाभावः इति वाच्यं; "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधाद्" (ब्र.सू.१।४।२३) इति सूत्रस्य, "यथा सोम्य एकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्" (छान्दो.उप.६।१।४) इत्यादिश्रुतीनां, "त्वयि अग्र आसीत् त्वयि मध्य आसीत् त्वयि अन्त आसीद् इदम् आत्मतन्त्रे. त्वम् आदिर् अन्तो जगतो अस्य मध्यं घटस्य मृत्स्नेव परः परस्माद्" (भाग.पुरा.८।६।१०) इति भागवतस्य च प्रमाणत्वात्. नच उपादानकारणत्वेऽपि तन्तु-पटवद् भेदः कुतो न स्याद्? इति वाच्यम्, आरंभवादस्य भाष्ये दूषितत्वेन तादृशभेदस्य शंकितुम् अशक्यत्वात्. अत्रतु "सर्वं खलु इदं ब्रह्म तज्जलान् इति" (छान्दो.उप.३।१४।१) "तद् आत्मानं स्वयम् अकुरुत" (तैत्ति.उप.२।७) "सत् च त्यत् च अभवद्" (तैत्ति.उप.२।६) "ब्रह्मैव इदम् अमृतं पुरस्ताद् ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्च उत्तरेण अधश्च उर्ध्वं च प्रसृतं ब्रह्मैव इदं विश्वम् इदं वरिष्ठम्" (मुण्ड.उप.२।२।११) इत्यादिश्रुतिभिः शुद्धस्यैव ब्रह्मणः सर्वाऽभिन्नत्वं स्वीक्रियते. ननु अविक्रियमाणस्य समवायित्वं न लोकप्रसिद्धं, प्रकृत्यादीनां विक्रियमाणानामेव समवायित्वस्य प्रसिद्धत्वात्. लोकविरुद्धकल्पना च अप्रामाणिक्येव इति चेद्, न; नहि लोकप्रसिद्धमेव यद्-यत् तत्-तदेव ब्रह्मणि कल्पनीयम् इति नियमः, किन्तु वेदप्रतिपाद्यं, ब्रह्मणो वेदैकसमधिगम्यत्वात्. "तन्तु

औपनिषदं पुरुषं पृच्छामि" (बृह.उप.३।९।२६) इति श्रुतेः. लौकिकेतु लोकप्रसिद्धमेव कल्पनीयं यथा पशौ लोमवल्लाङ्गूलवत्त्वम्. वेदेतु ब्रह्मणि विरुद्धधर्मवत्त्वं तत्र - तत्र प्रतिपाद्यते. यथा "आसीनो दूरं व्रजति शयानो याति सर्वतः" (कठोप.१।२।२१) "अपाणिपादो जवनो ग्रहीता पश्यति अचक्षुः स शृणोति अकर्णः" (श्वेता.उप.३।१९) इत्यादिश्रुतिभ्यः. नहि लोके अचक्षुषो द्रष्टृत्वम् अकर्णस्य श्रोतृत्वं वा प्रसिद्धम्. लोकप्रसिद्धमेव कल्प्यते चेत्, तादृशश्रुतीनाम् अप्रामाण्यं स्यात्. एवञ्च अविकृतस्यैव ब्रह्मणः अलौकिकस्य "तद् आत्मानं स्वयम् अकुरुत" (तैत्ति.उप.२।७) इति वेदप्रतिपाद्यं मृत्स्नादि वैदिकदृष्टान्तैः दृढीकृतम् उपादानकारणत्वं न दूषणाय किन्तु अलौकिकत्वसम्पादकतया भूषणायैव भवति.

(३) अथ विवर्तवादेन कार्यकारणयोः मायासम्बन्धस्य अप्रामाणिकत्वम् अविकृतपरिणामवादेन शुद्धस्यैव कार्यकारणात्मकत्वं च शुद्धाद्वैतसिध्यर्थं दर्शयितुं शुद्धपदार्थं तावद् आक्षिपन्ति. **ननु** इति, समादधते **स्याद् एवम्** इत्यादिना. यदि नैयायिकवद् निमित्तकारणत्वमात्रम् ईश्वरस्य स्वीक्रियेत तदा प्रपञ्चेश्वरयोः भेदः, भेदानभिज्ञतया ईश्वरे अल्पज्ञत्वं च आपद्येत इति अर्थः. **तत्रच** इति, उपादानत्वपक्षे. स्वपक्षे तन्त्रान्तराणामपि सम्मतिं दर्शयितुम् आहुः **बहुवादिसम्मतम्** इति, तथाच प्रकृत्युपादानकत्ववादिभिः सांख्यपातञ्जलादिभिः कार्ये प्रकृतितादात्म्यम् उच्यते, कटकादेः सुवर्णादितादात्म्यं तवापि भाष्यभामत्यादौ उपपादितमिति परिणामवादे कार्यस्य कारणात्मकत्वं निर्विवादम् इति भावः. **कार्य...** इति ब्रह्मणः इति शेषः. **अपास्तम्** इति कार्ये कारणाद् भेदज्ञानस्य भ्रमरूपत्वाद् ईश्वरस्यच अभ्रान्तत्वात् तथा इति भावः. अभिन्ननिमित्तोपादानवादे मानम् आहुः **प्रकृतिश्च...** इत्यादि समन्वयस्य चतुर्थे पादे अभिन्ननिमित्तोपादानत्वस्थापनाय इदम् अधिकरणम्. तत्र धर्मविचारे श्रुतिस्मृत्योः एकवाक्यत्ववद् ब्रह्मविचारेऽपि तयोः तदपेक्षितम् इति सांख्यादिस्मृतिसिद्धा प्रकृतिरेव उपादानं श्रुतिसिद्धं, ब्रह्मतु निमित्तमात्रम्

इति पूर्वपक्षे प्राप्ते इदम् आरभ्यते. अर्थस्तु ''मृत्प्रकृतिको घटः'' ''तन्तुप्रकृतिकः पटः'' इत्यादिव्यवहारात् 'प्रकृति'शब्दः उपादानवचनः. तथाच जगतः प्रकृतिः उपादानकारणं 'चा'द् निमित्तकारणं च ब्रह्मैव. अथवा रूढ्या **प्रकृतिः** उपादानं प्रकृष्टा कृतिः यस्य इति योगेन निमित्तं च ब्रह्मैव. **'च'**कारो **''यत्र येन यतो यस्य''** (भाग.पुरा.१०।८२।४) इत्यादि वाक्योक्ताधिकरणत्व-करणत्वादि संग्राहकः. कुतः ? **''प्रतिज्ञादृष्टान्तानुपरोधात्''** तत्र - तत्र उपनिषत्सु श्रूयमाणाः **प्रतिज्ञाः दृष्टान्ताः** च अभिन्ननिमित्तोपादानत्वे सत्येव न उपरुध्येरन्. यथा छान्दोग्ये श्वेतकेतुविद्यायाम् **''उत तम् आदेशम् अप्राक्ष्यो येन अश्रुतं श्रुतं भवति अमतं मतम् अविज्ञातं विज्ञातम्''** (छान्दो.उप.६।१।२-३) इति **प्रतिज्ञा.** अनन्तरं **''कथं नु भगवः स आदेशो भवति''** (तत्रैव) इति श्वेतकेतुप्रश्ने **''यथा सोम्य एकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं मृत्तिका इत्येव सत्यम्. यथा सोम्य एकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्यात्. यथा सोम्य एकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्याद्''** (छान्दो.उप.६।१।४-६) इति **दृष्टान्ताः** उक्ताः. प्रथममुण्डके **''कस्मिन् नु भगवो विज्ञाते सर्वम् इदं विज्ञातं भवति''** (मुण्ड.उप.१।१।३) इति **प्रतिज्ञा.** **''यथा ऊर्णनाभिः सृजते गृह्णते च यथा पृथिव्याम् ओषधयः सम्भवन्ति. यथा सतः पुरुषात् केशलोमानि तथा अक्षरात् सम्भवति इह विश्वम्''** (मुण्ड.उप.१।१।७) इति **दृष्टान्ताः.** बृहदारण्यके मैत्रेयीब्राह्मणे **''आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेन इदं सर्वं विदितम्''** (बृह.उप.२।४।५) इति **प्रतिज्ञा.** अग्रे च **''ब्रह्म तं परादाद् यो अन्यत्र आत्मनो ब्रह्म वेद''** (बृह.उप.२।४।६) इत्यादिना कार्यकारणभेददर्शने अनिष्टम् उक्त्वा **''इदं सर्वं यद् अयम् आत्मा''** (तत्रैव) इति सर्वस्य ब्रह्मरूपतां प्रतिज्ञाय **दृष्टान्ताः** आम्नाताः. **''स यथा दुन्दुभेः हन्यमानस्य न बाह्यान् शब्दान् शक्नुयाद् ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः''** (बृह.उप.२।४।७) इत्यादयः. नहि निमित्तकारणविज्ञानेन कार्यविज्ञानं सम्भवति. मृत्सुवर्णादीनिच समवायीन्येव दृष्टान्तीक्रियन्ते. मृत्पिण्डदृष्टान्तश्रुतिरेव श्रीभागवते अष्टमस्कन्धे षष्ठाध्याये स्तुवता विधिना उपबृंहिता **''त्वयि अग्र आसीद्''**

(भाग.पुरा.८।६।१०) इति. एवं **"यथा सुवर्णं सुकृतं पुरस्ताद्"**. ( ) **"यथा हिरण्यं बहुधा समीयते"**, **"यथा ऊर्णनाभिः हृदयाद्"** (भाग.पुरा.१२।४।३१,११।९।२१) इत्यादिषु श्रौतालोहादिदृष्टान्ताः उपबृंहिताः. **भाष्ये** इति अविरोधाध्याये तर्कपादे **"महद्दीर्घवद् वा"** (ब्र.सू.२।२।११) इति अधिकरणे **"सर्वं खलु"** (छान्दो.उप.३।१४।१) इत्यादि छान्दोग्ये तृतीयाध्याये शाण्डिल्यविद्यायां **"सर्वं खलु इदं ब्रह्म तज्जलान् इति शान्त उपासीत"** (छान्दो.उप.३।१४।१) इति पठ्यते. अर्थस्तु **इदं** परिदृश्यमानं **सर्वं खलु** निश्चयेन **ब्रह्म, तत्र हेतुः तज्जलान्** इति जायते इति जं, लीयते इति लम्, अनिति इति अन्, एषां कर्मधारये तस्मिन् जलान् **तज्जलान्** तस्माद् जायमानं तत्रैव लीयमानं स्थितिदशायां तद्रूपेण वर्तमानं च इति अर्थः. यद् यस्माद् जायते यत्र लीयते यद्रूपेण अवतिष्ठते तद् तदभिन्नम् इति नियमः. यथा मृत्प्रभवो मृद्विलयः स्थितिदशायां मृद्भावम् अपरिमुञ्चन् घटो मृदभिन्नएव, **इति** हेतोः **शान्तो** रागद्वेषादिशून्यः सन् ब्रह्मैव **उपासीत** इति. अत्र विस्तरस्तु समन्वयस्य द्वितीये पादे प्रथमाधिकरणे ज्ञेयः. **"तद् आत्मानं स्वयम् अकुरुत"** (तैत्ति.उप.२।७) इतितु तैत्तिरीयब्रह्मवल्लीस्थम्. अर्थस्तु ब्रह्मैव **स्वयम्** इतरानपेक्षं सद् **आत्मानमेव** जगद्रूपम् **अकुरुत** इति. **"सत् च त्यत् च अभवद्"** (तैत्ति.उप.२।६) इत्यपि तत्रत्यमेव. अर्थस्तु सचेतनम् अचेतनं च स्वयमेव अभवद् इति. **"ब्रह्मैव इदम् अमृतम्"** (मुण्ड.उप.२।२।११) इतितु द्वितीयमुण्डकसमाप्तिवाक्यम्. अत्र ब्रह्मणएव अमृतस्य अविकृतस्य सतः सर्वतः सर्वरूपेण प्रसृतत्वम्. विश्वस्य अवधारणपूर्वकं ब्रह्मरूपत्वम्. अभेदाद् विश्वस्य वरतमत्वं च आम्नायते. अविकृतपरिणामवादबोधनाय शंकन्ते **ननु अविक्रियमाणस्य** इत्यादिना, समादधते **नहि लोक...** इत्यादिना. यद्यपि लोके सुवर्णादीनि स्वरूपपरित्यागादिविकारम् अलभमानान्येव कटकरुचकादिरूपेण परिणमन्ति नतु दध्यादिरूपेण परिणमद् दुग्धादिवद् विक्रियमाणानि. तान्येव वेदे पुराणे च **"यथा सोम्य एकेन लोहमणिना"** (छान्दो.उप.६।१।५) **"यथा सुवर्णं सुकृतं पुरस्ताद्"** इत्यादिषु ब्रह्मणो दृष्टान्तीक्रियन्ते. चिन्तामणि-कल्पतरु-कामधेनुप्रभृतीनि च अविकारीण्येव

उपादानानि प्रसिद्धानि. तेन अविकृतमेव ब्रह्म जगद्रूपेण परिणमति इति कथनं न लोकविरुद्धम्. तथापि इदम् अग्रे अवसरे प्रपञ्चनीयमेव इति प्रकृते वेदैकवेद्यवस्तुनि कुतर्कानवसरमेव आश्रित्य समादधतइति ज्ञेयम्. “**तन्तु औपनिषदम्**” (बृह.उप.३।९।२६) इति बृहदारण्यके शाकल्यब्राह्मणे “**स एष नेति नेति आत्मा अगृह्यो नहि गृह्यते**” (बृह.उप.३।९।२६) इत्यादिना प्रत्यक्षादिप्रमाणग्राह्यतां प्रतिषिध्य शाकल्यं प्रति याज्ञवल्क्येन “**तन्तु औपनिषदं पुरुषं पृच्छामि**” इति कथने ‘औपनिषद’पदेन उपनिषदामेव तत्र प्रवृत्तिः प्रतिप्रसूयत इति युक्तम् अतो वेदैकवेद्यत्वम्. **यथा पशौ** इति, एवं “**ब्रह्म पुच्छं प्रतिष्ठा**” (तैत्ति.उप.२।५) इति श्रवणेऽपि तस्य पशुसदृशलोमादिविशिष्टं लांगूलं न कल्प्यते. लोकप्रसिद्धस्यैव तत्र कल्पनाया अनियमाद् इतिभावः. **आसीनइति,** कठवल्लीषु द्वितीयवल्याम् “**अन्यत्र धर्माद् अन्यत्र अधर्माद्**” (कठोप.१।२।१४) इति नचिकेतप्रश्ने “**सर्वे वेदा यत्पदम् आमनन्ति**” (कठोप.१।२।१५) इत्यादिना ब्रह्मनिरूपणम् उपक्रम्य ‘**आसीन**’ इति पठ्यते. अस्य उत्तरार्धन्तु “**कस्तं मदामदं देवं मदन्यो ज्ञातुम् अर्हति**” (कठोप.१।२।२१) इति. अत्र आसीनस्य सतो दूरगमनं शयानस्य सतः सर्वतो गमनं च विरुद्धम्. अतएव परमभक्तात् स्वस्माद् अन्यस्य तज्ज्ञानानर्हत्वम् उत्तरार्द्धे दर्शितं यमेन. तस्य तज्ज्ञत्वन्तु “**द्वादशैते विजानीमो**” (भाग.पुरा.६।३।२१) इति षष्ठस्कन्धादौ प्रसिद्धम्. **अपाणिपाद** इति. श्वेताश्वतरे तृतीयाध्याये इदं पठ्यते. अस्य उत्तरार्धन्तु “**स वेत्ति वेद्यं नच तस्य वेत्ता तम्** आहुः **अग्र्यं पुरुषं महान्तम्**” (श्वेता.उप.३।१९) इति. एतदग्रेऽपि अनुपदम् “**अणोः अणीयान् महतो महीयान्**” (श्वेता.उप.३।२०) इति विरुद्धधर्माश्रयत्वं श्रावितम्. अतएव लौकिकानां तदवेत्तृत्वं वीतशोकस्य तत्प्रासादात् तद्वेत्तृत्वं च उक्तम् ऋग्द्वयेन. **न दूषणाय** इति तादर्थ्ये चतुर्थी. ब्रह्मणि विकारित्वादिदूषणापादकं न भवति किन्तु विरुद्धसर्वधर्माश्रयत्वेन ब्रह्मतामेव द्रढयतीति भूषणापादकम्.

(२) नच “मायी सृजत” (श्वेता.उप.४।९) इत्यादिवाक्यानुरोधेन “तद् आत्मानं स्वयम् अकुरुत” (तैत्ति.उप.२।७)

इत्यस्यापि मायया आत्मानम् आकाशादिरूपं कृतवान् इत्येव अर्थः. मृदादिदृष्टान्तानाञ्च वाचारम्भणं वागालम्बनम् इत्यादिरीत्या कार्यमिथ्यात्व-कारणसत्यत्वपरत्वमेव इति वाच्यं, प्रसिद्धार्थपरित्यागे अप्रसिद्धार्थकल्पने च मानाभावात्. किञ्च "तद् आत्मानं स्वयम् अकुरुत" (तैत्ति.उप.२।७) इत्यत्र 'माया'पदस्य अभावेन मायया आत्मानम् इत्याद्यर्थस्य "वाचारम्भणम्" (छान्दो.उप.६।१।४) इत्यत्र 'वागालम्बन'-पदाभावेन तादृशार्थस्य च कर्तुम् अशक्यत्वाच्च. 'माया' पदेन भगवच्छक्तिरेव अभिधीयते इति अग्रे वक्ष्यते. ननु एवमपि "वाचारम्भणं विकारः" (छान्दो.उप.६।१।४) इति यथाश्रुतपाठे विकारो वाङ्मात्रेणैव आरभ्यते नतु वस्तुतः इत्येव अर्थः करणीयः. तथाच कार्यस्य मिथ्यात्वमेव इति चेद्, न; एवंसति कस्य ब्रह्म कारणं भवेत्? नतु त्रैकालिकनिषेधप्रतियोगिनः खपुष्पतुल्यस्य किञ्चिदपि कारणं भवति. किञ्च "तदनन्यत्वम् 'आरम्भण' शब्दादिभ्य" (ब्र.सू.२।१।१५) इति सूत्रे कारणानन्यत्वं कार्यस्य व्यासैः प्रतिपादितं विरुध्येत. नहि मिथ्याभूतस्य सत्यानन्यत्वं सम्भवति. कार्यस्यापि सत्यत्वं कारणस्यापि वा मिथ्यात्वं विना तयोः अनन्यत्वम् अनुपपन्नम्. तत्र कारणस्य मिथ्यात्वे "सत्यं ज्ञानम् अनन्तं ब्रह्म" (तैत्ति.उप.२।१) इत्यादिश्रुतिविरोधः. कार्यस्य कारणात्मना सत्यत्वे न कोऽपि विरोधः प्रत्युत "एकविज्ञानेन सर्वविज्ञानश्रुतिरपि" (द्र.छान्दो.उप.६।६।२-७) संगच्छते तस्मात् कारणमिव कार्यमपि सत्यमेव. "वाचारम्भणम्" (छान्दो.उप.६।१।४) इत्यस्य अयम् अर्थः : यो विकारः तद् वाचारम्भणं, यद् आरभ्यते तद् आरम्भणम्. "कृत्यल्युटो बहुलम्" (पाणि.सू.३।३।११३) इति ल्युट्, वागारब्धं कारणस्यैव नामधेयम्. कारणमेव हि तत्तत्क्रियासिध्यर्थं तेन-तेन नाम्ना व्यवह्रियते इति कारणाद् अभिन्नमेव कार्यं

नतु स्वेन रूपेण कारणाद् भिन्नम्. तदाहः “ ‘मृत्तिका’इत्येव सत्यम्” (छान्दो.उप.६।१।४) इति. अतः कारणाभिन्नत्वात् कार्यं सत्यमेव नतु मिथ्या. मिथ्यात्वेतु “यतो वा इमानि भूतानि जायन्ते” (तैत्ति.उप.३।१) इत्यादयः श्रुतयः कुप्येरन्. नच शुक्त्यादीनां रजतादीन् प्रतीव ब्रह्मणोऽपि जगत्प्रति कारणत्वस्य वक्तुं शक्यत्वेन तादृशश्रुतिसंगतिः इति वाच्यम्. शुक्त्यादौ रजतादेः उत्पत्त्यनंगीकाराद् इति अन्यत्र विस्तरः. वस्तुतस्तु 'भेदज्ञानाभावे' **इत्येव सर्वपुस्तकेषु पाठः. ननु तादृशपाठे द्विप्रकारकज्ञानाऽभावे अद्वैतं चेद् द्विप्रकारकज्ञाने द्वैतमेव परिशिष्यते इति चेद्, न; कार्यकारणयोः भेदस्य अभावात् तज्ज्ञानमपि वास्तवं न सम्भवति कार्यकारणयोः भेदो यदि स्यात् तदा द्विप्रकारकज्ञानमपि वास्तवं स्यात्. तद्भेदस्यैव अभावेन द्विप्रकारकज्ञानस्य अभावाद् अद्वैतमेव सार्वदिकम् इत्यत्र तात्पर्यात्. अतएव 'अन्यथा' इत्यस्य सप्तम्यन्तपदेन व्याख्यातं सर्वत्र दृष्टं संगच्छते. अत्र प्रथमान्तपदेन व्याख्याने तदसंगतमेव स्यात्. व्युत्पत्तिस्तु न विद्यते द्वैतं यस्मिन् तद् अद्वैतम्. “द्विधा ज्ञानन्तु यद्-यत् स्याद् नामरूपात्मना मुहुः” इत्यादेः “द्विधा इतं द्वीतं द्विप्रकारकं ज्ञानम् इति अर्थः” (शु.मा.प्र.४) इत्यादेरपि तत्रैव तात्पर्यम्. अथवा “न द्वैतम् अद्वैतम्” इत्येव विग्रहः अतएव शुद्धं च तद् अद्वैतम् इति कर्मधारयसमासे शुद्धपदार्थेन अद्वैतपदार्थस्य भेदज्ञानाभावस्य तादात्म्याभाव इति पूर्वोक्तदोषो दूरादेव निरस्तः ॥२॥**

(३) कार्यकारणयोः मायासम्बन्धं निराकर्तुं तयोः तत्सम्बन्धं पराभिप्रेतं गृह्णन्ति. **नच मायी** इति, इदमपि वाक्यं श्वेताश्वतरे चतुर्थाऽध्याये **“छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदाः वदन्ति अस्माद् मायी सृजते विश्वम् एतत् तस्मिन् च अन्यो मायया सन्निरुद्धः”**

(श्वेता.उप.४।९) इति पठ्यते. **दृष्टान्तानाम्** इति, दृष्टान्तवाक्यानां परिहरन्ति. **प्रसिद्ध...**इत्यादिना आत्मानमेव प्रकान्तजगद्रूपम् अकुरुत इति प्रसिद्धो अर्थः श्रूयमाणपदलभ्यत्वात्. “मायया अकुरुत” इति अप्रसिद्धः तत्र ‘माया’पदाश्रवणात्. उच्चारितएव शब्दः प्रत्यायको न अनुच्चारितः इति नियमस्य बहुसम्मतत्वात्. ननु “**मायी सृजते विश्वम्**” (श्वेता.उप.४।९) इति वाक्यमेव तत्र-तत्र तथा कल्पने मानम् इति चेद् न. अनेकेषाम् अन्यथानयनस्य अशक्यत्वाद्, बहूनाम् अनुग्रहस्य न्याय्यत्वात्. ननु तथापि तस्य वाक्यस्य को अर्थः? इति चेत् तत्र आहुः. **‘माया’पदेन** इति, यथा च अयं वाक्यार्थः पूर्वर्चि “**ऋचो अक्षरे परमे व्योमन्प्रतिष्ठिताः**” (ऋक्.संहि.१।१६४।३९) इति वेदानाम् अक्षरैकप्रतिष्ठितत्वम् उक्तं तत्कथं संगच्छते. वेदेषु यज्ञादिप्रतिपादनाद् अतः उच्यते **छन्दांसि** इति, यत् पूर्वोक्तं ब्रह्म, छन्दांसि ऋगादिमन्त्राः, यज्ञाः वियूपाः, क्रतवः सयूपाः, व्रतानि कृच्छ्रादीनि, भूतं भविष्यत् ‘चा’द् वर्तमानं च सर्वं ब्रह्मैव. यच्च अन्यद् वेदा वदन्ति तत्सर्वं यद् ब्रह्मैव. तच्च सर्वं यस्माद् ब्रह्मणो भवति. “**यस्तं न वेद**” (श्वेता.उप.४।८) इति पूर्वेण ‘तच्छ’ब्देन ‘यच्छ’ब्दद्वयस्य अन्वयः. एतेन “**एवं सर्वं ततः सर्व स इति ज्ञानयोगतः**” (त.दी.नि.१।१०१) इति दर्शितं तथाच वेदानां तद्रूपत्वात् तदेकप्रतिपादकत्वाच्च युक्तं तत्र प्रतिष्ठितत्वम्. ‘यस्माद्’इत्यस्य उत्तरत्र वा हेतुतया अन्वयः. ननु सर्वस्य तद्रूपत्वे “**यः तं न वेद किम् ऋचा करिष्यति**” (श्वेता.उप.४।८) इति अवेदनं कथम्? अतः उच्यते, **मायी** सर्वभवनसामर्थ्यरूपमायाख्यस्वाभिन्नशक्तिशाली परमात्मा एतद् विश्वं सृजति तस्मिन् च अन्यः अंशतया भेदमापन्नो जीवः देहेन्द्रियादिप्रपञ्चे मायया अध्यासेन सम्यक् निरुद्धइति.

अत्र च माया भगवच्छक्तिरेव तत्रैव “**देवात्मशक्तिं**” “**परास्य शक्तिः**” (श्वेता.उप.१।३,६।८) इति शक्तित्वाभ्यासात्. नतु पराभिमतं ब्रह्माधिष्ठानकम् अज्ञानं मानाभावात्. तथाच “माली गच्छति” इत्यादौ मालया गच्छति इति अर्थो यथा न सम्पद्यते तथा अत्रापि “मायया सृजति” इति न लभ्यते पुराणवचनैः तस्याः करणत्वसाधनेपि “वह्निः

दहति'' ''वह्निः दाहकशक्त्या दहति'' इति वाक्ययोरिव मायाकरणत्वबोधकपुराणस्य **''तद् आत्मानम्''** इत्यादेः च न विरोधः पराभिमतमायोपाधिककर्तृत्वन्तु मार्तण्डादिषु ''किञ्च जन्यातु अजन्या वा माया आद्ये जनको हि कः? अन्याभावात्तु ब्रह्मैव सविशेषत्वम् आगतम्. द्वितीयेतु अद्वैतभंगः कादाचित्कत्वसंगतम्. **'आत्मैव इदम् अग्र आसीद्'** (बृह.उप.१।४।१) इत्यादिश्रुतिबाधतः. अनादित्वे तु सान्तत्वम् इति पक्षोऽपि असंगतः अनादित्वम् अनन्तत्वं मायाया इति निश्चयाद्'' (शु.मा.२३-२५) इत्यादिदोषैः निरस्तमेव. विस्तरतश्च पुरतो निराकरिष्यते. एवञ्च प्रकृतवाक्ये स्रष्टुः मायाशक्तिकत्वेन मायायाः तदधीनतया तया न सृज्यप्रयुक्तो व्यामोहइति 'मायी'पदतात्पर्यम्. जीवस्य तु व्युच्चरणाद् भेदम् आपन्नस्य मायया सन्निरोधाद् अवेदनं साधनैः वेदनं च पूर्वऋगुत्तरार्द्धोक्तं घटतइति चतुर्थचरणाशयः. शक्तित्वात् शक्ति-शक्तिमतोः च अभेदस्य उपपादयिष्यमाणत्वाद् न कारणे मायासम्बन्धः. प्रकृतवाक्ये सृज्यस्य मायिकता बोधनपरत्वस्य कल्पनेतु तस्मिन्नेव अध्याये **''तदेव अग्निः तदादित्यः तदु चन्द्रमाः तदेव शुक्रं तद् ब्रह्म तदापः तत् प्रजापतिः. त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी''** (श्वेता.उप.४।२-३) इति श्रावितं सर्वव्यक्तीनां तद्रूपत्वं पीड्येत. एवं कारणे मायासम्बन्धं संक्षेपेण निराकृत्य कार्ये तन्निराकरणाय वाचारम्भणश्रुत्यर्थं निर्मलयितुं शंकन्ते. **ननु एवम्** इति समादधते **एवं सति** इत्यादिना. **''तदनन्यत्वम्''** (ब्र.सू.२।१।१४) इति द्वितीयस्य प्रथमे पादे सप्तसूत्रम् इदम् अधिकरणम्. अग्रे जगन्मिथ्यात्वनिराकरणावसरे एतद् अधिकरणं वाचारम्भणादिश्रुत्यर्थो विवर्तवादे अनुपपत्तयश्च विस्तरेण निरूपयिष्यन्ते अतोत्र विरम्यते. **यतो वा** इति तैत्तिरीयभृगुवल्यां **''यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्ति अभिसंविशन्ति तद् विजिज्ञासस्व तद् ब्रह्मेति''** (तैत्ति.उप.३।१) इति पठ्यते मिथ्यावस्तुनः उत्पत्ति-स्थिति-लयाभिसंवेशानाम् असम्भवात् तद्बोधकश्रुतिव्याकोपः इति भावः. **अन्यत्र विस्तरः** इति निबन्धावरणभंगभाष्यतत्प्रकाशादिषु विस्तर इत्यर्थः एवम् अभ्युपेत्य वादेन मार्तण्डटीकायां भेदज्ञानाभावः इति तत्कल्पितं प्रथमान्तपाठं समाधाय वास्तवे सप्तम्यन्तपाठे समादधते **वस्तुतस्तु** इत्यादिना. **वास्तवं न** इति,

कठकाण्वादिभिः “**नेह नानास्ति किञ्चन**” (कठोप.२।१।११) “**यत्र हि द्वैतमिव भवति तदितरइतरं पश्यति**” (बृह.उप.२।४।१४) इति भेदस्य अतात्त्विकतायाः आम्नानाद् भेदज्ञानं वास्तवं प्रमारूपं न भवति किन्तु भ्रमरूपम्. मुण्डकश्वेताश्वतरादिषु “**अनीशया शोचति मुह्यमानः**” (मुण्ड.उप.३।१।२) इति मोहस्य अविद्याहेतुकत्वश्रावणात्. **यदि स्याद्** इति, तात्त्विको यदि स्यात्. **तात्पर्याद्** इति, इति चेद् न इति पूर्वत्र अस्य हेतुतया अन्वयः. **अतएव** इति, सप्तम्यन्तपाठस्य वास्तवत्वादेव. **सप्तम्यन्तम्** इति, सप्तम्यन्तपदघटितम्. सर्वत्र ग्रन्थान्तरेषु व्याख्येयग्रन्थस्था‘ऽन्यथा’पदं सप्तम्यन्तपर्यायकथनेनैव व्याख्यायते. अतो व्याख्यानशैल्यापि सएव पाठो निश्चीयते. सहस्राक्षकृता अद्वैतपदे नञ्बहुव्रीहेः स्वयम् उत्प्रेक्ष्य दूषितत्वेन तदुक्तम् अपाकर्तुं तथा विग्रहमपि स्वीकुर्वन्ति. **व्युत्पत्तिस्तु** इति. परोक्तैकप्रसरताभंगादेः वक्ष्यमाणरीत्या निराकरणसम्भवाद् अयमपि पक्षो न दुष्टः इति भावः. मार्तण्डकारिकाटीकयोः अभिप्रायलभ्यो अयं पक्षइत्याहुः. “द्विधाज्ञानम्...” (शु.मा.४) इति. ननु एवं सति मार्तण्डटीकायाम् “अन्यथा भेदज्ञानाभावे न द्वैतम् अद्वैतम् इति विग्रहः” (शु.मा.टी.४) इति व्याख्यानं कथं संगच्छताम् अतः आहुः. **अथवा** इति, अस्मिन् पक्षे पर्युदासाऽश्रयणेन नञोः विरोधार्थतया वा ‘अद्वैत’पदस्य अभेदज्ञानम् इत्यर्थः प्राग्दर्शितः. ‘एव’कारो अन्ययोगव्यवच्छेदको अस्य विग्रहस्य मुख्यतां द्योतयति. प्राचीनैः अस्यैव विग्रहस्य आदरणे बीजन्तु अस्मिन् पक्षे लाघवम् इति ध्येयम्. अन्यपदार्थप्रधानबहुव्रीह्यपेक्षया व्यधिकरणतत्पुरुषे ततोऽपि समानाधिकरणे कर्मधारये लाघवम् अतएव श्रुतिषु अनेकत्र ‘ब्रह्मलोक’इत्यादौ कर्मधारयादरणम् इति मञ्जूषादिषु स्फुटतरम्. **अतएव** इति, पक्षद्वयस्यापि अदुष्टत्वादेव. एवम् असंगतिदोषो निरस्तः. असंगत्यापादकसहस्राक्षवाक्ये ‘शुद्धपदार्थ’इत्यत्र ‘शुद्धपदार्थस्य’ इति पृथक्पदम् अपेक्षितम्. कार्यकारणात्मकब्रह्मण इति सर्वं वा समस्तम्. समस्तपदैकदेशस्य ‘शुद्धपदार्थे’त्यस्य ब्रह्मणो विशेषणतया अन्वयस्य अयोगात्. “कार्यकारणरूपं हि शुद्धं ब्रह्म न मायिकम्” (शु.मा.२८) इत्यादौ तादृशब्रह्मणएव शुद्धपदार्थतायाः कथनात् च. अतः तद्वाक्यमेव असंगतम्.

(१) [किञ्च 'नीलघटा'दि-समास-घटक-'नीला'दि-पदैः अनीलादि-घटस्येव शुद्धाद्वैत-समास-घटक-'शुद्ध' पदेन अशुद्धाद्वैतस्य व्यावृत्तेः वाच्यतया तादृशस्य तव मते अप्रसिद्धत्वेन व्यावर्त्यालाभः. एतेन अहन्ता-ममता-पाशस्य मायाकृततायाः अत्रैव टीकाकृता उक्तत्वेन मायासम्बन्धस्य त्वन्मतेऽपि सम्भवात् तद्युक्तएव अशुद्धइति सएव व्यावर्त्यः इति परास्तम्. जीवस्य अशुद्धत्वेऽपि अद्वैत-पदार्थस्य तत्त्वाभावाद्, मायायाअपि भगवच्छक्तितया ततो अभिन्नत्वेन न परमतवद् मायासम्बन्धः किञ्च अध्यासएव मायिको न जीवः (द्र.शु.मा.प्र.२८). इति तेनैव उक्तत्वेन मायायाः तत्सम्बन्धिनो वा अशुद्धत्वस्य वक्तुम् अशक्यत्वात् च, मायाकार्या-ऽहन्ताद्यध्यासस्य कथञ्चिद् अशुद्धत्वेऽपि तद्विशिष्टस्य जीवस्य तन्मते अशुद्धत्वाभावात् च. तद्व्यावृत्तेः तदुक्त्यैव तदसम्मतत्वप्रतीतेः च. अन्यथाहि द्वैतापत्तिः, 'सर्वं खल्विदम्' (छान्दो.उप.३।१४।१) इत्यादि श्रुतिविरोधः च]

(२) ननु एवमपि 'नीलघटा'दिसमासघटक'नीला'दिपदैः अनीलादिघटस्येव 'शुद्धाद्वैत'समासघटक'शुद्ध'पदेन अशुद्धाद्वैतस्य व्यावृत्तेः वाच्यतया तादृशस्य तव मते अप्रसिद्धत्वेन व्यावर्त्यालाभः, **व्यावर्तकस्यैव विशेषणत्वाद् अन्यथा व्यर्थमेव 'शुद्ध'पदम् इति चेद्, न; नहि स्वमतसिद्धस्य सजातीयस्य व्यावर्तकतयैव विशेषणस्य सार्थक्यम् इति नियमः तादृशनियमस्वीकारे भवन्मतेऽपि "सत्यं ज्ञानम् अनन्तं ब्रह्म" (तैत्ति.उप.२।१) इत्यत्र असत्यस्य जडस्य सान्तस्य च ब्रह्मणो अप्रसिद्धत्वेन व्यावर्त्यालाभेन तादृशविशेषणत्रयस्य वैयर्थ्यापत्तिः कुतो न स्यात्? किन्तु यत्र कुत्रचित् प्रसिद्धस्य विरुद्धधर्मस्य आपाततो विशेष्ये सम्भावना, तद्व्यावृत्त्यर्थं**

विशेषणम् इति सर्वसम्मतम्. अतएव तैत्तिरीयभाष्ये " 'सत्यम्'इति यद्रूपेण यद् निश्चितं तद्रूपं न व्यभिचरति तत् 'सत्यम्' . यद्रूपेण निश्चितं यत् तद्रूपं व्यभिचरति तद् 'अनृतम्' " इति उच्यते, अतो विकारो अनृतम्. 'वाचारम्भणं विकारो नामधेयं 'मृत्तिका' इत्येव सत्यम्' (छान्दो.उप.६।१।४) एवं सदेव सत्यम् इति अवधारणात्. अतः 'सत्यं ब्रह्म' इति ब्रह्म विकाराद् निवर्तयति"(तैत्ति.उप.शां.भा.२।१।१) इति उक्तं, नतु "विकारिब्रह्मणो निवर्तयति" इति उक्तम् अतो विकारस्य कार्ये प्रसिद्धस्य ब्रह्मण्यपि सम्भावना स्यात् तन्निवृत्यर्थं 'सत्य'पदम् इति भाष्यकृताम् आशयः. ननु "सत्यं ज्ञानम् अनन्तं ब्रह्म" (तैत्ति.उप.२।१) इत्यत्र 'सत्या'दिपदानां लक्षणपरत्वं नतु विशेषणपरत्वं येन इदृशं व्यावर्तकत्वं स्याद् इति. अतएव "ननु विशेष्यं विशेषणान्तरं व्यभिचरद् विशिष्यते यथा 'नीलं रक्तं च उत्पलम्' इति.... एकमेव च ब्रह्म न ब्रह्मान्तराणि येभ्यो विशिष्येत नीलोत्पलवद्" इति पूर्वपक्षे "न; लक्षणार्थत्वाद् विशेषणानाम्" इति भाष्ये तत्पूर्वम् उक्तम् इति चेद् न, "विशेषणार्थत्वेऽपि च सत्यादीनां स्वार्थापरित्यागएव" (तैत्ति.उप.शां.भा.२।१।१) इत्यादि तदग्रिमभाष्यपर्यालोचनया 'सत्या'दिपदानां विशेषणपरत्वस्यापि भाष्यकृत्सम्मतत्वात्. अतएव तट्टीकाकृतापि " 'नीलं' 'महत्' 'सुगंधम्' इति विशेषणपदानि स्वार्थसमर्पणेन तद्विरुद्धव्यावर्तकानि प्रसिद्धानि. तथा 'सत्य'शब्दोऽपि अबाधितत्वे व्युत्पन्नः" (तैत्ति.उप.शां.भा.२।१।१) इत्यादि उक्तम्. एवञ्च परैः मायाशबलस्यैव अद्वैतब्रह्मणो जगत्कारणत्वं स्वीकृतं तद्वद् अत्रापि 'शुद्ध'पदानुक्तौ मायाशबलस्यैव कारणत्वं सम्भाव्येत अतः तद्व्यावृत्त्यर्थं 'शुद्ध' पदं सार्थकम्. एतेन इत्यारभ्य परास्तम् इत्यन्तेन आक्षेपस्तु अनंगीकारेणैव परास्तः. टीकाकृता पूर्वपक्षविधया तस्य उपन्यासं कृत्वा अग्रे

> **खण्डितत्वात्. त्वन्मतेऽपि जडब्रह्मणो अभावेन व्यावर्त्यालाभस्य समानत्वेन 'ज्ञान'पदवैयर्थ्यस्य दुर्वारत्वात्. जडब्रह्मणो अभावेऽपि ब्रह्मणि सम्भावितजडत्वव्यावृत्यर्थं तद् इति चेद्, अत्रापि मायासम्बन्धसम्भावनानिवृत्त्यर्थं 'शुद्ध'पदम् इति तुल्यम्. एतेन** जीवस्य अशुद्धत्वेऽपि अद्वैतपदार्थस्य तत्त्वाभावाद्, मायायाअपि भगवच्छक्तितया ततो अभिन्नत्वेन **इत्यादिकः प्रलापोऽपि अपास्तः. जीवे मायासम्बन्धस्य अस्मन्मते असत्त्वेन स्वयमेव मायासम्बन्धं कल्पयित्वा तद्व्यावृत्तिं च उक्त्वा पुनः तत्र आक्षेपं कुर्वन् उन्मत्तएव परमतानभिज्ञश्च.**

(३) अथ सहस्राक्षे किञ्च नीलघटादिसमासः इत्यादिना श्रुतिविरोधश्च इत्यन्तेन आपादितं 'शुद्ध' पदव्यावर्त्यालाभम् अंशतो अनूद्य परिहरन्ति **ननु एवमपि नील**...इत्यादिना **परमतानभिज्ञश्च** इत्यन्तेन. **नहि स्वमत**... इति, अतएव तार्किकाणां "**शब्दगुणकम् आकाशम्**" (त.सं.प्र.२) इति आकाशलक्षणे तन्मते 'गुणातिरिक्त'शब्दाभावेन स्वमते 'गुण'पदव्यावर्त्यालाभेऽपि भाट्टैः शब्दे द्रव्यत्वस्य अंगीकारात् तन्निरासाय 'गुण' पदम् इति सिद्धान्तचन्द्रोदयकारादयो बहवः. एवं "**द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाया-ऽभावाः सप्तपदार्थाः**" इत्यत्र स्वमते सप्तातिरिक्तपदार्थस्य अप्रमिततया अधिकसंख्यारूपव्यावर्त्यालाभेऽपि पराभिमतशक्तिसादृश्यादिकम् आदाय अधिकसंख्याव्यवच्छेदार्थं तद् इति वदन्ति. तथा षट्पदार्थवादेऽपि वैशेषिकसूत्रोपन्यासे "**द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायानाम्**" (वैशे.सू.१।१।४) इत्यत्र "**षडेव पदार्थाः इति नियमः पर्यवस्यति**" इति उक्त्वा "**सच अनुपपन्नः व्यवच्छेद्यस्य पदार्थान्तरस्य प्रतिपत्तौ नियमानुपपत्तिः अप्रतीतौ व्यवच्छेदानुपपत्तिः**" इत्यादिना आक्षिप्य "**शक्ति-संख्या-सादृश्यादिषु पदार्थेषु पराभिमतेषु षड्लक्षणायोगः परैः उच्यते तद्व्यवच्छेदो नियमार्थः**" (वैशे.सू.उप.१।१।४) इति शक्त्यादीनां स्वमते अप्रसिद्धत्वेऽपि पराभिमतानां तेषां व्यवच्छेदो दर्शितः. एवं सांख्यग्रन्थेष्वपि

“**दृष्टम् अनुमानम् आप्तवचनं च सर्वं प्रमाणसिद्धत्वात् त्रिविधं प्रमाणम् इष्टं, प्रमेयसिद्धिः प्रमाणाद्धि**” (सां.त.कौ.४) इत्यत्र स्वमते त्र्यधिकप्रमाणाभावाद् व्यावर्त्यालाभेऽपि नैयायिक-मीमांसका-ऽऽलंकारिकाद्यभिमतचतुः-षडऽष्टप्रमाणपक्षव्यावर्तकं त्रिविधम् इति विशेषणम्. अतएव एतद्व्याचक्षाणो वाचस्पतिमिश्रः “**संख्याविप्रतिपत्तिं निराकरोति त्रिविधम् इति**” (सां.त.कौ.४) इत्यादि आह एवं नैरुक्त-वैयाकरणादिग्रन्थेष्वपि “**भावप्रधानम् आख्यातं सत्त्वप्रधानानि नामानि**” (निरु.१।१।१) इत्यादौ विशेषणानां स्वमते व्यावर्त्यलाभालाभौ दृश्यौ तथा कठ-गीतादिश्रुति-स्मृतिष्वपि “**अजो नित्यः शाश्वतो अयं पुराणो**” (कठोप.१।२।१८,भग.गीता २।२०) इत्यादि जीवविशेषणानां स्वमते व्यावर्त्यालाभाद् वैयर्थ्यं न अपेयात्. श्रुति-स्मृतिषु भावविकारयुक्तजीवस्य अप्रसिद्धेः. अथ देहादौ भावविकाराणां प्रसिद्धतया जीवेऽपि ते सम्भाव्येरन् अतः तद्व्यावर्तनार्थानि तानि न अपार्थानि इति चेत्, प्रकृतेऽपि लोके मायासम्बन्धविशिष्टं कार्यकारणयोः अद्वैतं भवदभिप्रेतम् ‘अद्वैत’शब्देन सम्प्रति सम्प्रतीयते इति तद्व्यावर्तनार्थम् अद्वैते ‘शुद्धम्’ इति विशेषणं सार्थकमेव. अनेकत्र एतत्सुलभमेव इति तत्र - तत्र स्वयमेव द्रष्टव्यम्. किञ्च किम् अनेन शास्त्रान्तरोदाहरणान्वेषणेन ? सर्वप्रमाणमूर्धन्यायां श्रुतावपि स्वमतप्रसिद्धविशेष्यसजातीयव्यावर्त्यशून्यानि विशेषणानि भावत्कभाष्यस्थतादृशव्याख्यानविशिष्टानि सन्त्येव अतो न त्वया तादृशनियमः शक्यो अभ्युपगन्तुम् इति आशयेन आहुः **तादृशनियमः** इत्यादिना. “**सत्यं ज्ञानम् अनन्तं ब्रह्म**” (तैत्ति.उप.२।१।१) इति. इदं तैत्तिरीयब्रह्मवल्लीवाक्यं **तैत्तिरीयभाष्ये** इति श्रीशङ्कराचार्यकृते तैत्तिरीयोपनिषद्भाष्ये **सत्यम् इति** इत्यादिः **निवर्तयति** इत्यन्तः तत्रत्य भाष्यग्रन्थः. ननु **विशेष्यम् विशेषणम्** इत्यादेः भाष्यस्थपूर्वपक्षस्य अनुवादः **उत्पलम् इति** इत्यतः अग्रिम् **‘एकमेव च’** इत्यतः प्राक्तनो मध्यमो ग्रन्थः प्रकृते विशेषतः उपयोगस्य अभावाद् न अन्ववादि. **तत्पूर्वम्** इति लक्षणपरत्वम् अनूदितचरव्याख्यानतःपूर्वं तत्र भाष्ये उक्तम्. **तट्टीकाकृता** इति उपनिषद्भाष्यटीकाकृता आनन्दज्ञानेन. विशेषणपरत्वमपि तत्र स्फुटं ततो अवधेयम्. प्रकृते ‘शुद्ध’पदव्यावर्त्यम् आहुः **एवञ्च परैः** इत्यादिना. **मायाशबलस्यैव कारणत्वम्** इति उपलक्षणम्.

अविद्यापरपर्यायमलिनसत्त्वमायोपहितस्यैव जीवत्वेन कार्यत्वं, मायिकस्यैव प्रपञ्चस्य कार्यत्वञ्च परैः उक्तम् इति भावः. तथाच मायासम्बन्धरहितकार्यकारणरूपं ब्रह्मैव इति अपरोक्षज्ञानं ब्रह्मरूपं ‘शुद्धाद्वैत’शब्दार्थः. एवमेव ‘शुद्ध’पदस्य व्यावर्त्यं गोस्वामिश्रीगिरिधरैः शुद्धाद्वैतमार्तण्डे ‘‘अत्रैव शांकराः प्राहुः ‘मायिकं नश्वरं जगद्’’’ (शु.मा.२२) इत्यादिना. ‘‘इति ब्रह्मविदां हार्दं शुद्धाद्वैतं श्रुतेः मतम्’’ (शु.मा.२९) इत्यन्तेन परोक्तानुवादपुरःसरं दर्शितम्. तट्टीकायां च रामकृष्णभट्टैः ‘‘एवम् अद्वैतपदार्थं निरूप्य ‘शुद्ध’पदव्यावर्त्यम् आहुः’’ (शु.मा.टी.२२) इत्यादिना ‘‘एवञ्च श्रुतिषु सर्वस्य शुद्धाद्वयत्वं स्पष्टम् अतः श्रुतेः मतम् इत्यर्थः’’ (शु.मा.टी.२९) इत्यन्तेन स्फुटीकृतम्. एवं सत्यपि व्यावर्त्यालाभं वदन् वृथादोषारोपकएव इति निर्मत्सरैः उभयग्रन्थचिन्तकैः अवगंस्यते.

आक्षेपान्तरं परिहरन्ति **एतेन** इत्यादिना **इत्यन्तेन** इति कृतः इति शेषः. **अनंगीकारेण** इति सिद्धान्ते जीवे मायासम्बन्धस्य अनंगीकारेण, **टीकाकृता** इत्यादि, मार्तण्डे ‘‘मायासम्बन्धरहितम्’’ (शु.मा.२८) इत्यस्य टीकायाम्. ‘‘नच अहन्ता-ममतापाशस्य मायाकृतत्वेन मायासम्बन्धस्य स्वमतेऽपि सम्भवः इति वाच्यम्’’ इति पूर्वपक्षत्वेन जीवे मायासम्बन्धस्य उपन्यासं कृत्वा अग्रे ‘‘स्वमते मायायाअपि’’ (शु.मा.टी.२८) इत्यादिना स खण्डितो, अतः तदनंगीकार इति भावः. **व्यावर्त्यालाभस्य** इति स्वमतप्रसिद्धं यद् व्यावर्त्यं तदलाभस्य इति अर्थः. सांख्यमतेतु ‘ब्रह्म’शब्दवाच्यं जडं प्रधानं प्रसिद्धम् इति तदनुरोधादेव प्रकृतब्रह्मणि जडत्वसम्भावनोदयः. तथा अत्र त्वन्मतप्रसिद्धम् अद्वैतम् आदाय कार्यकारणयोः मायासम्बन्धः सम्भाव्येत इति हृदयम्. अत्र सहस्राक्षे तद्युक्तएव अशुद्धः इति सएव व्यावर्त्य इति इत्यत्र क्लीबनिर्देशो अपेक्षितः मायासम्बन्धयुक्तमेव अद्वैतम् अशुद्धम् अतः तादृशम् अद्वैतमेव व्यावर्त्यम् इति तदर्थात्. नच जीवइति विशेष्याध्याहाराद् अदोषः इति वाच्यम्. कार्यकारयोः मायासम्बन्धराहित्यं वदद्भिः अस्माभिः जीवमात्रस्य व्यावर्त्यतायाः अनुक्ततया तस्याः अनुपस्थितेः. नीलघटादिविशेषण‘नीला’दिपदैः अनीलघटादीनां व्यावृत्तिं दर्शयता त्वया

अद्वैतविशेषण‘शुद्ध’पदेन जीवस्य व्यावृत्तेः वक्तुम् अशक्यत्वाच्च. अथ जीवस्यैव अद्वैतपदार्थत्वाद् न अयुक्तो अध्याहारः इति चेद्, ‘‘जीवस्य अशुद्धत्वेऽपि’’ इत्यादि अग्रिमस्वग्रन्थविरोधः जीवाशुद्धतायाः स्वयम् उक्ततया व्यावर्त्यलाभः च. एतेन ‘तद्युक्तो वादी’त्यादिपुल्लिंगविशेष्यान्तराध्याहृतिरपि निरस्ताः अनुपस्थितेः, अद्वैतविशेषणेन वाद्यादेः व्यावर्तनस्य वक्तुम् अनौचित्यात् च. क्लीबनिर्देशे अनायासेन अद्वैतविशेषणतायाः बोधेऽपि बलात् पुल्लिंगानि विशेषणमात्राणि अभिधाय ‘अद्वैतपदार्थः’ इति तदनुकूलविशेष्याध्याहारस्तु आहोपुरुषिकामात्रम्. यच्च जीवस्य अशुद्धत्वेऽपि अद्वैतपदार्थस्य तत्त्वाभावाद् इति उक्तं तद् न, ‘‘**कार्योपाधिः अयं जीवः कारणोपाधिः ईश्वरः**’’ इति मायासम्बन्धवतोरेव कार्यकारणत्वांगीकारे तयोः अद्वैतेऽपि तद्वत्तानपायात्. ‘अद्वैत’पदस्य भेदज्ञानाभावः इति अर्थे सामानाधिकरण्यसम्बन्धेन अभेदज्ञानम् इति अर्थे विषयतादिसम्बन्धेन तस्मिन् मायासम्बन्धसाहित्यस्य सिद्धेः. नच ‘‘**‘द्वैत’शब्देनच द्वाभ्यां प्रकाराभ्याम् इतं ज्ञातं द्वीतं तस्य भावो ‘द्वैतम्’ इति व्युत्पत्त्या नामरूपे उच्येते तद्रहितञ्च ‘अद्वैत’शब्देन**’’ (ल.मञ्जू.बौ.नि.) इति मञ्जूषाद्युक्त्यनुरोधेन ‘‘नास्ति द्वैतं यस्मिन्’’ इति विग्रहेण निर्विशेषम् ‘अद्वैत’पदवाच्यम् अतः तथा उक्तम् इति वाच्यं निर्विशेषे वाच्यतायाः अनंगीकारात्. ‘अद्वैत’पदलक्ष्यत्वे तद्वाच्यम् अन्यद् वक्तव्यं तच्च मायासम्बन्धवदेव सेत्स्यति.

किञ्च निर्विशेषपरत्वेऽपि तदेकदेशे माया स्वीक्रियतएव. यत्र प्रतिबिम्बितं यदवच्छिन्नं वा चैतन्यं कर्तृताम् आपद्येत, यतश्च सृष्टिः स्यात्. अन्यथा पुनः सृष्ट्युच्छेदः प्रसज्येत. तस्याः तदेकदेशवर्तित्वन्तु ‘‘**न कृत्स्नब्रह्मवृत्तिः सा शक्तिः किन्तु एकदेशभाक् घटशक्तिः यथा भूमौ स्निग्धमृद्येव वर्त्तते. ‘पादोऽस्य सर्वभूतानि त्रिपादस्ति स्वयंप्रभः’ इति एकदेशवृत्तित्वं मायायाः वदति श्रुतिः**’’ (पञ्चद.२।५४-५५) इति विद्यारण्यादयो भावत्काः. तथाच बलाद् आपतितः तत्रापि मायासम्बन्धः. तस्माद् भवदभिमतमायासम्बन्धसहिताद्वैतव्यावर्तनार्थं ‘शुद्ध’पदम् इति निरवद्यम्. यत्तु ‘**मायासम्बन्धरहितम्**’ इत्यस्य टीकास्थं मायायाअपि इत्यादिकिञ्चित् पाठभेदेन अनूद्य मायायाः

तत्सम्बन्धिनो वा अशुद्धत्वस्य वक्तुम् अशक्यत्वात् च इत्यादि श्रुतिविरोधः च इत्यन्तम् उत्स्वप्नायितं तत्र ब्रूमः. मार्तण्डेहि "अत्रैव शांकराः प्राहुः मायिकं नश्वरं जगद् मायासम्बन्धतो ब्रह्म कारणं न अन्यथैव हि" (शु.मा.२२) इति परोक्तानुवादे मायोपाधिसम्बन्धादेव ब्रह्मणः कारणत्वं नतु तं विना इति तेषाम् आशयो दर्शितः. तेन "मायासम्बन्धरहितं शुद्धम् इति उच्यते बुधैः कार्यकारणरूपं हि शुद्धं ब्रह्म न मायिकम्" (शु.मा.२८) इत्यत्र 'मायासम्बन्ध'पदेन कारणे अनन्यथासिद्धकारणभावनिर्वाहकएव उपाधिभावरूपः तत्सम्बन्धो हेयतया विवक्षितः. एवं कार्येऽपि जीवे अनन्यथासिद्धकार्यभावनिर्वाहकएव उपाधिभावरूपः स तथात्वेन विवक्षितः. तथासत्येव कार्यकारणयोः अशुद्धत्वम्. कार्यत्वकारणत्वयोः मायासम्बन्धैकहेतुकत्वात्. एवं प्रपञ्चेऽपि "**अस्ति भाति प्रियं रूपं नामचेति**" (सि.ले.सं.२।८) अंशपञ्चके तन्मते नाम-रूपयोः मायिकत्वमेव. स्वमतेतु कार्ये कारणे च न उक्तविधः तत्सम्बन्धः. ब्रह्मैव स्वेच्छया जीवादिरूपेण परिणमति इति अंगीकारात्. नामरूपयोरपि भगवन्निष्ठयोरेव व्याकरणस्य ऊरीकारात्. 'माया'शब्देनच अत्र सदसत्त्वाभ्यां विलक्षणम् अज्ञानमेव पराभिमतं विवक्ष्यते प्रकरणाद्, नतु भगवदभिन्ना स्वाभाविकी तच्छक्तिः. शक्ति-शक्तिमतोः अभेदेन सम्बन्धायोगात्, शक्ति-शक्तिमद्भावस्य जिज्ञासुबोधनार्थत्वात्. एतच्च पुरस्तात् प्रपञ्चयिष्यते. अत उक्तविधाज्ञानसम्बन्धाभावात् कारणं न अशुद्धम्. जीवोऽपि भगवदंशः तदिच्छया व्युच्चरणात् ततः पृथग्भूतः. तस्य जीवभावो इच्छया व्युच्चरणाद् नतु अविद्योपाधिकृतः. एवं प्रपञ्चोऽपि न मायिकः. अतः पराभिमताज्ञानसम्बन्धाभावात् कार्यमपि न अशुद्धम् इति मार्तण्डकारिकाशयः. एवञ्च "**परास्य शक्तिः**" (श्वेता.उप.६।८) इत्यादिश्रुत्या परस्य स्वाभाविकशक्तेः मायायाः पररूपतया न अशुद्धत्वम्. भावरूपाज्ञानापरपर्यायमायायाः तत्सम्बन्धतएव कारणत्वशालिनः च अशुद्धत्वन्तु वक्तुं शक्यमेव. यद्यपि देहाद्यध्यासो मायिकः तथापि जीवो न अशुद्धः, स्वरूपस्य मायामूलकत्वाभावात्. त्वन्मतेतु जीवभावएव अविद्यामूलकइति सो अशुद्धः. यथा काञ्चनपाञ्चालिकोपरि परितो मषीसलिललापनेऽपि न सा स्वरूपतो मलिना भवति. प्रक्षालनादिना तदपसारणे शुद्धपुत्तलिकास्वरूपोपलब्धेः

कज्जलजलमिलितमृत्स्नाकलितकृत्स्नावयवा तु सा स्वरूपतो मलिनैव. अतएव ततो मषी न अपसारयितुं शक्या. कथञ्चिद् अपसारणेऽपि तस्याः स्वरूपनाशएव. नहि कज्जलापलोपनोत्तरं सा ‘पुत्तलिका’पदाभिलप्या अवतिष्ठते. एवम् अध्यासनिरासे शुद्धं जीवस्वरूपम् अस्मन्मते प्रकाशतइति तत्स्वरूपं न अशुद्धम्. भवन्नयेतु अविद्याध्वंसे जीवस्वरूपहानिरेव शुद्धचैतन्यस्य जीवपदानभिलप्यत्वात्. अतो जीवस्वरूपम् अशुद्धमेव. ननु अस्तु एवं तथापि अस्मत्सम्मताज्ञानसम्बन्धस्य तद्विशिष्टकार्यकारणयोः च अशुद्धत्वं कुतः? इति चेत्; तावकैरेव तस्य मोक्षविरोधितायाः तदुच्छेदाय साधनानाम् उपयोगस्य च कथनाद् इति जानीहि. तस्य शुद्धत्वेतु मोक्षेऽपि सो अवतिष्ठतां कृतं तदुच्छेदप्रयासेन. कार्यकारणयोः अशुद्धत्वादेव त्वन्मते **“कार्योपाधिः अयं जीवः कारणोपाधिः ईश्वरः. कार्यकारणतां हित्वा पूर्णबोधोवशिष्यते”** (शुकर.उप.४२) इति तद्भावत्यागः उच्यते. प्रपञ्चस्यतु मायिकत्वात् तन्नाशएव मोक्षस्य अंगीकारात् च अशुद्धत्वं स्पष्टमेव. मन्मते ब्रह्मणएव सर्वकार्यात्मना आविर्भूतत्वात् न द्वैतापत्तिगन्धो नापि “**सर्वं खलु**” (छान्दो.उप.३।१४।१) इत्यादिश्रुतिविरोधगन्धः. किन्तु तवैव तद्विरोधः तदापत्तिः च. सर्वस्य मिथ्यात्वेन ब्रह्मणः च सत्यत्वेन सर्वस्य ब्रह्मत्वानुपपत्तेः तेजस्तिमिरयोरिव मिथ्यासत्यवस्तुनोः अभेदस्य असम्भवात् च. ननु सर्वस्य मिथ्यात्वेन द्वितीयस्य अभावाद् द्वैतापत्तिस्तु न भवति इति चेद्; अध्यासस्य अब्रह्मत्वेऽपि तस्य मिथ्यात्वाद् मन्मतेऽपि न सा इति सन्तोष्टव्यम्. तदेतत् सर्वम् उरसि कृत्याहुः **एतेन जीवस्य** इत्यादिना.

(१) [एतेन शङ्कराचार्यवद् अद्वैतं न मम सम्मतम् इति बोधनमेव इतर-निवृत्तिः इति प्रत्युक्तम्, अन्वयासम्भव-व्यावर्त्यालाभयोः दर्शितत्वात्.

किञ्च एवम् अद्वैते शुद्धत्वं विधीयते इति आयाति. एवञ्च एक-प्रसरताभंग-भयादपि न समासोपपत्तिः. एवञ्च ननु अद्वैतपदार्थस्य तदुक्तार्थत्वे भवतु अन्वयानुपपत्तिः, नास्ति द्वैतं यस्मिन् इत्यर्थकत्वेतु न

सा इत्यपि अपास्तम्, एक-प्रसरताभंग-प्रसंगात्. अशुद्धाद्वैताभावेन व्यावर्त्यालाभात् च. किञ्च शङ्कराचार्यमते अद्वैतज्ञानात् पूर्वमपि ब्रह्मणः शुद्धत्वमेव. त्वन्मते स्वाभिन्नायाः मायायाः सम्बन्धो अस्ति. तन्मते तस्यापि मिथ्यात्वेन सोऽपि न इति तन्मतेएव शुद्धाद्वैतं स्यात्. एवञ्च 'एतन्मते' (शु.मा.२६)इत्यादि असम्मतम् सांकर्यस्य तन्मते अभावात्.]

(२) **किञ्च** शङ्कराचार्यवद् अद्वैतं न अस्माकं सम्मतम् इति बोधनम**पि 'शुद्ध'पदस्य फलं व्यावर्त्यलाभाऽन्वयसम्भवौ च दर्शितौ तेन** ...व्यावर्त्यालाभयोः **इत्यादिदत्तोत्तरम्. यत्तु** किञ्च एवम् अद्वैते शुद्धत्वं विधीयते इति आयाति एवञ्च एकप्रसरताभंगभयादपि न समासोपपत्तिः. एवञ्च ननु अद्वैतपदार्थस्य तदुक्तार्थकत्वे भवतु अन्वयानुपपत्तिः **इत्यादि उक्तं तद् न, एकप्रसरताभंगे एकवाक्यताभंगः. सच अद्वैते शुद्धत्वविधानेऽपि न सम्भवति. अन्यथा ''राज्ञः पुरुषः'' इत्यत्रापि समासो न स्यात्. तत्रापि पुरुषे राजसम्बन्धस्यैव विधेयत्वात्. अतएव उक्तं ''भेदः संसर्गः उभयं च इति वाच्यव्यवस्थितेः इति'' (वै.भू.३१)**

(३) सहस्राक्षे एतेन शङ्कराचार्यवद्...इत्यादिभागं दूषयन्ति **किञ्च शङ्कराचार्यवद्** इत्यादिना. सहस्राक्षे 'एव'कारः 'शुद्ध'पदप्रयोगस्य प्रयोजनान्तरव्यवच्छेदार्थः. मूलेतु उक्तरीत्या मायासम्बन्धरहितकार्यकारणात्मकत्वबोधनं ततएव शङ्कराचार्यसम्मताद्वैताद् वैलक्षण्यबोधनञ्च तत्प्रयोजनम् इति ज्ञापनाय समुच्चयार्थो 'अपि'शब्दः प्रयुक्तः. सहस्राक्षकृतापादितम् एकप्रसरताभंगम् अनूद्य परिहरन्ति. यत्तु **किञ्च** इत्यादिना **इत्यादि उक्तम्** इति. 'आदि'पदेन व्यावर्त्यालाभाच्च इत्यन्तः तद्भागो गृह्यते. **एकवाक्यताभंगः** इति. नैयायिकमीमांसकादिसाधारण्येन एतद् उक्तम्.

वैयाकरणाभिप्रेतन्तु अग्रे वक्ष्यते. नैयायिकादिभिः हि वाक्यादिव समासादिवृत्तेरपि आकाङ्क्षासहकृतया वृत्तिघटकपृथक्-पृथक्पदजन्य-पदार्थोपस्थित्यैव शाब्दबोधः स्वीक्रियते नतु विशिष्टे शक्तिः. तथाच वाक्यइव समासेऽपि उद्देश्यविधेयभावः तन्मते न अनुपपन्नः. शाब्दिकानाम् अवयवशक्तिसहकृतया समुदायशक्त्या वृत्तिस्थले शाब्दबोधः इति पक्षेऽपि आर्थिकः सो अस्त्येव इति वक्ष्यामः. **विधानेऽपि** इति '**अपि**'शब्दः कैमुतिकद्योतनार्थः. तेन विधानांगीकारेऽपि न दोषः. किमुत शुद्धत्वविशिष्टाद्वैतस्य स्वातन्त्रेण विधानांगीकारे **न स्याद्** इति. एकप्रसरताभंगभयाद् न स्याद् इति भावः. **विधेयत्वाद्** इति "**नच यद्वृत्तयोगः प्राथम्यम् इत्यादि उद्देश्यलक्षणं, तद्वृत्तयोगः पश्चात्त्वं स्याद् विधेयस्य लक्षणम्**" इति अभियुक्तोक्तेः अनन्तरोपात्तपुरुषदार्थे प्रथमोपात्तराजपदार्थतत्सम्बन्धस्य विधेयत्वम् अनुपपन्नम् इति वाच्यं; तस्याः प्रायिकतायाः "**भावप्रधानम् आख्यातं सत्त्वप्रधानानि नामानि**" (निरु.१।१।१) "**वृद्धिरादैच्**" (पाणि.सू.१।१।१) "**अपृक्तएकाल्प्रत्ययः**" (पाणि.सू.१।२।४१) "**समर्थः पदविधिः**" (पाणि.सू.२।१।१) "**योगः चित्तवृत्तिनिरोधः**" (पातं.यो.सू.१।२) "**औत्पत्तिकस्तु शब्दस्य अर्थेन सम्बन्धः**" (जै.मी.सू.१।१।५) "**समं तु तत्र दर्शनं**" (जै.मी.सू.१।१।१२) "**तुल्यं च साम्प्रदायिकम्**" (जै.मी.सू.१।२।८) इति निरुक्त-पाणिनीय-पातञ्जल-जैमिनीयादिषु प्रयोगदर्शनतो अवधारणात्. दर्शितञ्च इदं "पण्डितो ब्राह्मण" इत्यादौ '**यद्वृत्त...**'इति नियमव्यभिचारं प्रदर्श्य "**अतएव वृद्धैरपि यद्वृत्तयोगः प्राथम्यम् इत्यादि उद्देश्यलक्षणम् इत्यत्र 'आदि'पदोपादानेन अस्या अनैयत्यं सूचितम्**" (   ) इति प्राचीनमतम् उदाहरता मञ्जूषाकृता. किञ्च नहि वैयाकरणैरपि समासादौ अन्तर्वर्तिविभक्त्यर्थस्य संसर्गमर्यादयैव भानम् अंगीक्रियते येन अविधेयत्वं तस्य आशङ्क्येत अपितु प्रकारतयापि इति अभिप्रेत्य आहुः **अतएव उक्तम्** इति, भूषणे "**जहत्स्वार्था-ऽजहत्स्वार्थे द्वे वृत्ती ते पुनः त्रिधा. भेदः संसर्गो उभयं च इति वाच्यव्यवस्थितेः**" (वै.भू.३०-३१) इति उक्तम् इति अर्थः. एतदर्थस्तु जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था. 'धनं'-'वनमि'-त्यादिपदेषु 'धकारा'दिवर्णानामिव 'राजपुरुष'इत्यादिवृत्तौ तद्घटक'राजा'दिपदानाम् आनर्थक्यम्. अयं भावः : समासशक्त्यैव

'राज'विशिष्ट'पुरुष'बोधे सम्भवति न 'राज'-'पुरुष'पदयोरपि पुनः तद्बोधकत्वं कल्प्यम्. आनुपूर्व्यन्तरघटकत्वाभावविशिष्टानुपूर्व्याएव शक्ततावच्छेदकतया 'वृषभा'दिपदघटकवृषाद्यानुपूर्व्याः शक्ततानवच्छेदकत्ववत्समासान्तर्गतराजाद्यानुपूर्व्याः शक्ततावच्छेदकत्वासम्भवात्. अन्यथा 'रामा'दिपदात् तत्तदवयवरेफाद्यभिधेयवन्ह्याद्यर्थोपस्थितिशाब्दबोधौ आपद्येताम्. एकवचनम् उत्सर्गतः करिष्यते इति औत्सर्गिकस्य अवान्तरसोः रुत्वोत्पत्तिः, 'धनं' 'वनम्' इत्यादौ जश्त्वादिकं च आपद्येत. वाक्येतु पदानामेव अर्थवत्त्वम्. 'राज'सम्बन्धि'पुरुष'इत्याद्यर्थे "राज्ञः पुरुषः", "पुरुषो राज्ञः" इत्यादि विशिष्टतत्तदानुपूर्वीणां पृथक्पृथक् शक्ततावच्छेदकत्वकल्पनापेक्षया पदशक्तिकल्पनायाएव लघीयस्त्वात्. वाक्यवद् वृत्तावपि व्यपेक्षांगीकारेतु 'राज'पदेन विग्रहवाक्यइव राज्ञः स्वातन्त्र्येण उपस्थितिसम्भवाद् वाक्ये "ऋद्धस्य राज्ञः पुरुषः" "राज्ञः पुरुषो भार्यायाः च" इत्यादिवद् "ऋद्धस्य राजपुरुषः" "राजपुरुषो भार्यायाः च" इत्यपि प्रयुज्येत. विशिष्टशक्तिस्वीकारेतु 'राज'इत्यस्य पदार्थैकदेशत्वादे भेदेऽपि शक्तेः वक्ष्यमाणतया अराजकीयभिन्नइति बोधात् च न उक्तदोषप्रसंगः. **अजहद्**...इति. न जहति पदानि स्वार्थं यस्यां सा अजहत्स्वार्था. अयम् आशयः : 'राजपुरुषा'दिसमासस्थले क्लृप्तप्रत्येकपदशक्त्यतिरिक्ता शक्तिः न कल्प्याः विशिष्टशक्तिकल्पकस्य अन्यथानुपपत्त्यादेः अभावाद्, विग्रहवाक्यइव क्लृप्तशक्त्यैव बोधसम्भवे शक्त्यन्तरकल्पने गौरवात् च. वाक्ये अवश्यक्लृप्तप्रत्येकपदशक्तेः त्यागे मानाभावात् च. कालभेदेनापि एकस्यैव 'राजा'दिशब्दस्य अर्थवत्त्वा-ऽनर्थवत्त्वे कल्पनामात्रमूलके. 'राज'शब्दादेः अर्थवत्त्वाभावे अप्रातिपदिकत्वेन लोपशास्त्राप्रवृत्त्या न लोपाद्यनुपपत्तिश्च. एवं 'महाबाहुः' इत्यादौ समानाधिकरण'महच्छ'ब्दाभावाद् आत्वाद्यसम्भवश्च. तस्माद् वृत्तावपि वाक्यइव क्लृप्तशक्त्यैव विशिष्टार्थोपस्थितिः इति संक्षेपः. नच अस्मिन् पक्षे "ऋद्धस्य राजपुरुषः" इत्यादिप्रयोगापत्तिः शंक्या **"सविशेषणानां वृत्तिः न वृत्तस्य वा विशेषणयोगो न"** (पाणि.सू.वा.२।१।१) इति वार्तिककृता प्रतिषेधात्. यद्यपि वैयाकरणाभिप्रेतम् अजहत्स्वार्थास्वरूपम् अन्यदेव भाष्यादौ दर्शितं तथापि अयं व्यपेक्षापक्षो महाभाष्ये समर्थसूत्रे **"परस्परव्यपेक्षां सामर्थ्यम् एके"** (पाणि.सू.वा.२।१।१) इत्यादिना मतान्तरतया

संगृहीतः इत्यत्रापि स व्याख्यातः. ते पुनः त्रिधा इति. ते द्वे अपि वृत्ती पुनः त्रिविधे भेदः संसर्गः तदुभयं च इति वाच्यस्य त्रिविधस्य मतभेदेन व्यवस्थितत्वात्. तत्र भेदो अन्योन्याभावः. तथाच 'राजपुरुष'इत्यादौ अराजकीयभिन्नः इति बोधः. भेदस्य अवाच्यत्वे "राजपुरुषः सुन्दरः" इत्यादिवद् "राजपुरुषो भार्यायाः च" इत्यपि प्रयुज्येत. अथवा राजसम्बन्धवान् इत्येव शाब्दं भानं, भेदस्तु पश्चाद् उपतिष्ठते इति आशयेन उक्तं संसर्गइति. भेदाविनाभावित्वाद् अनुमापकः तन्मूलकः सम्बन्धः. अथवा निगमनाविरहाद् अस्वामिके अन्यस्वामिके वा 'राजपुरुषः'इत्यादि प्रयोगापत्तेश्च तदुभयं वाच्यम् इति आशयेन उक्तम् **उभयं च** इति. तथाच अराजकीयभिन्नो राजसम्बन्धवान् इति बोधइति भूषणादेः संक्षेपः. तदेतत् सर्वम् उक्तं समर्थसूत्रे भाष्ये. तद्यथा "**अथ वा समर्थाधिकारो अयं वृत्तौ क्रियेत. सामर्थ्यञ्च नामभेदः संसर्गो वा. अपर आह भेदसंसर्गौ वा सामर्थ्यम् इति. कः पुनः भेदः संसर्गो वा? इह 'राज्ञ'इति उक्ते सर्वं स्वं प्रसक्तं, 'पुरुष'इति उक्ते सर्वः स्वामीप्रसक्तः. इह इदानीं "राजपुरुषम् आनय" इति उक्ते राजा पुरुषं निवर्तयति अन्येभ्यः स्वामिभ्यः, पुरुषोऽपि राजानम् अन्येभ्यः स्वेभ्यः**" (पातं.महाभा.२।१।१) इति. अत्र कैयटः "**यदि च वृत्तौ भेदसंसर्गौ न स्यातां तदा सामर्थ्यमेव न स्यात् तदात्मकत्वात् सामर्थ्यस्य**" (पातं.महाभा.प्र.२।१।१) इति अर्थः. तत्र भेदः संसर्गाविनाभावित्वाद् अनुमीयमानसंसर्गः सामर्थ्यम्. संसर्गो वा भेदाविनाभाव्यनुमेयभेदः उभौ वा यौगपद्येन आश्रीयमाणौ सामर्थ्यम् इति अर्थः. **सर्वस्वम्** इति 'राज्ञः'इति षष्ठ्या सम्बन्धिमात्रस्य आक्षेपात्. **सर्वः स्वामि**...इति. यदातु पुरुषस्य पारतन्त्र्यं प्रमाणान्तरेण अवगतं तदपेक्षया एतद् उच्यते. अन्यथा 'पुरुषः'इति उक्ते अस्ति इति प्रतिपत्तिः स्याद् नतु स्वामिमात्राक्षेपः. तत्र भेदपक्षे राजा पुरुषं स्वाम्यन्तरेभ्यो निवर्त्य स्वार्थं जहाति. पुरुषस्तु अजहदपि स्वार्थं स्वान्तरेभ्यो निवर्तयति राजानं ततश्च कृतकार्यस्य भवतु राजार्थस्य निवृत्तिः. अकृतकार्यस्य निवृत्तौ वृत्तिरेव न स्यात्. एवं संसर्गेऽपि योज्यम् इति व्याचष्टे. अत्र उद्योतकारः "**तत्र भेदः इति, स्वत्वसमानाधिकरणो राजभिन्नस्वामिकभेदो राजसंसर्गव्याप्यः. एवं वृत्त्युपस्थाप्यराजसम्बन्धवद्**

व्यक्तिगतराजसम्बन्धो राजभिन्नस्वामिकभेदव्याप्यः इतिभावः. एवञ्च भेदवद्व्यक्तिबोधे सा राजसंसर्गवत्यपि इति तद्वती व्यक्तिरपि बुध्यतएव. एवम् इतरत्रापि इति तात्पर्यम्. उभौ वा यौगपद्येन इति. अयं भावः : उक्तरीत्या उभयोः समनियतत्वेन विनिगमनाविरहः इति. एवञ्च भेदवदर्थप्रत्यायकत्वं सामर्थ्यम्'' (पातं.महाभा.उद्यो.२।१।१) इति व्यवृणोत्. एवं प्रकृतेऽपि अद्वैते अशुद्धभेदः शुद्धत्वं तदुभयं वा अवगम्यते इति अनवद्यम्.

> (२) तत्र व्यपेक्षावादिनां नैयायिकमीमांसकादीनां मते अजहत्स्वार्थावृत्तिः, अतो राजलक्ष्यराजसम्बन्धिनः 'पुरुष'पद-शक्यपुरुषत्वावच्छिन्नाभेदान्वये राजसम्बन्धी पुरुषः इति वाक्यार्थस्वीकारेण राजसम्बन्धः पुरुषे बोध्यते. एकार्थीभाव-स्वीकर्तॄणां वैयाकरणानां मते समासे शक्त्यस्वीकारे तस्य अर्थवत्त्वाभावेन प्रातिपदिकसंज्ञा न स्यात्. अतः समासस्यैव अर्थवत्त्वेन पदार्थस्य अप्रयोजकत्वाद् न पदस्य अर्थवत्त्वम् अतो जहत्स्वार्थावृत्तिः तैः स्वीक्रियते. तन्मतेऽपि राजसम्बन्धविशिष्टपुरुषस्य वाक्यार्थत्वेऽपि पुरुषे राजसम्बन्ध-बोधो अर्थसिद्धएव.

(३) सर्वमतेष्वपि प्रकृते दोषाभावं समर्थयन्ते तत्र...इत्यादिना. तत्र जहत्स्वार्था-ऽजहत्स्वार्थापक्षयोः मध्ये. व्यपेक्षावादिनाम् इति, समर्थसूत्रे भाष्ये ''तथा इदम् अपरं द्वैतं भवति, एकार्थीभावो वा सामर्थ्यं स्याद् व्यपेक्षा वा इति'' (पातं.महाभा.२।१।१) इति द्विविधं सामर्थ्यम् उक्तम्. एतत्स्वरूपन्तु ''यत्र पदानि उपसर्जनीभूतस्वार्थानि निवृत्तस्वार्थानि वा प्रधानार्थोपादानाद् व्यर्थानि अर्थान्तराभिधायीनि वा सः एकार्थीभावः. परस्पराकांक्षारूपा व्यपेक्षा'' (पातं.महाभा.प्र.२।१।१) इति कैयटः. अत्र विवरणे ''अनेकार्थस्य एकार्थत्वम् एकार्थीभावः इति शब्दशक्तिम् अनुसृत्य जहत्स्वार्था-ऽजहत्स्वार्थयोः तं दर्शयिष्यन् आदौ अजहत्स्वार्थायां तं दर्शयति यत्र 'पदानि' इति उपसर्जनपदानि इति अर्थः. तदेव ध्वनयन् आह

‘उपसर्जनभूतस्वार्थानि’ इति, इतरविशेषणभूतस्वार्थोपस्थापकानि इति अर्थः. नतु पृथक्स्वार्थोपस्थापकानि इति तात्पर्यम्. एवञ्च तत्पुरुषादौ एकं पदं तादृशं बहुव्रीहौ द्वन्द्वे च पदद्वयमपि इति बोध्यम्. जहत्स्वार्थायाम् आह ‘निवृत्तस्वार्थानि वा’ इति. उभयत्रापि हेतुः ‘प्रधानार्थोपादानाद्’ इति. आद्ये प्रधानार्थेन स्वोपस्थितिकालएव उपसर्जनपदार्थस्य विशेषणतया उपादानाद् इति अर्थः. अन्त्ये प्रधानेन पदेन तदर्थस्यापि उपादानाद् इति अर्थः. बहुव्रीहौतु प्रधानं पदं समुदायः इति बोध्यम्. एवं द्वन्द्वेऽपि प्रधानं पदं समुदायः तदर्थेन साहित्येन स्वविशेषणतया धवाद्यर्थस्य उपादानाद् उपसर्जनभूतस्वार्थानि यद्वा विशेष्यसाहित्योपस्थापकतया प्रधानेन समुदायेनैव धवाद्यर्थस्यापि उपादानाद् निवृत्तस्वार्थानि वा इति. तत्रापि अयम् एकार्थीभावः, समाहारेतरेतरयोगयोः उभयोरपि साहित्यं विशेष्यम्. आद्ये अनुद्भूतावयवभेदम् अन्त्ये उद्भूतावयवभेदम् इत्येव तयोः भेदः इति बोध्यम्. ‘व्यर्थानि’ इति सन्निहितत्वाद् ‘निवृत्तस्वार्थानि’ इत्येतत् पक्षान्वयि. आद्ये आहः अर्थान्तराभिधायीनि इति, अर्थान्तरान्वितस्वार्थाभिधायीनि इति अर्थः. प्रत्येकशक्तिसहकृतसमुदायशक्त्या विशिष्टार्थप्रतिपादकानि इति भावः. ‘पदानि’इतिबहुवचनन्तु बहुव्रीह्याद्यभिप्रायेण. स एकार्थीभावः इति. आद्ये एकीभूतार्थानि मिलितार्थानि इति अर्थः. तत्र मिलनस्य इतरसाकांक्षत्वाद् द्वयोरपि समर्थत्वं तत्पुरुषादौ. अन्त्ये पदद्वयार्थयोः एकपदार्थत्वप्राप्तिः इति अर्थः’’ (पातं.महाभा.वि.२।१।१) इति वैयाकरणाभिप्रेतजहत्स्वार्थाऽजहत्स्यार्थयोरपि दिक् प्रदर्शिता इति अन्यद् एतत्. व्यपेक्षास्वरूपन्तु स्वार्थपर्यवसायिनां पदानाम् आकांक्षादिवशात् परस्परसम्बन्धः इति बहवः. वाक्यइव वृत्तावपि व्यपेक्षां वदतां नैयायिक-मीमांसकादीनां मते ‘राजादि’पदानि स्वार्थं न जहति इति अजहत्स्वार्था वृत्तिः. अयं तेषाम् आशयः : ‘‘**समर्थः पदविधिः**’’ (पाणि.सू.२।१।१) इति सूत्रे परस्परान्वययोग्यत्वरूपा व्यपेक्षैव सामर्थ्यम् अभिप्रेयते. ‘‘**इसुसोः सामर्थ्ये**’’ (पाणि.सू.८।३।४४) इत्यत्र तादृशसामर्थ्यस्यैव सर्वैः अङ्गीकारात्. अतएव ‘‘पुत्रो राज्ञः’’ ‘‘पुरुषो देवदत्तस्य’’ इत्यादौ व्यपेक्षासामर्थ्याभावादेव न समासप्रसक्तिः. किञ्च वृत्तित्वावच्छेदेन एकार्थीभावस्य अङ्गीकारे स्वावयवार्थातिरिक्ताभिप्रायकत्वरूपवृत्तिलक्षणस्य

कर्मधारये अव्याप्तिः ‘नीलोत्पलम्’ इत्यादौ अवयवार्थातिरिक्तार्थाभावात्. वृत्तित्वसामानाधिकरण्येनतु ‘रथन्तरा’दिशुद्धरूढे ‘पङ्कजा’दियोगरूढे च कोशव्यवहारादिसिद्धायाः समुदायशक्तेः अस्माभिरपि स्वीकारेण सिद्धसाधनम्. शुद्धयौगिक ‘चित्रग्वा’दिसमुदायेतु शक्त्यन्तरं तद्बोधककोशाद्यभावाद् अवयवपदवृत्त्यैव उपपत्तेश्च हेयम् इति. तथाच ‘राजपुरुषः’ इत्यादौ ‘राज’पदादेः सम्बन्धिलक्षणयैव राजसम्बन्ध्यभिन्नः पुरुषः इति बोधः. नच सम्बन्धएव लक्ष्यो अस्तु. एवञ्च व्यास-समासयोः समानाकारबोधजनकत्वप्रवादोऽपि उपपत्स्यते. राजादिसम्बन्धरूपलक्ष्यार्थस्य उत्तरपदार्थे आश्रयतया अन्वयेनैव उपपत्तौ सम्बन्धिनि लक्षणाभ्युपगमे प्रयोजनाभावश्च इति वाच्यम्. ‘‘राजा पुरुषः’’ इत्यादावपि राजादिपदार्थस्य स्वस्वामिभावसम्बन्धेन पुरुषादौ अन्वयवारणाय निपातातिरिक्तनामार्थनिष्ठ- भेदातिरिक्तसम्बन्धावच्छिन्नप्रकारतानिरूपित-विशेष्यतासम्बन्धेन शाब्दबुद्धिं प्रति विशेष्यतासम्बन्धेन प्रत्यय-निपातान्यतरजन्योपस्थितेः हेतुत्वस्य आवश्यकतया प्रकृते राजसम्बन्धरूपनामार्थस्य प्रत्यय-निपातान्यतरानुपस्थिते पुरुषादौ अन्वयासम्भवात्. निपातातिरिक्तत्वविशेषणात् ‘‘चन्द्रइव मुखम्’’ इत्यादाविव पदार्थसादृश्यस्य नामार्थस्य प्रत्ययनिपातजन्योपस्थित्यविषये मुखे निपातातिरिक्तनामार्थचन्द्रस्यच निपातजन्योपस्थितिविषये सादृश्ये अन्वयेऽपि न क्षतिः. अभेदातिरिक्तसम्बन्धावच्छिन्नत्वस्य प्रकारतायां निवेशाच्च ‘‘राजा पुरुषः’’ इत्यादौ अभेदान्वयेऽपि न सा. सम्बन्धिनि लक्षणाभ्युपगमादेव राज्ञः पदार्थैकदेशतया न तत्र शोभनस्य इत्यादिविशेषण अन्वयः, पदार्थः पदार्थेन अन्वेति इति व्युत्पत्तेः. ननु ‘‘गभीरायां नद्यां घोषः’’ इत्यादौ ‘नदी’पदलक्ष्य-नदीतीरार्थैकदेश-जलादौ ‘गभीरा’द्यन्वयवद् अत्रापि एकदेशान्वयो दुर्वारः इति चेद्, न; तत्रापि एतन्मते ‘नदी’पदस्य गभीरनदीतीरे लक्षणा, ‘गभीर’पदं तात्पर्यग्राहकम् इति अदोषात्. पूर्वोक्तव्युत्पत्तेः ससम्बन्धिकव्यतिरिक्तविषयतया ‘‘चैत्रस्य नप्ता’’ इत्यादौ एकदेशान्वयेऽपि न क्षतिः. ‘निष्कौशांबिः’ ‘घनश्यामो’ ‘गोरथ’ इत्यादौ ‘कौशांब्या’दिपदस्यैव कौशांब्यवधिकनिष्क्रमणकर्त्राद्यर्थे लक्षणाभ्युपगमेनैव इप्सितार्थबोधोपपत्तौ ‘क्रान्ता’इव ‘युक्ता’दिशब्दानाम् उपादानस्य अनापत्तिः. एवं ‘चित्रगुः’ इत्यादावपि ‘गवा’दिशब्दानामेव चित्रगवीस्वाम्यादौ लक्षणा

‘चित्रा’दिपदं तात्पर्यग्राहकम्. नच समासे खलु भिन्नैव शक्तिः ‘पङ्कज’शब्दवद् इति प्रतिबन्दी विशिष्टशक्तिसाधिका वाच्या. तत्र अवयवशक्तिम् अजानतोऽपि बोधात्. नहि अवयवशक्त्यग्रहे लक्षणया ‘पङ्का’दिशब्देभ्यो विशिष्टार्थप्रत्ययो अतः तत्रैव न लक्षणा. अतएव ‘राजा’दिपदशक्त्यग्रहे ‘राजपुरुष’इत्यादौ न बोधः. ‘प्राप्तोदक’इत्यादौतु उत्तरपदमेव लाक्षणिकं शीघ्रोपस्थितिकत्वात्, पूर्वपदस्य यौगिकत्वेन तल्लक्षणाया धातुप्रत्ययतदर्थज्ञानसाध्यतया विलंबितत्वात्, प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तेः च. घटादिपदेतु अतिरिक्ता शक्तिः कल्प्यमाना विशिष्टे कल्प्यते. विशिष्टएव तत्सङ्केतस्य व्यवहारादितो निर्धारात्. प्रत्येकं वर्णेषु बोधकत्वस्य अभावाच्च. स्वीकृतञ्च ‘घटा’दिपदेष्वपि पूर्वपूर्ववर्णानुभवजन्योद्बुद्धसंस्कारसहितचरमवर्णस्यैव वाचकत्वं मीमांसकैः. अतः केवलचरमवर्णाद् अर्थबोधस्तु न आपद्यते. ‘उपकुंभम्’ इत्यादौ उत्तरपदस्यैव समीपाद्यर्थे लक्षणा पूर्वपदं तात्पर्यग्राहकम्. ‘अर्धपिप्पली’त्यादौ क्वचित् तत्पुरुषेऽपि चरमपदस्यैव पिप्पल्यर्धाद्यर्थे सा. ‘नीलोत्पलम्’ इत्यादौ कर्मधारयेतु न सा. प्रत्येकपदशक्त्युपस्थितयोः अभेदान्वयसौलभ्यात्. ‘शङ्खपटहम्’ इति द्वन्द्वेऽपि उत्तरपदस्य शङ्खपटहसमाहारे लक्षणा पदान्तरं द्योतकम्. तत्रैव परम्परया वादनकर्मत्वान्वयः इतरेतरयोगद्वन्द्वे साहित्यापन्नप्रत्येकपदार्थयोः उत्तरपदस्यैव सा. अतएव द्विवचनार्थं द्वित्वाद्यन्वयः तत्र. समाहारद्वन्द्वे साहित्यं विशेष्यम् अत्रतु विशेषणम् इति भेदः यद्वा समाहारद्वन्द्वे साहित्याप्रतीतेः न लक्षणा तत्र. किन्तु प्रत्येकपदशक्त्युपस्थाप्ययोरेव तयोः साक्षाद्वादनादिकर्मत्वाद्यन्वयः. एवम् इतरेतरयोगेऽपि न लक्षणा. एकस्मृत्यारूढपदद्वयात् प्रत्येकशक्त्युपस्थितार्थयोः द्वित्वान्वयसम्भवात्. एकक्रियान्वयित्वरूपस्य एकबुध्यवच्छिन्नत्वरूपस्य वा साहित्यस्य पश्चाद् अवगमेन पूर्वं तत्र लक्षणाग्रहासम्भवाच्च.

‘पङ्कज’-‘रथकारा’दियोगरूढपदेषु पद्मत्वजातिविशेषादिरूपेण उपस्थितये रूढिशक्तिः स्वीक्रियतएव. नच तत्रापि लक्षणैव अस्तु इति वाच्यम्. तस्याः तत्र असम्भवात्. तथाहि सा किं ‘पङ्कज’पदे उत ‘ङ’प्रत्यये. न आद्यः, समुदाये शक्त्यभावेन शक्त्यघटितलक्षणायाः असम्भवाद्, ‘मण्डपा’दिशब्दवद् जहत्स्वार्थायावृत्तेः तत्र असत्त्वात् च. ‘‘**यत्रहि**

अवयवार्थविरोधिनी रूढिः तत्रैव सा अभ्युपगम्यते. जहत्स्वार्थातु तत्रैव यत्र रूढिः विरोधिनी '' इति अभियुक्तोक्तेः. न द्वितीयः. प्रकृत्यर्थस्य अनन्वयापत्तेः तदर्थे प्रत्ययस्य असाधुतापत्तेश्च 'राजपुरुष'इत्यादौतु प्रत्येकपदवृत्त्यापि विशिष्टार्थबोधनिर्वाहे समुदायशक्तिकल्पनं तत्र अनुचितमेव. नापि षष्ठे ''**वचनाद् रथकारस्य आधाने अस्य सर्वशेषत्वाद्**'' (जै.मी.सू.६।१।४४) इत्यादिसप्तसूत्ररथकाराधिकरणबाधः. ''**वर्षासु रथकारः आदधीत**'' इत्यत्र यौगिकार्थरथकरणनिमित्ते वर्षर्तुविधानस्य संकरस्य विशिष्टाधानापेक्षया लघुत्वेऽपि तैत्तिरीयब्राह्मणप्रथमकाण्डे ''**ऋभूणां त्वा देवानां व्रतपते व्रतेन आदधामि इति रथकारस्य**'' (तैत्ति.ब्रा.१।१।४।८) इति श्रवणेन ''**ऋभूणां त्वा**'' इति मन्त्रवर्णाद् 'ऋभु'-'सौधन्वन'पर्याय- प्रतिलोमजातिरथकारस्यैव तदधिकारावगत्या लाघवानादरेण रूढार्थे तत्र विशिष्टाधानकल्पनात्. मन्त्रवर्णे विशेषस्तु ''**सौधन्वनास्तु हीनत्वाद् मन्त्रवर्णात् प्रतीयेरन्**'' (जै.मी.सू.६।१।५०) इति सूत्रे भाष्ये '' '**सौधन्वना'नाम जातिः अभिधीयते. हीनास्तु किञ्चित् त्रैवर्णिकेभ्यः जात्यन्तरं, नतु शूद्राः न वैश्याः न क्षत्रियाः तेषाम् इदम् आधानम्. कथम् अवगम्यते? प्रसिद्धेः मन्त्रवर्णाच्च. मन्त्रवर्णोहि भवति. 'सौधन्वना ऋभवः शूरचक्षसः' इति 'ऋभूणां त्वा' इति रथकारस्य आधानमन्त्रः. तस्मात् सौधन्वना ऋभवः इति, ऋभवश्च रथकाराः. अपिच 'नेमिं नयन्ति ऋभवो यथा' इति ये नेमिं नयन्ति ते ऋभवः इति उच्यन्ते. रथकाराश्च नेमिं नयन्ति. तस्माद् अत्रैवर्णिकानाम् अशूद्राणाम् एतद् आधानम् इति**''. (जै.मी.सू.शा.भा.६।१।५०) इति शबरस्वामिना दर्शितः. 'रथकार'शब्दस्य तत्र रूढिं तु प्रथमाध्याये वर्णजातिविवेके याज्ञवल्क्यो दर्शयति ''**माहिष्येण करण्यान्तु रथकारः प्रजायते**'' (याज्ञ.स्मृ.१।४।९५) इति. वैश्यायां क्षत्रियाद् उत्पन्नो माहिष्यः. शूद्रायां वैश्याद् उत्पन्ना करणि इति अन्यद् एतत्. नच तस्या अपूर्वविद्याध्ययनादिकल्पनागौरवं फलमुखत्वात्. प्रकृते राजपुरुषादिसमुदाये शक्तिग्राहकं न तादृशं कोशादिकं येन तद्बलाद् अवयवार्थः परित्यज्येत इति स्थिते को नाम एकप्रसरताभङ्गदोषः? विशिष्टशक्तिं स्वीकुर्वतां मतेहि तदाशङ्कामात्रमपि प्रसज्यते नतु व्यपेक्षावादे. 'नीलोत्पला'दौ कर्मधारयस्थलेतु लक्षणापि न अस्ति इति उक्तं प्राक्. एवं 'शुद्धाद्वैत'पदेऽपि.

अतएव वृत्तिविग्रहयोः समानार्थकत्वाय ‘‘राजा पुरुषः’’ इत्यादौ ‘‘राजा च असौ पुरुषः’’ इति, ‘चित्रगु’रित्यादौ ‘‘चित्राणां गवाम् अयम्’’ इति मीमांसकाः विगृह्णन्ति.

अथ कथं तर्हि एकप्रसरताभङ्गभिया **‘‘वषट्कर्तुः प्रथमभक्षः’’** (जै.मी.सू.भाट्टदी.३।५।३१) इत्यत्र भक्षम् उद्दिश्य प्राथम्यं विधीयते इत्यस्य अयुक्तत्वम् उक्तं तृतीयः इति चोद्यन्तु मूलएव समाधास्यते. **एकार्थीभाव...** इत्यादि. अयं भावः : समासे विशिष्टशक्त्यस्वीकारे तस्य ‘प्रातिपदिक’संज्ञादिकं न स्यात्. अर्थवत्त्वाभावेन **‘‘अर्थवद् अधातुः अप्रत्ययः प्रातिपदिकम्’’** (पाणि.सू.१।२।४५) इत्यस्य अप्रवृत्तेः. नच **‘‘कृत्तद्धितसमासाश्च’’** (पाणि.सू.१।२।४६) इत्यत्र समासग्रहणेन सा सम्भवति, तस्य नियमार्थतायाः भाष्यकारादिभिः उक्तत्वात्, समासे शक्त्यभावेन शक्यसम्बन्धरूपलक्षणायापि असम्भवेन लाक्षणिकार्थवत्त्वस्यापि असम्भवात् च. किञ्च ‘राजपुरुष’इत्यादौ ‘राजा’दिपदस्य सम्बन्धिनि सम्बन्धे वा लक्षणा? न आद्यः, ‘‘राज्ञः पुरुषः’’ इति विवरणविरोधात् समाससमानार्थकवाक्यस्यैव विग्रहत्वात्. अन्यथा तस्मात् शक्तिनिर्णयो न स्यात्. न अन्त्यः, ‘‘राजसम्बन्धरूपः पुरुषः’’ इति बोधापत्तेः. विरुद्धविभक्तिरहितप्रातिपदिकार्थयोः अभेदान्वयव्युत्पत्तेः. अपिच, **‘‘बहूनां वृत्तिधर्माणां वचनैरेव साधने स्याद् महद्गौरवं तस्माद् एकार्थीभावः आस्थितः. ‘च’कारादिनिषेधो अथ बहुव्युत्पत्तिभञ्जनं कर्तव्यं ते न्यायसिद्धन्तु अस्माकं तद् इतिस्थितिः’’** (वै.भू.३२-३३) इति भूषणोक्तकारिकाभ्याम् एकार्थीभावस्वीकारपक्षस्यैव सम्यक्त्वं प्रतीयते. तदर्थस्तु इत्थं : वृत्तेः धर्म-लिङ्ग-संख्या-विशेषणाद्ययोगादयः तेषां **‘‘सविशेषणानां वृत्तिः न वृत्तस्य वा विशेषणयोगो न’’** (पातं.महाभा.२।१।१) इत्यादिवचनैः साधने गौरवम्. तथा ‘धवखदिरौ’ ‘निष्कौशांबिः’ ‘गोरथो’ ‘घृतघटो’ ‘गुडधानाः’ ‘केशचूडः’ ‘सुवर्णालङ्कारो’ ‘द्विदशाः’ ‘सप्तपर्ण’ इत्यादाविव इतरेतरयोगादिक्रान्त-युक्त-पूर्ण-मिश्र-संघात-विकार-‘सुप्प्र’त्ययलोप-वीप्साद्यर्थो वाचनिको वाच्यः इति अतिगौरवं स्याद् इति. दूषणान्तरम् उक्तम् **‘चकारादिनिषेधो’** इति.

आदिना 'घनश्यामो' 'हंसगमना' इत्यादाविव आदीनां पूर्वोक्तानाञ्च सङ्ग्रहः. दूषणान्तरम् आह "**बहुव्युत्पत्तिभञ्जनम्**" इति. अयम् आशयः : 'चित्रगुः'इत्यत्र स्वाम्यादिप्रतीतिः अनुभवसिद्धा. नच तत्र लक्षणा, "प्राप्तोदको ग्राम" इत्यादौ तदसम्भवात्. प्राप्तिकर्त्रभिन्नम् उदकम् इत्यादिबोधोत्तरं तत्सम्बन्धिग्रामलक्षणायामपि उदककर्तृकप्राप्तिकर्मग्रामः इति अर्थालाभात्. 'प्राप्ते'ति 'क्त'प्रत्ययस्यैव कर्त्रर्थकस्य कर्मणि लक्षणा इति चेत्, तर्हि समानाधिकरणप्रातिपदिकार्थयोः अभेदान्वयव्युत्पत्तेः उदकाभिन्नं प्राप्तिकर्म इति स्यात्. अन्यथा समानाधिकरणप्रातिपदिकार्थयोः अभेदान्वयव्युत्पत्तिभङ्गापत्तिः. एवम् 'ऊढरथः' 'उपहृतपशुः' 'उद्धृतौदन' इत्यादावपि द्रष्टव्यम्. अधिकन्तु भूषणादौ स्पष्टमेव इति अलं प्रासङ्गिकेन.

(२) एकप्रसरताभंगस्तु वषट्कर्तुः प्रथमभक्षः इत्यादौ 'प्रैतुहोतुःचमस'इति समाख्याप्रापितस्य भक्ष्यस्य अनुवादेन प्राथम्यं विधीयते इति चेत् तदा भवति. 'प्रथमभक्ष'इतिपदस्य समस्तत्वेन तादृग्भक्षपदार्थे वषट्कर्तृसम्बन्धो बोध्यते तत्रैव प्राथम्यविधाने वषट्कर्तृसम्बन्धी भक्षः यो भक्षः स प्रथमः एवं वचनव्यक्तिः स्यात्. तथाच स्पष्टो वाक्यभेदः. प्राथम्यविशिष्टभक्षविधाने च स न सम्भवति भक्षे प्राथम्यम् इतरव्यावृत्तिस्तु अर्थतएव सम्भवति. एवमेव "वषट्कारात् च भक्षयेद्" (जै.मी.सू.३।५।३१) इति सूत्रे

"आद्यभक्षे वषट्कर्तुः विधिः प्राथम्यएव किम्।।
किं वा तद्युक्तभक्षे स्याद् वषट्कारनिमित्तके।।
अप्राप्तेः अग्रिमो मैवं समासस्थित्यसम्भवात्।।
विशिष्टस्य विधिः तस्माद् वषट्कारोऽपि कारणम्"।।
(जै.मी.सू.न्या.मा.३।५।३१)

इति न्यायमालायाम् उक्तम्. एवञ्च शुद्धाभिन्नाद्वैतस्य वाक्यार्थत्वेन मायासम्बन्धनिवृत्तेः आर्थिकत्वाद् एकप्रसरताभं-

> **गस्य अनवकाशः . अन्यथा ‘नीलघट’इत्यत्रापि पीतव्यावृत्त्यर्थं घटे नीलत्वस्यैव त्वदुक्तरीत्या विधेयतया एकप्रसरताभंगभिया तत्रापि समासानुपपत्तिः स्यात्. अशुद्धाद्वैताभावेऽपि मायासम्बन्धस्य अशुद्धत्वप्रयोजकस्य व्यावर्त्यस्य उक्तत्वादेव अशुद्धाद्वैताभावेन इत्यादिकं प्रत्युक्तम्.**

(३) एकप्रसरताभङ्गस्तु इत्यादि. अयम् आशयः : पूर्वतन्त्रे तृतीयस्य पञ्चमे पादे ‘‘**ऐन्द्रवायवेतु वचनात् प्रतिकर्मभक्षः स्यात्**’’ (जै.मी.सू.३।५।१८) इति एकसूत्रे पञ्चमाधिकरणे संस्कारार्थत्वात् पूर्वाधिकरणन्यायेन सकृद् भक्षे प्राप्ते ‘‘**द्विः ऐन्द्रवायवस्य भक्षयति द्विर्हि एतस्य वषट्करोति**’’ (जै.मी.सू.भाट्टदी.३।५।१८) इति वचनाद् द्विर्भक्षं स्थापयित्वा ‘‘**सोमे अवचनाद् भक्षो न विद्यते**’’ (जै.मी.सू.३।५।१९) इत्यादि त्रिसूत्रे षष्ठाधिकरणे ग्रहाणां होमाद् वचनाभावात् च अभक्षं पूर्वपक्षीकृत्य ‘‘अल्पं जुहोति’’ इति विशेषवचनात् सोमस्य शेषसत्त्वेन तत्प्रतिपत्तौ विचार्यमाणायां ‘‘**सर्वतः परिहारम् आश्विनं भक्षयति**’’ इत्यादि अपूर्वार्थवचनेभ्यः तद्भक्षम् उत्तरपक्षीकृत्य ‘‘**चमसेषु समाख्यानात् संयोगस्य तन्निमित्तत्वात्**’’ (जै.मी.सू.३।५।२२) इति एकसूत्रे सप्तमाधिकरणे ज्योतिष्टोमे श्रूयमाणं ‘‘**प्रैतुहोतुः चमसः प्रब्रह्मणः प्रोद्गातृणां प्रयजमानस्य प्रयन्तु सदस्यानाम्**’’ (जै.मी.सू.शा.भा.३।५।३३) इति वाक्यं विचारितम्. तत्र चमसिनां चमसेषु भक्षणम् अस्ति नवा इति संशये पूर्ववद्वचनाभावाद् अभक्षे प्राप्ते होतुः चमसो ब्रह्मणः चमसो इत्यादिसमाख्याबलाद् भक्षणं सिद्धान्त्यते. तथाहि चम्यते अस्मिन् इति चमसः. भक्षणार्थात् चमतेः अधिकरणार्थः औणादिको असन्. नच तत्र होता अन्यद् ओदनादि चमिष्यति. सोमचमस इति हि तं समाचक्षते. नच तद् होतुः द्रव्यं किन्तु यजमानस्य. स्पष्टं च इदं तत्र भाष्ये. अतो होतुः संयोगः चमसे भक्षनिमित्तम्. यदा तुणादीनाम् अव्युत्पन्नत्वम् आश्रीयते तदापि भाट्टदीपिकायां ‘‘**यदितु उणादयो अव्युत्पन्ना इति पक्षाश्रयणं तदा ‘चमस’शब्दस्य पात्रे रूढत्वे योग्यतयैव होतृसोमादिसम्बन्धो भक्ष्य-भक्षकत्वादिसम्बन्धेनैवेति तया भक्षणसिद्धिः अविकला. अतश्च**

होतृब्रह्मोद्गातृयजमानमैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकाग्नीध्राणां स्वस्वचमसेषु समाख्यया भक्षः. सदस्यपक्षे तस्यापि स्वचमसे वचनन्तु अग्रे निरूपयिष्यते'' (जै.मी.सू.भाट्टदी.३।५।२२) इति उक्तम्. ततश्च चतुःसूत्रे अष्टमाधिकरणे भाष्य-वार्तिकभेदेन सुब्रह्मण्यसहितानां तद्रहितानां वा सामगानाम् उद्गातृचमसे भक्षणं चतुःसूत्रे नवमाधिकरणे ग्रावस्तुतो हारियोजनभक्षं च व्यवस्थाप्य ‘‘**वषट्कारात् च भक्षयेत्**'' (जै.मी.सू.३।५।३१) इति एकसूत्रे दशमाधिकरणे ‘‘**वषट्कर्तुः प्रथमभक्षः**'' (जै.मी.सू.भाट्टदी.३।५।३१) इति चिन्त्यते. अत्र किं भक्षम् उद्दिश्य प्राथम्यं विधीयते उत प्राथम्यविशिष्टो भक्षः ? तत्र सप्तमाधिकरणे समाख्यया प्राप्ते प्राथम्यम् अप्राप्तम् अत्र विधीयते इति प्राप्ते ‘प्रथमभक्षः’इति समस्तपदेन ‘‘यो भक्षः स प्रथमः'' इति व्यक्तेः असम्भवात् प्राथम्यविशिष्टभक्षएव अत्र वषट्कारनिमित्तको विधीयते. अतएव इह भाष्ये शबरस्वामी ‘‘**अथ किं समाख्यैव एका भक्षकारणम्? न इति ब्रूमः. ‘वषट्कारात् च भक्षयेत्’ वषट्कारश्च भक्षणे निमित्तम्. कथम्? वचनात्. एवंहि श्रूयते ‘वषट्कर्तुः प्रथमभक्षः’ इति. भक्षणस्य अप्राप्तत्वाद् न प्राथम्यविधानार्थ एषः शब्दः किन्तु प्राथम्यविशिष्टं भक्षणमेव विदधाति इति**'' (जै.मी.सू.शा.भा.३।५।३१) इति आह.

कमलाकरभट्टोऽपि मीमांसाकमलाकरे ‘‘**वषट्कर्तुः प्रथमभक्षः**'' इत्यत्र अन्त्ये पदे समाख्याप्राप्तभक्षानुवादेन कर्तृविशिष्टभक्षानुवादेन वा प्राथम्यविधौ वैरूप्याद् वाक्यभेदात् च कर्त्रादिविशिष्टभक्षविधेः ‘‘वषट्कारोऽपि निमित्तम्'' इति आचष्टे. एवञ्च अत्र सूत्रे समाख्याप्राप्तभक्षाद् अतिरिक्तएव अयं प्राथम्यविशिष्टो भक्षः इति बोधनार्थएव समुच्चयार्थः ‘च’शब्दः इति मम प्रतिभाति. अत्र भाट्टदीपिकायां खण्डदेवः सयुक्तिकं पूर्वपक्षम् उपन्यस्य ‘‘ ‘**प्रथमभक्षः’ इति समासरूपे एकस्मिन् पदे एकांशेन उद्देश्यत्वे एकांशेन विधेयत्वेच अङ्गीक्रियमाणे एकप्रसरताभङ्गापत्तेः कर्मान्तरमेव इदम्. नच तस्मिन् दूषकताबीजाभावः, सामर्थ्यभङ्गस्यैव तद्बीजत्वात्. तथाहि : सर्वत्र उद्देश्यविधेयभावस्थले उद्देश्ये विधेयान्वयात् पूर्वम् उद्देश्यस्य उद्देश्यत्वेन क्रियान्वयो अवश्यं वक्तव्यः. अतएव ‘ ‘यच्छ’ब्दयोगः प्राथम्यम्’ इत्यादि उद्देश्यलक्षणम्**

इत्यपि सङ्गच्छते. प्राथम्यं तत्त्वेन प्रथमं क्रियान्वयो अन्यस्य अतिप्रसक्तत्वात्. तदत्र यत्र भिन्नपदस्थले ‘यागेन स्वर्गं भावयेद्’ इत्यादौ तत्तत्पदात् पदार्थोपस्थित्यनन्तरं स्वर्गस्य उद्देश्यत्वेन यागस्य च विधेयत्वेन क्रियान्वये प्रथमम् अवगते पश्चादेव विधेयस्य यागस्य उद्देश्ये स्वर्गे अन्वयः इति स्थितिः. तद्वच्च इहापि एकपदस्थले भक्ष्ये प्राथम्यान्वयात् पूर्वं भक्षस्य क्रियान्वयो अभ्युपगन्तव्यः. ततश्च क्रियान्वयात् पूर्वं भक्षप्राथम्ययोः विशेषण-विशेष्यभावानवगमाद् एकार्थीभावलक्षणसामर्थ्यभङ्गाद् अपरिपूर्णस्य समासपदस्य पदान्तरेण आख्यातेनापि अन्वयायोगात्. यद्यपि च अस्मन्मते वैयाकरणवद् विशिष्टार्थवाचकत्वं न सामर्थ्यं तथापि क्रियान्वयात् पूर्वं विशिष्टार्थबोधकत्वमेव तद् इति बोध्यम्. अत्र क्रियाभिन्नं विधेयं बोध्यम्. क्रियात्मके विधेये तदन्वयात् पूर्वम् उद्देश्यस्य तत्त्वेन क्रियान्वयस्य वक्तुम् अशक्यत्वात्. अतएव ‘विविदिषन्ति यज्ञेन’ इत्यादौ विविदिषोद्देशेन यज्ञादिभावनाविधानेऽपि न क्षतिः. अतश्च एकप्रसरताभङ्गभिया भक्षान्तरमेव विधेयम्. अतएव ‘लोहितोष्णीषे’त्यादौ अतिदेशात् पूर्वमेव लोहितोष्णीषविशिष्टकर्तारएव प्रचारोद्देशेन विधीयन्ते विशेषणमात्रविधिफलकाइति तत्र-तत्र एकप्रसरताभङ्गपरिहारप्रकारो वक्ष्यते. अतश्च प्रकृते एकप्रसरताभङ्गभिया प्राथम्यस्य पूर्वकर्मणि अनिवेशाद् गुणादेव वषट्कर्तृप्राथम्योभयविशिष्टभक्षान्तरमेव विधीयते सोमसंस्कारार्थम्. तत्रच यागार्थत्वेन वषट्कारस्य क्लृप्तत्वात् कर्तुः उपलक्षणमात्रत्वेन अर्थाद् निमित्तत्वावगतेः वषट्कारनिमित्तम् इदं भक्षणं ग्रहेषु चमसेषु च अविशेषात् सिद्धं भवति” (जै.मी.सू.भाट्टदी.३।५।३१) इति आचष्टे. एवमपि भावत्काभिप्रेतम् अद्वैतमेव उद्दिश्य न शुद्धत्वं विधीयते येन एकप्रसरताभङ्गप्रसङ्गः स्यात् किन्तु ततो अतिरिक्तमेव शुद्धत्वविशिष्टम् अद्वैतं बोध्यते. तत्र आर्थिकः शुद्धत्वगुणयोगस्तु अशक्यप्रतिषेधः. तेन त्वदभिप्रेतस्य व्यावृत्तिरपि अर्थसिद्धैवेति एतदधिकरणार्थप्रकाशकं माधवकृतजैमिनीयाधिकरणमालास्थं कारिकाद्वयम् आहुः **आद्यभक्षे वषट्कर्तुः** इति. समासस्य च्छित्तिः च्छेदः. क्वचित् ‘समासस्थित्यसम्भवाद्’ इतिपाठस्तु व्याख्यानविरोधाद् अयुक्तो भाति. एतच्च माधवेनैव न्यायमालाविस्तराख्ये तद्विवरणे स्फुटीकृतम्.

“वषट्कर्तुः प्रथमभक्ष इत्येवं श्रूयते. वषट्कर्ता होता तस्य भक्षणं समाख्यया

प्राप्तं प्राथम्यन्तु अप्राप्तमिति तदेव अत्र विधीयते इति चेद्, मैवं; ‘प्रथमभक्ष’इत्यस्य समस्तपदत्वेन ‘‘यो भक्षः स प्रथमः’’ इत्येवं विच्छिद्य अन्वेतुम् अयोग्यत्वात् प्राथम्यविशिष्टं भक्षणम् अत्र विधीयते. तस्मिन् भक्षणे वषट्कारः कारणम्’’ (जै.मी.सू.न्या.मा.३।५।३१) इति.

अत्र इदमपि बोध्यं : मीमांसकैः विशिष्टशक्तेः अनभ्युपगमेऽपि विशिष्टलक्षणायाः अंगीकाराद् एकप्रसरता तन्मते सिध्यति. एकप्रसरत्वं नाम समासघटकपदयोः उद्देश्य-विधेयभावेन अन्वयाबोधकत्वं नतु विशिष्टार्थोपस्थितिजनकत्वम्. तादृशव्युत्पत्तिशरीरन्तु समासघटकपदार्थनिष्ठविधेयतानिरूपितोद्देश्यतासम्बन्धेन शाब्दबुद्धिं प्रति समासघटकपदजन्योपस्थितिः प्रतिबन्धिका इति. नच तादृशप्रतिबन्ध्य-प्रतिबन्धकभावकल्पने गौरवम् इति वाच्यम्. सर्वत्र विशिष्टशक्तिकल्पनापेक्षया क्वचित् प्रतिबन्ध्य-प्रतिबन्धकभावकल्पनएव लाघवात्. वस्तुतस्तु प्रथमपदार्थान्वितभक्षविशेष्यकबोधानुभवएव इति मीमांसकैः विशिष्टशक्तिः अभ्युपेता. एवञ्च यत्र वृत्तिघटकपदार्थस्य मानान्तरेण सिद्धत्वरूपम् उद्देश्यत्वम् अवगतं तत्रैव इयं व्युत्पत्तिः न सर्वत्र. अन्यथा क्वापि समासो न स्याद् इति अभिप्रेत्य उक्तं प्राक् **क्वापि समासो न स्याद्** इति. यच्च कैश्चिद् वैयाकरणैः अयमेव एकप्रसरताभंगो नाम यद् विशिष्टैकोपस्थितिजनकत्वरूपसामर्थ्यभङ्गः, उद्देश्य-विधेयभावेन अन्वये पृथगुपस्थितेः तन्त्रत्वेन तद्भंगाद् इति उक्तं तद् न, भाष्यकृतानुक्तत्वात्. किञ्च उद्देश्यत्व-विधेयत्वे ‘यच्छ’ब्द-‘तच्छ’ब्दोपबन्धव्यङ्ग्ये वृत्तौ ऋद्धत्वादिवत् तदन्वयासम्भवाद् न तथा अन्वयः. एकार्थीभावाभावेऽपि घटम् इत्यादौ यो घटः सकर्म इति उद्देश्य-विधेयतया अन्वयस्य अभावेन सति तात्पर्ये ‘‘ध्वसोरेद्धावभ्यासलोपश्च’’ इत्यादौ समासेऽपि तथा अन्वयदर्शनेनच एकप्रसरताभङ्गस्य एकार्थीभावकृतत्वाभावनिश्चयाच्च. किञ्च तथान्वयाभिप्रायेण समासप्रयोगेऽपि प्राप्तत्वाप्राप्तत्वादिपर्यालोचनोत्तरं ‘लोहितोष्णीषा’ इत्यादौ तथाबोधो भवत्येव इति न असाधुता इत्याशयेन अयं भाष्ये न उक्तः. ‘‘**विशेषणं विशेष्येण बहुलम्**’’ (पातं.महाभा.२।१।५६) इतिसूत्रे ‘‘**उभयविशेषणत्वाद् उभयोश्च विशेष्यत्वाद् उपसर्जनाप्रसिद्धिः**’’ (पाणि.सू.वा.२।१।५६)

इति वार्तिके उभयम् उद्दिश्य विशेषणत्वस्य विधेयताप्रतीतेश्च. प्राप्ताप्राप्तविवेकस्तु पण्डितत्वविधित्सया ''पण्डितब्राह्मण''इतिप्रयोगे ब्राह्मणत्वम् अवगतं पण्डितत्वं च अनवगतम् इति ध्येयः. अतएव काव्यप्रकाशकृता इदृशसमासवाक्यानि ''**द्वितीयमौर्वीमिव कार्मुकस्य...वपुर्विरूपाक्षम् अलक्ष्यजन्मता**'' (काव्यप्र.७।५१।१६१-१६२) इत्यादीनि सप्तमोल्लासे च्युतसंस्कृतिदोषे न उदाहृतानि किन्तु अविमृष्टविधेयांशएव. एवञ्च पृथगुपस्थितयोः तथा अन्वयइति उत्सर्गस्य त्यागेन सहृदयहृदयस्य वैमुख्यं केवलं तस्य दूषकताबीजम्. यत्तु काव्यप्रदीपे गोविंदसूरिणा ''**उद्देश्यं विधेयञ्चच यदि पृथक्पदाभ्याम् उपतिष्ठते तदा प्राप्तम् उद्दिश्य अप्राप्तं विधीयते नच समासे पृथक्पदाद् उपस्थितिः अपृथगुपस्थितौ च न तथा व्युत्पत्तिः**'' (काव्यप्रदी.) इति उक्तं तत्र ''**उत्सर्गेण इति शेषो बोध्यः**'' (   ) इति मञ्जूषाकारः. साहित्यदर्पणेऽपि सप्तमपरिच्छेदे ''**स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किम् एभिः भुजैः**'' (साहि.दर्प.७।३) इत्यादीनि अविमृष्टविधेयांशस्थलएव उदाहृतानि. च्युतसंस्कारतायान्तु ''**गाण्डीवी कनकशिलानिभं भुजाभ्याम् आजघ्ने विषमविलोचनस्य वक्ष**'' (साहि.दर्प.७।२) इत्येव उदाहृतम्. ''**आङो यमहनः स्वाङ्गकर्मकात् च इति अनुशासनबलाद् आङ्पूर्वस्य हनःस्वाङ्गकर्मकस्यैव आत्मनेपदं नियमितम्. इहतु तल्लङ्घितमिति व्याकरणलक्षणहीनत्वाद् च्युतसंस्कारत्वम्**'' (साहि.दर्प.७।४) इति यदि एकप्रसरताभङ्गे अपप्रयोगो अभिप्रीयेत तर्हि तानि अत्र उदाह्रियेरन्. किञ्च समासादावपि तथाव्युत्पन्नस्य तद्बोधो दुर्वारः. भाष्याद्यनुक्तेश्च न असाधुत्वम्. विशिष्टोपरि स्थितावपि विशेषणादौ प्रकारतादिस्वीकारवद् उद्देश्यत्वादिस्वीकारे बाधकाभावात्. स्पष्टञ्च इदं प्रायेण सर्वं लघुमञ्जूषायां वृत्तिविचारे. अधिकञ्च तत्रैव कर्मधारयविचारे ''**सप्तदशारत्निः वाजपेयस्य यूपो भवति. 'लोहितोष्णीषा ऋत्विजः प्रचरन्ति' इत्यादौ वाजपेययूपारत्नीनुष्णीषञ्च अनुद्य 'सप्तदशत्व लौहित्यादि विधिः' इति मीमांसकाः**'' (ल.मञ्जू.   ) इत्यादि द्रष्टव्यम्. तदेतत् सर्वं मनसि कृत्य आहुः **एवञ्च शुद्धाभिन्न** इत्यादि.

(१) [किञ्च शंकराचार्यमते अद्वैतज्ञानात् पूर्वमपि ब्रह्मणः

शुद्धत्वमेव. त्वन्मते स्वाभिन्नायाः मायायाः सम्बन्धो अस्ति. तन्मतेएव शुद्धाद्वैतं स्यात्. एवञ्च **एतन्मते** इत्यादि असम्मतम्. सांकर्यस्य तन्मते अभावात्.]

(२) मायायाः भगवच्छक्तिरूपत्वेन भगवदभिन्नतया शुद्धत्वेन सदसद्विलक्षणस्य अनिर्वचनीयस्य अज्ञानस्य अशुद्धत्वसंपादकस्य अस्वीकाराद् अस्मन्मते शुद्धाद्वैतं सार्वदिकम्. भवन्मतेतु तादृशाज्ञानविशिष्टस्यैव जगत्कारणत्वेन जीवस्यापि मायोपहितत्वस्वीकारेण जगतोऽपि मायिकत्वेन 'एतन्मते' इति सङ्गतम्. एवञ्च किञ्च **इत्यादिकम् असङ्गतमेव.**

(३) यच्च सहम्राक्षे किञ्च शङ्कराचार्यमते इत्यादि तन्मते अभावाद् इत्यन्तं तद् दूषयन्ति **मायायाः भगवच्छक्तिरूपत्वेन** इत्यादिना. अयं भावः : मायायाः भगवच्छक्तित्वं "**यस्माद् मायी**" (श्वेता.उप.४।९) "**विद्यया अविद्यया शक्त्या माययाच निषेवितम्**" (भाग.पुरा.१०।३६।५५) इत्यादिश्रुतिपुराणसिद्धम्. तस्या भगवदभिन्नत्वन्तु "**पराऽस्य शक्तिः**" (श्वेता.उप.६।८) इत्यादौ परत्वस्वाभाविकत्वादिश्रावणात्. प्रकाशाश्रयादिसूत्रैः कौर्मादिवचनैः च शक्ति-शक्तिमतोः अभेदस्य उपपादयिष्यमाणत्वाच्च. एतेन मिथ्यात्वमनोरथो अपास्तः. मिथ्यावस्तुनः परत्वस्वाभाविकत्वाद्ययोगात्. अभेदादेव न अस्माकं द्वैतापत्तिः नापि उक्तरीतिकः सम्बन्धः. पराऽभिन्नत्वाच्च न तस्याः अशुद्धत्वम्. परस्य शुद्धबुद्धत्वाद्याम्नानात्. नहि वह्नौ शुद्धे तद्गताशक्तिः अशुद्धा भवति. त्वदभिमत'माया'शब्दवाच्यम् अज्ञानन्तु मोक्षविरोधित्वात् साधनैः उच्छेद्यत्वात् च अशुद्धत्वसंपादकमेव इति उक्तं प्राक्. तस्य तथात्वादेव तदनुपहिततया जीवेश्वरातिरिक्तस्यैव चैतन्यस्य शुद्धत्वं तावकग्रन्थेषु अभ्यस्यते "**जीवः ईशो विशुद्धा चिद्**" (सि.ले.सं.१।१७) इत्यादौ. अतः शुद्धकार्यकारणात्मक ब्रह्माद्वैताभावाद् न तव मते शुद्धाद्वैतम्. नच मन्मते अद्वैतज्ञानात् पूर्वमपि ब्रह्मणः शुद्धत्वमेव इति वाच्यं, ब्रह्मैकदेशे मायायाः सार्वदिकसत्त्वाङ्गीकारेण तदभावात्, अनङ्गीकारे

पुनः सृष्ट्युच्छेदप्रसङ्गात्, सृष्टिप्रलययोः पौनःपुन्यबोधकस्य “**प्रजायन्ते तत्रचैव अपियन्ति**” (मुण्ड.उप.२।११) “**सूर्याचन्दमसौ धाता यथा पूर्वम्**” (महाना.उप.५।७) इत्यादिशास्त्रस्य व्याकोपात् च. नच तस्याः मिथ्यात्वेन न तत्सम्बन्धः इति वाच्यम्, अज्ञानस्य मिथ्यात्वेन भावरूपत्वासिद्धेः, कल्पितस्य अनादित्वानुपपत्तेः च, ‘**मायया जीवभावो जीवकल्पिताच सा**’ इति अन्योन्याश्रयात् च, सदसत्त्वाभ्याम् अनिर्वचनीयत्वस्वीकारेण सत्त्वांशेन तत्सम्बन्धस्य अनपायात् च. तस्मात् “**जीवः ईशो विशुद्धाचिद् विभागस्तु अनयोः द्वयोः अविद्या तत्कृतो बन्धः षड् अस्माकम् अनादयः**” (सि.ले.सं.१।१७) इति ऊरीकाराद् भवताम् अद्वैतज्ञानात् पूर्वमपि द्वैतम् अशुद्धत्वं च अनादित्वे नानादिभावत्वेन वा मायाया नित्यत्वसाधनेतु सार्वदिकमपि तत्. मायासङ्कीर्णं कारणम् अविद्यासङ्कीर्णं कार्यमिति कार्ये कारणे च साङ्कर्यस्य मायाऽविद्यासम्बन्धे हेयत्वेन अशुद्धतासंपादकत्वस्य च त्वन्मतग्रन्थेषु “**कार्योपाधिः अयं जीवः कारणोपाधिः ईश्वरः कार्यकारणतां हित्वा पूर्णबोधो अवशिष्यते**” (शुकर.उप.४२) इत्यादौ अनेकत्र कण्ठरवेण स्वीकाराद् “एतन्मते सुनिष्पन्नम्” (शु.मा.२६) इति मार्तण्डोक्तं सुसङ्गतमेव.

औपनिषदमते कार्यकारणयोः शुद्धत्वे मानन्तु श्रुतिसूत्रादिषु तत्र-तत्र ब्रह्मणएव कारणत्वकथनं जीवादेः कार्यत्वकथनं मायाऽविद्योपाधिभावस्य अनभिधानं च स्पष्टमेव. तयोः स्फुटशुद्धत्वबोधको नृसिंहतापनीसन्दर्भस्तु मार्तण्डटीकायाम् “इति ब्रह्मविदां हार्दम्” (शु.मा.२९) इतिकारिकाव्याख्याने दर्शितः. स मार्तण्डखण्डनाकाण्डताण्डवे पण्डितायमानेन भवता न आघ्रातोऽपि. कुतस्तरां तद्दूषणकथा. विशेषतश्च स सन्दर्भो “**दृश्यतेतु**” (ब्र.सू.२।१।६) इत्याद्यधिकरणभाष्यप्रकाशे उपनिषद्दीपिकादौ च विशदितः इति अलम्. तस्माद् अस्माकमेव शुद्धाद्वैतं सार्वदिकम्.

(१) [एवं शुद्धयोः ‘तत्’-‘त्वं’पदार्थयोः तन्मते अद्वैतसत्त्वेन षष्ठीतत्पुरुषपक्षेऽपि शंकराचार्यमते ‘शुद्धाद्वैत’पदसंगतिः. तन्मतेतु तत्पक्षे उक्तविधशुद्धपदार्थस्य सम्बन्धः क्व ?

इति वाच्यम्. भेदे वा तज्ज्ञाने वा तज्ज्ञानाभावे वा? न आद्यः, अप्रसिद्धे, नहि ते शुद्ध-ब्रह्म-सम्बन्धी भेदः प्रसिद्धः, सामर्थ्याभावेन समासाभाव-प्रसंगाच्च. अतएव न द्वितीयो, नहि देवदत्तस्य यद् घटज्ञानं तदभावो यज्ञदत्ते इति अर्थे देवदत्तस्य अघटज्ञानं यज्ञदत्ते इति विज्ञाः प्रयुञ्जते. किञ्च शुद्धस्य भेदज्ञानेन कः सम्बन्धः? न तावद् विषयिता, तव अप्रसिद्धेः, भ्रमात्मकस्यापि तस्य सत्त्वे तत्सम्मतस्य शुद्धाद्वैतस्य असिद्धेः च. नहि तत्सत्त्वे तन्निषेधः कर्तुं शक्यः. किञ्च इदमेव शंकराचार्याः स्वीकुर्वन्ति यद् ब्रह्मणो घटादि-विषयक-मिथ्याज्ञान-विषयत्वं, तत् चेत् त्वमपि स्वीकुर्याः तर्हि कर्मधारय-पक्षे स्वमतेन सहैव तन्मतं व्यावर्तये. नापि आश्रयाश्रयिभावः, ज्ञानस्य सत्यत्वे भेदसिद्धेः, असत्यत्वे ईश्वरस्य भ्रान्तत्वापत्तेः. नापि तृतीयः, तत्र अनुयोगितया अन्वये सप्तमी-प्रसंगात् त्वत्सम्मतार्थासिद्धेः च. प्रतियोगितयातु न अन्वय-सम्भवो भेदज्ञानस्य तथा अन्वितत्वात्. किञ्च शुद्धप्रतियोगिको द्वैतप्रतियोगिको अभावः इति अर्थे का तव इष्टसिद्धिः? इति संक्षेपः.]

(२) किञ्च अस्मन्मते जीवस्यापि शुद्धत्वेन षष्ठीतत्पुरुषोऽपि सम्भवति. तत्रापि शुद्धे अद्वैतम् इति समासे सप्तमीतत्पुरुषे कार्यस्य अशुद्धत्वशङ्का स्याद् एवं शुद्धेन अद्वैतम् इत्यत्रापि. शुद्धस्य अद्वैतम् इति समासे कारणे अशुद्धत्वशङ्का स्याद् अतः शुद्धयोः अद्वैतम् इति समासः कर्तव्यः. त्वन्मतेच जीवस्य अशुद्धत्वेन शुद्धयोः इति समासासम्भवः. नच शुद्धयोः 'तत्'-'त्वं'पदार्थयोः अद्वैतम् इति समासः सम्भवत्येव इति वाच्यं; 'तत्'-'त्वं'पदार्थयोः इत्यत्र 'तत्'-'त्वं'पदवाच्ययोः इत्यर्थकत्वे एतयोः अद्वैतासम्भवः. नहि

‘तत्’पदवाच्यस्य सर्वज्ञत्वादिविशिष्टस्य मायाप्रतिबिम्बितस्य तदवच्छिन्नस्य वा अल्पज्ञत्वादिविशिष्टेन अन्तःकरणावच्छिन्नेन तत्प्रतिबिम्बितेन वा ‘त्वं’पदवाच्येन अभेदः तव सम्मतः. ‘तत्’-‘त्वं’पदलक्ष्ययोः इत्यर्थकत्वेतु द्विवचनानुपपत्तिः, पदद्वयस्यापि त्वन्मते स्वरूपमात्रलक्षकत्वात्. स्वरूपस्य एकत्वेन तत्र द्वित्वान्वयस्य असम्भवात्. एवञ्च षष्ठीतत्पुरुषेऽपि इत्यादि असङ्गतमेव. ब्रह्मणः शुद्धत्वेऽपि जीवस्य त्वन्मते मायिकत्वेन शुद्धत्वासम्भवात्. अद्वैतपदार्थे ब्रह्मणि शुद्धपदार्थस्य अभेदेन अन्वयस्य शुद्धयोः अभेदबोधस्य वा उपपादितत्वेन तत्र दोषलेशस्यापि असम्भवात्. तदज्ञानमूलकः …शुद्धपदार्थस्य सम्बन्धः क्व इति वाच्यम्. भेदे वा तज्ज्ञाने वा तज्ज्ञानाभावे वा इत्यादिकः स्वकपोलकल्पितशंकासमाधानखण्डनरूपो ग्रन्थः कर्तुं शक्यः इत्यन्तः प्रलापो अपास्तः. यदपि. किञ्च इत्यादिना शङ्कराचार्याः स्वीकुर्वन्ति यद् ब्रह्मणो घटादि-विषयक-मिथ्याज्ञान-विषयत्वं इति उक्तं तदपि शङ्कराचार्यमतम् अज्ञात्वैव. ब्रह्मणो घटादिविषयकस्य “अयं घटः” इत्यादिज्ञानस्य विषयत्वे तावतैव ब्रह्मज्ञानसम्भवेन मोक्षः स्यात्. किन्तु अखण्डाकारवृत्तिविषयत्वमेव तैः स्वीकृतम्. अस्मन्मतेच भेदज्ञानेन शुद्धपदार्थस्य अन्वयो नास्त्येव इति असकृद् आवेदितमेव, अतः शुद्धस्य भेदज्ञाने कः सम्बन्धः? इति शङ्कैव न सम्भवति. कर्मधारयसमासपक्षे शुद्धपदार्थस्य अभेदसम्बन्धेन अद्वैतपदार्थे अन्वयस्वीकारेण सप्तमीप्रसंगस्य आशंकैव न सम्भवति अस्मत्सम्मतार्थसिद्धिश्च सम्भवति. तथाच नापि तृतीयः, तत्र अनुयोगितया अन्वये सप्तमीप्रसङ्गात् त्वत्सम्मतार्थासिद्धेः च इत्यादिकं निरस्तम्. किञ्च त्वन्मतेऽपि अद्वैतम् इत्यस्य द्वैताभावार्थकत्वे “पारमार्थिकम् अद्वैतं प्रविश्य शरणं श्रुतिः बाधनाद् उपजीव्येन न बिभेति कदाचन” (खं.खं.खा.१।-

> **२२) इति त्वत्सम्मतश्लोके पारमार्थिकपदस्य अन्वयः कुत्र इति वक्तव्यं भेदे वा अभावे वा? न आद्यः, भेदस्य पारमार्थिकत्वे द्वैतापत्तिः. न द्वितीयः, तत्र प्रतियोगितया अन्वये षष्ठीप्रसङ्गाद् अनुयोगितया अन्वये सप्तमी स्यात्. इत्यादिदोषस्य आपादयितुं शक्यत्वेन तुल्यत्वात्. उक्तञ्च यतः "यत्र उभयोः समो दोषः परिहारोपि वा समः नैकः पर्यनुयोक्तव्यः तादृशार्थविनिर्णये" (श्लो.वा.शून्य.प्र.२५२) इति संक्षेपः.**

(३) एवं कर्मधारयपक्षं समर्थ्य षष्ठीतत्पुरुषपक्षमपि समर्थयितुं तत्र प्रत्यवस्थापकं, सहस्राक्षे एवं शुद्धयोः इत्यादिं सिद्धिः इति संक्षेपः इत्यन्तं भागं दूषयन्ति **किञ्च अस्मन्मते** इत्यादिना ...**विनिर्णये इति संक्षेपः** इत्यन्तेन. **जीवस्यापि शुद्धत्वेन** इति. **'अपि'** शब्दो जडप्रञ्चस्य कारणस्य अक्षरस्य च समुच्चायकः. तेन कार्य-कारणयोः उभयोः सिद्धान्ते शुद्धत्वम्. मार्तण्डटीकानुरोधेन समासान्तरानुपपत्तिं दर्शयन्ति **तत्रापि** इति. सप्तमीतृतीयातत्पुरुषयोः शुद्धपदं कारणमात्रपरं सम्भवति. तस्मिन् तेन सह वा कार्यस्य अद्वैतम् इति अर्थः. तावता कार्ये शुद्धत्वं न प्राप्यते. षष्ठयेकवचनेन तत्पुरुषे शुद्धपदं कार्यमात्रपरम्. तेन कारणे तद् न आयाति इति उभयोः शुद्धता बोधनाय शुद्धयोः अद्वैतम् इत्येव विग्रहो युक्तः. सप्तमीतत्पुरुषादिपक्षेषु सप्तमीति योगविभागात् समासाश्रयणम् इत्यादि दोषान्तराणि विशेषतः प्रयोजनाभावाद् न लिख्यन्ते. **जीवस्य अशुद्धत्वेन** इति. जीवस्य इति उपलक्षणम्. **"कार्योपाधिः अयं जीवः कारणोपाधिः ईश्वरः. कार्यकारणतां हित्वा पूर्णबोधो अवशिष्यते"** (शुकर.उप.४२) इति कण्ठरवेण सङ्कीर्णयोरेव कार्यकारणभावः तयोरेव उपाधिभागत्यागेन अद्वैतं च भवत्सम्मतमिति न त्वन्मते षष्ठीतत्पुरुषः. उभयोः शुद्धत्वेतु न क्वापि भागत्यागो अपेक्ष्यते. तदपेक्षणेतु कार्ये कारणे च उभयत्र अशुद्धत्वापादकः साङ्कर्यप्रयोजकः त्याज्यभागो अस्त्येव इति न शुद्धयोः तयोः अद्वैतं त्वन्मते. तेन शुद्धयोः 'तत्'-'त्वं'पदार्थयोः तन्मते अद्वैतसत्त्वेन इत्यादि उक्तिः

निरस्ता. किञ्च काव्यप्रकाशादिषु **“स्याद् वाचको लाक्षणिकः शब्दो अत्र व्यञ्जकः त्रिधा...वाच्यादयः तदर्थाः स्युः”** (काव्यप्र.२।५-६) इतिकथनात् पदार्थयोः इत्यत्र च वृत्तिद्वयस्वीकारपक्षेऽपि अर्थपदं वाच्यपरं लक्ष्यपरं वा इति विकल्प्य दूषयन्ति **‘तत्’-‘त्वं’पदार्थयोः इत्यत्र** इत्यादिना. **अभेदः तव सम्मत** इति. सर्वज्ञत्वा-ऽल्पज्ञत्वादिपरस्परविरुद्धधर्मशालिनोः ऐक्यस्य असम्भवात् साक्षात् तयोः स न सम्मतः इति अर्थः. किन्तु कार्यत्व-कारणत्वनिर्वाहकभागस्य त्यागेन केवल चैतन्यस्य ऐक्यं सम्मतम्. तथासति शुद्धयोः इति द्विवचनस्य अनुपपत्तिम् आहुः. **तत्पदलक्ष्ययोः** इति. **स्वरूपमात्रेति**. **‘स्वरूप’**पदं शुद्धचैतन्यपरम्. **‘मात्र’**पदम् अशुद्धत्वापादककार्यकारणभावप्रयोजकोपाधिभागव्यवच्छेदार्थम्. द्वित्वस्य उपाधिमात्रमूलकत्वाद् उपाधिरहितस्यैव शुद्धतायाः त्वन्मतेऽपि स्वीकारात् च शुद्धे द्वित्वानुपपत्तिः युक्तैव. सिद्धान्ते द्विवचनोपपत्तिञ्च दर्शयिष्यामः. तस्मात् तदुक्ता तन्मते ‘शुद्धाद्वैत’पदसङ्गतिः असङ्गतैव. अपिचैवं समासद्वयेऽपि स्वमते ‘शुद्धाद्वैत’पदसङ्गतिं स्वीकुर्वन् स्वोक्तपूर्वरीत्या ‘शुद्ध’पदव्यावर्त्यं स्वमतप्रसिद्धं पक्षद्वयेऽपि प्रदर्शय. मतान्तरप्रसिद्धव्यावर्तनार्थमेव तद् इति चेद् जितम् अस्माभिः. फलितम् आहुः **एवञ्च षष्ठि** इति. **ब्रह्मणः** मायाविद्योपाधिरहितचैतन्यस्य. **जीवस्य** इति शबलस्यापि उपलक्षणम्. अथवा विशुद्धचितैव सह जीवस्य अभेदम् इच्छन्तम् एकदेशिनं प्रति इयम् उक्तिः. स्वमते समासद्वयेऽपि तदुक्तदोषाप्रसक्तिं बोधयितुम् आहुः. **अद्वैतपदार्थः** इत्यादिना. कर्मधारये शुद्धपदार्थस्य अभेदेन अन्वयः. षष्ठीतत्पुरुषे शुद्धयोः अभेदबोधः इति विवेकः. तथाहि षष्ठीतत्पुरुषपक्षेऽपि ‘द्वैत’शब्दार्थः उक्तरीत्या द्वित्त्वप्रकारकज्ञानविरुद्धम् ऐक्यज्ञानमेव. तत्र शुद्धपदार्थस्य विषयितासम्बन्धेन अन्वयः. तथाच शुद्धयोः अद्वैतम् इत्यस्य मायासम्बन्धरहित-कार्यकारणविषयकम् अभेदज्ञानम् इति अर्थो अभिप्रेयते अतो न कापि अनुपपत्तिः. यदि अद्वैतशब्दार्थो भेदज्ञानाभावः स्यात्, स्यात् तदा भेदे वा तज्ज्ञाने वा तज्ज्ञानाभावे वा इति विकल्पावकाशः. तथा अर्थानङ्गीकारादेव पक्षत्रये उपक्षिप्तदोषाः निरस्ताः. किञ्च अभ्युपेत्यापि ब्रूमः. अस्तु अद्वैतशब्दार्थभेदज्ञानाभावैकदेशे भेदे शुद्धपदार्थस्य अन्वयः. सम्बन्धश्च शुक्तिरूप्यम् इत्यादौ समस्तस्थले

शुक्त्यादेः रूप्यादाविव स्वाधिकरणकारोपविषयत्वम्. नच शुद्धसम्बन्धी भेदः तव अप्रसिद्धः इति वाच्यं, मायोपाधिसम्बन्धमन्तरा शुद्धस्य ब्रह्मणएव ‘‘**बहु स्याम्**’’ (छान्दो.उप.६।२।३) इति इच्छया आकाशादितत्तत्कार्यरूपेण परिणततायाः ‘‘**स ह एतावान् आस**’’,‘‘**तद् आत्मानं स्वयम् अकुरुत**’’ (बृह.उप.१।४।३,तैत्ति.उप.२।७) इत्यादिकाण्व-तैत्तिरीयप्रभृतिश्रुतिभिः निश्चयात् कार्यकारणयोः उभयोः शुद्धत्वेऽपि आकाशो वायुः च वस्तुतो अतिरिक्तावेव इत्येवं कार्य-कारणयोः आरोप्यमाणस्य भेदस्य मन्मते शुद्धसम्बन्धितायाः प्रसिद्धत्वात्. एतेन सिद्धान्ते शुद्धयोरिति द्विवचनस्य उपपत्तिरपि सिद्धा. ‘‘**एकमेव**’’ इत्यादिश्रुतिभिः एकसंख्येव ‘‘**स एकधा भवति त्रिधा भवति पञ्चधा सप्तधा नवधा चैव पुनश्च एकादशः स्मृतः शतञ्च दशच एकश्चसहस्राणिच विंशतिः**’’ (छान्दो.उप.७।२७।२) इत्यादिभिः छान्दोग्यभूमविद्यादिश्रुतिभिः सङ्ख्यामात्रमपि ब्रह्मधर्मएव. तच्च ‘‘**बहु स्याम्**’’ इति इच्छया अग्निसंयोगेन जतुघृतगतद्रवत्वमिव अभिव्यज्यते. सङ्ख्यामात्रस्य ब्रह्मधर्मत्वादेव अश्वमेधप्रकरणे तैत्तिरीयसंहितासप्तमकाण्डद्वितीयप्रपाठके एकादशानुवाकम् आरभ्य यावद् अध्यायसमाप्ति ‘‘**एकस्मै स्वाहा द्वाभ्यां स्वाहा त्रिभ्यः स्वाहा**’’ (तैत्ति.संहि.७।२।११) इत्यादिना ‘‘**समुद्राय स्वाहा मध्याय स्वाहा अन्ताय स्वाहा परार्धाय स्वाहा**’’ (तैत्ति.संहि.७।२।२०) इत्यन्तेन सर्वसङ्ख्याविशिष्टपरमात्मनः आहुतयः आम्नाताः. तस्माद् जलात्मनोः समुद्रतरङ्गयोः इतीव शुद्धयोः हेतुकार्ययोः इति द्विवचनं न अनुपपन्नम्. नच वृत्त्येकदेशे अन्वयः सामर्थ्याभावानुपपन्नः इति शंक्यं, ‘‘शरैः शाततिपत्र’’ इत्यादौ अन्वयितावच्छेदकरूपेण उपस्थितवृत्त्येकदेशार्थेऽपि अन्वयस्य सर्वैः स्वीकारात्. एतेन अप्रसिद्धेः... सामर्थ्याभावेन समासाभावाप्रसङ्गाच्च इति तदुक्तं हेतुद्वयम् अपास्तम्. भेदज्ञाने अन्वयस्वीकारपक्षेऽपि अतएव इति परामृष्टो द्वितीयहेतुश्च निरस्तः. देवदत्तस्य यद् घटज्ञानम् इत्यादि उदाहरणन्तु अत्यन्तविरूपम्. तत्र देवदत्तसम्बन्धि यद् घटज्ञानं तदभावस्य अधिकरणं देवदत्तभिन्नम् इहतु शुद्धसम्बन्धि यद् भेदज्ञानं तदभावस्य अधिकरणं न भिन्नं ज्ञाने देवदत्तसम्बन्धः आश्रयिता भेदज्ञानेतु शुद्धसम्बन्धो विषयिता इति भेदात्. देवदत्तो घटं न आनयति तस्य घटज्ञानाभावाद् इतितु विज्ञाः

प्रयुञ्जतएव. घटाज्ञानं पटाज्ञानम् इति च. तत्र देवदत्तस्य वृत्येकदेशे घटज्ञाने अन्वयः अन्यथा त्वदुक्तरीत्या सप्तमीप्रसङ्गात्. 'घटाज्ञानम्' इत्यादौतु घटादिविषयकज्ञानस्य अभावः इत्येव अर्थः. अत्रापि वृत्त्येकदेशे ज्ञाने घटादेः विषयिता. अपिच भवानपि शतशः तथा प्रयुङ्क्ते. यथा संप्रति शुद्धाद्वैतपदार्थदूषणारंभएव समासद्वयस्यापि असङ्गतेः इति भवान् प्रायुङ्क्त. अत्र 'समासद्वय'शब्दार्थस्य सङ्गतावन्वयः तदभावे वा? न आद्यः, समासैकदेशे अन्वयासंभवस्य त्वया स्वीकारात्. न द्वितीयः, अनुयोगितयान्वये सप्तमीप्रसङ्गस्य त्वया उक्तत्वात्. तत्र यथा समादध्याः तथा अत्रापि समाधिम् अवधारय. प्रयोगान्तराण्यपि उदाहरिष्यन्ते. शुद्धस्य भेदज्ञाने सम्बन्धस्तु विषयिता. शुद्धयोः कार्यकारणयोः मिथ्याद्वैतविषयत्वन्तु मम प्रसिद्धमेव. द्वैतस्य मिथ्यात्वाद् मत्संमतशुद्धाद्वैतस्य सम्यक्सिद्धिः. त्वन्मते "द्वाभ्यां प्रकाराभ्याम् इतं ज्ञातम्" इति विग्रहेण 'द्वैत'शब्दवाच्यस्य नामरूपात्मकप्रञ्चस्य मिथ्याभूतस्य प्रतीतिविषयत्वेऽपि 'अद्वैत'पदेन यथा निषेधः. स्पष्टञ्च इदं मञ्जूषादिष्वपि तथा शुद्धकार्यकारणविषयकभेदज्ञानस्य भ्रमात्मकस्य निषेधः कर्तुं शक्यः. "द्वाभ्यां प्रकाराभ्याम् इतं ज्ञानं तदेव द्वैतम्" इति विग्रहेण द्वित्वे प्रकारताख्या विषयता. शुद्धयोस्तु विशेष्यताख्या सा इति तत्त्वम्. यथा तव घटादिप्रपञ्चविषयक-मिथ्याज्ञानविषयत्वं ब्रह्मणः तथा अस्माकं भेदभ्रमविषयत्वम् उपाधिसम्बन्धरहितब्रह्मात्मककार्यकारणयोः इति जानीहि. तदेतत् सर्वम् अनुसन्धाय उक्तं मूले. **तदज्ञानमूलकः** इत्यादि **अपास्त** इत्यन्तम्. एतेनैव किञ्च इदम् इत्यादि व्यावर्तये इत्यन्ता तदुक्तिरपि प्रत्युक्ता. तेषां मते कार्यस्य मिथ्यात्वं कार्य-कारणयोः औपाधिकत्वम्, अस्माकन्तु कार्यस्यापि सत्यत्वं तयोः अनौपाधिकत्वञ्च इत्यादि बहुतरतारतम्यस्य असकृद् बोधितत्वेन तत् चेत् त्वमपि स्वीकुर्याः इतिकथनस्य अशक्यत्वात्. शुद्धपदार्थभेदज्ञानयोः आश्रयाश्रयिभावस्तु नैव स्वीक्रियते. शुद्धयोः अभेदज्ञानम् इति मुख्ये अस्मत्पक्षेतु सोऽपि न विरुद्धः. अभेदस्य सत्यत्वाद् ईश्वरस्य भ्रान्तत्वानापत्तेः. किञ्च इदमेव शङ्कराचार्याः इत्याद्युक्तौ दूषणान्तरमपि आहुः **यदपि** इत्यादिना. वस्तुतश्च शुद्धयोः अद्वैतम् ऐक्यज्ञानम् इति सिद्धान्ताद् न तदीयकल्पनावकाशः इति आशयेन आहुः **अस्मन्मतेच** इत्यादि. किञ्च अस्माकं कर्मधारयपक्षो

मुख्यः तत्र ‘शुद्धाद्वैत’शब्दस्य परब्रह्मपरतायाः शीघ्रम् उपस्थितेः. षष्ठीतत्पुरुषपक्षस्तु सिद्धान्तबोधसौकर्यार्थः. अतएव मार्तण्डटीकाकृद्भिः. “‘शुद्धाद्वैत’पदे ज्ञेयः समासः कर्मधारयः अद्वैतं शुद्धयोः प्राहुः षष्ठीतत्पुरुषं बुधाः” (शु.मा.२७) इत्यस्य विवरणे कर्मधारयपक्षं व्याख्याय “अतएव स्पष्टतया बोधाय षष्ठीतत्पुरुषम् आहुः” (शु.मा.प्र.२७) इति उत्तरार्धम् अवतारयद्भिः स्पष्टतया बोधनार्थमेव पक्षान्तरादरणम् इति दर्शितम्. अभावश्च अस्मन्मते पृथक्पदार्थतया नैव अङ्गीक्रियते अतः सहस्राक्षे नापि तृतीयः इत्यादिना अभावे अन्वयपक्षे आपादिता सप्तमीप्रसङ्गादिशङ्का “**मूलं नास्ति कुतः शाखा**” इतिन्यायादेव निरस्ता इति अभिप्रेत्य आहुः **कर्मधारयसमास** इत्यादिना. यदिच शुद्धम् अद्वैतम् इत्यत्रापि कथञ्चित् स तान् दोषान् ब्रूयात् तदा प्रतिबन्दीम् आहुः **किञ्च त्वन्मतेऽपि** इति. यद्यपि प्रतिबन्द्याः अनुत्तरत्वं तथापि तत्समाधिना प्रकृतेऽपि समाधिसम्भवेन व्यासचरणैरपि “**समवायाभ्युपगमात् च**” (ब्र.सू.२।२।१३) इत्यादौ तस्याः आदरणाद् इहापि तदादरणम् अदोषः.

ननु एतावतापि षष्ठीतत्पुरुषपक्षे किम् आयातम् इति चेत्, सन्ति तादृशाः षष्ठ्यन्तघटिताअपि शतशः प्रामाणिकप्रयोगाः. यथा गीतायां “**ज्ञानेनतु तदज्ञानं येषां नाशितम् आत्मनः**” (भग.गीता ५।१६) इति. अत्र ‘**आत्मनः**’ इत्यस्य ‘**अज्ञानम्**’ इत्यत्रापि सम्बन्धः शङ्कराचार्यैः “**तदज्ञानं येषां जन्तूनां विवेकज्ञानेन आत्मविषयेण नाशितम् आत्मनो भवति**” (भग.गीता शां.भा.५।१६) इति व्याचक्षाणैः दर्शितः. शङ्करानन्दकृततात्पर्यबोधिन्याञ्च “**ज्ञानेनतु श्रवणादिसमुत्पन्नेन आत्मविषयकेण आत्मनो बुद्धेः सम्बन्धि बुद्धिनिष्ठम् इति एतद्**” (भग.गीता शं.ता.बो.५।१६) इत्यादिना सो अतिस्फुटीकृतः. **येषाम्** इत्यस्यापि तत्र सम्बन्धः श्रीधरस्वाम्यादिभिः असन्दिग्धो दर्शितः. तथाच अज्ञानपदैकदेशे ज्ञाने आत्मादेः सम्बन्धे असामर्थ्यादि, तदभावे सम्बन्धे अनुयोगिनः षष्ठ्यनुपपत्तिः. इह ‘अज्ञान’शब्दस्य ज्ञानविरुद्धावरकवस्तुपरत्वेतु ‘अद्वैत’पदस्यापि उक्तरीतिको अर्थः इति तुल्यम्. तथा “**अज्ञानञ्च अभिजातस्य पार्थ सम्पदम् आसुरीम्**” (भग.गीता १६।४) इत्यत्रापि

श्रीधरस्वामि-शङ्करानन्दादिभिः **"अज्ञानम् अविवेकः"**, **"अज्ञानं सदसद्विवेकाभावः"** इत्यादि व्यवारि. इह 'आसुरीं' 'संपदम्' 'अभिजातस्य' ज्ञानाभावएव सम्बन्धः. तस्य यज्ज्ञानं तदभावः इत्यर्थस्यतु तावकैरपि अकृतत्वाद् अनौचित्यात् च. एवञ्च षष्ठयसङ्गतिः. नच आर्षत्वं कल्प्यम्. स्वग्रन्थेषु दोषप्रसङ्गाद् अकल्पनात् च. किञ्च महाभाष्यादिषु **"अधिपरी अनर्थकौ"** (पाणि.सू.१।४।९३) इत्यादिसूत्रेषु **"उक्तार्थानामप्रयोगः"** (पातं.महाभा.१।४।९३) इत्यादयः तादृशप्रयोगाः दृश्यन्ते. एवम् अन्येऽपि शतशः सहस्रशः प्राचां प्रयोगाः द्रष्टव्याः. अथवा किम् एभिः! त्वं तावत् स्वप्रयोगानेव विचारय. यथा षष्ठीतत्पुरुषखण्डनावसरेऽपि तव अप्रसिद्धेः, भ्रमात्मकस्यापि तस्य सत्त्वे त्वत्सम्मतस्य शुद्धाद्वैतस्य असिद्धेः च इति स्वयं प्रयुङ्क्षे. इह षष्ठयन्तार्थस्य क्व सम्बन्धः सिद्धौ वा तदभावे वा? न आद्यः, असामर्थ्योक्तेः, मत्सम्मतशुद्धाद्वैतसिद्धिश्च नहि ते प्रसिद्धा. न द्वितीयः. सप्तमीप्रसङ्गात्. एवं कर्मधारयखण्डनावसरे त्वया समासद्वयस्यापि असङ्गतेः, तादृशस्य तव मते अप्रसिद्धत्वेन व्यावर्त्यालाभः, जीवस्य अशुद्धत्वेऽपि अद्वैतपदार्थस्य तत्त्वाभावाद्, मायायाः तत्सम्बन्धिनो वा अशुद्धत्वस्य वक्तुम् अशक्यत्वात् च. अध्यासस्य अशुद्धत्वेऽपि जीवस्य अशुद्धत्वाभावाच्च इत्यादयो बहुतराः तादृशाः स्वीयाः प्रयोगा द्रष्टव्याः. अत्र सप्तमीप्रसङ्गान्ताः त्वदुक्तदोषाः प्रायः प्रतिवाक्यं त्वदुक्तावेव प्रसज्यन्ते. व्यावर्त्यालाभः, अन्वयासम्भव-व्यावर्त्यालाभयोः इत्यादीनि तादृशसमासघटितपदान्यपि प्रायुज्यन्ता युष्मता. अत्र व्यावर्त्यस्य अलाभः इत्यादिरेव विग्रहः उचितो नतु व्यावर्त्ये अलाभः इति. इहापि व्यावर्त्यादेः लाभादौ सम्बन्धः तदभावे वा इत्यादि ऊह्यम्. एवं तदनन्यत्वसूत्रेऽपि अन्यत्वाभावमेव अर्थं वदतः तव **"तयोः कार्य-कारणयोः अनन्यत्वं"** (ब्र.सू.शां.भा.२।१।१४) इति स्वभाष्येऽपि स्वोक्तदोषप्रसंगः भामत्यादौ **'तयोः'** इति षष्ठया अवगमात्. तस्माद् मार्तण्डे एकत्र दोषलेशान् आपादयितुं शतकृत्वः तद्दोषघटितवाक्यानि प्रयुञ्जानो भवान् भास्करे पङ्कसीकरनिकरं संपर्चयितुं महति पङ्कगर्ते प्रोच्चैः पतन्तम् अनुकुरुते. एवञ्च **"अज्ञानञ्च अभिजातस्य"** (भग.गीता १६।४) इत्यादिवद् अभावेऽपि अनुयोगितया अन्वयः

शक्यवचनः. ‘अभाव’पदेन अभावे उपात्ते अनुयोगिनः प्रायः सप्तमीनियमो नतु नञ्समासघटितपदप्रयोगे. प्रतियोगितया अन्वयस्यतु शङ्कापि बालप्रलापकल्पा. ब्रह्मात्मककार्यकारणयोः नित्यत्वात्. नञ्समासस्थले पदान्तरोपात्तवस्तुनः प्रतियोगितया अन्वये सामर्थ्यस्य अभावात् च. अन्यथा वायौ गन्धरूपयोः अभावः इति अर्थे रूपस्य अगन्धः इति प्रयुज्येत. तदेतत् सर्वम् अनुसन्धाय प्रकृते निरनुयोज्यानुयोगं निग्रहस्थानं वादिनो बोधयितुम् अभियुक्तोक्तिम् आहुः **उक्तञ्च** इति. निग्रहस्थानं तु लक्षितं गौतमेन. ‘‘**विप्रतिपत्तिः अप्रतिपत्तिश्च निग्रहस्थानम्**’’ (गौ.न्या.सू.१।२।१९) इति. अत्र अप्रतिपत्तिस्वरूपञ्तु तद्भाष्ये ‘‘**परेण स्थापितं वा न प्रतिषेधति प्रतिषिद्धं वा न उद्धरति**’’ (गौ.न्या.सू.भा.१।२।१९) इति वात्स्यायनः. तथाच अनिग्रहस्थाने ‘‘निगृहीतोऽसि’’ इति कथनाय परेण आपादितदोषेषु भूयः तदुक्तावेव आपाद्यमानेषु तदुद्धारे तस्य असामर्थ्यात् तस्यैव पराजयस्थानं सुस्थिरम्. पञ्चमेऽपि ‘‘**अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः**’’ (गौ.न्या.सू.५।२।२३) इति उक्तेः. वस्तुतस्तु अभावो अस्मन्मते न पदार्थान्तरम् अतो न इयं शङ्का नापि समाधानम्. किन्तु ‘‘ज्ञानेनतु तदज्ञानम्’’ इत्यादौ भवताम् आत्मादिसम्बन्ध्यज्ञानमिव अस्माकं शुद्धसम्बन्ध्यभेदज्ञानम् इति निरवद्यम्. तस्मात् समासद्वयस्यापि सङ्गतेः शुद्धाद्वैतमार्तण्डप्रकाशितः शुद्धाद्वैतपदार्थः सङ्गतएव इति शुभम्।।२।।

।। इति सहस्राक्षस्थ द्वितीयश्लोकस्थ खण्डनम्।।

* * *

(१) [ईशानः सृजति इच्छयैव यदि तां केन आत्मनात्माश्रयाद् ।।
नान्येष्टच्चापि भयात् श्रुति-स्मृति-गणैर् इच्छोद्भवः कालतः ।।
उद्बुद्धाज्जन-कर्मणो बत तथा अविद्याख्य-मायावशात् ।।
हेतुत्वं च परस्य लक्षणम् इदं शाखेन्दुवद् वान्यगम् ।।३।।

अथ ‘‘रमणार्थम् इदं सर्वं ब्रह्मैव स्वेच्छया अभवद्’’ (शु.मा.१२) इति शुद्धाद्वैतमार्तण्डोक्तम् ईश्वरेच्छामात्रस्य जगद्हेतुत्वं खण्डयति ‘‘ईशानः सृजति’’ इति. ‘एव’कारेण कर्मादिव्यावृत्तिः. तत्र यदि ईश्वरेच्छा नित्या स्यात् तदा सर्वदा सर्वं कार्यं स्यात्, तस्य च सर्वे भावविकाराः स्युः. एकस्याअपि इच्छायाः प्रति-वस्तु कालभेदेन आकारस्य धर्मस्य वा भेदकल्पनेतु लोकविरोधः. लोके ज्ञानादिवद् इच्छायाअपि अनुभवबलेन समानविषयकत्वेन स्थित्यङ्गीकारात्. तत्र लौकिकेच्छातो अत्यन्तवैलक्षण्येऽपि ‘इच्छा’शब्दप्रयोगस्तु आदैचो ‘वृद्धि’ शब्दप्रयोगइव पारिभाषिकः स्यात्, स्याद् वा ‘इच्छा’शब्दस्य नानार्थता ‘‘सो अकामयत’’ (बृह.उप.१।२।४, तैत्ति.उप.२।६) इति श्रौतव्यवहारस्य तथापि उपपत्तेः. तस्य अनित्येच्छापक्षपरतायाः वक्ष्यमाणत्वाच्च.]

(२) अग्रे च ईशानः सृजति इच्छयैव **इत्यादिना ईश्वरेच्छायाः जगद्धेतुत्वखण्डनपूर्वकं स्वमतव्यवस्थापनं कृतं तत्र क्रमः** ‘‘रमणार्थम् इदं सर्वं ब्रह्मैव स्वेच्छया अभवद्’’ (शु.मा.१२) इति शुद्धाद्वैतमार्तण्डोक्तम् ईश्वरेच्छामात्रस्य जगद्धेतुत्वं खण्डयति (न सम्भवति). यदि ईश्वरेच्छा नित्या स्यात् तदा सर्वदा सर्वं कार्यं स्यात्, तस्य च सर्वे भावविकाराः स्युः. एकस्याअपि इच्छायाः प्रतिवस्तु कालभेदेन आकारस्य धर्मस्य वा भेदकल्पनेतु

लोकविरोधः. लोके ज्ञानादिवद् इच्छायाअपि अनुभवबलेन समानविषयकत्वेन स्थित्यनङ्गीकारात्. तत्र लौकिकेच्छातो अत्यन्तवैलक्षण्येऽपि 'इच्छा'शब्दप्रयोगस्तु आदैचोः 'वृद्धि'शब्दप्रयोगइव पारिभाषिकः स्याद् इत्यादिः. अत्र उच्यते ब्रह्मैव स्वेच्छया स्वात्मभूतया जगद्रूपम् अभवत्. तत्र हेतुः रमणेच्छैव प्रतीयते. कुतः? तथैव वेदे प्रतिपादनात्. तथाच श्रुतयः "एकाकी न रमते स द्वितीयम् ऐच्छद् (बृह.उप.१।४।३) "बहु स्यां प्रजायेय" "सो अकामयत बहु स्यां प्रजायेय इति" (तैत्ति.उप.२।६) "तद् आत्मानं स्वयम् अकुरुत" "...सत् च त्यत् च अभवद्" (तैत्ति.उप.२।७,२।६) इत्यादयः. नच मायया तथाभवनं, श्रुतिषु 'माया'वाचकपदाभावात्. यदि "माया अकुरुत" इति स्यात् तदा तथैव स्वीकृतं स्यात्. वैदिकानां वेदैकसमधिगम्ये अर्थे श्रुतेरेव प्रमाणत्वात्. कुतर्काश्रयणेतु अनवस्था स्याद् मोक्षाभावः च स्यात्. अतएव उक्तं "तर्काप्रतिष्ठानादपि अन्यथा अनुमेयम् इति चेद् एवमपि अविमोक्षप्रसंगः" (ब्र.सू.२।१।११) इति. ननु ब्रह्मणो जगद्रूपत्वे तस्य विकारित्वापत्तिः अतो मायया तथात्वमेव अंगीकरणीयम्. एवञ्च मायायाएव विकारित्वं ब्रह्मणः च कूटस्थत्वेन निर्विकारत्वमेव इति चेद्, न; ब्रह्मणः कार्याकारत्वेऽपि विकारित्वं न सम्भवति सर्वभवनसमर्थत्वात्. अन्यथा उपादानाभिन्ननिमित्तत्वमपि न स्यात्, तस्यापि लोके अदृष्टत्वात्, कल्पनायाश्च तव लोकानुसारित्वमेव. अस्मन्मतेच यथा वेदे उपदिष्टं तथैव मन्तव्यम्. वेदेच निर्विकारस्यैव जगत्कारणत्वं प्रतिपादितम् अतः तथैव मन्तव्यम्. अतएव मृदादीनां दृष्टान्तत्वेन उपादानं वेदे कृतम्. नहि मृदो घटादिरूपत्वेऽपि विकारित्वम्. विकारस्तु अन्यथाभावो यथा दुग्धस्य दधिरूपतायाम्. नहि एवं मृदोऽपि

अन्यथाभावः, अन्यथा घटतिरोभावे पुनः मृद्रूपता न स्याद् दध्नोः दुग्धरूपतेव. नापि मृदादीनां मायया घटादिभावः मृत्त्वेन ज्ञाने घटादीनां बाधः स्यात् किन्तु मृदादीनाम् अवस्थाविशेषएव घटादिः. एवं ब्रह्मणोऽपि अवस्था विशेषएव जगद् इति अन्यत्र विस्तरः. साच ईश्वरेच्छा नित्या. नच इच्छायाः नित्यत्वे सर्वदा सर्वकार्योत्पत्तिप्रसंगः इति वाच्यं; यदा यथा यस्य उत्पत्तिः वृद्धिः तिरोभावादिः इच्छायाः विषयीभूतः तदा तथा तस्याः आविर्भावादिः जायते न अन्यथा. त्वन्मतेऽपि ब्रह्मणो नित्यत्वेन सर्वदा सर्वकार्योत्पत्तिः कुतो न स्यात् ? तदेतत् सर्वम् अग्रे वक्ष्यते. नच आकारबाहुल्यं सर्वकार्याकारायाः एकस्याएव इच्छायाः कल्पनात् तथैव श्रुत्या निरूपणात्. नहि लोकानुसारिण्येव वेदे कल्पना. लोके शरीरान्तःकरणादिविशिष्टएव इच्छादर्शनेन ईश्वरस्यापि शरीरान्तःकरणादिकं लोकानुसारिभिः भवद्भिः कुतो न कल्प्यते. लोके भवन्मते रजताधिष्ठानस्य अनित्यत्वाद् जगद्भ्रमाधिष्ठानस्य ब्रह्मणो मिथ्यात्वं च कुतो न अङ्गीक्रियते. लोके जगद्धेतुभूतायाः इच्छायाः अदर्शनेन लोकेच्छातो अत्यन्तविलक्षणत्वेन 'इच्छा'पदस्य पारिभाषिकत्वम् ईश्वरेच्छायां भवन्मतेऽपि कुतो न स्याद् इति विभावनीयम्. 'स्याद्' वा 'इच्छा' शब्दस्य नानार्थता **इत्यादि प्रलापस्तु अनभ्युपगमेनैव परास्तः .**

(३) अथ नित्यायाः भगवदिच्छायाः श्रुतिसिद्धेः जगत्कारणत्वे प्रत्यवस्थायिनं मायादेः तत्कारणत्वबोधकं जगद्जन्मादिकारणत्वरूपश्रौतसौत्रब्रह्मलक्षणबाधकम्. सहस्राक्षे ईशानः सृजति इच्छयैव यदि इति तृतीयं श्लोकं अथ रमणार्थम् इदम् इत्यादिना ब्रह्मणो न अज्ञत्वम् इत्यन्तेन व्याख्यानेन सहितम् **अग्रे च ईशानः** इत्यादिना **अलम् अप्रकृतविचारेण** इत्यन्तेन खण्डयिष्यन्तः अथ रमणार्थम् इत्यादिं वक्ष्यमाणत्वात् च

इत्यन्तं भागं तावत् परिहरन्ति. **अत्र उच्यते** इत्यादिना **अनभ्युपगमेनैव परास्तः** इत्यन्तेन. तत्र मार्तण्डकारिकायाम् 'एव'कारः स्वाव्यवहितपूर्वब्रह्मपदेनैव सम्बध्यमानः उपादानान्तरकर्त्रन्तरएव व्यवच्छिनत्ति नतु कारणान्तरं, नापि टीकाकृता तस्य उत्तरत्र अन्वयो व्याख्यातः. अतः सहस्राक्षे शुद्धाद्वैतमार्तण्डोक्तम् ईश्वरेच्छामात्रस्य जगद्धेतुत्वम् इति न वक्तुं युक्तं, किन्तु निबन्धादिसिद्धं (त.दी.नि.१।२७) शङ्कराचार्यपरमगुरुगौडपादनिरूपितं वा (सगौडपादकायेषु माण्डुक्योपनिषद्भाष्ये द्र.३।५) तदिच्छामात्रस्य जगदाविर्भावे प्रथमतरकरणत्वम् इत्येव उचितं वक्तुम्. 'प्रथमतर'इति विशेषणानुपादानेतु अस्माभिः कर्मादीनाम् अवान्तरकारणत्वस्य अप्रत्याख्याततया अस्मदनुवादे 'एव'कारेण कर्मादिव्यावृत्त्युक्तिः असंगतैव स्यात्. स्पष्टं तेषाम् अवान्तरकारणत्वन्तु आकरे "**वैषम्यनैर्घृण्ये न सापेक्षत्वाद्**" (ब्र.सू.२।१।३४) इति "**कृतप्रयत्नापेक्षस्तु**" (ब्र.सू.२।३।४२) इत्याद्यधिकरणेषु **रमणेच्छैव** इति रमणार्थमेव जगद्रूपेण आविर्भवनम् इतितु विशेषतः प्रमाणोपन्यासपुरःसरं तदीयनवमश्लोकनिरसनावसरे दर्शयिष्यामः. इहतु इच्छायाएव जगदाविर्भावे करणत्वं पूर्वम् उपपादयिष्यते. अथ भगवान् स्वेच्छयैव स्वरूपादेव प्रपञ्चम् आविष्कुरुतः इति बोधकानि प्रमाणानि तावद् उपन्यस्यन्ते. तत्र ऋक्शाखायाम् ऐतरेयब्राह्मणे "**आत्मा वा इदम् एकएव अग्रे आसीद् न अन्यत् किञ्चनम् इषत्, सः ईक्षत लोकान्नु सृजाः इति स इमाँ लोकान् असृजत**" (ऐत.उप.१।१।१) तैत्तिरीयाणाम् आनन्दवल्ल्यां "**सो अकामयत** बहु **स्यां प्रजायेय इति, सः तपो अतप्यत सः तपः तप्त्वा इदं सर्वम् असृजत**" (तैत्ति.उप.२।६) मैत्रायणीयोपनिषदि "**प्रजापतिः वा एषो अग्रे अतिष्ठत् सः न अरमत एकः स आत्मानम् अभिध्यायद् बह्वीः प्रजाः असृजत**" (मैत्रा.उप.१।२।६) इति वाजसनेयिनां पुरुषविधब्राह्मणे "**आत्मैव इदम् अग्रे आसीत् पुरुषविधः सो अनुवीक्ष्य न अन्यद् आत्मनो अपश्यद्**" (बृह.उप.१।४।१) इति उपक्रम्य "**सवै नैव रेमे तस्माद् एकाकी न रमते स द्वितीयम् ऐच्छत् स** ह **एतावान् आस**" (बृह.उप.१।४।३) छन्दोगानां श्वेतकेतुविद्यायां "**सदेव सोम्य! इदम् अग्रे आसीद् एकमेव अद्वितीयम्**" (छान्दो.उप.६।२।१) इति उपक्रम्य "**तद् ऐक्षत** बहु **स्यां**

प्रजायेय इति तत् तेजो असृजत’’ (छान्दो.उप.६।२।३) इत्यादि आथर्वणानां गोपथब्राह्मणे ‘‘**ब्रह्म ह वा इदम् अग्रे आसीत् स्वयन्तु एकमेव तद् ऐक्षत महद् वै यक्षं तद् एकमेव अस्मि हन्त अहम् अदेव मन्मात्रं द्वितीयं देवनिर्ममे**’’ (गोपथब्रा.१।१।१) इति तेषां प्रश्नोपनिषदि ‘‘**स ईक्षां चक्रे**’’ (प्रश्नोप.६।३) इति उपक्रम्य ‘‘**स प्राणम् असृजत, प्राणात् श्रद्धां, खं वायुः, ज्योतिः आपः, पृथिवी इन्द्रियं, मनो अन्नम्, अन्नाद् वीर्यं, तपो, मन्त्राः, कर्मलोकालोकेषु च नाम च**’’ (ब्र.सू.भा.र.१।१।५) इति ऋग्यजुःसामाथर्वस्सु एवमादीनि तत्र - तत्र श्रुत्यन्तराण्यपि अनुसन्धेयानि. एवं वेदावाच्यतां मायापरपर्यायप्रकृतिकारणवादं च निरस्यन् सूत्रकारोऽपि आह ‘‘**ईक्षतेः न अशब्दं**’’ (ब्र.सू.१।१।४) ‘‘**कामाच्च न अनुमानापेक्षा**’’ (ब्र.सू.१।१।१७) ‘‘**अभिध्योपदेशात् च**’’ (ब्र.सू.१।४।२४) इत्यादि. एवमादिषु ब्रह्मणा जगतः उत्पादने इच्छायाएव साधकतमत्वश्रवणात् सैव कारणं नतु विशेषोद्बुद्धजीवकर्माणि माया वा तदश्रवणात् . ग्रहिलतया तथांगीकारेतु श्रुतहान्यश्रुतकल्पनापातात् . यदि श्रुतिः तथा अभिप्रेयात् त्वदुक्तां प्रक्रियां सैव वदेद् नतु इच्छामात्रेण सर्गम् . तदेतद् अभिप्रेत्य आहुः **नच मायया** इत्यादिना, **श्रुतिषु** सर्गप्रकरणश्रुतिषु. **माया अकुरुत** इति ‘‘**तद् आत्मानम्**’’ (तैत्ति.उप.२।७) इति स्वपरिणामबोधकवाक्यवद् एवं श्रुतिवाक्यं यदि स्याद् इति भावः. श्वेताश्वतरे पुराणेषु च उच्यमाना मायातु तत्रैव तच्छक्तितया प्रतिपादितेति सर्वभवनसामर्थ्यरूपा सा न ब्रह्मातिरिक्ता. अतो ब्रह्म यथा - यथा भवनम् इच्छति तथा - तथा स्वसामर्थ्येनैव भवति इति तत्र अभिप्रायः. नतु भावरूपाज्ञानस्वरूपा त्वदभिमता सा श्रूयते. विशेषस्तु वक्ष्यते **अनवस्था स्याद्** इति कैश्चिद् बुद्धिमद्भिः यत्नेन उत्प्रेक्षितापि तर्काः बुद्धिमत्तरैः इतरैः आभास्यन्ते, तदुत्प्रेक्षिताश्च अन्यैः बुद्धिमत्तमैः इति एकत्र तर्के प्रतिष्ठाभावाद् अनवस्था. **मोक्षाभावश्च** इति अलौकिके अर्थे यथा श्रुतप्रतिपत्तिमन्तरा केवलतर्कैः पर्यवसानस्य असिद्ध्या संशयात्मत्वानपाये साधनासम्पत्त्या मोक्षाभावः. एतेन तर्काप्रतिष्ठानसूत्रस्य अर्थो दर्शितः. **अतएव उक्तम्** इति अविरोधस्य प्रथमे पादे व्यासचरणैः उक्तम् इति अर्थः. अथ कण्ठरवेण अस्मत्सम्मतप्रक्रियायाः श्रुतितो असिद्धावपि युक्त्या तां

साधयिष्याम: इति आशयेन शङ्कते **ननु** इति, समादधते **कार्याकारत्वे** इत्यादिना. **न सम्भवति** इति यथा "**तद् आत्मानम्**" (तैत्ति.उप.२।७) इति श्रुत्या उपादानत्वं तथा "**अजरत्वामरत्वाविक्रियत्वादि**" श्रुत्या (द्र.नृ.उप.७) निर्विकारत्वमपि यथागमं तत्र प्रतिपत्तव्यमेव तस्य औपनिषदत्वात्. श्रुतिभि: च "**तद् एजति तद् न एजति**" (ईशा.उप.५) इत्यादिना तत्र विरुद्धधर्माश्रयताया: बोधनात्. **अन्यथा** इति श्रुतिम् अनाश्रित्य तर्काश्रयणे **वेदे च** इत्यादि. मुण्डकादिषु "**अथ परा यया तद् अक्षरम् अधिगम्यते यत्तद्-अद्रेश्यम् अग्राह्यम् अगोत्रम् अवर्णम् अचक्षु: श्रोत्रं तद् अपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तद् अव्ययं यद् भूतयोनिं परिपश्यन्ति धीरा:**" (मुण्ड.उप.१।१।५-६) इत्यादौ अदृश्यत्वादिना निर्विकारस्यैव '**भूतयोनिं**' पदेन जगत्कारणम् उक्तम्. अग्रे च अनुपदं दृष्टान्तपूर्वकं "**तथा अक्षरात् सम्भवति इह विश्वम्**" (मुण्ड.उप.१।१।७) इति तदेव स्फुटीकृतम्. एवं तत्र-तत्र उपनिषत्सु द्रष्टव्यम्. **अतएव** इति अविकृतपरिणामवादस्यैव वेदाभिप्रायगोचरत्वादेव. **वेदे कृतम्** इति छान्दोग्यादिषु "**यथा सोम्य! एकेन मृत्पिण्डेन**", "**यथा सोम्य! एकेन लोहमणिना**" (छान्दो.उप.६।१।४-५) इत्यादिना कृतम्. '**विकारस्तु' अन्यथाभाव** इति स्वासाधारणधर्मपरित्यागपुर:सरः पुन: कारणभावप्रतिरोधिधर्मान्तरोदयो विकार:, यथा दुग्धस्य दधिभावे दुग्धासाधारणधर्मस्य माधुर्यादे: परित्याग:, पुन: दुग्धभावापत्तिप्रतिरोधिनो अम्लत्वघनत्वादे: उदयश्च. श्रुत्युक्तानां मृत्सुवर्णाय:प्रभृतीनान्तु घट-कटक-कटाहादिभावेऽपि तदसाधारणधर्माणां गन्धवत्त्वकषपट्टिकारोहित्वकृष्णकठिनधातुत्वादीनां न परित्यागो नापि घटादीनां भूय: कारणभावानापत्ति:. अतएव घटादे: पाकादिदशायां धर्मान्तरोदयेऽपि न दोष: तस्य कारणभावापत्तिप्रतिरोधित्वाभावात्. किञ्च यदि मृदादे: श्रौतदृष्टान्तस्य मायया घटादिभाव: स्यात्, स्यात् तर्हि ब्रह्मणोऽपि तया प्रपञ्चभाव: तदेवतु न अस्ति इत्याहु: **नापि** इत्यादि, यथा रज्जुत्वेन ज्ञानादेव तत्र सर्पप्रत्ययो न भवति तथा मृत्त्वादिना ज्ञानेऽपि घटादिप्रत्यय: तथा सति न स्यात्. घटाद्याविर्भावे कुलालादिव्यापारोऽपि न अपेक्ष्येत. नहि रज्जौ सर्पप्रत्यये सर्पिण्या गर्भधारणप्रसवाद्यपेक्ष्यते. एतत् च सर्वं

पुरस्तात् प्रपञ्चयिष्यते **अन्यत्र विस्तरः** इति भाष्यतत्प्रकाशनिबन्धावरणभंगादिषु विस्तरः. तस्माद् अन्यथानुपपत्त्यापि इच्छया ब्रह्मणः सर्वरूपेण भवनम् इति श्रौती सर्गप्रक्रियैव आदरणीया इति अभिसन्धिः.

अथ **साच ईश्वरेच्छा** इत्यादेः **अग्रे वक्ष्यते** इत्यन्तस्य अयम् अभिप्रायः : साच ब्रह्मधर्मत्वाद् नित्यैव "**अनुच्छित्तिधर्मा:**" (बृह.उप.४।५।-१४) इति मैत्रेयीब्राह्मणादिषु तद्धर्माणां नित्यत्वाम्नानात्. नच यदि ईश्वरेच्छा नित्या स्यात्, तदा सर्वदा सर्वं कार्यं स्यात् तस्य च सर्वे भावविकाराः स्युः इति वाच्यम्. सृष्ट्यधिकरणे स्थूले कालोपाधौ क्रमिकेषु सूक्ष्मकालोपाधिषु अस्मिन् काले अस्मिन् देशे इदम् एतद्द्वारा एवम् आविर्भावनीयं स्थापनीयं वर्धनीयं विपरिणमनीयम् इति निखिलप्रापञ्चिकपदार्थानां सामान्यतो विशेषतः च तथा विषयीकारात्. तेनैव क्रमेण सर्वभवनौचित्येन सर्वकार्याणां यास्कोक्तानां तत्-तद्भावविकाराणां च यौगपद्यस्य अप्रसक्तेः. दृश्यते च इत्थंकारं लोकेऽपि महाराजादीनां समयसमयः अमुष्मिन्-अमुष्मिन् अवसरएव अदोऽदः कार्यम् इति महाराजादीनांहि "श्वः प्रातः उपवनं यास्यामः, संगवेऽक्षैः क्रीडिष्यामो, मध्यान्हे भोक्ष्यामो, अपराण्हे संगीतं श्रोष्यामः, सायं नन्द्यावर्तं प्रवेक्ष्यामः" इत्यादीच्छायाः पूर्वमेव सत्त्वेऽपि नहि तत्-तत्कालनियतस्य तस्य-तस्य कार्यस्य यौगपद्यम् आपद्यते. इयांस्तु विशेषः, लौकिकेश्वराणां संकल्पः क्वचित् फलं साधनं विषयं वा व्यभिचरति नतु परमेश्वरस्य इति. इदमेव आलोचनं "**स तपो अतप्यत:**" (तैत्ति.उप.२।६) इति श्रुतौ 'तपः' शब्देन उच्यते "**यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः**" (मुण्ड.उप.१।१।९) इति मुण्डकश्रुतेः. "**'तपः' आलोचने**" (द्र.तैत्ति.उप.शांक.भा.२।६) इत्यतः औणादिको असुन्. सन्तापार्थका-'ऽसुन'न्ताऽऽदरेतु जीवतौल्याद् अनीश्वरत्वम् आपद्येत. ईश्वरान्तराभावेन "**फलम् अतः**" (ब्र.सू.३।२।३८) इति अधिकरणं च विरुध्येत. नच क्रीडने कालापेक्षायां द्वैतं पारतन्त्र्यं वा शङ्क्यम्. दशमस्कन्धे "**यत्र येन यतो यस्य यस्मै यद्-यद् यथा यदा स्याद् इदं भगवान् साक्षात् प्रधानपुरुषेश्वरः**" (भाग.पुरा.१०।८२।४) इति सप्तमस्कन्धे नवमाध्याये

''यस्मिन् यतो यर्हि येन च यस्य यस्माद् यस्मै यथा यदुत यस्तु अपर: परो वा भाव: करोति विकरोति पृथक् स्वभाव: सञ्चोदित: तदखिलं भवत: स्वरूपम्'' (भाग.पुरा.७।९।२०) इत्येवमादिषु सर्वस्यापि भगवद्रूपतोक्ते:. अत्र **'यदा'**-**'यर्ही'**तिपदाभ्यां तत्तदधिकरणकालोपाधीनामपि तदनतिरिक्तत्वं बोध्यते. भवन्मतेऽपि ब्रह्मण: कारणत्वे तस्य नित्यतया मायाया: तत्त्वे तस्या: अनादितया च सर्वदा सर्वकार्यादिप्रसंगादिदोषाः दुरुद्धराएव इति पुरस्तात् प्रपञ्चयिष्यते. **नच आकार:** इत्यादे: **परास्त**ः इत्यन्तस्य अयम् आशय: : यत्तु सहस्राक्षे एकस्यापि इत्यादि अंगीकाराद् इत्यन्तम् उक्तं, तदसत्. लोके अपेक्षाबुद्धिवद् ''विद्याधने मे भूयास्ताम्'' इत्यादि ईच्छाया: अनेकविषयावगाहित्वानुभवाद् नापि लोकविरोधो दोषः. **''पश्यति अचक्षु: स: शृणोति अकर्ण:''** (श्वेता.उप.३।१९). **''गृह्यमाणै: त्वम् अग्राह्यो विकारै: प्राकृतै: गुणै:''** (भाग.पुरा.१०।१०।३२) **''निर्दोषपूर्णगुणविग्रह: आत्मतन्त्रो निश्चेतनात्मकशरीरगुणै: च हीन:''** (महाभा.ता.नि.१।११) इत्यादि श्रुतिस्मृतिगणै: भगवद्गुणानाम् अप्राकृतत्व-सिद्धे: अन्यथा सर्वं विषयीकुर्वत् तस्य एकं नित्यं ज्ञानमपि लोकविरोधाद् न शक्येत वक्तुम्. नच इष्टापत्ति: विष्णुसहस्रनामभाष्ये **''अमृत्यु: सर्वदृक् सिंह:''** (विष्णुस.ना.३५।१९८,१९९,२००) इत्यत्र **''प्राणिनां कृताकृतं सर्वं पश्यति स्वाभाविकेन बोधेन इति सर्वदृक्''** (विष्णुस.ना.शां.भा.३५।१९९) इति **''सर्वदर्शी विमुक्तात्मा''** (विण्णुस.ना.६१।४५१,४५२) इत्यत्र **''सर्वेषां प्राणिनां कृताकृतं सर्वं पश्यति स्वाभाविकेन बोधेन इति सर्वदर्शी''** (विष्णुस.ना.शां.भा.६१।४५१) इत्येवमादिषु शङ्कराचार्यैरपि तस्य नित्यैकज्ञानस्य उरीकारात्. नच नाना ज्ञानानि कल्प्यानि तेषां युगपदेकाधिकरणवृत्तिताया: लोकविरुद्धत्वे घट्टकुटीप्रभातापातात्. सर्वविषयकज्ञानानंगीकारेच **''य: सर्वज्ञ: सर्वशक्ति:''** (   ) **''स वेत्ति वेद्यं नच तस्य अस्ति वेत्ता''** (श्वेता.उप.३।१९) इति मुण्डकश्वेताश्वतरादिश्रुतयः. **''वेदाहं समतीतानि वर्तमानानि च अर्जुन! भविष्याणि च भूतानि मां तु वेद न कश्चन''** (भग.गीता ७।२६) इत्यादिस्मृतयश्च व्याकुप्येयु:. नच पर्यायेण सर्वज्ञत्वं शङ्क्यं **''सर्वएव हि सर्वेषां भवन्ति क्रमशो मिथ:''** (भाग.पुरा.६।१६।५)

इति श्रीभागवतोक्तरीत्या पर्यायतः सर्वज्ञतायाः जीवेऽपि सम्भवेन ईश्वरमात्रे तथात्वबोधकश्रुत्यादिविप्लवानपायात्. “**तत् त्वम् असि**” (छान्दो.उप.६।८-।७) इत्यादौ स्वेष्ट-सर्वज्ञत्व-किञ्चिज्ज्ञत्वादि त्याज्यभागव्यवस्थाभंगप्रसंगात् च. “**तानि अहं वेद सर्वाणि न त्वं वेत्थ परंतप**” (भग.गीता ४।५) इत्यादि सार्वदिकसर्वज्ञत्वबोधकप्रमाणविरोधात् च. पर्यायेण सार्वज्ञ्ये अभिप्रेते तत्-तत्काले तत्-तज्जन्मज्ञानस्य अर्जुनेऽपि सत्त्वेन “**न त्वं वेत्थ**” इति निषेधो न उपपद्येत. अथ श्रुत्याद्यनाकुलत्वाय सदा सार्वज्ञ्यं तस्य स्वीक्रियेत तदा तानि ज्ञानानि नाना एकमेव वा? न आद्यः, एककालावच्छेदेन अनेकेषां तेषां सामानाधिकरण्यस्य बहुकालावस्थायित्वस्य च लोकविरुद्धत्वात्. यदिच ईश्वरधर्मेषु लोकविरोधः सह्येत तर्हि तं सोढ्वा लाघवाद् एकमेव तत्सर्वावगाहि स्वीक्रियताम्. लोकेऽपि समूहालम्बनानां ज्ञानविशेषाणाम् अनेकावगाहित्वस्य दर्शनेन प्रथमपक्षवत् प्रबललोकविरोधाभावात् च. एवम् ईश्वरज्ञानस्य सिद्धे एकत्वे तदिच्छायापि तथात्वम् अस्तु. तस्य ज्ञानसमानविषयकत्वनियमात्.

किञ्च कार्यमात्रं प्रति ईश्वरेच्छाप्रयत्नौ कारणं न वा? न द्वितीयः. “**सो अकामयत.. इदं सर्वम् असृजत**”(तैत्ति.उप.२।६), “**कर्तारम् ईशं पुरुषं ब्रह्मयोनिम्**” (मुण्ड.उप.३।१।३) “**अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते**” (भग.गीता १०।८) इति “**तपामि अहम् अहं वर्षं निगृह्णामि उत्सृजामि च**” (भग.गीता ९।१९) इत्यादिकर्तृत्वादिबोधकश्रुतिस्मृतिशतपीडापत्तेः. लोकायतिकादितन्त्रनिरीश्वरवादापत्त्या श्रुतिप्रभृतिसर्वविप्लवप्रसक्तेः च. आद्यः चेत् तत्तद्विषयिण्यः इच्छाः नानाः एकैव वा? न प्रथमः. लोके एकैकस्याः तस्याः त्रित्रिक्षणावस्थायित्वनियमेन अनेकासां तासां यौगपद्यस्य लोकविरुद्धत्वात्. यदिच ईश्वरधर्मेषु तद्विरोधस्य अकिञ्चित्करत्वम् आश्रीयेत तर्हि तं सोढ्वा लाघवाद् एकैव इच्छा सर्वानुगता स्वीक्रियताम्. इच्छाविशेषाणाम् अनेकविषयावगाहितायाः अनुभवेन प्रथमपक्षवत् प्रबलतद्विरोधाभावाच्च. नच पर्यायेण तत्-तदिच्छा कल्प्या कार्ययौगपद्यानुपपत्तेः. एतेनापि ज्ञाननित्यत्वं दृढीकृतं तदन्तरेण इच्छायाः तामन्तरेण कार्याणां च असम्भवात्. समानविषयकत्वं

च तद्विषयविषयकत्वम्. इहच इच्छायाः किम्विषयविषयकत्वेन स्थितिः अनुभवबलेन अंगीक्रियते ज्ञानादिसमानविषयकत्वेन इति चेद्, न; ज्ञानादिवद् इति दृष्टान्ततया उपन्यासासङ्गतेः. अतः एकैकविषयावगाहित्वाभिप्रायेण समानविषयत्वोक्तिस्तु प्रेक्षावच्छैलीविरुद्धाः. यच्च तत्र लौकिकेच्छातः इत्यादि वक्ष्यमाणत्वात् च इत्यन्तम् अभ्यधायि तदपि आहोपुरुषिका मात्रम्. 'इच्छात्वं' हि नाम इच्छति इति प्रमितिगोचरेच्छात्वजातिमत्त्वं प्रवृत्तेः साक्षाद् अनुकूलगुणत्वं वा. अत्र आद्यलक्षणे प्रमितिः प्रत्यक्षशाब्दाद्यन्यतमा विवक्ष्यते. तेन इश्वरेच्छायां तादृशशाब्दविषयत्वाद् न अव्याप्तिः द्वितीयस्मिंश्च ज्ञाने अतिप्रसङ्गवारणाय 'साक्षात्'पदम्. विषये तद्वारणाय 'गुण'पदं, परेतु विषयस्यापि ज्ञानेच्छाद्वारैव अनुकूलत्वम् अभिप्रेत्य गुणपदं त्यजन्ति. आस्ताञ्च एतत् तथात्वं च ईश्वरेच्छायामपि समन्वेत्येवेति न अत्यन्तवैलक्षण्यं तस्याः उद्देश्यताख्यविषयतावत्त्वेन तौल्याच्च. अतो न तत्र 'इच्छा'शब्दप्रयोगः पारिभाषिको नानार्थो वा. सः नित्यत्वसर्वावगाहित्वाभ्यामेव अत्यन्तवैलक्षण्यस्वीकारेतु ईश्वरज्ञाने 'ज्ञान'शब्दप्रयोगोऽपि पारिभाषिकः स्यात्; स्याद् वा 'ज्ञान'शब्दस्य नानार्थता. किञ्च नित्यत्वेन विभुत्वात् सर्ववस्तुसम्बन्धित्वेन धर्मान्तरैः च लौकिकप्रतिबिम्बतो विलक्षणतमेऽपि जीवे लोकविरोधम् अनुसन्धाय किञ्चिद् वैलक्षण्यस्य अदोषत्वं स्वाष्टमश्लोकविवरणे वदन् प्रकृते च ताभ्यामेव अत्यन्तवैलक्षण्यं प्रतिपिपादयिषन् कुतो न जिह्रेषि. ईशज्ञानेच्छयोः च तं तं शब्दं न वयं स्वयमेव प्रयुञ्ज्मः किन्तु, "**स आत्मानमेव अवेत्**", "**स द्वितीयम् ऐच्छद्**" (बृह.उप.१।४।१०,१।४।३) इत्यादिवैदिकव्यवहारानुसारात्. नच श्रौतव्यवहारो नानार्थकल्पनेन पारिभाषिकत्वेन वा उपपादनीयः, "**हन् हिंसा-गत्योः**" (पाणि.सू.२।४।३७) इत्यादिवद् जानातीच्छत्योः अनेकशक्तिकताग्राहकमानाभावाद् धातून् अपारिभाषिकार्थान्तरादर्शनात् च. अतएव 'वृद्ध्या'दिसंज्ञास्थलेऽपि 'क्ति'नन्तादयः ते - ते शब्दाएव तत्र - तत्र अर्थे परिभाष्यन्ते नतु तत्-तत्प्रकृतयोः धातवः. तस्माद् 'वेत्ति' 'कामयति'-प्रभृतीनाम् अनेकेषां पारिभाषिकत्वकल्पनम् अरोचिष्णुः. 'इच्छा'शब्दमात्रस्य पारिभाषिकत्वकल्पनेतु "**स द्वितीयम् ऐच्छत्**" (बृह.उप.१।४।३) "**सो अकामयत**" (बृह.उप.१।२।४) इत्यादौ न तत्कल्पनावकाशो अपिच

मूलोक्तरीत्या ईश्वरे शरीराद्यभावात्. 'ईक्षितृ'शब्दस्य ब्रह्मणि पारमार्थिकसत्यत्वाद् 'भ्रमाधिष्ठान'शब्दस्य भवन्मतेऽपि ईश्वरेच्छायाः जगद्धेतुभावाद् 'इच्छा'शब्दस्य च प्रयोगः पारिभाषिकः कुतो न स्यात्! कुतो वा न स्याद् 'ईक्षित्रा'दिशब्दानां नानार्थता! इत्यादि ऊह्यम्. ईश्वरेच्छायाएव जगद्धेतुत्वं न अन्येच्छायाः इतितु "**जगद्व्यापारवर्जं प्रकरणाद् असन्निहितत्वात् च**" (ब्र.सू.४।४।१७) इत्यधिकरणे भाष्ये मुक्तानामपि जगद्व्यापारं प्रतिषिध्य ईश्वरएव तं स्थापयद्भिः शङ्कराचार्यैः स्वीकृतमेव. "**तद् ऐक्षत**" (छान्दो.उप.६।२।३) इत्यादिश्रुतीनाम् अनित्येच्छापक्षपरतातु इच्छानित्यत्वनिर्णयेन निराकारि निराकरिष्यते च. किञ्च तावकाअपि बहवः सर्गसमयएव समुदयजुषाम् ईश्वरज्ञानेच्छाप्रयत्नानाम् आप्रलयस्थायिनीम् एकैकामेव व्यक्तिं मन्यन्ते. अतः तादृशानित्येच्छापरत्वपक्षेऽपि वैलक्षण्यतादवस्थ्याद् न उक्तदोषनिस्तारः. इच्छाजन्यसर्वकार्याणां सर्गारम्भकालएव उद्भवस्य आपत्तेश्च.

(१) [किञ्च तदाकाराः तद्धर्माः वा यावन्तः कल्प्यन्ते तावत्यः इच्छाएव कल्प्यन्तां नतु एकाम् इच्छाम् प्रकल्प्य तदाकारादयः, इच्छा-कल्पनायाः आधिक्यात्. इच्छैव च 'धर्म'पदेन उच्यतां तस्याः इच्छाश्रयधर्मत्वात्. एतेन धर्मकल्पनातो धर्मिकल्पनायाः गुरुत्वाद् न इच्छाबह्व्यः कल्प्यन्ते इति प्रत्युक्तम्. वचनमात्रेण गौरवादिव्यवस्थायाः असिद्धेः च. नहि असति यौक्तिकगौरवे धर्मिकल्पनात्वेनैव गौरवं, मानाभावात्. नच इदृशी श्रुतिः स्मृतिः वा काचिद् अस्ति यद्बलात् सत्यपि गौरवे बहुधर्मानुगतैकेच्छा आश्रीयेत]

(२) यत्तु किञ्च तदाकाराः तद्धर्माः वा यावन्तः कल्प्यन्ते तावत्यः इच्छाएव कल्प्यन्ताम् **इत्यादि उक्तं तद् न, श्रुत्यनुसारेणैव कल्पना अस्मन्मते सम्भवति इति उक्तम् असकृदेव तादृशश्रुत्यभावेन तत्कल्पनासम्भवात्. धर्मभेदेन**

आकारभेदेन च धर्मिभेदकल्पने स्मृत्यनुभवस्वप्नाद्यनेकवृत्तिविशिष्टस्य अनेकाकारस्य अन्तःकरणस्य एकत्वं न स्यात्. तत्-तत्क्षणवृत्तित्वविशिष्टैकघटादिकल्पनापेक्षया तावन्तो घटपटादयः कल्प्यन्तां नतु एकं घटं प्रकल्प्य तत्र-तत्र तत्क्षणवृत्तित्ववैशिष्ट्यानि घटकल्पनायाः आधिक्यात्. धर्मकल्पनातो धर्मिकल्पनागौरवस्य त्वन्मते अकिञ्चित्करत्वात्. त्वन्मते अत्रापि यौक्तिकगौरवस्य असत्त्वाद् मानाभावस्य च उक्तत्वात्. एवञ्च जितं क्षणिकवादिभिः नास्तिकैः "तद् ऐक्षत बहु स्यां प्रजायेय" (छान्दो.उप.६।४।३) इत्यादिश्रुतौ तत्-तत्पदार्थाकारानेकेच्छानाम् अप्रतीतेः तादृशश्रुतिसत्त्वे नच इदृशी श्रुतिः स्मृतिः वा काचिद् अस्ति **इत्यादिकथनम् अयुक्तं तत्र एकेच्छायाएव प्रतीतेः.**

(३) सहस्राक्षे किञ्च तदाकाराः इत्यादिम् आश्रीयेत इत्यन्तं भागं दूषयन्ति. **यत्तु किञ्च** इत्यादिना **प्रतीतेः** इत्यन्तेन. अत्र अयं भावः : यच्च किञ्च तदाकाराः इत्यादि मानाभावाद् इत्यन्तम् अवादि तदपि कुशकाशावलम्बनम्. बह्विच्छावादिनापि कश्चिद् आकारः प्रतीच्छम् उपगन्तव्यो न वा? न अन्त्यः, निराकारकेच्छायाः अप्रसिद्धेः. आद्यः चेद्, बह्विच्छानां कल्पनैव अधिका नतु एकेच्छायाः सा. किञ्च प्रकारता-विशेष्यता-संसर्गताख्यत्रिविधविषयता-निरूपितविषयितारूपधर्मः प्रति ईश्वरज्ञानं प्रतितदिच्छं च मन्तव्यो न वा? न द्वितीयः निर्विषयेच्छाद्यनुपपत्तेः. आद्ये इच्छायाः स्वाश्रयनिरूपितधर्मत्वेऽपि पूर्वोक्तविषयितानिरूपितधर्मित्वम् अक्षतम् इति धर्मकल्पनातो धर्मिकल्पनायाः गुरुत्वाद् न इच्छाबह्व्यः कल्प्यन्ते इति युक्तमेव. अन्यथा त्वयापि यावन्तः तत्-तद्विषयाकाराः मायावृत्तिविशेषाः कल्प्यन्ते तावत्यो मायाएव कल्प्यन्ताम्. मायाकल्पनायाः सुतराम् आधिक्याद् वचनमात्रेण गौरवादिव्यवस्थायाः असिद्धेः त्वया अङ्गीकारात्. तथा यावतो अन्तःकरणवृत्तिविशेषाः जीवेषु कल्प्येरन् तावन्ति अन्तःकरणान्येव अभ्युपेयन्ताम्. धर्मिकल्पनात्वेन गौरवे मानाभावस्य त्वयैव उक्तत्वात्.

यदिच तत्कल्पने गौरवस्य यौक्तिकत्वम् आश्रीयेत तर्हि प्रकृतेऽपि तदाश्रीयतां समानयोगक्षेमत्वात्. धर्मिकल्पनस्य अगुरुत्वे घटादिषु घटत्वैकत्वनीलत्वाद्येकैकधर्माश्रयनानाधर्मिसमुदायरूपत्वमपि सुवचम्. मूलदर्शितदिशा क्षणिकवादस्य आपादनमपि सुकरम्. बह्विच्छावादिना स्वाश्रये अनन्तेच्छानां सम्बन्धाः तासु च विषयितादेः ते अनन्ताएव कल्प्याः इति महदेव गौरवम्. यच्च नच इदृशी श्रुतिः स्मृतिः वा काचिद् अस्ति यद्बलात् सत्यपि गौरवे बहुधर्मानुगतैकेच्छा आश्रीयेत इति उक्तं तदबोधाद्, बहुधर्मानुगताम् एकाम् अनाश्रित्य एकैकधर्मानुगतानां बह्वीनाम् आश्रयणेऽपि इच्छासु धर्मितायाः स्वमुखेनैव उपादानेन इच्छैव च धर्मपदेन इत्यादिस्वोक्तपूर्वस्य स्वयमेव निरासात्. तस्याः सर्वथा निर्धर्मकत्वे अभिप्रेयमाणेतु धर्मानुगता इत्येव वक्तुं युक्तं नतु 'बहु'पदम्. विषयितादिधर्मशून्येच्छा च अप्रसिद्धैव. वस्तुतस्तु प्रपञ्चाविर्भावहेतुतया आम्नातायाः परब्रह्मेच्छायाः लाघवाद् बहुत्वबोधकश्रुत्याद्यभावात् च सिद्ध्यद् एकत्वं सर्वकार्यान्यथानुपपत्त्याः सिद्ध्यदपि तत्तदाकारवत्त्वं च कुतो न स्वीकार्यम्? लोकविरोधाद् इति चेत्, सर्वाः ताः सृष्ट्यवसरएव सम्भूताः आसंवर्तवर्तिन्यो मन्यन्ते न वा? न आद्यः तद्विरोधतादवस्थ्यात्. तादृशी च श्रुतिः स्मृतिः वा वाच्या यया तावत्कालस्थायिन्यो बह्व्यः ईश्वरेच्छाः बोधिताः स्युः. द्वितीयः चेद् जीववत् त्रिक्षणावस्थायिन्यो नानेच्छाः एकैकशः क्रमेण उत्पद्यन्ते युगपदपि वा? आद्यः एकक्षणावच्छिन्नबहुकार्यानुपपत्त्या प्रागेव अपास्तः, अन्त्ये तद्विरोधो निरुच्छेदः. किञ्च सृष्टिकालएव उत्पन्नानां तत्-तत्सर्वकार्यतत्तद्भावविकारविषयिणीनां लोकानुरोधात् क्षणत्रयमात्रावस्थायिनीनाम् अनन्तेच्छानाम् आप्रलयं तत्-तत्कालनियत-तत्-तत्कार्यसम्भवनिर्वाहाय अनन्तसन्तानकल्पने महदेव निरर्थकगौरवम्. नच कार्यपूर्वक्षणएव इच्छाः उत्पद्यन्ते इति न सृष्टिदिष्टात् प्रभृति तत्सन्ततिः कल्प्यः इति वाच्यं, "**स तपो अतप्यतः**" (तैत्ति.उप.२।६) इति श्रुतिविरोधात् सार्वज्ञ्यविरोधात् च. तथाहि परमेश्वरः सर्गावसरएव भावीनि यावत्कार्याणि तत्-तज्जन्मास्तित्ववृद्ध्यादीनि तत्र सर्वत्र स्वेच्छानिमित्तकत्वं च जानाति न वा? प्रथमे सर्वेच्छाः तदैव सिद्ध्यन्ति. द्वितीये सर्ववित्त्वश्रुतीनां "**वेदाहं समतीतानि**" (भग.गीता ७।२६) इत्यादिस्मृतीनां च व्याकोपः. अतः

एकस्याअपि तदिच्छायाः सर्वाकारकत्वं श्रुत्यनुकूलयुक्तिसिद्धम् . ईश्वरधर्मेषु लोकविरोधस्य अकिञ्चित्करत्वाद् अन्यथा तदीयैकनित्यज्ञानस्यापि सर्वावगाहित्वं न स्यात् . तत्र ब्रह्मधर्मत्वादिना तद्विरोधसहनेतु अत्रापि सः सोढव्यः इति पूर्वमेव अवोचाम. किञ्च तदिच्छायाः एकत्वं **“स ईक्षां चक्रे”** (प्रश्नोप.६।३) **“तस्य इच्छया आत्तवपुषः कुतएव बन्धः”** (भाग.पुरा.१०।३-०।३५) इत्याद्येकत्वबोधकानेकश्रुतिस्मृतिसिद्धम् . नच उक्तश्रुतौ **“ईक्षां चक्रे”** इति ईक्षतेरेव लिटि रूपम् आश्रित्य ‘एक’पदं तद् इति शंक्यं, शङ्कराचार्यैरपि उपनिषद्भाष्ये **“‘ईक्षां चक्रे’, ‘ईक्षणं’ दर्शनं ‘चक्रे’ कृतवान्”** (प्रश्नोप.शां.भा.६।३) इति व्याचक्षणैः **‘ईक्षाम्’** इत्यत्र पृथक्पदत्वस्य बोधनात् . नच द्वितीयाश्रुत्या ग्रहगतैकत्ववत् तद् अविवक्षितम् इति शंक्यं तस्य इच्छया **“आदौ लोकसिसृक्षया”** (भाग.पुरा.१।३।१) इत्यादौ, तृतीयाश्रुत्या “गवा क्रीणाति” इत्यादिवत् तस्य अभ्युपेयत्वसिद्धेः. एतेन **“सो अकामयत”** (बृह.उप.१।२।४) **“तद् ऐक्षत”**, **“सा इयं देवता ऐक्षत”** (छान्दो.उप.६।२।३ , ६।३।२) इत्यादौ एकैव सा ज्ञेया. अतएव सूत्रकारोऽपि **“कामाच्च न अनुमानापेक्षा** (ब्र.सू.१।१।१८) **“पराभिध्यानात्तु”** (ब्र.सू.३।२।५), **“संकल्पादेवतु”** (ब्र.सू.४।४।८) इत्यादौ तस्याः एकत्वमेव आह. नित्यत्वञ्च **“भारूपः सत्यसंकल्पः आकाशात्मा”** (छान्दो.उप.३।१४-।२) इत्यादिसामग-शाण्डिल्यविद्या-प्रभृतिश्रुतिप्रतिपन्नम् औपनिषदैः ‘सत्य’-‘नित्य’शब्दयोः पर्यायतायाः पर्याश्रितत्वात्. ईश्वरधर्मत्वाच्च **“अविनाशी वा अरे अयम् आत्मा अनुच्छित्तिधर्मा:”** (बृह.उप.४।५।१४) इत्यादिश्रुतिसम्मतम्. नच अत्र उच्छित्तिधर्मत्वाभावो अर्थः कल्प्यः ‘अविनाशि’पदेन पौनरुक्त्यापाताद् नापि अनुच्छित्तिः धर्मो यस्य इति. तावतापि सधर्मकत्वापत्तेः उक्तदोषात् च. धर्मनित्यत्वं च तुरीयश्लोकखण्डनादौ विस्तरेण उपपादयिष्यते. एवं सिद्धे एकत्वे नित्यत्वे च तस्याएव अनेकाकारकत्वं तत्-तद्देशकालावच्छिन्नसर्वकार्यान्यथानुपपत्तेः ऋगादिशाखासु क्रमेण **“स ईक्षत लोकान्नुसृजाः”** (ऐत.उप.१।१।१), **“स द्वितीयम् ऐच्छत् स ह एतावान् आस”** (बृह.उप.१।४।३), **“सा इयं देवता ऐक्षत हन्ता अहम् इमाः तिस्रो देवता अनेन जीवेन आत्मना अनुप्रविश्य नामरूपे व्याकरवाणि”**

(छान्दो.उप.६।३।२) इत्यादिभ्यः तस्याः सर्वकारणत्वबोधकैतरेयकाण्वच्छन्दोगादिश्रुतिभ्यश्च श्रौतार्थापत्त्यैव सिद्ध्यति. किञ्च “**बहु स्यां प्रजायेय इति**” (छान्दो.उप.६।२।३) इति ब्रह्मवल्लिश्वेतकेतुविद्याश्रुतिः स्पष्टम् एकस्याः तस्याः अनेकाकारानुगतत्वं बोधयति. अन्यथा ‘इति’शब्दद्वयं ब्रूयाद् “**बहु स्याम्**” इत्याकारस्य भिन्नत्वाद् “**अकामयत**” इति च आवर्तनीयं स्यात्. नित्यत्वञ्च “**सिद्धार्थः सिद्धसङ्कल्पः**” (विष्णुस.ना.४०।२५२,२५३) इति विष्णुनामसहस्रस्मृतिः स्फुटम् आह. ‘सिद्ध’शब्दस्य नित्यपर्यायत्वन्तु महाभाष्ये पस्पशाह्निके “**सिद्धे शब्दार्थसम्बन्धे**” (पातं.महाभा.१।१।१) इति वार्तिकव्याख्याने स्पष्टम्.

(१) [एवञ्च नित्येच्छायाः तैः तैः सृज्यमानैः सम्बन्धमात्राङ्गीकारपक्षोऽपि निरस्तः, अनुत्पन्नेन पदार्थेन तदाविर्भाविन वा इच्छायाः सम्बन्धायोगात्. समानविषयतयैव उपक्षयेण विरम्यव्यापाराभावात् च. अन्यथा लाघवेन जीवेच्छानामपि नित्यत्वप्रसङ्गात्. नच जीवेच्छानां न नित्यत्वम् अनुभवेन उत्पत्तिनाशयोः सिद्धत्वाद् इति वाच्यं ; ईश्वरेच्छायाअपि “सो अकामयत” इत्यादिश्रुत्या उत्पत्तिनाशयोः सिद्ध्या नित्यत्वस्य वक्तुम् अशक्यत्वात्. ईश्वरेच्छायाम् उत्पत्तिनाशयोः व्यपदेशस्य सम्बन्धोत्पत्तिनाशाभ्यां स्वीकारेतु जीवेच्छायामपि तयोः अनुभवः ताभ्यां स्वीक्रियेत इति समानम्. किञ्च लाघवमात्रेण श्रुत्यर्थस्य औपचारिकत्वस्वीकारे स्वप्नादेरपि अनित्यत्वासिद्धिः]

(२) तादृश्याश्च इच्छायाः ब्रह्माभिन्नैः तत्-तत्पदार्थैः सम्बन्धे न किञ्चिद् बाधकम्. पदार्थस्य उत्पन्नत्वानुत्पन्नत्वे न अस्मत्सम्मते, सर्वेषां पदार्थानां ब्रह्मस्वरूपेण सत्त्वात्. एतेन एवञ्च **इत्यादिदूषणम् अनवकाशं जीवेच्छानां नित्यत्वापादनं सत्कार्यवादिनां मते न सम्भवति इष्टापत्तिपराहतत्वात्. नच**

जीवेच्छानाम् उत्पत्ति-विनाशयोः अनुभवसिद्धत्वात् कथम् इष्टापत्तिः इति वाच्यम्, अनुभवस्य आविर्भावतिरोभावविषयकत्वात्. तिरोभावेऽपि सद्रूपेण अस्त्येव. एवञ्च तद्दृष्टान्तेन ईश्वरेच्छायाः अनित्यत्वापादनं न सम्भवति. जीवेच्छेश्वरेच्छयोः नित्यत्वे प्रकारभेदस्तु अस्त्येव. "सो अकामयत" (बृह.उप.१।२।४) इत्यादौ उत्पत्तिवाचकपदाभावाद् नाशवाचकपदाभावात् च कथं तादृशः श्रुत्या उत्पत्तिविनाशयोः सिद्ध्या नित्यत्वं वक्तुम् अशक्यम्. वस्तुतस्तु किञ्च लाघवमात्रेण **इत्यादिप्रलापः परमताज्ञानेन स्वकल्पितशङ्कासमाधानरूपोन्मत्तप्रलापतुल्यएव.**

(३) सहस्राक्षे एवञ्च नित्येच्छायाः इत्यादिं अनवस्थितेः इति न्यायाद् इत्यन्तं भागं दूषयन्ति **तादृश्याः च इच्छायाः** इत्यादिना **चित्रम् इति न्यायाद्** इत्यन्तेन. **उत्पन्नत्वानुत्पन्नत्वे** इति कालभेदेन व्यवस्थिते ते **न अस्मत्सम्मते,** इदानीम् अयम् उत्पन्नः पूर्वम् अनुत्पन्नः इति सत्कार्यवादे वक्तुम् अशक्यत्वात्. नित्यत्वाद् अनुत्पन्नत्वन्तु सम्मतमेव इति हृदयम्. अत्र इदम् आकूतं : यद् एवञ्च नित्येच्छायाः तैः तैः इत्यादि इति समानम् इत्यन्तम् अलापि तत्तु कोलाहलमात्रम्. आप्रलयस्थायित्वपक्षे ईशेच्छायाः तैः तैः सृज्यमानपदार्थैः सम्बन्धस्य तत्-तत्कार्याणाम् अनुभूयमानक्रमिकत्वोपपत्तये विरम्यव्यापारस्य च त्वयापि स्वीकार्यत्वात्. अनन्तेच्छासन्तानपक्षस्तु पुरैव निराकृतः. तत्पक्षे कार्यसाक्षाज्जनकेच्छातिरिक्ततत्सन्तानस्य जीवेच्छावत् फलव्यभिचारितया ऐश्वर्यमपि भज्येत. समानविषयत्वेन उपक्षयोक्तिस्तु विद्वच्छैलीविरुद्धाः. किञ्च एकैककार्यनियतैकैकेच्छापि तत्-तत्कार्यक्षणएव उत्पद्यते ततः पूर्वं वा? न आद्यः, तस्याः कारणत्वासिद्धेः अनन्यथासिद्धकार्यनियतपूर्ववृत्तेरेव कारणत्वात्. द्वितीयः चेद् उत्पत्स्यमानेन कार्येण तत्सम्बन्धः क्षणं विरम्य व्यापारश्च वक्तव्यएव कार्यस्य यत्नोत्तरकाले सम्भवात्. विषयत्वरूपस्य तस्याः तत्-तत्कार्ये सम्बन्धस्य अनङ्गीकारेतु घटेच्छातः पटोऽपि उत्पद्येतइति महत्येव कार्य-कारणभावाव्यवस्था.

अस्तु च इयम् असत्कार्यवादिनां त्वादृशां तार्किकाणाञ्च अविद्यमानेन वस्तुना तत्सम्बन्धचिन्ता, अस्माकं सत्कार्यवादिनान्तु कार्यस्यापि नित्यत्वेन सार्वदिकः तत्सम्बन्धो न अनुपपन्नः. आविर्भावश्च अस्मिन् देशे अस्मिन् काले इदम् एवं लौकिकानुभवगोचरीकरिष्यामि इति ईश्वरेच्छाविषयत्वमेव. अतो यस्मिन् कालोपाधौ यद्देशावच्छेदेन यत् प्रचिकाशयिषितं तदैव तत्र तत् संसारिजीवैः अनुभूयते यस्मिंश्च कालोपाधौ यत् तिरोविभावयिषितं तदैव तत् तिरोधत्ते इति न कापि अव्यवस्था. आपाद्यमानं जीवेच्छानित्यत्वन्तु सत्कार्यवादिना इष्टतया अभ्युपगम्येत, तदुत्पत्तिनाशप्रतीतेः आविर्भाव-तिरोभावविषयकत्वात्. ननु एवं सति जीवेच्छेश्वरेच्छयोः को विशेषः? इति चेद्, उच्यते; जीवेच्छा घटादिवद् आविर्भाव-तिरोभावशालिनी तेन तत्र जन्यत्वव्यवहारः वृत्तिरूपतज्ज्ञानवत्. स्पष्टञ्च इदं सर्वनिर्णये "**बुद्धेः वृत्तिः स्थितिः नाम गुणतः सा त्रिधा मता**" (त.दी.नि.२।१३७) इत्यत्र निबन्धावरणभङ्गयोः तृतीयस्कन्धसुबोधिन्यादौ च. ईश्वरेच्छातु ईश्वरवत् स्वातन्त्र्येण नित्याः तद्धर्मत्वात्. अतो जीवेश्वरज्ञानयोरिव तदिच्छयोरपि नित्यत्वे "**अनित्ये जननम्**" (सुबो.२।६।१) इत्याद्युक्तदिशा प्रकारभेदः अस्त्येव. एवञ्च जीवेच्छास्तु नानाव्यक्तयोः न ईश्वरेच्छावद् नित्याः आविर्भाव-तिरोभावरूपतदुद्भवो परमयोः अनुभूयमानत्वात्. नच अनुभवः सम्बन्धोत्पत्तिनाशादिना अन्यथानेयः श्रुतिसंवादित्वात्. "**संगात् संजायते कामः**" (भग.गीता २।६२) कठवल्ली-बृहदारण्यकयोः "**यदा सर्वे प्रमुच्यन्ते कामाः**" (कठोप.२।३।१४) सप्तमस्कन्धदशमाध्याये "**विमुञ्चति यदा कामान् मानवो मनसि स्थितान्. तर्ह्येव पुण्डरीकाक्षः भगवत्त्वाय कल्पते**" (भाग.पुरा.७।१०।९) एवमादिषु तज्जनन-प्रलययोः व्यक्तिबाहुल्यस्य च श्रवणाद् ईश्वरेच्छावत् स्वातन्त्र्येण तन्नित्यताबोधकमानानुपलम्भाच्च "**सो अकामयत**" (बृह.उप.१।२।४) इत्यादिश्रुतयस्तु "**बहु स्यां प्रजायेय**" (छान्दो.उप.६।२।३) इति स्वरूपव्यवस्थापकेन पूर्वान्वयि 'नेति'शब्देन तादृशः तदाकारस्यैव तदा प्राकट्यं बोधयन्ति नतु नित्येच्छाशक्तेः उत्पत्तिनाशौ अश्रुतेः. नच भूतार्थकाख्यातश्रुत्या तौ शक्यवचनौ "**सदेव सोम्य इदम् अग्रे आसीद्**" (छान्दो.उप.६।२।१), "**ब्रह्म वा इदम् अग्रे आसीद्**"

(बृह.उप.१।४।१०) इत्यादौ तच्छ्रुत्या ब्रह्मणोऽपि तयोः आपत्तेः. ननु ‘‘**सत्यं ज्ञानम्...**’’ (तैत्ति.उप.२।१।१) इत्यादितन्नित्यताबोधकश्रुतिविरोधाद् न एवम् इति चेद् ‘‘**अनुच्छित्तिधर्मा:**’’ (बृह.उप.४।५।१४), ‘‘**सत्यसंकल्पः**’’, ‘‘**परास्य शक्तिः**’’ ’’ (छान्दो.उप.८।१।५ ,श्वेता.उप.६।८) इत्यादिनित्यत्वगमकश्रुतिविरोधः प्रकृतेऽपि तुल्यः. स्वतःप्रमाणशब्दप्रतिकूललाघवन्तु अलौकिके अर्थे न आदरणीयं, तस्य स्वतःप्रामाण्यन्तु पूर्वतन्त्रे तर्कपादे औत्पत्तिकाद्यधिकरणेषु सिद्धमेव अन्यथा लाघवाद् जीवेश्वरज्ञानयोरपि अविशेषो वाच्यः ‘‘**स आत्मानमेव अवेद् अहं ब्रह्म अस्मि**’’ (बृह.उप.१।४।१०) इत्यादौ लङ्श्रुत्या ग्रहिलतया उत्पत्तिनाशयोः तत्रापि शक्यवचनत्वात्. नच इष्टापत्तिः शङ्कराचार्यैरपि ‘‘**प्राणभृच्च**’’ (ब्र.सू.शां.भा.१।३।४) इत्यादिसूत्रेषु ‘‘**यद्यपि प्राणभृतो विज्ञानात्मनः आत्मत्वं चेतनत्वं च सम्भवति तथापि उपाधिपरिच्छिन्नज्ञानस्य सर्वज्ञत्वाद्यसम्भवे सति**’’ (ब्र.सू.शां.भा. १।३।१४) इत्यादिव्याकुर्वद्भिः तयोः परिच्छिन्नत्वापरिच्छिन्नत्वादिना विशेषस्य अङ्गीकारात्. प्रथमपादेक्षतिसूत्रेऽपि ‘‘**यस्य हि सर्वविषयावभासनक्षमं ज्ञानं नित्यम् अस्ति सो असर्वज्ञ इति विप्रतिषिद्धम्, अनित्यत्वे हि ज्ञानस्य कदाचिद् जानाति कदाचिद् न जानाति इति असर्वज्ञत्वमपि स्याद्**’’ (ब्र.सू.शां.भा.१।१।५) इत्यादिना ईश्वरीयज्ञाने विशेषो दर्शितः. एवम् ईशजीवेच्छयोरपि नित्यत्वानित्यत्वसर्वविषयकत्वाल्पविषयकत्वादिना वैलक्षण्यं तैरपि अनेकत्र स्पष्टीकृतम्. यथा ‘‘**न इतरो अनुपपत्तेः**’’ (ब्र.सू.१।१।१६) इत्यत्र ‘‘**प्राक् शरीराद्युत्पत्तेः अभिध्यानं सृज्यमानानां च विकाराणां स्रष्टुः अव्यतिरेकः सर्वविकारसृष्टिः च न परस्माद् आत्मनो अन्यत्र उपपद्यते**’’ (ब्र.सू.शां.भा.१।१।१६) इति वदद्भिः सर्वत्रप्रसिद्धोपदेशाधिकरणे विवक्षितगुणसूत्रे ‘‘**सत्यसङ्कल्पत्वं हि सृष्टि-स्थिति-संहारेषु अप्रतिबन्धशक्तित्वात् परमात्मनएव अवकल्पते परमात्मगुणत्वेन च ‘यः आत्मा अपहतपाप्मा’** (छान्दो.उप.८।७।१) **इत्यत्र ‘सत्यकामः सत्यसङ्कल्पः’ इति श्रुतम्**’’ (ब्र.सू.शां.भा.१।२।२) इत्याद्युक्त्वा ‘‘**अनुपपत्तेस्तु न शारीरः**’’ (ब्र.सू.१।२।३) इति अग्रिमसूत्रे जीवे तादृताशेच्छाद्यनुपपत्तिः व्याख्याता. एतेन वैलक्षण्ये सति ईश्वरेच्छायाम् ‘इच्छा’शब्दप्रयोगपारिभाषिकत्वापादाद्युक्तिः तस्य स्वाचार्याधिक्षेपरूपा इति

पुनरपि अपास्ता वेदितव्या. अवैलक्षण्यदुराग्रहेतु उभयेच्छयोः मायामात्रवृत्तिविशेषत्वम् अन्तःकरणमात्रवृत्तिविशेषत्वं वा स्वीक्रियतां नतु स्वेष्टरीत्याः तद्भेदः. तथा सति त्वदुक्तदोषाणां त्वन्मतेऽपि अनिस्तारात्. किञ्च “**नहि कश्चित् क्षणमपि जातु तिष्ठति अकर्मकृद्**” (भग.गीता ३।५) इति वाक्याद् जीवज्ञानेच्छाप्रयत्नानामपि प्रवाहसातत्यम् अवश्यम् अभ्युपेयं यावत् तज्ज्ञानेच्छादिकं प्रति कारणत्वं च ईश्वरेच्छादेः वाच्यमेव उन्निनीषाधोनिनीषाश्रुतेः “**परात्तु तच्छ्रुतेः**” (ब्र.सू.२।३।४१) इति न्यायात् च. एवञ्च[1] सति जीवानाम् आनन्त्येन अनन्ताः युगपत्प्रवर्तमानाः यावत्तदिच्छाः प्रति कारणभूतायाः युगपद् अनेकाकारकत्वम् ईश्वरेच्छायाः अर्थात् सिद्धम्. जीवेच्छानां नित्यत्वेतु कार्य-कारणभावोऽपि दुर्वचः. तस्माद् अनेकश्रुतिसम्मतम् ईश्वरेच्छायाः नित्यत्वम् एकत्वम् अनेकधर्मशालित्वं सर्वकारणत्वं जीवेच्छातो वैलक्षण्यं च निर्बाधम्. यत्तु लाघवमात्रेण श्रुत्यर्थस्य औपचारिकत्वस्वीकारे स्वप्नादेरपि अनित्यत्वासिद्धिः इति तद् अकिञ्चित्करम्. नहि वयं “**सो अकामयत**” (बृह.उप.१।२।४) इत्यादावपि तद्घटक‘इति’शब्दमहिम्ना उपचारम् आद्रियामहे किन्तु सिद्धमेव अर्थम् अनुवदामः इति सन्ध्यसृष्टिश्रुतौ न उपचारशङ्काप्रसक्तिः. किञ्च “**न तत्र रथाः न रथयोगाः न पन्थानः**” (बृह.उप.४।३।१०) इति स्वाप्निकवस्त्वभावबोधकश्रुतिरिव न ईश्वरेच्छायाः तद्बोधिका सा उपलभ्यते, नापि तदिच्छायाइव स्वप्नस्य नित्यत्वबोधिका सा. अतो नान्यतरस्य नित्यत्वेन अनित्यत्वेन वा अन्यतरस्य तत् सिद्ध्यति. स्वप्नस्य मायामात्रत्वेन मिथ्यात्वं च “**सन्ध्ये सृष्टिः**” (ब्र.सू.३।२।१) इत्यधिकरणे परमाचार्यैरेव निरणायि, न इत्थं तदिच्छायाः तथात्वसाधकं किञ्चिद् अधिकरणम् अस्ति. अतो न किञ्चिद् एतत्.

(१) [कश्च अयम् इच्छा-विषययोः त्वन्मते सम्बन्धः किं स्वरूपात्मकः उत तद्भिन्नः? आद्येऽपि किम् इच्छास्वरूपात्मकः आहोस्विद् विषयस्वरूपात्मकः?

---

[1] मुद्रिते पाठे ‘एवंकारं च’इति.

न तावद् आद्यः, इच्छायाः नित्यत्वेन तस्य नित्यत्वानपाये उक्तदोषानिस्तारः. सम्बन्धत्वरूपेण इच्छायाअपि अनित्यत्वेतु तदीयनित्यरूपम् अजागलस्तनायमानमेव अनित्यरूपस्य स्वीकृतत्वेन गौरवानपायात्. किञ्च स्वरूपस्य सम्बन्धत्वसम्भवे संयोगादिः व्यर्थः स्यात्. एतेन सम्बन्धस्य विषयस्वरूपत्वमपि निरस्तं, घटादेः तदाविर्भावस्य वा अनुत्पत्तिदशायां तत्स्वरूपाभावेन ईश्वरस्य तदिच्छानुपपत्तेः च. नापि उभयभिन्नः सम्बन्धो, निर्वक्तुम् अशक्यत्वात्. किञ्च तस्यापि सम्बन्धान्तरकल्पनायाम् अनवस्था. ‘‘समवायाभ्युपगमाच्च साम्याद् अनवस्थितेः’’ (ब्र.सू.२-।२।१३) इति न्यायात्.]

(२) कश्च अयम् इच्छा-विषययोः त्वन्मते सम्बन्धः? किं स्वरूपात्मकः उत तद्भिन्नः? **इत्यादिना इच्छासम्बन्धविषयकप्रश्नः कृतः तत्र ब्रूमः, इच्छा-विषययोः स्वरूपएव सम्बन्धः, सच आविर्भविष्यत् तद्विषयस्वरूपएव फलजनकः. इच्छास्वरूपस्तु न अङ्गीक्रियते तेन** इच्छायाः नित्यत्वेन **इत्यादिकाः दोषाः अनवकाशाः. नच** स्वरूपस्य सम्बन्धत्वसम्भवे संयोगादिः व्यर्थः स्याद् **इति वाच्यं, नहि किञ्चित्प्रतियोगिकस्य किञ्चिदनुयोगिकस्य स्वरूपस्य सम्बन्धत्वसम्भवो अन्यप्रतियोगिकानां संयोगादीनां व्यर्थत्वसम्पादकः इति कस्यचिदपि सम्मतम्. एवञ्च इच्छायाः विषयैः विषयत्वात्मकस्वरूपसम्बन्धस्वीकारेऽपि घटादीनां भूतलादौ संयोगे को विरोधः? किञ्च घटादीनां भूतलादौ कालिकदैशिकैकज्ञानविषयत्वादीनां सम्बन्धानां सम्भवेऽपि संयोगस्य सम्बन्धत्वं प्रतीत्यनुसारेण वैशेषिकैः अङ्गीक्रियते. एवञ्च समानाधिकरणसम्बन्धस्यापि सम्बन्धान्तरानुच्छेदकत्वे व्यधिकरणस्य उच्छेदकत्वशङ्कातु दूराद् अपास्ता. घटादीनां**

त्वदभिमतानुत्पन्नतादशायाम् अनाविर्भूतत्वेऽपि सद्रूपे ब्रह्मणि घृतकाठिन्यवद् लीनत्वात् सत्त्वेन तत्र इच्छायाः स्वरूपसम्बन्धः सम्भवत्येव. तथाच एतेन **इत्यादिकं दत्तोत्तरम्.** नापि उभयभिन्नः **इत्यादिकं दूषणन्तु उभयभिन्नस्य सम्बन्धस्य अत्र अनङ्गीकारेणैव अनवकाशं ''सति कुडये चित्रम्'' इति न्यायात्.**

(३) यच्च कश्च अयम् इत्यादि इति न्यायाद् इत्यन्तं तत्तु प्रायो नैयायिकानेव उद्दिश्य प्रावर्तत इति तद्ग्रन्थैरेव दत्तोत्तरं स्यात्. अतएव पिशाचः पिशाचभाषयैव बोधनीय इति न्यायम् अनुसृत्य मूले समाहितम्. **स्वरूपएव** इति **स्वं** विषयस्य आत्मा रूपं यस्य इति तथा. **वैशेषिकैः** इति, सिद्धान्ते संयोगस्य स्पर्शविशेषतया अंगीकाराद् एवम् उक्तम्. अत्र अयं निगर्वः : वस्तुतस्तु इच्छा-विषययोः विषय-विषयिभावः सम्बन्धः. ईश्वरेच्छा-प्रपञ्चयोस्तु कार्यकारणभावो अधिकः तौ च अनुभवबलात् ''**सो अकामयत**'' (बृह.उप.१।२।४) ''**एष उ एव**'' (कौषी.उप.३।९) इत्यादिश्रुतिशतबलात् च शक्येतेएव निर्वक्तुम्. **तत्र ब्रूमः** इत्यादिमूलस्यापि अत्रैव तात्पर्यम् इति अवगन्तव्यम्. विषयताच स्वरूपसम्बन्धएव इति प्राञ्चः तार्किकाः. तथाहि घटादिनिष्ठं ज्ञानादिविषयत्वं तत्प्रतियोगिकः सम्बन्धविशेषः. सच प्रतियोगित्वादिवत् स्वरूपानतिरिक्तएव क्लृप्तेन स्वरूपेणैव उपपत्तौ अतिरिक्तकल्पनानवकाशात्. नच तादृशसम्बन्धस्य ज्ञानविषयान्यतरस्वरूपत्वादरे विनिगमकाभावाद् उभयस्वरूपत्वं कल्प्यम्. तदपेक्षया अतिरिक्तैकविषयताकल्पनैव लघुः इति वाच्यम्. विषयतायाः विषयस्वरूपत्वे घटादिनिरूपिताधेयतायाः तस्याम् अनुपपत्त्याः ज्ञानादिस्वरूपायाएव उपगमात्. अभेदेऽपि आधाराधेयभावोपगमे घटो ज्ञानादिविषयतावान् इतिवद् घटो घटवान् इत्यादि प्रतीयेत. नच विषयतात्वावछिन्ननिरूपिताधिकरणतैव घटादौ उपेयते न घटत्वावछिन्ननिरूपिता इति न अतिप्रसंगः इति वाच्यं, विषयतात्वावछिन्ननिरूपितत्वस्य विषयतात्वाश्रयघटादिरूपविषयतानिरूपितत्वविलक्षणस्य दुर्वचत्वात्. अस्तु वा विनिगमनाविरहाद् उभयरूपा विषयता तथापि तादृशोभयस्य

क्लृप्तत्वाद् अतिरिक्तविषयतायाः तत्र ज्ञानादिसम्बन्धतायाः च कल्पनापेक्षया तदुभयस्य ज्ञानादिसम्बन्धत्वकल्पने गौरवानवकाशः इति. अत्र नव्यास्तु मन्यन्ते : विषयत्वं पदार्थान्तरमेव नतु स्वरूपसम्बन्धविशेषः तथाहि ज्ञानविषयतायाः ज्ञानात्मकत्वे ज्ञानाधिकरणस्य कालादेः अज्ञानविषयतापत्तिः कालनिष्ठज्ञानसम्बन्धस्यापि ज्ञानस्वरूपानतिरिक्तत्वात्. एवं स्वाभावेन समं प्रतियोग्यनुयोगिभावरूपज्ञानसम्बन्धस्यापि स्वरूपानतिरिक्ततया घटादिज्ञानस्य घटादिविषयकत्ववत् स्वाभावविषयकत्वस्य तत्र आपत्तिः कालादौ ज्ञानादिसम्बन्धस्य अतिरिक्तत्वे च विनिगमनाविरहाद् विषयनिष्ठतत्सम्बन्धस्यापि अतिरिक्तत्वसिद्धिः निष्प्रत्यूहैव. एवं विषयतायाः ज्ञानस्वरूपत्वे घटवद् भूतलम् इत्यादिज्ञाननिरूपितानां घटभूतलादिवृत्तिविषयतानाम् अभेदापत्त्याः तादृशज्ञानानन्तरं "घटप्रकारकज्ञानवान् अहम्" इत्यादिप्रत्ययवद् "भूतलप्रकारकज्ञानवान् अहम्" इत्यादिप्रत्ययप्रसंगः घटनिष्ठप्रकारत्वाख्यतज्ज्ञानरूपविशेष्यतायाएव भूतलवृत्तित्वात्. घटपटौ इत्यादि समूहालम्बनात्मकैकज्ञानीयघटपटादिरूपनानाविषयनिष्ठविषयतानाम् एकैकतया तादृशज्ञानानां घटत्वपटत्वाद्यवच्छिन्नपटघटादिनिष्ठविषयताकतया भ्रमत्वापत्तिः तदवृत्तिधर्मावच्छिन्नतन्निष्ठविषयताशालिबुद्धेरेव भ्रमत्वात्. तदा घटत्वेन पटं वेद्मि इति अनुव्यवसायः च स्याद्, घटत्वावच्छिन्नपटनिष्ठविषयताकज्ञानस्यैव तादृशानुव्यवसायविषयत्वात्. विषयतायाः विषयस्वरूपत्वे च घटत्वप्रकारकप्रमाविषयतायाः पटत्वप्रकारकभ्रमनिरूपितायाः च घटनिष्ठविषयतायाः ऐक्यप्रसंगेन घटत्वप्रकारकप्रमायाअपि भ्रमत्वापत्तिः. एवं घटवद्भूतलं संयोगः च घटभूतलसंयोगाः इति ज्ञानयोः समूहालम्बनविशिष्टबुद्धिरूपयोः अविशेषः च स्यात्. विषयाणां तत्तदात्मकविषयतानां च अविलक्षणत्वात्. तस्माद् अनन्यगत्या ज्ञानतद्विषयातिरिक्तमेव विषयत्वं सिध्यति. तच्च विषये घटादौ आश्रयतया ज्ञाने च निरूपकतया वर्तते. एतेन विषयित्वमपि अतिरिक्तं व्याख्यातम्. अधिकन्तु गदाधरभट्टाचार्यैः विषयतावादे प्रपञ्चितम्. तदेव इह दिङ्मात्रम् अनूदितम्. एतेन ज्ञानतद्विषयस्वरूपातिरिक्तविषयतायाः अशक्यनिर्वचनत्वोक्तिः अपास्ता. नच तस्यापि सम्बन्धान्तरं कल्प्यम् अनवस्थापातात्. ननु इष्टापत्तिः समवायाभ्युपगमन्यायानुरोधाद् इति चेत् किम् इदं सूत्रं सम्बन्धमात्रम् उच्छेत्तुं

प्रववृते कणभक्षाभिमतसमवायमात्रं वा? न आद्यः सौत्राक्षरतो प्रतीतेः. "**अस्मिन् अस्य च तद्योगं शास्ति**", "**...अध्यात्मसम्बन्धभूमा हि अस्मिन्**", "**...इह तद्योगात्**" (ब्र.सू.१।१।१८,३०,३२) "**परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः**" (ब्र.सू. ३।२।३१) इत्यादिषु स्वेष्टतया आचार्यस्य सम्बन्धोदाहरणव्याघातापातात् च. द्वितीयः चेत् कुर्मः तथाच सति गुणकर्मजातिविशेषादिस्थित्यर्थं काणादैः वृथा अंगीक्रियमाणो अयुतसिद्धयोः नित्यसम्बन्धएव समवायाख्यो अनेन न्यायेन निराक्रियते इति न प्रकृते एतत्प्रवृत्त्यवकाशः. नच एवम् अनवस्थाभयात् समवायएव विश्रान्तिः स्वीकरिष्यतः इति प्रकृतन्यायबाधः शंक्यः, सम्बन्धिनि संयोगादिस्थित्यर्थं विलक्षणं सम्बन्धान्तरं स्वीकृत्य तत्र विश्रमाङ्गीकरणापेक्षया "अन्ते रण्डाविवाहः चेद् आदावेव कुतो न सः" इति न्यायेन संयोगादिरेव आश्रयतादात्म्येन तत्र तिष्ठति इति स्वीकारस्यैव रामणीयकाद् विलक्षणव्यर्थपदार्थान्तरस्वीकारे गौरवात् च. नहि समवायवत् संयोगादिसम्बन्धाअपि त्यक्तुं शक्यन्ते. प्रत्यक्षादिप्रमितिसिद्धत्वात् तस्य वैलक्षण्यन्तु सम्बन्धमात्रस्य अपाणिपिहितम् उभयनिष्ठतानियमम् उल्लंघ्य द्व्यणुकत्र्यणुकादिसम्बन्धिध्वंसप्रागभावदशायामपि परमाण्वादिषु नित्यस्य तस्य अङ्गीकारात् स्फुटमेव. समवाये दूषणान्तराणि श्रीहर्षमिश्रादिभिः खण्डनखण्डखाद्यादिषु श्रीपुरुषोत्तमचरणैः प्रस्थानरत्नाकरे च दर्शितान्येव इति किमिह प्रासङ्गिकेन न्याये तस्य साम्याद् अवस्थितेः इति लेखस्तु लेखकप्रमादाद् वा स्यात्. एवम् ईश्वरेच्छायाः नित्यत्वे उक्तरीत्या ततो व्यवस्थया क्रमेण सर्वकार्योद्भवे च न कोऽपि त्वादृशचोद्यावकाशः.

ननु तन्नित्यत्वे सृष्टिप्रलययोः व्यवस्था न स्याद् इति चेद्, न; आकारभेदादेव तदुपपत्तेः तथाहि भगवतः इच्छाशक्तिः नित्या उक्तादिमानेभ्यः भगवदभिन्नाः च प्रकाशाश्रयन्यायात्. तस्याः अनेकाकाराः भगवत्स्वभावसिद्धाः, "**परास्यशक्तिः विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च**" (श्वेता.उप.६।८) इति वैविध्यश्रुतेः. तत्र सृष्टिं करिष्यद् ब्रह्म "**बहु स्यां प्रजायेय**" इति तदाकाररूपं भवति. "**प्राणन्नेव प्राणो नाम भवति**

वदन् वाक्'' (बृह.उप.१।४।७) इति श्रौतन्यायेण ''**सो अकामयत**'' (बृह.उप.१।२।४) इत्यादिश्रुतिभ्यः तथा सिद्धेः. ततः सर्वकार्यकलनानुकूलं कालात्मकं स्वस्वं रूपं प्रकटयति ''**अहोरात्राणि विदधत्**'' (ऋक्.संहि.१०।१-९०।२), ''**सर्वे निमेषा जज्ञिरे**'' (महाना.उप.१।८) इत्यादिश्रुतिभ्यः. ततः तत्-तत्कालावयवेषु क्रमिकाणि सर्वकार्याणि पर्यालोचयति. स्वेच्छाकारेषु सर्वकार्यवत् तदधिकरणत्वेन तत्-तत्कालोपाधीनपि विषयत्वेन निवेशयति इति निष्कर्षः, ''**स तपो अतप्यत**:'' (तैत्ति.उप.३।१) इत्यादिश्रुतिभ्यः. नच उक्ताकाररूपेण भवने कारणान्तरसहकारो अपेक्ष्यते, सर्वशक्तेः सर्वेश्वरस्य इतरनिरपेक्षत्वात्. नच ''**बहु स्याम्**'' इत्याद्याकाररूपं सर्वदा भवतु इति शंक्यं, कालस्यैव अभावात्. तस्य भगवच्चेष्टारूपत्वाद् ''**योऽयं कालः तस्य ते अव्यक्तबन्धोः चेष्टाम् आहु चेष्टते येन विश्वम्**'' (भाग.पुरा.१०।३।२६) इति श्रीभागवतवाक्यात्. चेष्टायाः इच्छातन्त्रत्वाद् अचिन्त्यानन्तशक्तेः स्वतन्त्रस्य अपर्यनुयोज्यत्वात् च. नहि लौकिकेश्वरो महाराजादिरपि उपवन-भवन-वनप्रभृत्यन्यतमस्थाने विजिहीषन् पर्यनुयोज्यो भवति, ह्यः कथं वनविहारम् इष्टवान् इदानीं च उपवनविहारं कथङ्कारं कामयतः इति. अन्यथा तवापि मायायाः अनादित्वेन तद्वृत्तिविशेषरूपाः ईश्वरेच्छाः कुतो न शश्वद् भवेयुः. तथा सति सर्वं कार्यं सर्वदा स्यात्. नच उद्बोधकेन निर्वाहः तदपि नित्यम् अनित्यं वा? आद्ये सर्वदा तदुद्बोधाद् अनिस्तारः. अन्त्ये तस्यापि कारणं कल्प्यं, तत्रापि उक्तएव विकल्पः. तत्र प्रथमे घट्टकुटीप्रभातं, द्वितीयेतु अनवस्था. यदिच मायायाः नित्यत्वेऽपि तद्वृत्तिविशेषाणां कयाचिद् उक्त्या क्रमिकत्वम् आश्रीयेत. तर्हि लाघवात् श्रुत्यनुग्रहात् च इच्छाकाराणामेव तथात्वम् आश्रीयताम्.

(१) [ममतु तत्-तद्विषयाकारो मायायाः वृत्तिविशेषः ईश्वरेच्छा. तस्याश्च तत्-तद्विषयाकारतैव तत्-तत्सम्बन्ध-व्यपदेश-प्रयोजिका. एवम् अन्तःकरणवृत्तिविशेषो जीवेच्छा सम्बन्धव्यपदेशस्तु पूर्ववद् ज्ञेयः तथाच ईश्वरेच्छायाः अनित्यत्वे तत्कारणं वाच्यम् इति आह **तां केन ?**

इति ताम् इच्छां केन सृजति? इति अर्थः. ननु तामपि इच्छयैव सृजति इति चेत्, किं तयैव इच्छया उत अन्यया. न तावद् आद्यः, आत्माश्रयप्रसङ्गाद् इति आह, आत्मना आत्माश्रयाद् न इति. आत्माश्रयप्रसङ्गाद् आत्मना न सृजति इति अर्थः. न द्वितीयः, अनवस्थापत्तेः. एकैककार्यार्थम् एकैकानादीच्छा-सन्ततेः कल्पने अनन्तकार्यार्थम् अनन्तेच्छासन्ततीनां कल्पने अत्यन्तगौरवाच्च इति आह अन्येष्ट्यापि भयाद् इति. 'अपि'शब्दबलाद् न सृजति इति सम्बध्यते. भयन्तु अनवस्थादिरूपम्.]

(२) यत्तु मम मते मायावृत्तिविशेषः तद्विषयाकारः ईश्वरेच्छा इत्यादिना स्वमतप्रदर्शनं कृतं तदपि जल्प-वितण्डान्यतरकथाम् आश्रित्य परमतं खण्डयतो न सम्भवति तथैव परेणापि खण्डने प्रतीकारासम्भवात्. नच प्रतितन्त्रसिद्धान्तेनापि प्रतिकर्तुं शक्यते, तत्रापि दोषोद्भावनस्य शक्यत्वात्. तदेव उच्यते तत्-तद्विषयाकारो मायावृत्तिविशेषः ईश्वरेच्छा इति असङ्गतम्. सृष्टेः पूर्वं तत्-तदाकारताप्रयोजकानां विषयाणाम् अभावेन मायावृत्तेः तत्-तदाकारत्वासम्भवात्. नच तत्-तत्पदार्थाभावेऽपि तत्संस्काराणां पूर्वं मायायां सत्त्वाद् मायावृत्तेः तदाकारता सम्भवत्येव इति वाच्यं, तत्-तत्संस्काराणां वासनारूपाणां भवन्मते अनादित्वात् सदैव सृष्टिः स्यात्. नच उद्बुद्धानामेव तद्धेतुत्वम् इति वाच्यं, सृष्टेः पूर्वम् उद्बोधकस्यापि असत्त्वात्. नच अदृष्टविशेषस्यैव उद्बोधकत्वं तस्यापि भवन्मते अनादित्वे तद्दोषतादवस्थ्यात्. किञ्च तादृशेच्छायाः विषयैः सह सम्बन्धोऽपि न सम्भवति तदानीं विषयाणाम् अनुत्पन्नत्वात्. अनुत्पन्नैः तत्सम्बन्धासम्भवस्तु त्वयैव उक्तः. नच ईश्वरेच्छायाः तत्-तद्विषयाकारतैव

> **सम्बन्धव्यपदेशप्रयोजिका इति वाच्यं, तत्-तद्विषयाकारत्वस्य पूर्वोक्तयुक्त्या असम्भवात्. किञ्च तत्-तदाकारताया: वृत्तिनिष्ठत्वेन विषयवृत्तित्वाभावात् कथं विषयेषु सम्बन्धत्वव्यपदेशप्रयोजकत्वम्. एवम् अन्त:करणवृत्तिविशेषो जीवेच्छापि न सम्भवति वृत्तौ विशेषस्य वक्तुम् अशक्यत्वेन ज्ञानतो वैलक्षण्यस्य दर्शयितुम् अशक्यत्वात्. सम्बन्धव्यपदेशस्तु पूर्ववदेव अपास्त: तथाच इत्यादिना उक्ता:** ईश्वरेच्छाया: अनित्यत्वे तत्कारणं वाच्यम्. इच्छैव तत्कारणं चेद् आत्माश्रय: तदिच्छा अन्येच्छया चेद् अनवस्था... **इत्यादयो दोषास्तु इच्छाया: अनित्यत्वास्वीकारादेव अपास्ता:.**

(३) सहप्राक्षे ममतु तत्-तद्विषया...इत्यादिम् अनवस्थादिरूपम् इत्यन्तं भागं दूषयन्ति. **यत्तु मम मते** इत्यादिना **अपास्ता:** इत्यन्तेन जल्पवितण्डे इति अनयो: स्वरूपं गौतमेन पञ्चलक्षण्यां ‘‘**यथोक्तोपपन्न: छल-जाति-निग्रहस्थान-साधनोपालम्भो जल्प:, स प्रतिपक्षस्थापनहीनो वितण्डा**’’ (गौ.न्या.सू.१।२।२-३) इति दर्शितम्. **यथोक्तोपपन्न:** प्रमाणतर्कसाधनोपालम्भ: सिद्धान्ताविरुद्ध: पक्षप्रतिपक्षपरिग्रह: छलादिभि: साधनम् उपालम्भ: च अस्मिन् क्रियते इति, तथा स जल्प:. यद्यपि छलादिभि: न कोऽपि अर्थ: साधयितुं शक्य: तथापि तदुपयोगो दर्शितो न्यायभाष्यकृता: ‘‘**यत् तत्प्रमाणै: अर्थस्य साधनं तत्र छल-जाति-निग्रहस्थानानाम् अङ्गभावो रक्षणार्थत्वात्. तानि हि प्रयुज्यमानानि परपक्षविघातेन स्वपक्षं रक्षयन्ति**’’ (गौ.न्या.सू.भा.१।२।२-३) इति. स जल्पएव प्रतिपक्षस्थापनया हीनो वितण्डा भवति. अतएव भाष्यम् ‘‘**यौ तौ समानाधिकरणो विरुद्धौ धर्मौ पक्ष-प्रतिपक्षौ इति उक्तौ तयो: एकतरं वैतण्डिको न स्थापयति इति परपक्षप्रतिषेधेनैव प्रवर्तते इति**’’ (गौ.न्या.सू.भा.१।२।२-३) इति. एतदन्यतरकथाश्रणयन्तु परपक्षखण्डनद्वारा स्वपक्षरक्षणार्थम्. अतएव प्राच: कस्यचिद् उक्ति: तत्रैव भाष्ये सङ्गृहीता

“**तत्त्वाध्यवसायसंरक्षणार्थं जल्प-वितण्डे बीजप्ररोहरक्षणार्थकङ्टकशाखारक्षणवत्**” (गौ.न्या.सू.भा.१।२।२-३) इति. **प्रतितन्त्रसिद्धान्तः इति** पञ्चलक्षण्यां “**सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावाद्**” (गौ.न्या.सू.१।१।२७) इति तन्त्रभेदात् सिद्धान्तानां चातुर्विध्यम् अभिधाय “**समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः**” (गौ.न्या.सू.१।१।२९) एतत्स्वरूपम् उक्तम्. **तदेव उच्यते** इत्यादेः अयम् आशयः : यच्च ममतु इत्यादि ज्ञेयः इत्यन्तं तद् असङ्गततरं, स्वोक्तदोषानुन्मोषाद् दोषान्तरपोषात् च. तथाहि मायायाः नित्यत्वेन तद्वृत्तीनामपि तथात्वौचित्यात् सर्वदा सर्वं कार्यं स्यात्. सर्वेच भावविकाराः तस्य युगपत् स्युः. तस्याः सान्तत्वकल्पनेतु पुनःसृष्टिः न स्यात्. तथाच “**धाता यथा**” (ऋक्.संहि.१०।१९०।२) इत्यादेः व्याकोपः. अतो मायायाः सान्तत्वं न शक्यवचनम्. यावच्च तस्याः स्थितिः तावत् सर्वकार्यसातत्यं सुस्थमेव. एककालिकानेककार्यनिर्वाहाय तस्याः युगपदनेकवृत्तिविशेषाङ्गीकारे लोकविरोधः, अन्तःकरणे तथा अदर्शनात्. ईश्वरेच्छायां नित्यत्वानेकाकारकत्वमात्रप्रयुक्तवैलक्षण्यस्य च तत्र प्रयुज्यमानेच्छाशब्दे पारिभाषिकत्वाद्यापादकत्वे सति त्वन्मते मायावृत्तित्वेन अन्तःकरणवृत्तित्वेन च अत्यन्तवैलक्षण्यस्य सुतरां तथात्वं स्यात्. अनेकाकारकत्वाद्यनपायाच्च. किञ्च यावन्तो वृत्तिविशेषाः कल्प्यन्ते तावत्यो मायाएव कल्प्यन्तां लाघवाद् “**इन्द्रो मायाभिः**” (ऋक्.संहि. ६।४७।१८) इत्यादिश्रौतबहुवचनानुकूल्याच्च. एवम् अन्तःकरणान्यपि. नच इदृशीश्रुतिः स्मृतिः वा काचिद् अस्ति यद्बलाद् जडायाअपि मायायाः इच्छादिचेतनधर्मवत्त्वम् आश्रीयेत. अवैलक्षण्याग्रहेतु लाघवाद् जीवेच्छानामपि मायावृत्तिविशेषत्वं स्वीकुरु. नहि तस्याः मायावृत्तितां तासां च अन्तःकरणवृत्तितां बोधयत् किञ्चिद् वाक्यम् औपनिषदैः आम्नायते. किम् इदञ्च वृत्तिविशेषस्य विषयाकारत्वं नाम विषयावगाहित्वं विषयप्रतियोगिको यत्किञ्चित्-सम्बन्धानुयोगित्वं वा? आद्ये अनुत्पन्नस्य पदार्थस्य कथम् अवगाहः? सर्वज्ञत्वाद् इति चेद् अनुत्पन्नेन पदार्थेन इत्यादिस्वोक्तिबाधः. एतेन द्वितीयोऽपि परिहृतः. मूलोक्तदूषणग्रस्ततया मायावृत्तिविशेषरूपेच्छाविषययोः सम्बन्धस्य निर्वक्तुम् अशक्यत्वात् च. कश्च त्वन्मतेऽपि इच्छा-विषययोः सम्बन्धः? यद्व्यपदेशप्रयोजकं विषयाकारत्वं विषय-विषयिभावो अन्यो वा? आद्ये सिद्धसाधनं, विषयाकारपदार्थबोधक्षणएव

संसर्गतया भासमानत्वात्. नापि अन्त्यः, अशक्यनिर्वचनत्वाद् निर्वचनेच निर्वक्तुम् अशक्यत्वाद् इति स्वोक्तिविरोधः. एवं मायातद्वृत्तिविशेषयोरपि कः सम्बन्धः? न स्वरूपात्मकः, मायायाः नित्यतया त्वदुक्तदूषणग्रासात्. नापि समवायः, अनङ्गीकारात्. तदन्यः चेद् निरुच्यतां सोऽपि वृत्तिविशेषाणाम् अनित्यत्वे दुर्वचः. निर्विशेषस्य अनुयोगिप्रतियोगित्वान्यतरापादकसंयोगासिद्धेः **‘‘पुरुषाश्मवद् इति चेत् तथापि’’** (ब्र.सू.२।२।७) इत्यादौ उभयकारणतावादस्य निरासाच्च. त्रिगुणा प्रकृतिरेव च ‘माया’शब्दार्थः इतितु त्वयैव अष्टमश्लोके वक्ष्यते.

(२) किञ्च ईश्वरेच्छायाः मायावृत्तिविशेषत्वे तस्याः मायाधर्मत्वसिद्ध्याः ‘‘गौणः चेद् न ‘आत्म’शब्दात्’’ ‘‘कामाच्च न अनुमानापेक्षा’’ (ब्र.सू.१।१।५,१।१।१७) इत्यादिसूत्राणि त्वद्रीत्या ईक्षतिसूत्रं च बाध्येत. तथाहि लक्षणप्रमाणाद्यधिकरणसिद्धब्रह्मकारणवादम् आक्षिप्य रजःसत्त्वाभ्यां क्रियाज्ञानसम्भवेन प्राप्तं प्रकृतिकारणवादं पूर्वपक्षीकृत्य इदम् उच्यते. ‘‘ईक्षतेः न अशब्दम्’’ (ब्र.सू.१।१।४) इति. अशब्दं प्रकृतिः न जगत्कारणं तद्हि अशब्दं, वेदे ‘‘तद् ऐक्षत, स ईक्षत’’ (छान्दो.उप.६।२।३,ऐत.उप.१।१।१) इत्यादौ ईक्षणपूर्वकसृष्टिश्रवणाद्; ईक्षणस्य च चेतनमात्रधर्मत्वात्. यद्यपि इदं सूत्रम् अणुभाष्ये नैवंपरं दृश्यते तथापि अस्य अयमपि अर्थः आस्माकीनश्रीभगवत्पादानां सम्मतः इति अग्रिमभाष्यशास्त्रार्थ-तत्त्वप्रकाशादिभ्यो ज्ञायते. अग्रेच ईक्षणम् उपाधिभूतप्रकृतिगुणसम्बन्धाद् ब्रह्मणि उपचर्यते इति आशङ्क्य परिहरति. ‘‘गौणः चेद् न ‘आत्म’शब्दाद्’’ (ब्र.सू.१।१।५) इति तथा ‘‘सो अकामयत’’ (बृह.उप.१।२।४) इत्यत्र ‘‘यदा हि एषः एतस्मिन् अदृश्यैः’’ (तैत्ति.उप.२।७) इति ‘‘तद् ऐक्षत’’ इत्यत्र ‘‘तस्य तावदेव चिरम्’’ (छान्दो.उप.६।१४।२) इत्येवमादिषु ईक्षितृनिष्ठस्य मोक्षोपदेशोऽपि ईक्षणस्य

प्रकृतिधर्मत्वापाकरणपूर्वकं शुद्धब्रह्मधर्मत्वसाधकः उपन्यस्तो. यदि मायावृत्तिविशेषएव ईशेच्छापदार्थः स्याद् न एतत् तर्हि किञ्चिदपि सङ्गच्छेत. किञ्च ‘आनन्दमय’शब्दार्थस्य परमात्मत्वं साधयित्वा सत्त्वांशेन सुखरूपा प्रकृतिरेव तदर्थो अस्तु इति आशङ्कायां सूत्र्यते “कामाच्च न अनुमानापेक्षा” (ब्र.सू.१।१।१७) इति आनन्दमयस्य “सो अकामयत” इति इच्छाश्रवणाद् न जडा प्रकृतिः तदर्थः, ‘च’कारेण तपः श्रवणात् च इति अर्थः. तथा प्रकृतेः उपादानत्वं निरस्य ब्रह्मणएव तथात्वं साधयन् “अभिध्योपदेशाच्च” (ब्र.सू.१।४।२४) इति श्रौतम् इच्छोपदेशं तन्निरासे तस्यैव तथात्वे च हेतू करोति यदि इच्छा मायाधर्मः स्याद् ईक्षति-कामादयः तर्हि विरुद्धतया हेत्वाभासताम् आपद्यमानाः तत्-तत्सूत्राणि प्रलापवचनयेयुः. ननु मायावृत्तिविशेषोऽपि चेतनसन्निधानेन जायमानत्वात् तद्धर्मो भवतु इति चेद्, मा एवं; नहि चुम्बकसन्निधानादेव अयसि उत्पद्यमानं चलनं चुम्बकधर्मो भवितुम् अर्हति नापि उभयसंयोगजन्यत्वाद् उभयधर्मः सः इति शक्यवचनम्.

(३) किञ्च मायाधर्मरूपा ईश्वरेच्छा सुख-दुःख-मोहादिवत् सर्वैरपि जीवैः अनुभूयेत. त्वया अष्टमश्लोके वक्ष्यमाणरीत्या तेषां तत्र प्रतिबिम्बरूपत्वात् तदवच्छिन्नत्वाद् वा. नच जीवानधिकरणमायादेशे ईशेच्छा उत्पद्यते, अतो न तथा इति शङ्क्यं जीवविभुत्वाभिमानभङ्गप्रसङ्गात् तस्यां देशविभागबोधकश्रुत्याद्यभावात् च. तथा सति तदेकदेशोपहितेश्वरस्यापि अव्यापकत्वं च प्रसज्येत इति दिक्. यत्तु तथाच ईश्वरेच्छायाः इत्यादि अनवस्थादिरूपम् इत्यन्तं तत्तु तन्नित्यत्वाभ्युपायेनैव निरस्तम्. किञ्च “**पूर्ववद् वा** (ब्र.सू.३।२।२९) इत्युक्तैकदेशिमतेन प्रथमं साक्षाद् इच्छारूपेण भवनोरीकारेऽपि न इच्छान्तररूपकरणसहकारापेक्षा सर्वज्ञस्य सर्वशक्तेः इतरनैरपेक्ष्याद् लोकन्यायाच्च. लोकेहि जीवाः कार्यकरणे स्वेच्छाम् अपेक्षन्ते नतु इच्छानिर्माणे

तामेव इच्छाम् इच्छान्तरं वा; किन्तु, ज्ञानवशात् स्वतएव ताम् उत्पादयन्ति, अज्ञाते अर्थे इच्छानुदयात्. एवं सर्वज्ञोऽपि स्वतएव तादृशेच्छारूपो भवति इति समञ्जसम्. एतदेव अनुसृत्य ‘‘**आकाशवद् व्यापकंहि**’’ (त.दी.नि.१।२५) इति शास्त्रार्थकारिकावरणभङ्गादिषु ‘‘**पूर्वम् इच्छारूपेण ततो मायारूपेण भूत्वा**’’ (त.दी.नि.आ.भं.१।२५) इत्यादि समगादि. ननु स्वतएव इच्छारूपेणेव प्रपञ्चरूपेणापि भवनस्य तामन्तरेणैव सम्भवाद् इच्छायाः अप्रयोजकत्वं स्याद् इति चेत्, तर्हि जीवेच्छानामपि तथात्वं स्वीक्रियतां प्रयत्नमात्रेण कार्यसम्भवात्. अथ जानाति इच्छति यतते इति अनुभवबलेन अनन्यथासिद्धनियतपूर्ववृत्तित्वनिश्चयाद् न एवम् इति चेत्, तर्हि प्रकृतेऽपि सृष्टिश्रुतिशते प्रपञ्चं प्रति इच्छायाः कारणत्वश्रवणात्, तां प्रति कारणान्तरस्य तत्र क्वापि अश्रवणाच्च न एवम् इति बुद्ध्यस्व. किञ्च लोके प्रयत्नानाम् इच्छापूर्वकत्वसिद्ध्यर्थमेव प्रथमम् इच्छारूपेण भवनं यथा ‘अहम्’ इति व्यवहारसिद्ध्यर्थं स्वयम् ‘अहं’नामकतया भवनम्. एकाकिनो भयादिसिद्ध्यर्थं च भयादिरूपेण भवनं ‘‘**सो ‘अहम् अस्मि’ इति अग्रे व्याहरत् ततो ‘अहं’नामाः अभवत् तस्मादपि एतर्हि आमन्त्रितो ‘अहम् अयम्’ इत्येव अग्रे उक्त्वा अथ अन्यद् नाम प्रब्रूते...सो अबिभेत् तस्माद् एकाकी बिभेति**’’ (बृह.उप.१।४।१-२) इत्यादिश्रुतिषु उच्यते. तस्मात् तव अनित्येच्छावादएव त्वदुक्तदोषाः स्वारूढशाखाच्छेदनन्यायेन प्रसज्यन्ते.

(२) तथाहि कापिल-जैमिनीय-काणादाद्यभिमतान् प्रकृत्यदृष्टपरमाण्वादिकारणतावादान् ईक्षत्यधिकरणादिषु आभासीकृत्य शङ्कराचार्यैरपि कार्यमात्रं प्रति ईश्वरस्य कारणतायाः स्वीकाराद् ‘इच्छा’शब्दाभिधेयवृत्तिविशेषनिरूपितं तत्र कारणत्वम् अस्ति न वा? न द्वितीयः लक्षणप्रमाणाद्यधिकरणसिद्धः तन्निरङ्कुशकारणताबाधेन परतन्त्रेच्छत्वेन च अनीश्वरत्वप्रसङ्गात्. सर्वहेतुभूताम् ईशेच्छां प्रत्यपि ब्रह्मभिन्नस्य जडस्य कस्यचित् कारणत्वे तस्यैव मुख्यकारणत्वसिद्ध्याः बहुश्रुतिसिद्धेश्वरकारणतावादोच्छेदप्रसक्तेः वादान्तरापाताच्च. आद्यः

चेद्, ‘‘बहु स्याम्’’ इति वृत्तिविशेषं किं तेनैव वृत्तिविशेषेण जनयति उत वृत्तिविशेषान्तरेण ? उभयत्र क्रमेण त्वदुक्तात्माश्रयानवस्थाने, यदि च ईश्वरत्वमात्रम् इच्छानिरूपितकारणतावच्छेदकं प्रपञ्चं प्रति ‘‘बहु स्याम्’’ इति इच्छाविशिष्टेश्वरत्वेन कारणता इति अङ्गीक्रियेत तर्हि उक्तैकदेशिमतएव प्रवेशो दूषणोद्भावनप्रयासापार्थक्यं च. इयांस्तु विशेषः सत्यसङ्कल्पादिश्रुतिसिद्धम् इच्छायाः ईश्वरधर्मत्वं विहाय अश्रुतमायावृत्तिविशेषरूपत्वकल्पने श्रुतहान्यश्रुतकल्पने प्रसज्येयाताम् इति.

(१) [स्वमतेऽपि इच्छायाः सृष्टिहेतुत्वेन अनित्यत्वेन च तत्कारणम् आह इच्छोद्भवः इत्यादि. कालाद् उद्बुद्धाद् जनकर्मणः इच्छोद्भवः. कालेन कर्मोद्बोधस्तु संहाराव्यवहितप्राक्क्षणे भविष्यत्फलजनककर्मभिः अनुद्बुद्धैरेव स्वज्ञानद्वारा जनितया एतावता कालेन जनकर्माणि उद्बोधयिष्यामि इति इश्वरेच्छया दृश्यते हि योगिनः इच्छायाअपि व्यवहितकाले फलजनकत्वम्. अमुस्मिन् काले उत्थास्याम् इति सङ्कल्प्य युञ्जतः तस्मिन्नेव काले उत्थानदर्शनात्.]

(२) यत्तु स्वमतेऽपि इच्छायाः सृष्टिहेतुत्वेन अनित्यत्वेन च **इत्युक्त्वा** कालाद् उद्बुद्धाद् जनकर्मणः इच्छोद्भवः **इत्युक्तं तत् न सम्यक्. सृष्टेः पूर्वं कालसत्त्वे तस्य नित्यत्वम् अनित्यत्वं वा ? न आद्यः तस्य सर्वदैव सत्त्वेन कारणसत्त्वस्य कार्यसत्त्वव्याप्यत्वात् सदैव कर्मोद्बोधेन इच्छोत्पत्तिसत्त्वात् प्रलयाभावप्रसङ्गः. किञ्च सृष्टेः पूर्वं कालकर्मादिस्वीकारे ‘‘सदेव सोम्य इदम् अग्रे आसीद्, एकमेव अद्वितीयम्’’ (छान्दो.उप.६।२।१) इत्यादिश्रुतिविरोधः तत्र ऐक्यावधारणाद्वितीयपदैः सजातीय-विजातीय-स्वगतभेद-व्यावृत्तेः त्वदभिमतायाः विजातीयकर्मकालादिसत्त्वे असिद्धेः, न द्वितीयः.**

कालस्य अनित्यत्वे तदुत्पादकं वक्तव्यम्, इच्छैव चेद्; अन्योन्याश्रयः. अन्येच्छा चेत्, तस्याअपि अनित्यतया तदुत्पादकम् अन्यत् चेद्; अप्रामाणिकी अनवस्था स्यात्. किञ्च मायायाअपि अनादित्वस्य भवत्सम्मततया तस्याः च दुर्घटघटनापटीयस्त्वात् तयैव सर्वकार्यसम्भवे कालेच्छाकर्मणां स्वीकारो निरर्थकः. किञ्च 'कर्म'पदेन क्रियाविवक्षिता अदृष्टं वा? न आद्यः क्रियायाः क्षणिकत्वेन कर्तृनिष्ठत्वेन च कर्तृणां सृष्टेः पूर्वम् अभावेन वक्तुम् अशक्यत्वात्. न द्वितीयः अस्मन्मते अदृष्टस्य अभावाद् **इति अग्रिमस्वग्रन्थविरोधापत्तेः. अपिच त्वन्मते सृष्टिहेतुः ईश्वरेच्छा तद्धेतुभूतानि कर्माणि तदुद्बोधहेतुः कालः कालेन कर्मोद्बोधे संहाराव्यवहितप्राक्क्षणे भविष्यत्फलजनकर्मभिः अनुद्बुद्धैरेव स्वज्ञानद्वारा जनिता** एतावता कालेन जनकर्माणि उद्बोधयिष्यामि **इति ईश्वरेच्छा हेतुः, तत्रापि अन्यएव हेतुरिति महागौरवं वेदविरुद्धकल्पना च इयम्. नहि इदृशप्रणालीबोधिका काचित् श्रुतिः अस्ति स्मृतिः वा इति आस्तां विस्तरः. योगिनस्तु योगजन्यसामर्थ्यविशेषेणैव नियतकाले उत्थानं नतु व्यवहितकारणजन्यम् इति विषमो दृष्टान्तः. किञ्च योगिनि पुण्यपापादीनां सत्त्वाद् अदृष्टविशेषेण उद्बोधो युज्यते. सृष्टेः पूर्वन्तु "आत्मा वा इदम् एकएव अग्रे आसीद्" (ऐत.उप.१।१) इत्यादिश्रुत्याः तेषाम् असत्त्वाद् इच्छा न सम्भवत्येव.**

(३) अथ सहस्राक्षे स्वमतेऽपि इच्छायाः इत्यादि अचेतनस्य तथा कल्पयितुम् अशक्यत्वात् च इत्यन्तं भागं दूषयन्ति. **यत्तु** स्वमतेऽपि इत्यादिना **सर्वम् असङ्गतमेव** इत्यन्तेन. अत्र अयम् आशयः : तथाहि उद्बोधकस्य कालस्य सृष्टेः पूर्वमपि सत्त्वे सदा उद्बोधप्रसंगः **"सदेव सोम्य..."** (छान्दो.उप.६।२।१) इत्यादि श्रुतिविरोधः च. तत्र

‘‘**एकमेव अद्वितीयम्**’’ (छान्दो.उप.६।२।१) इति ‘एक’पदेन सजातीयभेदस्य, ‘एव’इति अवधारणेन विजातीयभेदस्य, ‘अद्वितीय’पदेन स्वगतभेदस्य च व्यावृत्तेः तावकग्रन्थेष्वपि दर्शितत्वात्. अनित्यत्वेतु चक्रकापत्तिगर्भो अन्योन्याश्रयः : इच्छया कालस्य जननं कालेन कर्मणाम् उद्बोधः, उद्बुद्धकर्मभिः इच्छायाः जननम् इति. किञ्च कर्मणां क्रियारूपत्वे लोके तस्याः त्रिक्षणावस्थायितया संहारप्राक्कालिककर्मणां पुनः सृष्टिकाले असत्त्वेन तेषाम् उद्बोधनं तैः इच्छायाः जननं च असम्भवि. तेषाम् अदृष्टरूपत्वेतु अदृष्टस्य अभावाद् इति त्वदुक्तिव्याघातः, ‘‘**सदेव...**’’ इत्यादिव्याकोपः च. किञ्च उभयथापि कर्मणां कर्तृनिष्ठत्वेन ईश्वरनिष्ठेच्छायाः जनकत्वमपि उपपादनसापेक्षं हेतुकार्ययोः वैयधिकरण्यात्. किञ्च किम् इदं कर्मणाम् उद्बुद्धत्वं नाम? फलजननसामर्थ्यम् इति चेत्, तदपि अधुना ‘‘एतत् कर्म स्वफलं जनयतु’’ इति ईश्वरेच्छाविषयत्वमेव वक्तव्यम् अन्यथा स्वातन्त्र्येण कर्ममात्रात् फलनिष्पत्तेः सम्भवेन ईश-तदिच्छादेः अजागलस्तनत्वापातात्. तथा इच्छाविषयत्वरूपोद्बुद्धत्वस्वीकारेतु इच्छया उद्बोधः उद्बुद्धैः इच्छायाः जननम् इति अन्योन्याश्रयादयः नापि संहारप्राक्क्षणे अनुद्बुद्धैः कर्मभिः एतावता कालेन कर्माणि उद्बोधयिष्यामि इति इच्छायाः जननं सम्भवति. नच कालविशेषस्य उद्बोधकत्वं स्वभावो वाच्यः, प्रलयोत्तरं विशेषस्य निर्वक्तुम् अशक्यत्वात्. सविशेषोऽपि नित्यो जन्यो वा? इति विकल्पे पूर्वोक्तदोषानिस्तारात् च. अनुद्बुद्धैरपि तस्याः जननसम्भवे सृष्टिकालेऽपि तज्जननार्थं कर्मोद्बोधसाधनप्रयासो व्यर्थो द्वारभूतज्ञानस्य नित्यत्वात्. नच इष्टापत्तिः प्रलयकालेऽपि इच्छाजननेन सदा सृष्टिप्रसङ्गात्. अथ तद्वारणार्थम् उद्बुद्धानामेव जनकत्वं नियम्यते इति चेत्, संहारप्राक्क्षणे तदसिद्धिः. नापि इच्छाकारे कालपरिमाणनिवेशे भविष्यत्फलककर्मणां हेतुत्वं युज्यते, तेषां जडत्वेन इयता कालेन वयं फलं साधयिष्यामः इति बुद्ध्यसम्भवात्, ‘‘**फलम् अतः**’’ (ब्र.सू.३।२।३८) इति न्यायेन फलस्य ईश्वरतन्त्रत्वात् च. कालनिवेशः स्वातन्त्र्याद् इति चेद्, इच्छाकारप्रकटनेऽपि स्वातन्त्र्यम् अस्तु श्रौतप्रक्रियानुपरोधात्. किञ्च तथासति पापादेः तौल्येऽपि केषाञ्चित् त्वरितमेव फलं केषाञ्चित् च कारणमन्तरैव स्वेच्छया अत्यन्ततरविलम्बेन फलं जनयतः

ईश्वरस्य वैषम्यनैर्घृण्ये न अपेयाताम्. ''**आत्मसृष्टेः न वैषम्यम्**'' (त.दी.नि.१।७६) इति वक्ष्यमाणस्य श्रुतिहृदयसमाधेः त्वदप्रियत्वात्. नापि कर्मणाम् अनुद्बुद्धत्वाद् अदोषः तदुद्बोधानुद्बोधयोरपि कालद्वारा स्वेच्छयैव भवनस्य त्वया स्वीकारात्. ''कालेन कर्मोद्बोधः''[1] इति प्रयोगस्तु ''**कर्मणि च**'' (पाणि.सू.२।२।१४) इति समासनिषेधात् चिन्त्यः. यद्यपि विवरणकारादिभिः '**इध्मप्रव्रश्चनादि**'(पातं.महाभा.२।२।१४) शब्दसिद्धये इह च 'अस्ये'त्यर्थकत्वम् आश्रित्य कर्मणि इति उच्चार्य विहितषष्ठ्याएव समासनिषेधो व्यवस्थापितः. एवमेव च '**शब्दानुशासनम्**' (पाणि.सू.१।१।१) इत्यादिप्रयोगाः सङ्गच्छन्ते. तथापि प्रकृतेः कालकर्मणोः कर्तृकर्मणोः उभयोः उपात्ततया उभयप्राप्तौ कर्मणि इत्यनेनैव षष्ठीसिद्ध्या निषेधः तदवस्थः. नापि चेतनप्रयत्नासमवहितेन कालेन कर्मणाम् उद्बोधः शक्यवचनः जडत्वात्. नच वह्न्यादेः दाहकत्वादिवत् स्वभावाद् उद्बोधकत्वं वाच्यं, स्वभावानपायेन सर्वदा उद्बोधप्रसंगात्. नच मण्यादिवत् प्रतिबन्धकं किञ्चित् कल्प्यम् अप्रसिद्धेः. किञ्च उद्बोधसिद्धये तन्निवर्तकं किञ्चिद् उपपादनीयं तस्य नित्यत्वे सदा उद्बोधस्य अनित्यत्वे तस्यापि कारणापेक्षत्वेन अनवस्थायाः च आपातः, तच्च निवर्तकम् ईश्वरेच्छाजन्यं न वा? आद्ये चक्रकापत्तिः अनवस्था वा. द्वितीये ''**सिद्धिः सर्वादिः अच्युतः**'' (विष्णुस.ना.२४।९८,९९,१००) इत्यादिमानविरोधः. कारणान्तरं च अप्रसिद्धम् एतेन तण्डुलविक्लित्यादिवत् तस्य आगन्तुकत्वकल्पनापि निरस्ता, तेजःसंयोगादितुल्यनिमित्तापेक्षत्वात्. वसंतादिकालेषु पुष्पाद्युत्पत्तिरपि न तत्तत्कालमात्रहेतुका व्यभिचारदर्शनात्, किन्तु ईश्वरेच्छाजन्या इति अन्यत्र विस्तरः. अतो न तद्दृष्टान्ततोऽपि निर्वाहः अन्यथा कालमात्रात् सृष्टेरपि सम्भवेन ईश्वरवैयर्थ्यप्रसङ्गस्य दुर्वारत्वाद्, नापि संहारप्राक्क्षणावच्छिन्नेच्छायाः व्यवहितकाले तात्कालिकप्रयत्नसमवधानं विना फलजनकत्वं युक्तं लोकविरोधात् स्पष्टतया तथाबोधकशास्त्राभावाच्च. नच ईश्वरस्य प्रयत्नाभावः शङ्क्यः, ''**सो अकामयत**'' (तैत्ति.उप.२।६) ''**स ईक्षत**'' (ऐत.उप.१।१।१) इति इच्छातः पृथक् ''**इदं सर्वम् असृजत**'' (तैत्ति.उप.२।६) ''**स इमान् लोकान् असृजत**'' (ऐत.उप.१।१।२) इत्यादौ सर्जनानुकूल-

---

[1] ''कालेन कर्मणाम् उद्बोधः'' प्रयोगस्साधुः नतु 'कर्मोद्बोधः'.(सम्पा.)

व्यापारादिरूपस्य तस्य श्रावणात्. अन्यथा **"सो अकामयत"** इत्यनेनैव गतार्थत्वाद् न अग्रिमं वदेत्. नच ईश्वरप्रयत्नसहकारात् कालेन उद्बोधो अङ्गीकार्यः, तन्नित्यतायां तस्य इच्छां विना अनुपपत्त्या इच्छानित्यतायाः अर्थादापत्तेः अनित्यतायां चक्रकाद्यापाताच्च. योगिनस्तु उत्थाने न तदिच्छा साक्षाद्धेतुः किन्तु, तया कृतानि योगशास्त्रीयसाधनानि सर्वव्यवस्थानियामकनिखिलफलप्रतिपादकेश्वरेच्छा च. न एवम् ईशेच्छायाः नाशे व्यवहितकाले तस्याः फलं भवितुम् अर्हति तस्य फलसमर्पकेश्वरान्तराभावात्. किञ्च त्वन्मते काल-कर्मणोः अधिष्ठाने भ्रमकल्पितत्वेन ईश्वरज्ञानागोचरतया एतावता कालेन कर्माणि उद्बोधयिष्यामि इति तदिच्छाकारोऽपि उपपादनसापेक्षः. नहि शुक्त्यादिकं सत्त्वविशिष्टेन्द्रियो वा कल्पितरजतादिकम् अनुभवति नापि इयता कालेन इति कालपरिमाणं संहारोत्तरम् उपपद्यते, परिच्छेदकसूर्यगत्याद्यभावात्. सर्वशक्तिना ईश्वरेणैव परिमाणस्य नियमनेतु तन्नियमनरूपकार्यार्थम् इच्छा प्रलयेऽपि अवश्यमन्तव्याः.

(१) [आगन्तुकं कारणम् आगन्तुककार्ये अपेक्षितम् इति न्यायसम्भावितम् अर्थं प्रमाणेन विशिष्य दृढयितुम् आह **श्रुतिस्मृतिगणैः** इति. निश्चियते इति शेषः. "ज्योतिष्टोमेन स्वर्गकामो यजेत" (   ) इत्यादिभिः, "साधुकारी साधुः भवति, पापकारी पापो भवति, पुण्यो वै पुण्येन कर्मणा भवति, पापः पापेन" (बृह.उप.४।४।५), "यः इह रमणीयचरणाः" (छान्दो.उप.५।१०।७), "एषः ह्येव साधु कर्म कारयति" (कौषी.उप.३।९) इत्यादिभिः च श्रुतिभिः, "यो द्रव्य-देवता-त्याग-सम्भूतो रसः उत्तमः, देवान् सन्तर्प्य सः रसो यजमानं फलेन च" (याज्ञ.स्मृ.३।४।१२१) इति "समवायीतु पुरुषो मोहेच्छा-द्वेष-कर्मणः" (याज्ञ.स्मृ.३।४।१२५) इति, "विपाकः कर्मणां प्रेत्य केषाञ्चिद् इह जायते, इह च अमुत्र च एकेषां

भावः तत्र प्रयोजनम्'' (याज्ञ.स्मृ. ३।४।१३३) इत्यादियाज्ञवल्क्यादिस्मृतिभिः च कर्मणां फलहेतुत्वम् उक्तम्. जडस्य च चेतनमन्तरा हेतुत्वायोगाद् ईशः कल्प्यते ''एषः ह्येव एनं साधु कर्म'' (कौषी.उप. ३।८) इत्यादिश्रुतिभ्यः च. तस्य च इच्छाद्वारैव हेतुता, लोके तथैव दर्शनाद्, विलक्षणसामग्रीमन्तरा कार्यवैलक्षण्यानुपपत्तेः च. अतएव ''सो अकामयत'' (तैत्ति.उप. २।६) इत्यादिश्रुतिनां सङ्गतिः.]

(२) आगन्तुकं कारणम् आगन्तुककार्ये अपेक्षितम् **इति न्यायस्तु अप्रामाणिकत्वाद् अनादरणीयः, पुण्यपापानाम् आगन्तुकत्वाभावात्. ''ज्योतिष्टोमेन स्वर्गकामो यजेत'' ( ) इत्यादिश्रुतीनां तत्र प्रामाण्यं वदन् उपेक्ष्यः. किञ्च अनतिप्रसक्तम् आगन्तुकत्वमपि अनिर्वचनीयं यत् तव अभिमतएव स्यात्. तथाच ''दृश्यते हि'' (ब्र.सू.शां.भा.-२।१।६) इत्यादिकम् असङ्गतम्. अग्रेच** पुण्यो वै पुण्येन कर्मणा... **इत्यादिना** कर्मणां फलहेतुत्वं... जडस्य चेतनमन्तरा हेतुत्वायोगाद् ईशः कल्प्यते ''एष ह्येव एनं साधु कर्म'' (कौषी.उप. ३।९) इत्यादिश्रुतिभ्यः च. तस्यच इच्छाद्वारैव हेतुता लोके तथैव दर्शनाद् **इत्याद्युक्तम्. तत्र लोकदृष्ट्यैव कल्पने लोके प्रथमं फलेच्छा ततः फलसाधनताज्ञानं ततः उपायेच्छा भवति. लोकानुसारेणैव ईश्वरेऽपि कल्पने तत्रापि तथैव कल्पनीयं लोकानुसारिभिः भवद्भिः तथाच ईश्वरस्य आप्तकामत्वं न स्यात्. लोकानुसारित्वात् तत्रापि इष्टापत्तिस्वीकारे आप्तकामश्रुतिविरोधः, तदनादरे वेदबाह्यत्वं दोषः.** विलक्षणसामग्रीमन्तरा कार्यवैलक्षण्यानुपपत्तेः च **इति कथनमपि वेदान्तिनां न शोभते. तैः एकस्यैव ब्रह्मणो जगत्कारणत्वस्वीकारात्. अतएव**

“न विलक्षणत्वाद् अस्य तथात्वं ‘च’शब्दाद्” (ब्र.सू.२।१।४) इति सूत्रे “यद् उक्तं चेतनं ब्रह्म जगतः प्रकृतिः इति तद् न उपपद्यते. कस्माद्? विलक्षणत्वाद् अस्य विकारस्य...जगद् ब्रह्मविलक्षणम् अचेतनम् अशुद्धं च दृश्यते ब्रह्म च जगद्विलक्षणं चेतनं शुद्धं च श्रूयते” (ब्र.सू.शां.भा.२।१।४) इत्यादिना पूर्वपक्षं निरूप्य “दृश्यते तु” (ब्र.सू.२।१।६) इति सूत्रे “‘तु’शब्दः पूर्वपक्षं व्यावर्तयति इत्यादि उक्त्वा ‘दृश्यतेहि लोके चेतनत्वेन प्रसिद्धेभ्यो पुरुषादिभ्यो विलक्षणानां केश-नखादीनाम् उत्पत्तिः, अचेतनत्वेनच प्रसिद्धेभ्यो गोमयादिभ्यो वृश्चिकादीनाम् उत्पत्तिः’...” (ब्र.सू.शां.भा.२।१।६) एवं ब्रह्मणोऽपि चेतनाद् अचेतनजगदुत्पत्तिः शङ्कराचार्यैः निरूपिता नतु सामग्रीवैलक्षण्यं कार्यवैलक्षण्ये निरूपितं नापि इच्छाकृतं वैलक्षण्यं दर्शितम् इति तन्मतविरोधः. अस्मन्मतेच रमणेच्छयैव ब्रह्म जगद्रूपम् अभवत् तत्र श्रुतिरेव प्रमाणं नतु तादृशनियमो लोकदृष्टिः वा. एवञ्च अस्मन्मतएव “सो अकामयत” (तैत्ति.उप.२।६) इति श्रुतिसङ्गतिः.

(३) आगन्तुकं कारणम् इत्यादिं भागं परिहरन्ति **इति न्यायस्तु अप्रामाणिकत्वाद्** इत्यादिना. **आगन्तुकत्वाभावाद्** इति सकलं प्रलयकालं तूष्णीं स्थित्वा पुनः सृष्टिकाले फलजनकानां तेषां चिरस्थाय्यदृष्टरूपतया आगन्तुकत्वस्य वक्तुम् अनौचित्याद् इति भावः. **किञ्च अनतिप्रसक्तम्** इति अतिप्रसङ्गरहितम् आगन्तुकत्वमपि न निर्वक्तुं शक्यम्. त्वन्मते अभिधेयमात्रस्य मिथ्यात्वेन इदम् आगन्तुकम् इदम् अनागन्तुकम् इति कार्येषु कारणेषु वा विवेकस्य दुर्घटत्वात्. **आप्तकामश्रुतिः** इति श्रुतिस्तु **“सर्वम् इदम् अभ्यात्तो अवाक्यनादरः”** (छान्दो.उप.३।१४।४) **“न तस्य कार्यं करणं च विद्यते”** (श्वेता.उप.६।८) इति छान्दोग्य-श्वेताश्वतरादिरूपा बोध्याः. **“न अनवाप्तम् अवाप्तव्यम्”** (भग.गीता ३।२२) इत्यादिस्मृतिः च अत्र अनुसन्धेया. नच इच्छावादे अयं दोषः शङ्क्यः, श्रुत्याद्युपरोधेन लोकानुरोधस्य

अनादरात्. जगतो ब्रह्मपरिणामत्वेन ब्रह्मानन्यतया तद्विषयकेच्छायाम् उक्तदोषस्य अप्रसक्तेः, नवमश्लोकखण्डनादिस्थलेषु दर्शयिष्यमाणत्वात् च. अतो जन्येच्छापक्षएव उक्तरीत्या आप्तकामत्वभङ्गप्रसङ्गः. **तैः एकस्यैव** इति ‘‘**एतस्माद् जायते प्राणो मनः सर्वेन्द्रियाणि च खं-वायु-ज्योतिर्-आपः पृथिवी विश्वस्य धारिणी**’’ (मुण्ड.उप.२।१।३) इति मुण्डकादिवाक्यानुरोधाद् वेदान्तिभिः परस्परविलक्षणमपि प्राणादिकं प्रति एकस्यैव ब्रह्मणः कारणत्वं स्वीक्रियते नतु सांख्यैरिव मनइन्द्रियादिकं प्रति सात्त्विक-राजसाद्यहंकारः काणादैरिव नित्याः पृथिव्यादिपरमाणवः. किञ्च **विलक्षणसामग्रीमन्तरा...इ**त्यादि वदतः तस्य तत्तत्कार्याणि स्वस्वकारणसलक्षणानि सम्भवन्ति इति आशयम् अभिप्रेत्य तद्भाष्यसम्मतं बाधकम् आहुः **न विलक्षणत्वाद्** इत्यादिना अविरोधस्य प्रथमे पादे ‘‘**न विलक्षणत्वाद्**’’ (ब्र.सू.२।१।४) इत्यादि सूत्रद्वयेन सालक्षण्याभावाद् जगद्-ब्रह्मणोः कार्य-कारणभावाभावं पूर्वपक्षीकृत्य ‘‘**दृश्यतेतु**’’ (ब्र.सू.२।१।६) इति एकेन चेतनजन्यकेशलोमादि-गोमयाद्यचेतनजन्यवृश्चिकादिदर्शनोपन्यासेन सः निराकृतः. **सूत्रे** इत्यस्य **निरूप्य** इति अग्रेण अन्वयः. **यद् उक्तम्** इति, प्रथमस्य चतुर्थे ‘‘**प्रकृतिश्च प्रतिज्ञा...**’’ (ब्र.सू.१।४।२३) इत्यादौ यत् पूर्वम् उक्तम् इति अर्थः. **सूत्रमपि** इति **न प्रवृत्तम्** इति अग्रेण अन्वेति. अत्र अयम् आशयः : यदपि आगन्तुकं कारणम् इत्यादि सूत्रं सङ्गतम् इत्यन्तम् उक्तं तद् अकिञ्चित्करम्. त्वदुक्तरीत्या सिद्ध्यद् नित्यताकस्य कालस्य आगन्तुकं कर्मोद्बोधं प्रति, अनादेः मायायाः आगन्तुकं प्रपञ्चं प्रति, नित्यस्य ब्रह्मणो अधिष्ठानतया तं प्रति च कारणत्वं वदता त्वया आगन्तुकं कारणम् इति नियमस्य अवश्यबाध्यत्वात्. ‘‘**ज्योतिष्टोमेन स्वर्गकामः**’’ (द्र.आप.श्रौ.सू.१९।२५।१६) इत्यादीनितु स्वर्गादि उदिश्य ज्योतिष्टोमादिन् विदधानानि आख्यातार्थभावनाकरणभाव्ययागस्वर्गादीनां प्रपञ्चाविर्भावावसरे साधनफलभावं बोधयन्ति. प्रलयकाले नियोज्य जीवानां स्वर्गादेः च तिरोहितत्वेन यजेत इति विधेः कौण्ठ्यात्. एतेनैव ‘‘**पुण्यो वै पुण्येन कर्मणा**’’ (बृह.उप.४।४।५) इत्यादीन्यपि सृष्टौ प्रवृत्तायाम् उत्तरोत्तराधमोत्तमजन्मादिपरम्पराव्यवस्थावेदकतया व्यवस्थापितानि वेदितव्यानि. तथाहि ‘‘**पुण्यो वै पुण्येन**’’ इति वाक्यं काण्वानां बृहदारण्यके

पञ्चमाध्याये(तृतीयाध्याये) द्वितीयब्राह्मणे जारत्कारवसंवादे अस्ति. तत्प्राणोत्क्रान्त्यादिविचाराद् जन्मपरम्परापरं प्रतीयते. अग्रिमवाक्यं च तत्रैव सप्तमाध्याये द्वितीयब्राह्मणे ‘‘**यथाकारी यथाचारी तथा भवति साधुकारी साधुः भवति पापकारी पापो भवति पुण्यो पुण्येन कर्मणा भवति पापो पापेन**’’ (बृह.उप.४।४।५) इति पठ्यते. तथा सति ‘‘**साधुकर्मकारि**’’ इत्यादिपाठभेदस्तु अनभ्यासहेतुकाद् वेदविप्लावकत्वादेव, काण्वमाध्यन्दिनैः उभयैरपि तत्र ‘कर्म’पदस्य अपाठात्. अत्रापि ‘‘**तद् यथा तृणजलायुका तृणस्य अन्तं गत्वा...आत्मानम् उपसंहरति एवमेव अयम् आत्मा इदं शरीरं निहत्य अविद्यां गमयित्वा...आत्मानम् उपसंहरति**’’ (बृह.उप.४।४।३) इत्यादिना पूर्वशरीरत्यागे पित्र्यगान्धर्वाद्यन्यतमशरीरान्तरप्राप्त्यादेः श्रावणं प्रागुक्तमेव अर्थं गमयति नतु सृष्ट्यारम्भे प्राक्सृष्टिकर्मणा पुण्यत्वादिकं बोधकपदाद्यभावात्. एवं छान्दोग्ये पञ्चाग्निविद्यान्ते अर्चिमार्गधूममार्गनिरूपणे धूममार्गानां ‘‘**मासेभ्यः पितृलोकं पितृलोकाद् आकाशम् आकाशात् चन्द्रसमं चन्द्रमषः सोमो राजा तद् देवानाम् अन्नं तं देवाः भक्षयन्ति तस्मिन् यावत्सम्पातम् उषित्वा अथ एतम् अध्वानं पुनः निवर्तन्ते**’’ (छान्दो.उप.५।१०।४-५) इत्यादिना स्वर्गादेः परलोकात् पुनः इहागमनम् उक्त्वा क्रमेण अन्नभावं वीर्यभावं च आपन्नानां वीर्यद्वारा स्वकर्मानुरोध्युत्तमाधमशरीरापत्तिः उच्यते ‘‘**तद्य इह रमणीयचरणाः अभ्याशो ह यत् ते रमणीयां योनिम् आपद्येरन् ब्राह्मणयोर्निं वा**’’ (छान्दो.उप.५।१०।७) इत्यादिना. ‘‘**अथ यः इह कपूयचरणाः अभ्याशो ह यत् ते कपूयां योनिम् आपद्येरन् श्वयोर्निं वा**’’ (छान्दो.उप.५।१०।७) इत्यादिना च **अभ्याशो** ह शीघ्रमेव. अतः एतदपि सृष्टिदशायां जन्मपरम्परामेव दर्शयति नतु प्रलयोत्तरं पुनः सृष्ट्यारम्भे शरीरपरिग्रहं श्रूयमाणक्रमहान्यश्रुततत्कल्पनाप्रसङ्गात्. इच्छायाः कर्महेतुत्वबोधिकायाः ‘‘**एष ह्येव**’’ इति श्रुतेः उदाहारस्तु तावके कर्मणाम् इच्छाहेतुत्ववादे स्वपादे कुठारप्रहारः. तथा उक्तयाज्ञवल्क्यस्मृतिवाक्येष्वपि ‘‘**यो द्रव्यदेवतात्याग...**’’ (याज्ञ.स्मृ.३।४।१-२१) इति प्रथमं वाक्यं सृष्टिकालिकव्यवस्थापरमेव सङ्गच्छते देवतोद्देशेन द्रव्यत्यागलक्षणयागादेः तदैव सम्भवात्. अनुपदम् अग्रे ‘‘**संयोज्य वायुना सोमं नीयते रश्मिभिः ततः**’’ (याज्ञ.स्मृ.३।४।१२२) इत्यादिना

छान्दोग्याद्युक्तरीतिकपरलोकपर्यावर्तस्य कथनाच्च. एवं द्वितीयं समवायित्ववाक्यमपि जीवस्य आगन्तुकसमवायबोधकं मोहेच्छादिपदघटितं सर्गोत्तरकालिकवृत्तावेदकमेव “**इच्छा-द्वेष-समुत्थेन द्वंद्वमोहेन भारत! सर्वभूतानि सम्मोहं सर्गे यान्ति परन्तप!**” (भग.गीता ७।२७) इति भगवद्वाक्यैकवाक्यतया तथा अध्यवसायात्. एवं तृतीयं “**विपाकः कर्मणां प्रेत्य केषाञ्चिद् इह जायते इह वा अमुत्र वा एकेषां भावः तत्र प्रयोजनम्**” (याज्ञ.स्मृ.३।४।१३३) इति वाक्यमपि ‘प्रेत्यादि’शब्दघटितम्. तथैव मरणे इदं लोकादो लोकादिव्यवस्थायाः सृष्टावेव अभिव्यक्तेः. अतः इदम् एकस्मिन् जन्मनि जन्मान्तरे वा लोकान्तरे वा कर्मणां फलावश्यम्भावमेव बोधयति नतु सृष्ट्यन्तरव्यवस्थाम्. किञ्च कर्मणां तौल्येऽपि फले विलम्बाविलम्बयोः नियामिका भगवदिच्छैव मन्तव्या यया सञ्चितकर्मसमुदायात् प्रारब्धं देहोत्पत्तिसमये निर्मीयते. सैव अत्र अभिप्रायपर्यायः ‘भाव’शब्देन प्रतिभाति, जीवाभिप्रायपरत्वे पुत्रेप्सु ससाधनवन्ध्यादिषु प्रत्यक्षविरोधात्. अतः सृष्ट्यन्तरे प्राक्कर्मणां फलजनकत्वपक्षेऽपि सर्वनिर्वाहिका तदिच्छा नित्यैव मन्तव्या. तस्माद् न इमाः श्रुतिस्मृतयः आम्नायसिद्धभगवदिच्छा-सर्वकारणतावारणतात्पर्यवत्यः तन्निषेधाश्रवणात्. नच “**पञ्च पञ्चनखाः भक्ष्याः**” (रामा.४।१७।३९) इत्यादाविव इतरनिषेधः फलति इति वाच्यं, रागतः पञ्चनखापञ्चनखभक्षणस्येव प्रकृते उभयोः कारणतायाः प्रत्यक्षेण अप्राप्त्यान्यतरपरिसंख्यानायोगात्. “**इमाम् अगृभ्णन् रशनाम् ऋतस्य**” (शु.यजु.सं.२२।२) इत्यादौ लिङ्गेनेव शाब्दलिङ्गादिना उभयप्रसंजनेऽपि अश्व-गर्दभाभिधान्योः ग्रहणे तुल्यविनियोगवद् इच्छा-कर्मणोः तुल्यकारणत्वस्य अभावेन सर्वनिदानभूतेच्छायाः हेतुतानिरासासिद्धेः. कर्मणां हि फलं प्रत्येव कारणता इच्छायास्तु कर्माणि प्रत्यपि सा इति न तौल्यम्. नहि दण्ड-चक्रव्यापारेण घटः इत्युक्त्या कुलाललालसायाः तत्र निमित्तता निवर्त्यते. कर्मणां रोष-तोषादिद्वारा ईश्वरेच्छाजनकत्वं तस्याश्च केवलफलहेतुता इति कलहेतु जीवानां नानाकर्मकरणे कारणं मृग्यं, कुतः सर्वोऽपि न पुण्यमेव अनुतिष्ठति इति जीवेच्छावैचित्र्यमेव अनुष्ठानवैचित्र्ये प्रयोजकम् इति चेत्, तत्रापि तद् मृग्यं कुतो न सर्वोऽपि सुखसाधनं साधुकर्मैव विधित्सति? अथ

पुण्यकर्मणां तथा स्वेच्छया तदनुष्ठानम्, एवं पापकर्मणामपीति पूर्व-पूर्वकर्मणामेव जीवकामकारणता कल्प्यते इति चेत्, तर्हि सकृदपि सुकृतानुष्ठाने कदाचिदपि कलुषं न स्यात्. एकवारमपि दुरिताचरणे कदाचिदपि सदाचरणं च न घटेत, दृश्यन्तेतु एकस्यापि देहिनो विविधानि सुकृतदुष्कृतानि कस्मिंश्चिद् जनुषि कल्मषाधिक्ये कस्मिंश्चित् च पुण्याधिक्यम्. किञ्च तथा सति सर्वेऽपि श्रौत-स्मार्ताः च विधि-प्रतिषेधाअपि व्यर्थाः भवेयुः, प्राक्तनकर्मणैव प्रवर्तन-निवर्तनयोः सिद्ध्या तदनुपयोगात्. नच इच्छावादेऽपि अयं दोषः शङ्क्यः, "**कृतप्रयत्नापेक्षस्तु**" (ब्र.सू.२।३।४२) सूत्रेण तस्य परिहरिष्यमाणत्वात्. तस्मात् परमेश्वरएव स्वेच्छानुसारेण आप्रलयं तानि तानि कर्माणि कारयित्वा तानि तानि फलानि प्रयच्छति इत्येव स्वच्छम्. यथा कौषितकिब्राह्मणे इन्द्रप्रतर्दनसंवादे "**स एषः प्राणएव प्रज्ञात्मानन्दो अजरो अमृतो न साधुना कर्मणा भूयान् नोएव असाधुना कनीयान्. एष ह्येव एनं साधु कर्म कारयति तं यम् एभ्यो लोकेभ्यः उन्निनीषते, एष उ एव एनम् असाधु कर्म कारयति तं यम् अधो निनीषते. एषः लोकपालः एषः लोकाधिपतिः एषः सर्वेशः स म आत्मा विद्यात् स म आत्मा इति विद्याद्**" (कौषी.उप.३।८) इति पुण्यपापैः अशक्यस्पर्शत्वम् आकारविशेषविशिष्टेच्छयैव साध्वसाधुकर्मकारयितृत्वं ततएव निरतिशयैश्वर्यादिकं च श्राव्यते. त्वन्मतेतु जडेनापि कालेन ईश्वरनिरपेक्षेण कर्मणाम् उद्बोधस्य जडैरपि तैः कर्मान्तरानुष्ठानस्य ईशेच्छायाः च जनने तेषाम् इतरनिरपेक्षं नरक-नाक-लोकादिप्रापकत्वमपि अपथ्यभेषजभोजनादेः रोगारोग्यादिजनकत्ववत् सुवचम् अतो जडस्य च चेतनमन्तरा हेतुत्वायोगाद् ईशः कल्प्यते इत्युक्तिः अरण्यरुदितायते कारणभूतकर्मणां वैलक्षण्येन फलरूपकार्यवैलक्षण्यस्यापि उपपत्तेः च.

(१) [अतएव "फलम् अतः उपपत्तेः" (ब्र.सू.३।२।३८) इति सूत्रं सङ्गतम्. वस्तुतस्तु लोके राजसेवाचौर्यादि राजतोषरोषद्वारैव हेतुत्वदर्शनाद् इहापि कर्मभिः ईशतोषादिकमेव कल्प्यते. इयमेव युक्तिः सूत्रे 'उपपत्तिः'शब्देन उक्ताः. एवञ्च अन्यथानुपपत्त्याः कल्प्यमानम् अदृष्टमेव

फलदानार्हं कल्प्यताम् इति अपास्तम्, अस्मन्मते अदृष्टस्य अभावाद्, अचेतनस्य तथा कल्पयितुम् अशक्यत्वाच्च.]

(२) तेन अतएव **इत्यादिकम् असङ्गतमेव** “फलम् अतः उपपत्तेः” **(ब्र.सू.३।२।३८) इति सूत्रमपि अन्यथानुपपत्त्याः कल्प्यमानम् अदृष्टमेव फलदानार्हं कल्प्यतां किम् ईश्वरेण? इति मीमांसकमतखण्डनार्थं न प्रवृत्तम्. तदग्रिमेण “धर्मं जैमिनिरतएव”(ब्र.सू.३।२।४०) इति सूत्रेण तन्मतप्रदर्शनस्य “पूर्वन्तु बादरायणो हेतुव्यपदेशाद्” (ब्र.सू.३।२।४१) इति सूत्रेण पुनः तत्खण्डनस्य च त्वदुक्तरीत्या वैयर्थ्यापातात्; किन्तु, मध्यमाधिकारिणं प्रति निरूपणं तेहि फलेप्सवएव भवन्ति. तच्च फलं फलदातृसत्त्वएव सम्भवति इति तद् आह, अतः ईश्वरादेव फलं भवति यत्किञ्चिद् ऐहिकं पारलौकिकं वा. कुतः? उपपत्तेः “सर्वस्य वशी सर्वस्य ईशानः” (बृह.उप.४।४।२२) इति श्रुतिः वस्तुमात्रेशितृत्वम् असङ्कुचितम् आह. नहि अन्यस्य वस्तु अन्यो दातुं समर्थो अतो भगवानेव तथा इति अर्थः. अतएव “श्रुतत्वात् च” (ब्र.सू.१।१।१०) इत्यनेन सूत्रेण “स वा एषः महान् अज आत्मा...अन्नादो वसुदानः” (बृह.उप.४।४।२४) इत्यादिरूपा श्रुतिरपि फलदातृत्वबोधिका प्रमाणत्वेन दर्शिता. ईश्वरस्य इच्छाद्वाराफलदातृत्वम् इत्येव युक्तिः ‘उपपत्ति’शब्देन दर्शिता. लोके राज्ञः सेवा-चौर्यादिजन्य-तोष-रोषद्वारैव तत्-तत्कर्मफलदातृत्वम्. एवम् अत्रापि तोष-रोषद्वारैव फलं भवति इति यद् उक्तं तदपि तन्मते न सम्भवति. तथाहि (फलमतः)सूत्रस्थेन ‘अतः’इति पञ्चम्यन्तेन कस्य परामर्शो ब्रह्मणः पारिभाषिकस्य मायावच्छिन्नस्य ईश्वरस्य वा? न आद्यो ब्रह्मणि तोष-रोषादीनां त्वया अनङ्गीकरात्. तस्य निर्धर्मकत्वं भवद्भिः स्वीक्रियते. न द्वितीयः “तद् अव्यक्तम्**

आह हि’’ (ब्र.सू.३।२।२३) इत्यादिपूर्वसूत्रेषु तथाविधस्य अनिरूपणेन अप्रकृतत्वेन ‘एतत्’शब्देन परामर्शासम्भवात्. तस्माद् अतएव **इति आरभ्य सर्वम् असङ्गतमेव.**

(३) चेतनस्यैव फलदातृत्वाग्रहे तत्तत्कर्माराध्यानां चेतनानामेव तथात्वसम्भवेन तद्दात्रीश्वरकल्पनायाः वैफल्यात् च. तस्माद् अस्माकीनरीत्यैव ‘‘**फलम् अतः**’’ इति अधिकरणं सङ्गच्छते नतु त्वद्रीत्या, प्रपञ्चयिष्यते च इदं पुरस्तात्. कर्मणाम् इच्छाहेतुकत्वबोधकश्रुतेः अपपाठेन पुनः पुनः उपन्यासस्तु प्रकृतिविरुद्धः. किञ्च दर्शनानुरोधाद् ईश्वरस्य इच्छाद्वारैव कारणतां सङ्गिरमाणः तस्य जन्यमात्रं प्रति कारणत्वाद् जन्यानि साध्वसाधुकर्माणि प्रति सृष्टिकाले जन्यं तदुद्बोधं प्रति च तस्य तद्द्वारा कारणतां कुतो न ब्रूषे तदवचने च जडकारणवादाभ्युपगमाद् अनीश्वरवादापातः त्वदिष्टोपपत्तिबाधात् ‘‘**फलम् अतः**’’ इति अधिकरणासङ्गतिः च. मन्मतेतु कर्मफलानि आरोग्यादिकं च प्रति ईश्वरेच्छायाएव निदानत्वात् कर्मौषधादेः च द्वारतया अवान्तरकारणत्वाद् न कोऽपि शङ्कावकाशः. ‘‘**सो अकामयत**’’ इत्यादिश्रुतयस्तु न त्वन्मते सङ्गताः श्रुतहान्यश्रुतकल्पनापत्तेः. तासु इच्छायाएव बहुभावम् उच्चनीचभावं लोकसर्जनादिकं च प्रति निमित्तत्वश्रवणात् कालेन उद्बोधितैः कर्मभिः तस्य इच्छा उदपाद्यत इति तत्र अश्रवणात्. यच्च वस्तुतस्तु इत्यादिकल्पयितुम् अशक्यत्वाच्च इत्यन्तं तद् असद्, इहैव सूत्रे ‘उपपत्ति’शब्देन उक्तयुक्तेः प्रहाणे अत्रैव जैमिनिमतनिराससिद्ध्या पुरस्त्ययोः तदुपन्यासतन्निराससूत्रयोः आपार्थ्यापातात्. किञ्च राजानोहि स्वविषयेषु चौर्यादेः निवृत्तये स्वेष्टकर्मणां प्रवृत्तये च तत्तत् फलम् अर्पयन्ति ‘‘**अकुर्वन् च एवं पूर्वतरोर्वीपतयः सर्वदुराचरणानां स्वराज्यसमये समुच्छेदम्**’’ इति पुराणादिषु प्रसिद्धम्. ईश्वरश्च सर्वोपायज्ञसर्वशक्तिः बहुकालाद् दुष्कृतिनो दण्डयन्नपि स्वरोषपोषककल्मषाणाम् अविशेषाद् अशेषाणाम् उच्छेदमेव कुतो न सम्पादितवान्? तदुपासकानां ज्ञानिनामपि ‘‘**न स्तुवीत न निन्देत स्वभावविषमं जनं**’’ (भाग.पुरा.७।१४।४२) ‘‘**सुहृन्-मित्रार्युदासीन-मध्यस्थ-द्वेष्य-बन्धुषु साधुष्वपि च पापेषु समबुद्धिः विशिष्यते**’’ (भग.गीता ६।९) इति भागवताद्युक्तप्रक्रियादर्शनात्. सर्वमुक्तोपसृ-

प्यस्य तस्य कथं रोष-तोषौ गुणोद्रेकाद् इति चेद्, युगपद्उभयविधफलवितरणानुपपत्तिः उद्रेके च ईश्वरातिरिक्तं किं बीजं स्यात्? तदितरं तदुद्घाटनेतु अनीश्वरवादप्रसक्तिः. किञ्च राज्ञां चोरादिदण्डने ईश्वरतोषसम्पिपादयिषा तद्भीतिश्च प्रयोजिका. तथा ईश्वरस्य फलदाने किं प्रयोजकम्? "**परमतः सेतुन्...**" (ब्र.सू.३।२।३१) इति अधिकरणे तन्नियामकनिषेधात्. मन्मतेतु क्रीडार्थमेव प्रपञ्चरूपेण प्रादुर्भावात् "**कृतप्रयत्नापेक्षात्वाच्च**" न कापि अनुपपत्तिः. अतएव "**न प्रयोजनवत्त्वाद्**" (ब्र.सू.२।१।३२) इति आशङ्क्य "**लोकवत्तु लीलाकैवल्यम्**" (ब्र.सू.२।१।३३) इत्येव श्रीबादरायणाचार्यैः असूत्रि. एवं तव उपपत्तेः बाधितत्वेन अन्यथानुपपत्त्याः कल्प्यमानम् अदृष्टमेव फलदानार्हं कल्प्यताम् इति अस्माकीनाक्षेपो दुरुद्धरः. अन्यथानुपपत्तिस्तु "**धर्मं जैमिनिरतएव**" (ब्र.सू.३।२।४०) इत्यत्र शारीरकभाष्ये या दर्शिता सैव. नच अदृष्टाभावः त्वया अशक्यवचनः, अपूर्वानङ्गीकारे कर्मणां कालान्तरीयफलसाक्षात्कारणत्वस्य अनुपपत्त्या त्वदुक्तश्रुतिस्मृतीनां बाधात्. "**सम्भूतो रसः उत्तमः**"(याज्ञ.स्मृ.३।४।१२१) इति त्वदुक्तवाक्ये 'रस'शब्देन मिताक्षरायां तस्यैव व्याख्यानात्. कालतः उद्बुद्धाद् जनकर्मणः इच्छोद्भवः इति त्वदभिमतव्यवस्थाभङ्गाच्च. शङ्कराचार्यैः "**फलम् अतः**" इत्यादि सूत्रव्याख्याने कर्मणो अनुक्षणविनाशितायाः अङ्गीकारेण तस्य यावत् प्रलयकालम् अनुद्बुद्धतया स्थितेः सृष्ट्यारम्भे उद्बोधस्य च असम्भवदुक्तिकत्वात् स्वोक्तनिर्वाहाय अपूर्वाभ्युपगमेतु 'गले पादुका'न्यायेन[1] अदृष्टम् ऊरीकृतम्. 'अदृष्ट'पदस्य तत्पर्यायत्वात्. जडस्यापि तथा कल्पनं शक्यम् इतितु औषधादिदृष्टान्तेन प्रागेव अदर्शयाम. अथ कः तर्हि सूत्रे 'उपपत्ति'शब्दार्थ इति चेद्, उच्यते निष्कामानां भजनसिद्धये पूर्वाधिकरणे सर्वोत्तमत्वं निरूप्य सकामानां तत्सिद्धये फलदातृत्वं कर्मादिसर्वनियन्तृत्वं च निरतिशयैश्वर्यबोधकम् उपपादयितुम् इदम् अधिकरणम् आरभ्यते. अत्र फलं तत्तत्कर्मसचिवेभ्यो देवेभ्यः उत भगवतः इति संशयः. देवानाम् उद्देश्यतया श्रवणं भगवतः

---

[1] चरणयोः धारणार्थं प्रदत्तयोः पादुकयोः धारणानभ्युपगन्तुः अन्ते अगतिकतया गले धारणमौढ्ये गलेपादुकान्यायः प्रसज्यते.

सर्वेश्वरत्वसर्वहेतुश्रवणं च संशयबीजम्. तत्र ‘‘**यद् आग्नेयोः अष्टाकपालो अमावास्यायां**’’ (तैत्ति.संहि.२।५।३।२) च ‘‘**पौर्णमास्यां च अच्युतो भवति ऐन्द्रं दधि अमावास्यायाम् ऐन्द्रं पयो अमावास्यायाम्**’’ (कृ.यजु.२।५।३।२) इत्यादि तत् तदुत्पत्तिवाक्यावलम्बेन देवतोद्देशेनैव द्रव्यस्य त्यज्यमानत्वात्. याज्याः पुरोनुवाक्याद्यनुरोधेन देवानामेव हव्यभोक्तृत्वनिश्चयात्. ‘‘**वायुमेव स्वेन भागधेयेन उपधावति सएव एनं भूतिं गमयति**’’ (द्र.ब्र.सू.शां.भा.र.१।३।३३) इत्यादिना तेषामेव फलदातृत्वश्रवणात्. ‘‘**आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखादि च प्रयच्छन्ति तथा राज्यं प्रीता नृणां पितामहाः**’’ (याज्ञ.स्मृ.१।१०।२७०) इत्यादिस्मरणाच्च, द्वितीयस्कन्धतृतीयाध्यायाद् उक्तरीत्या प्रतिनियतत्वाच्च. देवेभ्यएव फलम् इति पूर्वपक्षे अभिधीयते ‘‘**फलम् अतः उपपत्तेः**’’ अतः ईश्वरादेव फलं भवति यत्किञ्चिद् ऐहिकं पारलौकिकं वा कुतः? उपपत्तेः ‘‘**सर्वस्य वशी सर्वस्य ईशानः**’’ इति श्रुतिः वस्तुमात्रेशितृत्वम् असङ्कुचितम् आह, नहि अन्यस्य वस्तु अन्यो दातुं समर्थइति. नच उद्देश्यत्वादिविरोधः ‘‘**चक्षोः सूर्यो अजायतः**’’ (पु.सू.१२) ‘‘**अग्निः मूर्द्धा चक्षुषी चन्द्रसूर्यौ**’’ (मुण्ड.उप.२।१।४), ‘‘**देवाः नारायणांगजाः**’’ (भाग.पुरा.२।५।१५), ‘‘**इन्द्रादयो बाहवः आहुरुस्रा**’’ (भाग.पुरा.२।१।२९), इत्यादिश्रुतिस्मृतिभिः तेषां भगवदवयवोद्भवत्व-तद्रूपत्वयोः बोधनेन भगवतः उद्देश्यतानपायात्. ‘‘**भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्**’’ (भग.गीता ५।२९) ‘‘**अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च**’’ (भग.गीता ९।२४), ‘‘**सुरुचिः हुतभुग् विभुः**’’,‘‘**यज्ञभुग् यज्ञसाधनः**’’ (विष्णुस.ना.१०७।८७८-८८०,११८।९७९-९८०) इत्यादौ तस्यैव सर्वरूपेण भोक्तृत्वावगमाच्च. ‘‘**सएव एनम्**’’ (द्रष्ट.छान्दो.उप.४।१५।५) इत्यादिकन्तु द्वारत्वाभिप्रायकं ‘‘**यो यो यां यां तनुम्**’’ (भग.गीता ७।२१) इति उपक्रम्य ‘‘**लभते च ततः कामान् मयैव विहितान्**’’ (भग.गीता ७।२२) इति स्मरणात्. एतेन तेषां तत्तत्कर्म तत्-तत्फलप्रतिनियतत्वमपि तदिच्छयैव इति सिद्धम्. अग्रेच ‘‘**सएव एनम्**’’ इत्यादिप्रत्यक्षश्रुतेः प्राबल्यम् आशंक्य स्वमतेऽपि प्रत्यक्षश्रुतिम् आह आचार्यः ‘‘**श्रुतत्वात् च**’’ (ब्र.सू.१।१।१०)

इति **''स वा एषः महान् अज आत्मा अन्नादो वसुदानः''** (बृह.उप.४।४।२४) इत्यादिश्रुतिषु तस्यैव भोक्तृत्वफलदातृत्वयोः श्रवणात्. **'च'**कारेण **''यो यो यां याम्''** (भग.गीता ७।२१) इत्यादिस्मरणात् तथा इति अर्थः. अहिकुण्डलवद् देवादिसर्वकार्यरूपत्व-निरतिशयैश्वर्यादि-प्रतिपादक- पूर्वाधिकरणानां पर्यालोचनेऽपि इयमेव उपपत्तिः इह 'उपपत्ति'शब्देन उपतिष्ठते. एवं पूर्वपक्षोऽपि देवानामेव तत्तत्कर्मभिः आराध्यमानानां सर्वफलदातृत्वे तस्य पूर्वोक्तं पारमेश्वर्यं कथम् इति पूर्वाधिकरणाक्षेपेण उक्तरीतिकएव उत्तिष्ठति नतु कर्मणामेव फलदत्वम् इति सः अप्रसंगात् तेषां जडत्वस्यापि प्रत्यक्षसिद्धत्वात्. साधितेतु सूत्रद्वयेन ईश्वरस्यैव फलदत्वे उपपत्तिश्रुतत्वाभ्यां कर्मणामेव तद्दत्वम् अस्तु इति निरीश्वरमीमांसकचोद्यं प्राप्तावसरम् अतो उपन्यस्य निरस्यते सूत्रद्वयेन. नच **''धर्मं जैमिनि''** (ब्र.सू.३।२।४०) इति सूत्राभिप्रेतोपपत्त्याः प्रथमं पूर्वपक्षः प्रसञ्जनीयः **''श्रुतत्वाच्च, फलम् अतः''** (ब्र.सू.३।२।३८-३९) इति सूत्राभ्यां जैमिन्यभिमतोपपत्त्यादेः असमाहितत्वाद् उक्तपूर्वपक्षतादवस्थ्येन तयोः अकिञ्चित्करत्वापत्तेः, अग्रे स्वयम् उपन्यासस्य हेत्वन्तरेण तन्निरासस्य च आनर्थक्यप्रसक्तेः च इति पूर्वमेव असूचयाम.

(१) [अतएव वैषम्य-नैर्घृण्ये न, जीव-सुख-दुःखेच्छां प्रति कर्मणो हेतुत्वात्. अन्यथा स्वेच्छया कस्मैचित् सुखस्य कस्मैचिद् दुःखस्य दानेन वैषम्यं, क्लेशाभावकरणसमर्थस्य तदकरणेन नैर्घृण्यं च आपद्येत. ननु कर्मणः फलजनकत्वे ईश्वरस्य कर्माधीनतया ''स्वातन्त्र्याभावात् कर्तृत्वानुपपत्तौ ईश्वरत्वासिद्धिः/ईशत्वासिद्धिः'' (शु.मा.प्र.४४) इति चेद्, न; अस्वतन्त्रस्यापि ''देवदत्तः पचति, काष्ठानि पचन्ति'' इत्यादौ देवदत्तकाष्ठादेः कर्तृतायाः दर्शनात्. नच ''स्वतन्त्रः कर्ता'' (पाणि.सू.१।४।५४) इति सूत्रविरोधः. तस्य स्वातन्त्र्येण विवक्षितो अर्थः 'कर्ता'इति तद्व्याख्यातृभिः व्याख्याततया तद्विरोधाभावात्. उपादानगोचरज्ञानेच्छेत्यादिरूपकर्तृत्वस्य सहकारिसमवधाने

अबाधात् च.]

(२) वैषम्य-नैर्घृण्येऽपि त्वन्मतएव सम्भवतः. नच कर्मापेक्षया सुखदुःखदातृत्वात् कथं वैषम्य-नैर्घृण्ये? इति वाच्यं, तस्यैव कर्मकारयितृत्वेन स्वयमेव कर्म कारयित्वा स्वयमेव कस्मिंश्चिद् जीवे सुखं कस्मिंश्चिद् जीवे दुःखं प्रयुञ्जतः कथं न वैषम्यं नैर्घृण्यं वा स्यात्? एतेन अतएव वैषम्य-नैर्घृण्ये न इत्यादिकं प्रत्युक्तम्. ननु कर्मणः फलजनकत्वे इत्यादिप्रश्नस्तु पूर्वापरविरुद्धः, पूर्वम् ईश्वरेच्छां प्रति कर्मणो हेतुत्वस्य उक्तत्वात्. किञ्च ‘कर्तृत्वानुपपत्ति’पदेन इच्छाकर्तृत्वानुपपत्तिः उक्ताः जगत्कर्तृत्वानुपपत्तिः वा? न आद्यः, कर्माधीनत्वेऽपि इच्छाश्रयत्वरूपेच्छाकर्तृत्वानपायात्. नापि द्वितीयः तस्य अप्रकृतत्वात्. यदपि ‘‘कर्तृत्वानुपपत्तौ ईश्वरत्वासिद्धिः’’ (शु.मा.प्र.४४) इति आक्षेपे अस्वतन्त्रस्यापि काष्ठादेः कर्तृत्वप्रदर्शनम्. तत्र ‘‘स्वतन्त्रः कर्ता’’(पाणि.सू.१।४।५४) इति सूत्रविरोधोद्भावनं तदुपरि स्वातन्त्र्येण विवक्षितो अर्थः कर्ता इत्यादि उत्तरं तदपि तुच्छम्. कर्तृत्वानुपपत्तेः ईश्वरत्वव्याघातकत्वे मानाभावः युद्ध-पाकाद्यकर्तृणामपि लोके राज्ञाम् ईश्वरत्वाव्याहतेः. नच फलदातृत्वम् ईश्वरम् इति वाच्यं, फलम् अददतां बलात्कारेण कर्मकारयितृणामपि ईश्वरत्वदर्शनात्. काष्ठादेः च पारिभाषिकं कर्तृत्वं नतु वास्तवम्. अतः तादृशः कर्तृत्वविवक्षणेऽपि न अभिमतसिद्धिः. अतएव तादृशस्य अतः विवक्षणेऽपि पुरुषव्यापाराधीनव्यापारवतां काष्ठादीनाम् अन्यव्यापारानधीनक्रियानुकूलव्यापारवत्त्वरूपस्वातन्त्र्यस्य अभावात् तद्बोधकविभक्तीनाम् अप्रामाण्यं दुर्वारमेव इति आशङ्क्य, समभिव्याहृततत्क्रियाकारकान्तरव्यापारानधीनतत्तत्क्रियानुकूलव्यापारवत्त्वरूपं स्वातन्त्र्यमेव ‘‘स्वतन्त्रः कर्ता’’ इतिसूत्रघटक‘स्वतन्त्र’पदार्थत्वेन विवक्षितं

भट्टाचार्यैः ‘‘उपादानगोचरज्ञान-चिकीर्षा-कृतिमत्त्वस्य काष्ठादौ अभावेन ‘स्वतन्त्रः कर्ता’ ’’ इति अनुशासनविरोधो दुर्वारश्च. नहि तद्विवक्षयापि परिहारः सम्भवति. तादृशकर्तृत्वस्य वैयाकरणासम्मतत्वेन तेषां तादृशविवक्षायाः असम्भवात्.

(३) सहस्राक्षे अतएव वैषम्य...इत्यादिम् अबाधात् च इत्यन्तं भागं परिहरन्ति. **वैषम्यनैर्घृण्येऽपि त्वन्मते** इत्यादिना **विवक्षायाः असम्भवाद्** इत्यन्तेन. अत्र मार्तण्डे ‘‘अनादि कर्म च आश्रित्य समाधानेतु अनीशता’’ (शु.मा.४४) इति कारिकां तट्टीकां च यथाकथञ्चिद् अनुसृत्य सहस्राक्षे उपन्यस्तस्य ननु कर्मणः फलजनकत्वे इति प्रश्नस्य विरोधोक्तिस्तु तदीयग्रन्थे पूर्वापरविरोधप्रदर्शनार्था. वस्तुतस्तु तन्मते कर्तृत्वोपपत्तिः अनीशतावारणं च न सम्भवति इति अर्थः. अयं भावः : यत्तु अतएव वैषम्यनैर्घृण्ये न इत्यादि अबाधात् च इत्यन्तं तद् अविचारचारुः. सिद्धान्ते **‘‘आत्मसृष्टेः न वैषम्यम्’’** (त.दी.नि.१।७६) इति दोषपरिहारस्य उपपादयिष्यमाणत्वाद् अन्यथा त्वन्मतेऽपि तदपरिहारात् च. तथाहि फलवत्कर्मनिरूपितापि कारणता ब्रह्मणएव अस्ति नवा? आद्यः चेत् केनचित् सुकृतं कारयित्वा तस्मै सुखं केनचिद् एनः प्रणाय्य तस्मै दुःखं च विश्राणयति तत्र सघृणनृशंसतया उदितदूषणे सुस्थे. द्वितीयस्तु प्रागेव **‘‘एषः उ एव’’** (कौषी.उप.३।९) **‘‘परात्तु’’** (ब्र.सू.२।३।४१) इति प्रभृतिश्रुतिसूत्रावहेलनादिदोषाणां दिशो दर्शनया दूरीकृतः. किञ्च उक्तचरोपपत्त्याः क्षितिपत्यादिवद् वैषम्याद्यननुषक्तिः तव आशयगोचरः, परन्तु धराधीशाःहि न ‘‘मैवं भूयः चौर्यादि कुर्याः अस्य एतत्कर्मणः एतत् फलम्’’ इति स्फुटं ज्ञापयन्तः पाटच्चरप्रमुखं दुःखाः कुर्वन्ति. मुहुरनुष्ठाने च उत्तमोत्तमं दमं यथागमं समर्पयन्ति. प्रवृत्तिं जानानाश्च पापे प्रवर्तमानमेव प्रतिबध्नन्ति नतु विदितामपि दुरितप्रवृत्तिम् उपेक्ष्य तत्फलं कर्मोत्तरं वितरन्ति. परमेश्वरस्तु तस्मिन् जन्मनि जन्मान्तरे वा तत्-तत्कर्मफलानि भोजयन् **‘‘सर्वस्य च अहं हृदि सन्निविष्टो मत्तः स्मृतिः ज्ञानम् अपोहनं च’’** (भग.गीता १५।१५) इत्यादिप्रमाणेन सर्वान्तःकरणशरणः सकलस्मारणसमर्थोऽपि इदम् अमुष्यफलम् इति नैव ज्ञापयति येन ज्ञापितेन दुःखसाधनाद्

वृजिनाद् जनो निवर्तेतैव प्रवर्तेत च पुण्यएव, नापि उत्तरोत्तरजन्मसु तस्यैव अघस्य अनुष्ठाने दमे तारतम्यं प्रयुंक्ते तथा बोधकस्मृत्याद्यनुपलम्भात्. नापि पापे प्रवर्तमानं सर्वज्ञः सर्वसमर्थोऽपि निरुणद्धि येन दुःखमेव कस्यापि न स्यात्. निरोधनाशक्तौतु महीक्षित्प्रमुखापेक्षयापि दुर्बलतया फलस्पर्शनमपि अशक्यम्. किञ्च चौर्याद्यनार्याचरणचणानपि स्वचरणारणात् नितरां सुखयन् नितरांश्च विनयन् अवनिनाथो नहि अविषमो अभिलप्येत. भगवांस्तु "**तेषाम् अहं समुद्धर्ता मृत्युसंसारसागराद् भवामि न चिरात् पार्थ! मयि आवेशितचेतसाम्**" (भग.गीता १२।७) "**तेषामेव अनुकम्पार्थम् अहम् अज्ञानजं तमः नाशयामि आत्मभावस्थो ज्ञानदीपेन भास्वता**" (भग.गीता १०।-११), "**मांहि पार्थ! व्यापाश्रित्य येऽपि स्युः पापयोनयः** (भग.गीता ९।३२) "**अपि चेत् सुदुराचारः**" (भाग.गीता ९।३०), "**अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः**" (भग.गीता १८।६६), "**तन्निष्ठस्य मोक्षोपदेशाद्**" (ब्र.सू.१।१।६) इत्याद्युदितदिशा स्वभक्तान् सकलकलुषकुलतूलज्वालनपुरःसरं परमदुःखदसंसाराद् मोचयन् अपरांश्च हृदि स्थित्वा मायया भ्रामयन् कथं न विषमः. सुदामद्विज-वायक-मालाकारादिभ्योः अल्पतरसाधनेभ्योः अधिकतर-तरं साधनादिकञ्च ददत् कथं न तथा! भूरितरदुरितपूरितस्वधर्मोदासीनदासीपत्य-पत्यप्रणयिदुष्टाजामिलादीन् स्वनाममात्रग्रहेण अत्यन्तपवित्रतापात्राणि सहसा कुर्वन् च कथं न तथा! शङ्कराचार्यैरपि सर्वप्रलयकारितया उक्तं नैर्घृण्यन्तु कर्मसापेक्षत्वाद् न अपैति. तस्माद् वक्ष्यमाणः परिहारएव रमणीयः.

यच्च शुद्धाद्वैतमार्तण्डटीकायाम् "अनादि कर्म च आश्रित्य समाधानेतु अनीशता" (शु.मा.४४) इत्यत्र "ईश्वरस्य कर्माधीनत्वेन स्वातन्त्र्याभावात् कर्तृत्वानुपपत्तौ ईशत्वासिद्धिः" (शु.मा.प्र.४४) इति उक्तम्. तस्य अयम् आशयः : "दयालोः असमर्थस्य दुःखायैव दयालुता" इति न्यायेन सघृणत्वेऽपि प्रतिबन्धाद्यसमर्थतया दुःखितस्य फलदानादि यावत्कार्येषु कर्मवशंवदस्य दुर्बलतरेश्वरस्य अपेक्षायाः आवश्यकानि कर्माण्येव लाघवात् स्वीकार्याणि. जडानामपि तेषाम् औषधादिवत् स्वतःफलजनकत्वोपपत्तेः, **दधिक्षीर-गोमयवृश्चिकादिन्यायेन** (द्र.लौ.न्या.साह.८९०) जडाजडसर्गस्य **ज्वलन-**

हलाहलादिन्यायेन संहारस्यापि ततएव सम्भवात् च. अथ कथञ्चिद् ईश्वरोरीकारेऽपि अप्रयोजकप्रायस्य अत्यन्तपरतन्त्रस्य नियोगनिर्बद्धभृत्यवद् अवश्यंफलमात्रसमर्पकस्य तस्य लक्षणप्रमाणाद्यधिकरणसाधितनिरङ्कुशकर्तृत्वानुपपत्त्याः अनीशत्वं स्फुटमेव. नहि पराधीनतया यथाकथञ्चित् कर्तृत्वमात्राद् ईश्वरत्वसिद्धिः कुलालादौ अतिप्रसङ्गात्; किन्तु, निरङ्कुशादेव ततः इति विस्तीर्णम् आकरे. काष्ठानि पचन्ति इत्यादौ तु **''विवक्षातः कारकाणि भवन्ति''** (पातं.महाभा.१।४।५४) इति सिद्धान्तात् काष्ठादेः कर्तृत्वं विवक्ष्यते मात्रम् अतः तथाप्रयोगः. एवम् ईश्वरेऽपि **''लोकान् असृजत''** (ऐत.उप.१।१।२) इत्यादौ वैवक्षिककर्तृत्वाङ्गीकारे काष्ठादेरिव तस्यापि वास्तवकर्तृत्वासिद्ध्या सुतराम् ईश्वरत्वासिद्धिः. **''स्वतन्त्रः कर्ता''** (पाणि.सू.१।४।५४) इति अनुशासनस्यतु अयम् अर्थः : **स्वः** आत्मा **तन्त्रं** प्रधानं यस्य सः **स्वतन्त्रः**, अन्यानधीनव्यापारः **कर्ता** स्याद् इति. अतएव हरिणा **''धातूपात्तक्रिये नित्यं कारके कर्तृता ईष्यते''** (   ) इति सामान्यतो अभिधाय **''प्रागन्यतः शक्तिलाभाद् न्यग्भावापादनादपि तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्तनात्. अदृष्टत्वात् प्रतिनिधेः प्रविवेके च दर्शनात्. आरादपि उपकारित्वे स्वातन्त्र्यं कर्तुः उच्यते''** (वाक्प.साध.१०१-१०२) इति तदेव समर्थितम्. अस्य अर्थन्तु इत्थं वर्णयन्ति : इतरव्यापारात् प्रागपि प्राधान्येन आत्मशक्तेः कर्तृव्यापारस्य सत्त्वात्. तथाच इतरव्यापारानधीनव्यापारवत्त्वाद् इति अर्थः तथा कारकान्तरेभ्यः प्राग्भावस्य तस्मिन्नेव भाष्यादौ आपादनाद् दण्डादिरूपकरणादीनां प्रवृत्तेः कर्त्रधीनत्वात्, तेषां निवृत्तेरपि तथात्वात्, छेदनादौ दात्रादेः कुठारादिवत् कर्तुः प्रतिनिधेः अदर्शनात् प्रविवेके **''आस्ते शेते''** (पाणि.सू.१।३।१२) इत्यादौ कारकान्तराप्रयोगेऽपि तस्य प्रयोगात्, कर्तृरहितानां करणादीनां च क्वापि अप्रयोगाद्, आरात् साक्षाद्धातूपात्तफलजनकव्यापाराश्रयत्वात् च कर्तुः स्वातन्त्र्यम् इष्यते. उक्तः कारिकार्थः **''कारके''** (पाणि.सू.१।४।२३) इति सूत्रे कैयटेऽपि सूचितः; किञ्च, स्वतन्त्रसूत्रे भाष्ये विताने 'तन्त्र'शब्दम् आशङ्क्य **''अस्ति प्राधान्ये वर्तते. तद् यथा स्वतन्त्रः असौ ब्राह्मणः इति उच्यते. स्वप्रधान इति गम्यते. तद् यः प्राधान्ये वर्तते 'तन्त्र'शब्दः तस्य इदं ग्रहणम्''**

(पातं.महाभा.१।४।५४) इति उक्तम्. अत्र कैयटः “**‘स्व’शब्दः आत्मवाची स्व आत्मा तन्त्रं प्रधानं यस्य स ‘स्वतन्त्रः’ उच्यते**” (पातं.महाभा.प्र.१।४।२३) इति आह. किञ्च अनेककारकनिर्वर्त्यायामपि क्रियायां यथा कर्तुरेव प्राधान्यं तथा **‘कारके’** इति सूत्रभाष्ये प्रपञ्चितम्. तथाहि महासंज्ञाकरणात् ‘कारक’शब्दस्य ‘करोति इति’ व्युत्पत्त्या अन्वर्थसंज्ञात्वम्. विभक्तिव्यत्ययात् सप्तमीस्थाने प्रथमां अग्रिमाणां ध्रुवादीनां संज्ञित्वं च आश्रित्य “**ध्रुवम् अपाये**” (पाणि.सू.१।४।२४) इत्यादौ योगविभागेन कारकसंज्ञाविधानात् कारकस्य सतो अपादानादिसंज्ञाविधानात् च उभयसंज्ञासमावेशं बोधयित्वा सर्वापेक्षे या कर्तुरेव प्राधान्यम् उच्यते “**किं पुनः प्रधानम्? कर्ता. कथं पुनः ज्ञायते कर्ता प्रधानम् इति? यत् सर्वेषु साधनेषु सन्निहितेषु कर्ता प्रवर्तयिता भवति**” (पातं.महाभा.१।४।२३) इति. एवञ्च फलदानादौ कर्माद्यत्यन्तसापेक्षस्य स्वतः सर्वथा निष्क्रियस्य उपाधिमात्रमूलकक्रियस्य अस्वातन्त्र्येण अकर्तृत्वाद् भवतो अनुशासनविरोधो वस्तुतः स्यादेव. यत्तु “**स्वातन्त्र्येण विवक्षितो अर्थः**” (पाणि.सू.सि.कौ.१।४।५४) इति वृत्तौ व्याचक्षते तत्तु अवान्तरक्रियाविशेषसम्बन्धस्य करणादिकारकमात्रे सत्त्वात् कर्तुः देवदत्तादेः प्रधानस्य अप्रयोगे करणादिकमपि ज्वलनधारणादिस्वव्यापारे स्वातन्त्र्येण विवक्ष्यमाणं “**‘काष्ठानि पचन्ति’ ‘स्थाली पचति’**” (पाणि.सू.त.बो.१।४।५४) इत्यादौ कर्तृतया प्रयुज्यते इति अभिप्रायेण. अतएव हरिणा “**निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैव अस्ति कारके व्यापारभेदापेक्षायां करणत्वादिसम्भवः**” (वाक्प.साधन.१८) इति उक्तम्.

कारकसूत्रे च महाभाष्ये “**को असौ प्रतिकारकं क्रियाभेदः पचादीनाम्? अधिश्रयणोदकासेचनतण्डुलावपनैधोपकर्षणक्रियाः प्रधानस्य कर्तुः पाकः... सम्भवनक्रियां धारणक्रियां च कुर्वती ‘स्थाली पचति’ इति उच्यते. तत्र तदा पचिः वर्तते... ज्वलनक्रियां कुर्वन्ति ‘काष्ठानि पचन्ति’ इति उच्यन्ते. तत्र तदा पचिः वर्तते**” (पातं.महाभा.१।४।२३।) इत्याद्युक्तम्. अत्र “**सम्भवनं ग्रहणम्**” (पातं.महाभा.प्र.१।४।२३) इति कैयटः. अग्रेच स्वातन्त्र्य-पारतन्त्र्ययोः पर्यायेण सर्वत्र विवक्षासम्भवात् सम्भवनादौ स्थाल्यादेः स्वातन्त्र्यस्य

सार्वदिकत्वाच्च कर्तुः अधिकरणाद् इतो न कोऽपि विशेषः स्याद् इति आशङ्कावारणाय प्रक्षालनपरिवर्तनादौ स्थाल्यादेः पारतन्त्र्यम् उक्त्वा उच्यते **''ननु च भोः कर्तृस्थेऽपि यत्ने कथ्यमाने स्थाली सम्भवनक्रियां धारणक्रियां च करोति तत्र असौ स्वतन्त्रा. क्व इदानीं परतन्त्रा स्यात्? एवं तर्हि प्रधानेन समवाये स्थाली परतन्त्रा, व्यवाये स्वतन्त्रा. तद्यथा अमात्यानां राज्ञा सह समवाये पारतन्त्र्यं, व्यवाये स्वातन्त्र्यम्. किं पुनः प्रधानम्? कर्ता''** (पातं.महाभा.१।४।२३) इत्यादि. एवञ्च ब्रह्मणो अस्वतन्त्रस्यापि स्वातन्त्र्यविवक्षामात्रेण काष्ठस्थाल्यादिवत् कर्तृत्वम् इति चेत् तदतिरिक्तः तस्य प्रवर्तन-निवर्तनसमर्थः प्राधान्येन ततः प्राग्लब्धात्मशक्तिः तत्प्रविवेकेऽपि काञ्चित् क्रियां कर्तुं शक्तः सर्वथा स्वतन्त्रो देवदत्तादिवत् कश्चित् कर्ता अवश्यं कल्प्यः. तत्कल्पने च सुतरां सिद्धं तस्य अनीश्वरत्वम्. किञ्च मनोरमा-शेखरादिषु प्रधानीभूतधात्वर्थाश्रयत्वं शबादिकर्तृप्रत्ययसमभिव्याहारे तदाश्रयत्वं वा कर्तृत्वम् इति स्वीकाराद् भाष्ये च अन्वर्थसंज्ञानुरोधात् कारकान्तरस्यैव वैवक्षिककर्तृतायाः तत्रापि करणाधिकरणयोरेव पर्याप्ततायाः तस्य अदर्शितत्वात् प्रकृते विवक्षया कर्तृत्वस्य कल्पने ब्रह्मणः काष्ठादिवद् वास्तवी करणाद्यन्यतमता ज्वलनसम्भवनादिवद् धात्वर्थक्रिया च काचित् साक्षात् तस्मिन् वाच्यैव. सम्भवनादावपि पचेः शक्तिः भाष्यकृता उक्ते इति सापि क्रिया धात्वर्थो अस्त्येव. एवं सति तावतापि स्वाभिमतनिष्क्रियत्वस्य भङ्गे अनीशत्वप्रसङ्गे च अधिके अनुप्रविष्टे शास्त्रसिद्धं स्वातन्त्र्यमेव तस्य स्वीकर्तव्यं नतु उपाधिगुणजीवकर्मादिपारतन्त्र्यम् इत्येव कमनीयम्. (पृ.१७८) एतदेव अभिप्रेत्य उक्तं श्रीमदाचार्यचरणैः तत्त्वदीपे **''कर्ता स्वतन्त्रएव स्यात् सगुणत्वे विरुध्यते''** (त.दी.नि.१।७७) इति उपादानगोचर...इत्यादि... इत्यादिकर्तृत्वमपि न त्वन्मते शक्यवचनम्. सहकारितया स्वीक्रियमाणयोः काल-कर्मणोः अधिष्ठाने भ्रमकल्पितत्वेन अभ्रान्तभगवज्ज्ञानागोचरत्वाद् लक्षणे 'उपादानादि' इति 'आदि'पदेन सहकारिणोऽपि अवश्यसङ्ग्राह्यत्वाद् मायावृत्तिविशेषात्मकत्वेन तदेकनिष्ठयोः चिकीर्षा-करणयोरपि निर्विशेषे ब्रह्मणि अभावात् च, सहकारिस्वीकारे स्वाभीष्टाभिन्ननिमित्तोपादानत्वरूपकारणताबाधात् च. अनीश्वरत्ववारणाय तादृशकारणतासमर्थ-

नाय च सहकारिणोऽपि ईश्वरजन्यत्वे तदिच्छया सहकारित्वे तदभिन्नत्वे च स्वीक्रियमाणे वैषम्यनैर्घृण्ये इच्छायाः प्रथमतरकारणत्वञ्च **वेतालावलम्बनन्यायेन** भूयः प्राप्नुवन्ति.

(१) [अतएव ‘‘कर्ता शास्त्रार्थवत्त्वाद्’’ (ब्र.सू.२।३।३३) इति अधिकरणस्थानि जीवस्य कर्तृत्वप्रतिपादकानि बहूनि सूत्राणि तेषां विषयवाक्यानि च सङ्गतानि. अन्यथा सापेक्षतरस्य जीवस्य सुतरां कर्तृत्वाभावे तानि न सङ्गच्छेरन्. अन्यथा च त्वन्मतेऽपि इच्छायाः सहकारित्वेन ईश्वरस्य कर्तृत्वं न उपपद्येत. नहि अभेदवादिनः ते इच्छा-कर्मणोः अभेदे वैलक्षण्यं वर्णयितुं शक्यं येन इच्छासमवधाने नास्वतन्त्रता कर्मसमवधानेतु अस्वतन्त्रता स्यात्. एतेन यत्र कर्मानुसारेण फलदातृत्वम् उक्तं तत्रापि कर्मकारयितृत्वम् ईश्वरस्यैव. तथाच आह श्रुतिः ‘‘एष ह्येव साधु कर्म कारयति तम्’’ (कौषी.उप.३।९) इत्याद्याः, एतदनुरोधेन ‘‘साधुकर्मकारि साधुः भवति’’ (बृह.उप.४।४।५) इति श्रुतावपि भगवत्प्रेरणया साधुकर्मकर्तृत्वं बोध्यम् इति ‘‘वैषम्य-नैर्घृण्ये’’ (शु.मा.४४) इति श्लोकटीकोक्तं प्रत्युक्तम्.]

(२) ‘‘कर्ता शास्त्रार्थवत्त्वाद्’’ (ब्र.सू.२।३।३३) इत्यधिकरणस्थसूत्राणां तद्विषयवाक्यानां च न स्वतन्त्रस्य अकर्तृत्वं वा अस्वतन्त्रस्य कर्तृत्वम् इति विचारे तात्पर्यं; किन्तु, ‘‘प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः अहंकार-विमूढात्मा ‘कर्ता अहम्’ इति मन्यते’’ (भग.गीता ३।२७) इति वाक्यात् प्रकृतकर्तृत्वं जीवस्य न वा इति सन्देहे जीवएव कर्ता. कुतः? शास्त्रार्थवत्त्वात्, शास्त्रस्य अर्थवत्त्वं शास्त्रार्थवत्त्वं तस्मात् शास्त्रस्य फलवत्त्वाद् इति यावत्. ‘‘कारीर्या वृष्टिकामो

यजेत’’, ‘‘ज्योतिष्टोमेन स्वर्गकामो यजेत’’ (द्र.आप.श्रौ.सू.१-९।२५।१६), इत्यादिभिः वेदे अभ्युदय-निःश्रेयसफलार्थं सर्वाणि कर्माणि विहितानि. यदि जीवः कर्ता न इष्यते तदा ‘स्वर्गकामा’दिपदानि फलाधिकारिशून्यानि कुप्यन्ति तत्तच्छास्त्रवैयर्थ्यमेव आपादयेयुः. नहि तादृशकामवत्त्वं ब्रह्मणः सम्भवति तस्य आप्तकामत्वेन तत्फलानुपयोगाद् जडस्य च कामासम्भवात्. अतः सन्दिग्धे कर्तृत्वे बहूनाम् अनुग्रहस्य न्याय्यत्वात् तत्-तत्फलकामिनां जीवानामेव कर्तृत्वम् इति अर्थः. तस्मात् स्वातन्त्र्यविवक्षाम् अतएव इत्यादिना परामृश्य ‘‘कर्ता शास्त्रार्थवत्त्वाद्’’ इत्यधिकरणस्थानि बहूनि वाक्यानि सङ्गतानि इत्यादि वदन् तदधिकरणस्थ-संशय-पूर्वपक्षाद्यनभिज्ञो अनुपादेयवचनएव. इच्छासहकारित्वेन कर्तृत्वानुपपत्तिकथनन्तु न युज्यते इच्छायाः कर्तृत्वोपपादकत्वात्. यस्तु तत्र हेतूपन्यासः नहि अभेदवादिनः ते इच्छा-कर्मणोः अभेदे वैलक्षण्यं येन इच्छासमवधाने नास्वतन्त्रता इत्यादिना कृतः सोऽपि अविचारितरमणीयः. कार्याणां कारणात्मना अवैलक्षण्येऽपि तद्रूपेण वैलक्षण्यं वर्ततएव. नहि घट-शरावादीनां मृदात्मना अभेदेऽपि घटत्व-शरावत्वादिनापि परस्परम् अभेदः. किञ्च त्वन्मतेऽपि खड्गकार्यं व्रणादिकं दुग्धेन कुतो न सम्भवति तवापि अभेदवादित्वात्, खड्ग-दुग्धयोः च मायिकत्वेन पार्थिवत्वेन ब्रह्मकल्पितत्वेन च अविशेषाद्, नहि तयोः अभेदे वैलक्षण्यं वर्णयितुं शक्यम्. येन खड्गेन व्रणादिकं भवेद् दुग्धेन च न भवेत्. तद्रूपेण वैलक्षण्यं चेद् अत्रापि तत् कथं न स्यात्?

(३) सहस्राक्षे अतएव कर्ता शास्त्रार्थवत्त्वाद् इत्यादिं श्लोकटीकोक्तं प्रत्युक्तम् इत्यन्तं भागं दूषयन्ति ‘‘कर्ता शास्त्रार्थवत्त्वाद्’’ इत्यधिकरणस्थ

इत्यादिना **अत्रापि तत् कथं न स्याद्** इत्यन्तेन. **अभ्युदय-निःश्रेयस-फलार्थम्** इति, वृष्ट्यादि ऐहिकम् अभ्युदयः कारीर्यादिफलं, 'स्वर्ग'पदवाच्यात्मसुखादि निःश्रेयसम् ; अथवा स्वर्गादिरपि आमुष्मिको अभ्युदयः सकामानां, निष्कामानान्तु तान्येव कर्माणि मोक्षफलकानि. **कुप्यन्ति** इति इदं शत्रन्तम्. अत्र अयं भावः : वस्तुतस्तु ईश्वरगतमेव कर्तृत्वं विस्फुलिङ्गवत् तदंशे अतिरोहितचित्कतया ज्ञानेच्छाकृतियोग्ये जीवेऽपि अनुवर्तते पृथ्वीनिष्ठो गन्धइव पार्थिवेषु. एवं सत्यपि जडस्य प्रकृतिबुद्ध्यादेरेव कर्तृत्वं नतु ब्रह्मांशस्यापि जीवस्य इति तावकानिव भ्रान्तान् साङ्ख्यान् व्युदसितुं परमाचार्यो जीवस्यैव विध्यादिबोधितकर्मकर्तृत्वं "**कर्ता शास्त्रार्थवत्त्वाद्**" (ब्र.सू.२।३।३३) इति अधिकरणेन निर्णीतवान्. लौकिकनिखिलवस्तुजातापेक्षया जीवस्यैव स्वतन्त्रत्वाद् बुद्ध्यादेः च परतन्त्रत्वाद् एवमेव युक्तम् इति तदाशयः. जीवस्य स्वतन्त्रत्वन्तु हस्तदण्डादिव्यापारस्य तदिच्छाप्रयत्नसाध्यत्वदर्शनात् स्फुटमेव. अनन्तरं जीवस्यापि स्वतएव कर्तृत्वम् ईशप्रेरणया वा? इति संशये स्वतएव इति पूर्वपक्षे "**परात्तु तच्छ्रुतेः**" (ब्र.सू.२।३।४१) इति अधिकरणं तत्प्रेरणयैव इति सिद्धान्तयति. एवं भगवत्प्रयोज्यत्वेऽपि इतरापेक्षया स्वतन्त्रत्वात् तद्गतकर्तृत्वस्यैव अत्र अनुवर्तनात् च न प्रकृते "**कर्ता शास्त्रार्थवत्त्वाद्**" इत्यधिकरणविरोधगन्धोऽपि. नहि पृथिव्याएव वास्तवगन्धवत्त्वम् इति तदंशपुष्पादेः गन्धवत्त्वम् असङ्गतं भवति. नच एवम् ईश्वरे सातिशयं स्वातन्त्र्यं शक्योक्तिकम् ईश्वरान्तराभावाद् अभिन्ननिमित्तोपादानवादभङ्गात् च इति किं चर्वितचर्वणेन. तस्मात् कर्मणां कार्यविशेषे सहकारित्वमपि तथेच्छयैव. अतः न इच्छायाः तज्जन्यत्वं नापि वैषम्यादिनिस्तारः. इच्छायास्तु साक्षाद्ब्रह्मधर्मत्वात् तद्धर्माणां तदभिन्नतायाः प्रकाशाश्रयाद्यधिकरणसिद्धत्वाद् इच्छारूपेण तदाकाररूपेण वा आविर्भवनेऽपि इतरनिरपेक्षतया स्वातन्त्र्यानपायात् च तत्सहकारे न दोषः. पापपुण्यकर्मापूर्वाणितु न साक्षाद् ब्रह्मधर्माः "**न तस्य कार्यं करणं च विद्यते**" (श्वेता.उप.६।८) "**अनश्नन् अन्योः अभिचाकशीति**" (मुण्ड.उप.३।१।१), "**न साधुना कर्मणा भूयान् भवति नोएव असाधुना कनीयान्**" (कौषी.ब्रा.उप.३।९) इति श्वेताश्वतर-मुण्डक-कौषीतकिब्राह्मणादिषु श्रवणात्. "**अनादित्वाद् निर्गुणत्वात् परमात्मा अयम्**

अव्ययः शरीरस्थोऽपि कौन्तेय! न करोति न लिप्यते’’ (भग.गीता १३।३१) इत्यादि स्मरणात् च. अतएव सूत्रकृता ‘‘**सम्भोगप्राप्तिः इति चेद् न वैशेष्याद्**’’ (ब्र.सू.१।२।८) इति जीववत् फल-साधने निषिद्धे. सम्यगभिनिवेशेन भोगः ‘**सम्भोगः**’, सम्यग् भोगो यस्मात् सोऽपि ‘**सम्भोगः**’ तयोः प्राप्तिः इति व्याख्यानात्; किन्तु, तानि जीवनिष्ठान्येव. ‘‘**तयोः अन्यः पिप्पलं स्वादु अत्ति**’’ (मुण्ड.उप. ३।१।१) इत्यादिश्रुतिभ्यः. किञ्च जीवेष्वपि तत्साक्षात्कारवतां नैष्कर्म्यम् ‘‘**एतं ह वाव न तपति किम् अहं साधु नाकरवं किम् अहं पाप अकरवम् इति**’’ (तैत्ति.उप.२।९), ‘‘**यथा पुष्करपलाशे आपो न श्लिष्यन्ते एवम् एवंविदि पापं कर्म न श्लिष्यते**’’ (छान्दो.उप.४।१४।३) इति आनन्दवल्ल्युपकोसलविद्यादिषु श्रूयते. ‘‘**बुद्धियुक्तो जहाति इह उभे सुकृतदुष्कृतेः**’’ (भग.गीता २।५०) ‘‘**प्रायेण मुनयो राजन्! निवृत्ता विधिषेधतः**’’ (भाग.पुरा.२।१।७) इति गीता-भागवतादिषु स्मर्यते च. तर्हि परमात्मनः तथात्वं कैमुतिकसिद्धम्. एवम् इच्छाकर्मापूर्वाणां साक्षाद्ब्रह्मधर्मत्व-जीवधर्मत्वादिना वैलक्षण्यात् कर्मापूर्वाणां न इच्छावत् प्रकाशाश्रयादिन्यायेन अभेदो नित्यत्वं वा शक्यं वक्तुम् अतः त्वद्रीत्या जीवेच्छाप्रयत्नमात्रजन्यकर्मसहकारे पारतन्त्र्यं स्फुटमेव. नच तद्वारणाय इच्छा तदाकारवत् कर्मरूपेणापि स्वयमेव भवनम् इति तव सुवचम्. तथा सति कस्यचित् पापरूपेण भूत्वा तस्मै दुःखं कस्यचित् सुकृतरूपेण भूत्वा तस्मै सुखं च अर्पयति तस्मिन् वैषम्यादेः अनुच्छेदात्. तस्माद् इच्छापक्षएव न पारतन्त्र्यम्. लोकेऽपि यथेच्छं कार्यं कुर्वन् स्वतन्त्रएव उच्यते. अहिफेनादिना इतरेण (वा!) उद्बोध्यशक्तिः सहकारिसमवधानमन्तरेण अशक्यकार्यस्तु परतन्त्रः. एतावता अतएव ‘‘कर्ता शास्त्रार्थवत्त्वाद्’’ इत्यादि नास्वतन्त्रता स्याद् इत्यन्तं व्युदस्तम्. एतेनैव यद् मार्तण्डटीकायां ‘‘यत्रतु कर्मानुसारेण फलभोक्तृत्वम्’’ इत्यादि ‘‘कर्तृत्वं बोध्यम्’’ (शु.मा.प्र.४४) इत्यन्तम् उक्तम् इह किञ्चित् पाठविपर्यासेन अनूदितं तत्समर्थितं ज्ञेयम्. कर्मणां फलहेतुतायाः ईश्वरमात्रस्य सर्वहेतुतायाः तस्यैव कर्मकारयितृतायाः च बोधिकानां श्रुतीनाम् एवमेव सामञ्जस्येन एकवाक्यत्वसिद्धेः. स्मृतावपि ‘‘**बुद्धिः ज्ञानम् असम्मोहः क्षमा सत्यं दमः शमः सुखं दुःखं भवो अभावो भयं च**

अभयमेव च अहिंसा समता तुष्टिः तपो दानं यशो यशः भवन्ति भावाः भूतानां मत्तएव पृथग्विधाः'' (भग.गीता १०।४-५) इति क्षमासत्यादीनां साधनानां सुखादीनां फलानां च स्वमात्रहेतुकत्वम् उच्यते. अतएव सूत्रकारोऽपि कर्मकारणतावादं ''**धर्मं जैमिनिरतएव**'' (ब्र.सू. ३।२।४०) इति सूत्रेण अनूद्य निराकरोति ''**पूर्वन्तु बादरायणो हेतुव्यपदेशाद्**'' (ब्र.सू. ३।२।४१) इति. बादरायणः आचार्यस्तु **पूर्वं** पूर्वोक्तम् ईश्वरमेव कारणं मन्यते. '**तु**'शब्दः कर्मादेः कारणताव्यावर्तकः. कुतः? ''**हेतुव्यपदेशात्**''. श्रुतिषु ''**एष उ एव**'' (कौषी.उप. ३।९) इत्यादौ तस्यैव सर्वहेतुत्वेन कथनाद् इति अर्थः.

(१) [सहकारिसमवधान-रहितत्वरूप-स्वतन्त्रत्वरूप-कर्तृत्वस्य ईश्वरे सत्त्वे प्रमाणाभावात्. परमेश्वरस्य इच्छया साधुकर्म ततः उन्नयनम् इति अर्थस्य तस्याः श्रुत्याः प्रतीत्याः, इच्छायाः सर्वत्र हेतुत्वेन कर्म प्रत्यपि हेतुत्वेऽपि अनन्यथासिद्ध-नियतपूर्ववर्तिनः कर्मणः फलहेतुतायाः दुर्वारत्वाच्च. ईश्वरस्य इच्छाद्वारा तदिच्छायाः वा वृष्टिन्यायेन हेतुत्वम् इति अन्यत्र विस्तरः. एवमेव ''पराच्तु तत्छ्रुतेः'' (ब्र.सू. २।३।४१) इति सूत्रं पराद् = ईश्वराद् जीवस्य कर्तृत्वम् इत्यर्थकं लब्धव्यवस्थं बोधव्यम्. एतेनं ''वैषम्य-नैर्घृण्ये इति दूषणे द्वे परे स्थिते अनादिकर्म च आश्रित्य समाधानेतु अनीशता. अत्रापि शाङ्कराः शैवा-माध्वा-रामानुजादयः निम्बार्काः भास्कराः भिक्षुः ये अन्ये ते दोषसंश्रिताः'' (शु.मा. ४४-४५) इति प्रत्युक्तम्. तट्टीकायां 'दोष'शब्देन या अनीश्वरत्वापत्तिः उक्ताः तस्याः उद्धृतत्वात्.

यत्तु तत्र वैषम्यनैर्घृण्य-परिहारार्थम् ''आत्मसृष्टेः न वैषम्यं नैर्घृण्यं चापि विद्यते श्रीमदाचार्यचरणैः निबन्धे

इदम् ईरितं, श्रीमत्प्रभुवरैः विद्वन्मण्डनेऽपि निरूपितम्. रमणार्थम् इदं विश्वं उच्चनीचादिभावतः आत्मरूपं चकार अतो हरिः यस्माद् अदूषणम्'' (शु.मा.४६-४८) इति उक्तं, तद् न युक्तम्. तट्टीकायाम् 'आत्मसृष्टेः' इत्येतत्तात्पर्यविषयाभेदमात्रस्यैव तादृग्दोषाभावे हेतुत्वोक्त्याः तावता दोषानुद्धारात्. तथाहि किम् इमे जीवाः ततो अभिन्नाअपि दुःखं जानन्ति न वा? आद्ये दोषानपायो दुःखानिरासाद्, अन्त्ये अनुभवविरोधः. किञ्च आत्मनि दुःखोत्पादकः आत्महादिरिव ईश्वरो निन्द्येत प्रेक्षावद्भिः. एतेन भैक्षवमतम् उपन्यस्य ''तन्मायावादि विध्वंसध्वस्तप्रायम्'' (शु.मा.६४) इत्यस्य टीकायां भेदवादे वैषम्यादिदोषाभिधानमपि प्रत्युक्तम्, अभेदवादेऽपि अनिरस्तत्वात्.

यच्च तट्टीकाकारेण विद्वन्मण्डनोक्तं किञ्चिद् अनूदितं '' 'कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः' (ब्र.सू.२।३।४२) ...प्रपञ्चेन रमणेच्छयाहि भगवान् क्रीडार्थं कृतविविधमर्यादादिरूपप्रयत्नो...जन्मकालाद् आरभ्य मोक्षपर्यन्तं विचारितवान्. तत्रहि क्रीडैव मुख्या अन्यत् सर्वम् उपसर्जनीभूतम्. तथाच तदपेक्षो भगवान् तदनुसारेणैव कारयति. यतो विहितस्य यागादेः प्रतिषिद्धस्य विप्रहननादेः अवैयर्थम् एवं भवेत्. मर्यादाभावेतु ईश्वस्यैव स्वर्ग-नरकादिदातृत्वेन विधि-निषेधवैयर्थ्यं भवेत्.'' (द्र.शु.मा.प्र.४७.) इति तच्च न सम्यक्. एतादृश-सत्यसङ्कल्प-परमेश्वर-सङ्कल्पस्य दुःखादिप्रयोजकत्वेन परमेश्वरे वैषम्यादेः दुष्परिहरत्वात्. किञ्च तवैव तत्सूत्रविरोधः सापेक्षतायाः सूत्रात् स्पष्टं प्रतीतेः. स्वनिर्मितजीवकर्मणामिव स्वनिर्मतविचारादेः अपेक्षायामपि

सापेक्षत्वानपायात्. सूत्रार्थस्तु जीवकृतप्रयत्नापेक्षः इत्यादि-न्यायानुरोधाद् नतु विचारितमर्यादापेक्षः इत्यादिः मानाभावात्. किञ्च तथा सति स्वविचारापेक्षः इति वा मर्यादापेक्षः इति वा स्पष्टं ब्रूयात्.

एवं ''वैषम्यनैर्घृण्ये न सापेक्षत्वात्'' (ब्र.सू.२।१।-३४) ''पत्युः असामञ्जस्याद्'' (ब्र.सू.२।२।३७) इति सूत्रद्वयविरोधोऽपि तन्मते बोध्यः. प्रपञ्चितश्च अयम् अर्थः तत्र तत्र भगवत्पादैः इति न अत्र अधिकं प्रयत्यते. तादृशकर्मणाम् इच्छां प्रति हेतुत्वन्तु ज्ञानद्वारा ''तद् ऐक्षत''(छान्दो.उप.६।२।३) इत्यादिश्रुत्या ज्ञान-स्यापि हेतुत्वाद्, लोकेऽपि कर्मणां तैः जाततोषादिकस्य भूपादेः ज्ञानद्वारैव इच्छां प्रति हेतुत्वदर्शनात् च. क्रीडार्थं यथा सृष्टिः अनुपपन्ना तथा वक्ष्यते.]

(२) किञ्च भवन्मते वैषम्य-नैर्घृण्यरूपं दोषद्वयं दुरुद्धरं कस्यचित् सुखं कस्यचिद् दुःखं च ददतः स्वयमेव तद्धेतुभूतकर्म कारयतः कुतो न स्यात्. अस्मन्मते च तादृशदूषणद्वयं न सम्भवति. तथाहि : ब्रह्म स्वयं रमणेच्छयैव उच्चनीचादिभावेन जातम्. ''तद् आत्मानं स्वयम् अकुरुत'', ''सत् च त्यत् च अभवद्'' (तैत्ति.उप. २।६), ''यथा ऊर्णनाभिः सृजते गृह्णते च यथा पृथिव्याम् ओषधयः सम्भवन्ति यथा सतः पुरुषात् केशलोमानि तथा अक्षरात् सम्भवति इह विश्वम्'' (मुण्ड.उप.१।१।७) इत्यादिश्रुतेः. अतः स्वाभिन्नत्वाद् न वैषम्य-नैर्घृण्ये. ननु एवमपि जीवानां ब्रह्माभिन्नानां सुखं दुःखं च ईश्वरेच्छयैव भवति इति भवन्मतं तत्र च कर्मणां वैयर्थ्यं स्यात्, तत्प्रवृत्तिरपि कस्यचिद् न स्यात् कृतहानिरकृताभ्यागमरूपदूषणद्वयमपि स्याद् इति चेद्, न;

कर्मापेक्षोहि भगवान् सुखं दुःखं च जीवानां तत्-तत्कृतसुकृतदुष्कृतानुसारेणैव ददाति इत्यतो न कृतहान्यादिरूपं दूषणम्. नच "एष ह्येव साधु कर्म कारयति तं यम् एभ्यो लोकेभ्यः उन्निनीषते एष उ एव असाधु कर्म कारयति तं यम् एभ्यो अधोनिनीषते" (कौषी.उप.३।९) इति श्रुत्या कर्मापि सएव कारयति इति अङ्गीकरणीयम्. तथाच वैषम्य-नैर्घृण्यरूपदोषतादवस्थ्यम् इति वाच्यं, सृष्ट्यादौ भगवान् रमणेच्छया "बहु स्यां प्रजायेय" (छान्दो.उप.६।२।३) इत्यादिरूपया क्रीडार्थमेव कृतप्रयत्नः तत्साधनीभूताः अनेकमर्यादाः कृतवान् यो एवं कर्म करिष्यति तस्य एवं फलं भविष्यति तत्-तद्विषये तस्य रागद्वेषादिकं भविष्यति पुनः तत्-तत्कर्म करिष्यति पुनः तस्य सुखं दुःखं वा भविष्यतीति. तत्र कर्मणि सुखे दुःखे च साधारणतयैव भगवतो हेतुत्वं नतु असाधारणतया. तत्र मुख्या क्रीडैव अन्यत् सर्वम् उपसर्जनम्. यथा लोके कश्चिद् राजा क्रीडार्थं स्वयमेव नियमान् कृत्वा क्रीडति तत्र स्वकृतनियमानुसारेणैव यो यथा करोति तस्मै तथैव सुख-दुःखरूपं फलं ददाति न तावता तस्य वैषम्यं नैर्घृण्यं वा भवति नापि अनीशत्वम्. तथा प्रकृतेऽपि तादृशनियमाभावेतु दोषो दुर्वारएव. अतएव "कृतप्रयत्नापेक्षस्तु विहित-प्रतिषिद्धावैयर्थ्यादिभ्यः" (ब्र.सू.२।-३।४२) इति सूत्रेण वैषम्य-नैर्घृण्ययोः परिहारो अनयैव रीत्या व्यासैः कृतः. तत्र "ननु वैषम्य-नैर्घृण्ययोः न परिहारः, अनादित्वेन स्वस्यैव कारयितृत्वाद् इति पूर्वपक्षं 'तु'शब्दो निवारयति" (ब्र.सू.भा.२।३।४२). जीवकृतप्रयत्नापेक्षो भगवान् सुखं दुःखं च ददाति. "प्रयत्नपर्यन्तं जीवकृत्यम् अग्रे तस्य अशक्यत्वात् स्वयमेव कारयति. यथा पुत्रं यतमानं बालं पिता पदार्थगुणदोषौ वर्णयन्नपि तत्प्रयत्नाभिनिवेशं दृष्ट्वा तथैव कारयति" (ब्र.सू.भा.२।३।४२) "तत्कथम् अवगम्यते.

यतः तैत्तिरीये ‘अथ अतो अनुप्रश्नाः’ (तैत्ति.उप.२।६) इत्यादिना अविदुषो विदुषः च समानैव ब्रह्मप्राप्तिः उत कश्चिद् विशेषः इति प्रश्ने उत्तरत्वेन ‘सो अकामयत’ (तैत्ति.उप.२।६) इत्यादिना स्वस्यैव बहुभवनेन उच्चनीचरूपेण स्वसृष्टिम् उक्त्वा तत्र अनुप्रवेशेन स्वस्यैव ‘सत् च त्यत् च अभवद्’ (तैत्ति.उप.२।६) इत्यादिना अनेकविधं द्वैधीभावं च उक्त्वा ‘सत्यम् अभवद्’ (तैत्ति.उप.२।६) इति समाप्तौ ब्रह्मरूपत्वं निगमयामास. तथा सति सर्वस्य ब्रह्मरूपत्वे अविशिष्टेऽपि मध्ये ‘स तपो अतप्यतः’ (तैत्ति.उप.२।६) इत्यादिना तपोरूपस्य आलोचनस्यापि सृष्टौ कारणत्वेन कथनाद् यथाधिकारं तत्-तत्फलं तत्-तदधिकारः च नानाविधः तत्र कारणं तस्यापि कारणं नानाविधः स्वभावः इति फलति. एवं सति आलोचनानुसारेण प्रयत्नपर्यन्तं जीवकृत्यं तदपेक्षः सन् अग्रे बाह्यकृतौ उपकरणबाहुल्यम् अपेक्षितम्. तच्च जीवेन केवलेन सम्पादयितुम् अशक्यम्, अतः तत्सम्पादनद्वारा स्वयमेव कारयति. तत्र दृष्टान्तोऽपि ‘यथा बालं...पुत्रम्’ इत्यादिः पूर्वम् उक्तएव. एवञ्च कार्यमात्रं प्रति भगवानेव कारणं तथाच प्रयत्नोत्तरकाले फलदातृत्वाभिव्यापिका या इच्छा आलोचनाकारान्तःपातिनी तामेव श्रुतिः अनुवदति ‘उन्निनीषति... अधोनिनीषति’ इति. अतो गुणदोषकथनपूर्वकं बालेच्छानुरूपेण सामग्रीसम्पादके पितरि यथा न दोषः; किन्तु, बालस्वभावएव. तथा ब्रह्मण्यपि न दोषः; किन्तु, जीवएव. ननु उक्तदृष्टान्तन्यायेनैव कारयति इत्यत्र किं गमकम्, अतः आह सूत्रकृद् ‘विहित-प्रतिषिद्धावैयर्थ्यादिभ्यः’ (ब्र.सू.२।३।४२) इति यदि उक्तन्यायं विहाय केवलं जीवकृतकर्मापेक्षः कारयति इत्येव अङ्गीक्रियेत तदा विहित-प्रतिषिद्धयोः यागादि-ब्राह्मणहननादिरूपयोः कर्मणोः वैयर्थ्यं स्यात्” (द्र.ब्र.सू.भा.प्र.२।३।४२). पूर्वकर्मणएव प्राधान्ये ततएव सुखादिसिद्धेः सूत्रस्था‘ऽऽदि’पदाद् “‘इदं विहितम् इदं निषिद्धम्’ इति बोधकस्य प्रमाणव्यवहारस्य

वैयर्थ्यं(वैयर्थ्याद्) बोध्यम्. अतो विहित-प्रतिषिद्धावैयर्थ्य-प्रमाणव्यापारावैयर्थ्य-प्रामाणिकप्रेक्षावत्कृत- प्रमाणानुसरणेभ्यो हेतुभ्यः इदं ज्ञायते यत् फलदाने कर्मापेक्षः... कर्मकारणे प्रयत्नापेक्षः प्रयत्ने कामापेक्षः” (ब्र.सू.भा.प्र.२।३।४२) इति मर्यादा या स्वयंकृता तद्रक्षार्थं वेदं चकार यथा लोके राज्यमर्यादारक्षार्थं नीतिशास्त्रम्. तस्माद् “लोकवत्तु लीलाकैवल्यम्” (ब्र.सू.२।१।३३) इति न्यायेन जीवकृतप्रयत्नानुसरणाद् न ब्रह्मणि वैषम्यादिगन्धोऽपि नापि अनीश्वरत्वं, मर्यादामार्गस्य तादृशः अपेक्षावैशिष्ट्यपूर्वकत्वेन स्वयमेव निर्माणात्.

क्वचित् च स्वतन्त्रत्वाद् मर्यादां भिनत्त्यपि. अतएव “ते नाधीतश्रुतिगणाः” (भाग.पुरा.११।१२।७) इत्यादिवाक्यैः तदनपेक्ष्यैव गोकुलस्थेभ्यः फलदानकथनमपि सङ्गच्छते. इदमपि “लोकवत्तु लीलाकैवल्यम्” इति न्यायादेव समाहितम्. लोके राज्ञामपि कृपापात्रेषु तथा दर्शनात्. लोकयुक्त्यनुसारेण समाधानम् इदम्. वस्तुतस्तु ब्रह्मणः कर्मापेक्षत्वेऽपि न अस्वातन्त्र्यं; किन्तु, अलौकिकत्वसम्पादकतया भूषणमेव. यतो विरुद्धधर्माश्रयं सर्ववादानवसरं समाभ्यधिकरहितं ब्रह्म वेदे प्रतिपाद्यते औपनिषदं हि ब्रह्म नतु युक्तिसिद्धं येन युक्तिविरोधः स्याद्. अतएव उक्तं “यत्किञ्चिद् दूषणन्तु अत्र दूष्यं चापि हरिः स्वयं विरुद्धपक्षाः सर्वेऽपि सर्वम् अत्रैव शोभते” (सुबो.२।९।३२) इति. एतेन सहकारिसमवधानरहितत्वरूप इति आरभ्य तथा वक्ष्यते इत्यन्तं समाहितम्. यत्तु तत्रैव उक्तं किम् इमे जीवाः ततो अभिन्नाअपि दुःखं जानन्ति न वा? आद्ये दोषानपायो दुःखानिरासाद् अन्त्ये अनुभवविरोधः. किञ्च आत्मनि दुःखोत्पादकः आत्महादिरिव ईश्वरो निन्द्येत प्रेक्षावद्भिः इति तद् न समीचीनम्. “इतरव्यपदेशाद् हिताकरणादिदोषप्रसक्तिः”

(ब्र.सू.२।१।२१) इति सूत्रेण इममेव पूर्वपक्षं कृत्वा “अधिकन्तु भेदनिर्देशाद्” (ब्र.सू.२।१।२२) इति सूत्रेण स्वयमेव व्यासैः समाहितत्वात्. तत्र “‘तत्सृष्ट्वा’ (तैत्ति.उप.२।६।१) इति श्रुतौ सृष्टौ अनुप्रवेशः श्रुतः स च ‘अनेन’ (छान्दो.उप.६।३।३) इति श्रुत्या ‘जीवेन’ इति श्राव्यते तस्य आत्मत्वेन कार्यविलक्षणतया ब्रह्मत्वं च बोध्यते. अतः इतरस्य आत्मत्वेन व्यपदेशात् सिद्धेः तस्य शुद्धब्रह्मत्वे तद्धितं कर्तव्यम्. तच्च सर्वानर्थदुःखनिकरहेतुभूतायां सृष्टौ प्रवेशनाद् न करोतीति हिताकरणस्य अहितकरणस्य च प्रसक्तिः” (ब्र.सू.भा.प्र.२।१।२१). लोकविरुद्धं च आत्मनो हिताकरणम् इति जीवानां ब्रह्माभेदो न युक्तः इति पूर्वपक्षे समाधानम् आह “अधिकन्तु भेदनिर्देशाद्” (ब्र.सू.२।१।२२) इति सूत्रेण तत्र ‘तु’शब्दः पूर्वपक्षं व्यावर्तयति. तथाच यथा ऐक्यं श्रुत्या बोध्यते तथा ज्ञेयत्वेन आनन्दरूपत्वेन च भेदोऽपि बोध्यते अयं भेदो ब्रह्मणः आधिक्ये पर्यवस्यति आधिक्यं च अंशित्वात्, पूर्णत्वात् च. पूर्णश्च अंशस्य हितमेव नियमेन करोति इति न नियमः स्वदेहेऽपि नखनिकृन्तन-केशप्रसाधनादेः दर्शनात्. अन्यथा सर्वेन्द्रियव्यापाराभावप्रसङ्गात्; किन्तु, स्वलीलया हितम् अहितं वा यथेष्टं करोति इत्येव लोके दृश्यते. तथाच इयम् आशंकैव न सम्भवति. यच्च उक्तं जीवदुःखेन ब्रह्मणो दुःखित्वं स्यात् तदपि न सम्भवति. कार्य-कारणयोः अभेदेऽपि कार्य-कारणव्यवहारजनकः कश्चिद् भेदोऽपि अभ्युपगन्तव्यः अन्यथा “इदं कार्यम् इदं कारणम्” इति व्यवहारो न स्यात्. एवञ्च नामरूपाभिव्यक्तिदशायां कार्यगता धर्माः कारणे न सन्ति इति अङ्गीकरणीयम्. यथा घटगता जलाहरणादयः पटगता आच्छादकत्वादयः ते मृत्पिण्डादौ न सन्ति. एवं जीवस्य चिद्रूपत्वेन ब्रह्माभिन्नत्वेऽपि तद्गता दुःखादयो न ब्रह्मणि इति न कोऽपि दोषः इति अलं

विस्तरेण.

(३) सहस्राक्षे सहकारिसमवधान...रूप...इत्यादिं तथा वक्ष्यते इत्यन्तं भागं निराकुर्वन्ति. **किञ्च भवन्मते** इत्यादिना **इति अलं विस्तरेण** इत्यन्तेन. तत्र "वैषम्य-नैर्घृण्यसंज्ञे दूषणे द्वे परे स्थिते" (शु.मा.४४) इति मार्तण्डकारिकाद्वयसमर्थनार्थं **किञ्च** इत्यादि **कुतो न स्याद्** इत्यन्तम्. स्वमते तद्दूषणोद्धाराय **अस्मन्मते च** इत्यादिग्रन्थः. अत्र इदं ज्ञेयम्. : यत्तु सहकारिसमवधान... इत्यादि बोद्धव्यम् इत्यन्तं तद् अमूलम्. ईश्वरस्य तादृशकर्तृत्वे (=स्वतन्त्रकर्तृत्वे) "**तद् आत्मानं स्वयम् अकुरुत**" (तैत्ति.उप.२।७) इत्यादि प्रमाणानां जागरूकत्वात्. अत्र '**आत्मानम्**' इति तस्यैव उपादानत्वम् '**अकुरुत**'इति तस्यैव कर्तृत्वं '**स्वयम्**' इति सहकारिकारणान्तराभावः च बोध्यते. स्पष्टञ्च इदम् "**आत्मकृतेः परिणामाद्**" (ब्र.सू.१।४।२६) इति सूत्रे शाङ्करभाष्येऽपि. "**अकुरुत**" इति आत्मनेपदेन "**क्रीडार्थम् आत्मनः**" (भाग.पुरा.८।२२।२०) इति स्मृत्यनुसारात् स्वक्रीडार्थमेव जगत्करणस्य बोधनेन प्रयोज्यकर्तृत्वमपि प्रतिविधीयते. तथा "**सदेव सोम्य**" (छान्दो.उप.६।२।१) इत्यत्र "**अद्वितीय**"पदेन सहकारिकारणनिराकरणम् उपनिषद्भाष्ये शङ्कराचार्यैः दर्शितम्. अतएव "**एष हि एव साधु कर्म कारयति**" (कौषी.उप.३।९) "**मत्तएव पृथग्विधाः**" (भग.गीता १०।५) इत्यादि श्रुतिस्मृतिषु 'एव'कारेण भगवद्व्यतिरिक्तस्य हेतुत्वं व्यवच्छिद्यते, वेदविरुद्धबाह्याबाह्यस्मृतिनिराकरणपादे च उभयकारणवादो निरस्तः. भगवान् स्वेच्छया तत्तत्साधनद्वारा तत्तत्फलं ददाति इति सिद्धान्तयद्भिः अस्माभिः कर्मणां फलहेतुता न प्रत्याख्यायते अतः कर्मणः फलहेतुतायाः दुर्वारत्वोक्तिः सिद्धसाधनम्. वस्तुतस्तु न अनन्यथासिद्ध-नियतपूर्ववर्तित्वमपि अनुग्रहविशेषे निःसाधनेभ्यः काम-क्रोधादि-विरुद्धसाधनवद्भ्यश्च फलदानस्य दर्शनात्. अपाणिपिहितं च एतत् श्रीभागवतप्रभृतिषु "**अह्न्यापृतं निशि शयानम् अतिश्रमेण लोकं विकुण्ठम् उपनेष्यति गोकुलं स्वम्**" (भाग.पुरा.२।७।३१), "**ते नाधीतश्रुतिगणाः**" (भाग.पुरा.११।१२।७) , "**गोप्यः कामाद् भयात् कंसो द्वेषात् चैद्यादयो नृपाः**" (भाग.पुरा.७।१।३१) इत्यादौ. वृष्टिन्यायेनापि

इच्छायाः कर्मादिहेतुत्वाङ्गीकारे तस्याः कर्मजन्यत्वं स्वोक्तचरं परित्याज्यं तस्याः कारणान्तरजन्यत्वं नित्यत्वं वा वक्तव्यं वैषम्यादिकं च तदवस्थम्. किञ्च भगवतो वृष्टिवत् कारणत्वे बीजवत् कारणान्तरमपि वाच्यम्. तथाच सति सृष्टेः पूर्वं सजातीयादिभेदशून्यब्रह्मसत्ताबोधकानां ‘‘**सदेव**’’ इत्यादीनां व्याकोपो अनीश्वरत्वापातः च. यदितु ‘‘**ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहि इति ता अन्नम् असृजन्त. तस्माद् यत्र क्व च वर्षति तदेव भूयिष्ठम् अन्नं भवति अद्भ्ययएव, तद्धि अन्नाद्यं जायते**’’ (छान्दो.उप.६।२।४) इति छान्दोगादिश्रुतिभ्यः पार्थिवत्वाद् जलजन्यान्येव बीजानि जलादेव फलान्वितानि यथा भवन्ति तथा भगवद्धेतुकान्येव कर्मादीनि ततएव फलम् अर्पयन्ति कार्यवैचित्र्यं च धान्यवैचित्र्यवद् इति भाष्यकारचरणाभिप्रेतं वृष्टिवत् कारणत्वं स्वीक्रियेत तदा ‘ओम’कुर्मः. एवं सति निरपराधं ‘‘**परात्तु तच्छ्रुतेः**’’ (ब्र.सू.२।३।४१) इति सूत्रमपि न अन्यथा नेयम्. ‘‘**न अन्यो अतो अस्ति द्रष्टा, न अन्यो अतो अस्ति श्रोता, न अन्यो अतो अस्ति मन्ता, न अन्यो अतो अस्ति विज्ञाता**’’ (बृह.उप.३।६।२३) , ‘‘**स विश्वकृत् स हि सर्वस्य कर्ता**’’ (बृह.उप.४।४।१३) इत्यादिश्रुतिभ्यो ब्रह्मगतस्यैव कर्तृत्वस्य जीवे प्रतीतेः निर्बाधत्वात् तस्यैव उन्निनीषाधोनिनीषाभ्यां साध्वसाधुकारयितृतायाः श्रवणात् च. एतेन ‘‘वैषम्य-नैर्घृण्यसंज्ञे दूषणे द्वे परे स्थिते’’ इति मार्तण्डकारिकाद्वयं सव्याख्यं समर्थितं वेदितव्यम्. विपक्षे अनीश्वरत्वापत्तेः बहुधा उपपादितत्वात्. ‘वैषम्य-नैर्घृण्यपरे’ इति प्रथमपादपाठस्तु मूलपाठं विप्लाव्य ‘‘**ईदूदेद्**’’ (पाणि.सू.१।१।११) इति प्रगृह्यस्यापि प्रकृतिभावाभावाद् अशुद्धिख्यापनाय तेन स्वयं कल्पितः. द्वितीयपादे ‘परे’इति सप्तम्यन्तं द्वितीयकारिकायां ‘‘नैम्बार्काः भास्कराः भिक्षुः’’ (शु.मा.४५) इति पाठेऽपि ‘**निम्बार्काः**’ इति लेखस्तु पाठपरिवर्तनाद् अशुद्धपुस्तकोत्पादितभ्रमाद् वा.

अथ कथं तर्हि सिद्धान्ते वैषम्य-नैर्घृण्ययोः परिहारः इति चेद् अत्र आहुः तत्त्वदीपाद्यप्रकरणे श्रीमदाचार्याः. ‘‘**आत्मसृष्टेः न वैषम्यं नैर्घृण्यं चापि विद्यते**’’ (त.दी.नि.१।७६) इति. अयम् अर्थः ‘‘**तद् आत्मानं**

स्वयम् अकुरुत” (तैत्ति.उप.२।७) “**स वै नैव रेमे**” (बृह.उप.१।४।३) “**हन्त तिरोसानि**” (बृह.उप.१।४।४) इत्यादिश्रुतिभिः क्रीडार्थम् आत्मनएव तत्तदंशतिरोभावाद् उच्चनीचभावेन जगद्रूपेण करणात् सर्वस्य स्वाभिन्नतया न वैषम्य-नैर्घृण्ये; नापि ‘च’कारपरिगृहीताः अन्ये दोषाः. लोके सर्वस्वावयवाभेददर्शी पुरुषः पुरुशर्कराकंटकाकीर्णसरणौ चरणेन चलन् करेण द्रविणम् उपार्जयन् मुखेन तद्लब्धम् अन्नाद्यम् उपभुञ्जानो नहि हस्त-पादे द्वेषी, अवयवान्तरे उदासीनो मुखे स्निग्धो विषमो अयं निर्घृणो अयम् इति व्यपदिश्यते. एवं भगवानपि ब्राह्मणक्षत्रियाद्युच्चावचसर्गकर्तापि अदुष्टः. यथाच लीलया तालं वादयन् वामं पाणिम् अधः कृत्य उच्चीकृतेन दक्षिणेन तं ताडयन्नपि पुमान् न विषमो निर्घृणो वा हस्तद्वयेऽपि तुल्याभेददर्शित्वात्, तथा विविधां प्रपञ्चप्रवृत्तिं प्रणयन् अस्मत्प्रभुरपि “**इदं सर्वं यद् अयम् आत्मा**” (बृह.उप.२।४।६) इत्यादिभिः सर्वात्मकत्वात्. एतदेव “**वासुदेवः सर्वम् इति**” (भग.गीता ७।१९) “**निर्दोषं हि समं ब्रह्म**” (भग.गीता ५।१९) “**समोऽहं सर्वभूतेषु न मे द्वेष्यो अस्ति न प्रियः**” (भग.गीता ९।२९) इत्यादिस्मृतीनाम्, “**अहमेव आसमेव अग्रे न अन्यद् यत् सद् असत् परं**” (भाग.पुरा.२।९।३२) “**मनसा वचसा दृष्ट्या गृह्यते अन्यैरपि इन्द्रियैः अहमेव न मत्तो अन्यद् इति बुध्यध्वम् अञ्जसा**” (भाग.पुरा.११।१३।२४) “**न तस्य कश्चिद् दयितः सुहृत्तमो न च अप्रियो द्वेष्यः उपेक्ष्यएव वा**” (भाग.पुरा.१०।३५।२२) इत्यादिश्रीभागवतवचसां च एकवाक्यतया पर्यालोचने फलति. त्वदुक्तरीत्या कर्मणा राजवत् प्रीति-द्वेषयोः अङ्गीकारेतु एतद्विरोधः स्फुटएव. एवं सूत्रकारोऽपि आत्मसृष्टेरेव वैषम्यादिपरिहारम् अभिप्रेत्य केवलनिमित्तत्ववादिनां सांख्य-योगैकदेशि-नैयायिक-वैशेषिक-पाशुपत-कापालिक-कालामुखशैवादीनां मते ईश्वरस्य वैषम्यादिग्रासाद् असामञ्जस्यम् आह “**पत्युः असामञ्जस्याद्**” (ब्र.सू.२।२।३७) इत्यत्र. शङ्कराचार्याअपि “**प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधाद्**”, “**अभिध्योपदेशात् च**” (ब्र.सू.१।४।२३-२४) इत्यादौ श्रीबादरायणेन समर्थितं परमेश्वरस्य स्वेच्छया आत्मोपादानकानेककार्यकर्तृत्वपक्षम् अदुष्टम् उक्त्वा सूत्राक्षरव्याख्याने “**किं पुनः सामञ्जस्यम्? हीनमध्यमोत्तमभावेनहि**

प्राणिभेदान् विदधतः ईश्वरस्य राग-द्वेषादिदोषप्रसक्तेः अस्मदादिवद् अनीश्वरत्वं प्रसज्येत. प्राणिकर्मापेक्षितत्वाद् अदोषः इति चेद्, न; कर्मेश्वरयोः प्रवर्त्य-प्रवर्तयितृत्वे इतरेतराश्रयदोषप्रसङ्गात्. अनादित्वाद् इति चेद्, न; वर्तमानकालवद् अतीतेष्वपि कालेषु इतरेतराश्रयदोषाविशेषाद् अन्धपरम्परापत्तिन्यायापत्तेः'' (ब्र.सू.शां.भा.२।२।३७) इत्यादि आहुः. तस्मात् श्रीमदाचार्योक्तएव वैषम्यादेः मुख्यः परिहारः इति निखिलाम्नाय-स्मृति-न्याय-पुराणेभ्यो निष्कृष्यते. एवं प्रलयमपि अनेकधा जन्मादिपरम्परया क्लिष्यमानानां जीवानां तद्विश्रमेण सुखार्थं करोति. यथा इदानींत्वे क्षणदाम् इति अन्यत्र विस्तरात् ततोऽपि न नैर्घृण्यम्. एतावता तदुपन्यस्ता ''आत्मसृष्टेः...'' (शु.मा.४६) इत्यादिमार्तण्डकारिकासार्धद्वितयीसमर्थिता. यत्तु तत्र इत्यादिः दोषानुद्धाराद् इत्यन्ता तदुक्तिः च निरस्ता.

यच्च तथाहि इत्यादि अनिरस्तत्वाद् इत्यन्तम् अभाषि तद् अनादरणीयम्. तथाहि हस्तादिश्रमोपार्जितं मुखेन उपभुज्यते न वा? तालवादने अन्यतरः करो अन्यतरेण ताड्यते न वा? द्वितीये प्रत्यक्षविरोधः. आद्ये सोऽपि विषमो अभिलप्यतां मुखेन भुञ्जानानां शर्करादौ चरणाभ्यां चरतां च किञ्चन वैषम्यप्रायश्चित्तमपि स्मर्येत नतु एवम्. किञ्च जीवाहि आविद्यकाद् देहाद्यहन्ता-गेहादिममतालक्षणसंसारादेव स्वस्मिन् दुःखसम्बन्धं प्रतियन्ति ''**समाने वृक्षे पुरुषो अनिविष्टो निमग्नो अनीशया शोचति मुह्यमान**'' (मुण्ड.उप.३।१।२) इति मुण्डकश्रुतेः. ''**अज्ञानेन आवृतं ज्ञानं तेन मुह्यन्ति जन्तवः**'' (भग.गीता ५।१५) इति स्मृतेः. ''**यावद् हतो अस्मि हन्ता अस्मि इति आत्मानं मन्यते अस्वदृक् तावत् तद् अभिमानी अज्ञो बाध्यबाधकताम् इयाद्**'' (भाग.पुरा.१०।४।२२) इति श्रीभागवतोक्तेश्च. अतएव एकादशस्य त्रयोविंशे भिक्षुः संसारचक्रपरिवर्तकस्य मनसएव स्वस्मिन् सुखित्व-दुःखित्वप्रत्यायकत्वम् आह ''**न अयं जनो मे सुखदुःखहेतुः**'' (भाग.पुरा.११।२३।४३) इत्यादिना. अतएवच सम्पन्नज्ञानानां योगिनां भगवद्भक्तानां न दुःखित्वप्रत्ययः ''**मत्वा धीरो हर्षशोकौ जहाति**'' (कठोप.२।१२) ''**महान्तं विभुम् आत्मानं मत्वा धीरो न शोचति**'' (कठोप.२।२२) ''**तरति शोकम् आत्मविद्**''(छान्दो.-

उप.७।१।३) “**यस्मिन् सर्वाणि भूतानि आत्मैव अभूद् विजानतः तत्र को मोहः को शोकः एकत्वम् अनुपश्यतः**” (ईशा.उप.७) “**आत्मानं चेद् विजानीयाद् अयम् अस्मि इति पूरुषः किम् इच्छन् कस्य कामाय शरीरम् अनुसंज्वरेद्**” (बृह.उप.४।४।१२) इति कठभूमविद्येशावास्यबृहदारण्यकश्रुतिभ्यः “**यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते**” (भग.गीता ६।२२) इति स्मृतेः षष्ठस्कन्धे “**नारायणपराः सर्वे न कुतश्चन बिभ्यति स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः, देहिनां देहसंयोगाद् द्वन्द्वान् ईश्वरलीलया सुखं दुःखं मृतिः जन्मः शापो अनुग्रहएव च अविवेककृतः पुंसो हि अर्थभेदइव आत्मनि गुणदोषविकल्पश्च भिदेव स्रजिवत् कृतः**” (भाग.पुरा.६।१७।२८-३०) इति श्रीरुद्रोक्तेश्च. अतः स्वस्मिन् दुःखितत्वप्रतीतेः आविद्यकत्वाद् अदोषः. अन्यथा अभेदवादिनः तवापि “जीवाः दुःखं जानन्ति” इति अनुभवाद् ब्रह्मणो दुःखितत्वं प्रसज्येत. तथाच “**आनन्दरूपम् अमृतम्**” (मुण्ड.उप.२।२।७) इत्यादिश्रुतिकोपः. नापि आत्महेव ईश्वरो निन्द्यः “**आदित्यः चक्षुः भूत्वा अक्षिणी प्राविशद्**” (ऐत.उप.२।४) इति ऐतरेयश्रुतेः. सूर्यांशभूतचक्षुर्गततिमिरभ्रमरिकादेः सूर्यइव स्वांशभूतानामपि जीवानां दुःखादेः परमात्मनि असम्बन्धात्. यथा कठवल्लीषु पञ्चमवल्ल्यां श्रूयते “**सूर्यो यथा सर्वलोकस्य चक्षुः न लिप्यते चाक्षुषैः बाह्यदोषैः. एकः तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः**” (कठोप.२।११), समर्थितञ्च एतत् श्रीबादरायणाचार्यैः “**प्रकाशादिवद् न एवं परः**” (ब्र.सू.२।३।४६) इत्यत्र. अन्यथा “जीवो ब्रह्मैव केवलम्” इति सिद्धान्तयतः तव कर्मसापेक्षतापक्षेऽपि अबुद्ध्या पापं कृत्वा प्रायश्चित्तीयन् अज्ञइव बुद्ध्या दुःखसाधनं कर्म कृत्वा दुःख्यन् साहसिकइव च अधिकं स निन्द्येत. तस्माद् अभेदवादएव समाधिः साधीयान्. अतएव षष्ठस्कन्धे सप्तदशाध्याये चित्रकेतुना “**संसारचक्रः एतस्मिन् जन्तुः अज्ञानमोहितः भ्राम्यन् सुखं च दुःखं च भुङ्क्ते सर्वत्र सर्वदा**” (भाग.पुरा.६।१७।१८) इत्यादिना स्वस्मिन् सुखदुःखानुभवस्य संसारभ्रममूलकत्वम् उक्त्वा “**एकः सृजति भूतानि भगवान् आत्ममायया एषां बन्धं च मोक्षं च सुखं दुःखं च निष्कलः**” (भाग.पुरा.६।१७।२१) इति भगवतएव स्वशक्त्या सर्वकर्तृत्वम्

अभिधाय **“न तस्य कश्चिद् दयितः प्रतीपो”** (भाग.पुरा.६।१७।२२) इति श्लोकद्वयेन अद्वितीयस्य शक्तिविसर्गेण क्रीडतो न दोषः इति ध्वनितम्. तथा तत्रैव **“देहिनां देहसंयोगाद् द्वन्द्वान् ईश्वरलीलया”** (भाग.पुरा.६।१७।२९) इत्यादिना सर्वस्य क्रीडाहेतुकत्वम् उक्त्वा **“नहि अस्य अस्ति प्रियः कश्चिद् अप्रियः स्वः परोऽपि वा आत्मत्वात् सर्वभूतानां सर्वभूतप्रियो हरिः”** (भाग.पुरा.६।१७।३३) इति श्रीमहादेवेन स्पष्टम् आत्मसृष्टेरेव वैषम्यादिपरिहारो दर्शितः. तथा दशमस्कन्धे **“नहि वां विषमा दृष्टिः सुहृदोः जगदात्मनोः”** (भाग.पुरा.१०।३८।४७) इति जगदात्मकत्वम् अवैषम्ये हेतुत्वेन उक्तम्. सप्तमस्कन्धे **“न एषा परावरमतिः भवतो ननु स्याद् जन्तोः यथा आत्मसुहृदो जगतः तथापि”** (भाग.पुरा.९।७।२७) एवम् अभेदवादेन वैषम्यादिसमाधानम् अन्यत्रापि बहुशो द्रष्टव्यम्. तद् एतत् सर्वं मनसिकृत्य आहुः **अस्मन्मते च तादृशदूषणद्वयं न सम्भवति** इत्यादि **“तद् आत्मानम्”** (तैत्ति.उप.२।६) इत्यादि वाक्यद्वयं ब्रह्मवल्लीस्थं **“यथा ऊर्णनाभिः”** (मुण्ड.उप.१।१।७) इति मुण्डकस्थम्. यच्च यच्च तट्टीकाकारेण इत्यादि स्पष्टं ब्रूयाद् इत्यन्तं तद् दुराग्रहजल्पितम्. अत्र अनूदितो विद्वन्मण्डनलेखस्तु प्राप्तावसरत्वाद् उत्तरभागएव व्याख्यास्यते. तत्र तदुक्तानि दूषणानितु इहैव निराकुर्मः. तत्र वैषम्यन्तु परिहृतम्. सूत्रान् मर्यादासापेक्षत्वप्रतीतावपि तस्याः स्वकृतत्वाद् न पारतन्त्र्यम्. नहि लोकेऽपि मतिमान् राजादिः स्वयं कार्यं पर्यालोच्य स्वपर्यालोचनानुसारेण सर्वं कुर्वन् अस्वतन्त्रः उच्यते. एवम् अपारतन्त्र्यख्यापनायैव सूत्रे ‘कृत’पदम्. अन्यथा मतद्वयेऽपि कृतत्वस्य अर्थादेव लाभात् तद्ग्रहणम् अपार्थं स्यात्. स्वेच्छया कर्माणि अपेक्ष्यैव फलदानम् इच्छायाः सर्वहेतुत्वाद् अपारतन्त्र्यं च अस्मत्सम्मतमेव नतु कर्मणां स्वतन्त्रत्वम् इच्छायाश्च तज्जन्यत्वम्. न्यायानुरोधस्तु अस्मत्कृतसूत्रार्थएव. पूर्वाधिकरणे बुद्ध्यादिकं व्यावर्त्य जीवे निर्धारितस्य कर्तृत्वस्य इतः पूर्वसूत्रे परहेतुकत्वकथनात्. नच अस्माकीनार्थे मानाभावः **“स तपो अतप्यत:”** (तैत्ति.उप.२।६) इत्यादिश्रुतीनां **“स कथं धर्मसेतूनां वक्ता कर्ता अभिरक्षिता”** (भाग.पुरा.१०।३३।२८) **“स्वकृतसेतुपरीप्सया ईशः”** (भाग.पुरा.१०।५५।३७) इत्यादिपुराणवचसां च मानत्वात्. भूते अनुशिष्ट

क्तान्त‘कृत’पदप्रयोगोऽपि सूत्रे भगवदुद्योगपरिग्रहे सुष्ठु सङ्गच्छते. तस्य सृष्ट्यारम्भएव जातत्वात् प्रायो जिज्ञासुकर्मणां स सूत्रकारापेक्षया भावित्वात्. स्वविचारापेक्षः इत्यादि असूत्रयित्वा यथाश्रुतं सूत्रणन्तु अर्थान्तरसंग्रहाय. ‘‘**स्वरितेन अधिकारः**’’ (पाणि.सू.१।३।११) इत्यादिवत्. अन्यथा जीवकृतकर्मापेक्षः इति जीवकर्मापेक्षः इत्येव वा स्फुटं सूत्रयेद् आन्तरधर्मविशेषे प्रसिद्धात्. ‘प्रयत्न’शब्दात् स्पष्टतया चेष्टारूपकर्मणां बोधानुदयात्. तस्माद् यथाधिकारम् उभयार्थावगमनायैव यथा आश्रितपाठो भगवतः. अर्थद्वयन्तु भाष्ये विद्वन्मण्डने च स्फुटम्. इह मूले च सङ्गृह्य दर्शितम्. नच अनेकार्थत्वं दोषः, ‘‘**सुमेधा अमृतोक्षितः**’’ (तैत्ति.उप.१।१०) इत्यादिश्रुतिषु ‘अक्षितः’ ‘उक्षितः’ इत्यादिच्छेदेन ‘‘**जन्माद्यस्य**’’ (ब्र.सू.१।१।२) इत्यादिसूत्रेषु तद्गुणसंविज्ञानातद्गुणसंविज्ञानाद् आश्रयणेन च बह्वर्थसंग्रहस्य शङ्कराचार्यैरपि दर्शितत्वात्. यच्च ‘‘वैषम्यनैर्घृण्ये न’’ (ब्र.सू.२।१।३४) इत्यादि वक्ष्यते इत्यन्तं तदपेशलम्. तत्र ‘‘**वैषम्य-नैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति**’’ (ब्र.सू.२।१।३४) इति सूत्रे कर्मसापेक्षत्वात् तत्परिहारस्तु मीमांसकदर्दुरवादिबुद्धिम् अनुसृत्य पिशाचः पिशाचभाषया बोधनीयः इति न्यायेन उक्तः. तेनैव परिहारसम्भवे तस्यैव समाधेः सूत्रकाराभिप्रेतत्वे च केवलनिमित्तवादे तदुक्तं ‘‘**पत्युः असामञ्जस्यम्**’’ (ब्र.सू.२।२।३७) असङ्गतं स्यात्. अदृष्टाङ्गीकारिणां वैशेषिकप्रमुखानामपि तत्सापेक्षतयैव समाधिसम्भवात्. नच असामञ्जस्यं त्वया अन्यथा व्याख्येयं स्वभाष्यविरोधात्. किञ्च इह फलार्पणे सापेक्षत्वमात्रम् उच्यते नतु इच्छायाः नित्यत्वं कर्महेतुत्वं फलहेतुत्वं वा प्रत्याख्यायते नापि सापेक्षतोक्तिः, स्वमतेऽपि बाधिता स्वेच्छया तत्तत्कर्मकारयित्वा तत्तत्फलदानस्य ‘‘**परात्तु**’’ इति ‘‘**फलम् अतः**’’ (ब्र.सू.३।२।३८) इति अधिकरणद्वितये निर्णीतत्वात्. अतः उत्तरसर्गे फलदित्सया पूर्वकल्पान्ते यानि कर्माणि स कारयति तानि जीवादिसर्वतिरोभावे ब्रह्मण्येव तिरोभवन्ति न च भगवतः तल्लेपः. ‘‘**न साधुना कर्मणा भूयान् भवति नोएव असाधुना कनीयान्**’’ (कौषी.ब्रा.उप.३।९) इति कौषीतक्यादिश्रुतेः. ‘‘**न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा**’’ (भग.गीता ४।१४) इति स्मृतेः सृष्टिप्रकरणेऽपि ‘‘**न च मां तानि कर्माणि निबध्नन्ति धनञ्जय!**’’

(भग.गीता ९।९) इति स्मरणाच्च. तत्तद्'अपूर्वादृष्टा'दिशब्दवाच्यो लेपस्तु जीवधर्मएव, लेपाभावाद् नैष्कर्म्यं भगवतः. अतः **"सर्वकर्मा**"(छान्दो.उप.३।-१४।४) इति शाण्डिल्यविद्याश्रुत्या भगवन्निष्ठत्वादेव अविभागदशायामपि अनादित्वं द्वितीयसूत्रे अभिहितम्. अथ सर्गेच्छायां स्वांशान् जीवादीन् स्वतः आविर्भाव्य धर्मसेतूंश्च आविष्कृत्य स्वेच्छया तत्तत्कर्मानुसारेण जीवेभ्यः उत्तमाधमशरीरादेः दानेऽपि अदोषः उपपत्तेः श्रुतिस्मृत्यानुकूल्यात् च इति **"उपपद्यते च अपि"** (ब्र.सू.२।१।३६) इति तृतीयसूत्रस्य आशयः. सूत्रेऽपि पूर्वपक्षगर्हायाम्. वस्तुतस्तु तत्कर्म ब्रह्माभिन्नं न वा? आद्ये दोषः तदवस्थः, द्वितीये द्वैतापत्तिः पूर्वोक्तदोषः च. अतः उपसंहारे स्वाभिप्रेतं मुख्यसमाधिम् आह **"सर्वधर्मोपपत्तेश्च"** (ब्र.सू.२।१।३७) इति तदनन्यत्वाद्यधिकरणैः निरूपिते सर्वात्मके हिताकरणादिदोषरहिते क्षीरदेवादिवत् सर्वभवनसमर्थे शब्दैकवेद्ये विचित्रसर्वशक्त्युपेतरि लीलाशालिनि परमात्मनि स्वेच्छया कर्मकारयितृत्व-तत्फलदत्व-समत्व-सघृणत्वादयः परस्परविरुद्धतया भासमानाः श्रौताः सर्वेऽपि धर्माः उपपद्यन्तएव अतो न वैषम्यादिदोषगन्धः इति अर्थः. तथाच **"आत्मसृष्टेः न वैषम्यम्"** इत्येव फलितं, तस्माद् अस्मन्मतेः वैषम्यसूत्रं न विरुद्धम्. **"पत्युः असामञ्जस्याद्"**(ब्र.सू.२।२।३७) इत्यस्य उपन्यासस्तु तस्यैव प्रतिकूलः. भावत्कभाष्यादिभाषितन्तु भाष्य-तत्प्रकाश-रश्मि-द्वितीयप्रकाश[१]-भाष्यविवरण-भाष्यप्रदीपादिषु दूषितम् अशेषम् इति किं विशेषतः.

"तद् ऐक्षत बहु स्यां प्रजायेय" इति श्रुतिस्तु इच्छया स्वस्यैव जडजीवादिबहुरूपेण भवनम् उच्चनीचभावं च वक्ति, नतु कर्मविषयकं ज्ञानं ज्ञानद्वारा तेषाम् इच्छाजनकत्वं वा, तस्मिन् प्रकरणे तद्गन्धस्यापि अभावाद्, उपक्रमे **'सदेव'** इति इतरप्रतिषेधात् च. अथ तद् अत्र अर्थाद् आपादनीयम् इति चेत्, स्पष्टतद्ग्राहकं मानान्तरमेव उदाहरयद्बलात् तदिह आपाद्येत. भूपादेरिव कर्मज्ञानद्वारा इच्छाकल्पनेतु ईश्वरज्ञानस्य नित्यत्वेन अतीतानागतवर्तमानसर्वविषयकत्वेन च इच्छापि नित्यैव स्यात्. तथाच

---

[१] अयं ग्रन्थः इदानीं नोपलभ्यते (सम्पा.).

घट्टकुटीप्रभातं श्रुतिपुराणसिद्धं सृष्टेः क्रीडार्थकत्वन्तु तदनुपपत्तिदर्शकतावकनवमश्लोकनिरासावसरे उपपादयिष्यामः. मूले **"यत् किञ्चिद् दूषणन्तु अत्र"** (सुबो.२।९।३२) इति इयं कारिका द्वितीयस्कन्धनवमाध्याये **"अहमेव आसमेव अग्रे"** (भाग.पुरा.२।९।३२) इति श्लोकसुबोधिनीस्था. एतेन **"सर्वधर्मोपपत्तेः च"** (ब्र.सू.२।१।३७) इति सूत्राशयः उपन्यस्तः. **तद् न समीचीनम्** इत्यादि, द्वितीयस्य प्रथमे पादे तदनन्यत्वाधिकरणेन जगतो ब्रह्मानन्यत्वे साधिते जीवस्यापि तथात्वे जडाद् वैलक्षण्ये च सिद्धेः आक्षेपसङ्गत्या **"इतरव्यपदेशाद्"** (ब्र.सू.२।१।२१) इति द्विसूत्रमधिकरणं प्रवृत्तम्. तत्र आद्यं पूर्वपक्षसूत्रं, द्वितीयन्तु सिद्धान्तसूत्रम्. तदर्थम् आहुः **तत्र**इत्यादिना तैत्तिरीये **"तत्सृष्ट्वा तदेव अनुप्राविशद्"** (तैत्ति.उप.२।६) इति ब्रह्मणो अनुप्रवेशः श्रूयते सएव श्वेतकेतुविद्यायां **"सा इयं देवता ऐक्षत हन्ता अहम् इमाः तिस्रो देवता अनेन जीवेन आत्मना अनुप्रविश्य नामरूपे व्याकरवाणि इति"** (छान्दो.उप.६।३।२) इति जीवरूपेण श्राव्यते **"सा इयं देवता इमाः तिस्रो देवता अनेन जीवेन आत्मना अनुप्रविश्य नामरूपे व्याकरोद्"** (छान्दो.उप.६।३।३) इति च. अत्र **जीवेन आत्मना** इति जीवस्य तेजोऽबन्नलक्षणकार्यात् प्रवेशाधिकरणाद् वैलक्षण्येन शुद्धब्रह्मरूपत्वं बोध्यते. परदेवतया तस्य आत्मतया निरूपणात् सूत्रे **"इतरव्यपदेशाद्"**इत्यस्य **इतरस्य** जीवस्य आत्मतया **व्यपदेशाद्** इति अर्थः तदाहुः **इतरस्य** इति, **सर्वानर्थः** इति अनर्थाः कामाधर्मादयोः, दुःखानि तज्जन्यानि अहितकरणस्य च इति **'सौत्रादि'**पदेन परिगृहीतम् एतत्. हितस्य मोक्षसाधनस्य अकरणम् अहितस्य बन्धस्य च करणम् इति दोषाः ज्ञेयत्वेन इति. **"आत्मा वा अरे द्रष्टव्यः"** (बृह.उप.२।३।५) **"सो अन्वेष्टव्यः, स विजिज्ञासितव्यः"**(छान्दो.उप.८।७।१) **"तम् एवं विद्वानम् अमृतः इह भवति"** (तैत्ति.आर.३।१३।२) **"तमेव विदित्वा अतिमृत्युम् एति"** (श्वेता.उप.६।१५) इत्यादिषु ज्ञातृज्ञेयभावेन जीवब्रह्मणोः भेदव्यपदेशः. **"सत्यं विज्ञानम् अनन्तं ब्रह्म"** (शाण्डि.उप.२।२) **"आनन्दरूपम् अमृतं यद् विभाति"** (मुण्ड.उप.२।२।७) **"यो वै भूमा तत् सुखम्"** (छान्दो.उप.७।२३।१) **"अन्योऽन्तर आत्मा आनन्दमयः"** (तैत्ति.उप.२।५) इत्यादिषु ब्रह्मणः

आनन्दरूपत्वेन तिरोहितानन्दाद् जीवाद् भेदव्यपदेशः. अतएव “**रसं ह्येव अयं लब्ध्वा आनन्दी भवति**” (तैत्ति.उप.२।७) इति कर्मकर्तृव्यपदेशः. एवं भेदव्यपदेशाद् ब्रह्म अधिकं समुद्रवद् अंशि. जीवस्तु तरंगवद् अंशः. अतएव आत्मत्वश्रुतावपि अहम् इति सर्वकारणस्य अंशिनः पृथग् निर्देशः. अनेन “जीवेन आत्मना” इति भिन्नतया इदमा परामृश्यमानस्य जीवरूपस्य अंशस्य सः. एवञ्च यस्मिन् काले हिताकरणं तदा ऐच्छिकभेदस्यापि सत्त्वाद् न अंशिनि उक्तदोषप्रसक्तिः इति भावः पूर्णत्वाच्च इति. “**पूर्णमदः...**” (ईशा.उप.शां.पा) इति श्रुतेः इति भावः. **नखनिकृन्तन** इत्यादि, “**यथा सतः पुरुषात् केशलोमानि**” (मुण्ड.उप.१।१।७) इति अंशांशिभावेऽपि केशप्रसाधको न हिताकरणादिना दूष्यते **सर्वेन्द्रिय** इति. करचरणादीनां स्वांशत्वेऽपि गमनादानादिपरिश्रमेषु तत्तद् नियोजन् उक्तदोषास्पदं भवति. तथा परमात्मापि न आत्महादिवद् निन्द्यः तदपि न सम्भवति इत्यादि. अत्र मानं “**सूर्यो यथा सर्वलोकस्य चक्षुः**” (कठोप.२।११) “**प्रकाशादिवद् न एवं परः**” (ब्र.सू.२।३।४६) इति श्रुतिसूत्रादिरूपं युक्तिश्च प्रागेव अदर्शि. कार्यकारणयोः असाधारणधर्माः तत्तन्मात्रनिष्ठा इत्यादिवैश्वानराद्यधिकरणेषु स्फुटम् इति अलम्.

(१) [कर्मणाञ्च स्वाव्यवहितोत्तरक्षणएव फलानुकूलेश्वरेच्छा-जनकत्वाभावेन उद्‌बुद्धानामेव तथात्वं वाच्यम्. तदुद्बोधार्थञ्च कालविशेषो अपेक्षितः. अतएव “कालः कलयताम् अहम्” (भग.गीता १०।३०) इति भगवदुक्तं कालस्य कलयितृत्वं सङ्गच्छते. यद्यपिच अनेन सामान्येनैव कालस्य हेतुत्वम् उक्तं तथापि अतिप्रसङ्गवारणाय विशिष्य हेतुता कल्पनीया सापि कर्मोद्बोधद्वारैव. कर्मणाम् उद्बोधकापेक्षायां तस्याः क्लृप्तहेतुताकेन कालेनैव उपशान्तौ कारणान्तरकल्पनस्य अयोगात्. इयञ्च कालतः कर्मणाम् उद्भवस्य प्रक्रिया अदृष्टकल्पनावादिरीत्या मूले प्रोक्ताः. स्वमतेतु ईश्वरतोषादेः फलोपधायकत्वलक्षणम् औत्कट्यं

कालेन क्रियते इति बोध्यम्. यद्वा 'कर्म'शब्देन तज्जन्येश्वरतोषादिकमेव लक्षणया गृह्यते, उद्बोधश्च तादृशम् औत्कट्यम्.

वस्तुतस्तु कालस्य विशिष्य हेतुत्वकल्पने तादृशसहकार्यभावादेव कालान्तरे फलानतिप्रसक्तौ कर्मणां न उद्बोधकापेक्षा. एवञ्च कालस्यापि सहकारित्वात् सुतरां त्वन्मते स्वतन्त्रता स्यात्. नच कालः ईश्वराद् अभिन्नएव, अतएव "सदेव सोम्य इदम् अग्रे आसीद्" (छान्दो.उप.६।२।१) इति श्रुतिः सङ्गच्छते. अन्यथा अवधारणं न सङ्गच्छेत कालस्य तदानीं सत्त्वाद्, अन्यथा 'अग्रे'पदासङ्गतेः. तथाच कालसत्त्वेऽपि न अस्मदभिमतस्वतन्त्रताहानिः इति वाच्यम्, आत्माश्रयप्रसङ्गात् सर्वस्य ईश्वरभिन्नत्वेन कर्मणां हेतुत्वनिराकरणप्रयासनैष्फल्यापत्तेः च. "कालो अस्मि लोकक्षयकृद्" (भग.गीता ११।३२) इत्यत्रतु 'काल'शब्देन यमो दानधर्मप्रथमाध्यायोक्तः तत्सहचारी वा कश्चिद् विवक्षितो नतु क्षणादिरूपः, 'लोकक्षयकृद्'इति विशेषितत्वात्, सर्वात्मकस्य तस्य यमाद्यात्मकतायाः अविरोधात् च. एवं "कालरूपो अवतीर्णः" (भाग.पुरा.१।१३।४८) इत्यत्रापि बोध्यम्, एतत्समानार्थत्वलाभात्. "कालः कलयताम्" (भग.गीता १०।३०) इतितु विभूतिवर्णनम्. अतो मनआदिष्विव तत्रापि परमात्मदृष्टिमात्रविधितात्पर्यकम्. नच एवं कालादेः अतिरिक्तत्वे "सदेव..." (छान्दो.उप.६।२।१) इति अवधारणविरोधः इति वाच्यं, कल्पितस्य अधिष्ठानानतिरिक्ततया अवधारणाविरोधात्.]

(२) **अग्रेच** कर्मणाञ्च स्वाव्यवहितोत्तरक्षणएव फलानुकूले-

श्वरेच्छाजनकत्वाभावेन उद्बुद्धानामेव तथात्वं वाच्यम् **इत्यादिकः स्वमतदर्शनार्थं भाष्याद्यनुक्तः स्वकपोलकल्पितः प्रलापः सोऽपि असङ्गतः. तत्र एवं प्रक्रिया तेन दर्शिता : जीवकर्मणां फलानुकूलेश्वरेच्छां प्रति हेतुत्वं, तैः ईश्वरेच्छायाः जनने उद्बुद्धत्वरूपधर्मस्य हेतुत्वं, तत्रच उद्बोधकस्य कालस्य. तत्र सः प्रष्टव्यः तत्तत्कर्मफलं प्रति एकैव ईश्वरेच्छा हेतुः भिन्नाः वा? न आद्यः युगपत्सर्वकर्मफलोपभोगासम्भवात्. तत्स्वीकारे च भाविनां मनूनाम् इन्द्रादीनां सृष्ट्यादावेव उत्पत्तिः स्याद् इच्छारूपकारणसत्त्वात्. द्वितीयेतु तत्तत्फलभेदेन अनन्तेच्छाकल्पने गौरवम्. तत्तदिच्छापि युगपत् कुतो न उत्पद्यते इति आक्षेपे तत्तत्कर्मोद्बोधस्य तत्रापि कालस्य हेतुत्वकल्पने कालस्य एकत्वात् पुनरपि आक्षेपानुद्धारः. कालस्य अनेकत्वे तेषां नित्यत्वे पुनः दोषापत्त्याः अनित्यत्वे तस्य उत्पादकनियामकाकांक्षायां पुनः दोषापत्त्याः स्वभावविशेषकस्य नियामकत्वाङ्गीकारे इच्छां प्रत्येव ईश्वरस्वभावस्य हेतुत्वेन श्रुतिसिद्धेन उपपत्तौ किम् अनया स्वकपोलकल्पितया कुसृष्ट्या. किञ्च कर्मणां क्षणिकत्वेन अदृष्टस्य च त्वया अस्वीकृतत्वेन कस्य उद्बोधः कालेन क्रियते इति वक्तव्यम्. नच अदृष्टकल्पनावादिमतेन इदम्, अतएव** इयञ्च कालतः कर्मणाम् उद्भवस्य प्रक्रिया अदृष्टकल्पनावादिरीत्या मूले प्रोक्ताः **इति उक्तम् इति वाच्यं; तन्मतेऽपि अदृष्टस्य कुत्र कल्पना? जीवस्य पारमार्थिके स्वरूपे व्यावहारिके वा? न आद्यः, पारमार्थिकस्वरूपस्य शुद्धब्रह्मरूपत्वेन तत्र अदृष्टस्वीकारे निर्धर्मकत्वहानिः. नापि द्वितीयः, सृष्टेः पूर्वं व्यावहारिकस्वरूपस्य अभावात् तत्स्वीकारे “सदेव सोम्य इदम् अग्रे आसीद्” (छान्दो.उप.६।२।१) इत्यादिश्रुतिविरोधः. भवन्मते सजातीय-विजातीय-स्वगतभेदशून्यत्वस्यैव तादृश-**

श्रुत्या प्रतिपादितत्वात्. किञ्च अन्तःकरणावच्छिन्नस्य तत्प्रतिबिम्बतस्य वा व्यावहारिकजीवस्य प्रलये अविद्यायां लयस्वीकारेण तादृशः स्वसिद्धान्तविरोधः. ननु अविद्यायाः आविद्यकस्य जीवस्य च सत्त्वेऽपि न “सदेव...” इत्यादिश्रुतिविरोधः कल्पितस्य अधिष्ठानसत्तातिरिक्तसत्तायाः अस्वीकारात्. यथा शुक्तौ रजतभ्रमदशायाम् अनिर्वचनीयस्य कल्पितरजतस्य सत्त्वेऽपि “शुक्तिरेव इदम्” इति कथनं न विरुध्यते तथा प्रकृतेऽपि इति चेद्, न; एवं सति तादृशश्रुतौ “अग्रे...” इति कथनं निरर्थकताम् आपद्येत. सृष्टिदशायामपि सर्वस्य त्वन्मते कल्पिततया तस्य अधिष्ठानसत्तातिरिक्तसत्तायाः अभावेन अनुपपत्त्यभावात्. यदपि स्वमते तु ईश्वरतोषादेः फलोपधायकत्वलक्षणम् औत्कट्यं कालेन क्रियते इति उक्तं तद् मन्दम्. एतादृशमतस्य शंकराचार्यप्रणीतोपनिषत्-सूत्र-गीतादिभाष्येषु अनिरूपितत्वात्. किञ्च अत्र ‘ईश्वर’पदेन शुद्धं ब्रह्म विवक्षितं पारिभाषिकं मायावच्छिन्नं तत्प्रतिबिम्बतं वा विवक्षितम्? न प्रथमः, तस्मिन् तोष-रोषाद्यङ्गीकारस्य शुद्धत्वव्याघातकत्वात्. प्रलये मायायाअपि ब्रह्मणि लयस्य अङ्गीकृतत्वेन तद्वृत्तिरूपतोषरोषादेरपि अभावेन कस्य औत्कट्यं कालेन क्रियते इति वक्तव्यम्. अपिच कर्मभिः ईश्वरतोषः कालेन तत्र औत्कट्यं, तत्रापि प्रलयपूर्वकालोत्पन्नेच्छायाः व्यवहितायाः हेतुत्वम् इति त्वन्मते कर्मणामेव निरपेक्षाणां व्यवहितानां सूक्ष्मरूपेण स्थितानां वा फलजनकत्वम् इति मीमांसकमतापेक्षया किं लाघवं प्रत्युत गौरवमेव. नच लाघवाभावेऽपि जडस्य चेतनं विना कार्यकरणत्वाभावात् तथा कल्प्यते इति वाच्यं, निर्झरप्रस्रुतस्य जडस्य जलस्य धान्यवृक्षाद्याप्यायनरूपकार्यजनकत्वस्य दृष्टत्वेन तादृशकल्पनायाः अप्रामाणिकत्वात्. एतेन यद्वा ‘कर्म’शब्देन तज्जन्येश्वरतोषादिकमेव

लक्षणया गृह्यते इत्याद्यपि प्रत्युक्तं, पूर्वोक्तरीत्या अनुपपत्तेः अभावेन लक्षणायां मानाभावात्, तादृशतोषादेरपि असम्भवात् च.

वस्तुतस्तु पूर्वापरविरुद्धत्वाद् इदं प्रकरणम् अपार्थकमेव तथापि "यक्षानुरूपो बलिः" इति न्यायेन किञ्चिद् उच्यते. वस्तुतस्तु इत्यादिना कालस्य विशिष्य हेतुत्वकल्पने तादृशसहकार्यभावादेव कालान्तरे फलानतिप्रसक्तौ कर्मणां न उद्बोधकापेक्षा इति उक्तं तत्र कालस्य विशिष्य हेतुत्वं तत्तदुपाध्यवच्छिन्नस्यैव वक्तव्यम्. कालस्य एकत्वाद् उपाधीनाञ्च रविपरिस्पन्दादीनां पूर्वम् अभावाद् विशिष्य हेतुत्वमेव न सम्भवति. कथञ्चिद् विशिष्य हेतुत्वसम्भवेऽपि तेनैव सकलकार्यसम्भवे किम् उक्तप्रक्रियया? अस्मन्मते च कालस्य ईश्वरभिन्नत्वेन प्रागुक्तदोषः नापि कालसहकारित्वेन पारतन्त्र्यं, मानाभावात्. किञ्च अव्याहतेच्छावत्त्वं स्वातन्त्र्यं, व्याहतिश्च इच्छाविषयसिद्धेः अभावः. सच ईश्वरस्य न अस्ति, इच्छानुरूपेण सकलपदार्थसिद्धिसत्त्वात्. अतएव लोके स्वच्छन्दचारी 'स्वतन्त्रः' इति उच्यते. एतेन स्वनिर्मितविचारादेः अपेक्षायामपि सापेक्षत्वं स्याद् इति प्रलपितम् अपास्तम्, एवञ्च इत्याद्यपि. यच्च सर्वस्य ईश्वराभिन्नत्वे कर्मणां हेतुत्वनिराकरणप्रयासवैफल्यापत्तिः इति उक्तं तदपि स्वमतम् अनवलोक्यैव. तवापि अद्वैतवादित्वेन सर्वस्य ब्रह्माभिन्नतया अदृष्टादिनिराकरणप्रयासो विफलएव. किञ्च त्वन्मते सर्वस्य मिथ्यात्वेन परमतस्वमतयोरपि मिथ्यात्वात् तत्त्वेन ज्ञानवतः तव तत्खण्डन-मण्डनप्रयासोऽपि लोके हास्यकरएव. "कालो अस्मि लोकक्षयकृत्प्रवृद्धः" (भग.गीता ११।३२) इत्यत्र स्वस्यैव महाभारतयुद्धव्याजेन लोकनाशकत्वेन "कालः कलयताम्

अहम्’’ (भग.गीता १०।३०) इत्यादिना क्षणादिरूपत्वस्यापि स्वस्मिन् उक्तत्वेन साक्षाद्वाच्यार्थस्यैव सम्भवे गौणार्थकल्पनायाः अन्याय्यत्वात्. किञ्च सर्वात्मकत्वेन यमाद्यात्मकत्वं तव सम्मतं चेत्, सर्वात्मक्षणाद्यात्मकत्वस्यापि सम्भवात् तत्र कथं तव द्वेषः? एतेन कालकत्वेनैव ‘‘कालरूपो अवतीर्णः’’ (भाग.पुरा.१।१३।४८) इत्याद्यपि व्याख्यातम्. कल्पितस्य अधिष्ठानानतिरिक्तत्वेन अविरोधस्तु पूर्वमेव दूषितः.

(३) सहस्राक्षे कर्मणाञ्च स्वाव्यवहितोत्तरक्षण इत्यादिम् अवधारणाविरोधाद् इत्यन्तं भागं निरस्यन्ति. **अग्रेच कर्मणाञ्च** इत्यादिना **पूर्वमेव दूषित** इत्यन्तेन **उद्बोधकस्य कालस्य** इति, अत्रापि हेतुत्वम् इति सम्बध्यते. तत्रापि **कालस्य** इति, इच्छासु हेतुः तत्तत्कर्मोद्बोधः, कर्मोद्बोधे च हेतुः कालः इति कल्पने इति अर्थः. **तेषाम्** इति कालभेदानां, **तस्य** इति अनित्यानेकस्वरूपस्य कालस्य. कालभेदानां सर्वेषां प्रत्येकम् उत्पादकं किञ्चिद् वक्तव्यं तस्यापि नित्यत्वम् अनित्यत्वं वा इत्यादि विकल्पैः अनिस्तारः इति भावः. **एवं सति तादृशश्रुतौ ‘अग्रे’इति** शून्यत्वस्य इति. एवकारैकाद्वितीयपदैः इति भावः. अत्र व्यावहारिकं जीवस्वरूपं कल्पितं चेत्, तत्कल्पकः पारमार्थिकः किमुत व्यावहारिकः? न आद्यः, अविद्यारहितस्य शुद्धस्य कल्पकत्वस्य असम्भवात्. भ्रान्तत्वे शुद्धत्वव्याघातापातात्. न द्वितीयः आत्माश्रयापत्तेः. नहि शुक्तौ कल्प्यमानं रजतमेव शुक्तौ आत्मानं कल्पयति. किञ्च शुद्धस्यापि अविद्यामूलको जीवभावः साच जीवेन कल्पिता नतु विशुद्धचैतन्येन अभ्रान्तत्वाद् इति अन्योन्याश्रयः. तस्य अकल्पितत्वे **सदेव** इत्यादिव्याकोपः इत्यादिदूषणानि अग्रेऽपि अस्माभिः वक्ष्यमाणानि अनुसन्धेयानि **गीतादिभाष्ये** इति. **‘आदि’**पदं विष्णुनामसङ्ग्राहकं तद्भाष्यस्यापि तैः कृतत्वात्. **किञ्च अत्र ‘ईश्वर’पदेन** इत्यादिना कृते विकल्पे प्रथमपक्षे दोषम् उक्त्वा द्वितीयेऽपि तम् आहुः **प्रलये मायायाः** इत्यादिना. तथाच मायालये तदवच्छिन्नः तत्र प्रतिबिम्बितो वा न अवतिष्ठेत, घट-दर्पणयोः लये

घटाकाशदर्पणस्थप्रतिबिम्बाविव. अतः कुतस्तरां मायावृत्तिरूपौ रोष-तोषौ. **त्वन्मते** इति, इदं **किं लाघवं प्रत्युत गौरवम्** इति अग्रिमेण अन्वेति. **कर्मणामेव** इत्यादिस्तु मीमांसकमतानुवादः, तन्मतेच प्रवाहनित्यतास्वीकारात्. तदेकदेशिभिः सहस्रार्जुनोपरुद्धपुनःप्रवृत्तसोमोद्भवा[१]प्रवाहन्यायेन सृष्टिप्रलययोरपि ऊरीकाराद्. **लक्षणायां** इति 'कर्म'पदेन रोष-तोषयोः लक्षणायाम्, **तादृशतोषादेः** इति कर्मजन्यतायाः वृत्तिरूपरोषतोषादेः परस्मिन् असम्भवाद् न प्रागुक्तदोषः इति. नहि करचरणादिना गमनादानाद्यनुतिष्ठतः तत्पारतन्त्र्यस्य स्वीकारे किञ्चिन् मानम् अस्ति इति भावः एतद् इह सन्दर्भे ज्ञातव्यम् : यत्तु कर्मणाञ्च इत्यादि कल्पनस्य अयोगाद् इत्यन्तं तत्तु प्रागेव निरस्तं पुनरधिकं निरस्यामः. तत्र कर्मणाम् उत्तरक्षणएव इच्छाऽजनकत्वे कारणं मृग्यं कर्मज्ञानोत्तरं राजादेः फलदित्सायां विलम्बादर्शनाद्, ईश्वरस्य सर्वज्ञानत्वात् च. नच उद्बोधककालविशेषाभावः तद् इति वाच्यं, विशेषस्वरूपस्य दुःशकनिरुक्तिकत्वात्, कालत्वेन कारणत्वे सर्वदा उद्बोधप्रसङ्गात् च. नापि उद्बुद्धानामेव इति अवधारणं सङ्गच्छते. प्रलयपूर्वक्षणे अनुद्बुद्धानां तज्जनकत्वोक्तिव्याघातात्. नच सुखदुःखलक्षणफलेच्छां प्रत्येव उद्बुद्धानां हेतुत्वम् अवधार्यते नतु इच्छान्तरं प्रति इति वाच्यं, व्यवस्थापकश्रुत्याद्यनुपलम्भात्, श्रुतिसिद्धनित्येच्छावादे सर्वोपपत्त्याः अन्यथानुपपत्त्यभावात् च. किञ्च तथासति "**बहु स्याम्**" (तैत्ति.उप.२।६) "**लोकान्नुसृजाः**" (ऐत.उप.१।१।१) इत्यादिरूपां सर्गेच्छां प्रति अनुद्बुद्धानामपि हेतुत्वसिद्ध्या उद्बुद्धाद् जनकर्मणः इच्छोद्भवः इति स्वोक्तिविरोधः, सदा सर्गसम्भवेन प्रलयोच्छेदः च. अथ सर्गेच्छायाअपि परम्परया फलानुकूलत्वाद् उद्बुद्धमात्रजन्यत्वम् इति चेद्, इयता कालेन कर्माणि उद्बोधयिष्यामि इति इच्छायाअपि तथात्वाद् अनुद्बुद्धैः जननम् असम्भवि. कश्च अयं कर्मसु कालविशेषेण उत्पाद्यो धर्मः 'उद्बुद्धत्वम्' इति उच्यते, यः इच्छाजनकतावच्छेदकः न तावत्फलजनकत्वम्. इच्छासमवधानं विना फलाजनकत्वेन तज्जननं विना इच्छाऽजनकत्वेन च अन्योन्याश्रयात्. नापि फलजननयोग्यत्वं फलसाधनभावबोधकविधिप्रतिषेधवाक्यानुरोधेन योग्यतायाः औत्पत्तिकत्वात्. अयोग्यस्य साधनत्वाभिलाषायोगाद्, नापि

---

[१] "सोमोद्भवा" = नर्मदा नदी (सम्पा.)

इच्छाजनकत्वम् आत्माश्रयात्, नापि तज्जननयोग्यत्वम् इच्छानियतपूर्ववृत्तिकफलजननयोग्येषु इच्छाजननयोग्यतायापि सार्वदिकत्वाद्, नापि अन्यत् प्रमाणाभावाद्, नापि कालविशेषः ईश्वरेच्छाप्रयत्नासमवहितः स्वयमेव कर्माणि उद्बोधयितुम् इष्टे जडत्वात्. जडस्य च चेतनमन्तरा हेतुत्वायोगाद् ईशः कल्प्यते इति त्वयैव कथनात्. "**कालः कलयताम्**" (भग.गीता १०।३०) इति भगवद्वाक्येतु कलनम् आयुर्गणनं नतु उद्बोधनं गीताभाष्ये "**कलयतां कलनं गणनं कुर्वताम्**" (भग.गीता शां.भा.१०।३०) इति शङ्कराचार्यैः विवरणात्. युक्तञ्च एतत् "'**कल:' संख्याने**" (पाणि.धातु ३४१५) इति भीमसेनोक्तेः. कालस्य कलयितृत्वमपि भगवदिच्छया इति अन्यत्र विस्तरः. तस्माद् न इदम् उद्बोधकत्वे मानम्. एतेनैव सापि कर्मोद्बोधद्वारैव इत्यपि निराकृतम् अवधारणे मानाभावात्. यदि जडोऽपि ईश्वरनिरपेक्षः उद्बोधयेत् तर्हि सर्गादिकमपि स्वयमेव कुर्याद् इति स्वभाववादापातः 'संन्यासिकुचमर्दन'न्यायात्. योहि संन्यासी भूत्वापि कामबुद्धिः स्त्रीकुचौ मर्दयेत् सो अगम्याशतमपि गच्छेत्. विशिष्य हेतुता इति प्रयोगः चिन्त्यः हेतुतायाः अक्रियात्वेन समानकर्तृकत्वालाभात् "**समानकर्तृकयोः पूर्वकाले**" (पाणि.सू.३।४।२१) इति अनुशिष्टस्य क्त्वो असम्भवात्. कल्पनीयः इत्यनेन समानकर्तृकत्वविवक्षणेतु विशेष्ये इति "**णिजन्तात्**" (द्र.पाणि.सू.१।३।७४) "**क्त्वो,ल्यप्**" (पाणि.सू.७।१।३७) प्रयोक्तव्यः. कश्च सः विशेषणरूपो धर्मः येन कालान्तरं व्यावर्त्य कालविशेषो वक्तुं शक्येत. सामान्यधर्मवत्त्वे सति तद्व्याप्यावान्तरधर्मवत्त्वंहि विशेषत्वम्. नहि प्रलये सूर्यगत्यादिकम् अस्ति "**सूर्याचन्द्रमसौ धाता यथा पूर्वम् अकल्पयद्**" (महाना.उप.५।७) इति श्रुतेः येन प्रातः सङ्गवत्त्वादयो वसन्तत्वादयो वा कालत्वव्याप्यधर्माः सिद्ध्येयुः. किञ्च उद्बोधगतावच्छेदकविशेषत्वनिर्वाहकधर्मो जन्यो न वा. द्वितीये तस्य सर्वकालवृत्तितया अतिप्रसङ्गतादवस्थ्यम्. आद्ये इच्छाविशिष्टेश्वरजन्यो न वा? प्रथमः चेद्, इच्छायां सर्वनिदानत्वम् अजन्यतया नित्यत्वं च सिद्धम्. न द्वितीयः, कारणान्तरस्य अप्रसिद्धेः. तस्यापि नित्यत्वे सर्वदा सर्वं कार्यं स्याद् इति अतिप्रसंगः तदवस्थः. अनवस्थत्वे अनवस्थः इत्यादि प्रागेव अवादि. एतेन कालेन उद्बोधकाकांक्षोपशमः प्रत्युक्तः.

यत्तु इयञ्च इत्यादि उद्बोधकापेक्षा इत्यन्तं तदपि अमञ्जुलम्. सेश्वरादृष्टवादिभिः केवलकालस्य हेतुत्वे कार्ययौगपद्यापाताद् ईश्वरेच्छा नित्यैव सर्वहेतुः स्वीक्रियते कालादेः च तत्सहकारित्वम् उच्यते. निरीश्वरैः तैस्तु अदृष्टादिमात्रेण सर्वं साध्यते. अतः त्वदुक्तप्रक्रिया उभयविधादृष्टवादिविसम्मतैव. यच्च स्वमते राजादिवद् रोषतोषौत्कठ्यम् अभिहितं तदपि "**न तस्य कश्चिद् दयितः प्रतीपो न ज्ञातिबन्धुः न परो नच स्वः समस्य सर्वत्र निरञ्जनस्य सुखे न रागः कुतएव रोषः**" (भाग.पुरा.६।१७।२२) इत्यादि श्रीभागवतादिवचोविरोधाद् उपेक्ष्यम्. फलोपधायकत्वञ्च नियमेन फलजनकत्वं तज्जननयोग्यत्वं वा उभयमपि दूषितचरम्. किञ्च तोषः इतरस्य सुखोत्पिपादयिषा, रोषश्च दुःखोत्पिपादयिषा इति बहवः. तथाच सति इच्छाविशेषयोः रोष-तोषयोः 'कर्म'पदलक्षितयोः इच्छोद्भावकत्वकथनम् असङ्गतं, तयोरेव फलदित्सारूपत्वात्. किञ्च अस्मिन् कालएव एतत्कर्मजन्यस्य रोषस्य तोषस्य वा औत्कट्यं भवतु इत्यत्रापि ईश्वरेच्छातिरिक्तं किं नियामकम् ? कालविशेषः स्वभावएव तद् इति चेत्, स्वभावात् सः स्वयमेव फलानि दद्यात् सृष्टिकाले इत्यादिव्यपदेशात् सर्गादिकमपि स्वयमेव कुर्यात् कर्माणि वा सर्वं कुर्युः. अतः कृतं प्राकृतवद् रोषतोष-वत्त्वेऽपि अशक्यफलदानेन कालकर्माधीनेन ईश्वरेण. तद्बोधकश्रुतयस्तु अनुष्ठातुः जीवस्य जगत्कर्तृत्वादिधर्मैः तावकतया उपपद्येरन्. अर्थवादानां विधितत्सम्बन्ध्यन्यतरस्तुत्यर्थतया विध्येकवाक्यतायाः प्रथमस्य द्वितीयपादे सिद्धेः. ईश्वरं प्रकल्प्य तद्भयप्रदर्शनेन कर्मणि प्रवर्तकतया वा विधिशेषाः स्युः. यथा आह भट्टः "**इति आह नास्तिक्यनिराकरिष्णुः आत्मास्तितां भाष्यकृद् अत्र युक्त्या दृढत्वम् एतद्विषयप्रबोधः प्रयाति वेदान्तनिषेवणेन**" (जै.मी.सू.श्लो.वा.१।१।५) इति. अथ जडस्य चेतनाधीनव्यापारकत्वम् आश्रित्य ईश्वरेच्छायाएव नियामकत्वम् उच्येत तर्हि सिद्धम् ईश्वरेच्छायां कालाद्यजन्यत्वं सर्वनिदानत्वं च. अन्यथा प्रलयोत्तरं स्थितरोषतोषयोः अत्यन्तान्तरायेण औत्कठ्यं सृष्टिकाले च स्वल्पान्तरायेण तद् इत्यपि निर्हेतुकम् असमञ्जसं स्यात्. तथा अनन्तजीवेषु समकालं सुख-दुःखयोः दर्शनात् तद्धेतुभूतोत्कटानुत्कटानन्ततोषादीनां युगपदैकाधिकरण्यं लोकविरुद्धमपि अङ्गीकार्यम्. एवं प्रलयसन्निहितकर्मजनिततोषादिरूप-

नानेच्छानां सकलप्रलयकालस्थायित्वे सार्गकालिकीनामपि तासां फलपर्यन्तचिरस्थायित्वे च त्रिक्षणावस्थायित्वभङ्गाद् जीवेच्छातः वैलक्षण्यानपायः. तस्मात् सकलश्रुतिसम्मतम् अगुरुभूतं नित्येच्छायाः हेतुत्वकथनमेव कमनीयम्.

वस्तुतस्तु इत्यादिनातु परित्यक्तपूर्वोऽपि अदृष्टवादः पुनरुपात्तः. शङ्कराचार्यैः कर्मणां त्रिक्षणावस्थायित्वस्य अङ्गीकारेण अदृष्टमन्तरा कालान्तरकरणीयोद्बोधानुपपत्तेः. फलानतिप्रसक्तये कल्प्यमानः सहकारिकालनिष्ठधर्मस्तु नित्यो जन्यो वा इत्यादिविकल्पासह इति दर्शितं प्राक्. यदिच अनतिप्रसङ्गाय नित्ये काले स्वाभाविकाः धर्मविशेषाः क्रमिकाः स्वीक्रियन्ते तर्हि तान् श्रुत्युक्तायाम् इच्छायामेव स्वीकुरु. ततश्च न कार्ययौगपद्याद्यतिप्रसङ्गः. तत्तज्जीवे तत्तत्फलेच्छायाः वस्तुतः न कर्मजन्यत्वम् ‘‘**एषः उ एव साधु कर्म कारयति तं यम् एभ्यो लोकेभ्यः उन्निनीषते**’’ (कौषी.उप.३।९) इति श्रुतौ कर्मणामेव तादृशेच्छाजन्यत्वश्रवणात् ततएव इच्छायाः कर्मतः पूर्ववृत्तित्वनिश्चयात् श्रुतिषुच इतरकारणवादवारणपुरःसरं परमेश्वरस्यैव अभिन्नेच्छाशक्तेः अभिन्ननिमित्तोपादानत्वं समर्थ्यते. यथा श्वेताश्वतरे ‘‘**ब्रह्मवादिनो वदन्ति किं कारणम्**’’ (श्वेता.उप.१।१) इत्यादिना सर्वोत्पत्त्यादिकारणप्रश्नम् उक्त्वा ‘‘**कालः स्वभावो नियतिः यदृच्छा**’’ (श्वेता.उप.१।२) इति ऋचा कालकर्मादीनां निदानत्वं निराकृत्य ‘‘**ते ध्यानयोगानुगताः अपश्यन्**’’ (श्वेता.उप.१।३) इत्यादिना ईश्वरस्यैव स्वात्मकस्वाभाविकशक्तेः निखिलनिदानत्वम् उपपादि. एवं श्रीभागवतेऽपि ‘‘**कालं कर्म स्वभावं च मायेशो मायया स्वया आत्मन् यदृच्छया प्राप्तं विबुभूषुः उपाददे** (भाग.पुरा.२।५।२१) इति वैविध्येन भवनेच्छायाएव सर्वमूलत्वम् उदितम्. श्रुत्यनुसार्येतदर्थविस्तरस्तु तत्त्वदीपसर्वार्थनिर्णयावरणभङ्गसुबोधिनीतत्प्रकाशेभ्यो अवगन्तव्यः. तथाच एषः प्रक्रियासंक्षेपः : भगवान् ‘‘**बहु स्याम्**’’ इति इच्छाकाररूपेण तादृशः इच्छारूपेण वा भवन् स्वस्मिन् तिरोभावितानां नित्यसर्ववस्तूनां क्रमेण अभिव्यञ्जनाय स्वात्मकं चेष्टारूपत्वात् क्रियाशक्तिप्रधानम् ईषत्प्रकटसदंशमात्रं नित्यगतिं लोकव्यवहारोपयोगि कालं प्रथमम् आविष्करोति. तदवयवांश्च घटीमुहूर्तादीन् क्रमिकान् नियमयति. तैत्तिरीयाणां नारायणप्रपाठके ‘‘**सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि कला**

मुहूर्ताः काष्ठाः च अहोरात्राः च सर्वशः अर्धमासाः मासाः ऋतवः संवत्सरः च कल्पन्ताम्'' (महाना.उप.१।८-९) इति श्रवणात्. अष्टमस्कन्धपञ्चमाध्याये ''**भ्रुवोः यमः पक्ष्मभवस्तु कालः प्रसीदतां नः स महाविभूतिः**'' (भाग.पुरा.८।५।४२) इति उत्पत्तिस्मरणात्. ''**द्रव्यं वयः कर्मगुणान् विशेषं यद्योगमायाविहितान् वदन्ति**'' (भाग.पुरा.८।५।४३) इति अनुपदम् उक्तेः च तस्य तिरोहिताभिव्यञ्जकत्वन्तु ''**सतः अभिव्यञ्जकः कालः**'' (भाग.पुरा.११।२४।१९) इति एकादशस्कन्धवाक्यात्. भगवद्रूपत्वं ''**कालो अस्मि**''(भग.गीता ११।३२) इति गीतावाक्यात्. चेष्टारूपत्वं ''**यो अयं कालः तस्य ते अव्यक्तबन्धो चेष्टाम् आहुः चेष्टते येन विश्वं निमेषादिः वत्सरान्तो महीयान्**'' (भाग.पुरा.१०।३।२६) इति दशमस्कन्धतृतीयाध्यायवाक्यात्. एवं नित्यगतित्वादिकमपि ''**गुणव्यतिकराकारो निर्विशेषोऽप्रतिष्ठितः**'' (भाग.पुरा.३।१०।११) इत्यादि श्रीभागवतप्रभृतिवचःप्रचयसिद्धं निबन्धात् सुबोधिनीतः च बोद्धव्यम्. अप्रतिष्ठितो नित्यगमनः क्रमिकेषु तत्तत्कालावयवेषु च यथेच्छं नानाकार्याणि क्रमेण कर्तव्यतया परिच्छिनत्ति ईश्वरेण परिच्छिन्नं ''**कालेन अव्यक्तमूर्तिना**'' (भाग.पुरा.३।१०।१२) इति श्रीभागवतोक्तेः. अयमेव आलोचनयत्नः श्रुतिषु '**तपः**'शब्देन सूत्रेच '**कृतप्रयत्न**'शब्देन उच्यते.

अतः स्वेच्छया तत्तत्कालएव तत्तत्कार्यं करोति इति न सर्वकार्ययौगपद्यम्. तथा ''**पुरुषएव इदं सर्वं यद् भूतं यच्च भव्यं**''(तैत्ति.आर.३।१३।२), ''**तदेव भूतं तदु भव्यमा इदम्**'' (महाना.उप.१।२) इत्यादिश्रुतिषु ब्रह्मात्मकत्वाद् नित्यानामपि प्रापञ्चिकवस्तूनां न अर्थत्वेन योगिनो भावित्व-भूतत्वादिव्यवहाराः तत्कृताभिव्यक्तिनिबन्धनाएव लोकज्ञापनार्थं च सूर्यगत्यादिना तं परिच्छिनत्ति. ततश्च 'चिरं''क्षिप्रम्' इत्यादिव्यवहाराः एवं ''**सर्गः प्रवर्तते तावत् पौर्वापर्येण नित्यशः, महान् गुणविसर्गार्थः स्थित्यन्तो यावद् ईक्षणम्**'' (भाग.पुरा.११।२४।२०) इति एकादशस्कन्धचतुर्विंशाध्यायवाक्यात्. यथापर्यालोचनम् आप्रलयम् अखिलं विधाय इच्छया प्रलयं कुर्वन् स्वकालशक्तिरंहसा सर्वम् अक्षराख्यस्वरूपे तिरोभाव्य अन्ते व्यवहारगोचरं

कालमपि तिरोभावयति. “**व्यक्ते अव्यक्तं कालवेगेन याते भवान् एकः शिष्यते अशेषसंज्ञः**”(भाग.पुरा.१०।३।२५) इत्यादिवचनेभ्यः कालस्यापि उत्पत्तिश्रवणाच्च. द्वितीयस्कन्धे “**न यत्र कालो निमिषां परः प्रभुः**” (भाग.पुरा.२।२।१७) इति अक्षरावस्थायां तदभावबोधनाच्च. नच आधुनिकदृष्ट्या कालोत्पत्तिम् असम्भाव्य तदुत्पत्तिश्रुतिः उपचारेण अन्यथा नेया तस्य स्वातन्त्र्येण नित्यत्वे “**सदेव...**” इत्यादिविरोधाद्, एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाबाधात् च. लौकिकदृष्टेः प्रबलत्वाश्रयणेतु आकाशोत्पत्तिश्रुतिरपि असम्भवात् तथैव अन्यथा नीयेत. सूत्रकारस्तु अविरोधतृतीयपादे “**गौण्यसम्भवाद्**” (ब्र.सू.२।३।३) इत्यादिना तत्र उपचारम् आशङ्क्य “**प्रतिज्ञाहानिः अव्यतिरेकाद्...**” (ब्र.सू.२।३।६) इत्यादिना उक्तहेतुतएव समाधत्ते. तस्मात् सृष्टीच्छातः पूर्वम् आकाशादेरिव कालस्य अभावात् तदुक्तप्रक्रियाबाधितैव. नच कालाभावे इच्छातः पूर्वम् इति उक्तिरेव व्याहता इति वाच्यम्, आधुनिकदृष्टिम् अनुरुद्ध्य बोधनार्थमेव तथा उक्तेः. एतेन यदा सिसृक्षति तदा सृजति इत्यादियुक्तयोऽपि व्याख्याताः. अलौकिककालाश्रयाद् वा तथा उक्तयः उपपद्येरन्. व्याघातस्तु सृष्टीच्छातः पूर्वं कालो अस्ति इति उक्तावपि तुल्यः एतत्कालाश्रयकालान्तराभावात्. किञ्च इदानींत्वे ‘पूर्वकाल’-‘उत्तरकालः’ इत्यादिव्यवहारः किंहेतुकः स्यात्? घटादीनां परापरत्वेहि तत्तत्कालसम्बन्धमूलके कालावयवानान्तु तथात्वे क्रमनियामकभगवदिच्छामूलकेएव मन्तव्ये. अनङ्गीकारे संहाराव्यवहितप्राक्क्षणे इत्यादिः त्वदुक्तिरपि बाध्येत. अलौकिककालस्तु प्रलयेऽपि अस्त्येव. “**अहमेव अक्षयः कालः**” (भग.गीता१०।३३) इति भगवद्वाक्याद् अक्षयत्वावगतेः. “**कालः कलयताम्**” इति आयुर्गणनादिलोकव्यवहारोपयोगिकालम् उक्त्वा ततः पृथक्कीर्तितो अयम् अलौकिकएव. अभ्यासस्य भेदकत्वन्तु पूर्वतन्त्रे कर्मभेदाध्यायद्वितीयपादे “**एकस्य एवं पुनः श्रुतिः अविशेषाद् अनर्थकंहि स्याद्**” (जै.मी.सू.२।२।२) इति अधिकरणे मीमांसितम्. अत्र “**अहमेव...**” इति ‘एव’कारेण विभूतित्वं व्यवच्छिद्य साक्षात्स्वरूपत्वं बोध्यते. इत्थञ्च एनं कालम् आश्रित्य इयता कालेन पुनः प्रपञ्चम् आविर्भावयिष्यामि इति इच्छा प्रलयेऽपि सुवचा. एकादशे “**मया कालात्मना धात्रा**”

(भाग.पुरा.११।२४।१५) इति वाक्यात् ‘‘**तस्यैव ते वपुः इदं निजकालशक्त्या सञ्चोदितप्रकृतिधर्मणः आत्मगूढम्**’’ (भाग.पुरा.७।९।३३) इत्याद्युक्तेश्च अपरिमाणं स्वात्मनैव अचिन्त्याखिलशक्तित्वात्. अतः तादृशेच्छानुरोधादेव ‘‘**बहु स्याम्**’’ (तैत्ति.उप.२।६।१) इति तदाकाराविर्भावः. त्वन्मते नित्ये काले यथा सृष्ट्यादि-तत्तत्कार्यानुकूलाः वस्तुस्वभावसिद्धाः धर्मविशेषाः सर्वकार्यासाङ्कीर्ण्यहेतवः तथा नित्यायां भगवच्छक्तित्वाद् अचिन्त्यायाम् इच्छायामेव सम्भवन्ति इति न अनुपपत्तिः काचित्. यच्च एवञ्च कालस्य इत्यादि अवधारणाविरोधाद् इत्यन्तं तद् दुर्बलं स्वात्मकस्य स्वयम् आविष्कृतस्य स्वेच्छया सहकारितया स्थापने न अस्वतन्त्रतागन्धोऽपि. ‘‘**सदेव सोम्य इदम् अग्रे आसीद् एकमेव अद्वितीयम्**’’ (छान्दो.उप.६।२।१) इत्यादिश्रुतिषुतु पक्षद्वयम् आकरेषु प्रसिद्धम्. कालस्य सर्वतः पूर्वम् आविर्भावित्वेन सर्वान्ते तिरोभावित्वेन च वस्तुमात्रे तत्सम्बन्धम् अव्यभिचरितम् अनुभवतां जीवानां बोधनाय ‘**अग्रे**’पदात् कालोपरञ्जनेन मूलकारणं तत्र निरूप्यते. ‘‘**सर्वत्रगम् अचिन्त्यं च**’’ (भग.गीता १२।३) इत्यादौ देशोपरञ्जनवद् इति एकः पक्षः. सदतिरिक्तवस्तुसत्त्वे अवधारणं सहकारिप्रतिषेधक‘अद्वितीयं’पदञ्च व्याकुप्येत्. इदानींतनप्रतीत्यनुसरणेतु कालरहितायाइव देशरहितायाअपि सत्तायाः अप्रसिद्धेः आकाशस्यैव मुख्यदेशत्वाच्च ‘**आसीद्**’ इति पदेन सोऽपि आक्षिप्येत. ‘**सर्वत्रगम्**’ इति स्मरणात् च. तथाच सति ‘‘**न वियद् अश्रुतेः**’’ (ब्र.सू.२।३।१) इति अधिकरणबाधः. एतेन कालोत्पत्तिश्रुतौ ‘भूतः’ इति अधिकारे विहितलिट्प्रयोगात् कालाक्षेपशंकापि व्युदस्ता. कार्यमात्रस्य आकाशे जननाद् ‘‘**आकाशः सम्भूतः**’’ (तैत्ति.उप.२।१।१) इति श्रुतावपि तदाक्षेपस्य दुर्वारत्वात्. अथ सृष्ट्यनन्तरम् अन्तरिक्षस्य देशत्वं प्रागुत्पत्तेस्तु ब्रह्मस्वरूपमेव देशः इति उच्येत चेत्, सृष्ट्युत्तरमेव कालस्य कार्याश्रयत्वम्. पूर्वन्तु ब्रह्मैव कालः इति उक्तिरपि युक्तिमती. इत्थञ्च ‘अग्र’पदार्थः ‘‘**कालो भगवानेव**’’ (द्र.लिङ्ग.पुरा.१।३१।५) इति निष्क्लेशलेशोद्वितीयः(?). अयमेव नच...इत्यादिना त्वया अनूदितः. नच अत्र ‘अग्रे’शब्दार्थस्य आधारत्वं सतः आधेयत्वञ्च प्रतीयते इति तयोः एकार्थ्ये आत्माश्रयः शङ्क्यः, भगवति तस्य अदोषत्वाद्, ‘‘**महिम्नि स्वे महीयते**’’(भाग.पुरा.१।३।३४) इति वाक्याद् अन्यथा

तदनिस्तारात् च. तथाहि कालस्य अधिष्ठानं ब्रह्म उताहो ब्रह्मणो अधिष्ठानं सः ? आद्ये प्रकृतश्रुतिप्रतीताधाराधेयभावविपर्यासो ब्रह्मणः स्वातिरिक्ताधाराभावाद् आत्माश्रयश्च तदवस्थः. द्वितीयः चेत्, त्वया विधास्यमानस्य अवधारणविरोधसमाधेः बाधः. कालस्यापि स्वातन्त्र्येण अनादित्वे **"षड् अस्माकम् अनादयः"** (सि.ले.सं.१।१७) इति सिद्धान्तभङ्गः. 'काल'शब्दः शक्यतावच्छेदकरूपेण सत्त्वे पूर्वं सर्वस्य अव्याकृतत्वं बोधयतः **"'असद्' व्यपदेशाद् न इति चेद्, न धर्मान्तरेण वाक्यशेषाद्"** (ब्र.सू.२।१।१७) इति सूत्रस्य **"असद् वा इदम्"** (तैत्ति.उप.२।७।१) इत्यादितद्विषयवाक्यानाञ्च पीडाप्रसङ्गः. विद्यमानस्य तस्य दर्शनावश्यम्भावात् **"सो अनुवीक्ष्य..."**(बृह.उप.१।४।१) इति अदर्शनश्रुतिविरोधः. षडनादित्वसिद्धान्तभङ्गादिदूषणानि कर्मप्रवाहस्य अनादित्वेऽपि ध्येयानि. ईश्वरभिन्नत्वेन इत्यत्रतु ईश्वराभिन्नत्वेन इति स्यात्. सिद्धान्ते भेदस्य अनङ्गीकरणात् कर्मणां भगवदात्मकत्वं तदिच्छया तत्र तत्र कारणत्वञ्च न वयं निरस्यामः इति आक्षेपप्रयासएव व्यर्थः. **"कालो अस्मि"** इत्यत्र कालः क्षणादिरूपएव. तस्य भगवद्रूपत्वे प्रमाणबाहुल्यात्. यथा धर्मग्रन्थेषु अधिकमासदानप्रस्तावे पाद्मे **"कलाकाष्ठादिरूपेण निमेषघटिकादिना यो वञ्चयति भूतानि तस्मै कालात्मने नमः"** (पद्मपुरा.), **"यस्य हस्ते गदाचक्रम्"** (पाण्डवगीता-७६) इत्यादि तृतीयस्कन्धे षड्विंशाध्याये **"प्रकृतेः गुणसाम्यस्य निर्विशेषस्य मानवि चेष्टा यतः स भगवान् कालः इति उपलक्षितः"** (भाग.पुरा.३।२६।१७) एकादशस्य चतुर्विंशे **"प्रकृतिर्हि अस्य उपादानम् आधारः पुरुषः परः सतो अभिव्यञ्जकः कालो ब्रह्म तत् त्रितयन्तु अहम्"** (भाग.पुरा.११।२४।१९). तत्रैव **"मया कालात्मना धात्रा"** (भाग.पुरा.११।२४।१५) इति सप्तमस्कन्धाष्टमाध्याये **"स ईश्वरः कालः उरुक्रमो असौ"**, (भाग.पुरा.७।८।९) तत्रैव नवमाध्याये **"स त्वंहि नित्यविजितात्मगुणः स्वधाम्ना कालो वशीकृतविसृज्यविसर्गशक्तिः...न इच्छामि ते विलुलितान् उरुविक्रमेण कालात्मना उपनय मां निजभृत्यपार्श्वम्"** (भाग.पुरा.७।८।२२-२४). दशमस्कन्धे इन्द्रस्तवे **"पिता गुरुः त्वं जगताम् अधीशो दुरत्ययः कालः उपात्तदण्डः"** (भाग.पुरा.१०।२४।६) तृतीयस्कन्धे परमाण्वादिलक्षणप्रस्तावे **"एवं कालोऽपि अनुमितः सौक्ष्म्ये**

स्थौल्ये च सत्तम, संस्थानभुक्त्या भगवान् अव्यक्तो व्यक्तभुग्विभुः” (भाग.पुरा.३।११।३), तृतीयस्कन्धस्य एकोनत्रिंशे “**रूपभेदास्पदं दिव्यं ‘कालः’इति अभिधीयते...स ‘विष्णवा’ख्यो अधियज्ञो असौ कालः कलयतां प्रभुः**” (भाग.पुरा. ३।२९।३७-३८). महाभारतीयविष्णुनामसहस्रे “**ऋतुः सुदर्शनः कालः**” (विष्णुसह.ना.५८). एवं वचनान्तराण्यपि तत्र तत्र प्रसिद्धानि. नच एतेषु सर्वेषु ‘काल’शब्देन यमादिः परिग्राह्यः उपपत्तिलिङ्गप्रकरणादिविरोधाद् अन्यथा कालनिरूपणस्य प्रायेण उच्छेदप्रसङ्गात्. दुराग्रहे च “**कालः कलयताम्**” इत्यत्रापि त्वदभिमतो यमसहचारी शक्यो वक्तुं, मारकत्वेन तस्य सर्वायुःपरिगणकत्वौचित्यात्. इष्टापत्तौ कालस्य कलयितृत्वम् इत्यादिस्वोक्तिव्याघातः. नच “**कालो अस्मि**” इत्यत्र क्षणादिरूपस्य परिग्रहे ‘**लोकक्षयकृद्**’ इति विशेषणासङ्गतिः शङ्क्या. तृतीयस्कन्धस्य एकोनत्रिंशे “**सो अनन्तो अन्तकरः कालः अनादिः आदिकृद् अव्ययः, जनं जनेन जनयन् मारयन् मृत्युना अन्तकम्**” (भाग.पुरा.३।२९।४५) इति अन्तकस्यापि मारकत्वकथनेन मुख्यतया लोकक्षयकृतत्वस्य तत्रैव सिद्धेः. किञ्च “**कालो अस्मि**” इत्यत्र उपक्रमे “**द्रष्टुम् इच्छामि ते रूपम् ऐश्वरं**”, “**परमं रूपम् ऐश्वरम्**” (भग.गीता ११।३,११।९) इति साक्षाद् ऐश्वर्यं दिव्यचक्षुर्मात्रदृश्यञ्च उक्तम्. उपसंहारकाले “**रूपं परं दर्शितम् आत्मयोगाद्**” (भग.गीता ११।४७) इत्यादिना सर्वतः परत्वं, देवानामपि सुदुर्दर्शत्वं, वेदयज्ञतपःप्रभृत्यसाध्यदर्शनकत्वं च निरूपितम्. यमन्तु जन्तवो दुष्कृतमपि कृत्वा प्राकृतेनैव चक्षुषा पश्यन्ति इति ‘काल’शब्देन यमपरिग्रहे तद्विरोधः. तथा वसु-रुद्रादित्य-ब्रह्मेशप्रभृतिसर्वदेवाश्रयत्वानादिमध्यान्तत्व-शशिसूर्यनेत्र-दीप्तहुताशवक्त्ररूपवत्त्वादि-बोधकानि पूर्ववाक्यानि “**गरीयसे ब्रह्मणोऽपि आदिकर्त्रे**” (भग.गीता ११।३७) “**न त्वत्समो अस्ति अभ्यधिकः कुतो अन्यः**” (भग.गीता ११।४३) “**सहस्रबाहो भव विश्वमूर्ते**” (भग.गीता ११।४-६) इत्यादीनि उत्तरवाक्यानि च पीडयेरन्. एवम् “**आख्याहि मे को भवान्**” (भग.गीता ११।३१) इति प्रश्नस्य त्वद्रीत्या “**यमः अस्मि**” (भग.गीता १०।२९) इति उत्तरे सति “**वायुः यमः अग्निः वरुणः शशाङ्कः प्रजापतिः त्वं प्रपितामहः च**” (भग.गीता ११।३९) इति साधारण्येन

सार्वात्म्यकथनम् असङ्गतं स्यात्. अतः शङ्कराचार्यैरपि गीताभाष्ये न तथा व्याख्यातं भाष्यव्याख्याता आनन्दगिरिश्च तत्र ‘‘**कालः क्रियाशक्त्युपहितः परमेश्वरः**’’ (भग.गीता आ.गिरि व्या.११।३२) इति व्याचष्टे. दान-धर्म-प्रथमाध्यायोक्तो यमसहचारी कश्चिद् इति उक्तिस्तु भ्रमादेव. तत्र ईश्वरस्यैव कालरूपस्य निरूपणात्. तथाहि तत्र ‘‘**प्रचोदितो अहं कालेन पन्नगः त्वाम् अचूचुदम्**’’ (महाभा.१३।१।५१) इति कालस्य प्रथमतरं प्रतिपादके मृत्युवाक्ये ‘‘**कालेन ईश्वरेण**’’ इत्येव नीलकण्ठचतुर्धरौ व्याचख्यौ. अग्रेच अनुपदं ‘‘**यथा वायुः जलधरान् विकर्षन्ति ततस्ततः तद्वद् जलदवत् सर्वं कालस्य अहं वशानुगः सात्त्विकाः राजसाः चैव तामसाः ये च केचन भावाः कालात्मकाः सर्वे प्रवर्तन्ते ह जन्तुषु जङ्गमाः स्थावराः चैव दिवि वा यदि वा भुवि सर्वे कालात्मकाः सर्वं कालात्मकम् इदं जगत्, प्रवृत्तयश्च लोके अस्मिन् तथैव च निवृत्तयः तासां विकृतयो याः च सर्वं कालात्मकं स्मृतम् आदित्यः चन्द्रमा विष्णुः आपो वायुः शतक्रतुः अग्निः खं पृथिवी मित्रः पर्जन्यो वसवो अदितिः सरितः सागराः चैव भावाभावौ च पन्नगः सर्वे कालेन सृज्यन्ते ह्रियन्ते च पुनःपुनः**’’(महाभा.१३।१।५२-५७) इति. अत्र प्रथमश्लोकः ‘‘**मृत्युः धावति पञ्चम**’’ (तैत्ति.उप.२।८।१) इत्यादिश्रुतिसिद्धं भगवल्लिङ्गम्. द्वितीये ‘‘**ये चैव सात्विकाः भावाः**’’ (भग.गीता ७।१२) इत्यादिस्मरणसिद्धं तत्. तृतीयादिषु च अशेषजगदात्मकत्वं जगज्जन्मादिकारणत्वञ्च समन्वयाध्यायसिद्धं ब्रह्मलिङ्गमेव. विष्णुश्च अत्र सत्त्वोपाधिः गुणोपाधि-ब्रह्म-विष्णु-शिवानां कालात्मकेश्वरनियम्यत्वं तृतीयस्कन्धस्य एकोनत्रिंशे ‘‘**गुणाभिमानिनो देवाः**’’ (भाग.पुरा.३।२९।४४) इत्यत्र स्फुटम्. अग्रेच लुब्धकं प्रति ‘‘**या काचिदेव चेष्टा स्यात् सर्वाः कालप्रचोदिताः पूर्वमेव एतद् उक्तंहि मया लुब्धकः तत्त्वतः तस्माद् उभौ कालवशौ आवां निर्दिष्टकारिणौ**’’ (महाभा.१३।१।६७-६८) इदमपि ‘‘**मत्तः सर्वं प्रवर्तते**’’ (भग.गीता १०।८) ‘‘**यो अयं कालः**’’ इत्यादिप्रमाणसिद्धं तल्लिङ्गमेव. अतएव अत्रापि चतुर्धरः परमार्थतः परिहारम् आह **या** इति ‘‘**ईश्वराधीनो जनः सदसद् वा कुर्वाणो न स्तुत्यो न वा निन्द्यः इति भावः** (महाभा.टी.१३।१।६७) इति व्याख्यातवान्.

अग्रे कर्मानुसारेण फलदातृत्वमपि “**फलम् अतः**” (ब्र.सू.३।२।३८) इति अधिकरणसिद्धं ब्रह्मलिङ्गमेव. कर्मपारतन्त्र्योक्तिस्तु “**कृतप्रयत्नापेक्षत्वाद्**” (ब्र.सू.२।३।१५) इति प्रागेव अवोचाम. अतः आनुशासनिकपर्वप्रथमाध्यायः “**कालो अस्मि**” (भग.गीता ११।३२) इत्यादौ क्षणादिरूपग्रहणएव साधकः. एतेन “**कालरूपो अवतीर्णः**” “**कालात्मना निवसता यदुदेवगेहे**” (भाग.पुरा.१।१३।४८,११।१।११) “**कालरूपोऽपि अन्वमोदतः**” (भाग.पुरा.११।१।२४) इत्यादीन्यपि व्याख्यातानि. स्वरीत्या “**कालो अस्मि**” इत्येतत्समानार्थकत्वलाभात्तु “‘**कालः**’ **कलयताम्**” इत्यत्रापि स्वेष्टं यमसहचारिणं कुतो न कल्पयसि. वस्तुतस्तु “**अतो अस्मि लोके वेदे च प्रथितः पुरुषोत्तमः**” (भग.गीता १५।१८) “**कृष्णस्तु भगवान् स्वयं**”“**वसुदेवगृहे साक्षाद्**”“**अवतीर्णः परः पुमान्**”“**गूढं परंब्रह्ममनुष्यलिङ्गम्**” (भाग.पुरा.१।३।२८,१०।१।२३) इत्यादिप्रमाणेभ्यः पूर्णपुरुषोत्तमतया प्रतीतमपि श्रीकृष्णं यमावतारत्वोक्त्या अवजानन् प्रकृत्या राक्षसो असुरो वा असि. “**अवजानन्ति मां मूढाः**” (भग.गीता ९।११) इत्यत्र “**राक्षसीम् आसुरीं चैव**” (भग.गीता ९।१२) इति चरमहेतुकथनात्. तदात्वे यमावतारस्तु विदुरएव भारत-भागवतादिषु प्रसिद्धः. नापि मुखे चन्द्रत्वस्येव आरोपेण अपरमात्मनि परमात्मत्वस्य दृष्टिः कर्तव्या इति विभूत्यध्यायतात्पर्यं; किन्तु, उपक्रमोपसंहारयोः दिव्याहि आत्मविभूतयः “**न अन्तो अस्ति मम दिव्यानां विभूतीनाम्**” (भग.गीता १०।४०) इति अलौकिकत्वकथनात्. “**याभिः विभूतिभिः लोकान् इमान् त्वं व्याप्य तिष्ठसि**” (भग.गीता १०।१६) इति भगवतएव तत्तद्-विभूतिरूपेण सर्वत्र स्थितिवचनाद्, “**मम तेजोंऽशसम्भवम्**” (भग.गीता १०।४१) इति स्वांशत्वोक्तेः च. विभूतयोहि सर्वधर्माश्रयस्य भगवतः आवेशिततत्तद्धर्मविशिष्टांशरूपाः काश्चित्तु अवताररूपाअपि. अतः ईश्वरस्य सर्वधर्माश्रयत्व-सर्वशक्तित्व-सर्वरूपत्व-विज्ञानफलकं तत्र तत्र वास्तवपरमात्मत्वपरिचिन्तनमेव तत्तात्पर्यगोचरः “**त्वां सदा परिचिन्तयन्...-चिन्त्यो असि भगवन्! मया**” (भग.गीता १०।१७) इति उक्तेः. कालस्य अतिरिक्तत्वे ‘**सदेव**’ इति अवधारणविरोधो दुरपनोदः. नच कल्पितस्य अधिष्ठानानतिरिक्ततया तदविरोधो वाच्यः, आत्माश्रयनिराकरणे

निराकृतत्वात्. तथा सति अविद्याकार्यत्वापत्त्या कार्यस्य च कारणाश्रितत्वनियमेन “**तमः आसीत् तमसा गूढम् अग्रे**” (तैत्ति.ब्रा.२।८।९।४) इति त्वद्विवक्षितविधया अविद्यायाः कालाश्रितत्वबोधकश्रुतिविरोधात्. अभ्रान्तस्य ईश्वरस्य जीवकल्पितकालादर्शनेन “इयता कालेन कर्माणि उद्बोधयिष्यामि” इत्यादीच्छानुपपत्तेश्च. देवदत्तेन शुक्तिकायां रजते कल्पितेऽपि नहि शुक्तिः अभ्रान्तो यज्ञदत्तादिः वा तेन रजतेन तस्य भूषणभाजनादि निर्मीते निर्मित्सति वा. किञ्च प्रलये जीवाः स्वाविद्यया अधिष्ठाने पदार्थान् कल्पयितुं प्रभवन्ति न वा? आद्ये घटादियावत्प्रापञ्चिकवस्तूनि कल्पयेयुः इति प्रलयोच्छेदः. द्वितीये कालमपि न कल्पयेयुः इति प्रकृतश्रुतौ अग्रपदार्थः तस्य उद्बोधकत्वादिकल्पनं च चिन्त्यमेव. कल्पनीयवस्तुषु विभागस्तु नियामकाभावाद् अशक्यवचनः. प्रलये कालमात्रस्य कल्पनं सृष्टौतु घटादीनामपि इत्यत्र ईश्वरेच्छायाः नियामकत्वेतु घट्टकुटीप्रभातम्. किञ्च शुक्तिरजतादिवद् अधिष्ठाने वस्त्वन्तरकल्पनंहि सादृश्यसंस्कारादिसापेक्षम्. ब्रह्मणो निर्धर्मकत्वेन सादृश्यस्य सत्यकालान्तरसाक्षात्काराभावेन संस्कारस्य च अनुपपत्त्या प्रकृतेः कल्पना असम्भवः आविद्यैकत्वाद् एकेन जीवेनैव कदाचिद् दुष्कृतस्य कदाचित् सुकृतस्य च कल्पने हेतुः मृग्यः. ईश्वरेच्छायाः तज्जनकत्वे तस्याः कर्मजन्यतया अन्योन्याश्रयात्. तथा प्रलयकाले तैः कर्मणां कल्पने प्रतिबन्धकमपि अन्यद् अन्वेष्टव्यं, कल्पनहेतोः अविद्यायाः विद्यमानत्वात्. कल्पनेतु प्रलयोच्छेदः. अविद्यायाः ब्रह्मणि लयस्वीकारे कर्मणामपि अभावात् कैः इच्छा जन्येत? पुनः कल्पनञ्च उच्छिद्येत. इच्छायाः प्रतिबन्धकत्वन्तु तव दुर्वचम्. प्रलये त्वया नाशम् अङ्गीकृत्य सृष्टिप्राक्क्षणे कर्मभिः तस्य अजननस्य आदरात्. अपिच कल्पितानि कर्माणि अभ्रान्तस्य ईश्वरस्य ज्ञानविषयाएव न भवितुम् अर्हन्ति. येन रोषतोषौ जनयेयुः. अपिच कालविशेषत्वनिर्वाहकः कालनिष्ठः कादाचित्को धर्मोऽपि जीवकल्पितः त्वया वक्तव्यः. तथा सति तदैव तस्मिन् तस्य तैः कल्पने कारणं मृग्यम्. कर्मणां तत्कारणत्वे अन्योन्याश्रयादिप्रसङ्गात्. किञ्च सर्वैः कर्मणां परस्परविलक्षणानां कल्पने कालस्य तन्निष्ठधर्मस्य च एकस्यैव सर्वैः युगपत्कल्पने च किं नियामकम्? एतेन कालविशेषः कर्मविशेषकल्पने हेतुः इत्यपि

अपास्तम् उक्तादिदोषानिस्तारात्. एतद्भयात् कालादेः नित्यत्वे ब्रह्मातिरिक्तत्वे च अवधारणविरोधः तदवस्थः इति दिक्. अस्माकन्तु सर्वं ब्रह्मात्मकं प्रलये तत्र लीनम् अव्याकृतत्वेन सृष्टौतु पुनः व्याकृतत्वेन व्यवहारयोग्यम् इति न कापि अनुपपत्तिः.

(१) [''इन्द्रो मायाभिः पुरुरूपः ईयते'' (ऋक्.संहि.६।४७।१८) (बृह.उप.२।५।१९), ''मायान्तु प्रकृतिं विद्याद्'' (श्वेता.उप.४।१०) इत्यादिश्रुतिभिः ''सम्भवामि आत्ममायया'' (भग.गीता ४।६) इत्यादिस्मृतिभिश्च मायाया अपि जगद्हेतुत्वं निश्चीयते इति आह **तथा** इति **श्रुतिस्मृतिगणैः** इति अर्थः. **ईशानः सृजति** इति **इच्छोद्भवः** इति च अनुवर्तते. यत्तु ''अत्रैव शाङ्कराः प्राहुः मायिकं नश्वरं जगद्, मायासम्बन्धतो ब्रह्म कारणं नान्यथैव हि'' (शु.मा.२२) इति श्लोके तट्टीकाकारः ऊचे ''रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय, इन्द्रो मायाभिः पुरुरूपः ईयते'' (ऋक्.संहि.६।४७।१८) (बृह.उप.२।५।१९) इति मन्त्राद् माया ज्ञानस्य कारणं नतु ब्रह्मणो बहुस्वरूपत्वस्य अन्यथा पूर्वार्धएव मायाभिः पुरुरूपो बभूव इति वदेद् (द्रष्ट.शु.मा.प्र.२२) इति उक्तं, तद् न; तथोक्तावपि विधेयभेदेन वाक्यभेदानिवारणात् शब्दगौरवस्य स्पष्टप्रतिपत्त्यर्थत्वेन अदूषणत्वात्, पुरुरूपविज्ञानस्य मायिकत्वे पुरुरूपत्वस्य सुतरां मायिकत्वसिद्धेः च.

विवर्तवादे दृष्टेरेव सृष्टित्वाद् मायिकविज्ञानविषयस्य अमायिकत्वासिद्धेः. नहि शुक्तिरजतविज्ञानविषयस्य रजतस्य अमायिकत्वम्. नच तत्र सतएव रजतस्य आविर्भावः सर्वत्र सर्वसत्त्वस्य सत्कार्यवादे अभ्युपगमाद्

इति न रजतं मायिकम् इति वाच्यम्, आविर्भावस्य दूषयिष्यमाणत्वेन सत्कार्यवादासम्भवात्. किञ्च स्वप्नादेः मायिकतायाः त्वया उक्तत्वेन तज्ज्ञानेषु मायिकेषु मायिकविषयकत्वदर्शनेन इहापि तादृशज्ञानस्य मायिकविषयकत्वं स्यात्. तत्रापि विषयस्य आविर्भावाभ्युपगमेतु अपसिद्धान्तः. किञ्च एवं विज्ञानस्यापि स्वाश्रये सतएव घटादिवद् ईश्वरेच्छातः आविर्भावोपपत्तौ तत्रापि मायिकत्वासिद्ध्यापत्तिः. ईश्वर-तदिच्छयोः ज्ञानाकारणत्वे ईश्वरस्य सर्वकारणत्वरूपं सर्वात्मकत्वं तदिच्छायाः च सर्वकारणत्वं न स्यात्. किञ्च पारमार्थिकवस्तुविज्ञाने क्लृप्तप्रमाणातिरिक्तसामग्र्यपेक्षाभावेन तत्र माया न अपेक्ष्येत. तस्माद् निर्विशेषस्य तथाभवनासम्भवशङ्कायां तन्निवृत्त्यर्थं वाक्यशेषो बहुरूपज्ञानमेव तथाभवनम् इति वदन् विवर्तवादमेव पुष्णाति.]

(२) अग्रेच ‘‘इन्द्रो मायाभिः पुरुरूपः ईयते’’ (ऋक्.संहि.-६।४७।१८, बृह.उप.२।५।१९) ‘‘मायान्तु प्रकृतिं विद्याद्’’ (श्वेता.उप.४।१०) इत्यादिश्रुतिभिश्च ‘‘सम्भवामि आत्ममायया’’ (भग.गीता ४।६) इत्यादिस्मृतिभिः मायायापि जगद्धेतुत्वं निश्चीयते **इति उक्तं, तत्र उच्यते. तादृशश्रुतीनां यदि त्वदभिमतपारिभाषिकमायावाचकत्वं स्यात् तदा तस्याः जगद्धेतुत्वमपि स्यात् तदेव न सम्भवति. इन्द्रः आत्मा, मायाभिः इन्द्रियवृत्तिभिः, पुरुरूपो बहुरूपो, ईयते प्रतीयते तत्तदाकारो भूत्वा प्रतीयते इति अर्थः. ‘‘मायान्तु प्रकृतिं विद्याद्’’ इत्यत्र भूतसूक्ष्मरूपा प्रकृतिः विवक्षिता. अतएव सांख्यसिद्धा प्रकृतिरपि न सम्भवति. ‘‘सम्भवामि आत्ममायया’’ (भग.गीता ४।६) इत्यत्रापि ‘माया’पदेन सामर्थ्यं विवक्षितं नतु सदसत्त्वाभ्याम् अनिर्वचनीयं भावरूपम्**

अज्ञानं प्रमाणाभावात्. ननु तादृशज्ञानास्वीकारे जगतः सत्यत्वमेव स्वीकरणीयं तत्स्वीकारेच द्वैतापत्तिः अद्वैतश्रुतिव्याकोपश्च स्यात्, तत्स्वीकारेच मायिकस्य मिथ्यात्वेन त्रैकालिकनिषेधप्रतियोगित्वात् सार्वकालिकम् अद्वैतं श्रुतिसिद्धं सङ्गच्छते इति चेद्, न; जगतः सत्यत्वं ब्रह्मस्वरूपकारणात्मना सर्वस्य ब्रह्मोपादानकत्वेन ब्रह्माभिन्नत्वात् कुतो द्वैतापत्तिः? कथञ्च श्रुतिविरोधः? “तद् आत्मानं स्वयम् अकुरुत” (तैत्ति.उप.२।७) इत्यादिश्रुत्यनुरोधेन ब्रह्मणएव उच्चनीचादिभावेन परिणतत्वाद् मायाकल्पने बीजाभावः, ब्रह्मणएव सर्वभवनसमर्थत्वात्. ननु मायानङ्गीकारे बन्धस्य अविद्याकृतत्वाभावेन सत्यत्वे सत्यस्य च ज्ञानानिवर्त्यत्वात् “तरति शोकम् आत्मविद्” (छान्दो.उप.७।१।३) इत्यादि श्रुतिविरोधः. तत्स्वीकारे च अविद्याकृतस्य रजतस्य शुक्तिज्ञानाद् निवृत्तिदर्शनेन ब्रह्माविद्याकृतस्य तस्य ब्रह्मज्ञानाद् निवृत्त्यङ्गीकारे तादृशश्रुतिसङ्गतिः इति चेद्, न; बन्धस्य अविद्याकार्यत्वाभावेऽपि ब्रह्मज्ञानेन तत्कृपया निवृत्तिस्वीकारे श्रुतिविरोधाभावात्. नहि काशीमरणोत्तरशिवदर्शनतत्कृततारकोपदेशोत्तरमोक्षस्वीकारेऽपि “काशीमरणाद् मुक्तिः” (   ) इति श्रुतिविरोधः तव सम्मतः. किञ्च “इन्द्रो मायाभिः पुरुरूपः ईयते” (बृह.उप.२।५।१९) इति मन्त्रस्य त्वदभिमतरीत्या व्याख्यानेऽपि मायायाः पुरुरूपत्वज्ञानएव हेतुत्वं नतु पुरुरूपभवने “रूपं रूपं प्रतिरूपो बभूव” इत्यत्र ‘मायाभिः’ इति अनुक्त्वा उत्तरार्धएव तथोक्तेः. युक्तञ्च एतत् कारकविभक्तीनां क्रियया अन्वयस्य उचितत्वात्. नहि “काष्ठैः तण्डुलः पच्यते” इत्यत्र काष्ठकरणकत्वस्य तण्डुले अन्वयः कस्यचित् सम्मतः तण्डुलत्वे वा, येन बहुरूपत्वे मायाकरणकत्वस्य अन्वयः त्वदभिमतः स्यात्. नच पुरुरूपज्ञानस्य मायिकत्वे पुरुरूपत्वस्य सुतरां मायिकत्वाद्

मम अभीष्टसिद्धिः इति वाच्यं, मायिकज्ञानविषयस्य मायिकत्वमेव इति नियमाभावात्. तादृशनियमस्वीकारे मायिकाखण्डाकारवृत्तिविषयस्य ब्रह्मणोऽपि मायिकत्वेन मिथ्यात्वापत्तिः. नच तादृशवृत्तिविषयस्य परिच्छिन्नत्वेन मिथ्यात्वम् इष्टमेव इति वाच्यं, तस्यापि मिथ्यात्वे शून्यवादापत्तिः. किञ्च परिच्छिन्नज्ञानाद् मोक्षस्वीकारे घटादिज्ञानाद् मोक्षापत्तिः. घटाद्याकारवृत्तिरूपज्ञानस्यापि घटादेः कल्पितत्वेन कल्पितस्य च अविद्यानाश्रयत्वेन घटाद्यवच्छिन्नचैतन्यगताविद्यानाशार्थं तद्विषयकत्वस्यैव अङ्गीकरणीयत्त्वात्तु तस्माद् मायिकज्ञानविषयस्य मायिकत्वमेव इति नियमो भवन्मतएव दोषावहः इति न आदरणीयः.

यत्तु विवर्तवादे दृष्टेरेव सृष्टित्वाद् मायिकविज्ञानविषयस्य अमायिकत्वासिद्धेः. नहि शुक्तिरजतविज्ञानविषयस्य रजतस्य अमायिकत्वम् इति उक्तम्. दृष्टिसृष्टिवादस्यैव तुच्छत्वात् तत् तुच्छतरमेव. तथाहि दृष्टेरेव सृष्टित्वाद् इति वदता दृष्टिः = विज्ञानमेव सृष्टिः इति अभ्युपगतं तद् न सम्भवति. दृग्दृश्ययोः जड-चेतनयोः तमः-प्रकाशवद्विरुद्धस्वभावयोः ऐक्यासम्भवाद् एकस्मिन् कर्म-कर्तृभावासम्भवेन प्रकाश्य-प्रकाशकभावानुपपत्तेश्च. ननु दृग्दृश्ययोः भिन्नसत्ताकत्वं यदि स्यात् तदा विरुद्धस्वभावत्वमपि स्यात् तदेव न उपपद्यते. दृश्यस्य दृष्टिभेदे प्रमाणाभावात्. अतएव “ज्ञानस्वरूपमेव आहुः जगद् एतद् मनीषिणः अर्थस्वरूपं भ्राम्यन्तः पश्यन्ति अन्ये कुदृष्टयः” (द्र.विष्णु.पुरा.१।४।२०) इति स्मृतिरपि सङ्गच्छते; किन्तु, दृष्टिरेव पूर्वपूर्ववासनाभिः घटाद्याकारेण परिणता सृष्टिः इति उच्यते. यथा स्वप्ने बाह्यघटादेः अभावेऽपि जाग्रद्वासनाविशिष्टं विज्ञानमेव तत्तदाकारं भवति तथैव प्रकृतेऽपीति न अनुपपत्तिः.

नापि कर्म-कर्तृभावविरोधः, स्वप्ने एकस्यैव कर्म-कर्तृत्व-प्रकाश्य-प्रकाशकत्वयोः दर्शनेन तादृशविरोधे मानाभावात्. नच स्वप्ने घटादयः सन्त्येव इति वाच्यं, ‘‘न तत्र रथाः न रथयोगाः’’ (बृह.उप.४।३।१०) इत्यादिश्रुतिविरोधापत्तेः. अतएव ‘‘मायामात्रन्तु कार्त्स्न्येन अनभिव्यक्तस्वरूपत्वाद्’’ (ब्र.सू.३।२।३) इति सूत्रमपि सङ्गच्छते अन्यथा तद्विरोधोऽपि स्याद् इति चेद्, न; दृष्टिरेव सृष्टिः इत्यत्र दृष्टिः = विज्ञानम् इति उक्तम्. तत्र ‘विज्ञान’पदेन ब्रह्मरूपं विज्ञानं विवक्षितं ‘‘विज्ञानम् आनन्दं ब्रह्म’’ (बृह.उप.३।९।२८) इति श्रुतेः अथवा बुद्धिः विवक्षिता ‘‘विज्ञानं यज्ञं तनुते’’ (तैत्ति.उप.२।५) इत्यादि श्रुतेः ब्रह्मणः साधनान्तरानपेक्षस्य सृष्टिरूपत्वे सृष्टेः नित्यत्वापत्तिः विवर्तवादहानिश्च. न द्वितीयः, बुद्धेः पुरुषभेदेन भिन्नत्वात् कस्य बुद्धिः सृष्टिरूपः इत्यत्र विनिगमकं दुर्लभम्. ननु पुरुषभेदेन सृष्टिः भिन्नैव. यथा एकस्यां शुक्तौ दशपुरुषाणां रजतभ्रमे जाते पुरुषभेदेन रजतं भिन्नं भिन्नमेव उत्पद्यते नतु एकमेव. अतएव पुरुषस्य अधिष्ठानसाक्षात्कारे जाते तदज्ञाननिवृत्त्या तत्कार्यरजतनिवृत्तावपि द्वितीयपुरुषाज्ञानकल्पितरजतसत्त्वेन तस्य ‘इदं रजतम्’ इति प्रत्ययो जायते. नच पुरुषस्यापि सृष्ट्यन्तर्गतत्वात् तस्यापि कल्पितत्वाद् द्वितीयपुरुषकल्पितत्वं वाच्यं, तेन यत्र एकएव पुरुषः तत्र कल्पकाभावात् पुरुषएव न स्याद् इति वाच्यं तत्र तत्पुरुषस्यैव कल्पकत्वात्. नच देहेन्द्रियादिसत्त्वे बुद्धिसत्त्वे बुद्धेः तत्तदाकारत्वे देहेन्द्रियान्तःकरणाविद्यादिसङ्घातरूपपुरुषस्यैव अभावात् कथं तस्य स्वकल्पकत्वम् इति वाच्यं, पूर्वपूर्वकल्पिताविद्योपहितो जीवः उत्तरोत्तराविद्यादिकल्पकः यथा निद्रारूपा या अविद्या तत्कल्पितो जीवो दिग्देशादिविभागं घटपटादि च प्रकल्पयति तथैव अधुनापि स्वयं कल्पितः काँश्चिद् अनादित्वेन काँश्चित् सादित्वेन कल्पयतीति न

अनुपपत्तिः अतएव ‘‘जीवो ईशो विशुद्धाचित् तथा जीवेशयोः भिदाः अविद्या तच्चितोः योगः षड् अस्माकम् अनादयः’’ (सि.ले.सं.१।१७) इति सिद्धान्तोऽपि सङ्गच्छते. यथा स्वप्ने कल्प्यमानं गोपुरादि किञ्चित् पूर्वसिद्धत्वेन कल्प्यते किञ्चित् तदानीम् उत्पाद्यत्वेन. एवं जागरेऽपि किञ्चित् कल्प्यमानं सादित्वेन कल्प्यते किञ्चिद् अन्यथा इति अनेनैव. साद्यनादिविभागोपपत्तेः इति चेद्, मा एवम्. श्रुतिसिद्धस्य वियदादिप्रपञ्चस्य तत्क्रमस्य च कल्पिततत्वकल्पने मानाभावात्. तस्यापि कल्पिततत्वे तस्य कः कल्पकः इति वक्तव्यं न कोऽपि चेत्, तर्हि सृष्ट्यादिश्रुतिप्रतिपाद्यस्य वियदादिसृष्टितत्क्रमादेः शशशृंगायमाणतया श्रुतेः आलम्बनाभावाद् अप्रामाण्यं स्यात्. नच तादृशश्रुतीनां निष्प्रपञ्चब्रह्मात्मैक्यप्रतिपादनपरत्वेन तात्पर्यविषयीभूतार्थस्य सत्यत्वाद् न अप्रामाण्यापत्तिः इति वाच्यं, सृष्ट्यादिवाक्यानां श्रुतार्थपरित्यागाश्रुतार्थतात्पर्यकल्पनापेक्षया वियदादिसर्गस्य सत्यत्वमेव युक्तम्. ननु अध्यारोपापवादाभ्यां निष्प्रपञ्चब्रह्मप्रतिपत्त्यर्थमेव श्रुतौ सृष्टिप्रलयोपन्यासौ नतु तत्सत्यत्वतात्पर्येण यथा लोके गगनत्वबोधनाय प्रवृत्तः कश्चित् प्रथमं नैल्यवैशाल्याद्यध्यारोपेण तं गगनं ग्राहयित्वा पश्चाद् न इदं वस्तुतः नैल्यादियुक्तम् इति तदपवादेन नीरूपम् उदासीनं गगनतत्त्वम् इति बोधयति तथा वेदान्ताअपि इति चेद्, न. अत्रिवृत्कृतस्य आकाशस्य अप्रत्यक्षत्वेन तत्र नीलरूपादेः अध्यारोपासम्भवात्. त्रिवृत्कृतस्यतु रूपवत्त्वात् तत्र नीलरूपापवादएव न सम्भवति इति उभयथापि दृष्टान्तप्रदर्शनस्य असम्भवात्. किञ्च श्रुतीनां सृष्ट्यादिषु तात्पर्याभावे वियदादिसर्गप्रतिपादकतत्क्रमप्रतिपादकश्रुतीनां परस्परं विरोधपरिहाराय सूत्रकार-भाष्यकारयोः यत्नोऽपि व्यर्थएव स्यात्. तात्पर्याविषयीभूते अर्थे विद्यमानस्यापि विरोधस्य अकिञ्चित्करत्वात्. अपिच

दृष्टिसृष्टिवादिनो मते ब्रह्मणोऽपि तदाकारवृत्तिभिन्नत्वं न स्यात् तथा सति सर्वविप्लवएव स्यात्. तस्मात् स न, शून्यवादपर्यवसायी दृष्टिसृष्टिवादो वेदवादिभिः न अङ्गीकरणीयः इति अलम् अप्रकृतविचारेण. 'इदं रजतम्' इत्यत्रतु शुक्तिकैव रजतमिव प्रतीयते नतु तत्र अनिर्वचनीयं प्रातीतिकं रजतं प्रतीयते नवा सतएव रजतस्य आविर्भावः तेन नच इत्यादिपूर्वपक्षो असङ्गतः. वस्तुतश्च अन्यदेव मिथ्यारजतम् आविर्भावस्य दूषयिष्यमाणत्वेन सत्कार्यवादासम्भवाद् इतितु प्रलापमात्रम्. आविर्भावे दूषणस्यैव असम्भवेन सत्कार्यवादस्य अपलपितुम् अशक्यत्वात्. किञ्च इत्यादिना स्वप्नादेः मायिकतया तज्ज्ञानेषु मायिकविषयकत्वदर्शनेन इहापि तादृशपुरुरूपविज्ञानस्य मायिकविषयकत्वं स्यात् तत्रापि विषयस्य आविर्भावेतु अपसिद्धान्तः इति उक्तं तद् न सम्भवति. यतो मायिकज्ञानविषयत्वनिष्ठसामानाधिकरण्यमात्रेण मायिकत्वम् अनुमातुं न शक्यते; किन्तु, मायिकत्वसम्बन्धितावच्छेदकरूपवन्मायिकज्ञानविषयत्वेनैव. एवञ्च अस्मन्मतसिद्धमायिकत्वाभाववति स्वगृहादौ स्वप्नकालिकस्मृतिरूपमायिकज्ञानविषयत्वसत्त्वेन व्यभिचारितया तत्सम्बन्धितावच्छेदकरूपवत्त्वाभावविशिष्टेन तेन मायिकत्वस्य अनुमानासम्भवाद् अन्यथा वह्निधूमयोः पर्वते सामानाधिकरण्यदर्शनेन अयोगोलके धूमानुमितिः वह्निदर्शनेन कुतो न स्यात्? स्वप्ने सतो विषयस्य आविर्भावस्तु न अङ्गीक्रियते येन अपसिद्धान्तः स्यात्; किन्तु, जीवव्यामोहार्थम् ईशकर्तृकैव सा सृष्टिः. ईशोहि स्वमायया सृष्टिं करोति. मायाच सामर्थ्यविशेषो नतु सदसत्त्वाभ्याम् अनिर्वचनीयं भावरूपं पारिभाषिकम्. अतएव उक्तं प्रथमस्कन्धे "अपश्यत् पुरुषं पूर्णं मायां च तदुपाश्रयां यया सम्मोहितो जीवः आत्मानं त्रिगुणात्मकं परोऽपि मनुते अनर्थं तत्कृतं च अभिपद्यते"

(भाग.पुरा.१।७।४-५) अत: ईश्वरस्य या व्यामोहिका शक्ति: सा माया तयैव बाह्योपादाननिरपेक्षया स्वप्ने सृष्टि: क्रियते. तथाच ऐन्द्रजालिकेन नटेन यथा सामाजिकव्यामोहार्थं मायासृष्टि: क्रियते तथा ईश्वरेण जीवव्यामोहरूपकौतुकार्थमेव स्वप्नसृष्टि: क्रियते इति न तस्या: सत्यत्वम्. अतएव उक्तं ''मायामात्रन्तु कार्त्स्न्येन अनभिव्यक्तरूपत्वाद्'' (ब्र.सू.३-।२।३) इति व्यासैरपि. एतेन किञ्च **इत्यादिक:** सर्वकारणत्वं न स्याद् **इत्यन्तो वृथालापोऽपि अपास्त:, पूर्वोक्तमायाकार्यस्य स्वाश्रये तथा आविर्भावानभ्युपगमात्. यत्तु** किञ्च पारमार्थिकवस्तुविज्ञाने क्लृप्तप्रमाणातिरिक्तसामग्र्यपेक्षाभावेन तत्र माया न अपेक्ष्येत **इति तद् न युक्तं तादृशनियमाभावात्. स्वप्ने देवतादिवाक्यजन्ये भाविपारमार्थिकवस्तुविषयके वर्तमाननिध्यादिविषयके ज्ञाने वा क्लृप्तप्रमाणातिरिक्तनिद्रादिसामग्र्यपेक्षणेन व्यभिचारात्. एतत्सर्वं पुरुरूपज्ञानस्य टीकोक्तं मायिकत्वम् अभ्युपेत्य. वस्तुतस्तु** ''इन्द्रो मायाभि:'' **इत्यस्य पूर्वोक्ते अर्थे दोषएव न अस्ति. ब्रह्मपरत्वे तस्य सर्वभवनसमर्थत्वाद् विरुद्धधर्माश्रयत्वात् च तद् न विरुध्यते. एवञ्च** तस्माद् **इत्यादिकं प्रत्युक्तम्.**

(३) सहस्राक्षे ''इन्द्रो मायाभि: पुरुरूप:'' इत्यादिं विवर्तवादमेव पुष्णाति इत्यन्तं भागं परिहरन्ति. **अग्रे च ''इन्द्रो मायाभि:''** इत्यादिना **तस्माद् इत्यादिकं प्रत्युक्तम्** इत्यन्तेन. **पारिभाषिक मायावाचकत्वम्**...इति, शक्तिग्राहकेषु कोशव्याकरणादिषु 'माया'शब्दस्य तादृशार्थकताया: अनुपलम्भात्, तन्त्रान्तरेऽपि तदस्वीकारात् च. त्वन्मतएव सदसत्त्वाभ्याम् अनिर्वचनीये वस्तुनि 'माया'शब्द: परिभाष्यते इति युक्तं तस्य तथात्वम्. अयं भाव: : यत्तु ''इन्द्रो मायाभि:'' इत्यादि: अनुवर्तते इत्यन्तं तदसत्. अत्रहि प्रथमं वाक्यम् ऋक्संहितायां चतुर्थाष्टकसप्तमाध्याये

तत्र समग्रमन्त्रस्तु "**रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय इन्द्रो मायाभिः पुरुरूपः ईयते युक्ताहि अस्य हरयः शतादशः**" (ऋक्.संहि.६।४७।१८) इति अर्थस्तु **प्रतिरूपो** सर्वाकारत्वात् सर्वधर्माश्रयत्वात् प्रतिनिधिः परमात्मा **रूपं रूपं** अग्नि-वाय्वादिसर्वरूपाणि स्वयमेव **बभूव. अस्य** परमात्मनः **तत्** कार्यात्मना पृथक्पृथग्भूतं **रूपं प्रतिचक्षणाय** "अग्निरेव अयं न वायुः" इत्यादि प्रतिनियत-नाम-व्यवहाराय. ननु तथापि घटादिषु मृत्त्वमिव कार्यरूपेषु ब्रह्मत्वं सर्वैः कुतो न प्रतीयते इति आशङ्कायाम् आह, 'इन्द्रो' इति "**इदि परमैश्वर्ये**" (धा.पा.१।६३) इत्यतो "**नमि कम्पि...**" (पाणि.सू.३।२।१६७) इत्यादिना रक्. **इन्द्रो** परमेश्वरो **मायाभिः** तत्तदिन्द्रियवृत्त्यात्मना परिणतबुद्धिभिः, **बहुरूपो ईयते** नानारूपो ज्ञायते. तत्र हेतुः **हि** यतः '**युक्ताः**' शरीररूपरथवहने कृतयोजनाः, **अस्य** परमात्मनो **हरयः** हरन्ति इति हरयः, इन्द्रियरूपाः अश्वाः "**इन्द्रियाणि हयान् आहुः**" (कठोप.१।३।४) इति कठश्रुतेः '**शता**' शतानि दशसहस्रं तत्तत्प्राणिभेदेन अपरिमिताः सन्ति सहस्रम् इति वक्तव्ये 'शतादशः' इति उक्तिः. दशेन्द्रियरूपाश्वज्ञापनाय बहुवचनान्त'शत'शब्दादेव आनन्त्यलाभाच्च. देहेन्द्रियाभिमानवद्भिः सएव नानारूपो ज्ञायते तन्निवृत्तौतु सएव सर्वत्र सर्वरूपः इति भावः. अत्र 'माया'शब्दो न त्वदभिप्रेतार्थपरः अप्रसिद्धेः बहुवचनाच्च; किन्तु, बुद्धिपर्यायः. "'**माया' स्यात् शाम्बरी-बुध्योः**" ( ) इति मेदिनीनानार्थयोः "**स्यान्, 'माया' शाम्बरी कृपा, दम्भो बुद्धिः च**" ( ) इति विश्वहेमचन्द्रयोः च उक्तेः. अतएव सायनमाधवीये ऋक्संहिताभाष्ये एतन्मन्त्रविवरणे "'**मायाभिः' ज्ञानानाम् एतद् ज्ञानैः, आत्मीयैः संकल्पैः**" (सा.भा.६।४७।१८) इति पूर्वं स्वाभिप्रायेण व्याख्यातम्. त्वदभिमतकल्पमायापरत्वञ्च अपरमततया अनन्ततरं सङ्गृहीतम्. बृहदारण्यकभाष्ये शङ्कराचार्यैरपि अस्मिन् मन्त्रे "'**माया'शब्दस्य प्रज्ञापरत्वं मिथ्याभिमानपरत्वम्**" (द्र.बृह.उप.शां.भा.२।५।१९) च विकल्पेन व्याख्यातम्. 'हरि'शब्दश्च इन्द्रियपरएव व्याख्यातः. ततः चतुर्थचरणस्वारस्याद् बहुवचस्वारस्यात् च इन्द्रियवृत्तिरूपा बुद्धिपरिणामाः गृह्यन्ते. अधिकन्तु वक्ष्यते. तस्माद्, न अस्माद् वाक्याद् अविद्याख्यमायावशाद् ईशानः

सृजति इति अर्थो लभ्यते. ‘‘**मायान्तु प्रकृतिं विद्याद्**’’ (श्वेता.उप.४।१०) इतितु श्वेताश्वतरीये तुरीये अध्याये अस्ति. तत्र ‘‘**य: एको वर्णो बहुधा शक्तियोगाद्**’’ (श्वेता.उप.४।१) इति प्रथममन्त्रे एकस्यैव अनेकशक्तिकस्य सर्वधर्माश्रयत्वं सर्वकर्तृत्वं संहर्तृत्वं च उक्त्वा ‘‘**तदेव अग्नि:**’’ (श्वेता.उप. ४।२) इति ‘‘**त्वं स्त्री त्वं पुमान् असि**’’ इति च मन्त्रद्वये सर्वकार्यात्मकत्वं सर्वलिङ्गकत्वं च उक्त्वा चतुर्थे ततएव विश्वोत्पत्तिम् उक्त्वा ‘‘**अजाम् एकाम्**’’ इति पंचमे उत्पत्त्यादिहेतुरज:सत्त्वतमोरूपां प्रकृतिं ‘‘**चमसवद्...**’’ (ब्र.सू.१।४।८) अधिकरणानुरोधात् तेजोऽबन्नात्मकं कार्यं वा जुषमाणं जीवं तद्विलक्षणं परमात्मनं च उक्त्वा तयो: कथं भेद:? इति आकांक्षायां ‘‘**द्वा सुपर्णा**’’ (श्वेता.उप.४।६) इति ‘‘**समाने वृक्षे**’’ इति षष्ठ-सप्तमयो: कार्यदशायामेव जीवान्तर्यामिभावेन भेदं जीवस्यैव अविद्यया मोहं सेवितप्रीतपरमात्मदर्शनादेव तन्निवृत्तिञ्च अभिधाय ‘‘**ऋचो अक्षरे**’’ इति अष्टमे वेद्यम् अक्षरं निरूप्य नवमे छन्द:प्रभृतीनां परमात्मन: सकाशादेव प्रवृत्तिं मायानियामकस्य तस्यैव स्रष्टृत्वम् ‘‘**तस्मिंन् च अन्यो मायया सन्निरुद्ध:**’’ इति जीवस्य सम्यङ्निरुद्धत्वञ्च श्रावयित्वा को असौ माया पदार्थ: कश्च माया नियामक: कश्च तदन्य: सन् निरोद्धव्य: इति आकाङ्क्षायां दशमो अयं मन्त्र: पठ्यते ‘‘**मायान्तु प्रकृतिं विद्याद् मायिनन्तु महेश्वरम्. तस्य अवयवभूतैस्तु व्याप्तं सर्वम् इदं जगद्**’’ इति. अर्थस्तु पूर्वोक्तां मायां प्रकृतिं श्रीभागवतादिषु ‘‘**प्रकृति: गुणसाम्यं स्याद्**’’ (द्र.भाग.पुरा.११।२-२।१२) इत्यादिकथनाद् गुणसाम्यरूपां प्रथमतमं सदंशकार्यं विद्यात्. महान्तम् ईश्वरं परमात्मानं मायिनं मायानियामकं विद्यात्. प्रकृतिर्हि सर्वजडप्रपञ्चमूलभूतं परमात्मन: प्रथमं कार्यम्. अतो महाभूतादीनां प्रकृतित: तदुद्भवाङ्गीकारेऽपि ब्रह्मोपादानकत्वं न व्याहन्यते. मृत्पिण्डाद् उत्पन्नघटादिषु मृदुपादानकत्वमिव. अतएव एकादशस्कन्धे ‘‘**प्रकृतिर्हि अस्य उपादानम् आधारो पुरुषो पर:, सतो अभिव्यञ्जक: कालो ब्रह्म तत् त्रितयन्तु अहम्**’’ (भाग.पुरा.११।२४।१९) इति भगवता उक्तम्. ‘माया’शब्दश्च प्रकृतिपर्यायतयापि पुराणेषु प्रसिद्ध:. यथा तृतीयस्कन्धे ‘‘**कालवृत्त्यातु मायायां गुणमय्याम् अधोक्षज: पुरुषेण आत्मभूतेन वीर्यम् आधत्त वीर्यवान्**’’ (भाग.पुरा.३।५।२६) इत्येवम् अन्यत्रापि

द्रष्टव्यम्. प्रकृतिपुरुषकालानां ब्रह्मोपादानकत्वं च विष्णुपुराणे प्रथमे अंशे द्वितीयाध्याये विरुद्धधर्माश्रयत्वादिना परब्रह्मस्वरूपं निरूप्य उच्यते "**तदेव सर्वमेव एतद् व्यक्ताव्यक्तस्वरूपवत् तथा पुरुषरूपेण कालरूपेण च स्थितं, परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विजः, व्यक्ताव्यक्ते तथैव अन्ये रूपे कालः तथा परं प्रधानपुरुषव्यक्तकालानां परमं हि यत्, पश्यन्ति सूरयः शुद्धं तद्विष्णोः परमं पदम्. प्रधानपुरुषव्यक्तकालास्तु प्रविभागशः रूपाणि स्थितिसर्गान्तव्यक्तिसद्भावहेतवः, व्यक्तं विष्णुः तथाव्यक्तं पुरुषः कालएव च, क्रीडतो बालकस्येव चेष्टां तां निशामय, अव्यक्तं कारणं यत्तत्प्रधानम् ऋषिसत्तमैः, प्रोच्यते प्रकृतिः सूक्ष्मा नित्यं सदसदात्मकम्**" (विष्णुपुरा.१।२।१४-१९) इति. एवम् इतरत्रापि पुराणेषु तत्र-तत्र प्रसिद्धमेवेति किंबहुना श्रुतिष्वपि "**कर्तारम् ईशं पुरुषं ब्रह्मयोनिम्**" (मुण्ड.उप.३।१।३) इति मुण्डकादिषु प्रकृतियोनित्वं परमात्मनः श्राव्यते. एतेन "**अजाम् एकाम्**" (श्वेता.उप.४।५) इति पूर्ववाक्ये का सा अजा इति ? शंकापि व्युदस्ता. श्वेतकेतुविद्यैकवाक्यतया "**लोहित-शुक्ल-कृष्णाम्**" इत्यत्र तेजोऽबन्नात्मकत्वादेरपि पञ्चभूतमूलभूतायां तस्यां तेजोऽबन्नात्मतायाः अनपायात्. एतेनैव सांख्यमतप्रवेशशङ्कापि अपास्ता. तैः प्रकृतेः स्वातन्त्र्येण नित्यत्वं पुरुषाणां च बहुत्वं स्वातन्त्र्येण नित्यत्वम् अभ्युपगच्छद्भिः एवम् अनङ्गीकारात्. तस्याः स्वकार्यरूपायाः मायायाः नियामकस्तु महान् ईश्वरएव. कः तर्हि मायया सन्निरुद्धः इति चेत्, तत्र आह "**तस्य अवयवः**" (श्वेता.उप.४।१०) इति तस्य परमेश्वरस्य अवयवभूतैः स्वांशैः जीवैः. सर्वम् इदं परिदृश्यमानं जगज्जङ्गमदेहप्राणेन्द्रियान्तःकरणादिकं व्याप्तं पूर्णं गुणतो व्याप्तेः. "यत्र यत्र संघाः तत्र तत्र जीवः" इति नियमाद् वा व्याप्तम्. तथाच प्रकृतिकार्यदेहाद्यभिमानवशात् तदंशएव सम्यग्निरुद्धः. यत्तु तद्भाष्ये "**तस्य प्रकृतस्य परमेश्वरस्य रज्ज्वाद्यधिष्ठानेषु कल्पितसर्पादिस्थानीयैः मायिकैः स्वावयवैः**" (श्वेता.उप.शां.भा.४।१०) इति व्याख्यातं, तद् न; कल्पितसर्पादौ रज्ज्वाद्यवयवतायाः अयोगात्. नहि रज्ज्ववयवो नष्टः इति उक्तेः तत्र कल्पितो सर्पो नष्टः इति प्रतीयते; किन्तु, तदेकांशएव इति. इदम् "**अंशो नानाव्यपदेशाद्**" (ब्र.सू.२।३।४३) इत्यादिषु सिद्धम् अतः किं प्रासङ्गिकेन ? तथाच मायां

सदसत्त्वाभ्याम् अनिर्वचनीयां जगतः प्रकृतिम् उपादानं विद्याद् इत्यर्थमनोरथो अपास्तः श्रौतप्रतिज्ञादृष्टान्तादिव्याकोपात्. साधितं च ब्रह्मणएव सर्वप्रकृतित्वं परिणामित्वं च श्रीबादरायणाचार्यैः **“प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधाद्”** (ब्र.सू.१।४।२३) इति अधिकरणे. तृतीयन्तु गीतावाक्यम् **“अजोऽपि सन् अव्ययात्मा भूतानाम् ईश्वरोऽपि सन् प्रकृतिं स्वाम् अधिष्ठाय सम्भवामि आत्ममायया”** (भग.गीता ४।६) इति. अत्रापि गुणात्मकं वस्तु न ‘माया’शब्दार्थः, त्वद्रीत्या आदरे **“प्रकृतिं स्वाम्”** इत्यनेन पौनरुक्तस्य आपातात्. अतः स्वाभाविकं तस्य सर्वभवनसामर्थ्यमेव तदर्थः. दशमे **“विद्यया अविद्यया शक्त्या मायया च निषेवितम्”** (भाग.पुरा.१०।३६।५५) इति शक्तित्वोक्तेः. एकादशे **“मायां वेदितुम् इच्छामः”** (भाग.पुरा.११।३।१) इति प्रश्नोत्तरयोः तथैव सिद्धेश्च. अतः **स्वां प्रकृतिं अधिष्ठाय** नित्यसिद्धं स्वस्वभावम् अपरित्यज्य, आत्मनो मायया सर्वभवनसामर्थ्यरूपया शक्त्या, मत्स्य-कच्छपादिनानारूपः सम्भवामि इति वाक्यार्थः. अथवा आत्मसु जीवेषु मायया कृपया सर्वेषु अनुग्रहबुध्या सम्भवामि इति अर्थः. रामानुजाचार्यास्तु ‘माया’शब्दं ज्ञानपर्यायम् आश्रित्य **“आत्मनः सङ्कल्पेन”** (द्र.भग.गीता रा.भा.-४।६) इति व्याचक्षते. तथापि सर्वभवनसामर्थ्येन इति अर्थो अत्र मुख्यः. अवतारव्यवस्थाबोधकम् इदं वाक्यञ्च प्रपञ्चमायिकतासाधनस्य गन्धमपि न स्पृशति. प्रकारार्थकेन ‘तथा’ इति अव्ययेन श्रुतिस्मृतिगणपरामर्शोऽपि नातिरमणीयः. मायावशाद् इच्छोद्भवस्य बोधकस्तु वाक्याभासो न एकोऽपि उपन्यस्तः. तदेतद् अनुसन्धाय आहुः **तादृशश्रुतीनाम्** इत्यादि. **वाचकत्वम्** इति प्रतिपादकत्वम्. तादृशार्थवाचक‘माया’पदघटितत्वम् इति भावः. **ननु** इत्यादि प्रपञ्चमायिकताबोधकप्रत्यक्षश्रुत्यभावेऽपि अद्वैतश्रुत्यन्यथानुपपत्त्या तदाक्षिप्यते इति शङ्काशयः समादधते **जगतः सत्यत्वम्** इत्यादिना. **इत्यादिश्रुति** इति ‘आदि’पदाद् **“बहु स्यां प्रजायेय”** इत्यादिसङ्ग्रहः. तथाच तत्र बहुभवनम् उक्त्वा **‘प्रजायेय’** प्रकृष्टो जायेय इति उच्चनीचभावस्यापि इच्छया विषयीकरणात् सर्वभवनसामर्थ्यादेव विचित्रजगत्सम्भवेन कार्यवैचित्र्यार्थः पारिभाषिकमायाङ्गीकारोऽपि प्रत्युक्तः, स्वाभिन्नविचित्रशक्तिकतया सर्वोपपत्तेः. स्पष्टञ्च इदम् **“आत्मनि च एवं विचित्राश्च हि”** (ब्र.सू.२।१।२८)

इत्यादि तत्त्वसूत्रेषु. नापि अद्वैतश्रुतिविरोधः अमायिकस्यैव कार्यस्य ततएव आविर्भावः तत्रैव तिरोभावः इति स्वीकारेण समुद्रतरङ्गवद् अभेदानपायात्. कार्यसत्यत्व-ब्रह्माद्वैतयोः उभयोरपि श्रुतिसिद्धत्वेन अन्यतरबाधस्य अयोगात्. मृद्रूपेषु घटादिषु गन्धसत्त्वेऽपि “पृथिवी एका गन्धवती” इति उक्तेः अबाधवद् ब्रह्माभिन्ने कार्ये सत्यत्वे सत्यपि अद्वैतश्रुत्यबाधस्य सुवचत्वात्. शिलाकाष्ठवद् भिन्नसत्ताकत्वाभावाद् इति समाधानाशयः. अतो मायिकत्वपक्षएव **“सर्वं खलु इदं ब्रह्म”**(छान्दो.उप.३।१४।१), **“पुरुषएव इदं सर्वम्”** (श्वेता.उप.३।१५) इत्यादिश्रुतिविरोधः. मायिकस्य सर्वस्य ब्रह्मत्वायोगात्. मायायाः कारणत्वानंगीकारे बन्धसत्यत्वापत्त्या मोक्षोच्छेदेन शास्त्रवैफल्यापाताद् मायावादः आक्षिप्यते इति आशयेन शङ्कन्ते **ननु माया** इति. **तरति** इति. छान्दोग्ये भूमविद्यायाम् इदं श्रूयते. समादधते **बन्धस्य अविद्याकार्यत्वे** इत्यादिना, त्वत्सम्मतरीतिकाविद्याकार्यत्वस्य अभावे इति अर्थः. वस्तुतस्तु बन्धः अविद्याशक्तिकार्यं शुक्तिरजतवद् मिथ्यैव, अतएव ब्रह्मज्ञानात् तन्निवृत्तिः. साच अविद्या न भावरूपाज्ञानं; किन्तु, भगवच्छक्तिविशेषएवेति न त्वन्मतप्रवेशः. स्पष्टञ्च इदं निबन्धादिषु **“तच्छक्त्या अविद्ययातु अस्य जीवसंसारः उच्यते”** (त.दी.नि.१।२३) इत्यादौ. तथापि **“पिशाचः पिशाचभाषया”** (   ) इति न्यायाद् इह उत्तरम्. **किञ्च “इन्द्रो मायाभिः”** (बृह.उप.२।५।१९) इत्यादि. अयं भावः : यच्च “अत्रैव शाङ्कराः” (शु.मा.२२) इति मार्तण्डश्लोकटीकास्थं पाठं भित्त्वा किञ्चिद् अनूदितं तत्र टीकाकाराभिप्रेतपाठस्तु “‘पुरुरूपः ईयते’ इति मन्त्रः, माया ज्ञानं प्रति करणं नतु ब्रह्मणो बहुरूपत्वे” (शु.मा.प्र.२२) इति ज्ञेयः. तथाच **‘मायाभिः’**इति करणस्य क्रियान्वयित्वमेव योग्यम्. यदपि तन्न तथोक्तावपि इत्यादि अमायिकत्वम् इत्यन्तं तदपि कुशकाशावलम्बनम्. तथाहि मायया बहुभवने विवक्षितेतु पूर्वार्द्धएव ‘मायया’इति वदेत्. नच तथोक्तावपि विधेयभेदेन वाक्यभेदानिवारणम् इति शंक्यं, मायया भवनस्यैव विधेयत्वाद्. अथ मायायाः करणत्वेन विधानाद् **“दध्ना जुहोति”** इत्यादौ दध्यादेरिव विधेयतया वाक्यभेदप्रसंगः इति चेद्, न; एकहेलया बहूनां विधानस्य वाक्यभेदाप्रसञ्जकत्वात्. यथा **“सोमेन यजेत”** इत्यत्र

सोमलतागुणविशिष्टो यागो विधीयते. यथावा **"उद्भिदा यजेत पशुकामः"** इति पशुरूपफलविशिष्टः उद्भिद्यागः. यथाच **"यदाग्नेयो अष्टाकपालो अमावास्यायां च पौर्णमास्यां च अच्युतो भवति"** (तैत्ति.संहि.२।६।३।२) इति द्रव्य-देवता-कालादिकं वाक्यान्तरेण अप्राप्तम् एकहेलया विधीयते. एवं सगुणकर्मोत्पत्तिवाक्यफलगुणवाक्यादिषु बहुविधानं द्रष्टव्यम्. उक्तञ्च **"प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः अप्राप्तेतु विधीयन्ते बहवोऽपि एकयत्नतः"** (तन्त्रवा.२।२।६) इति. अतः तथोक्तौ दोषाभावाद् मायया बहुभवने अभिप्रेते तथैव वदेत्. वदतितु स्वयं बहुभवनं मायाभिश्च पुरुरूपतया दर्शनम्. अतो द्वैतप्रत्ययएव मायाजन्यो नतु कार्यम् इति मन्त्राशयः, पुरोवादवैलक्षण्यस्य आवश्यकत्वात्. नापि शब्दगौरवस्य स्पष्टप्रतिपत्त्यर्थत्वेन अदूषणत्वं वाच्यं सर्वत्र तथा अङ्गीकारे **"एकस्य एवं पुनः श्रुतिः अविशेषाद् अनर्थकंहि स्याद्"** (जै.मी.सू.२।२।२) इत्यादिपूर्वतन्त्राधिकरणविरोधात्. नापि मायिकविज्ञानविषयस्य मायिकत्वमेव इति नियमः शक्यवचनः. उपनेत्रादिना स्थूलो अयं 'क'कार इति प्रत्ययस्य स्थौल्यांशे भ्रमतया मायिकत्वेऽपि तद्विषये वर्णे मायिकत्वाभावात्. प्रसह्य तथा नियमस्य अङ्गीकारे मूलोक्तरीत्या ब्रह्मण्यपि मायिकतापाताच्च. तस्माद् यथा पूर्वोक्तस्थले स्थौल्यप्रतीतिरेव मिथ्या नतु वर्णः. तथा अत्र भेदप्रतीतिरेव मायिकी नतु कार्यम् इति सारः.

दृष्टिसृष्टिवादं दूषयन्ति **यत्तु विवर्त...** इत्यादिना **"ज्ञानस्वरूपमेव आहुः"** (द्र.विष्णुपुरा.१।४।२०) इति सति आर्षत्वे अस्य ज्ञानस्वरूपं ब्रह्मस्वरूपम्. अर्थस्वरूपं नामरूपव्याकरणानुरोधाद् घटादितत्तत्पदवाच्यपरिछिन्नार्थरूपम् इति अर्थः स्पष्टञ्च इदम् आकरे समन्वयाद्यधिकरणेषु. वासनासन्तानवादस्तु विद्वन्मण्डने निराकृतः इति उत्तरभागे सम्यक् परिहरिष्यते. स्वप्ने प्रकाश्यविषयस्तु मायोपादानकम् ऐन्द्रजालिकवस्तुवद् ईश्वरप्रदर्शितं वक्ष्यते. अतो तत्र नटादिवद् ईश्वरस्य प्रकाशकतया कर्मकर्तृभावाविरोधेऽपि प्रकृतेः तद्विरोधः सुस्थः इति बोध्यम्. समाधाने **विज्ञानं यज्ञम्** इति. यद्यपि अस्मिन् ब्रह्मवल्लीवाक्ये 'विज्ञान'शब्दार्थो जीवो नतु बुद्धिः स्पष्टञ्च

इदं ''**व्यपदेशात् च क्रियायां न चेद्, निर्देशविपर्ययः**'' (ब्र.सू.२।३।३६) इति सूत्रे तथापि तन्मतानुरोधाद् बुद्धिपरः सः इति आश्रित्य एवम् उक्तम्. उपनिषद्भाष्ये तैः विज्ञानस्य कोशत्वाङ्गीकारात्. अथ बुद्धिरेव सृष्टिः चेद्, बुद्धिमन्तो जीवाः नाना एकएव वा न द्वितीयः, शुको मुक्तो वयं बद्धाः इत्यादिव्यवस्थाभङ्गप्रसङ्गाद्, एकमुक्तितः सर्वमुक्त्यापत्त्या शास्त्रोच्छेदात् च. आद्यः चेत्, कस्य बुद्धिः सृष्टिरूपा? अन्यतमस्य चेत्, सर्वेषां जगदप्रत्ययः प्रसज्येत. अविशेषात् सर्वेषाम् इति चेत्, तत्तत्काले सर्वेषां बुद्धिः परस्परसङ्गतिमत्येव उत्पद्यते इत्यत्र किं नियामकम्? यदा देवदत्तः स्वप्ने यज्ञदत्तं स्वनिकटे अधीयानं कल्पयति तदा यज्ञदत्तोऽपि स्वप्ने स्वम् अध्यापयन्तं तं कल्पयेदेव इति नहि नियमो अस्ति. तेन स्वप्नदृष्टान्तेन पूर्वपक्षे दृष्टिसृष्टिवादस्य समर्थनं निरस्तं ज्ञेयम्. अध्यारोपापवादादिकन्तु पुरस्ताद् निराकरिष्यते. **तं गगनम्** इति, **तं** श्रोतृपुरुषं ''गतिबुद्धी''त्यादिना कर्मत्वम्. **गगने नैल्यप्रत्ययस्तु वस्तुस्वभावाद्** (   ) इति आवरणभङ्गादिषु. ''**अथवा शून्यवद् गाढं व्योमवद् ब्रह्म तादृशम्**'' (त.दी.नि.१।७५) इत्यादिस्थलेषु विस्तरः. तथापि तद्भाषयैव तं बोधयन्ति. **अत्रिवृत्कृतस्य** इत्यादिना त्रिवृत्करणोक्तिस्तु छान्दोग्यानुरोधात्. **सूत्रकार**इत्यादि द्वितीयस्य तृतीयपादादौ तत्कृतो यत्नः इति भावः. **दृष्टिसृष्टिवादो वेदवादिभिः न अङ्गीकरणीयः** इति. द्वितीयस्य द्वितीये पादे सूत्रकृता अर्धवैनाशिकमते शिष्टापरिग्रहाद् अनपेक्षणीयत्वम् उक्त्वा सर्ववैनाशिकमतस्यापि सम्यग् दूषिततया तत्रापि अनपेक्षणीयतायाः बोधनात् तत्र उक्तदूषणानाम् अत्रापि अवताराच्च इति भावः.

इदं रजतम् इत्यादि. इदं नैयायिकाभिमताम् अन्यथाख्यातिम् अनुसृत्य उक्तं वस्तुतस्तु अन्यख्यातिरेव स्वीक्रियते. इन्द्रियसम्प्रयोगजनकक्रियाविषयाद् भिन्नार्थप्रतिपत्तिरूपायाः बुद्धिवृत्तेरेव विपर्यासपदार्थत्वात्. अतः तृतीयस्कन्धषड्विंशाध्याये ''**संशयो अथ विपर्यासो निश्चयः स्मृतिरेव च स्वापः इति उच्यते बुद्धेः लक्षणं वृत्तितः पृथक्**'' (भाग.पुरा.३।२६।३०) इत्यत्र सुबोधिन्यां ''**विपर्यासो भिन्नार्थप्रतिपादकः क्रियाज्ञानयोः च भिन्नविषयत्वम्. अनेन अन्यख्यातिरेव सिद्धान्तः इति उक्तम्**'' (सुबो.३।२६।३०) इति

आचार्यचरणाः क्रिया शुक्त्यादिविषयिका, ज्ञानं रजतादिविषयकम् इति अर्थः. अन्यथाख्यातिपक्षेतु कस्य अन्यथात्वं विषयस्य ज्ञानस्य वा? न आद्यः, देवदत्तस्य विपर्यासे यज्ञदत्तादेरपि तथा प्रतीत्यवश्यम्भावापत्तेः. द्वितीयः चेद् रजताकारं ज्ञानं शुक्तिम् आलम्बते इति वाच्यं, तादृशज्ञाने रजतत्वं प्रकारतया भासते इति वा. तथासति शुक्त्या स्वात्मसमर्पणे रजतत्वेन "शुक्तिं जानामि" इति अनुव्यवसायापत्तिः असमर्पणे ज्ञानस्य 'तदनालम्बकत्वं' भवतितु तत्र रजतम् "अहं जानामि" इत्येव अनुव्यवसायः. अयञ्च वादः तत्रत्य सुबोधिनीतत्प्रकाशयोः ख्यातिवादादिषु च विस्तरेण निराकृतः. नापि बाह्याभिप्रेतात्मख्यातिः स्वीक्रियते. विज्ञानवादे "आत्मनो बुद्धिरूपत्वात् ख्यायमानबुद्धिरूपोऽपि सएव" इति आत्मख्यातिः. तत्र आत्मनो तथात्वे "घटो अहम्" इत्यादिप्रत्ययापत्तिः इति अन्यत्र विस्तरः. अस्माकन्तु बुद्धेः तत्त्वान्तरत्वाद् विपर्यासस्य तद्वृत्तित्वेऽपि न सा. भाट्टास्तु रजतसंस्कारवतएव शुक्तौ तथा प्रत्ययनियमात् तत्र रजतं स्मर्यते रजतत्वन्तु न स्मर्यते, कर्तृगतदोषाद्, दोषाश्च अन्यचित्तत्वादयः इति ख्यातिवादे स्वीकुर्वन्ति. तथासति "रजतम् अनुभवामि" इति अनुव्यवसायविरोधः. तत्र 'स्मरामि' इति अनुव्यवसायस्य औचित्यात्. तदुपादानार्थप्रवृत्त्यादिविरोधश्च. नहि कश्चिदपि भोज्यं स्मरन्नेव भोक्तुम् आरभते. प्राभाकरास्तु तत्र ग्रहण-स्मरणात्मकं ज्ञानद्वयं मन्यन्ते. तत्र "शुक्तिम् अनुभवामि, रजतं स्मरामि" इति अनुव्यवसायद्वयापत्तिः. सर्वत्र विशिष्टज्ञाने विशेषणस्मरणमात्रेण निर्वाहापत्तिश्च इत्यादिः इतरत्र प्रपञ्चः. नापि अनिर्वचनीयं रजतं विषयनिष्ठाविद्यया जन्यते इति अनिर्वचनीयख्यातिः पराभिमता शक्यस्वीकाराः संस्काराभावेऽपि तत्प्रतीतिप्रसङ्गात्. संस्कारप्राबल्ये अन्यख्यातिः तदप्राबल्ये स्मरणञ्च उपपद्यते इति अन्यत्र विस्तराच्च.

तथाच विषयेन्द्रियसम्प्रयोगेण प्रथमं सामान्यज्ञाने जाते यदा बुद्धिः सत्त्वाविष्टा तदा निश्चयः. "**सत्त्वात् सञ्जायते ज्ञानं**"(भग.गीता १४।१७), "**प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये**" (भग.गीता १८।३०) इति भगवद्वाक्यात्. रजसाविष्टयातु संशयः "**अयथावत् प्रजानाति बुद्धिः सा**

पार्थ! राजसी'' (भग.गीता १८।३१) इति उक्तेः. यदातु तमोगुणाविष्टा तदा मायानुग्रहात् संस्कारप्राबल्यात् च तदनुगुणं पदार्थान्तरम् अन्तरोत्पाद्य विषयीकरोति ''**प्रमादमोहौ तमसो भवतो अज्ञानमेव च**'' इति ''**सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ! तामसी**'' (भग.गीता १४।१७,१८।३२) इति च उक्तेः. एतदेव सर्वम् अभिप्रेत्य ''**अनुमितमन्तरा त्वयि विभाति मृषैकरसे**'' (भाग.पुरा.१०।८४।३७) इत्यत्र सुबोधिन्यां ''**प्रत्यक्षेतु रजतं न दृश्यते, इन्द्रियार्थसन्निकर्षस्य शुक्तिविषयत्वात्. नहि रजतेन सह सन्निकर्षो अस्ति सतोरेव संयोगात्. 'सत्सम्प्रयोगे पुरुषस्य इन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षम्' (जै.मी.सू.१।१।४) इति प्रत्यक्षलक्षणम्. रजतन्तु तदनन्तरं बुद्ध्या जन्यते, विषयीक्रियते च तत्र सा बुद्धिरेव करणम्**'' (सुबो.१०।८४।३७) इति ''**किञ्च अन्तरा विभाति इन्द्रियार्थयोः मध्ये भाति तद् मृषा**'' (तत्रैव) इति च उक्तम्. द्वितीयस्कन्धनवमाध्याये च ''**ऋते अर्थम्**'' (भाग.पुरा.२।९।३३) इत्यत्र विषयतायाः मायाजन्यत्वादिकं निर्णीतम्. अधिकन्तु सुबोधिन्यादिभ्यः पुरुषोत्तमचरण-लालूभट्टादीनां ख्यातिवाद-ख्यातिविवेकादिभ्यः च अवधेयम्. एतदेव उरसिकृत्य **वस्तुतश्च** इत्यादि उक्तम्. एवञ्च यथा तव **इदं रजतम्** इत्यत्र इदम् अंशो न मिथ्या; किन्तु, रजतमेव. तथात्र ''**पुरुरूपः ईयते**'' इत्यनेन भगवदात्मकेषु रूपेषु नानात्वमेव मिथ्या, नतु रूपाणि इति न कोऽपि विरोधः. सहस्राक्षे नहि शुक्ति इत्यादि उक्तिस्तु परमताज्ञानात्. आविर्भावः सत्कार्यवादश्च सम्यक् समर्थयिष्यते **तद् न सम्भवति** इत्यादि. ''परमात्मनो रूपाणि मायिकानि मायिकज्ञानविषयत्वात् स्वाप्निकगजादिवद्'' इत्यनुमानेन मायिकत्वं साध्यम्. तत्र हेतोः साध्यसामानाधिकरण्यं विवक्षितम्, अन्यथा व्याप्त्यसिद्धेः. तथाच स्वाप्निकान्तर्भावेन उक्तविषयत्वनिष्ठसाध्यसामानाधिकरण्यमात्रेण न तत्सिद्धिः; किन्तु, तेषु मायिकत्वं येन सम्बन्धेन स्वरूपात्मकेन विद्यते तदवच्छेदकं तादृशगजादिवृत्ति यद्रूपम् उत्तरकाले बाधितत्वतत्तन्नियतोपादानशून्यत्वादिलक्षणं सामानाधिकरण्येन तद्विशिष्टं यन्मायिकज्ञानविषयत्वं तेनैव तत्सिद्धिः. विशिष्टस्य हेतुतांगीकारे युक्तिम् आहुः **एवञ्च** इति. **अन्यथा** इति यत्र क्वचिद् दृष्टसामानाधिकरण्यमात्रेण हेतुतायाः स्वीकारे. ननु मायिकज्ञानविषय-

त्वाद् इत्यत्र ‘ज्ञान’पदम् अनुभवमात्रे परमतानव्यभिचारः इति चेद्, मा एवं; स्वप्ने देवतादिदर्शने तदानीं तन्मायिकज्ञानगोचरतांगतानामपि तेषाम् अमायिकतया व्यभिचारानपायात्. नच स्वप्नोपलब्धानाम् अस्वप्नादीनामपि मायिकत्वं शङ्क्यं, तदुक्तभाविवृत्तान्तासम्भवस्य तदानीं तदुक्तमन्त्रादिमृषाभावस्य च प्रसङ्गात्, स्वप्ने साक्षात्तद्दर्शनादिबोधकशास्त्रविरोधात् च. तथाहि महाभारते वनपर्वणि त्रिशतमाध्याये “**द्वादशे समतिक्रान्ते वर्षे प्राप्ते त्रयोदशे पाण्डूनां हितकृच्छक्रः कर्णं भिक्षितुम् उद्यतः अभिप्रायम् अथो ज्ञात्वा महेन्द्रस्य विभावसुः कुण्डलार्थे महाराज सूर्यः कर्णम् उपागतः महार्हे शयने वीरं स्पर्ध्याः तरणसंवृते शयानमतिविश्वस्तं ब्रह्मण्यं सत्यवादिनं स्वप्नान्ते निशि राजेन्द्र दर्शयामास रश्मिवान् कृपया परया आविष्टः पुत्रस्नेहाच्च भारत!, ब्राह्मणो वेदविद् भूत्वा सूर्यो योगर्द्धिरूपवान् हितार्थम् अब्रवीत् कर्णं सान्त्वपूर्वम् इदं वचः**” (महाभा.३।३००।५-९) इति साक्षात्सूर्यस्य स्वप्ने कर्णेन दर्शनम् उक्तम्. अत्र “**स्पर्ध्यं विमर्दसहं स्पृहणीयं वा स्वप्नान्ते स्वप्नमध्ये**” इति नीलकण्ठचतुर्धरः(रौ!?). देवानाञ्च योगशक्त्या समाधिकाल-इव स्वप्नकालेऽपि अन्तःप्रवेशादिकम् उपपद्यते अतो न मायिकत्वशङ्कापि. एतदेव इह सूर्यो योगर्धिरूपवान् इत्यनेन स्फुटीकृतम्. अग्रेच “**कर्ण! मद्वचनं तात! शृणु सत्यभृतां वर**” (महाभा.३।३००।१०) इत्यादिसूर्यवचनेषु. “**उपायास्यति शक्रः त्वां पाण्डवानां हितेप्सया ब्राह्मणच्छद्मना कर्णकुण्डलोपजिहीर्षया**” (तत्रैव ११) इत्यादिः पारमार्थिकवृत्तान्तः “**तस्मै प्रयाचमानाय न देये कुण्डले त्वया**” (तत्रैव १५) इत्यादिना वास्तवं श्रेयः. “**यदि दास्यसि कर्ण त्वं सहजे कुण्डले शुभे आयुषः प्रक्षयं गत्वा मृत्योः वशम् उपैष्यसि कवचेन समायुक्तः कुण्डलाभ्यां च मानदः, अवध्यस्त्वं रणे अरीणाम् इति विद्धिः वचो मम. अमृताद् उत्थितंहि एतद् उभयं रत्नसम्भवं, तस्माद् रक्ष्यं त्वया कर्ण जीवितं चेत् प्रियं तव**” (तत्रैव १८-२०) इति कवचकुण्डलयोः वास्तवं फलं स्वरूपं च अभ्यधायि. ततः “**को मामेव भवान् प्राह**” (तत्रैव २१) इति कर्णप्रश्ने “**अहं तात! सहस्रांशुः सौहृदात् त्वां निदर्शये**” (तत्रैव २२) इति वक्त्रा स्वस्य देवत्वम् उक्तम्. ततः सूर्यसाक्षात्कारवता कर्णेन “**श्रेयएव मम**

अत्यन्तं यस्य मे गोपतिः प्रभुः. प्रवक्ता अद्य हितान्वेषी शृणुष्व इदं वचो मम प्रसादये त्वां वरदम्'' (तत्रैव २३-२४) इत्यादिना यावद् अध्यायसमाप्ति स्वस्य दाननिर्बन्धे दर्शिते उत्तराध्याये सूर्येण जीवित्वस्य अवश्य रक्षित्वम् इदञ्च मया मद्भक्तत्वात् तुभ्यम् उच्यते इति विस्तरेण उक्तेः. तत्रैव ''**अस्ति च अत्र परं किञ्चिद्**'' (तत्रैव ३०१।९) इत्यादिना ''**काले वेत्स्यति तद् भवान्**'' (तत्रैव ३०१।१०) इत्यन्तेन मत्तः कुन्त्याम् उत्पन्नः त्वम् इति पारमार्थिकवृत्तान्ते च देवगुह्यतया प्रोक्ते द्व्युत्तरत्रिशततमाध्याये पुनः कर्णेन निर्बन्धे अनुज्झिते इन्द्राद् अमोघदिव्यशक्तिं गृहीत्वा कुण्डलादि देही इति भास्वता भाषितम् इति निरूप्य वैशंपायन आह ''**एवम् उक्त्वा सहस्रांशुः सहसा अन्तरधीयत ततः सूर्याय जप्यान्ते कर्णः स्वप्नं न्यवेदयद् यथादृष्टं यथातत्त्वं यथोक्तम् उभयोः निशि तत् सर्वम् आनुपूर्व्येण शशंसा अस्मै वृषः तदा, तच्छ्रुत्वा भगवान् देवो भानुः स्वः भानुसूदनः उवाच तं तथा इत्येव कर्णं सूर्यः स्मयन्निव**'' (तत्रैव ३०२।१८-२०). अत्रापि अन्तर्धानोक्त्या साक्षाद् देवत्वं दर्शितम्. जागरितदशायामपि साक्षात् सूर्येण तथा इति उक्तम् इति कथनेन च तद् दृढीकृतम्. अस्मै सूर्याय, वृषः कर्णः. तथा द्रोणपर्वणि स्वप्ने अर्जुनाय शिवेन पुनः पाशुपतास्त्रम् उपदिष्टम् इति वर्ण्यते तदपि उदाहरिष्यामः. अतो हेतोः व्यभिचारितया मायिकज्ञानविषयत्वेऽपि रूपाणां न मायिकत्वं देवादिवत्. एतेन किञ्च स्वप्नादेः इत्यादि अपसिद्धान्ते इत्यन्तं निरस्तम्. स्वप्नसृष्टिस्वरूपं निर्णेतुम् आहुः **स्वप्ने असतो विषयस्य** इत्यादि. अयं भावः : तृतीयस्य द्वितीये अस्मिन् पादे प्रथमाधिकरणे तत्स्वरूपं विचारितं तत्र ''**सन्ध्ये सृष्टिः आहहि**'' (ब्र.सू.३।२।१) इति प्रथमसूत्रे ज्योतिर्ब्राह्मणस्थां ''**न तत्र रथाः न रथयोगाः न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजते**'' (बृह.उप.४।३।१०) इति श्रुतिम् आदाय स्वप्नेऽपि सृष्टेः सम्भवात्. तस्याः सत्यत्वं पूर्वपक्षविधया उक्त्वा ज्योतिर्ब्राह्मणे ''**स्वयं विहृत्य स्वयं निर्माय**'' (तत्रैव ४।३।९) इति जीवकर्तृकतायाः प्रतीतेः तां वारयितुम् आह ''**निर्मातारं च एके पुत्रादयश्च**'' (ब्र.सू.३।२।२) इति एके कठशाखिनः परमात्मानं तत्सृष्टिकर्तारं आमनन्ति. यथा कठवल्लीषु ''**यः एषः सुप्तेषु**

जागर्ति कामं कामं पुरुषो निर्मिमाणः, तदेव शुक्रं तद् ब्रह्म तदेव अमृतम् उच्यते तस्मिन् लोकाः श्रिताः सर्वे तदु न अत्येति कश्चन, एतद् वै तद्" (कठोप.२।२।८) इति. कामाश्च अत्र काम्यन्तः इति व्युत्पत्त्या पुत्रादयो नतु कामनाएव. "**ये ये कामाः दुर्लभाः मर्त्यलोके**" इति उपक्रमे ततः पूर्वं "**शतायुषः पुत्रपौत्रान् वृणीष्व**" (तत्रैव १।१।२५,१।१।२३) इति तेषामेव तथात्वश्रावणात्. तथाच यः एषः "**स्थाणुम् अन्ये अनुसंयन्ति**" (तत्रैव २।२।७) इति प्राप्यतया उक्तः परमात्मा सएव जीवेषु देहेन्द्रियादिषु वा सुप्तेषु स्वप्ने जीवस्य तान् तान् सर्वान् कामान् निर्मिमाणः इति भगवतएव नटवत् तत्कर्तृत्वं बोधितम्. यथा नटः सामाजिककामविषयान् सृजते तद्वद् निर्माणस्य "**कामं कामम्**" इत्यनेन प्रतीतेः. एतेन ज्योतिर्ब्राह्मणेऽपि तस्यैव कर्तृत्वम्. जीवस्यतु तदिच्छया गौणं तद्, अन्यथा स्वदुःखजनकं भयादिकं न सृजेत्. श्रूयतेतु तत्रैव भयादिकमपि. भगवांस्तु नटः सर्पवह्निज्वालादिकमिव कौतुकार्थं तदपि करोति. दृश्यते च रत्नावल्यां चतुर्थेके राजादीनां भयद्वारा अग्रे कौतुकार्थम् ऐन्द्रजालिकेन राजगृहेषु वह्नेः निर्माणम्. कठवल्लीवाक्यन्तु निःसंदिग्धं भगवतः कर्तृतां बोधयति. '**जागर्ति**' इतिवचनाद् "**अन्यत्र धर्माद् अन्यत्र अधर्माद्**" (कठोप.१।२।१४) इति ब्रह्मप्रकरणात् "**तदेव शुक्रं तद् ब्रह्म**" इति वाक्यशेषात् सर्वलोकाश्रयत्वानतिक्रमणीयत्वलिङ्गात् च. एवं भगवत्कृतत्वादपि सत्यत्वे प्राप्ते सिद्धान्तम् आह. "**मायामात्रन्तु कार्त्स्न्येन अनभिव्यक्तस्वरूपत्वात्**" (ब्र.सू.३।२।३) 'तु'शब्दः सत्यत्वपूर्वपक्षनिरासार्थः "**सन्ध्ये सृष्टिः मायामात्रं**" (ब्र.सू.भा.३।२।३), व्यामोहिका भगवच्छक्तिः माया. "**मायाञ्च तदुपाश्रयाम्**" (भाग.पुरा.१।७।४) इति उक्तेः. तयैव जीवस्य सम्मोहनोक्तेश्च तन्मात्रं तदेकोपादानिका कुतः "**कार्त्स्न्येन अनभिव्यक्तस्वरूपत्वाद्**", "**देशकालौ विषयसन्निधिः इन्द्रियव्यापारो बाधाभावो च इति कृत्स्नत्वं तेन**" (ब्र.सू.भा.प्र.३।२।३) जगद् अभिव्यज्यते. स्वाप्निकन्तु न तथा नापि स्वाप्निकघटादिस्वरूपं मृत्कुलालचक्रादिनियतकारणैः अभिव्यज्यते तस्मात् तथा. अतएव "**न तत्र रथाः**" इत्यादिना तत्तद्वस्तुनो असत्त्वं बोध्यते सृजते इतितु सृष्टिरेव उच्यते नतु सत्ता. यथा छान्दोग्यब्रह्मवल्ल्यादिषु प्रपञ्चसृष्टिम्

उक्त्वा तत्सत्यता उक्ता न तथा अत्र. विस्तरस्तु आकरेषु अवधेयः. तथाच अत्र द्वितीयसूत्रे तत्सृष्टेरपि भगवत्कर्तृकतायाः बोधनात् तत्कृतौ इच्छापूर्वकतायाः स्वतोलाभाद् अन्यथा सार्वज्ञ स्वातन्त्र्यादिभङ्गप्रसङ्गात्. “**कामं कामम्**” इति वीप्सया क्रियाविशेषणत्वादरेण च इच्छापूर्वकतायाः वाक्यतोऽपि लाभात्. आवृत्त्याः णमुलन्तत्वादरेऽपि (द्र.पाणि.सू.७।१।९१) तल्लाभात्. व्यामोहकनटादिकृतावपि इच्छापूर्वकत्वदर्शनाच्च. किञ्च एवम् इत्यादिः न स्याद् इत्यन्तः प्रलापः अपास्तः. मायिकत्वादेव तत्र कारणे सतः आविर्भावो न अभ्युपगम्यते. नहि मायिकघटफलादीनां मृद्वृक्षादिषु पूर्वं सत्त्वं कस्यापि अभिमतम्. नच निर्मातृसूत्रस्य पूर्वपक्षसमर्थकत्वाद् न एवम् इति वाच्यं, तत्र तत्सृष्टिसत्यतामात्रस्य पूर्वपक्षतया तत्समर्थकतया उक्तस्यापि वास्तवस्य भगवता तत्सृष्टेः निर्माणस्य तत्त्वाभावात्. अतएव सत्यतामात्रम् उत्तरत्र निराकृतं नतु निर्माणमपि अन्यथा तदपि निराकुर्यात्. अतो “अप्रतिषिद्धम् अनुमतं भवति” इति न्यायात् तत्सम्मतमेव. अन्यथा “**न विलक्षणत्वाद्**” (ब्र.सू.२।१।४) इति अधिकरणे “**अभिमानिव्यपदेशः**” (ब्र.सू.२।१।५) सूत्रस्य पूर्वपक्षस्थत्वाद् “**मृद् अब्रवीद्**”, “**अपो अब्रुवन्**” (शतप.ब्रा.६।१।३-।२।४) इत्यादौ तद्व्यपदेशोऽपि न आद्रियेत. तस्मात् प्रत्यक्षासन्दिग्धकठश्रुतिसिद्धं निर्मातृत्वं न बाधितुं शक्यम्. “**सुषुप्त्युत्क्रान्त्योः भेदेन**” (ब्र.सू.१।३।४२) इत्यत्र ज्योतिर्ब्राह्मणस्यापि साक्षाद्ब्रह्मपरतायाः सिद्धेश्च **तद् न युक्तम्** इत्यादि. अयम् आशयः: यत्तु किञ्च पारमार्थिक इत्यादिना अपेक्ष्येत इत्यन्तं, तदसत्. व्यभिचारदर्शनेन तादृशनियमस्य अशक्यत्वात्. पारमार्थिकस्य सूर्यस्य तदुक्तवृत्तस्य च विज्ञानं निद्रारूपां स्वप्नाख्यबुद्धिवृत्तिरूपां च सामग्रीम् अपेक्षमाणं प्राग् उदाहृतम्. तत्र “**युद्धे पराजयः**” कुन्तीमुखात् सूर्यपुत्रताश्रवणञ्च इत्यादिभाविपारमार्थिकवस्तुनः वर्तमानस्य इन्द्रनिश्चयस्य तत्सन्निहितदिव्यशक्तेश्च विज्ञानं स्वप्नद्वारैव आप्तं कर्णेन तथा द्रोणपर्वणि एकोनाशीतितमाध्याये “**ततो अर्जुनस्य भवनं प्रविश्य अप्रतिमं विभुः स्पृष्ट्वा अम्भः पुण्डरीकाक्षः स्थण्डिले शुभलक्षणे सन्तस्तार शुभां शय्यां दर्भैः वैडूर्यसन्निभैः**” (महाभा.७।७९।१) इत्यादिना उत्तमस्वप्नयोग्यशय्यानिर्माणम् अर्जुनस्वापार्थम् उक्त्वा “**स्मयमानस्तु गोविन्दः फाल्गुनं प्रत्यभाषतः सुप्यतां पार्थ भद्रं**

ते कल्याणाय व्रजामि अहम्” (तत्रैव ५) इति स्वापम् आज्ञाप्य भगवति स्वशिबिरं गतवति अशीतितमाध्याये “**कुन्तीपुत्रस्तु तं मन्त्रं स्मरन्नेव धनञ्जयः प्रतिज्ञाम् आत्मनो रक्षन् मुमोह अचिन्त्यविक्रमः तन्तु शोकेन सन्तप्तं स्वप्ने कपिवरध्वजम् आससाद महातेजा ध्यायन्तं गरुडध्वजः**” (तत्रैव ८०।१-२) इत्यादिना स्वप्ने भगवद्दर्शनं तदाज्ञया पाशुपतमन्त्रलाभार्थं तेन गृहीतदक्षिणभुजस्य अर्जुनस्य आकाशे गमनं तत्तत्स्थलावलोकनपुरःसरमहेश्वरदर्शनं ततो मन्त्रादिलाभश्च अध्यायद्वयेन निरूपितः. एवम् अन्यत्रापि द्रष्टव्यम्.

मूले “**निध्याद्**” इत्यादिपदं मन्त्रादिसङ्ग्राहकम्. वस्तुतस्तु प्रकृतश्रुतौ ज्ञानविषयस्य भेदस्य मायिकत्वाद् न काऽपि क्षतिः. किञ्च द्वितीयस्कन्धनवमाध्याये “**ऋते अर्थम्**” (भाग.पुरा.२।९।३३) इत्यत्र सुबोधिनीप्रकाशे “**शुक्तिरजतादावपि बुद्धिवृत्तेः सत्यायाएव रजतरूपेण अन्तराख्यानाद् अन्तरा बुद्धिरेव पिधानं नतु शुक्तेः**” (सुबो.प्र.२।९।३३) इति उक्तेः. तदा विषयस्यैव मृषात्वं नतु ज्ञानस्य स्वरूपतः तत्. अतः ज्ञानस्य मायिकत्वं मायिकविषयावगाहित्वाद् औपचारिकम्. अतोऽपि न कोऽपि दोषः. किञ्च प्रकृते बहुवचनान्त-‘माया’शब्दार्थइन्द्रियवृत्तिरूपज्ञानानि सन्ध्याधिकरणादौ भास्कराचार्यादिभिः उदाहृतं, “**माया वयुनम् अभिख्या**” (निरु.३।९) इति वैदिकनिघण्टुवचनमपि अत्र साधकम्. ऐन्द्रियकज्ञाने च इन्द्रियवृत्तीनां क्लृप्तत्वात् त्वदुक्तरीत्यापि शङ्कावकाशः. तदेतद् आहुः **वस्तुतस्तु** इति. **प्रत्युक्तम्** इति. अयम् आशयः : यच्च तस्माद् इत्यादि पुष्णाति इत्यन्ते तदेव मायिकज्ञानमूलकम्. पूर्ववाक्यप्राप्ते भवने प्रतीतिमात्ररूपतायाः ज्ञाने रूपेषु वा मायायाः हेतुतायाश्च विधाने तवैव वाक्यभेदप्रसङ्गात्. “**प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः** (तन्त्रवा.२।२।६) इति न्यायात्. अन्यथा “**चित्रया यजेत**” इत्यादौ “**पशुना यजेत**” इति प्राप्तपशौ चित्रत्वस्त्रीत्वरूपगुणद्वयं विधीयते इत्यादिस्वीकर्तुं शक्येत, नतु दधिमध्वादिसंसृष्टप्राजापत्यादि प्रकृतश्रुतौच त्वदभिमतं पारिभाषिकम् अज्ञानं ‘माया’पदेन ग्रहीतुम् अशक्यं बहुवचनविरोधात्, शङ्कराचार्यैरपि प्रज्ञापरतया व्याख्यानात् च. ग्रहिलतया तद्ग्रहणे करणतानादेश्च “कृते सत्येऽपि शरैः

शातितपत्रः'' इत्यादौ शातनक्रियायामिव एकदेशे पुंरुत्वएव अन्वयः इति भेदस्यैव आविद्यकत्वसिद्धिः. वस्तुतस्तु इन्द्रियवृत्तयएव अत्र 'माया'शब्दार्थः इति असकृद् अवोचाम. किञ्च इदं वाक्यं ऋग्वेदे पठ्यते तत्र ''**स्वादुष्किलायं मधुमां उतायम्**'' (ऋक्.संहि.६।४७।१) इत्यादि एकत्रिंशद् ऋचे सूक्ते पञ्चसोमपराः ऋचः उक्त्वा षष्ठीम् आरभ्य इन्द्ररूपेण परमात्मा निरूपितः. तत्र ''**इन्द्रप्रणः पुरः एतेव पश्य प्र नो नय प्रतरं वस्यो अच्छ भवा सुपारो अतिपारयो नो भवा सुनीतिरुत वामनीतिः उरुं नो लोकम् अनुनेषि विद्वान् सर्वज्ज्योतिः अभयं स्वस्ति ऋष्वा त इन्द्र स्थविरस्य बाहू उपस्थेयाम शरणाः बृहन्ता**'' (तत्रैव ७-८) इत्यादिऋग्भिः ''हे इन्द्र परमेश्वर! **त्वं पुरः एतेव पुरतो गन्तेव नो अस्मान् (प्र)** प्रकर्षेण **पश्य** यथा मार्गे यूथाग्रेसरः स्वरक्ष्यान् **पश्यति तथा पश्य**'' इति अर्थः. **तथा वस्यो वसीये** त्वत्सेवानुकूलं **श्रेष्ठं धनं अच्छ आभिमुख्येन प्रतरं प्रकृष्टतरं** नः **प्रणयः अस्मान् प्रापय तथा** 'सुपारः' सुष्ठुपारयिता संसारदुःखेभ्यः **तारयिता भव तथा नः अस्मान् स्तोतॄन् अतिपारयः** कामक्रोधादिशत्रून् जन्ममरणादिक्लेशान् वा **अतिक्रामय सुनीतिः शोभननयनश्च अस्माकं भव. उताऽपि च वामनीतिः वामानां वननीयानां धनानां नेता भव. यद्वा अस्मदर्थं श्रेष्ठप्रापणो भव**'' तथा ''हे इन्द्र! परमेश्वर **विद्वान्** सर्वज्ञः **त्वं उरुं विस्तीर्णं लोकम् अक्षराख्यं** स्वं धाम **नो अस्मान् अनुनेषि अनुगमय**'' (तत्रैव.सा.भा) तदेव स्पष्टयति स्वर्वद् ''**यन्न दुःखेन सम्भिन्नं नच ग्रस्तम् अनन्तरम् अभिलाषोपपन्नं च तत्सुखं स्वःपदास्पदम्**'' इति उक्तलक्षणकसुखविशिष्टज्योतिः स्वप्रकाशम् ''**अभयम्** अद्वितीयत्वाद् **भयरहितं तत्स्वस्ति क्षेमेण अनुनेषि अस्मान् अनुगमय. हे इन्द्र! स्थविरस्य** सर्वतो **वृद्धस्य ते तव सम्बन्धिनौ ऋष्वादर्शनीयौ बृहन्तौ महान्तौ बाहू सम्बाहुभ्यां धमति**'' इत्यादिश्रुतिप्रसिद्धौ ''**त्वदीयौ हस्तौ शरणाः रक्षकौ शरणतया(रक्षकतया) उपस्थेयाम उपतिष्ठेम सेवेमहि**'' (तत्रैव.सा.भा)) इत्याद्यर्थबोधिकाभिः अप्राकृताशेषविशेषशालितयैव निरूपणात्. निर्विशेषतायाः अभावात्. निर्विशेषस्य भवनासम्भवशङ्काम् उद्भाव्य तत्समाधानार्थं वाक्यशेषः इति कल्पनं शशस्य

शृङ्गभङ्गभिया नेत्रनिमीलनम् इति कल्पनासगन्धम्. अतः पूर्वार्द्धे ‘माया’पदम् अनुक्त्वा उत्तरार्धएव तथा उक्त्या भेदज्ञानमेव मायाकरणकं नतु भवनमपि इति अध्यवसीयते, उत्तरार्द्धे विवरणरूपताङ्गीकारे मानाभावाच्च. किञ्च इदं वाक्यं बृहदारण्यकेऽपि चतुर्थप्रपाठके मधुब्राह्मणाख्ये पञ्चमब्राह्मणे पठ्यते. तत्र उपक्रमोपसंहारौ “**केचिद् अत्र अतिविमलप्रज्ञा**” (त.दी.नि.१।७८) इत्यत्र आवरणभङ्गे. “**ऋते अर्थम्**” (भाग.पुरा.२।९।३३) इत्यत्र सुबोधिनीप्रकाशेच श्रीपुरुषोत्तमचरणैः विचारितौ तौ यथा “**तत्रच मैत्रेयीब्राह्मणोक्तस्य आत्मनो पृथिव्यादिषु विद्यमानत्वम् अमृतत्वं ब्रह्मत्वं सर्वात्मकत्वं च उक्त्वा ततः ‘पुरश्चक्रे द्विपदः’ (बृह.उप.२।५।१८) इत्यादिना पुरां करणं तासु प्रवेशं सर्वस्य तत्संवृतत्वञ्च उवाच. तेन प्राप्ते भेदे ‘सर्वं समाप्नोषि ततो असि सर्वः’ (भग.गीता ११।४०) इति च व्याप्तिकृता गौणी सर्वात्मकता भविष्यति इति शङ्कावारणाय ‘रूपं रूपम्’ (ऋक्.संहि.६।४७।१८) इति मन्त्रः पठ्यते. ‘अयं वै हरयो अयं वै दश च सहस्राणि च बहूनि च अनन्तानि च’ (बृह.उप.२।५।१९) इति विव्रियते च. ततो यस्य एवंरूपता अत्र विवृता ब्राह्मणोपक्रमे च उक्ताः तस्यैव ‘तद् एतद् ब्रह्म अपूर्वम् अनपरम् अनन्ततरम् अबाह्यम्’ (बृह.उप.२।५।१९) इत्यनेन तत्स्वरूपम् उक्त्वा ‘अयम् आत्मा ब्रह्मसर्वानुभूः इति अनुशासनम्’ (बृह.उप.२।५।१९) उपसंहृतम्. एवञ्च अत्र विचारे उपक्रमोपसंहारविवरणेषु मायां विनैव आत्मनः सर्वरूपत्वाभ्यासात्. स्वरूपकथने पूर्वत्वादिनिषेधेन प्राप्तस्य शून्यवादभ्रमस्य वारणाय ‘सर्वानुभूः’ इति सर्वानुभवकर्तृत्वरूपोपपत्तिकथनाच्च भ्रमरहितस्य आत्मनः सर्वभूतरूपता श्रुत्यन्तरोक्तस्वेच्छाकृतेव इति विनिगमनोत्पत्तेरपि ‘माया’पदेन इन्द्रियवृत्तिरेव तत्र ग्राह्या**” (सुबो.प्र.२।९।३३) इति. तस्माद् न अनेन विवर्तवादस्य पुष्टिः.

(१) [पुराणेषुतु प्रपञ्चस्य मायिकत्वं बहुशः उक्तं तत्तु विदुषां सुविदितम् इति न अस्माभिः उपन्यस्तम्. यत्तु “मायिकत्वं पुराणेषु वैराग्यार्थम् उदीर्यते” (त.दी.नि.१।-

८२) इति तद्गुरुवाक्यं, तत्र उच्यते, कथं भूतार्थवादरूपस्य तस्य स्वार्थे तात्पर्याभावः उच्यते ? किञ्च प्रपञ्चस्य वस्तुतो मायिकत्वाभावे त्वदीयसंगतः त्वद्गोष्ठीकुशलो न एतैः वाक्यैः वैराग्यभाक् स्यादिति परमतस्थ-पुरुषाणां बोधार्थं तानि वाक्यानि इति वाच्यम्. नच तेषां मोक्षाधिकारः त्वत्संमतइति तानिवाक्यानि व्यर्थानि अप्रमाणानि च स्युः, तस्मात् श्रौतवाक्यार्थोपबृंहकत्वमेव एतेषां वक्तुम् उचितम्.]

(२) पुराणेषुतु प्रपञ्चस्य यद् मायिकत्ववर्णनं तद् वैराग्यार्थं दोषदृष्टेः वैराग्यहेतुत्वाद्, मायिकत्वमपि मायिकसदृशत्वात्, तदपि कार्यात्मना तिरोभावशालित्वात्. अन्यथा ''तदात्मानं स्वयम् अकुरुत'' ''सत् च त्यत् च अभवद्'' (तैत्ति.उप.२।६-७) इत्यादिश्रुतिविरोधः स्यात्. नच भूतार्थवादस्य तस्य कथं स्वार्थे तात्पर्याभावः ? **इति वाच्यम्; आविर्भावतिरोभावशालित्वएव तात्पर्याभ्युपगमात्. एतेन** पुराणेषुतु प्रपञ्चस्य **इत्यारभ्य** वक्तुम् उचितम् **इत्यादिकं दत्तोत्तरम्.**

(३) सहस्राक्षे पुराणेषुतु प्रपञ्चस्य इत्यादिं वक्तुम् उचितम् इत्यन्तं भागं निरस्यन्ति **पुराणेषु** इत्यादिना **दत्तोत्तरम्** इत्यन्तेन. अयं भावः : यथा पुराणेषु मायिकत्वम् उक्तं तथा सत्यत्वमपि बहुशः उक्तमेव. यथा तृतीयस्कन्धे **''विश्वंवै ब्रह्मतन्मात्रं संस्थितं विष्णुमायया ईश्वरेण परिच्छिन्नं कालेन अव्यक्तमूर्तिना. यथा इदानीं तथाच अग्रे पश्चादपि एतद् ईदृशम्''** (भाग.पुरा.३।१०।१२-१३) इति. अष्टमस्कन्धेऽपि **''त्वयि अग्र आसीत् त्वयि मध्य आसीत् त्वयि अन्त आसीद् इदम् आत्मतन्त्रे. त्वम् आदिः अन्तो जगतो अस्य मध्यं घटस्य मृत्स्नेव परः परस्माद्** (भाग.पुरा.८।६।१०) इति. दशमेच **''त्वमेकएव अस्य सतः प्रसूतिः त्वं सन्निधानं त्वम् अनुग्रहश्च त्वन्मायया संवृतचेतसः त्वां पश्यन्ति नाना न विपश्चितो**

ये'' (भाग.पुरा.१०।२।२८) इति. अत्र **'अस्य'** इति प्रत्यक्षस्य जगतः सत्त्वमेव उक्त्वा नानात्वदर्शनस्यैव मायासंवरणहेतुकत्वम् उक्तम्. एकादशेऽपि **''प्रकृतिर्हि अस्य उपादानम् आधारः पुरुषः परः सतो अभिव्यञ्जकः कालो ब्रह्म तत् त्रितयन्तु अहम्''** (भाग.पुरा.११।२४।१९) इति. एवं स्थलान्तरेष्वपि ज्ञेयम्. यथा विष्णुपुराणे प्रथमे अंशे समाप्त्यध्याये **''तद् एतद् अक्षरं नित्यं जगन् मुनिवर अखिलम् आविर्भाव-तिरोभावजन्मनाशविकल्पवद्** (विष्णुपुरा.७।२२।५९) इति. वचनान्तराणितु आविर्भाव-तिरोभावनिरूपणे उदाहरिष्यामः. ननु एवंसति पुराणवचसां परस्परविरोधपराहतत्वाद् अप्रामाण्यम् आपद्येत इति चेद्, मैवं; मायिकत्वबोधकानां तेषां वैराग्यजननतात्पर्यकत्वेन विरोधाभावात्. नच पौराणत्वाविशेषाद् अन्यतरपक्षपातस्य अशक्यत्वं शंक्यम्. श्रुतिषु **''ऐतदात्म्यम् इदं सर्वं तत्सत्यम्''** (छान्दो.उप.६।८।७) इत्यादिवाक्यशतेन सत्यतायाः बोधनेन मायिकत्वस्य मिथ्यात्वस्य च तत्र क्वापि अश्रवणेन श्रुतिसंवादिनां स्वार्थे तात्पर्यम् तदसंवादिनाम् इतरत्र इति कल्पनस्यैव आवश्यकत्वात्. अन्यथा पूर्वतन्त्रे स्मृतिपादे **''विरोधेतु अनपेक्ष्यं स्याद् असतिहि अनुमानम्''** (जै.मी.सू.१।३।३) इतिन्यायाद् अप्रामाण्यापत्तेः.

अत्रच अयं मम वेदान्तचिन्तामणौ संग्रहः

दृढाहन्तास्पदं देहं गेहादिममतास्पदम्।
यदा सत्यं विजानीयाद् न विरज्येत कश्चन॥
वैराग्यार्थम् असत्यत्वं पुराणेषु क्वचित् क्वचित्।
अभिप्रेत्य तिरोभावं कुत्रचित् संसृतिं तथा॥
क्रीडामये प्रभोः अस्मिन् संयोगविगमास्पदे।
तिरोभाविनि नो रागः कर्तव्यः क्षणिके वृथा॥

(वेदा.चिन्ता.४।३९-४१)

तथाहि : पुराणंहि मित्रसंमितं, यथाहि मित्रं कथमपि बोधयित्वा अहितवस्तुनि अरुचिम् उत्पाद्य ततो निवर्तयति तथा तदपि. यथाच मित्रं

कदाचिद् अनर्हस्थले भुंजानं प्रति ''विषं भूंक्ष्व मा अस्य गृहे भुङ्था''इति ब्रूते न तस्य विषभोजने तात्पर्यं किन्तु तत्र भोजनस्य परित्यागएव. तथाच मायिकत्वं क्वचिद् वैराग्यार्थं क्वचित् तिरोभावम् अभिप्रेतत्य कुत्रचित् च तन्निष्ठसंसृतिम् अभिप्रेत्य उक्तम्. यदिच केवलव्यामूढो हृत्प्रज्ञः अहन्ता-ममतास्पदं शरीरदारागारादिकं सत्यत्वात् सार्वदिकं विजानीयात् तर्हि **''यद्वाक्यतो धर्मइतीतरस्थितो न मन्यते तस्य निवारणं जनः''** (भाग.पुरा.१।५।१६) इतिन्यायाद् नैव विरज्येत प्रत्युत तदेव अधिकतरम् अभिनिविशेत. मायिकत्वं विवर्तत्वं स्वप्नाभत्वं वा श्रुत्वातु तत्र विरज्यमानः भगवत्सेवा-तच्छ्रवणादौ यतमानः सर्वस्य ब्रह्मरूपतां श्रुत्वा ब्रह्मणएव तत्तद्रूपत्वात् सर्वत्र सत्यतां सम्यग् विजानीयाद्, **''असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते)''** (वाक्प.२।२३८) इतिन्यायात्. किञ्च सत्यस्यापि प्रपञ्चस्य पराभिध्यानाद् आविर्भाव-तिरोभावौतु भवतएव. तथाच सति अत्यन्ताभीष्टमपि दारादिकं प्राप्ते तिरोभावकाले क्षणमपि नैव अवतिष्ठते. अतः तिरोभावम् अभिप्रेत्यापि तथावचनं. यथा राज्ञा स्वेच्छया अधिकारविशेषे स्थापितं ''ममैव अयं ग्रामादिः'' इति अभिमत्या प्रमाद्यन्तं प्रति तन्मित्राणाम् ''अयं तव पूर्वं नासीद् नापि परतः स्याद् मध्येऽपि स्वप्नइवैव अयं विभवः'' इति वचनम्. एवञ्च यथा मायिकाः आम्रादयो विवर्ताः रजतादयः स्वप्नसमृद्धयश्च मिथ्यात्वात् चिरं न अनुभूयन्ते तथा इदमपि तिरोभावाद् इति अल्पकालिकानुभवविषयत्वाद् इदं मायिकम् उच्यते. क्रौर्यादिमत्त्वात् ''सिंहो माणवक''इव, तथा देहगेहादिप्रपञ्चे अनुभूयमानम् अहन्ता-ममतारूपं स्वप्नमायामनोरथं सब्रह्मचारिणं संसारं मृषाम् अभिप्रेत्य तदाश्रयस्य कायनिकायमुखस्य मायिकतादि प्रतिपाद्यते वैराग्यार्थं, देशवर्तिमनुष्याणां साहसिकत्वेऽपि ''कलिंगः साहसिक''इतिवत्. अतो वैराग्योत्पादनएव तेषां तात्पर्यम्. अतएव यत्र परित्यागादिप्रतिपादकम् अवान्तरप्रकरणम् तत्रैव तथा उच्यते. तथा एकादशस्कंधे सप्तमाध्याये **''त्वन्तु सर्वं परित्यज्य स्नेहं स्वजनबन्धुषु''** (भाग.पुरा.११।७।६) इत्यादि उपदिशता भगवता **''विद्धि मायामनोमयम्''** (भाग.पुरा.११।७।७) इत्यादि उक्तम्. एवं कानिचिद् अवान्तरप्रकरणानि तादृशवचसां **''मायिकत्वं पुराणेषु''** (त.दी.नि.१।८२)

इतिकारिकावरणभंगे श्रीपुरुषोत्तमचरणैः दर्शितानि. तया दिशा अन्यत्रापि निर्णेयम्.

तत्तु विदुषां सुविदितम् इति निष्ठान्तप्रयोगस्तु चिन्त्यः. यत्तु कथं भूतार्थवादरूपस्य तस्य स्वार्थे तात्पर्याभावः इति, तत् स्वग्रन्थास्मरणात्. शंकराचार्यैः उपनिषद्भाष्येषु तत्र-तत्र **''त्रयो होद्गीथे कुशला बभूवुः''**, **''उषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास''**,**''भृगुर्वै वारुणिः''** (छान्दो.उप.१।८।१,तत्रैव.१।१०।१,तैत्ति.उप.३।१) इत्याद्याख्यायिकानां भूतार्थवादरूपाणां स्वार्थे तात्पर्याभावस्य दर्शितत्वात्. अस्माकन्तु विषयतारूपप्रपञ्चस्य मिथ्यात्वाद् न तेषां स्वार्थे तात्पर्याभावोऽपि. स्पष्टञ्च इदम् **''ऋते अर्थम्''** (भाग.पुरा.२।९।३३) इत्यादिस्थलेषु सुबोधिनीतत्प्रकाशयोः. यच्च त्वत्संगतः त्वद्गोष्ठीकुशलो न एतैः वाक्यैः वैराग्यभाक् स्याद् इत्यादि तद् न; सत्यत्वेऽपि तिरोभावशालित्वात् प्रथमस्कन्धादिषु **''यथा क्रीडोपस्कराणां संयोग-विगमौ इह इच्छया क्रीडितुः स्यातां तथैव ईशेच्छया नृणाम्''** (भाग.पुरा.१।१३।४२) इति अस्मदिच्छानधीनसंयोगविगमास्पदत्वात् च अस्मत्संगतानां सत्यत्वं जानतामपि सुखेन वैराग्यसिद्धेः. तर्हि वैराग्यार्थमपि तथाकथनं किमर्थम् ? इति चेत् ; सुदृढसंसारासक्तिसमेधितदुरपोहव्यामोहभाजां मन्दाधिकारिणां तथोपदेशमन्तरा तदसिद्धेः उचितमेव मित्रवत् तथाकथनम् इति दर्शितं प्राक्. अतो न वाक्यानां वैयर्थ्यम् अप्रामाण्यं वा. तस्माद् न तेषां श्रुत्युपबृंहकत्वं श्रुतिषु तदभवात्. एवंपरतानंगीकारे **''श्रुतिस्मृतिपुराणानां विरोधो यत्र दृश्यते तत्र श्रुतिः बलिष्ठा स्याद् द्वयोः द्वैधे स्मृतिः वरा''** (वेदव्यासस्मृ.१।४) इति लघुव्यासस्मरणाद् व्यवस्थान्तरापत्तेः.

(१) [यत्तु असतो हेतुत्वादर्शनाद् न असतो अज्ञानस्य कार्यं जगत् सम्भवति इति आह, तद् न युक्तम्, अज्ञानस्य असत्त्वानंगीकारात्. ''न असद् आसीद्'' (ऋक्.संहि.१०।११।१२९।१) इति श्रूतेः. सद्विलक्षणस्यतु कूटकार्षापणस्वप्नादेः हेतुत्वं दृष्टम्. अतएव

मिथ्याभूतस्वप्नहेतुत्वपरा ‘‘यदा कर्मसु काम्येषु स्त्रियं स्वप्नेऽनुपश्यति समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने’’ (छान्दो.उप.५।२।८) इति श्रुतिः संगता. विस्तरेणच एतद् अद्वैतसिद्धौ स्थितम्.]

(२) किञ्च असतो हेतुत्वादर्शनाद् न असतो अज्ञानस्य जगद्धेतुत्वं सम्भवति. नच मायायाः असत्त्वं न अंगीक्रियते ‘‘न असद् आसीद्’’ (ऋक्.संहि.१०।११।१२९।१) इत्यादिश्रुतेः इति वाच्यं; ‘‘न असद् आसीद्’’ इतिश्रुतेः मायायाः असद्विलक्षणत्वप्रतिपादनपरत्वे मानाभावात्. ननु मायायाः तत्कार्यस्यच शुक्ति-रजतस्य सत्यत्वे बाधानुपपत्तिः. नहि सत्यस्य वस्तुतो बाधः सम्भवति त्रिकालाबाध्यस्यैव सत्यत्वात्, असत्यत्वेच शशश्रृंगादिवद् न प्रतीयेत, शुक्तिरजतादिकञ्च प्रतीयते शुक्तिसाक्षात्कारेण तदवच्छिन्नचैतन्यसाक्षात्कारेण बाध्यते, अतः सदसद्भ्याम् अनिर्वचनीयमेव. एवं मायापि न सद्रूपा नापि असद्रूपा किन्तु अनिर्वचनीयैव इति चेद्, न; यदि शुक्तौ रजतम् उत्पद्यते इति अस्मत्सम्मतं स्यात् तदा तस्य सत्यत्वासत्यत्वयोः असम्भवं प्रदर्श्य परिशेषाद् अनिवर्चनीयत्वं साधयित्वा मायायां तादृश्यां तेन अनिर्वचनीयत्वप्रतिपादनं स्यात्, तदेव न सम्भवति शुक्तौ रजतोत्पादकसामग्र्यभावेन तदुत्पत्तेः असम्भवात्. नच सादृश्यदर्शनादिसध्रीचीना अविद्या तदुत्पादिका इति वाच्यम्; आपणस्थरजतस्यापि त्वन्मते अविद्याजन्यत्वस्वीकारेण अस्यापि अविद्याकार्यत्वेन अविशेषात् तद्रजतवद् अस्यापि अर्थक्रियाकारित्वापत्तेः. नच तस्य मूलाविद्याकार्यत्वं शुक्तिरजतस्य च तूलाविद्याकार्यत्वम् इति विशेषः इति वाच्यं; वेदबाह्यायाः तादृशकल्पनायाः अनादरणीयत्वात्. स्वप्नस्यापि न अर्थक्रियाकारित्वम्. ननु यदि स्वप्नस्य

अर्थक्रियाकारित्वं न स्वीक्रियते तदा “यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने” (छान्दो.उप.५।२।८) इत्यादिश्रुतिविरोधः इति चेद्, न; तत्र “स्वप्नेषु पश्यति स्वप्ननिदर्शने” इतिकथनेन तादृशस्वप्नज्ञानस्यैव समृद्धिहेतुत्वं प्रतीयते नतु स्वप्नस्य. ज्ञानस्यच सत्यत्वात् ततएव सत्यसमृद्धेः सम्भवः इत्थञ्च न असतः सद्धेतुत्वं नापि श्रुतिविरोधः.

(३) सहस्राक्षे यत्तु असतः इत्यादिम् अद्वैतसिद्धौ स्थितम् इत्यन्तं भागं दूषयन्ति **किञ्च असतः** इत्यादिना **नापि श्रुतिविरोधः** इत्यन्तेन. अत्र अयं भावः : अज्ञानस्य असत्त्वे सज्जगद्धेतुत्वं न युक्तं श्रुत्या मायायाः सदसद्रूपतायाः असिद्धौ युक्त्यैव तत्सिद्धिम् आशंकते **ननु** इति. **शुक्तिसाक्षात्कारेण** इति. चैतन्यसाक्षात्कारे असौ हेतुः तादृश्यां तेन इति. रजतवत् सबाधायां प्रतीतिविषयं च तेन परिशेषेण. अत्र अयं भावः : अज्ञानस्य असत्त्वे सज्जगद्धेतुत्वं न युक्तं, “**कथम् असतः सज्जायेत**” (छान्दो.उप.६।२।२) इति श्वेतकेतुविद्यायां श्रवणात्. जगत्सत्तातु इह ‘सदि’त्युक्त्या सिध्यति. “**त्वम् एकएव अस्य सतः प्रसूतिः**”(भाग.पुरा.१०।२।२८) “**सतो अभिव्यञ्जकः कालः**”(भाग.पुरा.११।२४।१९) इत्यादि उपबृंहणाच्च. अज्ञानस्य सदसत्त्वांगीकारेऽपि न इष्टसिद्धिः त्वन्मते सदसत्त्वाभ्याम् अनिर्वचनीयस्यापि शुक्तिरजतादेः अर्थक्रियाकारित्वाभावात्. नहि तेन रजतेन पात्रभूषणादि शक्यं कर्तुं तथा न अज्ञानादपि कार्यं निष्पद्येत. किञ्च तस्मिन् असत्त्वांशेन अद्वैतस्येव सत्त्वांशेन द्वैतस्यापि सार्वदिकत्वम् आपद्येत. तथाच स्वमतहानिः भेदाभेदवादप्रवेशश्च. नापि ब्रह्मातिरिक्तानाद्यविद्याबोधिका काचित् श्रुतिः अस्ति. कुतस्तरां तस्याः सदसत्त्वबोधिका सा. नच “**न असद् आसीद्**” इति श्रुतिः तथा शंक्या. तस्याः सृष्टेः पूर्वं स्थूलसूक्ष्मकार्यस्य कारणात् पृथक्सत्त्वनिषेधमात्रपरत्वात्. इदंहि वाक्यं तैत्तिरीयब्राह्मणे द्वितीयाष्टकेऽष्टमप्रपाठके नवमानुवाके पठ्यते “**न असद् आसीद् नो सद् आसीत् तदानीं न आसीद् रजो नो व्योम अपरो यत् किम् आवरीवः**

कुहकस्य शर्मन् अम्भः किम् आसीद् गहनं गभीरम्. न मृत्युः अमृतं तर्हि न रात्रिया अन्ह आसीत् प्रकेतः. आनीद् अवातं स्वधया तद् एकं, तस्माद्ध अन्यं न परः किञ्चन आस. तम आसीत् तमसा गूढम् अग्रे प्रकेतं सलिलं सर्वमा इदम्.'' (तैत्ति.ब्रा.२।८।९।४). अर्थस्तु : **तदानीं** सृष्टेः पूर्वं **न असत्** सूक्ष्मं कार्यम् आसीत्. **नो सत्** स्थूलं कार्यं कारणं वा आसीत्. ''**सदेव...**'' इत्यादिश्रुतिभिः जगतः पार्थक्येन स्थित्यभावात् तदेव प्रपञ्चयति **न आसीद् रजः** प्रेरको रजो गुणो न आसीत्. उपलक्षणविधया त्रयोऽपि गुणा न आसन् अथवा '**रजः**' शब्देन तार्किकप्रतिपन्नाः भूतचतुष्टयपरमाणवः. ''**खइव रजांसि वान्ति**'' (भाग.पुरा.१०।८४।४१) इत्यादौ तथादर्शनात्. **नो व्योम** आकाशोपलक्षित सर्वभूतानां निषेधः. भूताकाशस्यैव अयं निषेधो नतु अक्षरस्य. अग्रे ''**यो अस्य अध्यक्षः परमे व्योमन्**'' (तैत्ति.ब्रा.२।८।९।६) इति श्रवणात्. उपलक्षणविधया तार्किकप्रतिपन्नानि आकाश-काल-दिगा-ऽत्म-मनांसि न आसन् इति वा. **अपरो यद्** यो भौतिकप्रपञ्चः सोऽपि न आसीत्. एवं भूतभौतिके निषिध्य आवरकमायां निषेधति **किम् आवरीवः** किम् आवृणुयाद् आवरणीयाभावात् **कुह** कुत्र आश्रये. **कस्य शर्मन्** कस्य सुखनिमित्तम्. कार्याश्रयप्रयोजनाभावात् सा न आसीदेव इति अर्थः. अथ तैत्तिरीयसंहिता ''**आपो वा इदम् अग्रे सलिलम् आसीद्**'' (तैत्ति.संहि.७।१।५) इति श्रुत्या तदा जलम् आसीद् इति भ्रमः स्यात् तद्वारणाय आह **अम्भः किम् आसीद् गहनं** प्रवेष्टुम् अशक्यम्. **गभीरम्** अत्यन्तम् अगाधम् अम्भः किम् आसीत्! **नैव आसीद्** इति अर्थः. **न मृत्युः** तर्हि प्रलयकाले प्राणिनाम् अभावाद् मृत्युः न आसीत्. **अमृतं** जीवनं न आसीद् जगतः तदानीम् अव्याकृतत्वात्. मरण-जीवनव्यवहारो न आसीत्. **रात्र्याः प्रकेतः** चिह्नं चंद्रः नक्षत्रादिकं न आसीत्. **अह्नः प्रकेतः** चिह्नं सूर्यादिकं न आसीत्, कालज्ञापकं किमपि न आसीद् इति अर्थः. तर्हि किम् आसीत्? तत्र आह **आनीद् अवातं** तत् शास्त्रप्रसिद्धम् एकम् अद्वितीयं **स्वधया** कार्यमात्रस्य स्वशक्त्या स्वस्मिन् कारणे धारणेन **अवातं** वायुरहितं निश्चलम् **आनीद्** अचेष्टत आन्तररमणात्. इदमेव विरुद्धधर्माश्रयत्वं श्वासोच्छ्वासादिरूपवातं विना प्राणनस्य

चेष्टायाश्च लोकविरुद्धत्वात्. एकपदस्य मुख्यार्थत्वशंकां वारयति **तस्माद् ह अन्यं न परः किञ्चन आस. तस्माद्** अद्वितीयब्रह्मण: **ह** स्पष्टम् **अन्यद्** भिन्नं **परः** परम् उत्कृष्टं च **किञ्चन** किमपि **न आस** नैव आसीत्. एतेन ब्रह्मातिरिक्त अनाद्यविद्यादिकं तदानीं प्रतिषिद्धम्. तथाच न अनया श्रुत्या तस्य अनिर्वचनीयत्वसिद्धिः. "**किं तदानीं तस्मै स होवाच न सद् न असद् न सदसत्**" (सुबा.उप.२) इति सौबालश्रुत्या तदानीं सदसतोऽपि निषेधात् च. अग्रेऽपि **तम आसीद्** इति '**तमः**'शब्देन सर्वाच्छादकं ब्रह्मैव पूर्वं 'तद्'-'एक'शब्दाभ्याम् उक्तं निरूप्यते. आसमन्ताद् इदं नामरूपाभ्यां व्याकृतं सर्वं जगद् अग्रे सृष्टेः पूर्वम् **अप्रकेतम्** अप्रज्ञायमानं सलिलं कारणाद् अविभक्तं **तमसा** सर्वाच्छादकेन ब्रह्मणा गूढं तिरोभावितम् आसीद् इति तदर्थात्. स्पष्टञ्च इदं सुबोधिनीतत्प्रकाशयोः ग्रन्थान्तरेषु च. नापि मूले पूर्वपक्षे उक्तरीत्या रजतदृष्टान्तेन अनिर्वचनीयत्वसिद्धिः श्रौतदर्शने अश्रौतस्य अज्ञानस्य तत्र सदसत्त्वस्य च अनादरणीयत्वाद्, रजतसपक्षकानुमाने हेत्वभावात्, सपक्षस्यापि पक्षे प्रवेशात् च. नापि तस्याः तादृशरजतकारणत्वात् कारणस्य कार्यसजातीयत्त्वात् च तत्सिद्धिः तूलाविद्यायाएव तत्सिद्धिप्रसंगाद्, गोमयवृश्चिकादौ व्यभिचारदर्शनेन अनैकान्तिकत्वात् च. किञ्च शुक्तिरजतमपि न सदसत्त्वाभ्याम् अनिर्वचनीयम्. सत्यायाएव बुद्धेः प्रकृतिगुणतमसाविष्टाया रजतरूपेण ख्यानात् तत्र बौद्धं कल्पितमेव सत्त्वम्. वस्तुतस्तु असत्त्वमेव इति निर्वचनात्. यद् द्रव्यादिकं कल्प्यते तत् सत्ताविशिष्टमेव कल्प्यते. प्रतिनियतशौक्ल्यादिविशिष्टमिव रजतादिकम्. नहि कल्पिते रजते शौक्ल्यं वास्तवं तथा रजतादौ सर्वत्र सत्तापि न वास्तवी. शशशृंगादेस्तु वाचनिक्येव सत्ता. अतो वचसैव तथाव्यवहारः. अथ शशशृंगादिकमपि स्वप्ने कदाचिद् दृश्यते इति चेत् तर्हि अत्यन्तासतोऽपि उपलम्भाद् उपलब्ध्यापि न रजतादेः आंशिकसत्वसिद्धिः. अज्ञानं रजतकल्पम् इति चेत्, कीदृक् स्वरूपकस्य सत्या बुद्धिः किम् इयं गुणाविष्टाः तद् अज्ञानं कल्पयति? इति प्रश्नोऽपि उत्तरणीयः. अपिच आपणस्थशुक्त्यधिष्ठानकरजतयोः अविद्याकार्यत्वाद् अविशेषः प्रसज्येत. मूलाविद्या-तूलाविद्यादिकल्पनन्तु तथाबोधकश्रुत्याद्यभावाद् निर्मूलम्. अतो असतो अज्ञानस्य न हेतुत्वं. नापि कूटकार्षापणवद् हेतुता शंक्या.

ताम्रभिन्ननिकृष्टधातुजन्ये ताम्ररससेचनादिना ताम्रमयतया प्रतीयमाने कूटकार्षापणे अशीतिगुंजामितताम्ररूपत्वाभावेऽपि सत्ताया अनपायात्. नहि आरकुटघटितहाटकवत् प्रतीयमानमपि हेममुद्रादिकं शुक्तिरजतादिवद् असत्यम् इति शक्यं वक्तुम्. तस्मात् सदविलक्षणस्य तस्य अर्थक्रियाकारित्वं युक्तमेव.

अथ नटेन मन्त्रादिना कल्पितं तात्कालिकमात्रव्यवहारपात्रं द्रव्यं दृष्टान्तीक्रियेत तथापि तत्र मन्त्रादियुक्तिरूपा माया सत्या तत्कल्पितं वस्त्वेव असत्यं तथा अत्र मायाकल्पनहेतुः सत्यं मायान्तरम् आपद्येत. वस्तुतस्तु तत्रापि द्रव्यम् इदम् इति विपर्यासवृत्तिमती सत्या मतिरेव सतो व्यवहारस्य कारणम्. तत्र मायिकत्वनिश्चयोत्तरं व्यवहाराभावात्. एवं स्वप्नदृष्टान्ततोऽपि न हेतुता, तस्याः अर्थक्रियाकारित्वे स्वाप्निकभोजनादिना तृप्त्याद्यापत्तेः. भयादिकारणन्तु सिंहादिज्ञानानामिव नतु स्वाप्निकसिंहादयः, वास्तव सिंहादिसन्निधानेऽपि तदज्ञाने भयाद्यनुत्पत्तेः. ज्ञानञ्च सत्यम् इति अदोषः. ‘‘**यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने**’’ (छान्दो.उप.५।२।९) इति श्रुतिरपि ‘‘**पश्यति निदर्शन**’’ इत्युक्त्या ज्ञानमेव समृद्धिहेतुतया वदति. किञ्च काम्यकर्मणामपि फलदाता भगवानेव ‘‘**फलमत...**’’ (ब्र.सू.३।२।३८) इति न्यायात्. सएवच स्वप्नसृष्टिनिर्माता अतः सएव यथायथं तत्तत्प्रदर्शनेन तत्तत्फलं सूचयति. एवमेव अभिप्रेत्य सूत्रितं भगवता तृतीयस्य द्वितीये ‘‘**सूचकश्चहि श्रुतेः आचक्षतेच तद्विदः**’’ (ब्र.सू.३।२।४) इति स्वप्नस्तु न सदसद्रूपः, ‘‘**मायामात्रन्तु...**’’ (ब्र.सू.३।२।३) इति सौत्र‘मात्र’पदविरोधात्. श्रुतौ स्त्रियं स्वप्नेऽनुपश्यति इत्यपपाठोपन्यासस्तु पुस्तकप्रत्ययेन अध्ययनात्. उक्तसूत्रे त्वद्भाष्येऽपि ‘**स्वप्नेषु**’ (छान्दो.उप.शां.भा.५।२।८) इत्येव पाठः. यत्रच छान्दोग्ये सप्तमप्रपाठके प्राणविवादाद् अग्रे (खं.२) इदं वाक्यं पठ्यते तत्रापि तथैव पाठः. विस्तरेणच एतद् अद्वैतसिद्धिनिरासे प्रस्थानरत्नाकरे प्रकाशादिषु च निर्णीतम्.

(१) [यत्तु षष्ठश्लोकव्याख्यायां तट्टीकाकारेण ‘‘सन्मूलाः

सोम्य इमाः प्रजाः सदायतनाः सत्प्रतिष्ठाः'' (छान्दो.उप.६।८।४) ''कथम् असतः सद् जायेत ?'' (छान्दो.उप.६।२।२) ''तत् सत्यं'' (छान्दो.उप.६।८।७) ''यद् इदं किञ्च तत् सत्यम् इति आचक्षते'' (तैत्ति.उप.२।६) इत्यादिश्रुतीः उपन्यस्य ''असत्यत्वेन ज्ञानन्तु आसुराणामेव. तथाच गीतायाम् 'असत्यम् अप्रतिष्ठं ते जगद् आहुः अनीश्वरम्' (भग.गीता १६।८) इति उक्तम्'' (शु.मा.प्र.६). तत्र 'सन्मूला'इत्यादेः सतो जगद्भ्रमाधिष्ठानत्वेन न अनुपपत्तिः. प्रकृतिमात्र-हेतुत्ववादेऽपि तस्य भ्रमाधिष्ठानता आश्रीयतएवेति न दोषः. कथम् ''असतः सद् जायेत'' (छान्दो.उप.६।२।२) इत्यस्यास्तु सत्त्वेन अप्रतीयमानात् सत्त्वेन प्रतीयमानं कथं जायेत ? इति अर्थः. अन्यथा ''वाचारम्भण विकारो नामधेयम्'' (छान्दो.उप.६।१।४) इति विरुध्येत. [१]वस्तुतस्तु ''एक आहुः असदेव सोम्य इदम् अग्र आसीत् ततो वै सद् अजायत'' (द्र.छान्दो.उप.६।२।१) इति उपक्रम्य प्रवृत्ता इयं श्रुतिः असद्हेतुक-सत्कार्यवादं खण्डयति इति भाति. तथाच तद्वाद-प्राप्त-सत्कार्यवादानुवादेन कारणासत्त्वनिराकरणे तस्याः तात्पर्याद् न तद्विरोधः. 'सदि'तितु अधिष्ठानाभेदम् आरोप्यस्य आह. जगतः सद्विलक्षणत्व-स्वीकारेऽपि असद्विलक्षण-त्वस्यापि स्वीकाराद् न भगवद्वाक्यम् अस्मन्मत-निन्दापरं किन्तु शून्यवाद-निन्दापरम्. अतएव 'अप्रतिष्ठम्' (भग.गीता १६।८) इति उक्तम्. अस्मन्मतेतु जगतः सत्प्रतिष्ठत्वम् अस्ति.]

---

[१] ''तद्धैक आहुः असदेव इदम् अग्र आसीद् एकमेवाद्वितीयं तस्माद् असतः सज्जायत'' इति मुद्रितपु.

(२) किञ्च “सन्मूलाः सोम्य इमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः”, “कथम् असतः सद् जायेत”, “तत्सत्यं” “यदिदं किञ्च तत्सत्यम् इति आचक्षते” (छान्दो.उप.६।८।४,६।२।२,६।८।७, तैत्ति.उप.२।६) इत्यादिश्रुतिशतैरपि सतएव जगद्धेतुत्वं प्रतीयते न असतः अतो ब्रह्मणएव जगद्धेतुत्वं न मायायाः श्रुतिविरोधापत्तेः. नच सतो जगद्भ्रमाधिष्ठानतया सन्मूलत्वं जगतः सम्भवत्येव इति वाच्यं, यथा “सोम्य एकेन मृत्पिंडेन सर्वं मृण्मयं विज्ञातं स्याद्” (छान्दो.उप.६।१।४) इत्यादिदृष्टान्तानुरोधेन घट-शरावादिकं प्रति मृत्तिकायाः सुवर्णस्य कटकादिकं प्रति यथा उपादानकारणत्वं तथैव कार्यजातं प्रति ब्रह्मणः उपादानकारणत्वस्य निश्चयेन ‘सन्मूलाः’ इत्यत्रापि ‘मूल’पदेन तादृश उपादानस्यैव ग्राह्यतया भ्रमाधिष्ठानस्य च लोके लोकानुसारिणः तव मतेऽपि उपादानत्वासम्भवेन तादृश श्रुतिविरोधो दुर्वारएव. नहि रज्जुसर्पस्य रज्ज्ववच्छिन्नं चैतन्यं रज्जुः वा उपादानं किन्तु अविद्यैव अतो “मायामूलाः सोम्य इमाः प्रजाः” इति ब्रूयाद् नतु ‘सन्मूलाः’ इति. किञ्च मायायाः जगद्धेतुत्वे “कथम् असतः सद् जायेत” (छान्दो.उप.६।२।२) इति श्रुतिविरोधापत्तिः. ननु तादृशश्रुतेः सत्त्वेन अप्रतीयमानात् सत्त्वेन प्रतीयमानं कथं जायेत? इत्यर्थकत्वेन शून्यवादनिराकरणपरत्वं, नतु मायावादनिराकरणपरत्वं मायायाः सत्त्वेन प्रतीयमानत्वाद् इति चेद्, न; शक्त्या तादृशार्थस्य ‘असत्’-‘सत्’-पदाभ्याम् अलाभेन वेदे निर्मूललक्षणाकल्पनस्य अप्रामाणिकत्वात्. अतएव ‘वाचारम्भणा’दिपदानां वागालम्बनाद्यर्थकत्वं न सम्भवति लक्षणापत्तेः. यत्तु वस्तुतस्तु “एक आहुः असदेव सोम्य इदम् अग्र आसीत् ततो वै सदजायत” (छान्दो.उप.६।२।१) इति उपक्रम्य प्रवृत्ता इयं श्रुतिः असद्धेतुकसत्कार्यवादं खण्डयति इति भाति. तथाच तद्वादप्राप्तसत्कार्यावादानु-

> वादेन कारणासत्त्वनिराकरणे तस्याः तात्पर्य्याद् न तद्विरोधः **इत्यादि उक्तं तदपि न किञ्चित्, मायायाः सद्भिन्नत्वेन असत्त्वस्य दुरपोहतया मायावादस्यापि असद्धेतुकसत्कार्यवादतया तन्निराकरणपरत्वाभावस्य वक्तुम् अशक्यत्वात्. किञ्च त्वन्मते जगतः सद्विलक्षणत्वेन असत्त्वाद् ''असत्यम् अप्रतिष्ठं ते जगद् आहुः अनीश्वरम्'' (भग.गीता १६।८) इति भगवद्वाक्यमपि त्वन्मतनिन्दापरम् इति प्रतिभाति. नच अस्माभिः जगतो असद्विलक्षणत्वस्यापि स्वीकारात् कथम् अस्मन्निन्दापरत्वं भगवद्वाक्यस्य इति वाच्यम्. सद्विलक्षणत्वा-ऽसद्विलक्षणत्वयोः सद्भिन्नत्वा-ऽसद्भिन्नत्वरूपयोः एकत्र समावेशो न सम्भवति परस्परविरुद्धत्वात्.**

(३) सहस्राक्षे यत्तु षष्ठ...इत्यादिं सत्प्रतिष्ठत्वम् अस्ति इत्यन्तं भागं परिहरन्ति **किञ्च सन्मूलाः** इत्यादिना **परस्परविरुद्धत्वाद्** इत्यन्तेन. अयम् अर्थः : छान्दोग्यस्य अष्टमाध्याये अष्टमखण्डे **''सन्मूलाः सोम्य! इमाः सर्वाः प्रजा''** इति वाक्यं पठ्यते. **'सर्वे'**तिपदरहितपाठोपन्यासस्तु अशुद्धपुस्तकोपलम्भात् स्वयञ्च गुरुमुखाद् अधीतत्वाभावात्. अतोऽपि सद्ब्रह्मैव प्रपंचस्य कारणं नतु त्वदभिमतम् असत् सदसद् वा अज्ञानं. यत्तु ''सन्मूलाः'' इत्यादेः सतो जगद्भ्रमाधिष्ठानत्वेन नानुपपत्तिः इति तद् अकिञ्चित्करम् अधिष्ठाने भ्रमविषयस्य मूलत्वायतनत्वादेः अभावात्, बुद्ध्यैव अन्तरा तस्य कल्पनेन बुद्धेरेव तत्र मूलत्वात्. शुक्ते रजतायतनत्वे एकेन यदा तत्र रजतं कल्प्यते तदा सर्वोऽपि तत्र रजतमेव नियमेन पश्येत् नतु पश्यति अतो न सा तदायतनम्. रजतं कल्पयित्वा कार्यान्तरपरतन्त्रत्वात् स्पर्शाद्यकृत्वा गतस्य अधिष्ठानासन्निधानेऽपि रजतबुद्ध्यनिवृत्तेश्च. अतएव न तद् रजतं शुक्तौ लीयते शुक्तिनाशोत्तरमपि यदा कस्यचिद् आप्तस्य मुखात् ''त्वया सा शुक्तिरेव दृष्टा न रजतम्'' इति शृणोति तदैव तन्निवृत्तेः तस्माद् बुद्धिरेव रजतस्य मूलादिकम्. शुक्तेस्तु सादृश्यद्वारा संस्कारोद्बोधकतयैव उपयोगः. किञ्च तत्र एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा श्रूयते. नहि सा

अधिष्ठानत्वे उपपद्यते रज्जुविज्ञानेन तदधिष्ठानकानां सर्वेषां यष्टि-माला-व्यालादीनां विज्ञानस्य अदर्शनात्. प्रत्युत तद्विज्ञानेन यष्ट्यादिविज्ञानस्य नाशएव दृश्यते. तथा अत्र सद्विज्ञानेन सर्वविज्ञानं नश्येद् नतु सर्वविज्ञातं स्यात्. अपिच तत्र **''यथा सोम्य एकेन मृत्पिंडेन सर्वं मृण्मयं विज्ञातं स्यात्. यथा सोम्य एकेन लोहमणिना सर्वंलोहमयं विज्ञातं स्यात्''** (छान्दो.उप.६।१।४-५) इत्यादिना घट-कटकादिकं प्रति परिणाम्युपादानमेव मृत्सुवर्णादिकं दृष्टान्तीक्रियते. अतो ब्रह्मणोऽपि परिणाम्युपादानत्वमेव **'सन्मूला'**इत्यादिना उच्यते इति निश्चीयते अन्यथा रज्जु-भुजंगाद्येव दृष्टान्तीक्रियेत. अन्यच्च भुजङ्गादिकं प्रति तज्जातीय-शुक्रशोणितादेरेव उपादानत्वाद् अधिष्ठानस्य उपादानत्वमेव न सम्भवति. अन्यथा घटादिर्निर्मातुकामेन मृदादिकमिव रजतादिकामेन शुक्त्याद्येव उपादीयेत नतु तत्खन्यादि अन्विष्येत. नापि भुजङ्गादेः पूर्वकाले रज्वादौ अभेदेन स्थितिः सम्भवति. अतः तथासति तत्र **''सदेव सोम्य इदम् अग्र आसीत्''** इति न वदेत्. अथ भ्रमात् पूर्वं रज्जुरेव आसीद् न भुजंगमः इति चेत् तर्हि ''सदेव सोम्य अग्र आसीद्'' इत्येव वदेत्. अपरञ्च तत्र **''यत्र एतत् पुरुषो अशिशिषति नाम''** (छान्दो.उप.६।८।३) इति उपक्रम्य इदं पठ्यते **''तत्र एतच्छुङ्गम् उत्पतितं सोम्य! विजानीहि नेदम् अमूलं भविष्यति इति. तस्य क्व मूलं स्याद् अन्यत्र अन्नाद् एवमेव खलु सोम्य अन्नेन शुङ्गेन आपोमूलम् अन्विच्छ अद्भिः सोम्य शुङ्गेन तेजोमूलम् अन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलम् अन्विच्छ सन्मूलाः सोम्य इमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः''** (छान्दो.उप.६।८।५-६) इति. अर्थस्तु : एतच्छरीरं शुङ्गं वटकणिकायाः अंकुरइव कार्यम् उद्भूतम्. इदं शरीररूपं कार्यं न अमूलं निष्कारणं स्यात्. तर्हि तस्य क्व मूलम्? इति प्रश्ने अन्नाद् अन्यत्र क्व मूलं स्यात्तु अन्नमेव अस्य मूलम्. एवमेव अन्नरूपेण शुङ्गेन कार्येण अबूरूपं मूलं कारणम् अन्विच्छ, अबूरूपेण कार्ये तेजोरूपं कारणं, तेजोरूपेणच कार्येण ब्रह्मरूपं कारणम् इति. अत्रच शरीरान्नजलानाम् अन्न-जल-तेजांसि परिणामिकारणान्येव नतु अधिष्ठानानि. अतो ब्रह्मापि तादृशकारणमेव वक्तव्यम्. नच तेषामपि अधिष्ठानत्वं वाच्यं,

प्रत्यक्षविरोधात्, अन्नादिज्ञाने शरीरादिनाशप्रसंगात्. अधिष्ठाने कल्पितं वस्तु इतरकल्पनस्य अधिष्ठानं तदपि इतरकल्पनस्य अधिष्ठानम् इति कल्पनायाः सुतराम् अशक्यत्वाच्च. नहि रज्जौ कल्पिते भुजंगे यष्टेः कल्पना तस्याञ्च मालायाः सा इति परम्परा क्वापि दृष्टचरी. “**सन्मूला...**” इत्यत्र ‘**मूल**’शब्दस्य अधिष्ठानपरत्वादेतु पूर्वमपि तत्परत्वं स्यात्. तत्र परिणामिपरत्वे अत्रापि तथात्वमेव सिध्येत्. शुङ्गञ्च बीजस्य उपादेयमेव नतु विवर्तः. अतः शुङ्गत्वकथनादपि त्वदभिमतार्थस्य बाधः. अन्यथा क्लिष्टकल्पनापेक्षया “माया मूला” इत्याद्येव स्पष्टं ब्रूयात्. मूले **रज्ज्ववच्छिन्नं चैतन्यम्** इत्यादितु तन्मतम् अनुरुध्य तं प्रति उक्तम्. यश्च “**कथम् असतः सद् जायेत**” (छान्दो.उप.६।८।६) इति श्रुतेः सत्त्वेन अप्रतीयमानात् सत्त्वेन प्रतीयमानं कथं जायेत? इति अर्थः उक्तः. सो अशक्यएव. तथासति “**सदेव सोम्य**” इत्यत्रापि ‘**सच्छ**’ब्दः तादृशार्थकः कुतो न स्यात्? नच इष्टापत्तिः, स्वभाष्यविरोधात्, “**‘ॐ’ ‘तत्’ ‘सद्’ इति निर्देशो ब्रह्मणः**” (भग.गीता १७।२३) इति गीताविरोधात् च. किञ्च मायायाः सत्त्वासत्त्वाभ्याम् उभयथापि प्रतीतेः जगतोऽपि तथाप्रतीतेश्च त्वया वाच्यतया त्वन्मते सत्त्वेन अप्रतीयमानात् सत्त्वेन प्रतीयमानं सत्त्वेन प्रतीयमानात् सत्त्वेन अप्रतीयमानं च जायतएव इति “**कथं जायेत?**” इति आक्षेपो असंगतः. अत्रत्यमेव ‘**सच्छ**’ब्दम् आश्रित्य सूत्रकृता “**सत्त्वाच्च अवरस्य**” (ब्र.सू.२।१।१६) इति प्रपञ्चस्य सत्त्वमेव निर्णीतम्. अन्यथा “सत्त्वेन प्रतीयमानत्वाद्” इत्येव असन्दिग्धं सूत्रयेत्, सूत्रस्य सन्देहवारणार्थत्वात्. सर्वत्र तथार्थदुराग्रहे ‘**सदेव**’ इत्यादावपि बलात् तत्प्रसक्तिः. अतः शक्यार्थस्य अबाधात् सूत्रादिना तथैव तात्पर्यस्य निश्चयाच्च निर्मूललक्षणा न आदरणीया. नाशोत्पत्तिप्रत्यक्षन्तु आविर्भाव-तिरोभावविषयम्. श्रौतदर्शने श्रुतेः प्रत्यक्षादितो बलीयस्त्वात्. अन्यथा अर्धवैनाशिकप्रक्रिया आपद्येत नतु त्वदभिमतसिद्धिः. वाचारम्भणश्रुतिविरोधस्तु तवैव नतु मम इति अनुपदं स्फुटीभविष्यति. यच्च वस्तुतस्तु “एक... इत्याहुः” इत्यादि तद् असत्. तत्र “**सदेव सोम्य इदम् अग्र आसीद् एकमेव अद्वितीयम् तद्धैकआहुः असदेव इदम् अग्र आसीद् एकमेव अद्वितीयम्. तस्माद् असतः सद् जायत. कुतस्तु खलु सोम्य**

एवं स्याद् इति होवाच कथम् असतः सद् जायेत? इति. सत्त्वेव सोम्य इदम् अग्र आसीत्'' (छान्दो.उप.६।२।१) इति पठ्यते. संक्षेपतो अर्थस्तु **इदं**=परिदृश्यमानं जगत् **अग्रे**=सृष्टेः पूर्वं सदेव आसीत्. 'एव'कारो असत्त्वादिपक्षव्यवच्छेदार्थः. **एकमेव अद्वितीयम्**. सजातीयादिभेदशून्यम्. **तत् ह** तस्मिन् कारणरूपे वस्तुनि विषये **एके**=अन्ये आसुराः आहुः. **इदं** प्रतीयमानम् **अग्रे असदेव आसीत्**. तस्माद् असद्रूपाद् वस्तुनः सत् जगद् अजायत अडभावश्छांदसः, तन्मतं खण्डयति. तत्र 'असत्'पदेन अभावमात्रं विवक्ष्यते, सत्त्वेन प्रतीयमानम् असद्वस्तु वा? न आद्यः, तथासति **कुतस्तु खलु सोम्य एवं स्यात्? एवं** विचित्रं जगत् कुतः उत्पद्येत अभावस्य एकत्वात्, अभावमात्रस्य कारणत्वायोगात् च, निरधिकरणकाभावाप्रसिद्धेः च. न द्वितीयः, तथासति **कथम् असतः सद् जायेत?** असद्वस्तुतः वास्तवं सत् कथं जायेत? नहि स्वाप्निकमृदः पारमार्थिकघटो भवति. तस्मात् **सत्त्वेव सोम्य इदम् अग्रे आसीद् एकमेव अद्वितीयम्. 'तु'**शब्दः पूर्वपक्षव्यावर्तकः. इदम् अग्रे सदेव आसीद् इति निश्चयः. यदि कार्यस्य सत्त्वमेव इति न अभिप्रेयात् किन्तु कारणस्य असत्त्वनिराकरणमेव अभिप्रेयात् तदा **''सदेव सोम्य इदं'' ''सत्त्वेव सोम्य इदम्''** इति पुनःपुनः **'इदं'**पदं न वदेत्.

किञ्च अत्र परमतानुवादेऽपि **एकमेव अद्वितीयम्** इति संख्यादि निर्दिश्यते. अत्यन्तासति च तन्निर्देशो न घटते अतः तन्निर्देशात् प्रातीतिकं सत्त्वम् 'असद्'इत्युक्त्या असत्त्वञ्च स्पष्टम् अवगम्यतएव इति त्वदभिमतं सत्त्वासत्त्वाभ्याम् अनिर्वचनीयं कारणमपि अनूद्य अत्र निरस्तं भवति नतु अत्यन्तासदेव कारणम्. किञ्च कारणासत्त्वे चिखंडयिषितेऽपि कंठरवोक्तं कार्यसत्त्वं श्रुत्यभिप्रेतं न वा? न द्वितीयः 'सत्'पदोपादानानर्थक्यप्रसंगात्, उपात्तस्यापि परित्यागे हेतोः अभावात्. नच आरोप्यस्य अधिष्ठानाभेदं 'सद्'इतिपदम् आह इति वाच्यम्. तथासति **'सदेव'** इत्यादावपि तथार्थम् आश्रित्य मायैव गृह्यतां तत्र न गृह्यते चेत् प्रकरणैक्यात् तात्पर्यग्राहकाभावात् च अत्रापि न गृह्यताम्. किञ्च कार्यस्य मायिकत्वे तेजःप्रभृतीनाम् ईक्षणमपि

न संगच्छेत, श्रूयतेतु तत्र तत् ‘‘**तत् तेजः ऐक्षत ता आपः ऐक्षंत**’’ (छान्दो.उप.६।२।३-४) इति. नहि रज्जौ कल्पितः ‘‘सर्पोहं दशेयम्’’ इत्यादि ईक्षते. ब्रह्मणः तत्तद्रूपेण परिणतस्यतु ईक्षणं सम्भवति. नच इदम् ईक्षणं गौणं कल्प्यं ‘‘**तदैक्षत...**’’ (छान्दो.उप.६।२।३) इत्यत्रापि गौणतापत्तेः. नच इष्टापत्तिः ईक्षत्यधिकरणविरोधात्, ‘‘**गौणश्चेन्न**’’ (ब्र.सू.१।१।५) इत्यादि गुणसूत्रैः तस्याः प्रतिषेधात् च. ‘‘**ऐतदात्म्यम् इदं सर्वं तत् सत्यम्**’’ (छान्दो.उप.६।३।४) इति कार्यसत्ता तत्र अभ्यस्यतइति न सत्पदार्थः क्लेशाद् अन्यथाकल्प्यः. एतत्सकलानुरोधाद् आद्यश्चेद् गुडजिव्हिका. एवम् अमायिकत्वे सत्येव अभ्रान्तेश्वरेक्षणीयत्वम्, तत् प्रवेष्टव्यत्वं च तेजःप्रभृतीनां संगच्छेत. नहि गंधर्वनगरं कश्चिदपि प्रवेष्टुम् ईष्टे प्रविश्य च किञ्चित् कर्तुम्. श्रूयतेतु तत् तत्र ‘‘**सेयं देवतैक्षत हन्ताहम् इमाः त्रिस्रो देवता अनेन जीवेन आत्मना अनुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतम् एकैकां करवाणीति**’’ (छान्दो.उप.६।३।२-३)इत्यादि. किञ्च जगद्ब्रह्मणोः जडचेतनतया विलक्षणत्वात् कार्यकारणभावानुपपत्तिम् आशंक्य सूत्रकारो द्वितीयस्य प्रथमे ‘‘**दृश्यतेतु**’’ (ब्र.सू.२।१।६) इति समाधत्ते. यदि सदसत्त्वाभ्याम् अनिर्वचनीया माया कारणं तादृशं जगच्च कार्यं स्यात् तर्हि व्यर्थेएव शंकासमाधाने ख्याताम्. अग्रेच ‘‘**असद् इति चेद् न प्रतिषेधमात्रत्वात्**’’ (ब्र.सू.२।१।७) इति कारणस्य असत्त्वं निराकरोति. ‘**असदेवेदम्**’’ इति अनुवादस्य प्रतिषेधार्थतामेव वक्ति. यदि माया कारणं स्यात् तर्हि व्यर्थो अयं निरासप्रयासः. नच तस्याः सदसत्त्वाद् न व्यर्थः, इति वाच्यम्; अनुवादे एकत्वसंख्यादियोगिनएव असतः कारणताबोधनेन सत्त्वेन प्रतीयमानम् असद् इति सुखेन लाभात्. वस्तुतस्तु जगतो मायिकत्वं तस्याः सदसद्रूपत्वं कार्यस्य च तथात्वं क्वापि सूत्रकृता न उक्तं प्रत्युत असत्त्वं निराकृतमेव, सत्त्वमेव च समर्थितम्. अतो निर्मूलं तत्कल्पनम्. यदि तथा स्यात् सर्वसन्देहवारणायैव प्रवृत्तः आचार्यः कथं स्पष्टं न ब्रूयात्. ‘‘**असत्यम् अप्रतिष्ठं त**’’ (भग.गीता १६।८) इति भगवद्वाक्यन्तु असत्यं वदतः तवापि निन्दां करोत्येव. नच ‘असत्य’पदम् अत्यन्तासत्परं मयातु प्रातीतिकसत्तायाः अंगीकाराद् न मन्मतस्य निन्दापरं तत् किन्तु

बाह्यमतस्यैव इति वाच्यं; प्रतीतेः स्वीकारेण प्रातीतिकसत्तायाः बाह्यमतेऽपि अनपायात्. किञ्च एवं सति यत्र पुराणेषु वैराग्यार्थं पुरुदुःखदुःखत्वादिकथनपुरःसरम् इदं जगद् असत्स्वरूपम् इति उच्यते. तत्रापि 'असत्'पदस्य तथात्वम् आश्रित्य बाह्यमतस्य पुराणसंमतत्वं कुतो न ब्रूषे. केवलम् 'असद्'इति कथनेऽपि स्वाभिमतार्थपरतां च कुतः कल्पयसि. यदिच तादृशपुराणस्थलेषु 'असद्'-'असत्या'दिपदानां त्वदभिमतार्थकता स्वीक्रियते तर्हि अत्रापि स्वीक्रियताम्. नच अप्रतिष्ठत्वस्य अस्वीकाराद् अत्रच तथाकथनाद् न इदं मन्मतपरम् इति वाच्यं, तत्र ते आसुराः जगद् असत्यम् आहुः अप्रतिष्ठम् आहुः अनीश्वरम् आहुः इति योजनायाः प्रतीत्या. अन्यथा समाप्तपुनराप्तिप्रसक्त्या च अन्यतमकथनेऽपि आसुरत्वस्य सिद्धेः. अन्यथा कार्यदशायां तत्सत्तांगीकारेण देहादेः असद्विलक्षणत्वं भूतचतुष्टयस्य नित्यत्वं तत्र देहादेः प्रतिष्ठां च स्वीकृत्य अनीश्वरत्वमात्रं वदन्तः चार्वाकाः कथञ्चित् सत्तादिकं वदन्तो बौद्धभेदाः च न आसुराः स्युः. किञ्च न सत्प्रतिष्ठत्वमपि त्वन्मते शक्यवचनम्. बौद्धरजतादेः शुक्त्यादौ लयस्य प्राङ्निराकृतत्वात्. एवम् 'असत्या'-'ऽप्रतिष्ठ'पदयोः इदानीं त्वया उच्यमानार्थकतायाः असम्भवादेव शंकराचार्यैः "**असत्यं यथा वयम् अनृतप्रायाः तथा इदं जगत् सर्वम् असत्यम् अप्रतिष्ठं च. न अस्य धर्माधर्मौ प्रतिष्ठा. अतः अप्रतिष्ठम्**" (भग.गीता.शां.भा.१६।८) इति व्याख्यातम्. मधुसूदनसरस्वती-श्रीधरस्वामिप्रभृतिभिश्च 'असत्य'पदं नास्ति सत्यं वेदादिकं प्रमाणम् अत्र इति विवृतम्. 'अप्रतिष्ठ'पदञ्च तथैव व्याख्यातम्. अतः त्वदुक्तिः भाष्यादिस्वग्रन्थविरुद्धा. वस्तुतस्तु तथा अर्थोऽपि न सम्भवति. तथासति "अप्रमाणम् अधर्मम्" इति "अवेदम् अनदृष्टं ते" इति वा स्पष्टं वदेत्. 'सत्य'शब्दस्य वेदादौ 'प्रतिष्ठा'शब्दस्य धर्माधर्मयोश्च नियतशक्तेः अभावाद् न तथाव्याख्यानं सर्वैः आदर्तुं शक्यम्. यथाश्रुतार्थेऽपि तन्मते सर्वप्रपञ्चस्य मिथ्यात्वे तदन्तर्गतवेदधर्माधर्माणामपि मिथ्यात्वस्य स्वतः प्राप्तेश्च. अतएव तथावादिनः तव तथार्थेऽपि अनिस्तारः. ईश्वरस्यापि मायिकत्वांगीकाराच्च. किञ्च वाक्यस्य स्वमतपरतावारणाय कल्प्यमानं जगतः सद्विलक्षणत्वे सति असद्विलक्षणत्वमपि न शक्यं वक्तुम्, 'असच्छ'ब्दप्रवृत्तेः

स्वप्न-विवर्तादिषु प्रसिद्धत्वेन विवर्ततया अभिमते जगति असद्विलक्षणताया अशक्यवचनत्वात् प्रतियोगितावच्छेदकानुयोगितावच्छेदकयोः ऐक्यानुपपत्त्या सद्भेदासद्भेदयोः एकत्र समावेशायोगात् च.

(१) [तद्वाक्यस्यजगत्सत्यत्व-परत्वेतुवाचारम्भण-श्रुति-विरोधः (द्र.छान्दो.उप.६।१।४). ननु यो विकारः पृथुबुध्नोदरादिः स वाचारम्भणः वाचिक-क्रियात्मको नतु कारणाद् व्यक्तिभेदापादकः. यथा सुप्ते उत्थिते उपविष्टे च पुरुषे अवयव-विन्यास-भेदो न पुरुषभेदो अतो 'नामधेयं' कारणस्यैव नामधेयं, कारणमेवहि तत्तदर्थक्रिया-निष्पत्त्यर्थं 'घट'-'शरावा'दिनाम्ना व्यवह्रियते इति कारणाद् अभिन्नं कार्यं तदा "मृत्तिकेत्येव सत्यम्"...अन्यथा कार्याभावेन ब्रह्म कस्य कारणं स्यात्? कारणत्वाभावे कारणत्ववादिका "यतो वा" (तैत्ति.उप.३।१) इत्यादिका श्रुतयो विरुद्ध्येरन्. यदि विकारे वाङ्मात्रताम् अभिप्रेयाद् "वाचारम्भणं विकारो मृत्तिकैव सत्यम्" इति वदेत्, तावतैव कार्यस्य मिथ्यात्वसिद्धेः. वदतितु 'नामधेय'पद-'इति'पदाभ्यां घटितं तेन कारणाद् अभिन्नं कार्यम् इति तात्पर्याद् उक्तएव अर्थः. किञ्च वाचारम्भणम् इति वाक्यम् उपक्रम्य अग्रे "कथम् असतः सद् जायेत् इति [१]सदेव सोम्य इदम् अग्र आसीद्" (द्र.छान्दो.उप.६।२।२) इति पठितम्. अतएव सूत्रकारः इमामेव श्रुतिं विषयीकृत्य "तद् अनन्यत्वम् 'आरम्भण'-शब्दादिभ्यः" (ब्र.सू.२।१।१४) इति अवदत्. अर्थस्तु 'वाचारम्भणमि'त्यादि-शब्देभ्यः तदनन्यत्वं कारणाद् अभिन्नत्वं बोध्यते इति. अत्र 'आदि'पदेन

१.'सत्त्वेव सोम्येदम् अग्र' इति मुद्रित-पु

‘इति’पदं ‘नामधेय’पदं “सदेव...”इत्यादिवाक्यानि गृहयन्ते (शु.मा.प्र.४१) इति चेद्, न;

‘नतु कारणाद्’ इति अर्थस्य लक्षणां विना ‘वाचारम्भण’शब्देन अबोधात्, ‘नामधेय’पदस्य कारणस्यैव नामधेयम् इति अर्थोऽपि न अध्यहारमन्तरा संगतः. “कारणमेव हि” (शु.मा.प्र.४१) इत्यादितु असंगतमेव. “मृदो घटः” इति कथनेन जलाहरणासिद्धेः. तस्माद् “वाचारम्भणं विकारः” इत्यत्र अन्यतरस्य अन्यतरं प्रति हेतुत्वम्. ‘इति’शब्दस्य पूर्वत्र अन्वयेन इतिमृतिकैव इति व्याख्येयम्. अतो न पद-द्वय-वैयर्थ्यम्. सूत्रे ‘आदि’पदेन “ऐतदात्म्यम् इदं सर्वम्” (छान्दो.उप.६।८।७) इत्यादि-कारणाभेद-बोधकं ‘नेह नानास्ति” (कठोप.२।१।१, बृह.उप.४।४।१९) इत्यादिच गृह्यते. ‘अनन्यत्व’-शब्दार्थस्तु अन्यत्वाभावो नतु तादात्म्यं प्रमाणाभावात्, सच कार्यस्य मिथ्यात्वात्. अतएव ‘आरम्भण’-शब्दादिभ्यः इति उक्तं, नतु ‘सच्छ’ब्दादिभ्यः इति. कार्यस्य असत्त्वेऽपि कारणस्य सत्त्वन्तु त्वन्मते भेदादेः असत्त्वेऽपि तत्कारणस्य यथा सत्त्वं तथा बोध्यम्. किञ्च स्वानन्यावयवविन्यासान्यतद्विन्यासान्तरानन्यस्य स्वतो अनन्यतायाः अयुक्तत्वेन अवयवविन्यासभेदो न पुरुषभेदो इत्यपि असंगतम्. अतः तत्राऽपि तादृग्विन्यासानां कल्पितत्वेनैव पुरुष-भेदाभावः इति बोध्यम्.]

(२) नच जगतः सत्यत्वे “वाचारम्भणं विकारो नामधेयम्” (छान्दो.उप.६।१।४) इत्यादिश्रुतिविरोधः तस्य जगन्मिथ्यात्वप्रतिपादनपरत्वात्. विकारो घटादिः वागालम्बनमात्रं यतो नामधेयं विकारः नतु नामातिरेकेण विकारो अस्ति इति मृत्तिकैव सत्यं घटादिः मिथ्यैव इति यथा तथा परमकारणं ब्रह्मैव सत्यं तद्भिन्नं कार्यजातं मिथ्यैव इति अभिप्रायाद् इति वाच्यं; जगतो मिथ्यात्वे एकविज्ञानेन सर्वविज्ञानं यत्

प्रतिज्ञातं तद् न सिद्ध्येत् सत्यज्ञानेन मिथ्याज्ञानस्य असम्भवात्. अपिच कारणत्वबोधकश्रुतीनां सर्वस्य आत्मत्व-ब्रह्मत्वबोधकश्रुतीनां च अनुरोधेन कार्यस्य कारणानन्यत्वे सिद्धे “ऐतदात्म्यम् इदं सर्वं तत् सत्यम्” (छान्दो.उप.६।८।७) इत्यत्रापि अणिमपरिचायनार्थस्य सर्वस्यैव सन्निहिततया ‘तत्’पदेन परामर्शात् तस्यैव सत्यत्वं विधीयते. सर्वगतमेवच एकत्वम् अनूद्यते इति मन्तव्यम्. अन्यथा “स आत्मा स सत्यम्” इत्येवं पठेत्. नच नानात्वदर्शननिन्दया तस्य मिथ्यात्वसिद्धिः इति वाच्यं, तस्याः “चक्षुषश्चक्षुः” (केनोप.१।२) इत्यादिना ब्रह्मस्वरूपम् उपक्रम्य पठितत्वेन ब्रह्मस्वरूप इन्द्रियादिमत्तया जीवदेहवद् नानात्वस्यैव मिथ्यात्वं सिध्यति, न कार्यनानात्वस्य इति. नच अनादिकालप्रवृत्ताविद्यावशाद् भेदप्रतिभासः इति वाच्यम्; अस्य भेदस्य ब्रह्मेच्छया प्रतिभाससम्भवे अविद्याकल्पितत्वकल्पने प्रमाणाभावात्. तादृश-भेदस्यापि अविद्याकल्पितत्वे ब्रह्मणोऽपि जीवतौल्यापत्तेः. तस्माद् वाचारम्भणश्रुतीनां न जगन्मिथ्यात्वप्रतिपादनपरत्वम्. यत्तु ननु यो विकारः पृथुबुध्नोदरादिः स वाचारम्भणः वाचिकक्रियात्मको नतु कारणाद् व्यक्तिभेदापादकः यथा “सुप्ते उत्थिते उपविष्टे च पुरुषे” इत्यादिना अस्मन्मतम् अनूद्य ‘नतु कारणाद्’ इति अर्थस्य लक्षणां विना ‘वाचारम्भण’शब्देन अबोधात् ‘नामधेय’पदस्य कारणस्यैव नामधेयम् इति अर्थोऽपि न अध्याहारमन्तरा संगत इत्यादि दोषापादानं तदपि परमतस्वमताज्ञानपूर्वकमेव. ‘वाचारम्भणम्’ इत्यस्य अस्मन्मते अयम् अर्थः यो विकारः स वाचारम्भणं यद् आरभ्यते तद् आरम्भणं “कृत्यल्युटोबहुलम्” (पाणि.सू.३।३।११३) इति कर्मणि ल्युट् वागारब्धम् इति अर्थः. नामधेयं कारणस्यैव नामधेयम्. इदन्तु अर्थलब्धम्. कारणस्यैव तत्र “एकेन मृत्पिंडेन” इत्यादिना प्रकृतत्वात्

कारणमेव तत्तदर्थक्रियासिद्ध्यर्थं तेन-तेन नाम्ना व्यवह्रियते इति कारणाद् अभिन्नं कार्यं ननु स्वेन रूपेण कारणाद् भिन्नं तद् आह "मृत्तिका इत्येव सत्यम्" (छान्दो.उप.६।१।४) इति. अत्र "कारणाद् अभिन्नम्" (शु.मा.प्र.४१) इत्यादिनातु अभिप्रायवर्णनं नतु पदार्थवर्णनम्. येन लक्षणां विना इत्यादि दोषः स्यात् तादृशार्थोऽपि लक्षणां विना न सम्भवति इति यद् उच्यते तदा भवन्मतेऽपि "तदनन्यत्वम् आरम्भणशब्दादिभ्यः" (ब्र.सू.२।१।१४) इति सूत्रभाष्ये "यथा सोम्य एकेन मृत्पिंडेन सर्वमृण्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं मृत्तिका इत्येव सत्यम्" (छान्दो.उप.६।१।४) इत्यस्य व्याख्याने "यतो वाचारम्भं विकारो नामधेयं वाचैव केवलम् अस्ति इति आरभ्यते विकारो घटः शरावः उदञ्चनं च इति. नतु वस्तुवृत्तेन विकारो नाम कश्चिद् अस्ति नामधेयमात्रं हि एतद् अनृतम्" (ब्र.सू.शां.भा.२।१।१४) इति व्याख्यानेऽपि वाचैव केवलम् आरभ्यते इत्यर्थस्य वाचारम्भणम् इत्यत्र 'एव'काराभावेन लक्षणाम् अध्याहारं वा विना असम्भवात्. एवं "नतु वस्तुवृत्तेन विकारो नाम कश्चिद् अस्ति" इति अर्थोऽपि लक्षणादिकं विना न सम्भवतीति. तत्र तात्पर्यवर्णनं चेत्, तुल्यम् अत्रापि. यच्च कारणमेव हि इत्यादितु असंगतमेव. "मृदो घटः" इति कथनेन जलाहरणासिद्धेः इति उक्तं तदभिप्रायाज्ञानात्. तत्र कारणमेवहि तत्तदर्थक्रियानिष्पत्त्यर्थे 'घट'-'शरावा'दिनाम्ना व्यवहियते इति उक्तम्. एवञ्च प्रामाणिकैः केवले मृत्पिण्डे 'घट'इति व्यवहारो न क्रियते. येन जलाहरणसिद्धिः स्यात्, दोषदूषितस्य कस्यचिद् व्यवहारस्तु न अर्थक्रियाकारकः शुक्तौ रजतव्यवहारवत्. प्रामाणिकानां व्यवहारस्तु अवस्थाविशेषएव भवति तदा अर्थक्रियाऽपि भवत्येवेति न कोपि दोषः. अवस्थाविशेषस्यैव कार्यत्वात् अन्यतरस्य अन्यतरं प्रति हेतुत्वकथनमपि

असंगतमेव. कार्यस्य मिथ्यात्वे 'नामधेय'पद-'इति'पदयोः वैयर्थ्यं दुरुद्धरमेव. ''वाचारम्भणं विकारो 'मृत्तिका'इत्येव सत्यम्'' इत्यनेनैव अर्थसिद्धेः. यदपि 'अनन्यत्व'शब्दार्थस्तु अन्यत्वाभावो नतु तादात्म्यं प्रमाणाभावाद् इत्यादि उक्तं तदपि 'अन्यत्व'शब्दार्थाज्ञानात्. अन्यत्वंहि भेदः सच तादात्म्यावच्छिन्नप्रतियोगिताकाभावः तदभावश्च तादात्म्यरूपएव भेदाभावस्य प्रतियोगितावच्छेदकरूपत्वात्. अत्यन्ताभावाभावस्यच प्रतियोगिरूपत्वात् अतएव संयोगिभेदाभावः संयोगस्वरूपएव इति कथनमपि तार्किकाणां संगच्छते च प्रतियोगितावच्छेदकेन अन्योन्याभावस्य प्रतियोगिना सहच अत्यन्ताभावस्य विरोधः.

इदञ्च च सिद्धांतलक्षणे भेदाव्याप्यवृत्तित्वप्रसंगे ''तद्धर्मावच्छिन्नभिन्नभेदस्य तद्धर्ममात्रपर्यवसायितया कपिसंयोगिभिन्नभेदात्मनः कपिसंयोगस्य मूलवृत्तित्वे विरोधाच्च. नहि घटभिन्नभेदो घटत्वाद् अतिरिच्यते आवश्यकक्लृप्तघटत्वेनैव उपपत्तौ अतिरिक्तकल्पनायां मानाभावात्. अन्यथा सर्वत्र अभावस्य अभावो अतिरिक्तएव कल्प्यते'' (दीधिति.विशेषव्याप्ति) इत्यादिना दीधितिकारैः स्पष्टमेव उक्तम्. नच तैः तद्धर्मावच्छिन्ने भिन्नभेदएव तद्धर्मस्वरूप उक्तो नतु तद्धर्मावच्छिन्नभेदात्यन्ताभावइति कथं तादात्म्यावच्छिन्नभेदात्यन्ताभावस्य तादात्म्यरूपत्वमिति वाच्यं धर्मिभेदस्य धर्मात्यन्ताभावानतिरिक्तत्वात् समनियताभावानाम् ऐक्यात् तादात्म्यावच्छिन्नभिन्नभेदः तादात्म्यावच्छिन्नभेदात्यन्ताभावएव सच तादात्म्यरूपएव इति अवश्यक्लृप्तेन तेनैव उपपत्तौ अतिरिक्तकल्पने गौरवस्यैव बाधकत्वाद् इति. नतु तादात्म्यं प्रमाणाभावाद् इति असंगतमेव लाघवरूपप्रमाणस्य सत्त्वात्

> सच कार्यस्य मिथ्यात्वाद् **इत्यपि असंगतम्. कार्यस्य मिथ्यात्वे तत्र सदन्यत्वाभावो न सम्भवति. मिथ्या सद् इति अप्रतीतेः मिथ्या सद् न इति प्रतीतेश्च. मिथ्यात्वेतु कार्यस्य सदन्यत्वमेव नतु अन्यत्वाभावइति ‘‘तदनन्यत्वम् ‘आरम्भण’शब्दादिभ्यः’’ (ब्र.सू.२।१।१४) इति सूत्रविरोधो दुरुद्धएव. तस्मात् कार्यस्य सत्यत्वमेव. भेदादीनामपि अस्मन्मते न असत्त्वमिति** कार्यस्य असत्त्वेऽपि कारणस्य सत्त्वन्तु त्वन्मते भेदादेः असत्त्वेऽपि तत्कारणस्य यथा सत्त्वं तथा बोध्यम् **इति दृष्टान्तप्रदर्शनमपि असंगतमेव. यश्च** किञ्च स्वानन्यावयवविन्यासान्यतद्विन्यासान्तरा-ऽनन्यस्य **इत्यादि प्रलापः सतु अस्मन्मताज्ञानकृतत्वाद् उपेक्ष्यते तादृग्विन्यासानां कल्पितत्वे प्रमाणाभावात् च.**

(३) सहस्राक्षे तद्वाक्यस्य इत्यादिं भेदाभावः इति बोध्यम् इत्यन्तं भागं निराकुर्वन्ति **नच जगतः**...इत्यादिना **प्रमाणाभावात् च** इत्यन्तेन. **जगतो मिथ्यात्वे** इत्यादि. अयं भावः : तन्मिथ्यात्वे वाचारम्भणश्रुतेः तात्पर्यम् इति अशक्यकल्पनम्. तथासति उपक्रमे **‘‘उत तम् आदेशम् अप्राक्ष्यो येन अश्रुतं श्रुतं भवति अमतं मतम् अविज्ञातं विज्ञातम् इति’’** (छान्दो.उप.६।१।२-३) इति एकश्रवण-मनन-विज्ञानैः सर्वस्य श्रवण-मनन-विज्ञानानि सिध्यन्ति इति प्रतिज्ञा विरुध्येत. सत्यवस्तुज्ञानेन मिथ्यावस्तुज्ञानस्य अयोगात्. नहि रज्जुज्ञाने सर्पमालादयः सर्वे ज्ञाता भवन्ति. प्रत्युत तज्ज्ञाने सर्पादिज्ञानं नश्यत्येवेति विवर्तवादे एकविज्ञानेन सर्वस्यापि अविज्ञानमेव आपद्यते. ब्रह्मज्ञानोत्तरं त्वन्मते प्रपञ्चस्य विलयात्, तदापि अविलये कदापि न विलयः स्यात्. यदाच सर्वं ज्ञायते तदा नैकज्ञानम्. अतः प्रतिज्ञाविरोधः त्वन्मते सुस्थः. अपिच **‘‘तस्माद् वा एतस्माद् आत्मनः आकाशः सम्भूतः’’, ‘‘यतो वा इमानि भूतानि’’** (तैत्ति.उप.२।१,३।१) इत्यादिकारणत्वबोधकश्रुतीनाम् **‘‘सर्वं तं परादाद् यो अन्यत्र आत्मनः सर्वं वेद...इदं सर्वं यद् अयम् आत्मा’’** (बृह.उप.२।४।६) **‘‘सर्वं खलु इदं ब्रह्म तज्जलान्’’**

(छान्दो.उप.३।१४।१) “**तद् आत्मानं स्वयम् अकुरुत**” (तैत्ति.उप.२।७) इत्यादीनाम् आत्मत्व-ब्रह्मत्वबोधकश्रुतीनां च अनुरोधेन कार्यस्य कारणानन्यत्वमेव सिध्यति. मिथ्यात्वेतु ताः पीडच्येरन्, मिथ्या-सत्यवस्तुनोः ऐक्यायोगात्. किञ्च तत्रैव “**स य एषो अणिमा ऐतदात्म्यम् इदं सर्वं तत् सत्यम्**” (छान्दो.उप.६।८।७) इति सन्निहितं कार्यं ‘तच्छ’ब्देन परामृश्य तस्य सत्यत्वम् असंदिग्धं श्राव्यते. वाचारम्भणवाक्यार्थस्तु अनुपदं वक्ष्यते. बृहदारण्यके नानात्वदर्शनस्य निन्दातु जीववद् ब्रह्मणि देहेन्द्रियादिविभागदर्शनस्यैव नतु कार्यदर्शनस्य, वामदेवादिनां ब्रह्मविदां कार्यदर्शनश्रवणात्. मिथ्यात्वे च ब्रह्मणः कारणत्वमपि न स्यात्. ब्रह्मणि अविद्ययैव कार्यं कल्पितमिति कथनेतु जीवतौल्यम् अज्ञत्वापादकं प्रसज्येत. विस्तरेण च इदं सर्वम् उपपादयिष्यते. यच्च

“पूर्वावस्थातु मृद्रूपा घटावस्था ततो अभवत्॥
घटोऽपि मृत्तिकारूपो लये पश्चात् च मृत्तिका”॥ (शु.मा.४१)

इति मार्तंडकारिकाटीकास्थं लेखं यथाकथञ्चिद् ननु यो विकार इत्यादिना अनूद्य नतु कारणाद् इत्यादि पदद्वयवैयर्थ्यम् इत्यन्तं प्रकृतश्रुतिवाक्यार्थविषयकम् उक्तं तद् असत्. तत्रहि एकविज्ञानेन सर्वविज्ञानप्रतिज्ञोत्तरं “**कथंनु भगवः स आदेशो भवति**” (छान्दो.उप.६।१।३) इति श्वेतकेतुना पृष्टे “**यथा सोम्य एकेन मृत्पिडेन सर्वं मृण्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं ‘मृत्तिका’इत्येव सत्यम्. यथा सोम्य एकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं लोहम् इत्येव सत्यम्. यथा सोम्य एकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं कृष्णायसम् इत्येव सत्यम् एवं सोम्य स आदेशो भवतीति**” (छान्दो.उप.६।१।४-६) इति उद्दालकः आह. अत्र एकविज्ञानेन सर्वविज्ञानं कथं स्याद्? इति शंकावारणाय दृष्टान्तमुखेन प्रवृत्ते निरूपणे जगन्मिथ्यात्वं विवर्तवादः च नैव घटते उक्तदिशा प्रत्युत प्रतिज्ञायाः भंगप्रसंगात्, विवर्तदृष्टान्तानाम् अस्पर्शात्, परिणामिदृष्टान्तानामेव उपादानात् च. अत्रच कारणस्य साकारत्वद्योतनायैव ‘पिंड’-‘मण्या’दिशब्दग्रहणम्. अन्यथा

“एकया मृदा” इत्याद्येव वदेत्. तथाच अयं वाक्यार्थः **हे सोम्य! यथा एकेन** केवलेन **मृत्पिण्डेन** अर्थाद् विज्ञातेन सता **सर्वम्** अशेषं **मृण्मयं** मृत्कार्यं **विज्ञातं स्यात्**, घटाद्यवस्थायां मृत्पिण्डविशेषत्वानपायात्. तदेव उपपादयति **वाचारम्भणम्** इति, **आरभ्यत इति** आरम्भणं **“मुखनासिकावचन-”** (पाणि.सू.१।१।८) इत्यादिवद् बाहुलकात् कर्मणि ल्युट्. यो विकारः कार्यावस्थायां पृथुबुध्नोदरत्वादिदर्शनमूलककारणत्वप्रतिषेधरूपः स्वरूपच्यावः स वाचारम्भणं वाचैव आरभ्यते नतु वस्तुतः. तद् यथा शुद्धिकामेन “मृदम् आनय” इति उक्ते नियोज्येन घटादौ आनीते “घटो अयं न मृत्तिका” इति प्रतिषिध्यते. स प्रतिषेधो वाङ्मात्रारब्धो न वास्तवः. तथा अत्र “घटो अयं न ब्रह्म” इति लौकिकार्थकामकृतःप्रतिषेधोऽपि. नच अत्र ‘विकार’शब्देन कार्यं शंक्यं तस्य त्वन्मते नामरूपमात्रस्वरूपत्वात्. ‘विकार’शब्देनैव उभयोः लाभे ‘नामधेय’पदवैयर्थ्यप्रसंगात्. कार्यस्य वाङ्मात्रारब्धत्वे “मृदि घटः” इत्यादिप्रयोगमात्रेण घटादिदर्शनं जलानयनादिसिद्धिः च आपद्येत. अथ कस्य अयं विकारो वागारब्धः इति आकाक्षायां मृत्पिण्डस्य इति पूर्वोक्तस्य कारणस्यैव इत्येव निश्चीयते नतु वस्त्वन्तरस्य इति. एवञ्च ‘विकार’पदइव ‘नामधेय’पदेऽपि तस्यैव सम्बन्धितया अन्वयो अर्थादेव प्रतीयते अतो न अध्याहारादिक्लेशः.

नच नामधेयमपि वाचारब्धम् इति अर्थः संभवति वाचो नामधेयानतिरिक्तत्वात्, तस्मात् तेन-तेन नियतविन्यासविशेषेण स्थितस्य मृत्पिण्डस्यैव ‘घट’-‘शरावा’दिनामधेयम् इति अर्थः. तथाहि मृत्पिण्डे सर्वाकृतिसमावेशः काष्ठपाषाणादिवत्. इदञ्च तुरीयश्लोकखण्डने उपपादयिष्यामः. पृथुबुध्नोदरादि यत् तद् विन्यासविशेषेण स्थितावपि तस्य मृत्पिण्डत्वं नैव अपैति, अन्यथा शरीरादिषु पिण्डव्यवहारानुपपत्तेः. तथाच रूप-नामव्याकरणावसरे येन-येन विन्यासेन स्थितः पिण्डः तत्तदर्थक्रियासिद्ध्यर्थ तेन-तेन नाम्ना व्यवह्रियतइति कारणाद् अभिन्नमेव कार्यं नतु स्वेन रूपेण कारणाद् अभिन्नं तद् आह “**‘मृत्तिका’इत्येव सत्यम्**” इति. अत्र **‘सत्यम्’** इति न मृत्तिकाया विशेषणम् **‘इति’**शब्देन व्यवधानात् क्लीबनिर्देशात् च.

किन्तु ‘‘**सर्वं मृण्मयम्**’’ इति पूर्वोक्तस्यैव विशेषणम्. अन्यथा ‘‘मृत्तिकैव सत्या’’ इत्येव वदेत्. ‘**इति**’शब्दो अत्र हेतौ प्रकारे वा [१]तथाच सर्वं मृत्तिका मृदभिन्नम् इति हेतोरेव सत्यं, कारणरूपेणैव सत्यम् इति वा अर्थः नतु मिथ्या. वाचारम्भणत्वेन खपुष्पतुल्यतया सर्वथा कार्यस्य अभावे ब्रह्म कस्य कारणं भवेत्?. तदभावेच ‘‘**यतो वा**’’ (तैत्ति.उप.३।१) इत्यादिबहुश्रुतिव्याकोपः.

प्राचां ‘‘नतु कारणाद् व्यक्तिभेदापादक’’ (शु.मा.प्र.४१) इत्यादि कथनन्तु तात्पर्यवर्णनमेव. अतो न लक्षणादिप्रसंगः, अन्यथा तदनन्यत्वसूत्रभाष्यस्थ त्वत्संमतव्याख्यानेऽपि मूलोक्तदिशा तत्प्रसंगः. ‘‘**नामधेयमात्रं हि एतद् अनृतम्**’’ (ब्र.सू.शां.भा.२।१।१४) इत्यादेः ‘मात्र’पदाद्यध्याहारम् अनृतादौ ‘नामधेया’दिपदस्य लक्षणामन्तरेण आश्रयितुम् अशक्यत्वात्. यत्तु ‘‘मृदो घटः’’ इति कथनेन जलाहरणासिद्धेः इति उक्तं तत्तु स्वपादे कुठारपातनम्. त्वद्व्याख्याने कार्यमात्रस्य वाचैव आरभ्यमाणतया तवैव तद्दोषप्रसक्तेः. ममतु रूप-नामव्याकरणानुरोधेन व्यवहारस्य अंगीकाराद् अदोषः प्राग्दर्शितः. यथा सुप्ते उत्थिते उपविष्टे वा पुरुषे तथा-तथाप्रतीतावपि न पुरुषभेदः. परं ‘सुप्ता’दिशब्दैः व्यवहारस्तु यदा तादृशावयवविन्यासः तदैव. तथा अत्र मृदो भेदाभावेऽपि तत्र ‘घटा’दिशब्दप्रयोगः तत्तद्विन्यासोपलम्भनकालएव अन्यथा व्याकरणबाधापत्तेः. नापि अन्यतरस्य अन्यतरं प्रति हेतुत्वं संगच्छते मानाभावात्. वाचरम्भणत्वोक्त्यैव नामधेयमात्रतायाः सिद्ध्या पुनः तत्पदवैयर्थ्यानुच्छेदात्. नापि ‘इति’शब्दस्य

---

[१] १. वस्तुतस्तु ‘‘कूजन्तं रामरामेति वाल्मिकि मुनिपुंगवः’’ इति वाक्ये यथा ‘राम’शब्दो यथा न दशरथात्मजवाचकः अपितु रफोत्तरवर्ती ‘आ’कारः तदुत्तरवर्ती‘म’कारः तदुत्तरवर्तीअकारध्वन्युच्चारित दशरथात्मजस्य भगवतो नामवाचकः ‘इति’शब्देन द्योत्यते तथा इहापि मृकारोत्तरवर्ती यः त्तिकारः तदुत्तरवर्ती यः काकारस्तद्ध्वन्युच्चारित मृत्तिका नामधैय वाचकोऽयम् ‘इति’शब्दः प्रकारार्थकतैव साधायसी (सम्पा.)

पूर्वयोजना श्रुत्यभिप्रेता. तथासति ‘‘इति मृत्तिकैव सत्यम्’’ इति पठेत्. पठतितु एवम् अतः उक्तएव अर्थः. प्रसह्य योजने ‘‘पिब दुग्धं विषं हित्वा’’ इत्यादावपि विषं पिब इति अर्थो न शक्यो वारयितुम्. किञ्च तथाकल्पनेऽपि ‘नामधेय’-‘इति’पदयोः वैयर्थ्यं दुरुद्धरमेव. ‘‘वाचारम्भणं विकारो मृत्तिकैव सत्यम्’’ इत्येतावतैव ‘‘ब्रह्म सत्यं जगद् मिथ्या’’ इति बोधसम्भवात्. एकादशस्कन्धेऽपि एतच्छ्रुत्यर्थो जगतः कालत्रयेऽपि ब्रह्माभेदरूपो दर्शितः. **‘‘यस्तु यस्य आदिः अन्तः च स वै मध्यं च तस्य तद् विकारो व्यवहारार्थं यथा तैजसपार्थिवाः’’** (भाग.पुरा.११।२४।१७) इति. नहि बौद्धसर्पस्य मध्ये प्रतीतिसमये आद्यन्तयोः वा रज्ज्वभेदः सम्भवति. अतो विकारो अन्यथाव्यपदेशो विविधव्यवहारप्रयोजनकएव. अत्रच ‘पार्थिव’पदेन मृत्पिण्डस्य ‘तैजस’पदेन लोहमणि-नखनिकृन्तनयोश्च समर्पणेन प्रकृतश्रुत्यर्थनिरूपणं निर्णीयते. अष्टमस्कन्धेऽपि **‘‘त्वयि अग्र आसीत् त्वयि मध्य आसीत् त्वपि अन्त आसीद् इदम् आत्मतन्त्रे. त्वम् आदिः अन्तो जगतोऽस्य मध्यं घटस्य मृत्स्नेव परःपरस्माद्’’** (भाग.पुरा.८।६।१०) इति. प्रकृतश्रुत्यभिप्रायकथने कालत्रयेऽपि अबाध्यत्वं कारणाभेदः च उक्तः. अथ कार्यक्रियाणामपि कारणाधीनतया निमित्ततामपि तस्यैव दर्शयितुञ्च नखनिकृन्तनवाक्यम्. ‘लोह’शब्दश्च अत्र सुवर्णादिपरः. **‘‘सर्वं स्यात् तैजसं लोहम्’’** (अम.को.२।९।९९) इति अमरोक्तेः, **‘‘शैली दारुमयी लौही’’** (भाग.पुरा.११।२७।१२) इत्यादौ तथाप्रयोगात् च. लोहवाक्यार्थश्च एकादशे स्कंधे दर्शितः **‘‘यथा हिरण्यं स्वकृतं पुरस्तात् पश्चात् च सर्वस्य हिरणमयस्य मध्ये तदेव व्यवहार्यमाणं नानापदेशैः अहम् अस्य तद्वत्‘‘** (भाग.पुरा.११।२८।१९). द्वादशेऽपि **‘‘यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिः व्यवहारवर्त्मसु एवं वचोभिः भगवान् अधोक्षजो व्याख्यायते लौकिक-वैदिकैः जनैः’’** (भाग.पुरा.१२।४।३०) एवम् उपबृंहणेनापि कारणस्यैव तत्तद् नामधेयम् इति अर्थो द्रढितो वेदितव्यः. तस्माद् अस्य वाक्यस्य जगतो ब्रह्मानन्यत्वएव तात्पर्यं नतु मिथ्यात्वे. अतएव निर्णीतवान् सूत्रकारः **‘‘तदनन्यत्वम् ‘आरम्भण’शब्दादिभ्यः’’** (ब्र.सू.२।१।१४) इत्यादिना. अर्थस्तु कारणानन्यत्वं नतु मिथ्यात्वम् **‘आरम्भण’शब्दादिभ्यः** प्रतीयते. अत्र ‘आदि’पदेन

‘नामधेय’पदम् ‘इति’शब्दः ‘‘**सदेव...**’’ इत्यादिवाक्यानि च गृह्यन्ते एकप्रकरणस्थत्वात्. तेन ऐतदात्म्यवाक्यस्य संग्रहः संमतएव. ‘‘**नेह नाना**’’ (बृह.उप.४।४।१९) इत्यादेस्तु न संग्रहः शाखान्तरस्थत्वेन अत्र तदुपस्थापकाभावात्, हेतु-साध्ययोः वैयधिकरण्यप्रसंगात् च. इदञ्च अधिकरणं ‘‘**प्रकृतिश्च**’’ (ब्र.सू.१।४।२३) इत्यधिकरणोक्तं समर्थयितुं प्रवृत्तम्. तत्र प्रतिज्ञा-दृष्टान्तबलाद् अभिन्ननिमित्तोपादानत्वं साधितम्. दृष्टान्तवाक्यशेषेच मिथ्यात्वप्रतीतौ तद् न सिध्येद् अदः श्रुतिविप्रतिषेधं विषयीकृत्य सो अस्ति इति पूर्वपक्षे नास्ति इत्यनेन साध्यते. तत्र ‘‘‘आरम्भण’शब्दादिभ्यः’’ इत्येव वक्तुम् उचितम्. नतु ‘सच्छ’ब्दादिभ्यः इति प्रथमोपस्थितत्वात्. विकारस्य वाङ्मात्रारब्धतायाः ततएव सिद्ध्या तेन कार्ये कारणानन्यतायाः निश्चयात् च. अन्यत् तत्प्रकरणस्थं ‘त्वा’दिपदेन संगृहीतम्. कण्ठरवेणच ‘सच्छ’शब्दो हेतूकृतः. ‘‘**सत्त्वात् च अवरस्य**’’ (ब्र.सू.२।१।१६) इति. एतेन अतएव ‘आरम्भण’शब्दादिभ्यः इति उक्तं नतु ‘सच्छ’ब्दादिभ्यः इति इति प्रत्युक्तम्.

यत्तु ‘अनन्यत्व’शब्दार्थस्तु अन्यत्वाभावो नतु तादात्म्यं प्रमाणाभावात्. सच कार्यस्य मिथ्यात्वात् इति तद् उपहसनीयम्. ‘‘**ऐतदात्म्यम् इदं सर्वम्**’’ (छान्दो.उप.६।८।७) इति तादात्म्यग्राहकप्रमाणस्य स्वयमेव ‘आदि’पदेन संग्रहात्. मिथ्यात्वसाधनाय सौत्रशब्दो भेदाभावपरः साधनीयः तत्र मिथ्यात्वस्यैव हेतुतया उक्तिः कौशलख्यापिका. नच ‘अनन्यत्व’शब्दार्थः सशंक्यवचनः ‘‘**भावेच उपलब्धेः, सत्त्वात् च अवरस्य**’’ (ब्र.सू.२।१।१५-१६) इति अग्रिमसूत्रद्वयविरोधात्. तादात्म्यएव तौ हेतू संगच्छेते नतु कारणमात्रसत्यत्वे. अत्रच **अवरस्य** कार्यस्य सत्त्वं कण्ठरवेण उच्यते कारणस्यैव सत्यत्वे तत् पीड्येत. तथाऽभिप्राये सतिच ‘‘मिथ्यात्वम् ‘आरम्भण’शब्दादिभ्यः’’ इत्येव सूत्रयेत्. ‘विकार’शब्दस्य कार्यपरतादरात्. नच तर्हि ‘‘सत्यत्वम् ‘आरम्भण’शब्दादिभ्यः’’ इत्यपि कुतो न सूत्रितम् इति शंक्यं, सिद्धान्तरीत्या स्वरूपप्रच्युतिरूपविकारस्य वागारब्धतया कार्यस्य कारणानन्यत्वएव ‘आरम्भण’शब्दस्य हेतुतौचित्यात्. अग्रे कण्ठरवेण अवरस्य

सत्त्वकथनात् च. एतेनैव तदनन्यत्वसूत्रे **“भेदव्यासेधएव क्रियते नतु अभेदो बोध्यते”** (**“न खलु ‘अनन्यत्वमि’ति अभेदं ब्रूमः, किन्तु भेदं व्यासेधाम”**) (ब्र.सू.शां.भा.भा.२।१।१४) इति भामतीकाराद्युक्तिः प्रत्युक्ता श्रौतप्रतिज्ञादृष्टान्तयोः उपरोधात्. प्रतिषिद्धे भेदे अभेदएव पर्यवसानात् च. “राहोः शिरः” इत्यादौ यद् नामधेयमात्रत्वम् उक्तं तत्रापि अभेदएव सिध्यति. अभिलापमात्रत्वे खपुष्पवत् कदापि राहुः न उपलभ्येत. रज्जुसर्प-मृगतृष्णादौ व्यासेधमात्रन्तु तस्य अवस्तुत्वाद् उत्तरक्षणे बाधात्. नच अत्र तथा बाधाभावात् ब्रह्मविदामपि शुकवामदेवादीनां प्रपञ्चप्रतीतेः. **“तद् ह एतत् पश्यन् ऋषिः वामदेवः प्रतिपेदे अहं मनु अभवं सूर्यः च इति”** (बृह.उप.१।४।१०) इति. मिथ्यात्वेतु मन्वादिप्रतीतिः तस्य न स्यात्. सूत्रे **‘आदि’** शब्दपरिगृहीतवाक्येभ्योऽपि तादात्म्यस्यैव सिद्धिः दृश्यते. तथाहि तत्र प्रतिज्ञानिर्वाहाय द्रष्टान्तत्रयम् उक्त्वा **“एवं सोम्य स आदेशो भवति”** इति उक्तेऽपि दृष्टान्ते कार्यकारणयोः प्रत्यक्षत्वाद् द्राष्टान्तिके कारणस्य कारणताप्रकारस्यच अप्रत्यक्षत्वात्. भगवांस्त्वेव मे ब्रवीतु इति श्वेतकेतुना पृष्टे उद्दालकः **“तथा सोम्य”** (छान्दो.उप.६।१।७) इति तत्कथनं प्रतिज्ञाय **“सदेव सोम्य इदम् अग्र आसीद्”** (छान्दो.उप.६।२।१) इत्यादिना निरूपितवान्. तत्र **“सज्जायते”** इति स्पष्टतया कार्यस्य सत्यत्वं वक्ति. मिथ्यात्वेतु ‘इदं’शब्द‘सच्छ’ब्दौ पीड्येयाताम् असद्वादनिरासप्रयासः च वृथा स्यात्. मिथ्या-सत्ययोः ऐक्यानुपपत्त्या **“बहु स्यां प्रजायेय”** (छान्दो.उप.६।२।३) इति ईक्षणमपि न घटेत. तेजःप्रभृतिसृष्टिरपि न संगच्छेत. नहि द्रष्टा स्थाणुत्वेन गृहीतो वा पुरुषः “स्थाणुः अहं भवेयम्” इति ईक्षया तथाभवति स्थाणुं सृजति वा. अग्रे च तेजसो अपाम् अद्भ्यो अन्नस्य च सम्भवे **“शोचति स्वेदते वा पुरुषः”** (छान्दो.उप.६।२।३) इत्यादिना युक्तिः उच्यते. नहि अश्रु प्रस्वेदो वा तेजसो विवर्तः अन्नं वा वृष्ट्यादिजलस्य, अन्यथा अधिष्ठानज्ञाने बाध्येत **“सेयं देवता ऐक्षत...अनेन जीवेन अनुप्रविश्य नामरूपे व्याकरणवाणि इति”** (छान्दो.उप.६।३।२) इत्यादिना उक्तम् ईक्षणम् अनुप्रवेशो व्याकरणं च न घटेत अभ्रान्तत्वात् गंधर्वनगरादौ प्रवेशायोगात् त्रिवृत्करणमपि तथा. नहि रज्जौ कल्पितः सर्पः त्रिवृत्कर्तुं शक्यः. यदपि

"यद् अग्नेः रोहितं रूपं तेजसः तद् रूपं यत् शुक्लं तदपां यत् कृष्णं तद् अन्नस्य अपागाद् अग्नेः अग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणि इत्येव सत्यम्" (छान्दो.उप.६।४।१) इत्यादि तस्या अयम् अर्थः : लौकिकबुद्ध्याहि अग्निः अग्नित्वेन रूपेण स्वतंत्रएव प्रतीयते नतु तेजोऽबन्नतादात्म्येन. तार्किकादयश्च लौकिकाः पृथिव्यप्तेजःप्रभृतीनि स्वतन्त्रद्रव्याण्येव अभिमन्यन्ते तद्वारणाय इदम् उच्यते. तत्र यद् अग्नेः कार्यविशेषस्य सम्बन्धि रोहितं रूपं तत् तेजसएव रूपं नतु कारणगुणारब्धं रूपान्तरम् अधिष्ठाने कल्पितं वा कार्यनिष्ठम्. यत् शुक्लं रूपं तदपि अपामेव. यत् कृष्णं रूपं तदपि पृथिव्याएव. एवं सति अग्नेः सकाशाद् अग्नित्वं लौकिकबुद्ध्या निश्चितं परिच्छिन्नत्वं स्वतन्त्रद्रव्यत्वम् अपागात् . वाचारम्भणं विकारो अग्निः अयं न तेजोऽबन्नम् इति स्वरूपप्रच्यावो वाङ्मात्रारब्धः. वस्तुतः पूर्वोक्त तेजोऽबन्नानामेव 'अग्निः' 'उल्मुकं' 'दीपः' इत्यादि नामधेयं नतु अतिरिक्तम् अग्न्यादिकम्. तद् आह **"त्रीणि रूपाणि इत्येव सत्यम्"** (छान्दो.उप.६।४।१) इति 'इति'हेतोः तेजोऽबन्नत्वेन प्रकारेण वा अग्न्यादिकं सत्यं नतु स्वतन्त्रद्रव्यत्वेन इति अर्थः. 'सत्यम्'इतितु न रूपाणां विशेषणं वचनविरोधात्. नामरूपमात्रे मिथ्यात्वम् अभिमन्यमानस्य तवतु रूपाणामपि सत्यत्वं बाधकमेव. अनेन आदित्य-चंद्रमो-विद्युद्वाक्यानि व्याख्यातानि. एवं **"अन्नम् अशितं त्रेधा विधीयते"** (छान्दो.उप.६।५।१) इत्यादिना तेजोबन्नेषु एकैकस्य शरीरे त्रेधा विभागो मथ्यमानदधिवत् सूक्ष्मांशस्य उर्ध्वगमनं तस्य नवनीतवद् वागादिभावश्च कथ्यमानः परिणामवादमेव स्फुटयति नतु विवर्तवादम्. नहि पुरीषमांसादिकमपि अन्नादेः विवर्तः. अग्रे अद्भिः प्राणशक्तेः वर्धनम् अन्नेन मनःशक्तेः वर्धनं तया ऋग्वेदादेः प्रतिभानं तदुपक्षये तदप्रतिभानं, तत्र अग्न्यंगारदृष्टान्तश्च सर्वस्य विवर्तत्वादरे न उपपद्येत. अग्रेच नवकृत्वोपदेशे **"अशनापिपासे इमे सोम्य विजानीहि"** (छान्दो.उप.६।८।३) इत्यादिना ते निरूपिते. अत्र क्षुत्पिपासयोः जल-तेजःकार्यत्वेऽपि गोनायादिदृष्टान्तेन अशित-नेतृत्वाद् अपामेव नाम अशनाय इति, उदकनेतृत्वात् तेजसएव नाम उदन्येति इति उक्तं **"यत्र एतत्पुरुषो अशिशिषति नाम आपएव तदशितं नयन्ते तद् यथा गोनायो अश्वनायः पुरुषनाय इत्येवं तदप**

आचक्षते अशनायेति'' (छान्दो.उप.६।८।३). तथा ''**यत्र एतत्पुरुषः पिपासति नाम तेजएव तत्पीतं नयते तद्यथा गोनायो अश्वनायः पुरुषनाय इत्येतत् तेजआचष्ट उदन्येति**'' (छान्दो.उप.६।८।५) इति. एतेनापि कारणस्यैव तत्तन्नामधेयम् इति स्फुटं दर्शितम्. ''**तत्र एतत् शुंगम् उत्पतितं सोम्य विजानीहि नेदम् अमूलं भविष्यतीति**'' (छान्दो.उप.६।८।५) इति शुंगमूलभावः सन्मूलकत्वादिकं च विवर्तवादबाधकमेव इति उक्तं प्राक्. ''**वाङ् मनसि संपद्यते**'' (छान्दो.उप.६।८।६) इत्यादिक्रमेण प्रतिसंक्रमोऽपि अविकृतपरिणाम-एव संगच्छते. '**स य एषो अणिमा ऐतदात्म्यम् इदं सर्वं तत्सत्यम्**'' (छान्दो.उप.६।९।४) इत्यत्रापि इदमा निर्दिष्टस्य परिदृश्यमानस्य सर्वस्य जगतो ब्रह्मात्मकत्वम् उक्तम्. नहि अलीकस्य तत्तादात्म्यं सम्भवति. 'तत्'पदेनापि अणिमपरिचायनार्थस्य सर्वस्यैव सन्निहिततततया परामर्शात् तस्यैव सत्यत्वं विधीयते. सर्वगतमेवच एकत्वम् अनूद्यते. अन्यथा ''स आत्मा स सत्य'' इत्येव पठेत्. अग्रेऽपि मधु-नदी-वृक्ष-न्यग्रोधा-ऽणुधानादिदृष्टान्ताः सत्कार्यवादं परिणामवादं चैव अवगमयन्ति न मिथ्यावादम् इति विस्तरभयाद् विरम्यते.

नापि ''**न इह नाना अस्ति किञ्चन**'' (बृह.उप.४।४।१९) इतिवाक्यं जगन्मिथ्यात्वं साधयितुम् इष्टे. अत्र '**इह**' इत्यनेन जगत् परामृश्यते ब्रह्म वा. आद्ये जगति नानात्वस्यैव निषेधः सिद्धो नतु जगतः. नहि ''भूतले घटो नास्ति'' इत्युक्ते भूतलस्यापि अभावो गम्यते. द्वितीयेतु पुरुषादिषु देहेन्द्रियादिनानात्वमिव ''**यद् एकम् अव्यक्तम् अनन्तरूपम्**'' (महाना.उप.१-।५) इति अनन्तरूपे विश्वतःचक्षुष्ट्व-विश्वतोमुखत्वादिमत्यपि ब्रह्मणि न नानात्वम् इत्येव अर्थः. इदञ्च वाक्यं कठवल्ल्यां बृहदारण्यके च पठ्यते. तत्र प्रकरणविचारेहि अयमेव अर्थः इति तृतीयस्य द्वितीये स्पष्टम् आकरे. सूत्रे '**अनन्यत्व**'शब्देन तादात्म्यस्यैव परिग्रहे शिरोमणिभट्टाचार्यादितार्किकोक्तां युक्तिमपि आहुः **तदपि अन्यत्व...** इत्यादिना. तदनन्यत्वसूत्रे ''**भेदव्यासेधएव क्रियते**'' (ब्र.सू.शां.भा.भा.२।१।१४) इति वाचस्पत्यादीनां व्याख्यानं तत्रत्य भाष्यप्रकाश-शास्त्रार्थावरणभंगयोरपि विस्तरेण निराकृतम्. **लाघवरूपप्रमाणस्य** इति इदं युक्तिरूपम्. ''**तद् आत्मानं स्वयम् अकुरुत**''(तैत्ति.उप.२।७) ''**ऐतदात्म्यम् इदं सर्वम्**'' **(छान्दो.उप.६।८।७)** इत्यादिश्रुतिरूपमपि तादात्म्ये

प्रमाणं बोध्यम्. अतो अन्यत्वाभावपक्षएव प्रमाणाभावो ज्ञेयः. यत्तु एतदाशंकावारणाय सच कार्यस्य मिथ्यात्वाद् इति उक्तम्. तत्र **"सदेव सोम्य!"** इत्यादि तत्सूत्रविषयवाक्यविरोधं स्मारयन्ति **कार्यस्य मिथ्यात्वे** इत्यादिना. अतो मिथ्यात्वएव मानाभावाद् मानविरोधाद् च, तेन हेतुना अन्यत्वाभावः प्रमाणाभावो वा न वक्तुं शक्यः. मिथ्यात्वसिद्धौ सौत्रा'ऽनन्यत्व'शब्दस्य अर्थनिश्चयः तन्निश्चयेच सूत्रप्रामाण्यात् श्रुतौ कार्यमिथ्यात्वस्य सिद्धिः इति इतरेतराश्रयात् च. किञ्च इह भवद्भाष्यस्थे **"तस्मात् कारणात् परमार्थतो अनन्यत्वं व्यतिरेकेण अभावः कार्यस्य अवगम्यते"** (ब्र.सू.शां.भा.२।१।१४) इतिव्याख्यानेऽपि व्यतिरेकेण अभावोक्त्या तादात्म्यमेव आपतति. अन्यथा खपुष्पादेरिव अभावमात्रं वक्तव्यम्. एवं **"तयोः कार्यकारणयोः अनन्यत्वम् अवगम्यते"** (तत्रैव) इतिव्याख्यानेऽपि 'तयोः'इति सप्तमी षष्ठी वा, आद्ये खपुष्पसगंधस्य अधिकरणत्वानुपपत्त्या द्विवचनानुपपत्त्या च कार्यस्यापि सत्त्वम् आपद्यते. द्वितीये 'शुद्धाद्वैत'पदे षष्ठीतत्पुरुषपक्षे स्वाक्षिप्ताशेषदोषप्रसंगाद् अन्यत्वाभावासिद्धिः द्विवचनान्यथानुपपत्त्यादिना सुतरां तादात्म्यसिद्धिः च. अतः तथाशये कार्यमिथ्यात्वम् 'आरम्भण'शब्दादिभ्यः इत्येव कारणमात्रसत्त्वं तेभ्यः इत्येव वा वदेत्. एवम् उक्त्यातु तादात्म्यमेव फलति. **"भावेच..."** (ब्र.सू.२।१।१५) इत्यादिपुरस्त्यसूत्राणामपि तथैव सति संगतेश्च इति दिक्.

यत्तु अतएव 'आरम्भण'शब्दादिभ्यः इति उक्तं, नतु 'सच्छ'ब्दादिभ्यः इति इति अवादि तच्छ्रुतौ पौर्वापर्याननुसन्धानात्. तत्र आरम्भणवाक्यमेव सदेव इत्यादिवाक्यतः प्रथमम् इति प्रथमत्यागानौचित्यात् दृष्टान्ततः प्रतिज्ञातोपपादकतया आवश्यकत्वात् च युक्तं तद्ग्रहणम्. 'आदि'शब्देनच 'सदेव'इत्यादिकमपि संगृहीतमेव. अग्रिमसूत्रेषु भावे सति उपलब्धिम् अवरस्य सत्त्वंच कंठरवेण वदता तानि वाक्यानि स्मारितानीति किम् आम्रेडितेन. **भेदादीनाम्...** इति. अयं भावः. यच्च कार्यस्य असत्त्वे इत्यादि तदपि अभिप्रायाज्ञानात्. सर्वस्यैव कार्यस्य वाङ्मात्रारब्धत्वे कार्यात्यन्ताभावाद् ब्रह्म कस्य कारणं भवेद्? इति अस्माकम् आक्षेपः. तत्र कारणत्वनिर्वाहककार्यसत्त्वस्वीकारिणो अस्मान् प्रति भेदादिदृष्टान्तेन

तत्साधनम् अयुक्तमेव. बहुत्वरूपभेदस्य अस्मन्मते जतुघृतयोः द्रवत्ववद् ब्रह्मणोः धर्मत्वाद् न तस्य असत्त्वम्. अथ ब्रह्मप्रतियोगिभेदः संसारादिश्च अत्र गृह्यते इति चेद् मायिकाम्रादिवत् तस्य असत्त्वेऽपि ऐन्द्रजालिकशक्तिवद् मायायाः सत्यत्वाद् ब्रह्मणश्च कर्तृत्वात् तेन तया तस्य प्रदर्शनं सम्भवति न तथा त्वन्मते. किञ्च तत्प्रति ब्रह्मणो निमित्तमात्रत्वं जगत्प्रतितु उपादानत्वमपि. अतो **“यतो वा इमानि”, “तद् आत्मानं”, “प्रकृतिश्च”** (ब्र.सू.१।४।२३) इत्यादीनां न मन्मते व्याकोपः तवतु सर्वस्य असत्त्वात् तद्व्याकोपो दुरुद्धरः. स्वानन्य... इत्यादितु प्रलापमात्रम्. शरीरे स्वानन्यकरभिन्नचरणाभेदस्य समुद्राभिन्नैकतरंगतो अन्यस्मिन्नपि तरंगे समुद्राभेदस्यच दर्शनेन परस्परभिन्नयोरपि विन्यासयोः पुरुषाभिन्नतायाः पुरुषभेदानाधायकतायाः च सुयुक्तत्वात्. अतएव परमाचार्यस्य अहिकुंडलादिदृष्टान्ताः संगच्छन्ते. अन्यथा ते बाध्येरन्. विन्यासानां कल्पितत्वन्तु सत्यविन्यासान्तराभावसादृश्याभावादिभिः अशक्यवचनम्. किञ्च विजने सुषुप्तिं गतस्य पुंसो विन्यासस्य कः कल्पकः. स्वस्य निद्रापराभूतत्वादि तस्यच अभावात्. तदा विन्यासस्य अभावेतु निद्राकालिकस्य तस्य अनुमितिः अबाधिता न उपपद्येत. उत्तरकाले अनुमितिस्तु **“परिम्लानं पीनस्तनजघनसंगाद् उभयतस्तनोः मध्यस्य अन्तः परिमिलनम् अप्राप्यसरसम्. इदं व्यस्तन्यासं शिथिलितभुजाक्षेपवशतः कृशांग्याः संतापं वदति नलिनीपत्रशयनम्”** (रत्नावलि.२।११) इति रत्नावल्यादिषु वर्णिता लोके च प्रसिद्धा.

(१) [यच्च मायिकतया उभयसम्मत-स्वप्नवैधर्म्य-प्रतिपादकस्य “वैधर्म्याच्च न स्वप्नादिवद्” (ब्र.सू.२।२।२९) इति सूत्रस्य विरोधम् उक्तवान् तच्च न सम्यक्. तथाहि “नाभावः उपलब्धेः” (ब्र.सू.२।२।२८) इत्यनेन सर्वथा बाह्यार्थासत्त्वम् अभ्युपगच्छतो विज्ञानवादिनो मतस्य खण्डनम् उपक्रम्य स्वप्नादिषु अन्तरेणापि अर्थं वासना-निमित्तस्य वैचित्र्यस्य उभाभ्याम् अभ्युपगम्यमानत्वात्, अन्तरेणतु वासनाम् अर्थनिमित्तस्य ज्ञान-वैचित्र्यस्य मया अनभ्युपगतत्वात्. अभावो बाह्यार्थस्येति तद् अभ्युपगतं स्वप्ने सर्वथा अर्थशून्यत्वम् अभ्युपगम्य

जागरित-प्रत्ययेषु तदभावं ‘वैधर्म्याच्च’ इत्यनेन आह. एवञ्च यथा स्वप्ने अर्थशून्यत्वम् आश्रीयते तथा जागरिते न आश्रयितुं शक्यं, वैधर्म्यात्. वैधर्म्यञ्च जागरिते बाधाभावः स्वप्ने बाधः. अस्मद्रीत्यातु अविद्यादशायामेव स्वप्नस्य बाधः इतरस्यतु न इति बोध्यम्. एवञ्च कथं तद्विरोधः ? स्वाप्न-प्रत्ययैः सर्वथा असादृश्यस्य अनिषेधात्. अन्यथा सर्वस्य कथञ्चित् सर्वसदृशत्वेन अहन्तादि-प्रपञ्चस्य भेदादेः आसुरव्यामोहाय असत्यस्यैव प्रतीयमानतया अभ्युपगतस्य प्रभासलीलादेश्च त्वन्मतेऽपि मायिकत्वेन च तवापि तद्विरोधो दुर्वारः स्यात्, अहन्त्वादिषु व्यभिचारेण सूत्रासंगतिः च. एतेन मोक्षसाधने प्रवृत्त्यनुपपतेश्च (द्र.अणु.भा.२।२।२९) इति तत्सूत्रस्थ ‘च’कारस्य तात्पर्यं वर्णयतः टीकाकारोक्तिः प्रत्युक्ता, उक्ताशयेन विज्ञानवादिनं प्रति सूत्रस्य प्रवृत्तत्वात्.]

(२) किञ्च जगतो मायिकत्वे मायिकस्वप्नवैधर्म्यप्रतिपादकस्य “वैधर्म्याच्च न स्वप्नादिवद्” (ब्र.सू.२।२।२९) इतिसूत्रस्य विरोधः. ननु “नाभावः उपलब्धेः” (ब्र.सू.२।२।२८) इत्यनेन सर्वथा बाह्यार्थासत्त्वम् अभ्युपगच्छतो विज्ञानवादिनो मतस्य खण्डनम् उपक्रम्य स्वप्नादिषु अन्तरेणापि अर्थं वासनानिमित्तस्य वैचित्र्यस्य यथा अभ्युपगमः तथा जागरेऽपि वासनानिमित्तमेव वैचित्र्यं नतु अर्थनिमित्तमिति अभावो बाह्यार्थस्य इति तद् अभ्युपगतं स्वप्ने सर्वथा अर्थशून्यत्वम् अभ्युपगम्य जागरितप्रत्ययेषु तदभावं ‘वैधर्म्याद्’ इत्यादिना, वैधर्म्यञ्च जागरिते बाधाभावः स्वप्ने बाधः. एवञ्च स्वप्ने यथा अर्थशून्यत्वम् आश्रीयते तथा जागरिते न आश्रयितुं शक्यम् इति सूत्रकारेण विज्ञानवादिनो बौद्धमतस्यैव खण्डनं कृतं न अस्मन्मतस्य. अस्मन्मतेतु स्वप्नस्य अविद्यादशायामेव

बाधो जगतस्तु अविद्यादशायां न बाधः इति वैधर्म्यसत्त्वाद् न सूत्रविरोधः इति चेद्, न;

विज्ञानवादिमताद् भवन्मते विशेषाभावात् तन्मते विरोधसत्त्वे भवन्मते विरोधो न इति वक्तुं न शक्यते. यथा विज्ञानवादिभिः सर्वस्य विज्ञानस्वरूपत्वं बाह्यार्थाभावः स्वीक्रियते तदुक्तं तैः :

"बुद्धिस्वरूपमेकंहि वस्त्वस्ति परमार्थतः ॥
प्रतिभासस्य नानात्वाद् नचैकत्वं विहन्यते।
परिव्राड्-कामुक-शुनाम् एकस्यां प्रमदातनौ ॥
कुणपः-कामिनी-भक्ष्यम् इति तिस्रो विकल्पनाः।
तथापि एकैव सा बाला बुद्धितत्त्वं परंहि नः"॥

(द्र.सर्वदर्शनसंग्रहः.बौद्ध.पृ.३०) इति.

एवमेव भवद्भिरपि दृष्टिसृष्टिवादिभिः 'दृष्टि'पदप्रतिपाद्यविज्ञानव्यतिरिक्ता सृष्टिः न स्वीक्रियते. यथा तैः स्वप्नदृष्टान्तेन बाह्यार्थासत्त्वं प्रतिपाद्यते तथाच अनुमानं तन्मते, स्तंभादिप्रत्ययाः स्वात्मांशमेव बाह्यतया अध्यवस्यन्तो मिथ्याभूताः प्रत्ययत्वात् स्वप्नप्रत्ययवत् शुक्तिरजतप्रत्ययवत् च. स्वप्ने यथा बाह्यार्थाभावाद् देशान्तरवर्तिनां स्वशिरश्छेदादीनाञ्च दर्शनाद् अवश्यं विज्ञानमेव तत्तदाकारेण भासते तथा जाग्रज्जनानामपि विज्ञानग्राहित्वं मिथ्यात्वं च इति. तथैव भवन्मते स्वप्नदृष्टान्तेन जाग्रत्पदार्थानां मिथ्यात्वं साध्यते उक्तञ्च गौडपादैः

"यथा स्वप्ने द्वयाभासं स्पन्दते मायया मनः ॥
तथा जाग्रद्द्वयाभासं स्पन्दते मायया मनः ॥१॥
अद्वयञ्च द्वयाभासं मनःस्वप्ने न संशयः ॥
अद्वयञ्च द्वयाभासं तथा जाग्रद् न संशयः"॥२॥

(माण्डु.गौ.का.अद्वैत.२९-३०) इति.

एवञ्च स्वप्नसाधर्म्येण सर्वप्रपञ्चमिथ्यात्वम् अभ्युपगच्छतां भवतां मतेऽपि प्रपञ्चे स्वप्नवैधर्म्याभावाद् "वैधर्म्यात् च न स्वप्नादिवद्" (ब्र.सू.२।२।२९) इति सूत्रविरोधः कथं

न स्यात् ? नच अविद्यादशायामेव स्वप्नस्य बाधो अस्माभिः स्वीक्रियते प्रपञ्चस्यतु ज्ञानेन अविद्यानिवृतावेवेति वैधर्म्यसत्त्वात् कुतो अस्मन्मते सूत्रविरोधः ? इति वाच्यं , स्वप्नदृष्टान्तेन स्वप्नसाधर्म्यात्. प्रपञ्चस्य असत्त्वम् अभ्युपगच्छतां मतखण्डनाय इदं सूत्रं प्रवृत्तं तत्र सूत्रकारस्य अयम् आशयः : यादृश साधर्म्येण ज्ञाननिवर्त्यत्व-बाधितत्व-मायाकार्यत्वादिना प्रपञ्चस्य असत्त्वं साध्यते तत्साधर्म्यं न प्रपञ्चस्य किन्तु वैधर्म्यमेव प्रपञ्चे ज्ञानानिवर्त्यत्व-सत्यत्वाऽमायिकत्वादीनां सत्त्वात्. तादृशवैधर्म्यस्यच त्वया अनभ्युपगमात् कथं न विरोधः ? अविद्यादशायाम् अबाधमात्रेण वैधर्म्यं न संभवति. अन्यथा त्वन्मतसिद्धषोडशावस्थान्तर्गतस्वप्नस्वप्नावस्थादृष्टगजादीनां स्वप्नजाग्रदवस्थायां बाधात् तदवस्थादृष्टानां च अबाधात् तत्रापि वैधर्म्यसत्त्वात् तेषामपि मिथ्यात्वं न स्यात्. किञ्च न 'स्वप्नादिवद्' इति अंशेन यथा स्वप्नस्य मिथ्यात्वम् असत्यत्वं वा तथा प्रपञ्चस्य न इति उच्यते त्वन्मते च प्रपञ्चस्य मिथ्यात्वात् तादृशांशविरोधोऽपि. नच अविद्यादशायां सत्त्वात् न तादृशांशविरोधः. अविद्यादशायां सत्त्वाभ्युपगमे त्रैकालिकनिषेधप्रतियोगित्वं स्वाश्रयत्वेनाभिमतनिष्ठात्यन्ताभावप्रतियोगित्वम् इत्यादीनां त्वया अभ्युपगतानां तत्र असत्त्वेन मिथ्यात्वानुपपत्तेः, "अंशिनः स्वांशगात्यन्ताभावस्य प्रतियोगिनः अंशित्वाद् इतरांशीवद् दिगेषैव गुणादिषु" (चित्सुखी.१।८) इति चित्सुखोक्तिविरोधः च. किञ्च मिथ्यात्वासत्त्वयोः वास्तवभेदाभावाद् नामान्तरस्य च भेदासाधकत्वात् तवापि असद्वादित्वमेव दृष्टिसृष्टिवादित्वेन विज्ञानवादित्वमपि. नच अत्यन्तासत्त्वे प्रतीत्यनुपपत्तिः इति वाच्यम्; असद्वादिभिः अत्यन्तासतामेव स्वाप्नपदार्थानां तत्साधर्म्येण जाग्रत्पदार्थानां च प्रतीतेः अभ्युपगमात्. यत्तु स्वाप्नप्रत्ययैः सर्वथा असादृश्यस्य अनिषेधात् अन्यथा सर्वस्य कथञ्चित् सर्वसदृशत्वेन अहन्तादिप्रपञ्चस्य भेदादेः आसुरव्यामोहाय असत्यस्यैव प्रतीयमानतया अभ्युपगतस्य

प्रभासलीलादेश्च त्वन्मतेऽपि मायिकत्वेन च तवापि तद्विरोधो दुर्वारः स्याद् **इत्यादि उक्तं तदपि न सम्यक्. स्वाप्नपदार्थैः सर्वथा असादृश्यस्य अनिषेधेऽपि मिथ्यात्व-मायिकत्वादीनां जाग्रत्प्रपञ्चे त्वया अङ्गीकृतानां निषेधेन सूत्रविरोधस्य अनुद्धारात्. यत्किञ्चिद् वैधर्म्यम् आदाय सादृश्यनिषेधे चंद्रसदृशेऽपि मुखे तैजसत्व-कलंकित्वादिवैधर्म्याद् न 'चंद्रवदि'त्यादिव्यवहारापत्तेः. अस्मन्मते च प्रपञ्चस्य सत्यत्वेन मिथ्यात्व-मायिकत्वादीनाम् अनभ्युपगमेन स्वप्नतुल्यत्वाभावाद् न सूत्रविरोधः. अहन्तादि-प्रपञ्चस्य आसुरव्यामोहनादिलीलानां च मायिकत्वेऽपि तेषां सूत्रस्थादिपदेन संगृहीतानां स्वप्नतुल्यानां प्रपञ्चे वैधर्म्यसम्भवेन न कोपि दोषः पदम् आदधाति. अन्यथा 'आदि'पदस्य वैयर्थ्यापत्तेः. त्वन्मतेऽपि शुक्तिरजतादीनाम् 'आदि'पदेन ग्रहणम् अवश्यंकर्तव्यम् अन्यथा तेषु अविद्यादशायां बाधितेषु स्वप्नवैधर्म्यासत्त्वेन** अविद्यादशायाम्... **इत्याद्युक्तावपि सूत्रविरोधोद्धारो न स्यात्. किञ्च प्रपञ्चस्य मायिकत्वे मोक्षसाधनेषु श्रवणमननादिषु प्रवृत्तिः न स्यात्, एकजीववादस्यैव तत्सिद्धान्तसंमततया तद्भिन्नानां स्वप्नजीववद् जीवाभासत्वेन वामदेव-शुकादीनामपि स्वप्नदृष्टमुक्ततुल्यत्वेन गुरुशिष्यशास्त्रादीनामपि स्वप्नतुल्यत्वात् कस्यचिदपि पुरुषस्य "मम मुक्तिः भविष्यति" इति विश्वासासम्भवः च स्याद् इति अयमेव अर्थः सूत्रस्थ'च'कारेण व्यासैः दर्शितः. अतो विज्ञानवादिनः तत्तुल्यस्य तव च मतखण्डनाय इदं सूत्रं प्रवृत्तम्. एतेन** उक्ताशयेन विज्ञानवादिनं प्रति सूत्रस्य प्रवृत्तत्वाद् **इति प्रत्युक्तम्.**

(३) सहस्राक्षे यच्च मायिकतया उभयसंमत...इत्यादिं सूत्रस्य प्रवृत्तत्वाद् इत्यन्तं भागं परिहरन्ति **किञ्च जगतो मायिकत्वे** इत्यादिना **प्रवृत्तत्वादिति प्रत्युक्तम्** इत्यन्तेन. विज्ञानवाद-मायावादयोः कथम् अविशेषो इत्यतः तम् उपपादयन्ति **यथा विज्ञानवादिभिः** इत्यादिना. अत्र प्राञ्चः **"शमथविपश्यनायुगनद्धवाही मार्गो योगः"** (प्रमाणवार्तिक अलंकार) इति

तेषां योगलक्षणं, **शमथः** समाधिः उच्यते, **विपश्यना** सम्यग्दर्शनम्. यथा युगनद्धौ बलीवर्दौ वहतः तथा यो मार्गः सम्यग्दर्शनवाही स **योगः** तेन आचरतीति **योगाचारः** उच्यते इति तेषां सम्यग्दर्शनञ्च सर्वं बाह्यार्थशून्यं विज्ञानं, सर्वं क्षणिकं सर्वं निरात्मकम् इति. एतच्च भास्करभाष्येऽपि स्फुटम्. अत्र सर्वक्षणिकत्वं विज्ञानस्कन्धस्य क्षणिकत्वात्. निरात्मकत्वम् आलयविज्ञानातिरिक्तात्माभावात्. बाह्यार्थशून्यत्वन्तु विज्ञानस्यैव साकारत्वात् प्रत्यक्षत्वात् च. तथाहि सर्वं विज्ञानमेव. यत् साकारं यत् प्रत्यक्षं तद् विज्ञानमेव, नीलं-पीतमित्याद्याकारकंहि विज्ञानमेव प्रकाशते. दृष्टिप्रत्यक्षञ्च तत् प्रदीपवत् प्रकाशकत्वात्. यन्मते ज्ञानम् अप्रत्यक्षं तस्य स्वपरोत्पन्नज्ञानयोः अविशेषः आपद्येत. अस्तितु विशेषः स्वोत्पन्नज्ञानेन प्रवृत्तिः निवृत्तिः वा भवतीति. अतः एकमेव विज्ञानं ग्राह्य-ग्राहक-संवित्तिभेदेन प्रत्यक्षं प्रकाशते. यथोक्तं विप्रभिक्षुणा :

‘‘अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिद्ध्यति।
अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः।
ग्राह्य-ग्राहक-संवित्तिभेदवानिव लक्ष्यते’’॥

(धर्मकीर्ति द्र.सर्वदर्शनसंग्रह.पृ.३०) इति.

अर्थदृष्टिः प्रवृत्ति-निवृत्तिलक्षणव्यवहारः बुद्धिरेव आत्माविभागरहितोऽपि भ्रान्तदर्शनैः हेतुभिः ग्राह्यादिभेदवानिव भासते इति अर्थः. तत्र ग्राह्याकारः प्रमेयं ग्राहकाकारः प्रमाणं स्वसंवित्तिः फलम् इति त्रयम् एकस्मिन्नेव विज्ञाने अवकल्पते. नच एवं त्रिधाप्रकाशनेऽपि नानात्वं प्रमदातनुवद् उपपत्तेः. किञ्च **‘‘सहोपलम्भनियमाद् न भेदो नील-तद्धियोः’’** (द्र.शां.ब्र.सू.भा.भा.२।२।२८,द्र.विवरणप्रमेयसंग्रहः,सर्वदर्शनसंग्रहः.पृ.३२) यदैव नीलज्ञानं तदैव नीलम् उपलभ्यते तस्माद् अभिन्नम् इति अर्थः. इतश्च अनुमानाद् बाह्यार्थाभावः ‘‘बाह्यप्रत्ययो मिथ्या प्रत्ययत्वात् स्वप्नप्रत्ययवद् इति’’ इत्यादि आहुः. तदेतत्संगृह्णानाः तत्स्वरूपम् आहुः **बुद्धिस्वरूपम्** इति सर्वं वस्तु परमार्थतः बुद्धिस्वरूपं विज्ञानात्मकम् अतएव एकम्. नच प्रत्ययस्य नानात्वाद् एकत्वस्य विघातः; यथा एकस्मिन्नपि स्त्रीशरीरे विरक्ताः शवः इति, कामुकानां कामिनी इति, श्वादिमांसाशिनां भक्ष्यम् इति पृथग्विकल्पनाः. एवं विकल्पनानानात्वेऽपि यथा सा बालातु एकैव तथा अस्माकं बुद्धिः इति तदाशयः.

एवमेव इत्यादि. दृष्टिसृष्टिवादो भवताम् अद्वैतसिद्ध्यादिषु प्रपञ्चितः. तत्र दृष्टिश्च ज्ञानमेव, नतु चाक्षुषज्ञानमात्रम्. **''त्यदादिषु दृशो नालोचन''** (पाणि.सू.३।२।६०) इत्यादौ पश्यतेः ज्ञानसामान्यार्थकतायाअपि सिद्धेः. अन्यथा दृष्टिसृष्टिवादे वायोः अन्धैः अन्धकाराभिभूतैश्च हस्तपरामर्शादिनैव उपलभ्यमानवस्तूनाञ्च मिथ्यात्वं न स्यात्. तस्माद् विज्ञानमेव बाह्यार्थो दृष्टिरेव बाह्यार्थः इति अनर्थान्तरम्. **''ज्ञानस्वरूपमेव आहुः जगद् एतद् मनीषिणः/विचक्षणाः अर्थस्वरूपं भ्राम्यन्तः पश्यन्ति अन्ये कुदृष्टयः''** इत्यादि उदाहरन्तो ज्ञानातिरिक्तबाह्यार्थाभावमेव त्वदीया मन्यन्ते ज्ञानस्यैवच ग्राह्यादित्रिपुटीरूपभेदवत्त्वमिव इति. **स्तंभादिप्रत्ययाः** इति जागरितप्रत्यया इतिभावः. अत्र इदं बोध्यं : स्वाप्नप्रत्ययाहि तन्मते आलयविज्ञानरूपस्य आत्मनएव अंशान् बाह्यार्थतया अध्यवस्यन्ति ''इदं गृहम्'' ''अयं गजः'' इति. नहि तदानीं पारमार्थिकाः बाह्यार्था: सन्ति अतिदूरवर्तिदेशान्तरवर्तिनामपि अनुभवात्. कदाचिदपि अननुभूतानां स्वशिरश्छेद-मनुष्योड्डानादीनाञ्च अनुभवात्. अतो विज्ञानस्यैव तत्तदाकारस्य तदा बाह्यार्थतया अध्यवसायात् ते प्रत्ययाः मिथ्याभूताएव. अतः तेषु प्रत्ययत्वेन स्वात्मांशानां बाह्यार्थतया अध्यवसायिमिथ्याभूतत्वेन च व्याप्तिम् आदाय जागरितप्रत्ययेष्वपि प्रत्ययत्वेन हेतुना तथात्वं साध्यते. तन्मतखण्डनन्तु **''नाभावः उपलब्धे''** (ब्र.सू.२।२।२८) इति अधिकरणे द्रष्टव्यम्. तद्वत् स्वप्नादिदृष्टान्तेनैव भवन्मतेऽपि मिथ्यात्वं साधितम् इत्यत्र शंकराचार्यपरमगुरुसंमतिम् आहुः **उक्तञ्च** इति. माण्डूक्योपरि गौडवार्तिकेषु अद्वैतप्रकरणे उक्तम् इति अर्थः. **यथास्वप्ने** इति. एतदर्थन्तु तद्भाष्ये शंकराचार्याः **''कथं पुनः सतो माययैव जन्म इति उच्यते. यथा रज्ज्वां विकल्पितः सर्पो रज्जुरूपेण अवेक्ष्यमाणः सन् एवं मनःपरमार्थविज्ञप्त्या आत्मरूपेण अवेक्ष्यमाणं सत् ग्राह्य-ग्राहकरूपेण द्वयाभासं स्पन्दते स्वप्ने मायया रज्वामिव सर्पः तथा तद्वदेव जाग्रद् जागरिते स्पन्दते मायया मनः स्पन्दतइव इति अर्थः''** (माण्डु.गौ.का.शां.भा.२९।३०) इति व्याचक्षते. तत्र एतदग्रे **''मनोदृश्यम् इदं द्वैतं यत्किञ्चित् सचराचरम् मनसोहि अमनीभावे द्वैतं नैव उपलभ्यते''** (माण्डु.गौ.का.३।२९-३१) इति दृष्टिसृष्टिवादः तथा **''अकल्पकम् अजं ज्ञानं ज्ञेयाभिन्नं प्रचक्षते''**

(माण्डु.गौ.का.३।३३) इति आत्मनो ज्ञानमात्ररूपत्वञ्च उक्तम्. अत्रापि शंकराचार्याः **“रज्जु-सर्पवद् विकल्पनारूपं द्वैतरूपेण मनएव युक्तम्. तत्र किं प्रमाणम्? इति अन्वय-व्यतिरेकलक्षणम् अनुमानम् आह. कथं तेनहि मनसा विकल्प्यमानेन दृश्यं मनोदृश्यम्. ‘इदं द्वैतं सर्वं मनः’इति प्रतिज्ञा, तद्भावे भावात् तदभावे अभावात्. मनसोहि अमनीभावे निरुद्धे विवेकदर्शनाभ्यास-वैराग्याभ्यां रज्ज्वामिव सर्पे लयं गतेव असुषुप्ते द्वैतं नैव उपलभ्यते इति अभावात् सिद्धं द्वैतस्य असत्त्वम् इति अर्थः”** (माण्डु.गौ.का.शां.भा.३।३१) इति आहुः. अतः तवापि मते सूत्रविरोधः तदवस्थः. उभयसंमतो वासनासन्तानोऽपि **“नभावो अनुपलब्धेः”** (ब्र.सू.२।२।३०) इति सूत्रेण निराकृतइति किं प्रासंगिकेन. **ज्ञाननिवर्त्यत्व...** इत्यादि. अत्र ज्ञाननिवर्त्यत्वं सौत्रादिपदपरिगृहीतशुक्तिरजतादौ स्पष्टं स्वप्ने कदाचित् “स्वाप्नो अयम्” इति ज्ञानेऽपि कञ्चित् कालं तदनिवृत्तिदर्शनात्. बाधितत्वन्तु स्वप्नेऽपि जागरणोत्तरं स्वाप्नगजाद्यनुपलम्भात्. मायिकत्वन्तु विवर्त्ते स्वप्ने एन्द्रजालिकवस्तुनि च तुल्यं सूत्रे ‘आदि’पदेन विवर्तैन्द्रजालिकादीनां संग्रहः. **ज्ञानानिवर्त्यत्व...**इत्यादि. **“तद् ह एतत्पश्यन् ऋषिः वामदेवः प्रतिपेदे.”** (बृह.उप.१।४।१०) **“तेषां सर्वेषु लोकेषु कामचारो भवति”** (छान्दो.उप.७।२५।२) **“कामान् नीकामरूपि अनुसंचरन् एतत्साम गायन् आस्ते. हा३वु अहमन्नं ३”** (तैत्ति.उप.३।१०।५) **“यस्तु सर्वाणि भूतानि आत्मन्येव अनुपश्यति सर्वभूतेषुच आत्मानं ततो न विजुगुप्सते. यस्मिन् सर्वाणि भूतानि आत्मैव अभूद् विजानतः तत्र को मोहः कः शोक एकत्वम् अनुपश्यतः”** (ईशा.उप.६-७) इति बृहदारण्यक-छान्दोग्य-तैत्तिरीयेशावास्यादिषु ज्ञानिनामपि प्रपञ्चदर्शितायाः श्रावणाद् ज्ञानानिवर्त्यत्वम्. प्रपञ्चस्य ज्ञाननिवर्त्यत्वे ज्ञानिनः शिष्याद्यनुपलब्ध्या प्रवचनासम्भवात् अज्ञानिनश्च अनुपसत्तव्यत्वात्, मुण्डकादिषु ब्रह्मनिष्ठस्यैव तद्विज्ञानार्थम् अभिगम्यत्त्वश्रावणात् च मोक्षमार्गोच्छेदः. तस्य सत्यत्वन्तु **“यदिदं किञ्च तत् सत्यम् इति आचक्षते”** (तैत्ति.उप.२।६) इत्यादिश्रुतिभ्यः ततएव अमायिकत्वम्. **“तद् आत्मानं स्वयम् अकुरुत”** (तैत्ति.उप.२।७), **“स ह एतावान् आस”** (बृह.उप.१।४।३), **“सर्वं खलु इदं ब्रह्म”**

(छान्दो.उप.३।१४।१) “**पुरुषएव इदं सर्वम्**” (ऋक्.संहि.१०।९०।२) “**इदं सर्वं यद् अयम् आत्मा**” (बृह.उप.२।४।६) इत्यादिश्रुतिभ्यश्च. ‘आदि’पदेन उभयत्र यथायथं निरुपादानकत्व-ब्रह्मोपादानकत्वादयः. एवञ्च अविद्यानाशोत्तरमपि प्रपञ्चस्य अबाधात् तत्कल्पना प्रत्युक्ता ज्ञेया. **त्वन्मतसिद्धषोडशावस्था...** इत्यादि. अद्यत्वे विद्यमाना * वेदान्तादर्शकारादयस्तु “**तिस्रएव परस्परमिश्रणात् नवावस्था सप्तच अज्ञानभूमिका**” (   ) इति वदन्तः संकलनया षोडशताः दर्शयन्ति यथा आहुः. “**जाग्रज्जाग्रत्तथा जाग्रतस्वप्न-जाग्रत्सुषुप्तिके एवं त्रैविध्यम् आपन्नं जाग्रद् उक्तं मनीषिभिः. स्वप्नजाग्रत् तथा स्वप्नस्वप्न-स्वप्नसुषुप्तिके स्वप्नत्रयं समाख्यातम् एवं वेदीत पारगैः सुप्तिजाग्रत् तथा सुप्तिः सुप्तिसुप्ति सुषुप्तिके त्रैविध्यंहि गत इत्येवं भेदात् सुप्तिः तथैवच**” (श्लो.९५।९६।९७) इति. तथा “**बीजजाग्रत् तथा जाग्रत् महाजाग्रत् तथैवच जाग्रतस्वप्नः तथा स्वप्नः स्वप्नजाग्रत्सुषुप्तिके. एवं भेदात् समाख्याताः सप्त अज्ञानस्य भूमय**” (श्लो.१८९) इति व्याचक्षतेच तएव “**प्रमाज्ञानं जाग्रज्जाग्रत् शुक्तिरजतादिभ्रमो जाग्रस्वप्नः. जाग्रदवस्थायां श्रमादिना स्तब्धीभावः जाग्रत्सुषुप्तिः. स्वप्नमित्रादिप्राप्तिः स्वप्नजाग्रत्. स्वप्नेऽपि स्वप्नो मया दृष्ट इति बुद्धिः स्वप्नस्वप्नः. जाग्रद्दशायां वक्तुम् अशक्यं यत्किञ्चित् स्वप्ने अनुभूयते तत् स्वप्नसुषुप्तिः. सुषुप्त्यवस्थायां सात्विकी या सुखाकारावृत्तिः (यदनन्तरं प्रबुद्धस्य “सुखम् अहम् अस्वाप्सम्” इति परामर्श) सा सुषुप्तिजाग्रत् तत्रैव या राजसीवृत्तिः (यदनन्तरद् “दुःखम् अहम् अस्वाप्सम्” इति प्रबुद्धस्य परामर्शः) सा सुषुप्तिस्वप्नः. तत्रैव या तामसीवृत्तिः) यदनन्तरं ‘गाढं मूढो अहम् अस्वाप्सम्’ इति परामर्शः सा सुषुप्तिसुषुप्तिः**” (   ) इति. प्राञ्चस्तु स्वप्ने स्वप्नान्तरं स्वप्नस्वप्नः. स्वप्नएव स्वप्नाद् जागरणं स्वप्नजाग्रत् “**स्वप्ने जागरणं यथा**” (भाग.पुरा.११।१३।३०) इत्यादिपुराणप्रसिद्धेः इति वास्तवं विवर्णयन्ति “**बीजजाग्रदादयश्च इत्थम् अन्यत्र लक्षिताः कुसूले संस्थितं बीजं तत्र**

---

*इदं ग्रन्थः इदानीं नोपलभ्यते-सम्पा.

सर्वो यथा द्रुमः. तथा यत्र स्थितं विश्वं नतु व्यक्तिम् उपागतम्. बीजरूपं स्थितं जाग्रद् 'बीजजाग्रत्' तदुच्यते संसारप्रथमावस्था महामोहः सएवहि. तदेव अज्ञानम् इति उक्तं यत् स्वबोधेन न लीयते. कुसूले संस्थितं बीजं क्षेत्रे निक्षिप्यते यदा अंकुरोन्मुखतां याति सा अवस्था 'जाग्रद्' उच्यते. इदमेव 'महत्-तत्त्वम्' इति सांख्यैः निरूप्यते 'ईक्षणञ्चे'ति वेदान्तैः सामान्याहंकृतिः तथा. आनंदमयकोशश्च तत्साक्षीतु ईश्वरः स्मृतः. विशेषाहंकृतिः सूक्ष्मांकुरवद् व्यावहारिकी 'महाजाग्रद्' बुधैः प्रोक्ता व्यष्ट्यवस्थात्रयेतु सा. जाग्रत्स्वप्नसुषुप्त्याख्यावस्था 'जाग्रद्'इतिस्मृता. जाग्रदेव यदा जीवो मनोराज्यं करोतिहि. जाग्रतः स्वप्नइव यत् स 'जाग्रत्स्वप्नः' उच्यते. लोकप्रसिद्धो यः स्वप्नः स 'स्वप्नः' इति कथ्यते जातेऽपि जागरे जन्तोः स्वप्नदृष्टार्थभासनम्. प्रत्यक्षमिव संस्कारात् 'स्वप्नजाग्रत्' तदुच्यते. षडवस्थापरित्यागे सुषुप्तिः सप्तमी मता'' (   ) इति. केनचित् प्रकारभेदेन विलक्षणाअपि अवस्थाविशेषाः विद्यारण्यचित्सुखादिभिः दर्शितास्तु प्रकृते तत्तद्ग्रन्थेभ्यएव अवगंस्यन्तइति प्रासंगिकवस्तुविस्तराद् विरम्यते. स्वप्नेऽपि स्वप्नान्तरं स्वप्नस्वप्नः तादृशस्वप्नविरामे पूर्वस्वप्नएव जागरणं स्वप्नजाग्रदवस्था. **तदवस्थ** इति स्वप्नजाग्रदवस्था. तथाच भवन्मते स्वप्नजाग्रदवस्थास्थपदार्थानां यथा स्वप्नस्वप्नापेक्षया चिराद् बाधः तथा प्रपञ्चस्य सर्वस्वप्नापेक्षया अतिचिरादपि सइति साधर्म्यस्य सिद्ध्या चिरकालावस्थानोत्तरमपि बाधो जगतो न स्वप्नादितो वैधर्म्यापादकः. देवालयादौ द्वारस्तंभादिजटितशुक्तिशकलेषु कस्यचिद् बहुदिनावधिरजतबुद्धेः अनुवर्तनेऽपि उत्तरक्षणएव बाधितरजताद् वैधर्म्यं चिरकालानुवृत्तमिथ्यारजते न शक्यं वक्तुम्. यथा कथञ्चिद् वैधर्म्यस्यतु सर्वत्रैव सम्भवेन तत्रापि वैधर्म्याग्रहे सति साधर्म्यव्यवहारएव उच्छिद्येत. तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वस्यैव सादृश्यपदार्थत्वात्. 'भूयः'पदेन यत्किंचिद् वैधर्म्यं सर्वत्र सुलभं मूलेऽपि विवक्ष्यते. अतो ज्ञाननिवर्त्यत्व-बाध्यत्व-मायिकत्वादिभूयोधर्माणां प्रपञ्चे स्वप्नादौ च अंगीकारात् साधर्म्यस्यैव सिद्ध्या सूत्रविरोधः तदवस्थः. **किञ्च न स्वप्न**...इत्यादि **मिथ्यात्वं** सदसत्त्वाभ्याम् अनिर्वचनीयत्वम् **असत्यत्वं** सन्मात्रभिन्नत्वम्. इदं तन्मतमेव अनुसृत्य उक्तं, वस्तुतस्तु असत्यं मिथ्या

इति अर्थान्तरम्. **त्रैकालिकनिषेधप्रतियोगित्वम्** इति मिथ्यालक्षणम् अद्वैतसिद्ध्यादिषु स्पष्टम्. **स्वाश्रयत्वेन** इत्यादि. इदमपि लक्षणं चित्सुखेन **“सर्वेषामपि भावानां स्वाश्रयत्वेन सम्मते प्रतियोगित्वम् अत्यन्ताभावं प्रति मृषात्मतेति”** (चित्सुखी.१।७) इति संगृहीतम्. तत्रैव **“घटपटादीनां भावानां स्वाश्रयत्वेन अभिमताः तन्त्वादयो ये तन्निष्ठात्यन्ताभावप्रतियोगितैव तेषां मिथ्यात्वं नहि तेषाम् अन्यत्र सत्ता संभवति तत्रापि चेत् सा न स्यात् तदा “गलेपादुकन्यायेन” (लौकि.न्या.३८४) मृषात्वमेव पर्यवस्येत्”** (चित्सुखी.१।७) इति व्याख्यातमपि. **तत्र असत्त्वेन** इति प्रापञ्चिकघटादिषु प्रागुक्तलक्षणासत्वेन. अविद्यादृशायां तेषां सत्त्वांगीकारे वर्तमानकालिकप्रतिषेधाप्रतियोगित्वस्य आपत्त्या स्वाश्रयभूताविद्यानिष्ठात्यन्ताभावाप्रतियोगित्वस्य आपत्त्या च तेषु लक्षणासत्त्वम् इति भावः. **अंशिनः** इति. चित्सुखकृतप्रत्यक्तत्त्वप्रदीपिकायां प्रथमपरिच्छेदे प्रागुक्ता अग्रिमा इयं कारिका विवृताच तत्रैव **“विमतं पटः एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगी अवयवित्वात् पटान्तरवत् एवमेव तद्गुणकर्मजात्यादयोऽपि एतत्तन्तुनिष्ठाभावप्रतियोगिनः तद्रूपत्वात् इतरतत्तद्रूपवदिति एवमादिप्रयोगाः सर्वत्र ऊहनीयाः”** (चित्सुखी.तत्त्वप्रदी.१।८) इति. एवञ्च अंशिनः पटादयः स्वांशाः तन्त्वादयः “एतत्तन्तुषु पटो नास्ति” इति प्रतीतिसाक्षिकात्यन्ताभावस्य पटादयः प्रतियोगिनः इति अर्थः. अविद्यादशायां सत्त्वांगीकारे तद्विरोधः स्पष्टएव. एतदनुरोधेन प्रतीतिकालेऽपि पदार्थात्यन्ताभावस्वीकारेतु साधर्म्यं गलेपादुकावद् आपतितम्. वस्तुतस्तु तव तूलाविद्याकार्यस्य स्वप्नादेः तन्निवृत्त्या निवृत्तिः मूलाविद्याकार्यस्य प्रपञ्चस्य च तन्निवृत्त्या निवृत्तिरिति स्वप्नादिजाग्रत्प्रपञ्चयोः स्वसाक्षात्कारणाविद्यास्थित्यधीनस्थितिकत्वेन तन्निवृत्तिनिवर्त्यत्वेनच साधर्म्यम् अबाधम् अतः सुस्थः सूत्रविरोधः यत्किञ्चिद् वैधर्म्यन्तु सर्वथा सजायतीयेष्वपि घटादिषु प्रतिव्यक्ति शक्यं वक्तुम् इति किं तेन? **नामान्तरस्य** इति, ‘घटः’ ‘कुम्भः’इत्यादिपर्यायरूपस्य. नहि घटात् कुम्भो भिन्नो भवति. **निषेधेन** इति सूत्रकृता निषेधेन. **अनुद्धाराद्** इति त्वन्मते इति शेषः. **अहन्तादि** इति इदम् अत्र हृदयं : सहस्राक्षे अहन्तादेरपि प्रपञ्चत्वम् अस्मत्संमतमिव दर्शयित्वा सूत्रविरोधो दत्तः. वयन्तु मिथ्यापदार्थानां प्रपञ्चत्वमेव

न वदामः. नहि जाग्रदवस्थायाम् अनुभवमात्रेण प्रपञ्चत्वं शक्यं वक्तुं, शुक्ति-रजत-गंधर्वनगरै-न्द्रजालिकादिषु तत्प्रसंगात्. नच इष्टापत्तिः सूत्रे **'आदि'**पदेन परिगृहीतेभ्यः तेभ्योऽपि वैधर्म्यस्य प्रपञ्चे बोधनात्. तेषां प्रपञ्चान्तःपातित्वे तदनुपपत्तेः. 'आदि'पदेन तेषां संग्रहस्तु तवापि संमतः शंकराचार्यैः "**एवं मायादिष्वपि यथायथं बाधः**" (ब्र.सू.शां.भा.२।२।२९) इति व्याख्यानात्. अतः शुक्तिरजतादिवत् संसार-प्रभासलीलादेरपि सूत्रे 'आदि'पदेन संग्रहः मिथ्यात्वाविशेषात्. तेन संसारादिवैधर्म्यमपि प्रपञ्चे अभीष्टमेव अस्माकम् अतो न सूत्रविरोधः. नापि सूत्रासङ्गतिः अहन्तादौ स्वप्नसाधर्म्यस्य इष्टत्वात्. एतेनैव अहन्तादिषु व्यभिचारेण सूत्रासंगतिश्च इत्यादि तदुक्तिः अपास्ताः इति आहुः. **न कोऽपि** इति **पदम् आदधाति** इति. अस्मन्मते चरणम् आदधाति (इति) लेशतोऽपि न आपद्यते इति अर्थः. **अन्यथा** इति जाग्रदवस्थायाम् अनुभूयमानानां शुक्तिरजत-संसारादीनां प्रपञ्चत्वं स्वीकृत्य अत्र अपरिग्रहे. सूत्रस्थ 'च'कारपरिगृहीतं स्वस्य मोक्षे प्रवृत्तिव्याघातः इति अर्थं समर्थयितुम् आहुः **किञ्च प्रपञ्चस्य** इत्यादि, मतद्वयेऽपि बाह्यप्रपञ्चस्य मिथ्यात्वाद् विज्ञानवादिनो मायावादिनः च मोक्षसाधनेषु प्रवृत्तिः न स्यात् प्रवृत्तेः गुरुशास्त्रादिबाह्यार्थतन्त्रत्वात् बाह्यार्थानाञ्च असत्त्वाद् इति भावः.

> **(१)** [एवञ्च सर्वं नाम-रूपात्मकं जगद् मायिकम् इति सिद्धम्.
>
> एतेन "अस्ति भाति प्रियं रूपं नाम च इति अंश-पञ्चकम् आद्यं त्रयं ब्रह्मरूपं मायारूपं द्वयं परम्" (सि.ले.सं.२।८) इति तन्नाम-रूपयोः मायिकत्वम् उक्तं तदसहमानेन "जगद्रूपं द्वयं/ततः परम्" इति पाठस्य कथञ्चित् स्वसम्मतत्वप्रतिपादनाय "नाम-रूपविभेदेन जगत् क्रीडति यो यतः" (त.दी.नि.१।१) इति स्वगुरु-संमतिम् उपन्यस्य ईश्वरस्य नाम-रूपयोः प्रकाशकत्वेन कर्तृत्वाद् नाम-रूपयोः ईश्वरूपत्वं यद्

उक्तं (द्रष्ट.शु.मा.प्र.३) तदपि निरस्तम्, एतयोः मायारूपत्वस्य दर्शितत्वात्. अन्यथा पञ्चानामपि ब्रह्मरूपत्वेन त्रयाणां विशिष्य तद्रूपत्व-कथनं न सङ्गच्छेत. अतएव "विद्वान् नाम-रूपाद् विमुक्तः" (मुण्ड.उप.३।२-।८) इति श्रुतिः सङ्गता.]

(२) एवञ्च सर्वप्रपञ्चः कारणात्मना सत्यएव इति सिद्धम्. किञ्च "अस्ति भाति प्रियं रूपं नाम च इति अंशपञ्चकम् आद्यं त्रयं ब्रह्मरूपं मायारूपं द्वयं परम्" (सि.ले.सं.२।८) इति यद् नामरूपयोः मायिकत्वम् उक्तं तद् असङ्गतं अस्ति-भाति-प्रियरूपाणां ब्रह्मत्वेन कथितानामपि मायिकत्वापत्तेः. नाम-रूपयोः यथा कल्पितसामानाधिकरण्येन प्रतीतिः, घटादिसत्त्वे सत्त्वं तदभावे अभावः तथैव अस्ति-भात्यादीनामपि सामानाधिकरण्येन भानात् तेषां मायिकत्वं नास्ति इति वक्तुम् अशक्यत्वात्. नच तेषां ब्रह्मस्वरूपत्वाद् न मायिकत्वम् इति वाच्यं, "तद् आत्मानं स्वयम् अकुरुत" (तैत्ति.उप.२।७) " बहु स्यां प्रजायेय" (छान्दो.उप.६।२।३) "नामरूपे व्याकरवाणि" (छान्दो.उप.-६।३।२) इत्यादिश्रुत्या नामरूपयोरपि ब्रह्मस्वरूपत्वात्. तस्माद् "अस्ति भाति प्रियं रूपं नाम च इति अंशपञ्चकम्" इत्यादि असङ्गतमेव. नाम-रूपयोः मायिकत्वे प्रमाणाभावात्, पञ्चानामपि ब्रह्मरूपत्वात्. "नामरूपाद् विमुक्तः" (मुण्ड.उप.३।२।८) इत्यादिश्रुतिस्तु विदुषो ब्रह्मणि लयावस्थायां पृथङ्नामरूपाभावं प्रतिपादयति नतु नामरूपयोः मिथ्यात्वम्.

(३) सहस्राक्षे एवञ्च इत्यादि श्रुतिः संगता इत्यन्तं भागं दूषयन्ति **एवञ्च सर्वप्रपञ्च** इत्यादिना **नतु नाम-रूपयोः मिथ्यात्वम्** इत्यन्तेन. **सत्यएव इति सिद्धम्** इति, **"एतदात्म्यम् इदं सर्वं तत् सत्यम्"** (छान्दो.उप.६।८।७) इत्यादिश्रुतिभिः **"सत्त्वात् च अवरस्य", "युक्तेः**

शब्दान्तरात् च'' (ब्र.सू.२।१।१६,१८) इत्यादिसूत्रैः च सिद्धम्. यदि सूत्रकारो अस्य मायामात्रताम् अभिप्रैष्यत् तर्हि **''मायामात्रन्तु...''** (ब्र.सू.३।२।३) इत्यनेन सन्ध्यसृष्टेरिव अस्यापि तथात्वं स्पष्टमेव असाधयिष्यत्. साधयतितु अस्य तदनन्यत्वं सत्त्वम् असद्व्यपदेशस्य च अव्याकृतत्वपरत्वं स्वप्नसृष्टेरेव च मायामात्रत्वम्. अतः सत्कार्यवादएव सूत्रकाराभिप्रेतः. अत्र **''असदकरणाद् उपादानग्रहणात् सर्वसम्भवाभावात् शक्तस्य शक्यकरणात् कारणभावात् च सत्कार्यम्''** (सां.का.९) इत्यादयः सांख्याद्युक्तायुक्तयोऽपि अनुसन्धेयाः. **किञ्च अस्ति-भाति...** इत्यादिः. अयं भावः : यत्तु एतयोः मायारूपत्वस्य दर्शितत्वाद् इति उक्तं तत्तु पूर्वं नाम-रूपयोः मायिकत्वस्य क्वापि तेन उपपादनस्य अदर्शनात् तुच्छम्. किञ्च तयोः मायिकत्वं युक्तिसिद्धम् इति उच्यते श्रुतिसिद्धम् इति वा? न आद्यः, या या युक्तिः घटनिष्ठनाम-रूपयोः तथात्वसाधिका उच्येत सा सा तन्निष्ठास्तित्वादीनामपि तथात्वं साधयेदेव इति **''आद्यं त्रयं ब्रह्मरूपम्''** इति अभ्युपगमविरोधः. तयोरपि अस्तित्वादिकं प्रतीयतइति तयोरपि अंशत्रयं सत्यम् अंशद्वयं मिथ्या इति स्वीकारे अनवस्था. **''नामैव एनं न जहाति यद् एजति जगति यच्च चेष्टति नाम्नो भागो अयम्''** (महाना.उप.१९।२) इत्यादिकं श्रौतमानमपि अत्र अनुसन्धेयम्. युक्त्यनुकूलत्वाद् 'युधिष्ठिरादि'नामभिः अद्यापि व्यवहारात्, सर्वथा मिथ्यात्वे तन्नामोच्चारणपूर्वक-श्राद्धादिव्यवहारोच्छेदप्रसङ्गात् च. न द्वितीयः, तयोः सत्यतायाएव श्रुतिसिद्धत्वात्. बृहदारण्यके तृतीयाध्याये अन्त्यब्राह्मणे **''त्रयं वा इदं नाम-रूप-कर्म तेषां नाम्नां वाग् इत्येतद् एषाम् उक्थम् अतोहि सर्वाणि नामानि उत्तिष्ठन्ति इत्येतद एषां साम एतद्धि सर्वैः नामभिः समम् एतद् एषां ब्रह्म एतद्धि सर्वाणि नामानि बिभर्ति. अथ रूपाणां चक्षुः इत्येतद् एषाम् उक्थम् अतोहि सर्वाणि रूपाणि उत्तिष्टन्ति एतद् एषा साम एतद्धि सर्वै रूपैः समम् एतद् एषां ब्रह्म एतद्धि सर्वाणि रूपाणि बिभर्ति. अथ कर्मणाम् आत्मेति एतद् एषाम् उक्थम् अतोहि सर्वाणि कर्माणि उत्तिष्ठन्ति इति एतद् एषा साम एतद्धि सर्वैः कर्मभिः समम् एतद् एषां ब्रह्म एतद्धि सर्वाणि कर्माणि बिभर्ति तद् एतत् त्रयं सद् एकम् अयम् आत्मा आत्मो एकः सन् एतत् त्रयं तदेतद् अमृतं**

सत्येन छन्नं प्राणो वा अमृतं नाम-रूपे सत्यं ताभ्याम् अयं प्राणः छन्नः'' (बृह.उप.१।६।१-३) इति श्रूयते. अर्थस्तु तत्रैव अध्याये चतुर्थब्राह्मणे पूर्वम् ''**आत्मैव इदम् अग्रे आसीत्**'' (बृह.उप.१।४।१७) इति सर्वस्य आत्मरूपत्वं प्रतिज्ञाय अग्रे सृष्टेः पूर्वम् अव्याकृतस्य जगतो नाम-रूपाभ्यां व्याकरणम् उक्तं तदेतत् प्रपञ्चयितुम् इदम् उच्यते. तत्र इदं परिदृश्यमानं वै निश्चयेन त्रयमेव. किं तत् त्रयं? तद् आह **नाम रूपं कर्म** इति. तेषां नामादीनां मध्ये नाम्नां व्याकृतानां 'घट'-'पटा'दिशब्दानां **वाग् इत्येतद्** वागिन्द्रियं समष्टिरूपा भगवतो वाग् वा **एषाम् उक्थम्** उपादानकारणं हि यतो अतो वाचः सकाशादेव सर्वाणि नामानि उत्तिष्ठन्ति अनुभवयोग्यानि भवन्ति. एतद् **वागिति एतद् एषां** विशेषभूतानां **नाम्नां साम** समत्वात् सर्वेषां सामान्यं तदेव विवृणोति, हि यतः एतत् सर्वैः नामभिः समं मृदिव घटादिभिः. एतद् एषां नाम्नां ब्रह्म आधारभूतं, तदेव आह **एतद् हि** यतः **सर्वाणि नामानि बिभर्ति** धारयति पुष्णाति च. अथ रूपाणां रोहित-पीतादीनां व्याकृतानां **चक्षुः इत्येतत्** चक्षुरिन्द्रियं तत्समष्टिभूतं 'त्वष्ट्रा'ख्यं भगवच्चक्षुः वा **उक्थम्** उपादानकारणम् इत्यादि पूर्ववत्. ''**त्वष्टारं रूपाणि विकुर्वन्तं विपश्चिं**'' (शतप.ब्रा.१।४।३।१७), ''**त्वष्टा रूपाणाम् अधिपतिः**'' (तैत्ति.आर.२।११।२) इत्यादिश्रुत्यन्तरात्. अथ **कर्मणां** नानाचेष्टारूपाणाम् **आत्मा** इति एतत् शरीरं समष्टिभूतं विराट्स्वरूपं वा **उक्थम्** उपादानकारणम् इत्यादि पूर्ववत्. तदेतत् पूर्वोक्तं नाम-रूपं-कर्म इति **त्रयं** त्रिधा दृश्यमानं **सद् एकं** ब्रह्मरूपत्वाद् घट-कुंडिका-शरावा मृदिव. तदेव आह ''**अयम् आत्मा**'' इति नाम-रूप-कर्माणि **आत्मा** ब्रह्मैव, 'आत्म'शब्दः परब्रह्मपरः. एतेन ''**आत्मैव इदम् अग्रे आसीत्**'' (बृह.उप.१।४।१) इति दृढीकृतम्. ननु वागाद्युपादानकानाम् एषां कथम् आत्मत्वम् अतः आह **आत्मा उ एकः सन्** पूर्वोक्तरमणेच्छया एतत् त्रयं वागादित्रयरूपोऽपि सएव. प्रगृह्यत्वाद् न सन्धिः. त्रिधाकरणस्य फलम् आह **तदेतद् अमृतं सत्येन छन्नम्. अमृतं** अखण्डम् आनन्दरूपं स्वस्वरूपं **सत्येन** अमिथ्याभूतेन कार्येण आच्छादितम्. तदेतत् स्फुटीकरोति ''**प्राणो वा अमृतं नाम-रूपे सत्यम्**'' (बृह.उप.१।६।३) इति प्राणः सर्वक्रियाशक्तिः सर्वजीवनहेतुः परमात्मा

अनुगमाद्यधिकरणबोधितः **ताभ्याम् अयं प्राणः छन्नः** ताभ्यां व्याकृताभ्यां नाम-रूपाभ्याम् अयं प्राणः परमात्मा पिहितः. सर्वनामा सर्वरूपः सर्वात्मकः सन्नपि क्रीडेच्छया तत्तद्रूपे तत्तन्नामनियमनाद् रूपाणां नाम्नां च भेदाद् इदानीं परस्परानतिप्रसक्तपरिच्छिन्न तत्तत्तन्नामरूपाः पृथक् पृथक् पदार्थाएव अनुभूयन्ते नतु सर्वरूपः परमात्मा. अतः स्वव्याकृतसत्यनामरूपाभ्यामेव अयं पिहितः, अतएव नाना व्यवहाराः, एतदेव तद्व्याकरणस्य फलम्. व्याकरणप्रकारस्तु उच्यते. तत्र वस्तुतः स्वाभाविकः सर्वाकारः सर्वरूपः सः. "**यदेकम् अव्यक्तम् अनन्तरूपं विश्वं पुराणं तमसः परस्तात्**" (महाना.उप.१।५) "**विश्वतः चक्षुः उत विश्वतो मुखः**" (ऋक्.संहि.१०।८-१।३) "**सहस्रशीर्षा पुरुषः**" (ऋक्.संहि..१०।९।२) "**समो मशकेन समो नागेन.**" (बृह.उप.१।३।२२) "**सर्वतः पाणिपादान्तम्**" (भग.गीता १३।१३) इत्यादिश्रुति-स्मृतिभ्यः. क्वचिद् रूपस्य निषेधस्तु लोकइव व्याकरणात् परिच्छिन्नमात्रस्यैव "**न संदृशे तिष्ठति रूपम् अस्य**" (श्वेता.उप.४।२०) इतिबृहन्नारायणश्रुतेः. अतएव अनन्तरूपस्य "**तमसः परस्ताद्**" इति प्रकृतितः परत्वम् उक्तम्. अधिकञ्च *साकारवादे वक्ष्यते. एवं नामानि सर्वाण्यपि तस्यैव वाचकानि, "'**ॐ'इत्येतद् अक्षरम् इदं सर्वं तस्य उपव्याख्यानं**" (माण्डु.उप.१) "**नामानि सर्वाणि यम् आविशन्ति**" (द्रष्ट.ब्र.सू.माध्वभा.१।१।२२, भाल्लवेयश्रुति) इत्यादि श्रुतिभ्यः, "**सर्वस्य तदधीनत्वात् तत्तच्छब्दाभिधेयता अन्येषां व्यवहारार्थम् ईष्यते व्यवहर्तृभिः**" (द्र.ब्र.सू.माध्व.भा.१।४।२९) इत्यादि महाकौर्मादिस्मृतिभ्यः च. "**अनामा अगोत्रः**" इत्यादौ क्वचिद् निषेधस्तु लोकइव व्याकृतस्य परिच्छिन्नमात्रस्य नाम्नएव गोत्रादिसाहचर्यात्. एवं "**स सर्वनामा सच विश्वरूपः**" (भाग.पुरा.६।४।२८) इत्यादीनि श्रीभागवतवाक्यान्यपि अनुसन्धेयानि. "**नमोस्तु अनन्ताय सहस्रमूर्तये सहस्रनाम्ने पुरुषाय शाश्वते**" (   ) इत्यादीनिच. अत्र 'सहस्र'शब्दो असंख्यपरः. एवं स्वयमेव वस्तुतः सर्वरूपः सर्वनामा सन्नपि यदा क्रीडार्थम् आत्मनः इदं जगत् सिसृक्षति तदा नाम-रूपविभागमन्तरा "घटो अयं',"'पटो

---

* इदं ग्रन्थं नोपलभ्यते-सम्पा.

अयम्'' इत्यादिनानाव्यवहाराणाम् असम्भवात्. सदंशाद् आविष्कृतपञ्चमहाभूतांशेभ्यः तत्तद् एकैकं स्वीयं रूपं पृथक् पृथग् आविष्कृत्य तत्र तत्र स्वनामसमुदायात् तत्तन्नामानि वेदाख्यस्वस्वरूपानुरोधेन नियमयति. अतएव इदानीं नाम-रूपयोः परिच्छेदो दृश्यते. कम्बुग्रीवादिमदेव घटस्य रूपं 'घटः' 'कलशः' इत्यादीनि परिगणितान्येव नामानि इति. इदमेव नामरूपयोः व्याकरणम्. अतएव च श्वेतकेतुविद्यायां **''सेयं देवता ऐक्षत''**इत्यादिना **''नाम-रूपे व्याकरवाणि''** (छान्दो.उप.६।३।२) इति इच्छा, ततः **''नाम-रूपे व्याकरोत्''** (छान्दो.उप.६।३।३) इति व्याकरणं च आम्नायते. यदि नामरूपे विवर्तात्मके स्याताम् तर्हि अभ्रान्तस्य ईश्वरस्य ईक्षण-गोचरौ न भवेताम्. नच अत्र **''अनेन जीवेन आत्मना अनुप्रविश्य''** (छान्दो.उप.६।२।२) इति श्रवणाद् नाम-रूपे जीवकल्पितएव इति शंक्यम्; इमामेव आशंकाम् अपाकर्तुं प्रवृत्ते **''संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वतः उपदेशात्''** (ब्र.सू.२।४।२०) इति अधिकरणे परमात्मनैव ते व्याकृते इति सूत्रकृता व्यवस्थापनात्. सूत्रार्थस्तु **संज्ञामूर्त्योः** नाम-रूपयोः **क्लृप्तिः** निर्माणं **त्रिवृत्कुर्वतः** तेजोबन्नानि प्रविश्य एकैकम् इतरसंगतं कुर्वतः परमात्मनएव नतु जीवस्य, त्रिवृत्करणात् पूर्वं शरीराद्यनिष्पत्त्या तत्प्रवृत्तेरेव अयोगाद् इति आशयः. कुत एतत्? **उपदेशात्** उप = समीपे तस्मिन्नेव वाक्ये त्रिवृत्करणस्य निरूपणाद् इति ज्ञेयः, **'तुः'** जीवकर्तृकत्वशंकानिरासार्थः. भवद्भाष्येऽपि इदं सूत्रम् एवंपरमेव. यदितु नाम-रूपे जीवाविद्याकल्पिते अभविष्यतां न तर्हि सूत्रकारः एवंव्यवस्थापयिष्यत्. अतो न तयोः मिथ्यात्वं श्रुत्यादिसम्मतम्. व्याकरणप्रकारश्च बृहदारण्यके तृतीये अध्याये 'पुरुषविधब्राह्मणा'ख्ये चतुर्थब्राह्मणे **''तद्धेदं तर्हि अव्याकृतम् आसीत् तद् नाम-रूपाभ्यामेव व्याक्रियत असौ नामा अयम् इदं रूप इति तदिदमपि एतर्हि नाम-रूपाभ्यामेव व्याक्रियते असौ नामा अयम् इदं रूप इति सएष इहप्रविष्टः आनखाग्रेभ्यः''** (बृह.उप.१।४।७) इत्यादिषु श्रूयते. एवं छान्दोग्य-बृहदारण्यकादिषु नाम-रूपव्याकरणं सृष्ट्यारम्भे परमात्मनैव कृतम् इति स्पष्टतया श्रावणाद् अनन्यगतिलभ्यन्तु तयोः परमात्मेक्षणगोचरत्वं तदा वस्त्वन्तराभावात् परमात्माभिन्नत्वं सर्वेषां तेषां स्वभावतः तदीयत्वं च.

ननु यदि नामरूपे न जीवकल्पिते किन्तु ईश्वरेणैव स्वयं तत्-तद्रूपे तानि तानि नामानि स्वरूपवेदानुसारात् संकेतितानि तर्हि जीवानां कथं तत्संकेतग्रहः इति चेत्; परमात्मनः सकाशात् प्रथमोत्पन्नेन ब्रह्मणा संकेतो गृहीतः ततो अन्यैः परंपरया इति जानीहि. जीवकल्पितत्वेतु तेषाम् अनेकत्वाद् एकेन यस्मिन् रूपे 'गज'इति संकेतित तस्मिन्नेव जीवान्तरेण 'अश्व'इति इति महत्येव अव्यवस्था स्यात्. जीवैकत्वेतु बन्ध-मोक्षादिव्यवस्थाभंगः. कल्पितत्वपक्षे संकेतग्राहकपरम्परादिकञ्च न अपेक्ष्येत भ्रमे वृद्धोपदेशापेक्षाभावात्. संस्कारजनकयोः प्रतीयमानातिरिक्तसत्यनामरूपयोः ब्रह्मणि तत्सादृश्यस्य च त्वन्मते वक्तुम् अशक्यत्वादपि न कल्पनोपपत्तिः इति दिक्. परमेश्वरः स्वयं व्याकृत्य ब्रह्माणं संकेतं ग्राहितवान् इत्यत्र मानन्तु पुरुषसूक्ते "**वेद अहम् एतं पुरुषं महान्तम् आदित्यवर्णं तमसस्तु पारे. सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वा अभिवदन् यद् आस्ते धाता पुरस्ताद् यम् उदाजहार शक्रः प्रविद्वान् प्रदिशः चतस्रः**" (तैत्ति.आर.३।१३।२). अर्थस्तु : **अहं** ब्रह्मा **एतं** पूर्वोक्तं **महान्तं** पूज्यं व्यापकञ्च **पुरुषं** परमेश्वरं **वेद** जानामि. कीदृशम्? **आदित्यवर्णं** निरतिशयप्रकाशस्वभावम्. ननु वेद्यत्वात् सधर्मकत्वात् च प्रकृत्यवच्छिन्नः स्याद् इति शंकानिरासार्थम् आह **तमसस्तु पारे**. '**तुः**' शंकानिरासे. प्रकृतेः परतो वर्तमानं तादृशस्य वेदने कारणम् आह **सर्वाणि** इति यद् यस्मात् यः परमात्मेति वा **सर्वाणि रूपाणि विचित्य** सृष्टिकाले पृथक्कृत्य **धीरो** अनुद्विग्नः पूर्वसर्गानुसन्धायि इति यावत्, तेषां **नामानि कृत्वा** संकेत्य **अभिवदन्** मां सर्वतः शिक्षयन् **आस्ते**. तस्मात् **तं वा अहं वेद** इति अन्वयः. तेन स्वेच्छयैव मज्ज्ञानगोचरः सो अभूद् इति भावः. एवं **धाता** ब्रह्मा **पुरस्तात्** सृष्ट्यारम्भकाले **यं** नामरूपव्याकर्तारं परमात्मनम् **उदाजहार**, तत्र **शक्रः** ग्रहणशक्तिमान् इन्द्रः **प्रविद्वान्** श्रोता **प्रदिशः** आधिदैविक्यो दिग्देवताः **चतस्रश्च** श्रोत्र्यः इति. अत्रापि **तमसःपारे** वर्तमानस्य रूप-नामविभाजकत्वकथने तयोः मायिकत्वशंका निराकृता. एवं ब्रह्मणएव नाम-रूपप्रादुर्भावः प्रथममुण्डकाद्यखण्डे श्रूयते "**तस्माद् एतद् ब्रह्म नामरूपम् अन्नं च जायते**" (मुण्ड.उप.१।१।९) इति. एवं नाम-रूपयोः सत्यत्वादेव तर्कपादे "**औत्पत्तिकस्तु शब्दस्य अर्थेन सम्बन्धो**

अव्यतिरेकश्च अर्थे अनुपलब्धे तत्प्रमाणं बादरायणस्य अनपेक्षत्वात्” (जै.मी.सू.१।१।५) इति अधिकरणे जैमिनिना शब्दार्थसम्बन्धस्य नित्यत्वं निर्णीतम्. महाभाष्यकृता च पस्पशाह्निके “**सिद्धे शब्दार्थसम्बन्धे**” (पातं.महाभा.१।१।१) इति वार्तिके “**सिद्धे शब्दे अर्थे सम्बन्धे च इति**” (पातं.महाभा.प्र.१।१।१) इत्यादि विवृण्वता ‘सिद्ध’शब्दस्य नित्यपर्यायतां च दर्शपर्यायतां च दर्शयता नामार्थतत्सम्बन्धानां त्रयाणामपि नित्यत्वं स्वीकृतम्. शब्दानामपि नित्यत्वं तत्रैव जैमिनिना “**कर्मैके तत्र दर्शनात्**” (जै.मी.सू.१।१।६) इत्यादिषट्सूत्र्या आक्षिप्य “**समन्तु तत्र दर्शनम्**” (जै.मी.सू.१।१।१२) इत्यादिभिः “**लिंगदर्शनाच्च**” (जै.मी.सू.१।१।२३) इत्यन्तैः द्वादशभिः सूत्रैः युक्तीः “**वाचा विरूपनित्यया**” (ऋक्.संहि.८।७५।६) इत्यादि प्रमाणं च आश्रित्य सम्यक्समर्थितम्. उत्तरतन्त्रेऽपि “**शब्दइति चेद् न अतः प्रभवात् प्रत्यक्षानुमानाभ्याम्**” (ब्र.सू.१।३।२८) इत्यादौ एतत् सुष्टु प्रपञ्चितम्. तेन “**प्रचोदिता येन पुरा सरस्वती वितन्वता अजस्य सतीं स्मृतिं हृदि स्वलक्षणा प्रादुरभूत् किल आस्यतः**” (भाग.पुरा.२।४।२२) इति वेदरूपशब्दस्य ब्रह्माभिन्नत्वबोधकानि श्रीभागवतादिवाक्यानि “**काव्यालापाश्च ये केचिद् गीतकानि अखिलानिच शब्दमूर्तिधरस्य एते विष्णोः अंशाः महात्मनः**” (विष्णुपुरा.१।२१।८५) इत्यादिनि लौकिकशब्दानामपि तद्रूपत्वप्रतिपादकानि विष्णुपुराणप्रथमांशादिवचनानि च अनुकूलानि. रूपनित्यत्वञ्च अधिकं साधयिष्यते. एवं नाम्नो अमायिकत्वाद् नित्यत्वाद् भगवद्रूपत्वादेव नारायणप्रपाठके “**यदेजति जगति यच्च चेष्टति नाम्नो भागो अयं नाम्ने स्वाहा**” (महाना.उप.१९।२) इति श्रूयते. तस्माद् नाम-रूपयोः मायिकत्वकल्पनं नाम-रूपे सत्यमिति पूर्वोक्तादिश्रुतिशतबाधितमेव.

यच्च पञ्चानामपि ब्रह्मरूपत्वेन इत्यादि तद् अकिञ्चित्करम्, अस्माकं तद्वचनस्वीकारे निर्बन्धाभावाद्, जगद्रूपेण परिणतस्य सच्चिदानन्दरूपस्यैव अस्ति-भाति-प्रियात्मना प्रतीतिः नामरूपयोस्तु परिच्छेदमात्रेण कार्यत्वमिति त्रयाणां विशिष्य तद्रूपत्वकथनस्यापि कथञ्चित् सम्भवात् च. याऽपि “**विद्वान् नामरूपाद् विमुक्तः**” (मुण्ड.उप.३।२।८) इति श्रुतिः दर्शिता. साऽपि

न तयोः मिथ्यात्वदर्शिका. इदंहि वाक्यं तृतीयमुण्डके द्वितीयखण्डे पठ्यते **‘‘यथा नद्यः स्यन्दमानाः समुद्रे अस्तंगच्छन्ति नामरूपे विहाय तथा विद्वान् नाम-रूपाद् विमुक्तः परात्परं पुरुषम् उपैति दिव्यम्’’** (मुण्ड.उप.३।२।८) इत्यत्र उक्तरीतिकव्याकरणदशापरिच्छिन्नाद् अमुक्तदशायां स्वदेहमात्रनियतात् नाम-रूपाद् विमुक्तः इति तत्र अर्थः अतएव ‘नाम-रूपाद्’ इति एकवचनं, नामविशेषविशिष्टाद् रूपात् शरीराद् इति वा. समुद्रे प्रविष्टायाः नद्याः नहि रूपं नश्यति किन्तु समुद्रएव अन्तर्भवति आधारस्य तत्रैव अस्तंगतत्वात्. अन्तर्भूतत्वादेव पृथग्रूपानुपलब्ध्या न तेन नाम्ना तदा व्यवहारः किन्तु समुद्रइत्येव सः. एवम् अत्रापि ब्रह्मभूतस्य स्वदेहमात्र-नियतपरिच्छिन्न-नामरूपत्यागात् सर्वरूपत्वं सर्वनामत्वं च सिध्यति. अतएव तत्र **‘‘निरञ्जनः परमं साम्यम् उपैति’’** (मुण्ड.उप.३।१।३) इति पूर्वम् उक्तम्. नतु अनया श्रुत्या तयोः मिथ्यात्वं बोध्यते. मिथ्यात्वे ततो विमुक्तिरपि न वक्तुं युक्ता. नहि शशशृंगाद् गन्धर्वनगराद् वा कोऽपि मुच्यते.

(१) [अत्र च ‘‘उद्देश्यतावच्छेदक-कालावच्छिन्नत्वस्य औत्सर्गिकस्य विधेये भान-निर्वाहाय ज्ञान-समकालमेव मुक्तिः’’ (   ) इति केचित्. एतेन प्रपञ्चस्य अज्ञानकार्यत्वे ज्ञानेन अज्ञाननाशे तत्कार्यस्य देहादेः अस्थित्या जीवन्मुक्त्यनुपपत्तिः इति अपास्तम्. अपरोक्ष-कल्प-परोक्षज्ञानवत्येव जीवन्मुक्त-व्यवहारस्य शास्त्रीयस्य उपपत्तेः. अज्ञानसम्बन्धिन्या आवरणशक्तेरेव विद्यया विरोधः, विक्षेपशक्तेस्तु प्रारब्धनाश-सहकृतया तया. ‘‘आवरणनाशाच्च जीवन्मुक्त’’ इत्यादयोऽपि पक्षाः ‘‘तस्य तावदेव चिरं यावन् न विमोक्ष्ये अथ सम्पत्स्ये’’ (छान्दो.उप.६।१४।२) ‘‘अनारब्धकार्येएव तु पूर्वे तदवधेः’’ ‘‘भोगेनतु इतरे क्षपयित्वा अथ सम्पद्यते’’ (ब्र.सू.४।१।१५,१९) इत्यादिश्रुतिसूत्रादिसिद्धाः सिद्धान्त-लेशादिषु सोपपत्तिका दर्शिताः तेतु विस्तर-दिदृक्षुभिः

ततएव द्रष्टव्याः. अन्येतु ज्ञानिनो अदृष्टाभावेऽपि स्वादृष्टैरैव जीवन्मुक्त-शरीरादिस्थितिः शिष्यादिभिरेव कल्पिता, यथा कश्चित् क्षत्रियादिः काश्यां मृतः तत्पत्नीतु ग्रामान्तरे तत्पादुकादिकम् आदाय अनुगमनं कृतवती तत्र तस्याः यथाशास्त्रं फलोपभोगार्थं स्वादृष्टेनैव पतिदेहादि-कल्पना पत्युस्तु अदृष्टं नास्त्येव मुक्तत्वात्, “अत्रहि जन्तोः प्राणेषु उत्क्रममाणेषु रुद्रतारकं ब्रह्म व्याचष्टे येन असौ अमृतीभूत्वा मोक्षीभवति” (जाबा.उप.१।१, रामो.१।१) इति श्रुतेः. एवं जीवन्मुक्तादृष्टाभावेऽपि परेषाम् अदृष्टैरैव तद्देहादि-कल्पना इति आहुः. अधिकम् उत्तरभागे षष्ठखण्ड-खण्डने वक्ष्यते]

(२) यत्तु अत्र च उद्देश्यतावच्छेदक-कालावच्छिन्नत्वस्य औत्सर्गिकस्य विधेये भाननिर्वाहाय ज्ञानसमकालमेव मुक्तिः **इति उक्तं तद् न साधीयः. यथा “द्रव्यं गुणवद्” इत्यादौ द्रव्यत्वसमकालिकत्वं गुणे भासते तथा अत्र भानासम्भवात्. तथाहि ‘ज्ञान’पदेन ब्रह्मात्मकं ज्ञानं विवक्षितम् अखण्डाकारवृत्तिरूपं वा? न आद्यः, तादृशज्ञानस्य अधुनापि सत्त्वेन मुक्तेश्च असत्त्वेन ज्ञानसमकालत्वस्य मुक्तौ असम्भवात्, तादृशज्ञानस्य नित्यत्वात् श्रवणाद्यसाध्यत्वेन तदर्थं प्रवृत्त्यनुपपत्तेः च. न द्वितीयः, अखण्डाकारवृत्तेः स्वल्पकालावस्थायित्वेन मुक्तेश्च स्वरूपावाप्तिरूपाया नित्यत्वेन ज्ञानोत्तरयावत्कालावस्थायित्वेन वा तत्समकालत्वासम्भवात्. किञ्च ज्ञानसमकालमेव मोक्षस्वीकारे जीवन्मुक्त्यभावः स्यात् अज्ञानस्य ज्ञानेन नाशे उपादाननाशाद् देहादीनामपि नाशात्. नच अपरोक्षज्ञानकल्पपरोक्षज्ञानवत्येव जीवन्मुक्तिव्यवहारः इति वाच्यं; तत्प्रतिपादकश्रुत्याद्यभावेन तादृशज्ञानसत्त्वे प्रमाणाभावात्.**

अपरोक्षकल्पम् इत्यनेन अपरोक्षन्यूनत्वविवक्षणे शास्त्रात् शाब्दज्ञानवतामपि तादृशज्ञानसत्त्वेन जीवन्मुक्तिप्रसंगः एतेन अज्ञानसम्बन्धिन्या आवरणशक्तेरेव विद्यया विरोधः इत्यादिकमपि अपास्तं, ज्ञानस्य अज्ञानविरोधित्वेन तन्नाशे तदीयशक्तेः सत्त्वस्य वक्तुम् अशक्यत्वात्. नहि वह्निनाशे वह्निशक्तिः अस्ति इति कस्यापि सम्मतम्. वस्तुतस्तु पारिभाषिकतादृशाज्ञानएव मानाभावेन तस्य शक्तिद्वयकल्पनं तेन जीवन्मुक्तिव्यवस्थापनं च दूरापास्तम्. त्वदुक्तपक्षाणां “तस्य तावदेव चिरं यावद् न विमोक्ष्ये अथ सम्पत्स्ये.” (छान्दो.उप.६।१४।२) “अनारब्धकार्येएवतु पूर्वे तदवधेः”, (ब्र.सू.४।१।१५) “भोगेनतु इतरे क्षपयित्वा अथ सम्पद्यते” (ब्र.सू.४।१।१९) इत्यादि श्रुतिसूत्राभ्याम् अप्रतीतेः इत्यादिश्रुतिसूत्रादिसिद्धाः इति कथनम् असंगतम्. नहि तादृशश्रुतौ विक्षेपावरणयोः प्रतिपादकं पदम् अस्ति येन तादृशश्रुतिसिद्धत्वं तस्य स्यात्. सूत्रयोस्तु अयम् अर्थः : “ननु देहस्य कर्मजन्यत्वात् तन्नाशे तन्नाशस्य आवश्यकत्वाद् ब्रह्मविदः प्रवचनानुपपत्तिः एवंसति ब्रह्मजिज्ञासोः गुरूपसत्त्यादिसाधनासम्भवः ‘आचार्यवान् पुरुषो वेद’ (छान्दो.उप.६।१४।२) इतिश्रुतेः तदभावेन ज्ञानमार्गोच्छेदेन मुक्त्युच्छेदप्रसङ्गः इति आशंक्य समाधत्ते. ‘अनारब्धकार्येएवतु पूर्वे तदवधे’ पूर्वे = पूर्वसूत्राभ्यां ज्ञाननाश्यत्वेन ये प्रोक्ते पाप-पुण्ये ते न अशेषे किन्तु अनारब्धं भोगायतनरूपं/भोगायतनलक्षणं कार्यं याभ्यां तेएव इति अर्थः. ननु इतरनिरपेक्षं हि ज्ञानं स्वशक्त्यैव अग्निरेधइव कर्माणि दहति इति पूर्वम् उक्तं तथा सति अशेषमेव तद् दहति इति वक्तुं युक्तं, नतु सशेषं शक्तेः अविशिष्टत्वात्. नच कर्मनाशेऽपि संस्कारवशात् कुलालचक्रभ्रमिवत् तद्वासनावशाद् देहादिसत्तया प्रवचनाद्युपपत्तिः इति वाच्यं, ज्ञानस्य सर्वतो बलवत्त्वात् सवासनस्य तस्य नाशनात्. नहि महाशिलानिपाते चक्रभ्रमिः अनुवर्तितुं शक्नोति

इति आशंक्य आरब्धकार्यादहने हेतुम् आह तदवधेः तज्ज्ञानेन आरब्धकार्यादहनं यत् तद् अखिलकारणकारणत्वेन अखिलस्य पूर्वावधिरूपभगवदिच्छालक्षणाद् हेतोः इति अर्थः. यत्र तस्यापि दहनेच्छा तत्र तथैव इति निगूढाशयः. अतएव अग्रे तथा वक्ष्यते'' (ब्र.सू.भा.४।१।१५). ''अतो अन्यापि हि एकेषाम् उभयोः'' (ब्र.सू.४।१।१७) इति सूत्रेण. तस्य अर्थस्तु ''एकेषां पुष्टिमार्गीयाणां भक्तानाम् उभयोः प्रारब्धाप्रारब्धयोः भोगं विनैव नाशो भवति. कुतः एतत्? तत्र आह अतःश्रुतेः कर्मणो ज्ञाननाश्यत्वनिरूपिकायाः ब्रह्मविदएव प्रवचनादिनिरूपणेन तदनाश्य-'प्रारब्धा'ख्य-कर्माक्षेपकश्रुतेश्च अन्यापि श्रुतिः पठ्यते. 'तस्य पुत्राः दायम् उपयन्ति सुहृदःसाधुकृत्यां द्विषन्तः पापकृत्याम्' (कौषी.उप.१।४) इति. ज्ञान-भोगाभ्यां कर्मनाशनिरूपकश्रुत्याः अस्याः श्रुतेः विरोधपरिहाराय अवश्यं विषयभेदो वाच्यः'' (ब्र.सू.भा.४।१।१७). सच मर्यादा-पुष्टिभेदरूपएव इति. मर्यादामार्गेतु मणि-मन्त्रादि-प्रतिबद्धशक्तेः अग्नेरिव ज्ञानस्यापि दाहकत्वे न काचिद् हानिः इति सर्वम् अनवद्यम्. अतएव श्रीभागवते ''मृगदारकाभासेन स्वारब्धकर्मणा योगारम्भणतो विभ्रंशित'' (भाग.पुरा.५।८।२६) इति ''उपभोगेन कर्मारब्धं व्यपनयन्'' (भाग.पुरा.५।१०।१४) इतिच भरतं प्रति वचनं गीयते इति संक्षेपः. द्वितीयसूत्रं ''भोगेनतु इतरे क्षपयित्वा अथ सम्पद्यते'' (ब्र.सू.४।१।१९) इत्यस्य अर्थः : '''इतरे' अग्रे प्राप्य अलौकिकदेहाद् भिन्ने स्थूल-लिङ्गशरीरे 'क्षपयित्वा' दूरीकृत्य 'अथ' भगवल्लीलोपयोगिदेहप्राप्त्यनन्तरं 'भोगेन सम्पद्यते'. 'सो अश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता' (तैत्ति.उप.२।१) इति श्रुत्युक्तेन भोगेन सम्पद्यते इति अर्थः. श्रुत्यर्थस्तु आनन्दमयाधिकरणे निरूपितः. अलौकिकत्वं विना उक्तदेहं विना च उक्तफलप्राप्तेः व्यवच्छेदकः 'तु'शब्दः'' (ब्र.सू.भा.४।१।१९). एवञ्च तादृशश्रुतिसूत्राभ्याम् अविद्या-

याः तच्छक्त्योः आवरण-विक्षेपरूपयोः अप्रतीतेः तदर्थाज्ञानमूलकएव इत्यादयोऽपि पक्षाः श्रुतिसूत्रादिसिद्धाः **इत्यादिकः प्रलापः.**

यदपि यथा कश्चित् क्षत्रियादिः **इत्यादि दृष्टान्तेन** ज्ञानिनो अदृष्टाभावेऽपि स्वादृष्टैरेव जीवन्मुक्तशरीरस्थितिः शिष्यादिभिरेव कल्पिता **इत्याद्युक्तं तदपि दृष्टान्तवैषम्याद् न सम्भवति क्षत्रियस्य काश्यां मरणं लोकैः दृष्टं लोकान्तरे च विमानादिवत् पत्यादिदेहोऽपि पत्न्यनुगमनफलप्रतिपादकैः तत्तत्स्मृतिवाक्यैः अभ्युपगन्तव्यः. अत्रतु, गुरोः मरणस्य अदृष्टत्वात् शिष्यस्य तादृशफलोत्पादकादृष्टजनककर्मबोधकस्मृत्याद्यभावाद् वैषम्यम्. किञ्च गुरोः शिष्यादृष्टेनैव यदि शरीरादिकं स्यात् तदा पत्न्या पुण्यक्षये पत्यादीनामिव शिष्यनाशे गुरोरपि नाशापत्तिः यदि च शिष्यकल्पितगुर्वादीनां नाशस्वीकाराद् इष्टापत्तिः इति उच्यते तदा दृष्टिसृष्टिवादएव अभ्युपगतः सच पूर्वमेव खण्डितइति काशीमृतस्य अदृष्टाद्यभावे काशीमरणाद् मुक्तिः इत्यादिका श्रुतिरेव प्रमाणं जीवन्मुक्तादृष्टाभावेतु न किमपि प्रमाणं प्रत्युत भवन्मतएव "तस्य तावदेव चिरम्"(छान्दो.उप.६।१४।२) इत्यादिका प्रारब्धकर्मसत्त्वप्रतिपादिका श्रुतिः विरुद्ध्यते तस्माद्** अन्येतु...**इत्यादिको ग्रन्थो असंगतएव. अधिकन्तु उत्तरभागे षष्ठखण्ड-खण्डनाभास-खण्डने वक्ष्यते.**

(३) सहस्राक्षे अत्रच उद्देश्यता...इत्यादि खण्डने वक्ष्यते इत्यन्तं भागं परिहरन्ति **यत्तु अत्रच उद्देश्यता** इत्यादिना **खण्डने वक्ष्यते** इत्यन्तेन. **"तथा विद्वान् नाम-रूपाद् विमुक्तः"** (मुण्ड.उप.३।२।८) इत्यत्र **विद्वान्** इति उद्दिश्यः विमुक्तिः विधेया इति तस्याः आशयः. तत्र 'विद्वत्' पदोक्तोद्देश्यतावच्छेदकं ज्ञानम्. तदेतद् विकल्प्य दूषितं **तथाहि** इत्यादिना.

साधनानर्थक्याभावाय आहुः **ज्ञानोत्तर...**इति. वस्तुतस्तु तत्र ब्रह्मविदो अक्षरप्रवेशेन स्वदेहवर्तिपरिच्छिन्ननामरूपाद् विमुक्तस्य अक्षरपरदिव्यपुरुषोपायनमेव विधीयते. नतु विमुक्तपदं विधायकं वाक्यभेदप्रसंगात्. **देहादीनामपि** इति **'आदि'**शब्दात् प्राणेन्द्रियान्तःकरणानि, **'अपि'**शब्दाद् जीवस्यापि नाशः. तन्मतेहि अविद्यावच्छिन्नम् अविद्यायां प्रतिबिम्बितं वा चैतन्यं जीवः. ज्ञानेन अविद्यानाशे तन्नाशएव. नहि घटनाशे घटाकाशपदार्थो दर्पणनाशे तदधिकरणकप्रतिबिम्बो वा अवतिष्ठते. जीवनाशे च देहादेः स्पन्दनमपि न स्यात् अविद्यानाशे तदेकमूलकदेहादिकमपि नश्येत्. तथाच जीवन्मुक्तिः सुतरां न उपपद्येत. **तत्प्रतिपादक...**इत्यादि. श्रुतिषु हि **"ब्रह्मवेद ब्रह्मैव भवति"** (मुण्ड.उप.३।४।९) इति अवधारणपूर्वकं ब्रह्मज्ञस्य सर्वथा ब्रह्मभावः उच्यते. इदं ज्ञानम् अपरोक्षकल्पम् अपरोक्षं वा? न आद्यः, तेनैव सर्वथा ब्रह्मभावे अन्यस्य वैयर्थ्यापत्तेः. न द्वितीयः, जीवन्मुक्ते तदभावेन तस्य ब्रह्मभावानुपपत्तेः. तथाच वक्ष्यमाण श्रुतीनां **"ब्रह्मभूतः प्रसन्नात्मा"** (भग.गीता १८।५४) इत्यादिस्मृतीनां जडभरतादिषु साक्षाद् ब्रह्मभूतत्वं वदतां पुराणानां च विरोधः. किञ्च **"न तस्य देवाश्च न अभूत्या ईशते"** (बृह.उप.१।४।१०) इत्यादिकं जीवन्मुक्तपरं परंमुक्तपरं वा? न आद्यः, तस्य अपरोक्षज्ञानाभावेन ब्रह्मभावालब्ध्या **"आत्माहि एषां सम्भवति"** (बृह.उप.१।४।११) इति सर्वेषाम् आत्मत्वस्य तत्र असंगतेः तद्विना अभूत्यभावस्य असम्भवात्. न द्वितीयः देवादिभिः तस्य विघातानाम् असम्भवेन निषेधवैयर्थ्यप्रसंगात्. एवं स्मृतावपि **"न शोचति न कांक्षति"** (भग.गीता १८।५४) इत्यादिकं जीवन्मुक्तिलङ्गम् अतः इदं जीवन्मुक्तपरमेव. अतएव तत्र **'वामदेव'**नामग्रहणम्. नच सर्वेषाम् अनात्मन्यपि स्वस्मिन् सर्वात्मत्वग्रहएव शास्त्रदृष्टिः इति वाच्यम्; भ्रान्तत्वेन मुक्तत्वानुपपत्तेः आवरणशक्तेरपि आपत्तेः च. एवं **"तम् एवं विद्वान् अमृत इह भवति"** (पु.सू.८) इत्यपि जीवन्मुक्तपरं इह पदस्वारस्यात्. तद्वेदनस्य अपरोक्षत्वाभावे **"नान्यः पन्थाः"** (पु.सू.७) इति अपरोक्षस्य मोक्षहेतुताप्रतिषेधप्रसंगः. नापि जीवन्मुक्तस्य अपरोक्षकल्पमेव ज्ञानम् इति बोधिका काचित् श्रुतिः स्मृतिः

वा अस्ति यद्बलात् तथा आद्रियते. किञ्च किञ्चेदम् अपरोक्षकल्पत्वं नाम ईषन्न्यूनत्वम् इति चेत्, सांसारिकवदेव सर्वमपि मायिकं जगत् पश्यतः तद्वदेव कर्माणि लोकसंग्रहार्थमपि अनुतिष्ठतो गार्हस्थ्यव्यवहारानपि सति सम्भवे समाचरतः तस्य ज्ञानम् अपरोक्षात् कथम् ईषदेव न्यूनम्. अतिन्यूनमपि इषन्न्यूनतया विवक्ष्यतः इति चेत्; शास्त्रीय-शाब्दज्ञानवत्यपि जीवन्मुक्तताप्रसङ्गः.

किञ्च ज्ञानस्य अज्ञानविरुद्धत्वात् तन्निवर्तकत्वात् च जीवन्मुक्तस्यापि ब्रह्मज्ञानं स्वविरुद्धाज्ञानं निवर्तयेदेव. नहि तेजसि उद्भूते तत्रैव तमः स्थातुम् ईष्टे. अतएव अभियुक्तोक्तिः "**सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः**" (शिशु.व.२।६२/महा.सु.सं.१७६८) इति. नच तमसः तेजोऽभावरूपत्वाद् अज्ञानस्य च भावरूपत्वांगीकारेण ज्ञानाभावरूपत्वाभावाद् दृष्टान्तवैषम्यम् इति शंक्यं व्यवहारे भाट्टनयमेव अनुसरद्भिः शंकराचार्यैः तमसि द्रव्यान्तरतायाएव स्वीकारेण तद्वैषम्याभावात्. ननु अपरोक्षमेव तन्निवर्तकं नतु अपरोक्षकल्पमिति न विरोधः, इति चेद् न; तत्र मानाभावस्य उक्तत्वेन अपरोक्षकल्पस्य कल्पनासम्भवात्. किञ्च किं तत्र तज्ज्ञाने साक्षादपरोक्षतासिद्धिप्रतिबन्धकं येन तत्कल्पत्वम्? अविद्यैव तथा इति चेत्; तत्र तत्साहचर्यानुपपत्तिः उक्ता. कञ्चित्कालं ब्रह्मज्ञानेन सह अविद्यायाः स्थित्यंगीकारे कदापि तत्साहचर्यं न निवर्तेत निवर्तकसाधनाभावात्. जीवन्मुक्तस्यापि साधनांगीकारे सुष्ठुसमर्थितं तस्य मुक्तत्वम्. किञ्च जीवन्मुक्त्यनन्तरमपि कस्यचिद् अविद्या चिरकालं कस्यचिद् अल्पकालं च नियामकमन्तरापि स्थित्वा ततः साधनं विनैव स्वयं निवर्तते इति असंगततरम्. सद्भिरपि साधनैः संपूर्णैरपि अविद्यायाः अनिवृत्त्याः विनैव तैः अनियतकाले तन्निवृत्याः च तेषाम् असाधनत्वापातात् श्रवणादेः अपूर्वद्वारा फलजनकत्वस्य अनंगीकाराद् मुक्त्यासह अपूर्वस्थितेः अशक्यवचनत्वात् च. नच प्रारब्धं तस्याः बह्वल्पकालस्थितिनियामकं कल्प्यं, तस्यापि अविद्याकार्यत्वेन अन्योन्याश्रयात्. एतेन विक्षेपशक्तिमात्रम् अवशिष्यते इत्यपि निरस्तम्. अविद्यावश्यनाशकं ज्ञानं तत्कार्यप्रारब्धेन सह तद्विक्षेपशक्तिमपि तत्क्षणादेव नाशयेत्, अन्यथा कदापि न नश्येताम्. आवरणशक्तिसहितं

तिमिरं स्वावश्यनाश्यं नाशयन् प्रकाशः तदुपादानककार्यान्तरं तच्छक्त्यन्तरं वा नैव अवशेषयति. विवर्तरूपायाः विक्षेपशक्तेः प्रारब्धस्य च ब्रह्मज्ञानोत्तरं स्थितिः न तव सुवचा रज्जुज्ञाने सर्पज्ञानस्येव. वस्तुतस्तु त्वत्संमतपारिभाषिकाज्ञानकल्पनमेव निर्मूलं, क्व तर्हि शक्तेः तस्याः शक्त्यन्तरद्वयादिसम्भवः. ‘‘**तस्य तावदेव चिरम्**’’ (छान्दो.उप.६।१४।२) इति वाक्यन्तु छान्दोग्ये अष्टमे ‘‘**यथा सोम्य पुरुषं गन्धारेभ्यो अभिनद्धाक्षम् आनीय तं ततो अतिजने विसृजेत् स यथा तत्र प्राङ्वा उदङ्वाऽधराङ्वा प्रत्यङ्वा प्रध्मायीत अभिनद्धाक्ष आनीतो अभिनद्धाक्षो विसृष्टः. तस्य यथा अभिनहनं प्रमुच्य प्रब्रूयाद् एतां दिशं गन्धारा एतां दिशं व्रज इति स ग्रामाद् ग्रामं पृच्छन् पण्डितो मेधावी गन्धारानेव उपसम्पद्येत एवमेव इह आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावद् न विमोक्ष्ये अथ सम्पत्स्ये इति**’’ (छान्दो.उप. ६।१४।१-२) इति पठ्यते. अत्र ‘‘**आचार्यवान् पुरुषो इह वेद**’’ इति ‘**इह**’ शब्दस्वारस्याद् जीवन्मुक्तिः तवापि सम्मता. साच अभिनहनस्थानीयाविद्यानाशादेव इति सिध्यति. नतु अविद्यायाः शक्तिद्वयं तत्र आवरणशक्तिमात्रनाशात् सा इत्यादि, अन्यथा ‘‘तस्य तावदेव चिरं यावद् विक्षेपशक्तिः’’ इत्येव वदेत्. अतः त्वदुक्तव्यवस्थायां न इयं श्रुतिः प्रमाणं किन्तु प्रारब्धभोगायतननाशोत्तरं तस्य परमुक्त्यवश्यंभावमात्रे. किञ्च ‘‘**यावत् शरीराद् न विमोक्ष्यते तावदेव तस्य चिरम् अथ संपत्स्यतएव**’’ (छान्दो.उप.शां.भा.६।१४।१) इति तावकोपनिषद्भाष्यादिसम्मते अर्थे पुरुषव्यत्ययाश्रयणम्, ‘इति’शब्दवैयर्थ्यं च, गन्धारपुरुषदृष्टान्ते च तदंशालाभाद् दृष्टान्तकथनोत्तरम् अनुपदमेवं कथनासंगतिः च. वस्तुतस्तु **तस्य** जीवन्मुक्तस्य **तावदेव चिरं** तावानेव विलम्बः यावद् इति न भवति अहं संघाताद् विमोक्ष्ये यथा पुनः नापद्येय तथा मोक्ष्ये अथ प्राकृतसंघातविमोचनानन्तरं च ब्रह्म सम्पत्स्ये. यदा एवम् इच्छेत् तदैव परमुक्तिं लभेत इति अक्लिष्टः तदर्थः प्रतिभाति. तादृशस्य लोकानुग्रहाद्यर्थं स्वेच्छातन्त्रं शरीरधारणम् इति भावः. ‘उत्तमपुरुष’-‘इति’शब्दावपि एवमेव न पीड्येताम्. अत्रच आचार्यवतो वेदनं ब्रह्मभावसम्पादकम् अपरोक्षगन्धारसमोपसम्पत्तिसमम् ‘**एवं**’शब्देन तस्याः परामर्शात्. अग्रे सम्पत्तिस्तु प्रवेशरूपा ‘‘**ब्रह्मैव सन्**

ब्रह्मप्येति” (बृह.उप.४।४।६) इति श्रवणात्, ब्रह्मभूतं प्रकृत्य “**विशते तदनन्तरम्**” (भग.गीता १८।५५) इति स्मरणात् च. अतो दृष्टान्तेऽपि स्वमूलदेशसमीपं गतस्य तत्र प्रवेशः स्वेच्छाधीनः. तद्बाह्यभूमिका यावद् दिदृक्षेत तावत् स्थित्वा प्रविशेत्. तथा अत्र वैमानिकभूमिकादिदृक्षायामपि तावत् संघातस्य अत्यागइति दृष्टान्तस्यापि संगतिः. तदेतत्सर्वम् अनुसन्धाय आहुः **नहि तादृशश्रुतौ** इति.

यच्च तेन सूत्रद्वयम् उपन्यस्तं तदर्थो मूले विशदीकृतः **सूत्रयोस्तु अयम् अर्थः** इत्यादिना. अत्र **ननु देहस्य** इत्यादिः, **अग्रे तथा वक्ष्यते** इत्यन्तः **अनारब्ध...**(ब्र.सू.४।१।१५) इति प्रकृतसूत्रभाष्यस्थएव ग्रन्थः व्याख्यायमानार्थे प्रामाणिकतानिश्चायनाय अक्षरशो अनूदितः. एवम् “**एकेषां पुष्टिमार्गीयाणाम् (ब्र.सू.भा.४।१।१७) इत्यादिः... विषयभेदो वाच्यः**” इत्यन्तो ग्रन्थोऽपि “**अतो अन्यापि हि एकेषाम् उभयोः**” (ब्र.सू.४।१।१७) इति सूत्रस्य भाष्यादेव संगृहीतः. **मणिमन्त्र**...इत्यादिकं **वचनं गीयते** इत्यन्तन्तु पुनः “**अनारब्ध...**” सूत्रभाष्यात् प्रकृतानुकूलं संगृहीतम्. अत्र **तन्नाशे** इत्यादि तन्तुनाशे पटनाशवद् आरम्भककर्मणामपि नाशे देहनाशस्य इति अर्थः. **एवं सति** इति ब्रह्मनिष्ठस्य देहाभावे सति, “**तद्विज्ञानार्थम्**” (मुण्ड.उप.१।२।१२) इत्यादिविहितसाधनासम्भवः. **तदभावेन** इति अब्रह्मनिष्ठस्य आचार्यत्वायोगाद् आचार्याभावेन. **पूर्वसूत्राभ्याम्** इति “**तदधिगम...**” (ब्र.सू.४।१।१३) सूत्रेण “**इतरस्य...**” (ब्र.सू.४।१।१४) इति अतिदेशसूत्रेणच. **नाशे** इति प्रारब्धादिभेदेन त्रिविधेऽपि न इति अर्थः. **ते एव** इति सञ्चित-क्रियमाणएव नश्यतः. सौत्रं हेतुम् अवातरयन्ति **ननु** इति. **अग्रे तथा** इति उत्तराधिकरणे अन्येतु सौत्रहेतुं प्रारब्धस्य शरीरपातावधित्वश्रुतेः इति व्याचक्षते. तैरपि प्रारब्धमात्रानाशे हेतुः भगवदिच्छैव वाच्या अतः सैव अत्र दर्शिता **एकेषाम्** इत्यादि “**एके मुख्यान्यकेवला**” (अम.को.३।३।१६) इतिकोशात् मुख्यानां निरूपिकायाइति. “**क्षीयन्ते च अस्य कर्माणि**” (मुण्ड.उप.२।२।८) इत्यादिरूपायाः मुण्डकादिश्रुतेः इति अर्थः. **तदनाश्यः** इति भोगानाश्यः इति अर्थः, ज्ञानानाश्यः इति वा.

कर्माक्षेपकश्रुतेः च इति “**प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्**” (मुण्ड.उप. १।२।१३) इत्यादेः पूर्वश्रुतिः इयञ्च इति भेदप्रतियोगिन्यौ. “**तस्य पुत्राः** (कौषी.उप.१।४) इति, इयं श्रुतिः शाट्यायनिनाम् अस्ति. अत्र सूत्रे अन्ये ‘**उभयोः**’ इत्यनेन जैमिनि-व्यासयोः इति, ‘**अन्य**’इतिपदेन काम्य-साधुकृत्य इति च व्याचक्षते. तत्र जैमिनेः पूर्वं क्वापि अनुक्तत्वाद् आचार्यद्वयपरामर्शः. “**यदा सर्वे प्रमुच्यन्ते**” (कठोप.२।३।१४) इतिकामक्षयएव ज्ञानोदयश्रवणात् “**न शोचति न कांक्षति**” (भग.गीता १८।५४) इतिस्मरणात् च ब्रह्मविदोपि लौकिककामांगीकारश्च चिन्त्यः. **मृगदारकाभासेन** इत्यादि, इदं पञ्चमस्कन्धे अष्टमाध्याये त्रयोविंशं गद्यम्. **उपभोगेन** इत्यादि इदं तत्र दशमाध्याये चतुर्दशं गद्यम्. उपभोगस्तु राजयानवहनादिः. **भरतं प्रति** इति भरतं लक्षीकृत्य. “**इतरे**” इत्यादिः “‘**तु**’**शब्दः**” इत्यन्तो ग्रन्थोऽपि “**भोगेनतु इतरे**” (ब्र.सू.४।१।१९) इति सूत्रभाष्यस्थएव. एवं प्रतिपादनन्तु ब्रह्मवल्याम् “**उत अविद्वान् अमुं लोकं प्रेत्य**” (तैत्ति.उप.२।६) इत्यादिना अनुप्रश्नोपन्यासपूर्वकम् “**अस्मान् लोकात् प्रेत्य**” (तैत्ति.उप.२।८) इत्यादिना देहद्वयक्षपणोत्तरमेव आनन्दमयोपसंक्रान्तिः. “**यतो वाच**” (तैत्ति.उप.२।९) इत्यादिना “**आत्मनं स्पृणुते**” (तैत्ति.उप.२।९) इत्यन्तेन भोगस्यच श्रावणाद् इति ध्येयम्. इह “**इतरेतु आरब्धकार्ये पुण्यपापे उपभोगेन क्षपयित्वा ब्रह्म सम्पद्यते**” (ब्र.सू.शां.भा.४।१।१९) इति परेषां व्याख्यानमपि वर्णकभेदाद् अस्माकं सम्मतमेव. स्पष्टञ्च इदं प्रकाशे. किञ्च जीवन्मुक्तस्यापि अग्निहोत्रादिकं नित्यं तत्रैव “**अग्निहोत्रादितु तत्कार्यायैव तद्दर्शनात्**” (ब्र.सू.४।१।१६) इति सूत्रे निर्णीयते. लोकप्रवर्तनार्थं तस्य कर्मकरणबोधकानिच वाक्यानि सन्ति शतशः. अतः इमान्येव श्रुति-स्मृति-सूत्राणि जीवन्मुक्तस्यापि वास्तवप्रारब्धभोगं तदेकाधीनां शरीरस्थितिं कर्मानुष्ठानं च ग्राहयन्ति “**तस्मै स विद्वान् उपसन्नाय सम्यक्**” (मुण्ड.उप.१।२।१३) इत्यादिमुण्डकादिवाक्यानि तादृशस्य प्रवचनं विदधानानि च प्रपञ्चस्य अमायिकत्वमेव गमयन्ति, यदि प्रारब्धशरीर-शिष्यादिकं मायिकं स्यात् तर्हि जीवन्मुक्तस्य तत्सम्बन्धः तत्प्रतीतिः च श्रुतिसूत्रादिभिः निर्णीता न घटेत इति अनुकूलतर्कात्, तस्माद् अस्माकमेव तानि अनुगुणानि.

यच्च अन्येतु ज्ञानिनो अदृष्टाभावेऽपि इत्यादि उक्तं तदपि न युक्तं, उदासीनानां तच्छरीरदर्शनाद्यभावप्रसक्तेः. तेषां दर्शनाद्यदृष्टवशात् तथा इति चेद् , न; परादृष्टमात्रेण परशरीरोत्पत्तौ शुक्रशोणितादिनियतकारणजन्यन्तु अव्यभिचारो विज्ञानवादापत्तिः शून्यवादान्तरापत्तिः कथञ्चित्समाधाने शून्यवादेऽपि तत्सिध्या “**उदासीनानामपि चैवं सिद्धिः**” (ब्र.सू.२।२।२७) इत्यादि सूत्रबाधः, कृषीवल-कुलाल-तन्तुवायाद्यदृष्टमात्रेण धान्य-घट-पटादीनां तद्भाष्योक्ता प्रतीतिः परकल्पितनिरात्मकशरीरैः सर्वव्यापाराणाम् अनुष्ठाने अमुक्तदशायामपि शरीरातिरिक्तात्मसाधनप्रयासवैयर्थ्यं शिष्यादृष्टकल्पितस्य शुकादिशरीरस्य परीक्षिदादि मरणक्षणएव नाशदर्शनप्रसंगः च स्यात्. श्रूयतेतु तदुत्तरमपि तच्छरीरस्य प्रवचनादिरहितस्यापि स्थितिः. किञ्च वसिष्ठजनकादीनाम् अमुक्तदशायां स्वाविद्याकल्पितं शरीरन्तु ज्ञानसमकालमेव नष्टं शिष्याद्यदृष्टकल्पितन्तु शरीरान्तरमेव इति मन्तव्यम्. नहि रज्जौ देवदत्तेन यः सर्पः कल्पितः सएव यज्ञदत्तेनापि कल्प्यतइति शक्यवचनम्. तथासति पतिव्रताग्रगण्यानाम् अरुन्धत्यादीनां स्वपरिणेत्रतिरिक्ततज्जीवशून्यशरीरसंगे पातिव्रत्यहानिः महानेव अनर्थः स्यात् , तत्पातिव्रत्यबोधकः श्रुतिपुराणादिविरोधः च. क्षत्रियादेश्च जीवन्मुक्तस्य प्रवचनानुपयोगात् शरीरं नैव अवतिष्ठेत. एवञ्च जनकादीतिहासबाधः, अरुन्धत्याः पातिव्रत्याभावे स्वाहायाः तदनुकरणाशक्तिबोधिका इतिहासबाधः च, जीवन्मुक्तस्त्रीणां परिणेतृदेहमरणेन सौभाग्यचिह्नत्यागापत्तिः च. किञ्च काश्यां मृतस्य पूर्वदेहनाशो बहुलोकप्रत्यक्षनिश्चितः न तथा जीवन्मुक्तस्य पूर्वदेहनाशे अबाधितप्रत्यक्षादिकम् अस्ति. एवम् अनुगतायाः परलोके पत्या सह भोगाभावे तत्र यथा “**पत्या श्रीरिव मोदते**” (भाग.पुरा.७।११।२९) इत्यादिस्मृतिव्याकोपः तथा अत्र जीवन्मुक्तशरीरानुपलब्धौ न कस्यापि वचनस्य व्याकोपो अस्ति यद्बलात् तथा क्षिप्येत. अतो महदेव दृष्टान्तदार्ष्टान्तिकयोः वैषम्यम्. दार्ष्टान्तिके परकल्पितत्वादरे प्रत्युतपूर्वोक्तादिश्रुतिसूत्राणां व्याकोपः. तदेतदखिलम् उरसिकृत्य आहुः **दृष्टान्तवैषम्याद् न सम्भवति** इत्यादि. वस्तुतस्तु काश्यां मृतस्यापि त्वरितमेव न मोक्षः. तत्र मरणाद् मोक्षप्रतिपादकेष्वेव पुराणभागेषु पापिनां पापानुरूपजन्मान्तराणि त्रिंशद्वर्षसहस्रान्ता कालभैरवयातना काम्यपुण्यवतां

तदनुगुणम् अवान्तरजननं तत्फलभोगो मुक्तावपि पूर्वं शिवलोकप्राप्तिः शिवसारूप्यं तत्सायुज्यादिकं च प्रतिपाद्यतएवेति तत्र मृतानां सर्वेषां मोक्षांगीकारपक्षेऽपि मरणमात्रन्तु मुक्त्यवश्यंभावसाधकं शुध्यतिशयमेव जनयति. मोक्षस्तु ज्ञानैकसाध्यतया तारकोपदेशादेव तदुपदेशश्च मरणक्षणएव इति न नियमः. अपरेतु अधिकारिविशेषाणामेव तारकोपदेशो मोक्षः च. सर्वेषान्तु तत्र मरणाद् नरकप्रात्यभाव उत्तमलोकप्राप्तिः च इत्येव ‘‘**न अविमुक्तमृतः कश्चिद् नरकं प्रतिपद्यते ईश्वरानुगृहीताहि सर्वे यान्ति परां गतिम्** (द्र.कूर्मपुरा.१।३१।३४) इति लैंगात्. सर्वेषां मोक्षावश्यंभावे नरकाप्राप्तेः अर्थसिद्धतया तन्निषेधायोगाद् इति आहुः. अतो मतद्वयेऽपि पतिव्रतायाः अनुगमनफलभोगपर्यन्तं पत्युः उत्तमलोके तदनुरूपशरीरेण अवस्थानं सम्भवत्येव. बृहत्पराशरादिभिः ‘‘**केकीव पतितोरगम्**’’ इत्यादौ अनुगता भर्तुः पुण्याभावेऽपि तत्पुण्यफलभोगावश्यम्भावस्य स्मरणात्. अतो बौद्धमतापादकम् अदृष्टमात्राद् निरात्मकसव्यापारशरीरकल्पनं निर्मूलं नैव आदरणीयम्. तथाहि सनत्कुमारसंहितादिषु काशीमरणफलम् उपक्रम्य अन्यत्र भुक्त्वापि समस्तपापं पुण्यं च पश्चात् तृणगुल्मकादौ जातः क्रमाद् ब्राह्मणताम् उपेत्य तदुक्तं मार्गैरपि मुक्तिमेति इति पापस्य पुण्यस्य च फलभोगो मुक्तेः प्राग् श्रूयते. ‘‘**पापानि ये कुर्युः इह अविमुक्ते कथंहि तान् मोचयसि प्रसीद**’’ (सनत्कु.सं) इति पार्वतीप्रश्नोत्तरञ्च एतत् कथ्यते. यत्तु केचित् काश्यां यः पापकारी अन्यत्र म्रियते तद्विषयकम् इदम् इति, तद् न; महातीर्थक्षेत्रकृतशतकोटिलेपसदृशदुरितवतो ब्राह्मणजन्मपूर्वकमोक्षप्राप्तिनियमकथनस्य अयोगात्. पाद्मे ‘‘**अन्यच्च श्रूयतां दोषः क्षेत्रस्य वरवर्णिनि अविमुक्ते अणुमात्रं यत् तदघं मेरुतां व्रजेत्**’’ (पद्मपुरा.६।१२७।१३८) इति कांचनमालिनीं प्रति राक्षसवचने दोषाधिक्यबोधनात्. तत्रैव अनुपदं ‘‘**न धर्मस्तु मया कश्चित् संचितः तत्र जन्मनि. ततो बहुतिथे काले मृतः तत्रैव शोभने अविमुक्तप्रभावेण नच अहं नरकं गतः**’’ (पद्मपुरा. ६।१२७।१३८-१३९) इति नरकप्राप्तिनिषेधेऽपि कण्ठरवेण अत्र बहुजन्मान्तरकथनं तत्र मरणक्षणएव सर्वस्य न मोक्षनियमः इति गमयति. एतेन ‘‘**अविमुक्ते मृतः कश्चिद् नरकं नेति किल्बिषी**’’ (पद्मपुरा.६।१२७।१४०), ‘‘**मम अनुग्रहम् आसाद्य गच्छत्येव परांगतिम्**’’

इति काशीखण्डादयो व्याख्याताः. गरुडपुराणे “**वाराणस्यां मृतो यो वै पातकेषु रतः सदा योनिं प्रविश्य/प्राप्यापि पैशाचीं वर्षाणाम् अयुतत्रयम्. पुनरत्रैव निवसञ्ज्ञानं प्राप्स्यति अनुत्तमं तेन ज्ञानेऽथ सम्प्राप्ते मोक्षम् आप्स्यति अनुत्तमम्**” (स्क.पुरा.४।२।६४।७१-७२) इति काशीखण्डेच “**ममैव मायया मूढा भेदवादपरायणाः मम भक्तिं प्रकुर्वाणा ये विश्वेशं द्विषन्ति वै विद्विषो मम ते ज्ञेयाः पिशाचपदगामिनः पैशाचीं योनिम् आस्थाय कालभैरवशासनात् त्रिंशद्वर्ष सहस्राणि उषित्वा दुःखसागरे विश्वेशानुग्रहादेव पुनः/ततो मोक्षम् अवाप्नुयुः**” (स्क.पुरा.४।२।६०।१२७-१२९) इति मात्स्ये “**कृत्वा पापसहस्राणि पिशाचत्वं वरं नृणाम् अपिशक्रसमं राज्यं नतु काशींपुरीं विना/न च क्रतुसहस्रत्वं स्वर्गे काशीं पुरीं विना**” (शिवपुरा.४।२३।२५) इति सनत्कुमारसंहितायामपि पापिनः पिशाचत्वम् उक्त्वा तदनन्तरं तारकोपदेशाद् मुक्तिः उच्यते. “**भवप्रसादेन कृतोपदेशः पिशाचयोनेरपि मुक्तिम् एति**” (सनत्कु.सं) इति. पद्मपुराणेतु काश्यां कृतबहुदुष्कृतस्य तत्रैव मृतस्य कस्यचिद् बहुजन्मोत्तरं रक्षोभूतस्य कांचनमालिनी दत्तमाघस्नानजपुण्येन देवजन्मापि वर्ण्यते “**अविमुक्ते कृतं किञ्चित्पापं वज्रीलेपो भवेद् दृढम् वज्रलेपेन पापेन तेन मे जन्म राक्षसं रौद्रं क्रूरतरं पापं संभूतं हिमपर्वते द्विर्जातो गृध्रयोनौ प्राग् त्रिर्व्याघ्रो द्विः सरीसृपः एकवारम् उलूकस्तु विड्वराहः ततः परम् इदन्तु दशमं जन्म राक्षसं मम भामिनि अतीतानि सहस्राणि वर्षाणि....ददौ सा माघजं पुण्यं तस्मै वृद्धाय रक्षसे**” (पद्मपुरा.६।१२७।१४०-१५७) इत्यादि. अनन्तरं “**तदेवं प्राप्य तत्पुण्यः विमुक्त्वा राक्षसी तनुः सम्भूतो देवताकारः तेजो भास्करविग्रहः**” (पद्मपु.६।१२७।१५७-१५८) इतिच. नच इदं प्रयागे माघस्नानस्तावकम् इति वाच्यम् मृतमुक्तिवचसामपि स्तावकत्वप्रसंगात्. ईदृश पाद्मादिवचांसि उत्कटपापकृद्विषयाणि उक्तचरगारुडकाशीखण्डादि वचांसि च अनुत्कटपापकृद्विषयाणि इति मृतमुक्तिप्रकाशिकाकारादयो बहवः ब्रह्मवैवर्ते च काशीं प्रति शिवः “**पापं कृत्वा क्षेत्रमध्ये मृता ये तेषां मुक्तिः यातनान्ते भवेद्हि. धर्मः काश्यां शुद्धिहेतुः प्रदिष्टः पापं पुनः मलदुःखादिमूलम्. तस्मात् प्रतिज्ञा मम सिद्धरूपा मुक्तिः भवत्येव मलावसाने**” (ब्रह्मवै.पुरा.).

पाद्मे च बलिं प्रति सनत्कुमारः **“वाराणस्यां निवसतिः अपवर्गफलप्रदा. द्वित्राणाञ्च पवित्राणां कल्पते सत्त्वरं बले. तथाच विष्णोः विमुक्ते संवासः कर्मनिर्मूलनक्षमः द्वित्राणाम् अतिपवित्राणां निर्वाणाय उपजायते”** (पद्मपुरा.) इत्यतः तत्र मरणन्तु शुद्धिमात्रजनकं मोक्षस्तु सति अधिकारे तारकोपदेशादेव. अतएव वार्तिककारः सुरेश्वराचार्यः **“पृथूदकादौ मरणं तदपि अत्यंतशुद्धिकृद्”** (बृह.भा.वार्ति.) इति शुद्धिमेव फलम् आह. अत्र ‘आदि’पदात् काशी-प्रयागादिसंग्रह इति त्रिस्थलीसेत्वादयः. तथाच पाद्मे **“वाराणसीस्थतीर्थानाम् अम्बुग्राह्यः ततः परम्. अन्तःकरणसंशुद्धिम् आप्नुयाद् विजितेन्द्रियः तथा तादृशस्य अत्र दैत्यैन्द्रशरीरत्यागमात्रतः अपवर्गो भवत्येव तदन्यस्य विलम्बतः तथा पुमांसं क्षीणकलुषं शंकरस्तारकं वचः श्रावयामास विधिवत् सम्पाद्याधिकृतिं बुध”** (पद्मपुरा.) इति निष्पापस्य उपदेशो उक्तः मात्स्येच **“अविमुक्तेतु अन्तकाले भक्तानाम् ईश्वरः स्वयं कर्मभिः प्रेर्यमाणानां कर्णजापं प्रयच्छति ईश्वरप्रेरिता यान्ति दुष्प्रापम् अकृतात्मभिः”** (मत्स्य.) इति भगवत्कृपया सत्कर्मशालिनां भक्तानां कृतात्मनामेव उपदेशो दर्शितः. एतेन प्रायोपवेशाधिकारोपक्रमे **“वाराणस्यां विपन्नस्तु प्रत्याख्यातभिषक्क्रियः प्रणवं तारकं ब्रूते नान्यथा कस्यचित् क्वचिद्”** (ब्रह्मपुरा.) इति. काशीखण्डस्थौ **“अविमुक्ते म्रियेद् यस्तु प्रत्याख्यातभिषक्क्रियः काष्ठपाषाणभूतस्तु जान्हवीजलमध्यगः अविमुक्ते मृतस्य अस्य कर्णमूलंगतो हरः प्रणवं तारकं ब्रूते नान्यथा कस्यचित् क्वचिद्”** (ब्रह्मपुरा.) इति ब्रह्मपुराणस्थौ च उपदेशस्य विधिनिषेधौ व्यवस्थया व्याख्यातौ ज्ञेयौ. ब्राह्मे **“अनेक जन्मसंसिद्धान् वर्जयित्वा महामुनीन् नान्येषां मरणं तत्र यच्छन्ति अन्ये बिभीषणाद्”** (ब्रह्मपुरा.) इति वचनमपि भगवत्कृपापात्राणामेव सद्योमुक्तिलक्षणफलोपधायकमरणं तत्र बोधयति तत्प्रसादादेव अनेकजन्मसंसिद्धमहामुनित्वसम्भवात्, प्रत्यहं तत्रापि अनेकजन्तुमरणसम्भवेन सर्वेषां तेषां तादृशतायाः दौर्लभ्यात् च. वचनार्थस्तु अन्ये शिवदूतविभीषणाद् भयोत्पादनाद् हेतोः तादृशव्यतिरिक्तानां तत्र मरणं न यच्छन्ति इति बोध्यः. गारुडेऽपि **“अशनं वसनं वासः येषां/यस्य काश्यां मार्गतः. कीकटेन समा काशी सत्यं सत्यं खगेश्वर!”**

(गरु.पुरा.   ), ''**विष्णोः विमुक्ते/विष्णो अविमुक्ते संवासः कर्मनिर्मूलनक्षमः. द्वित्राणां हि पवित्राणां निर्वाणाय उपजायत/य इह जायते**'' (स्क.पुरा.४।१।२६।११०) इति. तद् एतत्सर्वम् अनुसंधाय उक्तं शास्त्रार्थनिबन्धे श्रीमदाचार्यचरणैः ''**तीर्थादावपि या मुक्तिः कदाचित् कस्यचिद् भवेत् कृष्णप्रसादयुक्तस्य नान्यस्य इति विनिश्चयः**'' (त.दी.नि.१।४७) इति. किञ्च येषां तत्र मरणाद् मुक्तिः तेषामपि तदैव कैवल्यमेव इति न नियमः. किन्तु प्रथमतः शिवसालोक्यं ततः तस्य सारूप्यं ततः तत्सायुज्यं ततः शिवानुग्रहेण कैवल्यम् इति एकं मतम्. तत्र मरणेऽपि अधिकारभेदाद् व्यवस्थितं शिवसालोक्यादिकम् इति अपरम्. तथापि तत्र मरणाद् मुक्तानां सार्वदिकीकैवल्यात् प्राग्बहुकालपर्यंता वा शिवलोकप्राप्तिस्तु सर्वेषां शिवसरूपतापुरःसरा अस्त्येव तथाहि पाद्मे ''**कीटाः पतंगा मशकाश्च मत्स्या/वृक्षा जले स्थले वा/ये विचरन्ति मर्त्याः/जीवाः**'' (द्र.स्क.पुरा.२।४।३-५।४१). ''**मंडूककूर्माः कृमयोऽपि काश्यां त्यक्त्वा शरीरं शिवम् आप्नुवन्ति अनेनैव विशेषेण तां प्रशंसन्ति तात्त्विकाः साक्षाद् वाराणसी मुक्त्यै विष्णुभक्तिः तथाविधा**'' (पद्मपुरा.   ) इति. काशीखण्डे ''**ब्राह्मणाः क्षत्रियाः वैश्याः शूद्रा ये(वै) वर्णसंस्थिताः/वर्णसंकरा स्त्रियो म्लेछाश्च ये च अन्ये संकीर्णाः पापयोनयः. कीटाः पिपीलकाश्चैव येच अन्ये मृगपक्षिणः. कालेन निधनं प्राप्ता अविमुक्ते वरानने/शृणु प्रिये. चन्द्रार्धमौलयः त्र्यक्षाः महावृषभवाहनाः/चन्द्रार्द्धमौलिनः सर्वे ललाटाक्षा वृषध्वजाः. शैवे मम पुरे देवि जायन्ते तत्र मानवाः**'' (स्क.पुरा.   ), ''**ये भक्ता वरदं देवम् अविमुक्तं परं पदं ते विशन्ति महादेवम् आज्याहुतिरिव अनलम्. अकामो वा सकामो वा तिर्यग्योनिगतोऽपि वा अविमुक्ते त्यजन् प्राणान् मम लोके महीयते. गृहस्थाश्चैव यतयः तस्मिन् तीर्थउपासकाः एकदण्डाः त्रिदण्डाश्च हंसव्रतधराश्च ये. कर्मभेदेन तेषान्तु सर्वेषाम् आस्थितो हि अहम्. विभजामि महास्थानं यत्तन्मोक्षप्रदं शुभम्**'' (स्क.पुरा.   ) इति. तत्रैव दण्डपाणिं प्रति शिवः ''**अमर्त्यभूषं कुरु काशिवासिनं गले सुनीलं भुजगेन्द्रभूषणम् भाले सुनेत्रं कटि कृत्तिवाससं वामेक्षणालक्षितवामभागं मौलौ लसत् पिंगकपर्दभारं विभूतिसंलालितपुण्यविग्रहम्. अहो हिमांशोः**

कलया लसच्छ्रियं वृषेन्द्रलीलांचितमन्दगामिनम्. आनीय भक्तान् क्षणतोऽपि दूरतो मद्भक्त-मुक्तिः पतिता गले ते (स्क.पुरा.   ) इति. मात्स्येऽपि “**न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि**” (द्र.स्क.पुरा.२।३।७।३४) “**अविमुक्तेन गृह्यन्ते भवेन विभुना स्वयं**” (   ) तथाच “**स याति परमं स्थानं यत्र गत्वा न शोचति. जन्म-मृत्यु-जरामुक्तं परं याति शिवालयम् अपुनर्मरणानां हि सा गतिः मोक्षस्य कांक्षिणाम्**” (पद्मपुरा.३।३३।२६-२७) इति. वायुपुराणे “**पराच्छिवपराद् उर्ध्वं श्रीकण्ठेन निरीक्षिताः न अधो यान्ति पुनः देवि! संसारे दुःखसंप्लवे/दुःखसागरे**” ( ) इति. एवञ्च एवमादिवचनेषु शिवलोकस्य सत्यलोकोपरितनपरशिवालयाख्यः तल्लोकस्य वा यथाधिकारं प्राप्तिः त्रिस्थलीसेत्वादिभिः निर्णीता. एवंसति “**पतिलोकम् अवाप्नोति**” (   ) इति अनुगतायाः पतिलोकप्राप्तिस्मरणात् “**या पतिं हरिभावेन भजेत् श्रीरिव तत्परा हर्यात्मना हरेः लोके पत्या श्रीरिव मोदते**” (भाग.पुरा.७।११।२९) इत्यादिफलश्रवणेऽपि हरि-हरयोः अभेदेन मथुरादिमृतेन हर्यात्मना विष्णुलोके श्रीरिव काश्यादिमृतेन हरात्मना शिवलोके गौरीव तेनैव स्वभर्त्रा सह मोदते इति युक्तमेव, “**वामेक्षणालक्षितवाभभागम्**” इत्यादि वचनानुग्रहात्, बहुषु स्मृतिपुराणेषु धर्मविशेषतोऽपि विष्णु-शिवलोकप्राप्तिस्मरणेन तत्रापि तत्सम्भवात्, पतिव्रतायाः विष्णु-शिवलोकप्राप्तिबोधकवचसां धर्मशास्त्रेषु स्पष्टत्वात् च. अतो न तस्याः अदृष्टमात्रेण निरात्मकपतिशरीरकल्पना कल्प्या. केषाञ्चिन्मते क्रमेलकशूद्रोपाख्यानाद्यवलम्बाद् यो निजैः कालभैरवेच्छाजन्यशरीरैः यातनाभोगवत् पुण्यभोगस्य सम्भवात् च. केचित्तु शिवलोकप्राप्तिरूपां मुक्तिमपि पापभोगादिव इहैव पुण्यभोगादपि अनन्तरं मन्यन्ते. काशीखण्डादिषु “**स्वयं देहविनाशस्य प्राप्ते काले महामतिः उत्तमान् आप्नुयाद् लोकान् आत्मघाती भवेत् क्वचिद्**” (स्क.पुरा.   ) इत्यादि स्मरणात्. ब्राह्मे “**तत्र स्थितस्य जन्तोः हि भोगमोक्षप्रदः शिवः अधितिष्ठति जन्तूनां मुक्तिक्षेत्रम् इदं परम्**” (ब्रह्मपुरा.   ) इति पूर्वं भोगप्रदानकथनात्. पाद्मेऽपि मुनीन् प्रति भृगुणा “**तत्तद्भोगप्रापणायैव देहा अयोनिजा भैरवेच्छाविधाना**” (पद्मपुरा.   ) इति उभयभोगानुकूलशरीराणां निरूपणात् च. किञ्च

त्वदुक्तदेशीयमपि उदाहरणं शिवपुराणे तद्यथा कस्यचिद् लुब्धकस्य काश्याम् ओंकारेश्वरसन्निधौ मरणोत्तरं तत्पत्न्यऽनुगमने कृते तादृशपुण्यविशेषात् तस्यैव सपत्नीकस्य राजजन्मः ततो मोक्षः च निरूपितः. मुनिरपि तं प्रति तत्पूर्वकथां वर्णयन् आह **“कालेन गच्छता चैव वाराणस्यां तटे शुभे पञ्चत्वं गतवान् तत्र देवदेवस्य सन्निधौ. अग्नौ प्रविष्टा सुश्रोणी प्रतिगृह्य कलेवरम्. तेन धर्मेण राजेन्द्र! इयं व्युष्टिः उपागता. भवान् वै लुब्धको जातः सपत्नीको नरेश्वर!”** (   ) इत्यादि. **व्युष्टिः** उदयः **लुब्धको भवान् सपत्नीको नरेश्वरो जातः** इति अन्वयः. एवञ्च पत्युः काशीमरणेऽपि अनुगतायाः तत्पत्न्याः तेनैव स्वभर्त्रासह पुण्यफलभोगः कामना-पुण्ययोः तारतम्याद् अत्र लोके लोकान्तरेइव इत्येव त्रिस्थलीसेत्वादिषु सिध्यति. ननु शिवपुराणे पत्न्याः अनुगमनमपि काश्यामेव प्रतीयते अतो मदुक्तोदाहरणाद् वैषम्यम् इति चेद्ः उभयोः तत्र मृतत्वेऽपि एवं व्यवस्थायाः प्रमाणसिद्धत्वे सति पतिमात्रस्य तत्र मरणे तादृशव्यवस्थांगीकारः कैमुतिकसिद्धः, साक्षान्मोक्षविलम्बस्य अविशेषात्. किञ्च तत्र मृतस्य कैवल्यप्राप्त्यंगीकारेऽपि सालोक्याद्यनन्तरमेव इति चिरात् सा वर्ण्यते यथा पाद्मे **“चतुर्धा वितते क्षेत्रे सर्वत्र भगवान् शिवः व्याचष्टे तारकं वाक्यं ब्रह्मात्मैक्यप्रबोधनम्. तथापि तत्र सामर्थ्यात् तत्र तत्र मृतस्यहि भोगपूर्वापवर्गादिजीवन्मुक्तिदशेव सा. अन्तर्गेहे विपन्नस्तु साक्षाच्छिवम् अवाप्नुयात्. तथा चतुर्विधेऽपि क्षेत्रे अस्मिन् प्रमीतो गर्भयातनाः नैव आप्नोति मुनिश्रेष्ठा! विशेषो अयं ब्रवीमि वः. काश्यां मृतस्तु सालोक्यं साक्षात् प्राप्नोति सत्तमाः. ततः सरूपतां याति ततः सान्निध्यम् अश्नुते. ततो ब्रह्मैकतां याति न परावर्तते पुनः. वाराणस्यां मृतो जन्तुः साक्षत्सारूप्यम् अश्नुते. ततः सान्निध्यम् आयाति ततो ब्रह्मैकताम् ईयात्. अविमुक्ते विपन्नस्तु साक्षात् सान्निध्यम् आप्नुयात् ततः चिदानन्दमये ब्रह्मण्येव विलीयते. सलोकतां च सारूप्यं सान्निध्यं च अतिसत्तमाः. कल्पं कल्पम् अवाप्नोति ततो ब्रह्मात्मको भवेत्. तथा आदेहपातनाद् येतु क्षेत्रं सेवन्ति मानवाः. ते मृता हंसयानेन दिव्यं यान्ति अकुतोभयम्”** (पद्मपुरा.) इत्यादिवचांसितु सालोक्यविषयाणि. इमानिच सर्वाण्यपि वचांसि त्रिस्थलीसेतुमृतमुक्तिप्रकाशिकादिषु प्रसिद्धानि अत्र उदाहृतानि.

अत्रापि "**भोगपूर्वापवर्गाद्**" इति उक्त्या सर्वेष्वपि पक्षेषु अपवर्गात् पूर्वं तादृशावश्यकभोगो अस्त्येव. ननु तत्र मरणाद् उत्तरमपि भोगसत्त्वे को विशेषः तस्य? इति आशंक्य आह **जीवन्मुक्तिदशेव सा** इति. यथा जीवन्मुक्तस्य प्रारब्धभोगे सत्यपि परमुक्त्यावश्यंभावो अस्ति तथा अस्य उक्तचरभोगेऽपि मुक्त्यववश्यंभावः इति एषः विशेषः इति भावः. एवञ्च तत्र मृतस्य लुब्धकवद् इहलोके जन्मनि शिवसालोक्यादौ वा सिद्धेऽपि "**तेनैव पत्या सह स्वसाधुकृत्या फलभोगः सत्याः सत्याम् अनुगमनमृत्याम्**" इति तदुक्तम् अदृष्टमात्रेण बौद्धकल्पं निरात्मकशरीरकल्पनं हेयमेव. तदुदाहृतश्रुतिरपि प्रागुक्तव्यवस्थया व्याख्याता ज्ञेया. अमृतीभूत्वा इत्यनेन जीवन्मुक्तवत् तादृशभोगस्य सालोक्यादेः वा सम्भवोत्तरमेव मोक्षीभवति इति श्रावणात्. अत्र 'अमृति'शब्दस्य निश्चितमुक्तियोग्यपरत्वसिद्धेः, अन्यथा पौनरुक्त्यापातात्. एतद्विषये अधिकन्तु आवरणभंगविभागसंभवे "**तीर्थादौ**" (त.दी.नि.१।४७) इत्यत्र वक्ष्यामि. इह मूलस्थम् उत्तरन्तु "**नखच्छेद्ये किं कुठारप्रहारेण**" (   ) इति न्यायाद् बोध्यम्. अतो जगन्मायिकत्वे जीवन्मुक्तस्य शरीराद्यभावप्रसक्त्या तद्बोधकशास्त्रव्याकोपात्, प्रवचनाद्यनुपपत्या मोक्षसम्प्रदायोच्छेदप्रसंगात् च प्रपञ्चस्य अमायिकत्वमेव सिध्यति. अधिकन्तु उत्तरभागे तावकषष्ठखण्डखण्डनाभासखण्डनावसरे वक्ष्यामः.

(१) [एतेनैव भैक्षव-मतम् उपन्यस्य यदुक्तं "तन्मायिवाद-विध्वंस-ध्वस्तप्रायम्" (शु.मा.६४) इति तदेव ध्वस्तं, मायाहेतुवादस्य निवारयितुम् अशक्यत्वात्. अध्यासितुः वास्तवत्वम् अध्यास्य अन्यत्र वास्तवत्वं वा न अध्यासे प्रयोजकं, प्रमाणाभावाद् गौरवात् च. एवञ्च जीवस्य उपाधेः अवास्तवत्वेऽपि संसारस्य अन्यत्र अवास्तवत्वेऽपि च मायायाः अध्यस्तरूपस्य मायिकत्वस्य न अनुपपत्तिः.

नच ब्रह्मणो घट-पटाद्यात्मना भासे ब्रह्मणः सदृशत्वापत्तौ साकारता स्यात्. नहि रज्जौ हयाकाराभासः

किन्तु सर्पाकाराभासएव इति वाच्यम्, अध्यासे सादृशस्य साक्षाद् अप्रयोजकत्वात्. संस्कारोद्बोधद्वारा हि स तत्र प्रयोजकः. संस्कारोद्बोधस्यतु न सादृश्यज्ञानमेव कारणं किन्तु अदृष्टाद्यपि. रज्जौ अश्वाध्यासाभावस्तु केनापि हेतुना तत्संस्कारानुद्बोधात्. अन्यथा भुजंग-दण्ड-भूच्छिद्र-माला-जलाधाराद्यध्यासो युगपद् रज्जौ स्यात्, पृथक् तदध्यासदर्शनेन सादृशस्य अप्रत्याख्येयत्वात्, पूर्वपूर्वाध्यासजन्य-सादृशस्य ब्रह्मणि अंगीकारे साकारतापत्तेः अभावात् च.]

(२) किञ्च प्रपञ्चस्य मायिकत्वम् अभ्युपगच्छता त्वया शुक्तिरूप्यवद् अध्यस्तत्वं वाच्यं तच्च यथा आपणस्थ-रजतं दृष्टवतः तज्जन्यसंस्कारेण, रजतगत-चाकचक्यादि-साधारणधर्मस्य शुक्तौ दर्शनेन च शुक्त्यज्ञानसहकृतेन शुक्तौ रजताध्यासः उत्पाद्यते. तथा अत्र प्रपञ्चस्य कुत्रचिदपि अदृष्टत्वात् तज्जन्यसंस्काराद्यभावाद् अधिष्ठाने च ब्रह्मणि निर्धर्मके प्रपञ्चगतासाधारणधर्मादीनाम् अभावाद् अर्थात् पूर्वं कर्तुरपि अभावाद् अध्यासो न सम्भवति. किञ्च अयम् अध्यासः कस्य? इति वक्तव्यं, जीवस्य ब्रह्मणो वा? न आद्यः, जीवस्यापि त्वन्मते अध्यासमध्यपातित्वात्, शुक्ति-रजतद्रष्टृपुरुषवद् अध्यासात् पूर्वम् असत्त्वात्. नापि द्वितीयः, ब्रह्मणो भ्रान्तत्वापत्तेः. किञ्च प्रपञ्चस्य मिथ्यात्वे किं प्रमाणम्? न तावत् प्रत्यक्षं, "न इदं रजतम्" इति "न अयं प्रपञ्चः" इति बाधस्य अभावात्. ननु "प्रपञ्चो मिथ्या दृश्यत्वात् शुक्तिरूप्यवद्" इति अनुमानं प्रमाणम् इति चेद्, न; दृश्यत्वस्य ब्रह्मण्यपि सत्त्वेन तत्र मिथ्यात्वाभावेन हेतोः अनैकान्तिकत्वात्, ब्रह्मणो अदृश्यत्वे च "भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः क्षीयन्ते च अस्य

कर्माणि तस्मिन् दृष्टे परावरे'' (मुण्ड.उप.२।२।८) ''यदा पश्यः पश्यते रुक्मवर्णम्'' (मुण्ड.उप.३।१।३) इत्यादिश्रुतिविरोधः. किञ्च विश्वं यदि कल्पितं स्यात् तदा साधिष्ठानं स्याद्, नच एवं सामान्यतो ज्ञातत्वे सति अज्ञातविशेषवत्त्वस्य अधिष्ठानत्वप्रयोजकस्य निर्विशेषे निःसामान्ये च ब्रह्मणि असम्भवात्. नच कल्पितसामान्य-विशेषवत्त्वस्य ब्रह्मण्यपि सत्त्वेन तस्य अधिष्ठानत्वे बाधकाभावः इति वाच्यं; सामान्यविशेषकल्पनायाअपि साधिष्ठानत्वेन तत्रापि कल्पित-सामान्यविशेषोपादाने अनवस्थापत्तिः इति अलं विस्तरेण. एतेन एवञ्च इत्यादिकम् अपास्तम्.

किञ्च शुक्तौ रजतसादृशस्य रजते शुक्तिसादृश्यस्य च सत्त्वाद् रजतात्मना शुक्तिः भासते. एवं ब्रह्मणो घट-पटात्मना अवभासेऽपि परस्परसादृश्यं स्वीक्रियते चेत्; तदा ब्रह्मण्यपि साकारत्वं जडत्वं च स्यात्. विजातीये असदृशे च न अध्यासः अन्यथा शुक्तौ घटस्य रज्जौ गजस्य च अध्यासः स्यात्. नच अध्यासे सादृश्यं साक्षाद् न प्रयोजकं किन्तु संस्कारोद्बोधकत्वेनैव, संस्कारोद्बोधश्च सादृश्याद् अन्येनापि सम्भवतीति सादृश्याभावेऽपि न काचिद् अनुपपत्तिः इति वाच्यम्; अदृष्टादिना संस्कारोद्बोधेऽपि भ्रमो विसदृशे न सम्भवति. रज्ज्वादिषु घटादिभ्रमस्य अदृष्टत्वात् सादृश्यज्ञानम् अवश्यक्लृप्तमेव, सादृश्यं विना अदृष्टादिसत्त्वेऽपि भ्रमस्य असम्भवात्. स्वप्नस्मरणजनकसंस्कारोद्बोधस्य अदृष्टादिना सम्भवेऽपि भ्रमजनकसंस्कारस्य सादृश्यज्ञानं विना असम्भवेन अदृष्टेन दृष्टस्य अन्यथासिद्धेः कर्तुम् अशक्यत्वात्. अन्यथा कार्यमात्रस्य अदृष्टेनैव उत्पत्तौ दृष्टकारणानां दण्डादीनाम् अन्यथासिद्धत्वं स्यात् कार्यमात्रे अदृष्टस्य हेतुत्वात्. ननु रज्जौ घटाश्वादीनाम् अध्यासो तत्तत्संस्कारोद्बोधाभावादेव

न सम्भवति सति तदध्यासे तत्सादृश्यज्ञानस्य हेतुत्वं न सम्भवति इति चेद्, न; मन्दान्धकारे रज्ज्वज्ञाने घटाश्वादीनां संस्कारोद्बोधेऽपि तद्भ्रमस्य अदृष्टत्वाद् न संस्कारोद्बोधमात्रं भ्रमे हेतुः, किन्तु सादृश्य-संदर्शनजन्य-संस्कारोद्बोधएव इति कथं सादृश्यज्ञानस्य न हेतुत्वम्? नच सादृश्यज्ञानस्य भ्रमहेतुत्वे रज्जौ भुजंग-दण्ड-भूछिद्र-माला-जलधाराद्यध्यासो युगपदेव कथं न जायेत? तत्तत्सादृश्यज्ञानस्य पृथक् तदध्यासानुरोधेन सत्त्वाद् इति वाच्यं; पृथक् तत्तदध्यासे तत्तत्सादृश्यज्ञानसत्त्वेऽपि युगपत्सादृश्यज्ञानस्य असत्त्वात्. नच तत्सादृश्यस्य सत्त्वमात्रं तत्तत्सादृश्यज्ञाने हेतुः किन्तु तत्तत्सादृश्य-प्रतियोग्युपस्थितिरपि तथाच यादृशप्रतियोग्युपस्थितिः तत्प्रकारको भ्रमः उत्पद्यते युगपत्प्रतियोग्युपस्थितौ च सर्पत्व-धारात्व-मालात्वादीनाम् एकत्र ज्ञानं निश्चयरूपं न सम्भवति. विरुद्धधर्माणाम् एकत्र सत्त्वे विरोधएव न स्यात्. तस्मात् कथञ्चिद् युगपदुपस्थितावपि युगपत् तत्तद्भ्रमो नैव आपद्यते भ्रमस्य निश्चयरूपत्वात्. अतः तादृशज्ञानं संशयरूपमेव जायते तत्र इष्टापत्तिरेव. अन्यथा संस्कारस्य हेतुत्वेन पृथक्तदध्यासानुरोधेन अदृष्टस्य उद्बोधकस्य सत्त्वेन युगपदध्यासः त्वन्मतेऽपि कुतो न स्यात्? संस्कारोद्बोधकस्य सत्त्वात्; तस्माद् ब्रह्मणः साकारत्वापत्तिः दुर्वारैव. नच पूर्वपूर्वाध्यासजन्यसादृश्यस्य ब्रह्मणि अंगीकारे साकारतापत्तेः अभावः श्रुतिविरुद्धतादृशकल्पनाया अप्रमाणिकत्वात्.

(३) सहस्राक्षे एतेनैव भैक्षवमतम् इत्यादिं साकारतापत्तेः अभावात् च इत्यन्तं भागं निरस्यन्ति **किञ्च प्रपञ्चस्य** इत्यादिना **अप्रमाणिकत्वाद्** इत्यन्तेन. अयं भावः : मार्तण्डे “मायोपाधिककर्तृत्वं भैक्षवे दृश्यतेतु यत् तद् मायिवादध्वंसेन ध्वस्तप्रायः विशेषतः” (शु.मा.६४) इति कारिकायाः शकलं पाठभेदेन उपन्यस्य यत् तदेव ध्वस्तम् इति उक्तं, तदपि

एतावता ध्वस्तमेव. यच्च अध्यासितुः वास्तवत्वम् अध्यास्य अन्यत्र वास्तवत्वं वा न अध्यासे प्रयोजकं प्रमाणाभावाद् गौरवात् च इति उक्तं तत् प्रलापमात्रम्. प्रपञ्चे विवर्तत्वं साधयितुं त्वया शुक्तिरजत-रज्जुभुजंगादिकमेव लोकप्रसिद्धं विवर्तजातं दृष्टान्तीक्रियते. तत्र सर्वत्र अयं नियमः रजतादिद्रष्टा तदतिरिक्तो देवदत्तादिवद् वास्तवएव अपेक्षितः इति, क्वापि निर्द्रष्टृकभ्रमस्य अदर्शनात्. प्रकृतेच द्रष्टुः जीवस्यापि कल्पितत्वेन शुक्तिरजत-समानयोगक्षेमत्वाद् अवास्तवस्य तस्य न भ्रमः सम्भवति. नहि शुक्तिः रजतमेव शुक्तौ आत्मानं कल्पयति आत्माश्रयप्रसंगात्. नापि स्थाणौ कल्पितः पुरुषः क्वापि भ्राम्यति. नच वास्तवस्य ब्रह्मणः तद्दृष्ट्रत्वं कल्प्यं भ्रान्तत्वापत्ते ज्ञानघनस्य च भ्रमायोगात्. तस्य मायासम्बन्धतो भ्रमः इति चेत्; सापि कल्पिता न वा. द्वितीये कदापि न उच्छिद्येत. आद्ये सा केन कल्पिता? शुद्धब्रह्मणएव तत्कल्पकत्वे तत्सम्बन्धे च सति अनिर्मोक्षप्रसंगः, मोक्षोत्तरमपि तत्सम्भवे प्रतिबन्धकाभावात्. मायोपहितस्य कल्पकत्वेतु आत्माश्रयादयः. अतो रजतादिभिन्नदेवदत्तादिवद् वास्तवस्य अन्यस्य अध्यासितुः अभावाद् न भ्रमः उपपद्यते. किञ्च हट्टादौ सत्यं रजतं नरेन्द्रकरंडकादौ सत्यं भुजंगमं च दृष्ट्वा वृद्धव्यवहारात् तत्र-तत्र तत्तच्छब्दसंकेतं गृहीतवन्तः समुत्पन्न-तत्तत्संस्काराएव शुक्ति-रज्वादौ तमसा तत्तत्कल्पयन्ति. अनुत्पन्नसंस्काराः बालादयस्तु तिमिरभरे चरणेन रज्जुशतम् अतिक्रामन्तोऽपि एकम् अहिमपि नहि कल्पयति. तथा प्रकृते परिदृश्यमानाद् अतिरिक्तं सत्यं जगत् क्वापि अनुभूतं स्यात् तदा तज्जन्यसंस्काराद् इदम् अनृतं कल्प्येत तदेव नास्तीति संस्काराभावाद् न भ्रमः. तदंगीकारेतु "अन्ते रंडाविवाह"इति न्यायाद् इदमेव सत्यं स्वीक्रियताम्. संस्काराभावेऽपि भ्रमस्य असतोऽपि संस्कारजनकताया वा प्रसह्य स्वीकारेतु क्वचिद् "इदं शशशृंगम्" "इदं खपुष्पम्" इत्यादिभ्रमोऽपि आपद्येत. किञ्च शुक्तौ रजतस्यैव रज्जौ भुजंगस्यैव भ्रमे विपर्ययाभावे च हेत्वपेक्षायां तत्तत्सादृश्यमेव तत्त्वेन सिध्यति. तच्च भ्रमे साक्षादपि हेतुः नतु संस्कारोद्बोधनमात्रद्वारा. अन्यथा शुक्तिदर्शनकाले बुद्धौ तमःसम्बन्धे 'गजः'इतिशब्दादिना तत्संस्कारस्य उद्बोधेच तत्र गजभ्रमोदुर्वारएव स्यात्. प्रकृतेच जगद्-ब्रह्मणोः सादृश्याभावाद् न भ्रमः

सादृश्येतु ब्रह्मणि साकारत्व-जडत्वाद्यापत्तिः, यो वा द्वयोः साधारणो धर्मः स परस्य निर्विशेषतां बाधेतैव. एवम् अध्यासितुः वास्तवत्वम् इत्याद्यादरे प्रमाणं सर्वत्र भ्रमस्थलेषु तत्तदन्वय-व्यतिरेकदर्शनमेव अतो न तदभावः. प्रामाणिकं गौरवं च न दोषाय अन्यथा घटं प्रति कुलालादीनां बहूनां हेतुत्वं गौरवभयाद् न स्वीकार्यम् एतेनैव एवञ्च जीवस्य उपाधेः इत्यादिकं निरस्तम्. स तत्र प्रयोजकः इति पुंस्त्वन्तु चिन्त्यम्. अत्र अध्यासः सादृश्ये प्रयोजको न विवक्षितः किन्तु तदेव तत्र तथा इति. यच्च संस्कारोद्बोधस्यतु न सादृश्यज्ञानमेव कारणं किन्तु अदृष्टाद्यपि इत्यादि वदतां प्रकृते सादृश्यभावेऽपि अदृष्टादिद्वारा संस्कारोद्बोधाद् भ्रमः इति समाहितं तद् असंगततरम्. रज्ज्वदर्शनकाले दृष्टद्वारा शब्दादिद्वारा वा संस्कारस्य उद्बोधे प्रतिबन्धकाभावेन तत्र हयाकाराभासस्य दुर्निरोधत्वात्. किञ्च जगद्भ्रमसंस्कारोद्बोधकतया उच्यमानम् अदृष्टमपि कल्पितं न वा? आद्ये ब्रह्मणि विचित्रतत्तद्दृष्टसादृश्यस्य द्रष्टरि तत्तत्संस्काराणाम् अदृष्टेतर-तदुद्बोधकस्य च अभावाद् दोषः तदवस्थः. द्वितीयेतु द्वैतापाताद् अपसिद्धान्तः. इतरत्तु सर्वं मूलएव विशदीकृतमिति किम् आम्रेडितेन.

बाधस्य अभावाद् इति. शुक्तौ रजतमिति ज्ञानं ''न इदं रजतं शुक्तिः इयम्'' इति अभ्रान्तवचनश्रवणसमकालमेव निवर्तते प्रकृतेतु **''सर्वं खलु इदं ब्रह्म''**(छान्दो.उप.३।१४।१), **''तत्त्वमसि''**(छान्दो.उप.६।८।७) आदिवाक्यश्रवणेऽपि प्रपञ्चप्रतीतिः न निवर्तते, यदि भ्रमः स्यात् तर्हि पूर्ववद् निवर्तेत. नच अविद्यासत्त्वं यावत् तावत् तदनिवृत्तिः उचिता इति वाच्यं, तस्याअपि कल्पितत्वेन ''अविद्या मृषा'' इति श्रवणमात्रादेव तन्निवृत्तेरपि आवश्यकत्वात्. साधनैरेव तन्निवृत्तौ तान्यपि तत्समानयोगक्षेमाणि. नच जीवन्मुक्तौ प्रपञ्चबाधः शंक्यः तदानीमपि तस्य प्रपञ्चप्रतीतेः उक्तचरश्रुत्यादिभिः बोधनाद् उक्तदिशा तद्दशायाएव तव असिद्धेः च. अतो बाधाभावाद् न भ्रमत्वम्. **''भिद्यते हृदयग्रन्थिः''** (मुण्ड.उप.२।२।८) इत्यादि, इदं मुण्डकवाक्यं **''यदा पश्य''** (मुण्ड.उप.३।१।३) इत्यपि तद्वाक्यम्. **'...आदि'** पदेन **''दृश्यतेतु अग्र्यया बुद्ध्या''** (कठोप.१।३।१२), **''कश्चित्**

धीरः प्रत्यगात्मानम् ऐक्षद् आवृत्तचक्षुः अमृतत्वम् इच्छन्" (कठोप.२।१।१), "**जुष्टं यदा पश्यन्ति अन्यम् ईशं**" (श्वेता.उप.४।७), "**ज्ञानप्रसादेन विशुद्धसत्त्वः ततस्तु तं पश्यते निष्कलं ध्यायमानः**" (मुण्ड.उप.३।१।८) इत्यादीनि कठ-मुण्डकादिवाक्यानि, तलवकारोपनिषत्तृतीयखण्डादिकं, "**नतु मां शक्यसे द्रष्टुम् अनेनैव स्वचक्षुषा दिव्यं ददामि ते चक्षुः पश्य मे योगम् ऐश्वरम्**" (भग.गीता ११।८) "**ज्ञातुं द्रष्टुं च तत्त्वेन**" (भग.गीता ११।५४) "**अपि संराधने प्रत्यक्षानुमानाभ्यां**" (ब्र.सू.३।२।२४), तृतीयस्कन्धे "**पश्यन्ति ते मे रुचिराणि अम्ब! सन्त**" (भाग.पुरा.३।२५।३५) इत्यादिस्मृति-सूत्र-पुराणवाक्यानि च संगृह्यन्ते. नच एषां ज्ञेयतापरत्वमेव नतु चाक्षुषादिपरत्वम् इति वाच्यम्, "**आवृत्तचक्षुः**" (कठोप.२।१।१), "**दिव्यं ददामि ते चक्षुः**" (भग.गीता ११।८) इत्यादिविरोधात् 'ज्ञातुं'-'द्रष्टुम्'इतिपृथङ्निर्देशात् तलवकारादौ स्पष्टं स्पर्शादिः श्रावणात् च. **भ्रमस्य निश्चयरूपत्वाद्** इति एककोटिकज्ञानस्य 'निश्चय'शब्दार्थत्वं, तार्किकपरिभाषाम् आश्रित्य इदम् उक्तम्. तेषां भ्रम-प्रमाभेदेन निश्चयस्य द्वैविध्यात्. अतः "**संशयो अथ विपर्यासः**" (भाग.पुरा.३।२६।३०) इत्यस्य न विरोधः. **नच पूर्व...**इत्यादि संस्काराणामपि कल्पितत्वेन तत्कल्पनहेतुः संस्कारान्तरं ब्रह्मणि तत्तत्सादृश्यं च नैव अस्तीति तत्कल्पनस्य असम्भवे कुतस्तरां ततः प्रपञ्चकल्पना? नापि तादृशसंस्कारपरम्परावशादेव जीवेन ब्रह्मणा वा जगत् कल्पितम् इति बोधिका काचिदपि श्रुतिः अस्ति यद्बलात् तथा आश्रीयेत इति समाधेः अभावः "**न भावो अनुपलब्धेः**" (ब्र.सू.२।२।३०) इत्यादिना सूत्रकृता उपपादितस्य वासनासन्तानपक्षे दूषणभरस्य अत्रापि आपत्त्या तथा अंगीकारे तत्सूत्रविरोधो बाह्यमतप्रवेशः च स्यात्. संस्कारपरम्पराकल्पनानिर्वाहायापि ब्रह्मणि सादृश्यसाकारत्वादेः आपत्त्या च भक्षितेऽपि लशुने न शान्तो व्याधिः इति अलम्.

(१) [साच इयं माया अनादिः "न असद् आसीद् नो सद् आसीत् किन्तु तमः" (ऋक्.संहि.१०।१२९।१) इति श्रुतेः लाघवात् च, अनादि-संसारकारणतासिद्धौ

तस्याः सादितायाः वक्तुम् अशक्यत्वात् च. पूर्व-पूर्व-वासनानाम् उत्तरोत्तराध्यासं प्रति पूर्व-पूर्व-कर्मणाम् उत्तरोत्तरजन्म प्रति च हेतुत्वात्, बालस्य स्तन्यपाने प्रवृत्तिदर्शनेन पूर्वसंस्कारसिद्धौ संस्कारप्रवाहस्य कल्पनीयत्वात् च संसारस्य अनादितासिद्धिः. अतएव “बन्धो अस्य अविद्यया अनादिः” (भाग.पुरा.११।११।४) इति स्मृतिरपि संगता. नच बन्धस्य अनादित्वे ‘अविद्यया’ इति तृतीयानुपपत्तिः इति वाच्यं, “गोपेन गावः” इत्यादिवद् उपपत्तेः. नच तत्र ‘जीवन्ति’इत्यादिपदाध्याहारः इति वाच्यम्, इहापि ‘तिष्ठति’इति अध्याहारस्य सुलभत्वात्. अतएव भागवते तृतीयस्कन्धे “विश्वं वै ब्रह्मतन्मात्रं संस्थितं विष्णुमायया” (भाग.पुरा.३।१०।१२) इत्यत्र ‘संस्थितम्’ इति उक्तम्. सादित्वन्तु बन्धस्य न अङ्गीकर्तुं युक्तम्, अस्यां स्मृतौ ‘अनादि’शब्दार्थस्य त्यागे बीजाभावात्. प्रवाहानादौतु “संसारो अनादिः” इत्यादौ नैयायिकादीनां सर्वेषां प्रचुरः प्रयोगः इति तत्र ‘अनादि’शब्दस्य शक्तिरेव निरूढलक्षणा वा. देवेषुतु ‘अमर’शब्दस्य रूढिरेव, योगासम्भवे तस्याः सर्वसम्मतत्वात्. तस्य देवेषु औपचारिकत्वेऽपि यथा तत्र “तद् यथेह कर्मचितो लोके” (छान्दो.उप.८।१।६) इत्यादिश्रुतिः अनुग्राहिका अस्ति तथा अत्र किञ्चिद् अनुग्राहकं न उपलभ्यतेइति न इह ‘अमर’शब्दवद् उपचरितार्थता. प्रत्युत तथात्वे “धाता यथापूर्वम् अकल्पयद्” (ऋक्.संहि.१०।१९०।३) इति श्रुतेः, “ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः शर्वर्यन्ते प्रसूतानां तान्येव एभ्योः ददाति अजः” (द्र.ब्र.सू.शां.भा.१।३।३०) इत्यादिस्मृतीनां “समान-नाम-रूपत्वात् च आवृत्तावपि अविरोधो दर्शनात् स्मृतेश्च” (ब्र.सू.१।३।३०) इति

सूत्रस्यच विरोधः स्यात्. सूत्रार्थादिकन्तु उत्तरभागे एकोनचत्वारिंशखण्डखण्डने स्फुटीभविष्यति. बन्धस्य सादित्वे अकृताभ्यागमादिदोषप्रसङ्गश्च स्यात्. तथाच ‘‘यथा पूर्वं विनाकारणान्तरम् ईश्वरो मां संसारान्धकूपे अक्षिपत् तथा पुनरपि क्षेप्स्यति’’ इति विचारयन् न कोऽपि प्रेक्षावान् मोक्षार्थं यतेतेति मोक्षमार्गएव उच्छिद्येत. संसारानादित्वबोधकवाक्येष्विव ‘‘न स पुनरावर्तते’’ (निरा.उप.१५।६) ‘‘यद् गत्वा न निवर्तन्ते’’ (भग.गीता १५।६) ‘‘अनावृत्तिः शब्दाद्’’ (ब्र.सू.४।४।२२) इत्यादिष्वपि कुतर्कप्रवृत्तेः अप्रतिबन्धात्. प्रत्युत मोक्षस्य नाशे जन्यस्य नाशः इति नियमो अनुकूलः स्यात् लयरूपस्य तस्य उत्पन्नत्वाद् इति अलम्]

(२) ननु अविद्यायाः अनादित्वाद् अध्यासोऽपि अनादिरेव. अविद्यायाः अनादित्वञ्च ‘‘न असद् आसीद् नो सद् आसीत् किन्तु तमः’’ (ऋक्.संहि.१०।१२९।१) इतिश्रुतिसिद्धं लाघवाद् अनादिसंसारकारणसिद्धौ अन्यकल्पनायायोगाद् इति चेद्, न; मायायाः अनादित्वे ‘‘सदेव सोम्य इदम् अग्र आसीद् एकमेव अद्वितीयम्’’ (छान्दो.उप.६।२।२) ‘‘आत्मा वा इदम् एकएव अग्र आसीद् न अन्यत् किञ्चन मिषद्’’ (ऐत.उप.१।१) इत्यादिश्रुतिविरोधः. ‘‘न असद् आसीद्’’ इत्यादिश्रुतेश्च स्थूल-सूक्ष्माभावबोधकत्वं नतु अविद्याबोधकत्वम्. नच श्रुत्यन्तर्गत ‘तमः’शब्देन अविद्या प्रतीयते इति वाच्यं, ‘तमः’शब्दस्यापि अभावबोधकत्वात् प्रकृष्टमहत्त्वोद्भूतानभिभूतरूपवत् तेजोभावएव ‘तमः’शब्दो लोके प्रसिद्धो नतु अविद्यायामपि. वस्तुतो अत्र ब्रह्मैव तमः. एतेन पूर्व-पूर्व-वासनानाम् उत्तरोत्तराध्यासं प्रति हेतुत्वोक्तिः प्रत्युक्ता, अध्यासस्य अनादित्वे मानाभावात्. बालस्यापि

स्तन्यपाने प्रवृत्तिः न अनादिकर्मप्रवाहजन्या किन्तु ‘‘परात्तु तच्छ्रुतेः’’ (ब्र.सू.२।३।४१) इति सूत्रानुसारेण ईश्वराधीनैव. यथा जडस्य कर्मणः फलदातृत्वं न; तथैव, प्रवर्त्तकत्वमपि न सम्भवति. प्रवर्तना हि प्रेरणा साच चेतनधर्मएव नतु जडधर्मः.

एवञ्च बालस्य स्तन्यपाने प्रवृत्तिदर्शनेन पूर्वसंस्कारसिद्धौ संस्कारप्रवाहस्य कल्पनीयत्वात् च संसारस्य अनादितासिद्धिः इति असंगतम्. संस्कारस्य स्मृतिं प्रति हेतुत्वेन प्रवृत्तौ संस्कारस्य कर्मणो वा हेतुत्वविवक्षणे च पूर्वोक्तएव दोषः. किञ्च प्रवृत्तिं प्रति न संस्कारस्य नापि कर्मणो वा हेतुत्वं वैदिकानां मते ईश्वरस्य, नैयायिकानां मतेतु चिकीर्षादीनामेव, हेतुत्वात्. उक्तञ्च तैः ‘‘चिकीर्षाकृतिसाध्या इष्टसाधनत्वमतिः’’ तथा ‘‘उपादानस्यच अध्यक्षं प्रवृत्तौ जनकं भवेत्’’ (न्या.सि.मु.१५०-१५१). तथाच अविद्यायाः अनादित्वासिद्धौ ‘‘बन्धो अस्य अविद्यया अनादिः’’ (भाग.पुरा.११।११।४) इति स्मृतिरपि बन्धस्य चिरन्तनत्वं बोधयति ‘‘अक्षय्यं हवै सुकृतं चातुर्मास्ययाजिनो भवति’’ (शतप.ब्रा.२।६।३।१) इति श्रुतिवत्. किञ्च भवन्मते ‘अविद्यया’ इति तृतीया हेतौ करणे वा? न आद्यः, ‘‘दण्डेन घट’’ इत्यत्र यथा दण्डे घटोत्पादकत्वरूपं हेतुत्वं तथा अत्रापि चेद् बन्धस्य अनादित्व कथनं व्याहतम् उत्पत्तिमतो अनादित्वासम्भवात्. द्वितीयोऽपि न, क्रियाभावात् कारकविभक्तीनां क्रियान्वयित्वनियमात्, ‘‘नहि क्रियाविनिर्मुक्तं वाक्यम् अस्ति’’ (पातं.महाभा.) इति भाष्यप्रामाण्यात्. ‘‘गोपेन गावः’’इत्यादिवद् उपपत्तेः इति समाधानमपि असङ्गतं तादृशवाक्यस्यैव अभावात्. नच ‘तिष्ठति’ इति अध्याहारोऽपि सम्भवति स्थितेरपि अनादित्वात्

तत्रापि तस्य करणत्वासम्भवात् करणत्वस्य कारणत्वघटितत्वात्. तस्माद् बन्धस्य अनादित्वे ‘अविद्यये’ति तृतीयान्वयो बाधितएव स्याद् अतः तदन्वयानुपपत्तिरूपबीजेन लक्षणा कर्तव्या, साच चिरकालिकत्वेएव. तथाच सादित्वन्तु बन्धस्य न अंगीकर्तुं युक्तम् अस्यां स्मृतौ ‘अनादि’शब्दार्थस्य त्यागे बीजाभावाद्” इति यद् उक्तं तद् असङ्गतं, तत्र अन्वयानुपपत्तिरूपबीजस्य दर्शितत्वात्. प्रवाहानादित्वेन “संसारो अनादिः” इति प्रयोगस्तु ‘संसार’पदस्य प्रवाहे लक्षणाम् ‘अनादि’पदस्यापि स्वसजातीयध्वंसव्याप्यप्रागभावप्रतियोगित्वे लक्षणां विना दुर्घटतया न शक्तिसाधकः. तस्माद् ‘अनादि’शब्दो गौणएव देवेषु ‘अमर’शब्दवत्. ननु देवेषु ‘अमर’पदस्य मुख्यत्वे “तद् यथा इह कर्मचितो लोकः क्षीयते एवमेव अमुत्र पुण्यचितो लोकः क्षीयते” (छान्दो.उप.८।१।६) इत्यादिश्रुतिविरोधात् तस्य औपचारिकत्वम् अस्तु संसारे ‘अनादि’शब्दस्य मुख्यार्थत्वेतु न कश्चिद् विरोधः इति चेद्, न; तत्रापि “आत्मा वा इदम् एकएव अग्र आसीद् न अन्यत् किञ्चन मिषद्” (ऐत.उप.१।१) इत्यादिश्रुतिविरोधस्य सत्त्वात्. नच संसारस्य सादित्वे “धाता यथा पूर्वम् अकल्पयद्” (ऋक्.संहि.१०।१९०।३) इति श्रुतेः “ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः शर्वर्यन्ते प्रसूतानां तान्येव एभ्योः ददाति अजः” (द्र.ब्र.सू.शां.भा.१।३।३०) इत्यादिस्मृतेः च विरोधो दुर्वारः इति वाच्यं, तादृशवाक्यानां ‘शर्वर्य्यन्त’-‘धातृ’पदपर्य्यालोचनया दैनंदिनसृष्टिविषयकत्वेन अनादित्वासाधकत्वात्. नापि “समाननामरूपत्वाद् आवृत्तावपि अविरोधो दर्शनात् स्मृतेश्च” (ब्र.सू.१।३।३०) इति सूत्रविरोधः, सच सृष्टिप्रलयास्वीकारएव सम्भवति. नहि अस्मन्मते सृष्टि-प्रलययोः अस्वीकारः परन्तु प्रथमतः सृष्टिः ईश्वरस्य रमणेच्छयैव “लोकवत्तु लीलाकैवल्यम्” (ब्र.सू.२।१।३३)

इति न्यायात् सृष्टिप्रलयौतु आविर्भावतिरोभावरूपौ. सूत्रार्थस्तु : ननु अस्य प्रपञ्चस्य अनुकारित्वेन वाच्यत्वेन वा स्वीक्रियमाणत्वे सृष्टिप्रलययोः विद्यमानत्वाद् अनित्यसंयोगः प्राप्नोति तत्र आह “समान-नाम-रूपत्वाद् आवृत्तावपि” इति. आवृत्तावपि समुद्रे जलप्रक्षेपवत् पुनः उपादाने तदेव इति निश्चयाभावेऽपि नाम-रूपयोः तुल्यत्वाद् अन्यस्य भेदकस्य अभावाद् न अनित्यसंयोगः कुतः ? दर्शनात् दृश्यतेहि तथा वेदपितृमातृस्त्रीभर्तृशरीरगंगाप्रवाहादिषु तदेवेतिव्यवहारस्य सिद्धत्वाद् इति. नच संसारस्य सादित्वे कृतनाशाकृताभ्यागमादिदोषः इति वाच्यम्; ईश्वरेच्छया ईश्वरसकाशाद् व्युच्चरितैः जीवैः कर्माणि क्रियन्ते तत्तत्कर्मफलमपि ईश्वरकृत-मर्यादया तस्य तस्य जीवस्य भवत्येवेति दोषाभावः. नहि जीवानाम् अनित्यत्वं येन कृतनाशः स्यात्. नहि कर्मणैव फलं किन्तु ईश्वरेच्छयापि न अतो अकृताभ्यागमः फलाकस्मिकत्वपर्य्यायः. यस्तु तथाच इत्यादिना प्रेक्षावतो मोक्षार्थं प्रवृत्त्यभावापादनरूपो मोक्षमार्गोच्छेदरूपश्च दोषः आपादितः सोऽपि त्वन्मतएव सम्भवति. सर्वं स्वप्नतुल्यं स्वस्वरूपमपि स्वप्नकल्पितजीवसमं जानतो मोक्षं मोक्षसाधनं गुरुं वेदं च मिथ्यात्वेन जानतो, वामदेव-शुकादीनामपि मुक्तिः न जातेति मम मुक्तिः कुतो भविष्यतीति मुक्तिप्रत्याशाशून्यस्य कथं मोक्षमार्गे प्रवृत्तिरिति मुक्तिमार्गोच्छेदः त्वन्मते. अस्मन्मतेच यस्य बन्धनसामर्थ्यं तस्यैव मोचनसामर्थ्यं दृष्टञ्च राजनि, यथा राज्ञा बद्धो राजानमेव आश्रयते राजकृपया मुच्यतेच एवमेव ईश्वरकृपया मुच्यते पुनश्च सुखी भवति “सो अश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता” (तैत्ति.उप.२।१) इति श्रुतेरिति न मुक्तिमार्गोच्छेदः. किञ्च संसारस्य अनादित्वे त्वन्मते तस्य मिथ्यात्वं न स्यात् त्रैकालिकनिषेधप्रतियोगित्वाभावात्, “आदावन्ते च यद् नास्ति

वर्तमानेऽपि तत् तथा वितथैः सदृशाहि एते वितथाइव लक्षिता" (गौड.का.वैत.२।६) इति गौडपादकारिकाविरोधः च. किञ्च त्वन्मते "यद् गत्वा न निवर्तन्ते तद्धाम परमं मम" (भग.गीता १५।६) इति स्मृतेः "अनावृत्तिःशब्दाद्" (ब्र.सू.४-।४।२२) इति सूत्रस्य च विरोधः स्यात् जीवस्य पारमार्थिकं स्वरूपं ब्रह्मैवेति तस्य गमनासम्भवात् तस्य व्यापकत्वाद् व्यावहारिकन्तु औपाधिकं तस्य च उपाधिनाशेन नाशात् प्राप्तिरेव न सम्भवति. प्राप्तेः असम्भवेन निवृत्तिशंकायाः असम्भवाद् असंगतिः. एवं सूत्रेऽपि सन्देहासम्भवाद् इति अलम्.

(३) सहस्राक्षे साच इयं माया इत्यादि उत्पन्नत्वाद् इति अलम् इत्यन्तं भागं खण्डयन्ति **ननु अविद्याया** इत्यादिना **सन्देहासम्भवाद् इति अलम्** इत्यन्तेन. अयम् आशयः : यदि मायाऽपि ब्रह्मवद् अनादिः स्यात् तदा ऐतरेयोपनिषदि "**आत्मा वा इदम् एकएव अग्र आसीद् न अन्यत् किञ्चन मिषत्**" (ऐत.उप.१।१), तैत्तिरीये "**न असद् आसीद् नो सद् आसीद्** " (तैत्ति.ब्रा.२।८।९।३) इत्यादि तथा "**ब्रह्म वनं ब्रह्म स वृक्ष आसीत्**" (तैत्ति.ब्रा.२।८।९।६) इत्यादि. पुरुषविधब्राह्मणे "**आत्मैव इदम् अग्र आसीत् पुरुषविधः सो अनुवीक्ष्य न अन्यद् आत्मनो अपश्यत्**" (बृह.उप.१।४।१), छान्दोग्ये "**सदेव सोम्य इदम् अग्र आसीद् एकमेव अद्वितीयं**"(छान्दो.उप.६।२।२), गोपथब्राह्मणे "**ब्रह्म ह वा इदम् अग्र आसीत् स्वयंभु एकमेव तद् ऐक्षत महद् वा यक्षं तद् एकमेव अस्मि हन्त अहं मदेव मन्मात्रं द्वितीयं देवं निर्ममे इति**" (गोपथब्रा.१।१।१) एवमाद्या ऋग्यजुःसामाथर्वश्रुतयोः बाध्येरन्. तासुहि सृष्टेः प्राक् ब्रह्मणएव सत्ता अवधार्यते वस्त्वन्तरसत्ता च निषिध्यते. यदिच भावरूपा माया तदा स्यात् तर्हि सर्वज्ञोऽपि आत्मा अनुवीक्ष्यापि तां कुतो न पश्येत्. "**एकमेव अद्वितीयम्**" (छान्दो.उप.६।२।१) इति त्रिविधभेदनिषेधश्च कथं संगच्छेत. कथञ्च "**एकमेव अस्मि हन्त अहं मदेव मन्मात्रम्**"

(गोपथब्रा.१।१।१) इति सर्वज्ञस्य ईक्षणं च घटेत. एतेन ऐतरेये मिषतो निषेधाद् अचेतनस्य अन्यस्य स्थितिः न विरुद्धा इति द्वैतिनां कल्पनापि अपास्ता. वस्त्वन्तरसत्त्वे पुरुषविधब्राह्मणादौ स्वान्याभावाद् भयाभावो रमणाभावो रमणार्थं द्वितीयेच्छा तस्यैव एतावद्रूपेण भवनं च आम्नायमानं तदानीं वस्त्वन्तरसत्त्वे जगतः तदुपादानकत्वे च विरुध्येतैव. तेन यश्च **“न असद् आसीद् नो सद् आसीत् किन्तु तमः”** इति विलक्षणएव श्रुतिपाठउपन्यस्तः. सच उपहासार्थं मूले पूर्वपक्षे तथैव संगृहीतः. वस्तुतस्तु **“न असद् आसीद्”** इतिमन्त्रद्वयार्थः प्रागेव समर्थितः. तत्रच **“किम् आवरीवः कुहकस्य शर्मन्”** इति आवरणशक्तिकमायादेः तदा सत्ता स्पष्टमेव प्रतिषिद्धा. स्वधयेति स्वेनैव जगतो धारणं तस्य एकत्वं च उक्त्वा **“तस्माद्धा अन्यं न परः किञ्चन आस”** (ऋक्.संहि.१०।१२९।२) इति स्पष्टमेव तदन्यस्य प्रतिषेधो दर्शितः. अतः **“तमः आसीत् तमसा गूढम् अग्रे प्रकेतं सलिलं सर्वमा इदं तुच्छेन आभ्वपिहितं यद् आसीत् तमसः तद् महिना अजायत एकम्”** (ऋक्.संहि.१०।१२९।३) इति अग्रिममन्त्रेऽपि ‘तमः’शब्देन न सा पूर्वमेव प्रतिषिद्धत्त्वाद् अन्यप्रतिषेधविरोधात् च. किन्तु **“आनीद् अवातम्”** इत्यादिना ‘तच्छ’ब्देन यद् उक्तं तत्स्वरूपमेव अत्र उच्यते. तत्र पूर्वं रात्रिदिवसप्रकेतसूर्यनक्षत्रादिनिषेधात् सर्वस्य सुप्तवत् तत्रैव लीनत्वात् सर्वाच्छादकत्वाद् च इह ‘तमः’शब्देन ब्रह्मैव. इदञ्च द्वितीयस्कन्धनवमाध्याये **“अहमेव आसमेव अग्र”** (भाग.पुरा.२।९।३२) इत्यत्र सुबोधिन्यां स्फुटम्. ‘तमः’शब्दस्य सांख्यपरिभाषया वस्त्वन्तरपरत्वे **“इतरेषाञ्च अनुपलब्धेः”** (ब्र.सू.२।१।२) इति सूत्रं विरुध्येत. तथाच तदा तमः सर्वाच्छादकं ब्रह्मैव आसीत् आसमंतात् इदम् इदानीं नामरूपाभ्यां व्याकृतं जगद् अग्रे सृष्टेः पूर्वं अप्रकेतम् अप्रज्ञायमानं सलिलं कारणेन अविभक्तं तमसा पूर्वोक्तरूपेण ब्रह्मणा गूढम् आच्छादितं तिरोभावितम् इति यावद् आसीद् इति अर्थः. **“यथा तमः पदार्थान् आवृणोतीति एवम् इदमपि ब्रह्म तत्त्वम् आवृणोतीति ‘तमः’शब्देन व्यवहारः”** (ऋक्.संहि.सा.भा.) इति विद्यारण्यस्वामिना व्याख्यानेऽपि लक्षणयैव मायापरत्वं दर्शितम्. मम तु ब्रह्मणः ‘सर्व’शब्दवाच्यत्वाद् न लक्षणापीति पूर्वापरानुरोधाद् इदमेव आदरणीयम्.

ननु पूर्वं जगतो अभावे ब्रह्मणा तस्य गहनं कथं संगच्छत इति चेत्; पूर्वसृष्टिप्रलये तोदनेन सर्वं तिरोभावितम् इति आशयेन आह **तुच्छेन** इत्यादि. अत्र ‘तुच्छ’शब्देन प्रलयकर्तृ ब्रह्म. अतएव महोपनिषदि “**एषह्येव शून्यः एषह्येव तुच्छ एषः ह्येव अभाव एषह्येव अव्यक्तो अदृश्यो अचिन्त्यो निर्गुणश्च इति**” ( ) इति. महाकौर्मेऽपि “**शमूनं कुरुते विष्णुः अदृश्यः सन् परः स्वयं तस्मात् ‘शून्यम्’इतिप्रोक्तः तोदनात् ‘तुच्छम्’ उच्यते. नैषः भावयितुं योग्यः केनचित् पुरुषोत्तमः अतो ‘अभावं’ वदन्ति एनं नाश्यत्वात् ‘नाशः’ इत्यपि. सर्वेषां तदधीनत्वात् ‘तच्छ’ब्दा अभिधेयता अन्येषां व्यवहारार्थम् इष्यते व्यवहर्तुभिः**” ( ) इति. तथाच आसमंताद् भवति उत्पद्यते इति ‘**आभु**’ जगत् **तुच्छेन** प्रलयरूपतोदनकृता पूर्वोक्ततमसा पिहितम् आच्छादितं तिरोभावितं यद् आसीत् तत् तमसः पूर्वोक्तान् ब्रह्मणः सकाशादेव महिना महत्त्वेन पटवद् विस्तारेण अजायत प्रादुरभवत्. तच्च नाना दृश्यमानमपि वस्तुतो ब्रह्मणएव तत्तद्रूपत्वाद् एकत्वम् इति अर्थः. यत्तु तत्त्वज्ञाननिवर्त्यत्वात् ‘तुच्छ’शब्देन माया इति तद्व्याख्यानं तद् न; शुक्तिरजतवत् तुच्छेन आच्छादनस्य अयोगात्, तादृशरजते भाजनभूषणादेरिव तस्यां जगतः उपादानत्वस्य असम्भवेन ततो जननस्य अयोगात्, व्याख्याने मृद्घट-बीजवृक्ष-दृष्टान्तकथनपूर्वकं स्वयम् उक्तस्य सत्कार्यवादस्य बाधात् च. किञ्च सापि उपहितेन कल्पिता शुद्धेन वा? आद्ये अन्योन्याश्रयो, द्वितीये शुद्धत्वबाधः इत्याद्युक्तवक्ष्यमाणदूषणग्रस्तत्वात् न तस्याः तुच्छत्वं शक्यवचनम् अग्रेऽपि “**कामः तदग्रे समवर्तताधि**” (ऋक्.संहि.१०।१२९।४ / तैत्ति.ब्रा.२।८।९।६) इत्यादिना इच्छापूर्वकसर्गादिकथनात् ‘तमः’शब्दार्थो ब्रह्मैव. अन्यथातु ईक्षत्याद्यधिकरणानां “**कामाच्च न अनुमानापेक्षा**” (ब्र.सू.१।१।१७) इत्यादिगुणसूत्राणां च विरोधः. पुनः अग्रेऽपि “**कि स्विद् वनं कउ स वृक्ष आसीत् यतो द्यावा-पृथिवी निष्टतक्षुः मनीषिणो मनसा पृच्छतेदु तत् यदध्यतिष्ठद् भुवनानि धारयन्**” (ऋक्.संहि.१०।८१।४ / तैत्ति.ब्रा.१।८।९।३) “**ब्रह्म वनं ब्रह्म स वृक्ष आसीत् यतो द्यावापृथिवी निष्टतक्षुः मनीषिणो मनसा विब्रवीमिवः ब्रह्माध्यतिष्ठद् भुवनानि धारयन्**” (तैत्ति.ब्रा.२।८।९।६) इति पठ्यते. अत्र यथा काष्ठोपादानकं

जुहूस्रुवादिकं बहुवृक्षसमुदायरूप वनस्य एकदेशवृक्षस्य अंशभूतं तत्रैव स्थितं लक्षणात् ततएव अभिव्यज्यते तथा इदं जगदपि विभागादेव आविर्भूतं वनसमपुरुषोत्तमैकांशस्य अक्षरब्रह्मणो अंशभूतं तत्रैव स्थितं तदिच्छया अभिव्यज्यते इति ज्ञापनाय सृष्टिहेतुभूतवनादिकं जगतो अधिष्ठातारं धारयितारं च पृष्ट्वा ब्रह्मणएव वनत्वं वृक्षत्वं धारणपूर्वकम् अधिष्ठातृत्वं च उत्तरितम्. यदि ‘तमः’शब्देन ब्रह्म न अभिप्रैष्यत् किन्तु मूलाज्ञानएव मृद्घट-बीजवृक्षादिन्यायेन जगदवस्थानम् अभिप्रैष्यत् तदा “**ब्रह्म वनम्**” इत्यादि नैव अवक्ष्यत् किन्तु “माया वनं तमो वनं तमः स वृक्ष आसीद्” इत्याद्येव अवदिष्यत्. तस्मादपि तमो अत्र ब्रह्मैव. एतेनैव “**आसीद् इदं तमोभूतम् अप्रज्ञातम् अलक्षणम् अप्रतर्क्यम् अविज्ञेयं प्रसुप्तमिव सर्वतः**” (मनुस्मृ.१।५) इति मनुवचनमपि व्याख्यातम् अग्रे अनुपदं “**ततः स्वयंभूः भगवान् अव्यक्तो व्यंजयन् इदं महाभूतादिवृत्तौजाः प्रादुरासीत् तमोनुदः. यो असौ अतीन्द्रियग्राह्यः सूक्ष्मो अव्यक्तः सनातनः सर्वभूतमयो अचिन्त्यः सएव स्वयम् उद्बभौ. सो अभिध्याय शरीरात् स्वात् सिसृक्षुः विविधाः प्रजाः**” (मनुस्मृ.१।६-८) इति तस्यैव पूर्वम् अव्यक्तत्वस्य सूक्ष्मकारणत्वस्य सर्वव्यंजकत्वस्य सर्वभूतात्मकत्वस्य स्वयमेव जगद्रूपेण भवनस्य अभिध्यानपूर्वकं स्वरूपतएव विविधप्रजासर्जनस्य च कथनेन तत्रापि तथैव ‘तमः’शब्दार्थस्य प्रतीतेः. अन्यथा “**आत्मैव इदं**”, “**सदेव सोम्य इदम्**” इत्यादिश्रुतिशतविरोधाद् अप्रमाणं स्यात्. पूर्वतन्त्रे “**विरोधेतु अनपेक्ष्यम्**” (जै.मी.सू.१।३।३) इति न्यायात्. ‘**तमोनुद**’इतितु “**स्वतेजसा यो नु पुरा अपिबत् तमः**” (भाग.पुरा.७।८।२५) इति सप्तमस्कन्धाद्युक्तं प्रलयान्धकारापनोदनमेव. नच अयं स्वयंभूः ब्रह्मा शंक्यः, अग्रे अण्डोत्पत्त्यनन्तरं “**तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः**” (मनुस्मृ.१।९) इति पृथक्कथनात्. जीवकल्पितस्य तुच्छस्यतु ब्रह्मणा प्रेरणमपि अशक्यवचनम्. एतदेव अभिप्रेत्य समाकर्षसूत्रे “**तमः आसीद्**” इति अनभिव्यक्तं कर्मपक्षेऽपि ब्रह्मत्वम् अक्षतं तत्पक्षस्य गौणत्वज्ञापनाय तत्र प्रकाशे “**कर्मापि उच्यते**” इति ‘**अपि**’शब्दः प्रयुक्तः. एवमेव सुबोधिनीतत्प्रकाशाभ्याम् ऐकार्थ्यं पूर्वोक्तानादरे ‘तमः’शब्दस्य अन्धकारएव प्रसिद्धत्वात् लौकिकतर्कादिदर्शनेषु तस्य तेजोभावरूपत्वांगीकारात्

केवललोकानुरोधे तादृगभावएव तदा रात्रिदिनचिह्नसूर्यचंद्रादिविरहात् सिध्येद् नतु त्वदभीष्टम् इति आशयेन वक्रोत्तरम् उक्तं मूले **अभावबोधकत्वाद्** इत्यादि. अतएव **लोक...** इति उक्तम्. सिद्धान्तस्तु प्रागुक्तएव तमेव आहुः **वस्तुतो अत्र ब्रह्मैव तमः** इति. यच्च लाघवाच्च अनादिसंसारकारणता इत्यादि तदसम्बद्धं संसारस्य कार्यत्वे अनादित्वायोगात् कार्यनियतपूर्ववृत्तेरेव कारणत्वात्. अविद्योत्तरकालिकतया तत्कार्ये तस्मिन् चिरन्तनत्वमेव अनादित्वम् इति चेत् सिद्धम् अस्मदभीष्टम्. नापि लाघवं श्रुतिषु अवश्यक्लृप्तायाः ईश्वरेच्छायाएव सर्वकारणत्वे सम्भवति अविद्यारूपकारणान्तरस्वीकारे गौरवात्. तस्याः सादित्वन्तु "**मायया मे विनिर्मिते**" (भाग.पुरा.११।११।३) इति वचनबलात् शक्यमेव वक्तुम् इति वक्ष्यते.

यच्च पूर्वपूर्ववासनानाम् उत्तरोत्तराध्यासं प्रति पूर्वपूर्वकर्मणाम् उत्तरोत्तरजन्म प्रति च हेतुत्वात्, बालस्य स्तन्यपाने प्रवृत्तिदर्शनेन पूर्वसंस्कारसिद्धौ संस्कारप्रवाहस्य कल्पनीयत्वात् च संसारस्य अनादितासिद्धिः इति उक्तं तदपि असत्, अध्यासरूपतया शुक्तौ रजतस्येव अर्थानाम् अभावे वासनानामेव असिद्ध्या ताभिः अध्यासस्य असम्भवात्. अतएव सूत्रकारः "**न भावो अनुपलब्धेः**" (ब्र.सू.२।२।३०) इति आह. अत्र शंकराचार्याः "**न भावो वासनानाम् उपपद्यते त्वत्पक्षे अनुपलब्धेः बाह्यानाम् अर्थानाम्. अर्थोपलब्धिनिमित्ताहि प्रत्यर्थं नानारूपाः वासनाः भवन्ति**" (ब्र.सू.शां.भा.२।२।३०) इत्यादि व्याचक्षते. तत्र नानार्थाभावे वासनानां वैचित्र्याभावः. अनादित्वेऽपि अन्धपरम्परावद् अनवस्था. वासनाभिः विनाऽपि अर्थोपलब्धिः अर्थं विना वासनानुत्पत्तिरिति अन्वयव्यतिरेकौ अर्थसद्भावमेव प्रतिष्ठापयतः. किञ्च वासनाहि संस्कारविशेषा न निराश्रया अवतिष्ठन्ते नच शुद्धं ब्रह्म तदाश्रयः शुद्धत्वात्. नापि उपहितं घटादेरिव उपाधेरपि कल्पनं वासनयैव वक्तव्यम् इति तस्याः तदाश्रयत्वे अन्योन्याश्रयाद् इत्यादि भावत्कभाष्यकारोक्तदिशैव द्रष्टव्यम्. एवं तत्रैव पूर्वं वैनाशिकमतेषु उक्तानि दूषणान्तराणि अनुसन्धेयानि. नापि पूर्वपूर्वकर्मणामेव उत्तरोत्तरजन्म प्रति स्वातन्त्र्येण हेतुत्वम्. "**एष ह्येव**" (कौषी.उप.३।९), "**मत्तः सर्वं**

प्रवर्तते’’ (भग.गीता १०।८), ‘‘**भवन्ति भावा भूतानां मत्तएव पृथग्विधाः** (भग.गीता १०।५) ‘‘**परात्तु तच्छ्रुतेः**’’ (ब्र.सू.२।३।४१) ‘‘**पूर्वन्तु बादरायणो हेतुव्यपदेशाद्**’’ (ब्र.सू.३।२।४१) इत्यादिश्रुतिस्मृतिन्यायशतैः कर्माण्यपि प्रति उत्तरजन्मादिरूपतत्फलानि प्रति च तत्तदिच्छाविशिष्टब्रह्मणएव हेतुताया बोधनात्. अतएव कर्मणां तदिच्छयैव जन्मादिकरत्वं स्मर्यते ‘‘**कर्मभिः भ्राम्यमाणानां यत्र क्वापि ईश्वरेच्छया**’’ (भाग.पुरा.१०।४४।६७) इत्यादिषु. किञ्च इदमपि हेतुत्वं सृष्ट्युत्तरमेव इति प्रपञ्चितं प्राक्.

बालस्य स्तन्यपाने प्रवृत्तिः संस्काराद् इत्यपि सृष्ट्युत्तरमेव नतु पूर्वसृष्टिसंस्कारात्. अतएव चतुर्मुखस्य मरीचि-सनकादितत्पुत्राणां च सृष्ट्यारम्भो न स्तन्यपाने प्रवृत्तिः. किञ्च सृष्ट्युत्तरमपि भगवदिच्छयैव तादृशसंस्कारोद्बोधात् प्रवृत्तिः. अन्यथा कायिकपापविपुल स्थावरजन्मसु कूर्मादिचरजन्मसु च स्तन्यपानाभावात् संस्कारनाशे अनन्तरं मनुष्यादिजन्मस्वपि तद् न स्यात्. किञ्च संस्कारप्रवाहम् अनादिं ततः संसारं च अनादिं वदन् पूर्वमीमांसकैकदेशिमतमेव प्रविश, अलम् अध्यासादिकल्पनागौरवेण. तन्मतखण्डनयुक्तिभिस्तु इदमपि खण्ड्येत. संस्कारप्रवाहश्च कस्य इति निश्चेयम्. संसारानादित्वे ‘‘**सदेव...**’’इत्यादि व्याकोपः सृष्टिप्रलयाभावात् तद्बोधकश्रुतिव्याकोपः प्रयोजनाभावाद् निरीश्वरत्वापत्तिः च इत्यादि ध्येयम्. तदेतद् अनुसन्धाय आहुः **एतेन** इत्यादि, **उक्तञ्च तैः** इति इयं कारिका विश्वनाथपञ्चाननस्य कारिकावलौ गुणव्यवस्थायाम् अस्ति. ‘‘**इदं कृतिसाध्यम् इष्टसाधनञ्च इति ज्ञानं तथामतिः/कृतिसाध्येष्टसाधनत्वमतिः तथा**’’ (न्या.सि.मु.का.१५०). ‘**च**’कारो दण्डादिनिमित्तसमुच्चायकः. **अध्यक्षं** प्रत्यक्षम्. यदपि अतएव ‘‘बन्धो अस्य अविद्यया अनादिः’’ (भाग.पुरा.११।११।४) इति स्मृतिरपि संगता इत्युक्तं तदपि पूर्वापरानवलोकनात्. यत्रहि एकादशस्कन्धे एकादशाध्याये इदम् अस्ति तत्र ‘‘**विद्याविद्ये मम तनू विद्धि उद्धव! शरीरिणां बन्ध-मोक्षकरी आद्ये मायया मे विनिर्मिते**’’ (भाग.पुरा.११।११।३) इति विद्याविद्ययोः स्वशक्त्या विनिर्मितत्वम्, आदौ भवत्वं, बन्धादेः तत्कृतत्वेन स्पष्टमेव सादित्वं च

उक्त्वा उभयोः उभयकारणत्वं जडान्तर्यामिणोः बन्धादिकं च निराकर्तुम् उच्यते “**एकस्यैव ममांशस्य जीवस्यैव महामते! बन्धो अस्य अविद्यया अनादिः विद्ययाच तथेतर**” (भाग.पुरा.११।११।४) इति एवञ्च सति अत्र ‘अनादि’शब्दो “अनादिः अयम् अस्माकं विवाहे वेणुपात्रोपवेशनव्यवहारः” इत्यादिवत् चिरन्तनार्थकएव तदेतद् आहुः **तथाच** इत्यादिना. **अक्षय्यम्** इति, आत्मसुखातिरिक्तफलपरत्वपक्षं पराभिमतम् अनुरुध्य इदम् उक्तम्. **हेतौ करणे वा?** (द्र.पाणि.सू.सि.कौ.२।३।२३) इति, हेतुत्वं च कारणत्वं तच्च कार्यनियतपूर्ववृत्तित्वं तथाच बन्धस्य सादित्वम् अयत्नलब्धम्. हेतौ द्रव्यादिसाधारणत्वं निर्व्यापारसाधारणत्वं च करणाद् भेदकम् अंगीकृत्य क्रमेण तदुभयप्रदर्शनार्थ प्राचां “दण्डेन घटः” “पुण्येन दृष्टो हरिः” इत्यादि उदाहरणेषु दण्ड-पुण्यादीनां घटदर्शनादितः प्राक्कालिकत्वम् अस्त्येव. तथा अत्र बन्धस्य अक्रियात्वे क्रियात्वे वा आद्रियमाणेऽपि तस्याः ततः प्राक्तनत्वं स्यादेव. करणत्वपक्षेऽपि कारणत्वानपायात् “**क्रियायाः फलनिष्पत्तिः यद् व्यापाराद् अनन्तरं विवक्ष्यते यदा तत्र तदा यत्र करणं तत् तदा स्मृतम्**” (वाक्पदीय.३।७।९०) इति हर्युक्तेः “बाणेन हतः” इत्यादौ प्राणत्यागादेः बाणादिव्यापारोत्तरकालिकत्ववद् उत्तरकालिकत्वस्य अनपायात् सादित्वम्. इतरत्तु मूले विशदतया निराकृतम्. “**विश्वंवै**” (भाग.पुरा.३।१०।१२) इति तृतीयस्कन्धवाक्यन्तु विश्वं ब्रह्माभिन्नमेव तच्छक्त्या तत्रैव सम्यक्स्थितं ब्रह्मरूपत्वादेव प्रलयेऽपि अबाधितं सत्यम् इत्यर्थकं “**यथा इदानीं तथाच अग्रे पश्चादपि एतद् ईदृशम्**” (भाग.पुरा.३।१०।१३) इति पुरतः कथनात्. ‘अमर’शब्दस्य औपचारिकत्वे “**यथेह कर्मचित**” इति मुण्डकादिवाक्यवत् “**आत्मा वा इदं**” “**सदेव**” इत्यादिकम् अत्र अनुग्राहकम्. किञ्च गीतायां “**सर्वस्यच अहं हृदि सन्निविष्टो मत्तः स्मृतिः ज्ञानम् अपोहनञ्च**” (भग.गीता १५।१५) इति ज्ञानापोहनरूपस्य बन्धस्य स्वहेतुकत्वं सादित्वं च दर्शितम्. “**सर्वभूतानि संमोहं सर्गे यान्ति परंतप!**” (भग.गीता ७।२७) इत्यादौ सर्गकालिकत्वञ्च स्फुटम् उक्तम्. अतएव सूत्रकारोऽपि “**पराभिध्यानात्तु तिरोहितं ततो हि अस्य बन्ध-विपर्ययौ**” (ब्र.सू.३।२।५) इति पराभिध्याननिदानकमेव बन्धम् आह उत्तरसूत्रे देहयोगहेतुकं वा, नतु अविद्यामात्रं

मूलकम् अनादिसान्तम्. अतः एवमादिस्पष्टप्रमाणशतानुरोधादपि तत्रत्य 'अनादि'शब्दः उक्तार्थकएव ज्ञेयः. याच "**धाता यथा**" (ऋक्.संहि.१०।१९०।३/तैत्ति.आर.१०।१।१४) इति श्रुतिः "**ऋषीणाम्**" (द्र.ब्र.सू.शां.भा.१।३।३०) इति स्मृतिश्च उक्ता सातु सृष्ट्युत्तरं ब्रह्मदिनरूपकल्पस्य अन्ते प्रलये तावत्यां तद्रात्रौ व्यतीतायां द्वितीयकल्पादौ पुनःसृष्टिविषयिका 'धातृ'पदस्वारस्यात्. अतएव "**दिवञ्च पृथिवीञ्च अन्तरिक्षम् अथो सुवः**" (ऋक्.संहि.८।८।४८) इति त्रिलोकीसर्गएव उक्तः उक्तकल्पान्ते तन्मात्रलयात्. स्मृतौच अतएव "**शर्वर्यन्ते**" इति उक्तं ब्रह्मदेवपर्यायो 'अज'शब्दः च. महाप्रलयोत्तरमपि ब्रह्माभिन्नं ब्रह्मपरिणामत्वाद् ब्रह्मणि तिरोहितन्तु जगद् नित्यं स्वीक्रियतएव तथा त्वमपि स्वीकुर्याः चेद्, इष्टमेव. अविद्यायाः तत्कृतबन्धस्य च अनादित्वन्तु न इमे श्रुतिस्मृती लेशतोऽपि बोधयतः. सृष्टिप्रलयास्वीकारएवेति अविद्यां तत्कृतसंसारं च अनादिं वदतः तवैव तद्विरोधः सृष्टि-प्रलययोः असम्भवाद् अविद्योपहितेन किञ्चित्कालं सृष्टेः कल्पने प्रलयकाले साविद्यस्यापि तूष्णीम् अवस्थाने च हेतोः अभावात् हेत्वन्तराणामपि कल्पितत्वाविशेषेण तद् अकल्पने हेत्वभावाद् अनवस्थानात् च. नतु ब्रह्मरूपस्यैव अस्य तदिच्छया ततएव पुनः पुनः आविर्भावतिरोभावरूपाम् आवृत्तिं स्वीकुर्वताम् अस्माकं मते तद्विरोधः प्रत्युत शुक्तौ दशकृत्वो रजतभ्रमे तस्यैव रजतस्य मुहुः आवृत्तिः जाता इति अंगीकारस्य केनापि अकृत्वात्. तत्सत्यस्यैव आवृत्तिसम्भवेन आवृत्तिबोधकस्य अस्य सूत्रस्य विवर्तवादबाधककतया तवैव सुतरां तद्विरोधः इति भावः "**लोकवत्तु...**"**इति न्यायाद्** इति. द्वितीयस्य प्रथमे प्रयोजनाभावाद् जगन्निर्माणाभावं भगवतः आशंक्य समाहितं "**लोकवत्तु लीलाकैवल्यं**" (ब्र.सू.२।१।३३) यथा लोके प्रयोजनाभावेऽपि राजादीनां मृगयादिप्रवृत्तयो लीलारूपाः दृश्यन्ते तथा इयमपि ईश्वरस्य. साच प्रयोजनान्तरशून्या मोक्षदा च इति तदर्थः. अधिकन्तु नवमश्लोकखण्डने वक्ष्यते. **अनुकारित्वेन** इति "**शब्दइति चेद् न अतःप्रभवात्**" (ब्र.सू.१।३।२८) इत्यादिसूत्रद्वये वैदिकप्रपञ्चस्य आधिदैविकतया कर्मणि लौकिक-जुहूस्रुवादिषु आविर्भावशालितया च भिन्नत्वं ततएव वेदस्य नित्यत्वं च उक्तम्. तत्र भिन्नत्वपक्षे लौकिकस्रुवादेः वैदिकस्रुवाद्यनुकारित्वेन अस्यैव

ब्रह्मरूपस्य वेदबोध्यत्वांगीकारे वाच्यत्वेन वा इति अर्थः. **अनित्यसंयोगः** इति, प्रतिपादको वेदो नित्यः उक्तरीत्या उभयथापि प्रतिपाद्याः लौकिकाः पदार्थाः अनित्याः तैः वेदस्य संयोगः. **जलप्रक्षेपवद्** इति सप्तम्यर्थे वतिः. अयम् अत्र आशयः : पूर्वसृष्टौ यो ब्रह्मा सएव उत्तरसृष्टौ ब्रह्मा इति न नियमः **“स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चिताम् एति”** (भाग.पुरा.४।१४।२९)इत्यादि तद्भावप्राप्तिबोधक वचोव्याकोपात्. एवम् अवान्तरप्रलयोत्तरमपि ये पूर्वकल्पे इन्द्राः तएव चतुर्दश जीवाः पुनः इन्द्राः भवन्ति इति न नियमः. तेषाम् अश्वमेधशतपूर्वस्य भोगेन उपक्षयात् अन्यस्य तच्छतानुष्ठातुः फलालाभप्रसंगात् च. तेन सृष्टिभेदेन जीवान्तरस्य ब्रह्मेन्द्रादिभावेऽपि नामरूपयोः समानत्वाद् ब्रह्मेन्द्रादिप्रतिपादकवेदवाक्येषु न कोऽपि विरोधः. समुद्रे तज्जलस्य प्रक्षेपोत्तरं पुनरुद्धरणे तस्यैव जलस्य जलान्तरस्य वा आगमनेऽपि “समुद्रजलं भेदश्छेदकम्” इत्यादिवाक्यस्य न विरोधः. ननु एवं सति नित्यत्वं गतम् इति चेद्, न; नहि पूर्वप्रक्षिप्तजलस्य नाशो जलान्तरस्य तदा उत्पत्तिः च तत्र अस्ति. तथा अत्रापि सर्वस्य ब्रह्मात्मकत्वेन सृष्टिभेदे तदिच्छया **“भोक्त्रापत्तेः”** (ब्र.सू.२।१।१३) इति न्यायेन विपर्ययेऽपि न अनित्यत्वं नापि द्वैतम्. यदिच वृक्षपक्षिप्रवेशनिर्गमन्यायेनैव सृष्टिप्रलयौ स्वीक्रियेतां तर्हि वृक्षात् पक्षिणइव ब्रह्मणः पदार्थाः भिन्नाएव वस्तुतः स्युः इति. सूत्रे स्मृतिपदेन **“प्रजा सृज यथा पूर्वं याश्च मयि अनुशेरते”** (भाग.पुरा.३।९।४३) इत्यादिवाक्यानि ऋषीणां पूर्वचरितस्मरणं च गृह्यते इति बोध्यम्. आस्तां च एतत् तथापि न अनेन सूत्रेण बन्धस्य अविद्याया वा अनादित्वं सिध्यति नापि विवर्तभावः.

यच्च बन्धस्य सादित्वे अकृताभ्यागमादिदोषप्रसंगश्च स्याद् इत्यादि उक्तं तत्र आहुः **नच संसारस्य सादित्वे** इत्यादि. **त्वन्मते** इत्यादि, “शुद्धमपि माम् अकारणादेव अनादिः अविद्या या बद्धवती सा अग्रेऽपि कुतो न बध्नीयात्? बन्धनस्वभावत्वात्, जीवान्तराणां बद्धत्वेन सर्वथा तन्नाशस्य अभावात्, मुक्तजीवस्य प्रदेशविशेषरूपत्वाभावाद् च” इत्यादि शंकयाऽपि त्वन्मतएव मोक्षोच्छेदः. ईश्वरस्तु सत्यप्रतिज्ञः सत्यसंकल्पः

श्रुतौ गीतादौ च मुक्तौ पुनः पाताभावं प्रतिज्ञातवानिति न पुनः बन्धशंका. नहि लौकिकोऽपि राजादी राजधर्मनिष्ठः सत्यवादी स्वकृतनियमं स्ववाचं वा अतिवर्तते. किं पुनः सत्यवेदवाक् सत्यसंकल्पः सर्वशक्तिः कृपालुः ईश्वरः ! इति अभिसन्धिः. **आदावन्तेच** इति, इयं गौडपादीय-वैतथ्यप्रकरणस्था (६) कारिका. यद् आदौ अन्ते च न अस्ति तदेव मध्येऽपि न अस्तीति वितथम्. संसारस्य अविद्यायाः च ब्रह्मवद् आदौ सत्त्वेतु न वैतथ्यसिद्धिः इति अनादितापक्षे तद्विरोधः. अत्र तृतीयपादे "**ह्येते**" इत्यत्र 'सन्त'इति क्वचित् पुस्तके पाठः. यश्च "**न च पुनरावर्तते**" (छान्दो.उप.८।१५।१) इत्यादौ कुतर्कप्रवृत्तेः अप्रतिबन्धः उक्तः स सर्वानादरणीयः उक्तयुक्तेः. किञ्च तादृशश्रुतिषु तथासन्देहवारणार्थमेव "**अनावृत्तिः शब्दाद्**" (ब्र.सू.४।४।२२) इति यथा परमाचार्यस्य अधिकरणं, नहि तथा संसारस्य अविद्यायाः च त्वन्मात्रोत्प्रेक्षितस्य अनादित्वस्य कण्ठरवेण साधकम् एकमपि अधिकरणम् अस्ति. येन तत्र प्रत्याख्याने तद्वद् अत्रापि कुतर्कः प्रवर्तेत. बह्वृचश्च उपनिषदो अनावृत्तिम् अभ्यस्यति बहूनां च अनुग्रहएव न्याय्यः. न तथा तदनादिताग्राहकं किञ्चिदपि श्रुतिवाक्यम्. यश्च जन्यस्य नाशः इति नियमः सोऽपि अनित्यवादिमात्राभ्युपगमरूपो न नित्यवादिनं पीडयितुम् इष्टे. नापि मोक्षस्य जन्यत्वम् आगन्तुकान्यथारूपत्याग-पूर्वक स्वरूपव्यवस्थितिरूपत्वात् "**मुक्तिः हित्वा अन्यथारूपं स्वरूपेण व्यवस्थितिः**" (भाग.पुरा.२।१०।६) इति तल्लक्षणात्, अन्यथा तवैव स्वपादे कुठारप्रहारः आपद्येत. किञ्च तवैव ईदृशवाक्यविरोधो नतु अस्माकम् इति आहुः **किञ्च त्वन्मते** इत्यादिना. सिद्धान्तेतु व्युच्चरितस्य अणोः उत्क्रान्तिगत्यागतिमतो जीवस्य प्राप्तिः सम्भवत्येव इति कर्मिणो ब्रह्मलोकतइव पुनरावृत्ति शंकायाम् अनावृत्तिनिश्चायकानि इमानि इति निरवद्यम्.

(१) [सान्ता च इयं माया. "विद्वान् नाम-रूपाद् विमुक्तः" (मुण्ड.उप.३।२।८) इति श्रुतेः. "तरति अविद्यां विततां हृदि यस्मिन् निवेशिते योगी मायाम् अमेयाय तस्मै विद्यात्मने नमः" (विष्णुपुरा.५।१७।१४), "मायाम् एतां

तरन्ति ते'' (भग.गीता ७।१४), ''विभेद-जनके अज्ञाने नाशम् आत्यन्तिकं गते'' (विष्णुपुरा.६।७।९६) इत्यादि स्मृतिभ्यः च. नच यद् अनादि तद् अनन्तम् इतिव्याप्तिः संगता प्रागभावे व्यभिचारात्. घटादेः आविर्भावस्यैव स्वीकारेऽपि भेदस्य उत्पत्ति-स्वीकारेण तत्रापि तत्प्रागभाव-प्रत्याख्यानस्य अशक्यत्वात्. नच अनादिः भावो अनन्तः इति वाच्यं, भावत्वस्य निरूपयितुम् अशक्यत्वात्, अस्ति इति प्रतीत्यर्हत्वस्य अभावेऽपि सत्त्वात्. अभावभिन्नो भावः इतितु अन्योन्याश्रय-ग्रस्तम् अभावस्य भावनिरूपणाधीन-निरूपणत्वात्. अधिकन्तु खण्डनादिभ्यो ज्ञेयम्.

किञ्च, अविद्यायाः अभाव-वैलक्षण्येनैव भाव-व्यवहारो अस्माकं, नतु त्वदभिमत-भावरूपत्वेन. तदाहुः ''भावाऽभावाऽतिगा अविद्या तत्त्वे दृष्टान्तितं तमः'' इत्यादि. यदिच अनादि-पदार्थानां भेदस्य सादिता न युक्ता, सादिस्तु न कोऽपि पदार्थः इति उच्यते, तर्हि सर्वम् अनन्तम् इत्येव त्वया वाच्यं, 'यत्'-'तच्छ'ब्दयोः अव्यावर्तकत्वात्. नच तथापि वक्तुं युक्तम् उक्तश्रुत्यादि-विरोधात्. आविर्भाव-तिराभावावेव आद्यन्ततया विवक्षितौ इति चेद्; न, मायायाः नाशेऽपि तिरोभावानंगीकारेण तन्नियम-विरोधानवतारात्. सतः पूर्ववज्ज्ञानाभावस्यैव तिरोभाव-पदार्थत्वात्. अन्यथा नाश्यत्वेन अभिमतो भेदोऽपि तिरोभवति इति त्वया उच्येत. नैयायिकाद्यैश्च ''कूर्मस्य अंगानि तिरोभवन्ति'' इतिवद् ''घटादयः तिरोभवन्ति'' इति प्रयुज्येत.

एतेन

''किञ्च जन्यातु अजन्या वा माया आद्ये जनको -
हिकः।अन्याभावात्तु ब्रह्मैवं सविशेषत्वम् आगतम्।।

द्वितीयेतु अद्वैतभंगः कादाचित्कन्तु असंगतम्।
“आत्मैवेदम् अग्र आसीद्” इत्यादिश्रुतिबाधतः॥
अनादित्वेतु सान्तत्वम् इति पक्षोऽपि असंगतः।
अनादित्वेतु अनन्तत्वं मायायाः इति निश्चयात्॥
(शु.मा.२३-२५)

इति प्रत्युक्तम्. अनादि-सान्तत्वपक्षे श्रुतिन्याययोः विरोधस्य उद्धृतत्वात्, अनन्तत्वस्य उक्तरीत्या निरस्तत्वात् च.]

(२) यच्च मायायाः सान्तत्वे श्रुतिस्मृतिप्रदर्शनं तदपि पारिभाषिकमायायाः तादृशश्रुत्यादिप्रतिपाद्यत्वएव संगच्छते तदेव न सम्भवति. तथाहि “विद्वान् नाम-रूपाद् विमुक्तः” (मुण्ड.उप.३।२।८) इति श्रुतिः विदुषो ब्रह्मणि लीनस्य पृथक्तया नामरूपे न उपलभ्येते इति प्रतिपादयति नतु मायामपि “यथा नद्यः स्यन्दमानाः समुद्रे अस्तं गच्छन्ति नाम-रूपे विहाय” (मुण्ड.उप.३।२।८) इति श्रुतेः. “तरति अविद्याम्” (विष्णुपुरा.५।१७।१४) इत्यादिस्मृतिस्थ‘माया’पदन्तु ईश्वरस्य व्यामोहिका या शक्तिः तां प्रतिपादयति. साच न सान्ता अतएव ‘तरति’ इति उक्तं ‘नाशयति’ इति न उक्तम्. सा शक्तिः ईश्वरे हृदि निविष्टे तत्कृपया भक्तं न मोहयतीति “नदीं तरति” इत्यनेन “नदीं नाशयति” इति बोधः कस्यापि न जायते इति कथं तादृशस्मृत्या मायायाः सान्तत्वनिश्चयः. “विभेदजनके अज्ञाने...” (विष्णुपुरा.६।७।९६) इत्यादिस्मृतिरपि “पराभिध्यानात्तु तिरोहितं ततोहि अस्य बन्ध-विपर्ययौ” (ब्र.सू.३।२।५) इति सूत्रेण यद् व्यासैः प्रदर्शितं जीवस्य ईश्वरविषयकज्ञानतिरोभावाद् देहादिषु अहंबुद्धिरूपम् अन्यदपि विपरीतज्ञानं तदेव वास्तवज्ञानाभावाद् ‘अज्ञान’ शब्देन प्रतिपादयति नतु

मायारूपम्. मायायाः एकत्वेन तस्याः अत्यन्तनाशे एकमुक्तौ सर्वमुक्तिप्रसंगः. किञ्च मायायाः अनादित्वस्वीकारे तस्याः सान्तत्वकथनम् अयुक्तम् अनादेः भावस्य नाशादर्शनात्. नच भावत्वं निरूपयितुम् अशक्यम् इति वाच्यम्, अस्ति इति प्रतीत्यर्हत्वरूपस्य निरूपणस्य सम्भवात्, तत्रापि दोषोद्भावने सान्तत्वस्यापि निरूपयितुम् अशक्यत्वात् अविद्यायाः सान्तत्वमपि न स्यात्. किं तावत् सान्तत्वम्? ध्वंसप्रतियोगित्वम् इति चेद्; ध्वंसत्वं प्रागभावप्रतियोग्यभावत्वं, प्रागभावत्वं च ध्वंसप्रतियोग्यभावत्वम् इति अन्योन्याश्रयः. एवम् अभावत्वप्रतियोगित्वादीनामपि अनिर्वचनीयत्वात् तद्धटितस्य सान्तत्वस्य सुतराम् अनिर्वचनीयत्वं ध्वंसत्वादीनाम् अखण्डोपाधिरूपता चेद्, भावत्वेन किम् अपराद्धम्!. तमसो भावरूपत्वेन दृष्टान्तासिद्ध्या "भावाऽभावातिगा अविद्या" ( ) इत्यादि असंगतम्. यदिच इत्यादि प्रलापस्तु प्रकृततया उपेक्षणीयः मायानाशेऽपि तिरोभावानंगीकाराद् इति कथनम् असंगतं नाशस्य तिरोभावानतिरेकात्. नच सतो असत्त्वं नाशः, सतः पूर्ववज्ज्ञानाभावः तिरोभावः इति वाच्यं सतो असत्त्वासम्भवात्. घटादीनां सत्त्वं त्वया न स्वीक्रियते. मायायाः त्वन्मते सद्विलक्षणत्वात् तस्य नाशानुपपत्तेः. किञ्च घटो नश्यति, ननाश, नष्टः, नंक्ष्यति, इत्यत्र आख्याताद्यर्थवर्त्तमानत्व-भूतत्व-भविष्यत्वादीनाम् अन्वयः कुत्र इति वक्तव्यम्? घटे वा ध्वंसे वा ध्वंसोत्पत्तौ वा? न आद्यः, घटस्य असत्त्वात् तत्र वर्त्तमानत्वादिकालान्वयासम्भवात्. नापि द्वितीयः नाशस्य विद्यमानत्वेन 'नष्टः' 'ननाशः' इत्यादिप्रयोगानुपपत्तेः भूतत्व-परोक्षभूतत्वयोः तत्र अभावात्. न तृतीयः घटो नष्टो नश्यति इत्यादौ उत्पत्तिवाचकपदाभावात् समभिव्याहृतपदोपस्थापितएव पदार्थान्वयनियमेन अन्वयासम्भवात्. तस्माद्

नाशः तिरोभावएव. सच घटस्य सत्त्वात् तत्र सम्भवत्येव. किञ्च मायायाः अनादित्वे “एकमेव अद्वितीयम्”, “आत्मा वा इदम् एकएव अग्र आसीद्” इति श्रुतिविरोधः. सादित्वेतु जन्यत्वं वाच्यं “यद् जन्यं तत् सकारणकम्” इति व्याप्तेः तत्कारणं ब्रह्मैव वक्तव्यं तच्च कारणत्वं ब्रह्मणि वास्तवमेव अभ्युपगन्तव्यं नतु कल्पितं, मायायाः पूर्वम् अभावेन मायिकत्वापरपर्यायकल्पिततत्वस्य तत्र वक्तुम् अशक्यत्वात्. तथाच ब्रह्मणि निधर्मकत्वम् अभ्युपगतं त्यक्तं स्यात्, संसारस्य अनादित्वं च न स्यात्. प्रागभावस्य त्वन्मते अभावाद् दृष्टान्तासम्भवेन अनादि-सान्तत्वमपि कल्पयितुं न शक्यते. तस्मात् जगत्कारणीभूतं पारिभाषिकं भावरूपम् अज्ञानं न सम्भवति, श्रुतिन्यायविरोधोद्धारस्य कथमपि असम्भवात्. ‘माया’पदवाच्याभगवच्छक्तिरेव साच भगवदभिन्ना, शक्तिशक्तिमतोः अभेदात्. अयमेव अर्थः शुद्धाद्वैतमार्तण्डकारैः “किञ्च जन्यातु अजन्या वा माया आद्ये जनकोहि कः” (शु.मा.२३) इत्यादिकारिकाभिः प्रदर्शितः.

(३) सहस्राक्षे सान्ता च इयम् इत्यादिं निरस्तत्वात् च इत्यन्तं भागं परिहरन्ति **यच्च मायाया** इत्यादिना **इत्यादिकारिकाभिः प्रदर्शितः** इत्यन्तेन. अयम् अर्थः : यानि तत्सान्तत्वसाधनाय वाक्यानि उक्तानि तत्र “**तथा विद्वान्**” (मुण्ड.उप.३।२।८) इति मुण्डकवाक्यं “**यथा नद्य**” इति पूर्वार्द्धविशिष्टं व्याख्यातं प्राक्. नहि तत्र तदभिमताज्ञानस्य तत्सान्तत्वस्य वा गन्धोऽपि अस्ति. यच्च “**तरति अविद्यां विततम्**” (विष्णुपुरा.५।१७।१४) इति वाक्यम्, इदं भीष्मस्तवराजस्थाम् इति केचित्. वस्तुतस्तु शान्तिपर्वान्तर्गतराजधर्मपर्वणि भीष्मस्तवराजाख्ये सप्तचत्वारिंशाध्याये इदं न उपलभ्यते. सति समूलत्वे तत्र ‘अविद्या’-‘माये’ति पृथक्शब्दद्वयोपादानाद् मलिनसत्त्वां शुद्धसत्वां च उभेअपि नाशयति इति त्वया वाच्यम्. शुद्धसत्त्वायाः

नाशेच हृदि निवेशनस्यापि असम्भवः कतकरेणुवत् सान्तायाः विद्यायाअपि असम्भवः इति वाक्यार्थस्य तव बाधः. 'अविद्या'ख्यां ताम् इति व्याख्याय शुद्धसत्वायाः अनाशस्य कथनेतु मलिनसत्त्वायाएव सान्तत्वसिद्धिः. किञ्च 'अविद्या'शब्दस्य तावकेषु ईशावास्यभाष्यादिषु कर्मपर्यायता कथनात् त्वयापि उत्तरत्र कर्मपरतायाः वक्ष्यमाणत्त्वात् च अत्रापि "अविद्यां कर्माणि तरति" इति कुतो न प्राप्नुयात्! "**कर्मभिः त्यज्यते योगि**" (   ) इत्यादि स्मरणान्तराच्च. तथाच भावरूपाज्ञानस्य न इदं सान्ततासमर्पकम्. सिद्धान्तेतु "**विद्यया अविद्यया शक्त्या मायया च निषेवितम्**" (भाग.पुरा.१०।३६।५५) इति शक्त्योः भेदनिर्देशात् शास्त्रार्थावरणभंगे वन-वृक्षवत् समष्टि-व्यष्टिरूपतया व्युत्पादिताम् अविद्यां गुणमयीं मायां च हृदि भगवन्निवेशनेन तरति. "**विलज्जमानया यस्य स्थातुम् ईक्षापथे अमुया**" (भाग.पुरा.२।५।१३) इत्यादि उक्तेः. "**आत्मभिदाबाधात्मने नमः**" (   ) इति अर्थः. एतेनैव "**दैवी ह्येषा गुणमयी मम माया दुरत्यया मामेव ये प्रपद्यन्ते मायाम् एतां तरन्ति ते**" (भग.गीता ७।१४) इति गीतासप्तमाध्यायवाक्यमपि व्याख्यातम्. यथा दुष्कृतिनो मायया अपहृतज्ञाना भवन्ति न तथा भगवन्मात्रप्रपन्नाः इति तदाशयात् नदीतरणवद् नाशासिद्धेः. अन्यथा दुष्कृतिनामपि ज्ञानं न अपहरेत्. नहि सा प्रतिजीवं भिन्ना शक्या वक्तुं तव जीवभावस्य तत्कृतत्वेन जीवस्य तद्भेदकत्वायोगात्. "**विभेदजनके अज्ञाने**" (विष्णुपुरा.६।७।९६) इति वाक्येतु सति आर्षत्वे "**पराभिध्यानात्तु तिरोहितं ततोहि अस्य बन्धविपर्ययौ**" (ब्र.सू.३।२।५) इत्यत्र सूत्रकृता भगवतो 'भग'शब्दवाच्यषड्गुणे ऐश्वर्यादीनां चतुर्णां तिरोभवाद् बन्धो, ज्ञान-वैराग्यद्वयोः तिरोभावाद् विपर्ययः च दर्शितः. तत्रापि ज्ञानतिरोभावाद् अहंत्वं वैराग्यतिरोभावाद् ममत्वं च प्रतीयते. ततएव च विशिष्टो भेदो नानात्वं प्रातीतिकं जन्यते. अतो विभेदजनका-'ऽज्ञान'पदेन बन्धो विपर्ययो वा उच्यते. तदात्यन्तिकनाशादेवच मुक्तिः सम्भवति. अतो अविद्यायाः अनादि-सान्तत्वं न श्रौतं नापि स्मार्तं त्वदभिमतरीतिकभावरूपाज्ञानस्य कण्ठरवेण ग्राहकं नैकमपि वचनं प्रस्थानत्रये अस्ति. किञ्च अनादिभावत्वे सान्तत्वमपि न स्याद् अनादिभावस्य अनन्तत्वनियमात्. वस्तुतस्तु 'भाव'पदमपि त्वादृशां

तार्किकाणां च तोषार्थम्. अस्मन्मते अभावानंगीकारेण व्यावर्त्यालाभाद् यद् अनादि तद् अनन्तम् इत्येव नियमः. स्पष्टञ्च इदं मार्तंडादिषु "प्रागभावादयो न अंगीकार्या आभ्यां यतो अखिलम्" (शु.मा.१७) इत्यादौ. तेन अस्माकं न प्रागभावे व्यभिचारः. नच भेदप्रागभावः त्वयापि वाच्यः इति वाच्यं बहुत्वरूपभेदस्य जतुघृतद्रवत्ववद् भगवद्धर्मत्वेन नित्यतया तस्य प्रागभावासंभवात् द्वैतस्य भ्रमत्वेन असतः तस्य उत्पत्त्यनंगीकारेण प्रागभावासम्भवात्. नहि रज्जौ सर्पस्यापि उत्पत्तिः अस्ति नियतकारणव्यभिचारापाताद् **"न असतो विद्यते भावः"** (भग.गीता २।१६) इति वाक्यविरोधाच्च. यच्च भावत्वं निरूपयितुम् अशक्यम् इति उक्तं तदपि अशक्यमेव इति आहुः **अस्ति इत्यादि** अभावे स्वातन्त्र्येण अस्तित्वप्रतीतिस्तु भ्रमः तस्य अधिकरणानतिरिक्तत्वात् भूतलादेश्च भावत्वात्. अतो अस्तीति प्रमितिविषयत्वं तत्त्वं स्यात्. खण्डनोक्तयुक्तिभिः अभावस्य खण्डने अभावप्रतियोगिकवैलक्षण्यस्य अशक्यनिरूपणतया तव अविद्यायां भावव्यवहारोऽपि अशक्यः. एवं भावत्वस्य तथात्वे भावातिगत्वमपि अशक्यम् इति **"भावाभावातिगा..."** (   ) इत्यपि न वक्तुं शक्यम्. **तमसो भावरूपत्वेन** इति, अत्र उभयथापि पदच्छेदो विवक्षितः तथाच व्यवहारे भट्टनयानुसारिणः तव तमसः केवलभावत्वात् तार्किकादिमते केवलाभावत्वात् तद्दृष्टान्तो असंगतः. सिद्धान्ते तमसो मायिकत्वेऽपि मायिकभावत्वं तथा अभ्युपगमे मन्मतप्रवेशः, तेजसि तमसइव ब्रह्मणि अविद्यास्थितेःविरोधः च. नच यद् अनादि तद् अनन्तम् इति नियमे 'यत्'-'तच्छ'ब्दौ अव्यावर्तकौ इति शंक्यम्. 'अनादि'शब्देन आविर्भूतत्वे सति पूर्वकालिकतिरोभावरहितस्य 'अनन्त'शब्देन तत्त्वे सति उत्तरकालिक तद्रहितस्य च विवक्षणाद् अत्र तुच्छव्यावर्तनार्थं सत्यंतं तथाच पूर्वं तिरोहितस्य इदानीम् आविर्हितस्य अग्रे तिरोभाविनो घटादेः व्यावर्त्यत्वात्. अतः आहुः **प्रलापस्तु** इति, **"तदेतद् अक्षयं/अक्षरं नित्यं जगद् मुनिवर अखिलम् आविर्भाव-तिरोभाव-जन्म-नाशविकल्पवद्"** (विष्णुपुरा.१।२२।६०) इत्यादिभिः विष्णुपुराणप्रथमांशचरमाध्यायादिवचनैः आविर्भाव-तिरोभावाभ्यां तादृशविकल्पवद् इत्याद्यर्थकैः **"जनी प्रादुर्भावे"**(पा.धा.३३२९), **"णश् अदर्शने"** (पा.धा.३३३५)

इति धात्वर्थविचारेण च वस्तुगत्या आविर्भाव-तिरोभावावेव जन्मनाशौ इति साधयितुं तद् उक्तं नाश-तिरोभावभेदं परिहरति **नाशस्य** इत्यादिना, **असत्त्वासम्भवाद्** इति. ''**नाभावो विद्यते सतः**'' इति वाक्यविरोधाद् इति भावः. **नाशानुपपत्तेः** इति, मायायाः सत्त्वासत्त्वाभ्याम् अनिर्वचनीयत्वस्वीकाराद् असत्त्वेन नाशस्य संभवइव सत्त्वेन तस्य अनुपपत्तिः स्यादेव. नश्वरत्व-नित्यत्वे उभे वा युगपत् प्रसज्येयाताम् इति भावः. यत्तु अन्यथा नाश्यत्वेन अभिमतो भेदः...इत्यादि उक्तं, तद् असत्, द्वैते प्रातीतिकत्वेन उत्पत्तेरिव नाशस्यापि उपचारात् प्रतियोगिनो सत्त्वात् सत्त्वे नाशायोगात्. उपनेत्रधारणे वर्णेषु स्थौल्यस्य प्रत्यये तदधारणे तेषु तदप्रत्ये सत्यपि तद्धारणावसरे तेषु तदुत्पद्यते तत्परित्यागे नश्यतीति नहि केनापि अंगीक्रियते. यच्च कूर्मस्य अंगानि...इत्यादि उक्तं तन्निरसितुं घटादेः नाशं व्यवहरतोऽपि ''**गलेपादुका**'' न्यायेन तिरोभावं स्वीकारयन्ति **किञ्च घटः**...इत्यादिना. **भूतत्व**...इति, 'क्त'प्रत्ययाद्यर्थो भूतत्वं लिडर्थः परोक्षभूतत्वम्. ...**नियमेन** इति, पतंजलिप्रभृतयोहि उच्चारितएव शब्दः प्रत्यायको न अनुच्चारितः इति मन्यन्ते अतः तथा नियमः. कथम् अनुच्यमानं गंस्यते इत्युक्तेः स्मृतस्यच शाब्दबोधे भानाभावः सर्वसंमतः. किञ्च तथासति ''घटो नष्टः'' इत्यादौ घटादेः अभेदान्वयोऽपि न स्यात्. ध्वंसस्य उत्पत्तिरपि प्रागभावध्वंसपरंपरया अनवस्थापादिका न शक्या वक्तुम् इति दिग्. किञ्च ''जन्यातु अजन्या वा...'' (शु.मा.२३-२५) इत्यादिमार्तंडकारिकात्रय-प्रमेयं समर्थयन्ते. **किञ्च मायायाः** इत्यादिना, कारिकास्थम् अनादित्वम् अनन्तत्वम् इति द्रढयन्ति **साच भगवदभिन्ना** इति, तथाच भगवतो अनन्तत्वात् सापि अनन्तैव. अतएव ''**पराऽस्य शक्तिः विविधैव श्रूयते स्वाभाविकी ज्ञान-बल-क्रिया च**'' (श्वेता.उप.६।८) इत्याद्याः परत्व-स्वाभाविकत्वादिनिरूपिकाः श्वेताश्वतरादिश्रुतयो अनाकुलाः. ''**आत्मैव इदम् अग्रम्**'' (बृह.उप.१।४।१) इत्यादिविरोधन्तु पूर्वं क्वापि अनुद्धृत्य व्यामोहयितुम् उद्धृतत्वं तस्य उक्तवान् इति सद्भिः अनुपादेयवचनः.

(१) [यत्तु ''माया-सम्बन्ध-रहितम्'' (शु.मा.२८)

इतिश्लोक-टीकायाम् अस्याः भगवतो अभिन्नत्वम् उक्तं, तत्र ब्रूमः. किम् इदम् अभिन्नत्वम्? तादात्म्यं भेदाभावो वा? आद्येऽपि कथञ्चित् सर्वथा वा? न तावद् आद्यः, “तत्र भेदो न चैव” (शु.मा.४९) इत्यादि त्वत्सिद्धान्तविरोधात्. न द्वितीयः, “शक्तिः शक्तिमान्” इति व्यवहारलोपप्रसंगात्, सत्तादात्म्य-निषेधक “नो सदासीद्” (तैत्ति.ब्रा.२।८।९।३) इति श्रुतिविरोधात् च, मायायाः विनाशित्वस्य उक्तत्वेन तदभिन्नस्य ब्रह्मणो विनाशित्वापत्तेः च, “विभेद-जनके अज्ञाने नाशम् आत्यन्तिकं गते” (विष्णुपुरा.६।७।९६) इत्यत्र अत्यन्त-नाशेन तिरोभावग्रहणे प्रमाणाभावात् च. मायायाः न तिरोभावोक्ति-सम्भवः. किञ्च एवमपि अनिस्तारो, ब्रह्मणोऽपि तिरोभाव-प्रसंगात्, भेदाभाव-पक्षस्तु इष्टएव, शुक्तिकायां कल्पित-रजत-भेदाभाव-सत्त्वाद् ब्रह्मणि मिथ्याभूत-माया-भेदाभावस्य उचितत्वात्. एतेन “शक्ति-शक्तिमतोः भेदाभेदो यः स न बाधकः. तत्र भेदो न चैव अस्ति शक्तेः ब्रह्मत्वनिश्चयात्,भिन्नत्वेतु जडत्वं स्याद्” (शु.मा.४८-४९) इति. “धर्म-धर्मि-विचारेऽपि ज्ञेयम् एवं विचक्षणैः प्रकाशाश्रय-दृष्टान्तेऽपि अभेदो बोध्यते किल. ‘अरूपवत्’सूत्र-वाक्ये धर्माणामपि ब्रह्मता निरूपिता प्रभुवरैः श्रीविद्वन्मण्डने स्फुटम्” (शु.मा.५०-५१) इति प्रत्युक्तम्. अतएव भेदस्य असम्मतत्वे भेदाभेदस्य अबाधकत्वायोगात्, उत्तरार्द्धेन विरोधात् च, जडतायाः इष्टत्वात् च. अतएव “किन्तु तमः” इति श्रुत्युक्तं संगच्छते. “प्रकाशाश्रयवद् वा” (ब्र.सू.३।२।२८) “अरूपवदेव” (ब्र.सू.३।२।१४) इति अनयोः सूत्रयोस्तु तात्पर्यं चतुर्थश्लोक-व्याख्यायां वर्णयिष्यामः.]

(२) ननु मायायाः भगवतो अभिन्नत्वं न सम्भवति विकल्पासहत्वात्. किम् इदम् अभिन्नत्वं तादात्म्यं भेदाभावो वा? न आद्यः, आधाराधेयभावानुपपत्तेः, सत्तादात्म्यनिषेधक "नो सदासीद्" इति श्रुतिविरोधः च, मायायाः विनाशित्वेन ब्रह्मणो विनाशित्वापत्तिः च. मायायाः तिरोभावस्वीकारेच ब्रह्मणोऽपि तिरोभावप्रसंगः. भेदाभावपक्षस्तु अस्मद्रीत्या सम्भवति शुक्तिकायां कल्पित-रजत-भेदाभाववद् ब्रह्मणि मिथ्याभूत-माया-भेदाभावस्य उचितत्वाद् इति चेद्; न, माया भगवदभिन्नैव. अभिन्नत्वञ्च भेदाभावः सोऽपि शक्ति-शक्तिमतोः भेदस्य अदृष्टत्वाद्, "आत्मैव इदं सर्वम्" (छान्दो.उप.७।२५।२) इत्यादिश्रुत्या च निश्चीयते, नतु त्वदुक्तरीत्या दृष्टान्तस्यैव असम्भवात्. कल्पित-रजत-भेदाभावं शुक्तौ स्वीकुर्वता 'कल्पिते'ति विशेषणं कुत्र अभिमतं रजते वा तद्भेदे वा? आद्ये रजतस्य कल्पितत्वेऽपि तद्भेदस्य अकल्पितत्वात् शुक्तौ तदभावासत्त्वेन तत्सत्त्वकथनम् असंगतम्. किञ्च शुक्तौ रजतभेदासत्त्वे रजतस्येव शुक्तेरपि कल्पितत्वापत्त्या अधिष्ठानज्ञानेन रजतस्येव शुक्तेरपि बाधः स्यात्. न द्वितीयः, रजतवत् तद्भेदस्यापि कल्पितत्वे "न इदं रजतम्" इति बाधस्यापि भ्रमत्वापत्तिः, अबाधितार्थविषयकत्वाद् रजताभिन्नाशुक्तिः इति प्रतीतेः प्रमात्वापत्तिः च स्यात्. तादात्म्यपक्षोऽपि निर्दुष्टः, तादात्म्यञ्च स्ववृत्त्यसाधारणो धर्मः सच मायाशक्तिरूपः ब्रह्मभिन्ने असत्त्वात्. आधाराधेयभावस्तु अभावस्य अधिकरणात्मकत्वेऽपि भवन्मते यथा सम्भवति तथैव अस्मन्मते शक्ति-शक्तिमतोरपि उपपद्यते. द्वितीयदोषस्तु मायायाः विनाशित्वानंगीकारेणैव निरस्तः. श्रुतिविरोधोऽपि न, अस्मन्मते भगवच्छक्तेः असत्त्वानंगीकारात्. किन्तु त्वन्मतएव विरोधः सम्भवति मायायाः सद्विलक्षणत्वस्वीकारेण असत्त्वस्य

दुर्वारत्वात्. मायायाः तिरोभावेऽपि ब्रह्मणः तिरोभावो न सम्भवति, घटतिरोभावेऽपि मृदः तिरोभावासम्भवात्. अतएव "शक्ति-शक्तिमतोः भेदाभेदो यः स न बाधकः" (शु.मा.४८) इत्यादि शुद्धाद्वैतमार्तण्डोक्तमपि संगच्छते. अतएव "प्रकाशाश्रयवद् वा तेजस्त्वाद्" (ब्र.सू.३।२।२८) इति सूत्रे "अरूपवद् हि तत्प्रधानत्वाद्" (ब्र.सू.३।२।१४) इति सूत्रे च ब्रह्मधर्माणां ब्रह्मत्वं प्रतिपादयता व्यासेन मायायाअपि ब्रह्मत्वं प्रतिपादितम्. एतेन जडत्वे इष्टापत्तिः भेदाभेदस्य अबाधकत्वायोगः इत्यादि उद्भावनं निरस्तम्. यथाच एतत् तथा एतयोः सूत्रयोः व्याख्याने स्फुटीभविष्यति. तत् सर्वं चतुर्थश्लोकखण्डनावसरे वक्ष्यते.

(३) सहस्राक्षे यत्तु मायासम्बन्धः... इत्यादिं वर्णयिष्यामः इत्यन्तं भागं निराकुर्वन्ति **ननु मायायाः** इत्यादिना **खण्डनावसरे वक्ष्यते** इत्यन्तेन. अत्र पूर्वपक्षे कथञ्चित् तादात्म्यं सर्वभावः इति विकल्पस्य निस्सारत्वाद् लोके द्विविधतादात्म्यस्य क्वापि अभ्युपगमाभावात् तादात्म्यं भेदाभावो वा इत्येव विकल्पो अनूदितः. कथञ्चित् तादात्म्यं च नैव अंगीक्रियते इति तत्र "भेदो नचैव अस्ति" (शु.मा.४९) इति उक्तेः न विरोधः. समादधते **माया भगवदभिन्नैव** इत्यादिना. अत्र भेदाभावपक्षो मुख्यः, तादात्म्यपक्षस्तु मध्यमाधिकारिबोधनाय. ततो मुख्यत्वाद् भेदाभावएव आदौ उच्यते. शक्तिशक्तिमतोः भेदो लोके न दृष्टः. नहि वह्नेः दाहकताशक्तिः पुरुषात् तद्वस्त्रमिव वह्नितः पृथक्कर्तुं शक्यते, नापि वह्निस्वरूपातिरिक्तं तत्स्वरूपं किञ्चिद् उपलभ्यते यश्च उत्तेजकसमवधानमण्यादिसमवधानयोः तदाविर्भाव-तिरोभावाभ्यां शक्तेः भेदो दर्श्यते सोऽपि तत्तच्छक्तिपदाभिधेयं वह्न्यादेः दाहाद्यनुकूलस्वरूपविशेषं बोधयितुमेव नतु वह्नित्वाद्यवच्छिन्नप्रतियोगिताकभेदवत्पदार्थान् साधयितुम्. तार्किकास्तु शक्तिसादृश्यादेः पदार्थान्तरत्वम् अरोचयन्तः उत्तेजकाभावविशिष्टमण्यभावविशिष्टवह्न्यादिकमेव दाहादिकं प्रति कारणं मन्यन्ते. शक्तिवादिनस्तु गौरवम् अनादृत्य पूर्वं बोधनाय भेदम्

उपपाद्य वस्तुतः तत्तत्कार्यानुकूलं तत्तत्स्वरूपविशेषमेव प्रदर्शयन्ति. एवं वेदेऽपि "**य: सर्वज्ञ: सर्वशक्ति:**" (   ) "**पराऽस्यशक्ति:**" (श्वेता.उप.६।८) इत्यादौ भेदप्रदर्शनं जिज्ञासुबोधनायैव. वस्तुतस्तु "राहोः शिरः" इत्यादिवद् अभेदः. वह्नितः तच्छक्तेः भेददुराग्रहे धर्माणामपि अत्यन्तभेदापत्त्या तार्किकनयवद् आत्मधर्मो ज्ञानम् आनन्दः च आत्मातिरिक्तएव इति आपद्येत. एतदेव अनुसन्धाय मार्तण्डे "भेदो यो बोधनाय सः" (शु.मा.४९) इति उक्तम्. ब्रह्मशक्तयस्तु वस्तुतः सर्वथा ब्रह्माभिन्नाएव "**इदं सर्वं यद् अयम् आत्मा**" (बृह.उप.२।४।६), "**पुरुषएव इदं सर्वं**" (तैत्ति.आर.३।१२।१) इत्यादिश्रुतिभ्य: "**मनसैव इदम् आप्तव्यं नेह नाना अस्ति किञ्चन**" (कठोप.२।१।११) इत्यादिश्रुतिभ्यः च "**सर्वकाम: सर्वगन्धः**" (छान्दो.उप.३।१४।४) इति, "**सर्वशक्तिः**" (   ) इत्येवमादिषु ब्रह्मधर्माणां तच्छक्तीनां च भेदेनैव निर्देशेऽपि इह ब्रह्मणि किञ्चन शक्तिधर्मादिकं नाना ब्रह्मभिन्नं नास्ति इति तदर्थः. अग्रेच "**मृत्यो: स मृत्युं गच्छति यः इह नानेव पश्यति**" (कठोप.२।१।११) इति ब्रह्मणि तच्छक्त्यादिकं ब्रह्मभिन्नं पश्यतो दुष्कलं श्रूयते. अभिन्नत्वादेव "**बलं बलवतां च अहं**" (भग.गीता ७।११), "**धर्माविरुद्धो भूतेषु कामो अस्मि**" (भग.गीता ७।११) "**पुण्यो गन्ध: पृथिव्यां च**" (भग.गीता ७।९) इत्यादिभगवद्वाक्यं बलं च शक्तिः. विशेषतस्तु अयमर्थः चतुर्थश्लोकखण्डने वक्ष्यते.

किञ्च पूर्वं त्वया विशेषतः आदृते कौर्मएव पूर्वखण्डे द्वादशाध्याये सिद्धान्तरीत्यैव सकलं शक्तिस्वरूपं, तस्या: शक्तिमदभेदादिकं च विस्तरेण प्रतिपाद्यते. तद् यथा : तत्र आरम्भएव शक्तिस्वरूपम् उपक्रम्य "**शिवा सर्वगता अनन्ताः गुणातीतातु निष्कलाः एकानेकविभागस्थाः ज्ञानरूपातिलालसाः**" (कूर्मपुरा.१।१२।७) "एवं नानाविभागस्था" इति क्वचित्पाठः. "**अनन्या निष्कले तत्त्वे संस्थिता तस्य तेजसा स्वाभाविकीच तन्मूला प्रभा भानोरिव अमला एका माहेश्वरी शक्तिः अनेकोपाधियोगत: परावरेण रूपेण क्रीडते तस्य सन्निधौ. सा इयं करोति सकलं तस्या: कार्यम् इदं जगत् न**

कार्यं नापि करणम् ईश्वरस्य इति सूरयः. चतस्रःशक्तयो दिव्याः स्वरूपत्वेन संस्थिता. अधिष्ठानवशात् तस्याः श्रृणुध्वं मुनिपुंगवाः. शान्तिः विद्या प्रतिष्ठा च निवृत्तिः च इति ताः स्मृताः चतुर्व्यूहः ततो देवः प्रोच्यते परमेश्वरः अनया परया देवः स्वात्मानन्दं समश्नुते चतुर्ष्वपिच भेदेषु चतुर्मूर्तिः महेश्वरः अस्यास्तु अनादि संसिद्धम् ऐश्वर्यम् अतुलं महद्’’ (कूर्मपुरा.१।१२।८-१४) इत्यादि उक्त्वा ‘‘**प्रोच्यते भगवान् कालो हरिः प्राणो महेश्वरः तत्र सर्वम् इदं प्रोतम् ओतञ्चैव अखिलं जगद्**’’ (कूर्मपुरा.१।१२।१५-१६) इत्यादिना एकस्यैव परमेश्वरस्य नानाशब्दवाच्यतां कालस्वरूपत्वं सर्वकारणतां च निर्णीय ‘‘**तस्य सर्वजगत्सूतिः शक्तिः ‘माये’ति विश्रुता तया इदं भ्रामयेद् ईशो मायावी पुरुषोत्तमः सैषा मायात्मिका शक्तिः सर्वाकारा सनातनी विश्वरूपं महेशस्य सर्वदा संप्रकाशयेत्. अन्याश्च शक्तयो मुख्याः तस्य देवस्य निर्मिताः ज्ञानशक्तिः क्रियाशक्तिः प्राणशक्तिः इति त्रयं सर्वासामेव शक्तीनां शक्तिमन्तो विनिर्मिताः माययैव अथ विप्रेन्द्राः साच अनादिः अनश्वरा सर्वशक्त्यात्मिका माया दुर्निवारा दुरत्यया मायावी सर्वशक्तीशः कालः कालकरः प्रभुः करोति कालः सकलं संहरेत् कालएवहि कालः स्थापयते विश्वं कालाधीनम् इदं जगद्**’’ (कूर्मपुरा.१।१२।१९-२४) इत्यादि कथयित्वा ‘‘**एका शक्तिः शिवा एकोऽपि शक्तिमान् उच्यते शिवः शक्तयः शक्तिमन्तो अन्ये सर्व शक्तिसमुद्भवाः शक्ति-शक्तिमतोः भेदं वदन्ति परमार्थतः अभेदं च अनुपश्यन्ति योगिनः तत्त्वचिन्तकाः शक्तयो गिरिजा देवी शक्तिमानो अथ शंकरः विशेषः कथ्यते चायं पुराणे ब्रह्मवादिभिः भोग्या विश्वेश्वरी देवी महेश्वरपतिव्रता प्रोच्यते भगवान् भोक्ता कपर्दीनीललोहितः मन्ता विश्वेश्वरो देवः शंकरो मन्मथान्तकः प्रोच्यते मतिः ईशानी मन्तव्याच विचारतः इति एतद् अखिलं विप्राः शक्ति-शक्तसमुद्भवं प्रोच्यते सर्ववेदेषु मुनिभिः तत्त्वदर्शिभिः**’’ (कूर्मपुरा.१।१२।२७-३२) इति उक्तम्. अत्र ‘‘**परास्य शक्तिः विविधैव श्रूयते स्वाभाविकी ज्ञान-बल-क्रिया च**’’ (श्वेता.उप.६।८) इति श्वेताश्वतरश्रुतेः अर्थो विस्तरेण उपबृंहितः. ‘‘**न तस्य कार्यं करणं च विद्यते**’’ (श्वेता.उप.६।८) इति तत्पूर्वार्द्धस्य अर्थोऽपि ‘‘**न कार्यं नापि कारणम्**’’ इत्यादिना स्मारितः.

अग्रेच मायायाः स्वाभाविकत्वाद् अकल्पितत्वं स्फुटतया अनाद्यनन्तत्वात् सन्मात्ररूपत्वं च बोधयित्वा लोके या-याः शक्तयः ताः ताः सर्वाअपि परमेश्वरशक्त्यंशभूताः ये ये च शक्तिमन्तः ते ते सर्वेऽपि परमेश्वरांशभूताएव इति दर्शयित्वा भानु-तत्प्रभयोः तेजस्त्वेनैव शक्ति-शक्तिमतोः अभेदो वर्णितः **शक्ति-शक्तिमतोः भेदा**…इत्यादिना. अर्थस्तु शक्ति-शक्तिमतोः भेदं वदन्ति वाग्व्यवहारएव एतयोः भेदः इति भावः योगिनस्तु परमार्थतः तयोः अभेदमेव सिद्धम् अनुपश्यन्ति. ‘चो’ऽवधारणे यतः ते तत्त्वचिन्तकाः अभ्रान्ताः इति ज्ञेयः. पुरतश्च अभेदेऽपि नित्यलीलानिर्वाहकं शक्ति-शक्तिमतोः भोग्य-भोक्तृभावादिकं व्याख्यातम्. नच इदं शैवतत्त्वमेव इति भ्रमितव्यं पुराणेषु तैः तैः ‘विष्णु’-‘शिवा’दिशब्दैः तैः तैः स्वरूपैः च परमेश्वरएव वर्णितः इति सिद्धान्तात्. ‘‘**एकं सद् विप्राः बहुधा वदन्ति**’’ (ऋक्.संहि.२।३।२२।४६) इत्यादिश्रुतिभ्यः. ‘‘**यो यो यां यां तनुं भक्तः**’’ (भग.गीता ७।२१) ‘‘**येऽपि अन्यदेवताभक्ताः**’’ (भग.गीता ९।२३) इत्यादिस्मृतिभ्यः. ‘‘**सर्वदेवनमस्कारः**’’ ( ), ‘‘**त्वामेव अन्ये शिवोक्तेन मार्गेण शिवरूपिणम्**’’ (भाग.पुरा.१०।३७।८) इत्यादिपुराणवचोभ्यः च. अतएव इह ‘‘**हरिः प्राणो महेश्वरः…मायावी पुरुषोत्तम**’’ (कूर्मपुरा.१।१२।१५-१९) इत्यादि उच्यते. अग्रेऽपि ‘‘**मां विद्धि परमां शक्तिं महेश्वरसमाश्रयाम् अनन्याम् अव्ययाम् एकां यां पश्यन्ति मुमुक्षवः. अहंवै सर्वभूतानां मात्रा सर्वान्तरा/सर्वभावानाम् आत्मा सर्वात्मना शिवा**’’ (कूर्मपुरा.१।१२।४८-४९) इत्यादिना तथैव शक्तिस्वरूपम् अभिहितम्. एकां शक्तिमदभिन्नां पश्यन्ति इति अर्थः. हिमवदुक्तनामसहस्रेच तथैव तत्प्रपञ्चितम्. ततःपरमपि ‘‘**वदन्ति केचित् त्वामेव प्रकृतिं प्रकृतेः पराम्**’’ (कूर्मपुरा.१।१२।२०९) इति प्रकृतिरूपताम् ‘‘**अविद्या नियतिः माया कलाद्याः शतशो अभवन्**’’ (कूर्मपुरा.१।१२।२११) इति नानारूपताञ्च उक्त्वा ‘‘**त्वंहि सा परमा शक्तिः अनन्ता परमेष्ठिनी सर्वभेदविनिर्मुक्ता सर्वभेदाश्रयाश्रया त्वाम् अधिष्ठाय योगेशि! महादेवो महेश्वरः प्रधानाद् यं जगत् सर्वं करोति विकरोति च त्वामेव/त्वयैव संगतो देवः स्वात्मानन्दं समश्नुते त्वमेव परमानन्दः त्वमेव आनन्ददायिनी त्वम् अक्षरं परं व्योम महज्ज्योतिः निरञ्जनं शिवं सर्वगतं सूक्ष्मं परंब्रह्म सनातनम्**’’ (कूर्मपुरा.१।१२।२११-२१५)

इत्यादिना तदेव सिद्धान्तितम्. अत्रापि **'सर्वभेदविनिर्मुक्ता'** इति अभेदः **'सर्वभेदाश्रयाश्रया'** इति घटादिषु भू-गन्धस्येव भेदाश्रयेषु कार्येषु परशक्तेरेव अंशतो अनुवर्तनं च निर्णीयते. एवं श्रुतिस्मृतिपुराणेषु तयोः अभेदादिकं सिद्धमेव. वचनान्तराणिच अतिविस्तरभयाद् न लिख्यन्ते. तदेतत् सर्वम् अनुसन्धाय उक्तं कारिकासु **''तत्र भेदो नचैव अस्ति''** इति. तत्र ब्रह्मणि भेदः स्वशक्तिधर्मादिप्रतियोगिकः इति अर्थः. एवं स्वाभिमतं भेदाभावं साधयित्वा तदभिमतं तं दूषयन्ति **नतु त्वदुक्तरीत्या** इति. अत्र भेदाभावे स्वीक्रियमाणे 'तदनन्यत्व'सूत्रविवेचनावसरे दर्शितचरदिशा तयोः अभेदएव सिध्यतीति ब्रह्माभिन्नायाः तस्याः कल्पितत्वम् अशक्यकल्पनम्. दृष्टान्ते उक्तदूषणानि च दार्ष्टान्तिके ज्ञेयानि. तद्यथा कल्पितमायाभेदाभावो ब्रह्मणि इति चेत्; कल्पितत्वं मायायाः विशेषणं तद्भेदस्य वा? आद्ये भेदस्य अकल्पितस्य ब्रह्मणि सत्त्वात् तदभावकथनव्याघातः, कल्पितमायाभेदाभावे च ब्रह्मणोऽपि कल्पितत्वप्रसंगो जडत्वप्रसंगः च. तथाच ज्ञानेन मायया सह ब्रह्मणोऽपि बाधः. द्वितीये ब्रह्म न जडमाया इति मायाबाधग्रहस्य रजततुल्यभेदावगाहितया भ्रमत्वम् आपद्येत जडमायाभिन्नं ब्रह्म इति ज्ञानस्य अबाधितार्थविषयत्वात् प्रमात्वं च प्रसज्येत तथाच सति श्रुति-स्मृति-सूत्र-पुराणसम्मतं ब्रह्म-तच्छक्त्यभेदमेव प्रमितं स्वीकुरु. किञ्च मायायाः कल्पितत्वे पूर्वोक्तम् अनादित्वं न घटेत ''यत् कल्पितं तत् सादि'' इति व्याप्तेः शुक्ति-रजतादौ गृहीतत्वात्. किञ्च कल्पितत्वे कल्पनसाधनम् इन्द्रियादिकं बुद्धिमात्रं वा अपेक्षितम्. विपर्यासस्य बुद्धिवृत्तित्वात्. **''संशयो अथ विपर्यासः''** (भाग.पुरा.३।२६।३०) इति तृतीयस्कन्धवाक्यात्. तच्च त्वन्मते मायिकमिति अन्योन्याश्रयः. नापि कल्पकः कश्चिद् उपपद्यते. ब्रह्मणः तत्त्वे (=कल्पकत्वे) भ्रांतत्वस्य जीवस्य तत्त्वे अन्योन्याश्रयस्य च आपत्तेः प्राग् उक्तत्वात्. मध्यमाधिकारिबोधार्थकं तादात्म्यपक्षमपि साधयन्तः तदुक्तदोषान् उद्धरन्ति **तादात्म्यपक्षः** इति. **असत्त्वाद्** इति असाधारणधर्मत्वे हेतुः. अभावस्य अधिकरणात्मकत्वेऽपि तव मायाभेदाभाववद् ब्रह्म-प्रपञ्चभेदाभावाद् 'ब्रह्म'इत्यादिव्यवहारवत् शक्ति-शक्तिमान् इति व्यवहारः तद्वदेव आधाराधेयभाव-व्यवहारः च तादात्म्येऽपि न विलुप्येत. अभावस्य भिन्नत्वेतु नित्यद्वैतापत्तिः

पूर्वम् अविद्यायाः अनन्तरं तद्ध्वंसस्य च सत्त्वात्. एतेन शक्तिः शक्तिमान् इति व्यवहारलोपप्रसंगाद् इति प्रत्युक्तम्. किन्तु तवैव तल्लोपप्रसंगः. तत्र कल्पितायाः तच्छक्तित्वायोगात्. नहि वह्नौ दाहशक्तिः आरोप्यते. रज्जौ सर्पकल्पनेऽपि न दंशशक्तेः रज्जुशक्तित्वं विद्वद्भिः स्वीक्रियते. ब्रह्मशक्तित्वमपि कल्पितम् इति चेद्; वस्तुतः कस्य शक्तिः सा माया? ब्रह्मशक्तितया कल्प्यते इति निर्धार्यताम्. यच्च सत्तादात्म्यनिषेधक ‘‘नो सदासीद्’’ (तैत्ति.ब्रा.२।८।९।३) इति श्रुतिविरोधाद् इति उक्तं तत्र असमस्तपदान्तरव्यवहितनिषेधकपदस्य समासो असंगतः. श्रुतिस्तु सृष्टेः प्राक् स्थूल-सूक्ष्मयोः ब्रह्मातिरिक्ततया सत्तामेव निषेधति नतु मायायाः सत्तादात्म्यम् असत्तादात्म्यं वा, तस्याम् ऋचि मायावाचकपदाभावात्. त्वदुदाहृतविलक्षणपाठेऽपि **‘किन्तु’**ना व्यवहितस्य तमसः पूर्ववाक्ये अन्वयासम्भवात्. किञ्च तत्र ‘सत्’पदेन ब्रह्मणः परिग्रहे तदा ब्रह्मणोऽपि अभावप्रसंगः. अपरिग्रहे शक्तेः ब्रह्मतादात्म्ये स्वीक्रियमाणे अस्याः श्रुतेः का प्रसक्तिः? यच्च मायायाः विनाशित्वस्य इत्यादि तत्तु भगवच्छक्तेः विनाशानंगीकारादेव निरस्तम् अन्यथा ‘‘**अनुच्छित्तिधर्माः**’’ (बृह.उप.४।५।१४) इत्यादिश्रुतीनां ‘‘**साच अनादिः अनश्वर**’’ (   ) इत्यादिस्फुटतर कौर्मादिस्मृतीनां च विरोधापातात्. ‘‘विभेदजनके’’ इति वाक्यन्तु व्याख्यातम्. यच्च ब्रह्मणोऽपि तिरोभावप्रसंगाद् इति तन्न भगवच्छक्त्या प्रत्यायितस्य अहंता-ममतारूप संसारस्यैव निवृत्तिः भगवच्छक्तेस्तु न नाशो नापि तिरोभावः इति सिद्धान्तात्. यथा इन्द्रजालिके प्रसन्ने तद्दर्शितो भयजनकः सिंह-समुद्रादिरेव निवर्तते नतु तस्य शक्तिः. अथ तिरोभावस्वीकारेऽपि न दोषः. मृद्-घटयोः तादात्म्येऽपि घटतिरोभावे मृदतिरोभावात्. नापि ऊर्मि-कूर्मचरणादि-तिरोभावे ऊर्मिमालि-कूर्मादिः तिरोधत्ते. तव भामत्यां गुणानां द्रव्यात्मकत्वप्रपञ्चनेऽपि तत्तद्गुणानां नाशे तिरोभावे वा न तद्द्रव्यं नश्यति तिरोभवति वा. अधिकन्तु चतुर्थश्लोकखण्डनादौ प्राप्तावसरम्. तदेतद् अखिलम् अभिसन्धाय आहुः **आधाराधेयभावस्तु** इत्यादिना. एतेन ‘‘शक्ति-शक्तिमतोः’’ (शु.मा.४८) इत्यादिमार्तण्डकारिकाः समर्थिताः. यत्तु भेदस्य असम्मतत्वे इत्यादि तत्तु तदर्थानवबोधात्. तथाहि : भेदाभेदपक्षो मतभेदेन द्विविधः. भेदो वास्तवः

अभेदस्तु आरोपितः इति एकः, यथा निम्बार्कानाम्. भेदः आरोपितो अभेदस्तु वास्तवएव इति इतरः. तत्र प्रकृते द्वितीयभेदाभेदस्यैव शुद्धाद्वैताबाधकत्वम् इष्यते भेदस्य आरोपितत्वात् अभेदस्यैव वास्तवत्वात् च. तदेव उपपादयितुं कारिका सूच्यते ‘‘तत्र भेद...’’ इत्यादि. ब्रह्मणि स्वशक्तिधर्मादिप्रतियोगिकभेदो नैव अस्ति सर्वधर्माश्रयत्वप्रतिपादकाद्वैतप्रतिपादकश्रुत्योः तथैव अविरोधसिद्धेः. उक्तादिप्रमाणैः ब्रह्मशक्तेः ब्रह्मत्वस्य निश्चयात् च. अतएव ‘‘**परास्य शक्तिः विविधैव**’’ (श्वेता.उप.६।८) इत्यत्र परत्वम् उच्यते ‘शक्तिः’इति एकत्वं प्रदर्श्य तस्याएव वैविध्यञ्च अवधार्यते ब्रह्मणः एकत्वात्. लोकदृष्ट्यातु शक्तयः परस्परभिन्नाइव भवेयुः. यदिच ब्रह्मशक्तिः ततो भिन्ना स्यात् तर्हि जडत्वं तस्याः आपद्येत तथाच अक्रूरादीनां चेतनमूर्तिमच्छक्त्यादिनिषेवितभगवद्दर्शनं न उपपद्येत श्रौतं परत्वं च बाध्येत. नच जीवशक्तितः उत्कृष्टत्वमेव परत्वम् इह कल्प्यम् अश्रौतत्वात् श्रुतिषु ‘‘**ब्रह्मविद् आप्नोति परम्**’’ (तैत्ति.उप.२।१) इत्यादौ ‘पर’शब्दस्य ब्रह्मणि सुप्रसिद्धत्वात् जीवेनैव कल्पिततया अभिप्रेयमाणायां तस्यां जीवशक्तितः उत्कर्षस्य वक्तुम् अशक्यत्वात् च, श्रौतं ‘**स्वाभाविकी**’’ इति कथनन्तु पीड्येतैव. अतः उक्तं भिन्नत्वेतु जडत्वं स्याद् इति. एतेन जडतायाः इष्टत्वात् च इति प्रत्युक्तम् उक्तचरकौमार्दिविरोधात् च. यश्च ‘‘**पराऽस्य**’’ इत्यादौ भेदः स बोधनाय. लोकानुरोधिनो जिज्ञासोः बोधसौकर्यार्थं ‘‘राहोः शिरः’’, ‘‘आनन्दं ब्रह्मणः’’, ‘‘यस्य ज्ञानमयं तपः’’ इत्यादिवद् आरोपितएव इति अर्थः. एवम् अनेन प्रकारेण धर्मि-धर्मविचारेऽपि ज्ञेयम्. ब्रह्मणि तद्धर्मभेदो नैव अस्ति ‘‘**नेह नाना अस्ति**’’ इत्यादिना तेषां ब्रह्मत्वनिश्चयात् भिन्नत्वेतु तज्ज्ञानादीनां जडत्वापातो, नित्यत्वाद् अद्वैतश्रुतिव्याघातः च. ‘‘**तस्य भासा**’’ इत्यादौ भेदस्तु सूर्यादिदृष्टान्तेन बोधनायैव इति भावः. अतो वास्तवभेदस्य असम्मतत्वेऽपि भेदाभेदस्य अबाधकत्वम् अबाधितं नापि उत्तरार्द्धविरोधः. ‘‘किन्तु तमः’’ इत्यादिकल्पनन्तु प्रत्युक्तं प्राक्. भेदाभेदांगीकारे प्रयोजनन्तु मध्यमाधिकारिबोधरूपं तत्रैव ‘‘**तत्र उत्तमा मध्यमाश्च कनिष्ठा हि अधिकारिणः तेषां प्रतीति प्रथमस्कन्धेतु श्रीहुताशनैः ‘इदंहि विश्वम्’** (भाग.पुरा.१।५।२०) **इत्यत्र सुबोधिन्यां निरूपिता**’’ (शु.मा.३०)

इत्यादिना प्रतीतित्रयं निरूप्य ''अतोहि मध्यमः पक्षः शुद्धाद्वैतानुरोधतः बोधाय बहुसन्दर्भे गोस्वामि पुरुषोत्तमैः श्रीमदाचार्यचरणैः यत्र कुत्रापि दर्शितः'' (शु.मा.३५) इति उक्तमेव इति सकलम् अनाकुलम्. 'प्रकाशाश्रय'सूत्रम् 'अरूपवत्'सूत्रं च पुरस्ताद् व्याख्यास्यामः.

(१) [इयञ्च माया 'अविद्या'शब्देनापि व्यवह्रियते ''माया च अविद्या च स्वयमेव भवति'' (नृ.उ.उप.९) ''तरति अविद्यां विततां हृदि यस्मिन् निवेशिता'' इत्यादि श्रुति-स्मृतिभ्यः. तदेतद् आह 'अविद्या'ख्या माया'' इति. एवं सर्वस्य नाम-रूपात्मकजगतो मायिकत्व-सिद्ध्या तदन्तःपाति-तद्धेतुत्वस्य च तथात्वम् इति आह हेतुत्वञ्च इति. ननु ब्रह्मणो माययाऽपि हेतुत्वे निर्विकाररत्वाऽसंगत्वयोः हानिः इति चेद्, न मायया सिंहादि-भूतस्य ऐन्द्रजालिकस्य विकाराद्यनुपलब्धे. ऐन्द्रजालिको वस्तुतो विकारादिमान् इति चेद् आस्ताम्. एतावता हि न विकारित्वादि तत्र प्रयोजकं गौरवाद् मानाभावात् च. सिंहादि-प्रकारकं भानमात्रं तत्र इति चेद्, न; वयं ब्रह्मणो वस्तुतः तथाभावं स्वीकुर्मः किन्तु तथा-प्रतीतिमात्रं विवर्तवादांगीकारात्. अतएव मायया बहुरूप-ज्ञानमेव श्रुतिः आह ''इन्द्रो मायाभिः पुरुरूपः ईयते'' (बृह.उप.२।५।१९) इति, कारकस्य क्रियान्वय-नियमात्, कारक-विभक्तेः इतर-विभक्तितः उचितत्वात् च. तस्मात् प्रातीतिकस्य जगतइव तद्धेतुत्वस्यापि मायिकस्य तत्र सम्भवाद् न कापि अनुपपत्तिः. अतएव ''अक्षमा भवतः केयं साधकत्व-प्रकल्पने कि न पश्यसि संसारं तत्रैव अज्ञानकल्पितम्'' (खं.खा.) इति अभियुक्तोक्तं संगच्छते. एवञ्च ब्रह्मणः तटस्थलक्षणं सिद्धम् इति आह परस्य लक्षणम् इदम् इति.]

(२) यस्तु “मायाच अविद्याच स्वयमेव भवति” (नृ.उ.उप.९) इत्यादिना माया-ऽविद्ययोः अभेदः उक्तः सोऽपि न सम्भवति मायायाः भगवच्छक्तिरूपत्वात्. अविद्याच जीवनिष्ठा देहादौ अहंबुद्धिहेतुः ज्ञानशक्तितिरोभावरूपा. इयञ्च माया ‘अविद्या’शब्देनापि व्यवह्रियते इति वदताच ‘माया’-‘ऽविद्या’शब्दयोः पर्य्यायत्वम् उक्तं तच्च त्वन्मतेऽपि न सम्भवति जीवेश्वरयोः त्वन्मते उपाधिकृतएव भेदः, सच उपाध्यैक्ये न सम्भवति मायाविद्ययोः ऐक्ये जीवस्य सर्वज्ञत्वम् ईश्वरस्य अल्पज्ञत्वमपि स्यात्. एवञ्च मायायाः असिद्धौ जगतो मायिकत्वं न सम्भवति किन्तु वास्तवत्वमेव. तत्कारणत्वमपि ब्रह्मणि न अस्ति मायिकं किन्तु वास्तवम्. अतएव उक्तम् “उत्पत्ति-स्थिति-नाशानां जगतः कर्तृः वै बृहत् वेदेन बोधितं तद्धि न अन्यथाभवितुं क्षमं नहि श्रुतिविरोधो अस्ति कल्पोऽपि न विरुध्यते सर्वभावसमर्थत्वाद् अचिन्त्यैश्वर्य्यवद् बृहत्” (ब्र.सू.भा.कारि.१।१।२). जगत्कर्तृत्वम् ईश्वरस्य वेदेन बोध्यते. नच तद् आरोपितम् इति शक्यवचनं निरंकुशस्य तस्य अन्यत्र असिद्धतायाः स्वयमेव वक्ष्यमाणत्वात्. किञ्च वेदः परमाप्तः अक्षरमात्रमपि मिथ्या न वदति. यदि क्वापि वदेत् “स्वर्गकामो यजेत” ( ) इत्यादि विध्यंशे स्वरूपलक्षणाद्यंशे च अविश्वसनीयः स्यात्. ततश्च सन्मार्गमात्रम् उच्छिद्येत. अतो यद्-यद् यथा वदति तत् तथा इति मन्तव्यम्. तेन कर्तृत्वं वेदोक्तत्वाद् वास्तवमेव सिध्यति. नच कर्तृत्वाङ्गीकारे स्वरूपलक्षणविरोधो येन तदनुरोधाद् अवास्तवं कल्प्येत. तस्माद् उक्तसत्त्वादिधर्मवत् कर्तृत्वस्यापि उपपत्तिः. नच ब्रह्म यावद्धर्मरहितम् इति वक्तुं शक्यं, स्वरूपलक्षणविरोधात्. तत्र ब्रह्मणि सत्यत्वादीनां स्वीकृतत्वात्. नच तेषाम् असत्य-जड-सान्तत्व-व्यावृत्त्यर्थत्वमेव इति वाच्यं सत्यत्वादिना ब्रह्मणोः

अप्रतीत्यापत्तेः तत्तद्भेदधर्मित्वसिद्ध्याच घटकुटीप्रभातन्यायः आपद्येत. ननु लक्षणद्वयस्य एकपरत्वे सर्वासु श्रुतिषु एकमेव ब्रह्म प्रतिपाद्यं तदा ''अस्थूला'' (बृह.उप.३।८।८)दिवाक्येष्वपि तदेव निरूप्यतइति निधर्मकत्वं बलाद् आपतितम् इति चेद्; न, नहि अस्थूलादिवाक्यैः अलौकिकधर्माः प्रतिषिध्यन्ते किन्तु लोकप्रतीताः. एवं प्रतीतमेव प्रतिषिध्यते न अप्रतीतं प्रसञ्जयितुम् अशक्यत्वेन प्रतिषेधानर्हत्वात्. नापि श्रुतिप्रतीताः तुल्यबलत्वात्. यदि उक्ता सत्यत्वादयोऽपि धर्माः लौकिकत्वे नादृताः तदा लौकिक-श्रुतिप्रतीतसाधारण्येन सर्वनिषेधे ब्रह्माज्ञानमेव प्रसज्येत. तथाच स्वरूपलक्षणमपि व्यर्थं स्यात्. यदिच लौकिकत्वेऽपि श्रौतत्वेन कारणगतं सत्यत्वं प्रतिषिध्यते इति उच्यते तदा धर्मसंकोचस्य आवश्यकत्वेन कर्तृत्वमपि तथा अस्तु तस्यापि श्रौतत्वात्. ननु सत्त्वस्य लौकिकत्वेऽपि व्यावहारिकस्यैव तस्य लौकिकत्वं पारमार्थिकन्तु अलौकिकमेव इति तद् न निषिध्यते इति चेत्, कर्तृत्वमपि लौकिकमेव निषिध्यते अनेकभूतभौतिकदेवतिर्यङ्मनुष्यानेकलोकाद्भुतरचनायुक्तब्रह्माण्डकोटिरूपस्य प्रपञ्चस्य मनसापि आकलयितुम् अशक्यरचनस्य अनायासेन उत्पत्ति-स्थिति-भंग-करणं न लौकिकम् अतः तदपि न निषिध्यते इत्येव अंगीकरणीम्. नच अगत्या सत्यत्वं तथा अस्तु कर्तृत्वन्तु आरोपितमेव इति वाच्यं; तस्यापि आरोपितस्य वक्तुं शक्यत्वेन गतेः अभावात्. तस्माद् ब्रह्मणि वेदबोधितं कर्तृत्वं वास्तवमेव. ब्रह्मणः सकलविरुद्धधर्माश्रयत्वस्य वेदबोधितत्वात् कर्तृत्वे निर्विकारत्वं सम्भवत्येव. वास्तवकर्तृत्वमपि यत्र न निर्विकारत्वासंगत्वयोः हानिकरं मायिकं तत् करिष्यति शंका दूरतएव अपास्ता. अतएव तदुत्तरं यद् उक्तं मायया सिंहादिभूतस्य ऐन्द्रजालिकस्य इत्यादि तदपि अस्मदसम्मतत्वाद् उपेक्ष्यम्. मायायाएव असम्भवेन

संसारस्य अमायिकत्वासम्भवात् ‘‘किं न पश्यसि संसारम्’’ (खं.खा.) इत्यादि असंगतमेव.

(३) सहस्राक्षे इयञ्च माया इत्यादिं परस्य लक्षणम् इदम् इति इत्यन्तं भागं निरस्यन्ति **यस्तु माया च अविद्या** इत्यादिना **संसारम् इत्यादि असंगतमेव** इत्यन्तेन. अत्र इदं ज्ञेयं यत्तु ‘‘**मायाच अविद्या च स्वयमेव भवति**’’ (नृ.उ.उप.९) इति नृसिंहोत्तरतापनीयनवमखण्डवाक्यम् उक्तं तत्तु ब्रह्मैव स्वयम् इतरानपेक्षगुणमयमायारूपं च अविद्यारूपं च भवति इत्यर्थकम्. अतः इदमपि मायायाः ब्रह्माभिन्नत्वे प्रमाणं मायैव अविद्या भवति इति अर्थेतु ‘च’कारद्वयवैय्यर्थ्यं स्यात्. अतएव तत्र उपसंहारे ‘‘**क्वैषानुज्ञा इति एषएव आत्मा इति होवाच**’’ (नृ.उ.उप.९) इति तस्याअपि आत्मरूपत्वमेव श्रावितम्. ‘‘क्वैषा’’ इति पाठे ‘‘**विद्धि उद्धव! शरीरिणां बन्ध-मोक्षकरी आद्ये मायया मे विनिर्मिते**’’ (भाग.पुरा.११।११।३) इति एकादशे मायायाः कार्यद्वयस्मरणाद् मायैव अविद्या भवति इति अर्थादरेऽपि मायायाः भगवद्रूपत्वं निर्बाधमेव. उक्तश्रुतेः ‘‘**मायात्मने नमः**’’ (महाभा.१२।४७।२६) इति स्मृतेः च प्रकाशाश्रयन्यायेन शक्ति-शक्तिमतोः अभेदात् च. शक्तितातु ‘‘**देवात्मशक्तिं स्वगुणैः निगूढाम्**’’ (श्वेता.उप.१।३) इत्यादि बहुतर-श्वेताश्वतरप्रभृतिश्रुतिषु प्रकृततापनीयखण्डे च आम्नातैव मुण्डके ‘‘**कर्तारम् ईशं पुरुषं ब्रह्मयोनिम्**’’ (मुण्ड.उप.३।१।३) एकादशस्य चतुर्विंशाध्याये ‘‘**द्विधा समभवद् बृहत्**’’ (भाग.पुरा.११।२४।३) एवमादिश्रुतिपुराणेषुच गुणमयमायायाः स्पष्टं ब्रह्मपरिणामता बोध्यते. सा मायायाः कार्यरूपा अविद्याच जीवस्यैव उपाधिः नतु ब्रह्मणि तत्सम्बन्धः ‘‘**शरीरिणां बन्ध-मोक्षकरी**’’ इति स्मरणात् तत्रैव ‘‘**एकस्यैव मम अंशस्य जीवस्यैव महामते बन्धो अस्य अविद्यया अनादिः**’’ (भाग.पुरा.११।११।४) इति अवधारणस्मरणात् च. प्रकृतेऽपि ‘‘**न अविद्या अनुभवात्मनि स्वप्रकाशे सर्वसाक्षिणि अविक्रिये अद्वये**’’ (नृ.उ.उप.९) इति ब्रह्मणि सा प्रतिषिध्यते. पूर्वमपि तत्र ‘‘**अस्य व्यंजिका नित्यनिवृत्ता**’’ (नृ.उ.उप.९) इति परमात्मनः सकाशात् तस्याः नित्यमेव निवृत्तत्वं श्राव्यते. स्मृतावपि प्रथमः एवकारो

जडान्तर्यामिरूपांशान्तरयोः द्वितीयो ब्रह्मणः च तद्योगं व्यवच्छिनत्ति. तेन ‘अविद्या’ख्यमायावशाद् इच्छोद्भवो हेतुकत्वं बोधः इति उक्तिः प्रत्युक्ता. तत्रहि खण्डे विषयतारूपस्य अन्तरासर्गस्य वा अविद्याहेतुकत्वं बोध्यते, नतु भगवत्परिणामस्य वास्तवप्रपञ्चस्य. तस्यतु प्रत्युत भगवद्योनिकत्वं सत्यत्वं च तत्रापि निरूप्यतएव. वास्तवप्रपञ्चाद् विषयतारूपजगतो अन्यत्वं मायिकत्वं च श्रीमदाचार्यचरणैः सुबोधिन्यां “**ऋते अर्थं यत् प्रतीयेत** ” (भाग.पुरा.२।९।३३), “**अनुमितम् अन्तरा त्वयि विभाति मृषैकरसे**” (भाग.पुरा.१०।८४।३७) इत्यादिस्थलेषु प्रपञ्चितम्. प्रकृतखण्डेहि आरम्भे जीवस्यैव ‘ॐ’कारवाच्यात्मत्वेन उपदेशे देवैः प्रार्थितः प्रजापतिः तथा इति स्वीकृत्य “**उपद्रष्टाः अनुमन्ताः एषः आत्मा सिंहः चिद्रूपएव**” (नृ.उ.उप.९) इति अहंप्रत्ययवेद्यस्य आत्मनः परमात्मत्वं चिद्रूपत्वं च प्रतिज्ञाय क्रमाद् उभयत्र अविकारत्वं सर्वत्र उपलब्धृत्वं च हेतुतया उक्त्वा “**नहि अस्ति द्वैतसिद्धिः आत्मैव सिद्धो अद्वितीयो माययाहि अन्यदिव**” (नृ.उ.उप.९) इति अन्तरासर्गरूपं द्वैतमेव प्रतिषिध्य तस्यैव मायाहेतुकत्वं च अभिधाय कथम् एतद्? इति आकांक्षायाम् आत्मनः परत्वं, द्वैतस्य सर्वस्य अविद्यारूपत्वं च प्रतिज्ञाय तत्साधयितुं “**तथाहि प्राज्ञः**” इति सुषुप्तिकाले सकलद्वैतविलयं बोधयित्वा “**सैषा अविद्या जगत् सर्वम्**” इत्यादिना “**चैतन्यदीप्ता**” (नृ.उ.उप.९) इत्यन्तेन सुषुप्त्यादौ बाधाद् गमनशीलस्य सर्वस्य भेदप्रपञ्चस्य अविद्याकत्वम् उपपादितवान्. सुषुप्तौहि बुद्धिपरिकल्पितो भेदप्रत्ययएव लीयते नतु घटादयः प्रापञ्चिकाः पदार्थाः, उत्थानोत्तरं तथैव गृहादेः प्रतीयमानत्वात्. नच स्वापकाले नष्टाः उत्थानकाले पुनः उत्पन्नाः ते इति वाच्यं, प्रत्यभिज्ञाविरोधात् तस्याः साजात्यनिबन्धनत्वकल्पने मानाभावो अनन्तवस्तुकल्पनागौरवं च. विजनकुट्ट्यादौ सुप्तेन स्वापात् पूर्वस्यापि तद्दीपपात्रे तैलवर्त्त्यादिक्षयस्य स्वापविरामोत्तरम् अनुभवात्, पूर्वं प्रवर्तितघटिकायन्त्रादौ यथोचितं लोहकंटकपरिभ्रम-घंटाभिघातादेः स्वापविरामोत्तरम् अनुभवात् च तेएव पदार्थाः नतु ते सुषुप्तौ नष्टाइति निश्चियते उत्पादकाभावात् च गृहादेः पुनरुत्पत्तिः अशक्यवचना. बुद्ध्यैव उत्पत्तिसम्भवे प्रथमनिर्माणेऽपि न कोऽपि कार्वादीन् अपेक्षेत. किञ्च एवं सति सुषुप्तौ

अप्रत्ययाद् उत्थानावसरे शरीरमपि अन्यदेव बुद्ध्या कल्प्यते इति वाच्यं, तथाच दाम्पत्य-पितृपुत्र-भावादि-हान्या महानेव उपप्लवः एवं सति बौद्धमतप्रवेशः च इति अलम्. अतो यः सुषुप्तौ भेदप्रत्ययो लीयते तस्यैव आविद्यकत्वम् इह उच्यते इति सिद्धम्. अतएव तत्र अग्रे अनुपदं ‘‘**तस्माद् आत्मनएव त्रैविध्यं सर्वत्र योनित्वमपि**’’ (नृ.उ.उप.९) इत्यादिना ब्रह्मणएव तत्तद्रूपत्वं योनिपदेन सर्वोपादानत्वं च श्राव्यते. ननु वास्तवप्रपञ्चात् को अतिरिक्तो असौ विषयतासर्गः? इति चेद् उच्यते : घटोहि ब्रह्मरूपत्वाद् वस्तुतः सर्वधर्माश्रयएव तथापि तत्र यः तावन्मात्राकार तावन्मात्रधर्मकत्वरूपः परिच्छेदो द्वैतापरपर्यायो अनुभूयते स जीवगताविद्ययैव द्रष्टुः विषयस्य च अन्तरा जन्यते, सएव मिथ्या. पौराणानि मिथ्यात्ववचांस्यपि तद्विषयाण्येव इति संक्षेपः. एवञ्च जड-जीवरूपस्य कार्यजातस्य अमायिकत्वबोधनायैव ‘‘**सर्वं सर्वमयं सर्वेजीवाः सर्वमयाः सर्वावस्थासु तथापि अल्पाः**’’ (नृ.उ.उप.९) इति आम्नायते अल्पा अणुत्वात्. अग्रेच ‘‘**सवा एषः भूतानि इन्द्रियाणि**’’ (नृ.उ.उप.९) इत्यादिना वास्तवप्रपञ्चस्य सृष्टिं तत्र प्रवेशं च उक्त्वा मूढवद् व्यवहरणमेव मायामात्रहेतुकम् उक्तं मायिकत्वे वा आत्मनः सृष्टिप्रवेशौ न घटेयाताम्. सर्वस्य ब्रह्मात्मकत्वादेव ‘‘**तस्माद् अद्वयएव अयम् आत्मा**’’ (नृ.उ.उप.९) इति प्रतिज्ञाय सन्मात्रत्वादीनि द्वादशस्वरूपलक्षणानि तस्य अभिधाय ‘‘**सत्तामात्रंहि इदं सर्वं सदेव पुरस्तात् सिद्धंहि ब्रह्म नह्यत्र किञ्च अनुभूयते**’’ (नृ.उ.उप.९) इति सर्वस्य कण्ठरवेण सत्यत्वं, ब्रह्मरूपत्वं, मुक्तिदशायां तदतिरिक्ततया कस्यचिदपि अनुभवाभावं च निरूप्य तदानीं पूर्ववत् परिछेदानुभवः कुतो न इति आकांक्षायां हेतुभूता अविद्याभावाद् इति आशयेन ‘‘**न अविद्यानुभवात्मनी**’’ इत्यादि उक्त्वा ‘‘**सर्वभूतस्थम् आत्मानं सर्वभूतानिच आत्मनि ईक्षते योगयुक्तात्मा**’’ (भग.गीता ६।२९) इति दर्शयितुं ‘‘**पश्यत इहापि सन्मात्रम् असद् अन्यत् सत्यंहि इत्थं पुरस्तात्**’’ (नृ.उ.उप.९) इत्यादि आम्नातम्. अर्थस्तु ब्रह्मभावे सति इह शारीरेऽपि सन्मात्रं सर्वं घटादीप्रपञ्चं पश्यतः यच्च असद् अविद्याहेतुकम् असत्यं प्राग् उक्तं तत् सन्मात्रप्रपञ्चाद् अन्यदेव अन्तरासर्गरूपम् इत्यादिः ज्ञेयः.

अग्रेच सृष्टिकाले चिदानन्दतिरोभावात् सन्मात्रस्यापि जडप्रपञ्चस्य तदानीम् आनन्दचिद्घनत्वम् इदानीं तिरोहितानन्दतया सच्चिन्मात्रस्यापि जीवस्य तदा-तदा आविर्भावात् सुखरूपत्वञ्च इत्यादिकं विस्तरेण निरूपितम् इति तत्सर्वं ततएव अवधेयम्. तथा "**नहि इदं सर्वं कदाचित्**" (नृ.उ.उप.९) इति इदं कार्यजातं सर्वं कदाचिद् न, अपितु सर्वदा इत्यपि उक्तम्. यच्च सहस्राक्षकृता वाक्यम् उपन्यस्तं तत्तु "**सा एषा वटबीजसामान्यवद् अनेकवटशक्तिः एकैव, तद् यथा वटबीजसामान्यम् एकम् अनेकान् स्वाव्यतिरिक्तान् वटान् सबीजान् उत्पाद्य तत्र-तत्र च पूर्णं सन्तिष्ठति एवमेव एषा माया स्वाव्यतिरिक्तानि परिपूर्णानि क्षेत्राणि दर्शयित्वा जीवेशौ आभासेन करोति माया च अविद्या च स्वयमेव भवति**" (नृ.उ.उप.९) इति श्रूयते. अर्थस्तु सर्वोपादानत्वाद् अत्र वटबीजस्थानापन्नं ब्रह्मैव "**बीजं मां सर्वभूतानां विद्धि पार्थ! सनातनम्**" (भग.गीता ७।१४) इति स्मरणात्. छान्दोग्याष्टमाध्याये "**न्यग्रोधफलम् अदः आहरः**" (छान्दो.उप.६।१२।१) इति खण्डे वटधानाणिमदृष्टान्तेन ब्रह्मणो वटदृष्टान्तेन प्रपञ्चस्य च स्पष्टतया निरूपणात्. तथाच वटबीजसामान्यं यथा वटबीजस्य असाधारणधर्मः तदेकवृत्ति तथा माया ब्रह्मणः स्वाभाविकीशक्तिः तन्मात्रवृत्तिः. यथाच कार्येषु वटेषु अनेकेषु अनुवर्तमानमपि बीजसामान्यं वस्तुतः एकमेव तथा इयं क्षेत्रेषु व्यष्ट्यविद्यात्मना नानारूपापि एकैव. तदेतद् उक्तम् **एकैव** इत्यन्तेन. दार्ष्टान्तिके '**वट**'शब्दो देहादिरूपक्षेत्रपरः तद्वत् प्रसृमरत्वाद् अल्पफलत्वाद् उभयसुपर्णस्थित्याधारत्वात् च. दृष्टान्ते दुरूहांशं स्पष्टीकृत्य विवक्षितांशेन दार्ष्टान्तिके योजयति **तद् यथा** इति अव्यतिरेको अत्र अविनाभावएव नतु अभेदः, वटेषु केवलसामान्यरूपतायाः अभावात्. एकस्मादपि बीजात् साक्षात्परम्पराभ्याम् अनेके वटाः उत्पद्यन्तएवेति न अनेकत्वोक्तिविरोधः. 'क्षेत्र'शब्दश्च इह देहन्द्रियप्राणान्तःकरणपरः गीतात्रयोदशाध्याये तथा निरूपणाद् नतु शरीरमात्रपरः, अतएव दृष्टान्ते अनेकत्ववद् दार्ष्टान्तिके परिपूर्णत्वम् उक्तं तत्तदध्यासरूपेण सर्वत्र अविद्यासम्बन्धात् क्षेत्रेषु अस्याः अव्यतिरेकः. उत्पादनस्थानापन्नञ्च अत्र तथा प्रदर्शनम् अध्यासानाम् अवास्तवत्वात्. **जीवेशौ** च इह कार्यरूपौ करोति इति उक्तेः. तत्र जीवाः "**त्रयः प्राजापत्याः**",

‘‘**त्रिविधा जीवसंघास्तु**’’ (बृह.उप.५।२।१) इति बृहदारण्यकपञ्चरात्रादिश्रुतिस्मृत्युक्ताः सत्त्वाद्युपहिताः भगवदंशाः, ईशाश्च अन्तर्यामिणः जीववत् क्षेत्रान्तःस्थत्वप्रतीतेः जात्यभिप्रायम् उभयोः एकत्वम्. ‘‘**द्वौ ज्ञाज्ञौ ईशानीशौ**’’(श्वे.उप.१।९) इत्यादिश्रुत्यन्तरप्रसिद्धौ इमौ अत्रापि ‘‘अभिमन्ता जीवो नियन्ता ईश्वरः’’ इति उक्तौ. दृष्टान्ते सम्पूर्णसंस्थितेः स्थानापन्नं जीवान्तर्यामिणोः आभासेन करणं स्वस्य द्विधाभवनञ्च. यथा जलम् अस्मिन् प्रविष्टचन्द्रतेजोंशमेव चन्द्राभासं करोति तथा इयमपि स्वाविनाभूतक्षेत्रेषु गुणेषु च प्रविष्टं ब्रह्मांशं ब्रह्माभासं करोति. आभासद्वैविध्यसिध्यर्थञ्च स्वयं द्विधा भवति तत्र ‘‘**तदेव अनुप्राविशत्**’’(तैत्ति.उप.२।६), ‘‘**गामाविश्य च भूतानि**’’ (भग.गीता १५।१३) इत्यादिषु अन्तर्यामिब्राह्मणेच प्रसिद्धे समष्टिरूपे मायाख्या सा. ‘‘**न अहं प्रकाशः सर्वस्य योगमायासमावृतः**’’ (भग.गीता ७।२५) ‘‘**मायाजवनिकाछन्नम्**’’ (भाग.पुरा.१।८।१९) इत्याद्युक्तेः. व्यष्टिरूपे नियन्तरि ईश्वरे अन्तर्यामिण्यपि सा ‘‘**ईश्वरः सर्वभूतानां हृद्देशे अर्जुन! तिष्ठति भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया**’’ (भग.गीता १८।६१) इति मायावत्त्वस्मरणात्. ब्रह्माण्डशरीरे समष्टिरूपे हिरण्यगर्भेतु अविद्या तत्रैव ‘‘**सर्वाहंमानी हिरण्यगर्भः**’’ (नृ.उ.उप.९) इति अभिमानश्रावणात्. व्यष्टिरूपे अभिमन्तरि सात्त्विकादिभेदभिन्ने कार्यजीवेऽपि पञ्चपर्वा सा कठ-मुण्डकादिषु ‘‘**अविद्यायाम् अन्तरे वर्तमानाः**’’(कठोप.१।२।५), ‘‘**अनीशया शोचति मुह्यमानः**’’ (मुण्ड.उप.३।१।२) इत्यादिश्रावणात्. इत्थम् अत्र तस्याः द्विधाभावकथनस्य आशयः प्रतिभाति. एवम् अस्याः द्विधा भूत्वा व्यष्टि-समष्टिक्षेत्रेषु सर्वत्र अवस्थानाद् दृष्टान्तोक्ताद् तत्र-तत्र सम्पूर्णतया संस्थितिः सङ्गच्छते. मायायाअपि व्यष्टिसमष्टिभावादेव ‘‘**स्वयं गुणाभिन्नाङ्कुरेष्वपि गुणभिन्नाः सर्वत्र**’’ (नृ.उ.उप.९) इति उक्तं गुणैः भेदवति इति अर्थः. यथाच व्यष्टिरूपाणां जीवानां सात्त्विकत्वादिना त्रैविध्यं तथा समष्टिरूपस्यापि एकैकगुणाभिमानिब्रह्माद्यात्मना त्रैविध्यम्. अतएव ‘‘**हिरण्यगर्भः त्रिरूपः ईश्वरवद् व्यक्तचैतन्यः सर्वगो हि**’’ (नृ.उ.उप.९) इति अभिहितम्. तत्र मायागुणानाम् आवरकत्वमात्रम् अभिप्रेत्य ‘‘**ब्रह्म-विष्णु-शिवरूपिणा चैतन्यदीप्ताः**’’ (नृ.उ.उप.९) इति उच्यते.

रूपाणितु ब्रह्मादयः त्रिविधजीवादिकञ्च वस्तुतः परमात्मनएव इत्यतः पठ्यते. ‘‘**तस्माद् आत्मनएव त्रैविध्यं सर्वत्र योनित्वमपि**’’ (नृ.उ.उप.९) इति ‘‘**तद्विष्णुः ईशानो ब्रह्मा अन्यदपि सर्वं सर्वगम्**’’ (नृ.उ.उप.९) इतिच इत्थं ब्रह्मरूपत्वे सत्येऽपि प्रपञ्चे यद् जडत्वं मोहात्मकत्वं संख्याकृतम् आनन्त्यं मिथ्यात्वं च प्रतीयते तद् अस्याः सर्वत्र अविनाभावादेव. अतएव ‘‘**तद् एतद् जडं मोहात्मकम् अनन्तं तुच्छम् इदं रूपम् अस्य**’’ (नृ.उ.उप.९) इति विषयतासर्गस्य पृथग्रूपं निरूप्यते ‘‘**अस्य व्यञ्जिका**’’ इत्यादिना जडत्वादेः प्रत्यायिका च सैव उच्यते जडत्वादि प्रत्यायन् असामर्थ्ये हेतवश्च क्रमेण ‘‘**सा एषा चित्रा सुदृढा बह्वंकुरा स्वयं गुणभिन्नाः**’’ (नृ.उ.उप.९) इति विशेषणैः ज्ञाप्यन्ते. ‘‘**क्षेत्राणि दर्शयित्वा जीवेशौ आभासेन करोति**’’ (नृ.उ.उप.९) इति उक्त्या जलदर्पणादिवद् आभासाधारत्वं क्षेत्राणामेव आयाति नतु पराभिमतरीत्या केवल मायाविद्ययोः. ‘‘**भूते भूते व्यवस्थितः**’’, ‘‘**देवः क्षेत्रेषु एवम् अजः अयम् आत्मा**’’ (ब्रह्मबिन्दु उप.१२) इति प्रतिबिम्बताबोधकश्रुत्यन्तरेऽपि तथैव सिध्यति. पराभिप्रेतप्रतिबिम्बवादस्तु अष्टमश्लोकखण्डनावसरे विस्तरेण निराकरिष्यते. ‘‘**क्षेत्राणि दर्शयित्वा**’’ आभासकरणस्य कथनेन जीवेशभावप्राक्कालिके अस्मिन् दर्शने द्रष्टृत्वं परस्यैव शुद्धस्य सिध्यति तच्च क्षेत्राणाम् अमायिकत्वएव घटते. तेषां विवर्तरूपत्वेतु अभ्रान्तईश्वरदर्शनगोचरता न स्यात्. तस्माद् ब्रह्मकार्यजडजीवयोः ब्रह्मात्मकत्वमेव अभिप्रेत्य तत्र ‘‘**तद् एतत् सत्यम्, आत्मा ब्रह्मैव, ब्रह्म आत्मैव, अत्रह्येव न विचिकित्स्यमिति ‘ओम्’इति सत्यम्**’’ (नृ.उ.उप.९) इत्यादि बहुतरम् आम्नातम्. साकल्येन एतत्खण्डस्य अर्थस्तु श्रीपुरुषोत्तमचरणैः नृसिंहोत्तरतापनीयदीपिकायां ‘‘**दृश्यतेतु**’’ (ब्र.सू.२।१।६) इति सूत्रे भाष्यप्रकाशे कृतइति ततो ज्ञेयः. मयापि अस्मत्सम्मतवास्तवतद्व्याख्यानदार्ढ्याय अधिकं वक्तव्यं तद्दीपिकाप्रकाशे वक्ष्यते. तस्माद् इदमपि वाक्यं न त्वदिष्टव्यवस्थासाधकम्. ‘माया-ऽविद्या’शब्दयोः परस्परपर्यायत्वेतु जीवेशयोः उपाधेः भेदस्य असिद्ध्याः जीवेशविभागासिद्धिः तथाच ‘‘**जीवेशौ आभासेन**’’ इति अव्यवहितपूर्वोक्तिविरोधो ‘‘**जीवः ईशो विशुद्धाचिद्**’’ इति सिद्धान्तभङ्गः. अविद्याख्यमायावशाद् इति पञ्चम्यन्तञ्च इच्छोद्भवः इत्यत्र हेतुत्वञ्च

इत्यत्र च हेतुबोधकम् उपन्यस्तम् इति ईश्वरोपाधेरपि अविद्यात्वं वदतः तव अल्पज्ञत्वसर्वज्ञत्वयोः विपर्ययः च दुर्वारः स्यात्. यच्च **‘‘तरति अविद्याम्’’** इति वाक्यं तत्तु सति समूलत्वे प्रागुक्तार्थमेव. अत्र ईश्वरोपाधेः तरणे त्वद्रीत्या हृदि निवेशनमपि अशक्यं ध्यानविषयस्वरूपस्यापि मायिकत्वाङ्गीकारात्. यच्च एवं सर्वस्य नाम-रूपात्मकजगतो मायिकत्वसिद्ध्या तदन्तःपाति-तद्धेतुत्वस्य च तथात्वम् इति आह हेतुत्वञ्च इति युक्तम्. तत्तु प्रपञ्चस्य अमायिकतायाः ब्रह्मरूपतायाः च समर्थिततया वास्तवत्वेन तदन्तःपातितद्धेतुत्वमपि वास्तवमेव सिद्धति नतु मायिकम् इति उपेक्ष्यम्. वस्तुतस्तु प्रपञ्चहेतुत्वस्य ब्रह्मधर्मत्वात् तदतिरिक्ते तदभावाच्च तस्य प्रपञ्चान्तःपातित्वोक्तिः दुर्बलच्छलनफलिकैव तद् आहुः **एवञ्च मायायाः** इत्यादिना. अथ जन्माद्यधिकरणभाष्ये प्रपञ्चितं जगत्कर्तृत्वरूपब्रह्मलक्षणस्य वास्तवत्वं मायिकत्वनिरासं च दिङ्मात्रेण दर्शयितुं तत्र उक्तयुक्तीः अनुवदन्ति **अतएव उक्तम्** इत्यादिना. इदं कारिकाद्वयमपि तत्रत्यम्. अत्र ‘जन्मादि’सूत्रे **‘अस्य’** इति पदस्य अर्थो जगतः इति. **‘जन्मादि’**पदस्य अर्थ उत्पत्तिः इत्यादिः. **‘यतः’** इति पञ्चम्याः अर्थः कर्तृ इति. तत्र ‘यत्’-शब्दाक्षिप्तस्य ‘तद्’ इत्यस्य विशेष्यं ब्रह्म इत्येव पूर्वसूत्रबलादपि सिध्यति इति तत्र अनुषज्यमान‘ब्रह्म’पदस्य अर्थो बृहद् इति. **‘‘शास्त्रयोनित्वाद्’’** इति अंशस्य अर्थम् आहुः **वेदेन** इतिहि **यतः** तत् कर्तृत्वं **‘‘वेदेन बोधितम्’’**(ब्र.सू.भा.१।१।२), अतः **‘अन्यथा’** औपचारिकं भवितुं न क्षमम्. तस्य वास्तवत्वे सत्येव **‘‘यतो वा’’** इत्यादि तद्बोधकश्रुतीनां विरोधो न स्यात्. **‘‘कर्ता कारयिता हरिः’’**(   ) इत्यादिकल्पस्मृतिविरोधोऽपि न स्यात्. किञ्च स्वरूपलक्षणकार्यलक्षणश्रुत्योः तदनुकूलस्मृत्योः च विरोधलेशोऽपि न अस्ति येन एकत्र उपचारः कल्प्येत इति वक्ष्यते. अविरोधे हेतुः यतो ब्रह्म **‘‘सर्वभवनसमर्थत्वाद् अचिन्त्यशक्तिकम्’’** (द्र.ब्र.सू.भा.१।१।२) इति. अतो अकर्त्रपि कर्ता. एतदेव यथा भाष्ये प्रकाशे च यथा विभक्तं तथा अनुवदन्ति **जगत्कर्तृत्वम्** इत्यादिना **वेदेन** इति **‘‘यतो वा इमानि भूतानि जायन्ते’’**(तैत्ति.३।१), **‘‘तस्माद् वा एतस्माद् आत्मनः आकाशः सम्भूतः’’**

,**“इदं सर्वम् असृजत”**(तैत्ति.उप.२।१,२।६), **“सः ईक्षत लोकान् नु सृजाः इति, सः इमान् लोकान् असृजत”**(ऐत.उप.१।१।१-२), **“तत् तेजो असृजत”**(छान्दो.उप.६।२।३), **“कर्तारम् ईशं पुरुषं ब्रह्म योनिम्”** (मुण्ड.उप.३।१।३) इत्यादि भृगुवल्लिब्रह्मवल्ल्यैतरेयच्छान्दोग्यमुण्डकादिवाक्यरूपेण **नच** इत्यादि एकत्र सदेव अन्यत्र आरोप्यते यथा चन्द्र-सिंहादौ. वस्तुतः सदेव चन्द्रत्व-सिंहत्वादिकं मुखमाणवकादौ नहि क्वापि असता आरोपः सम्भवति. अन्यथा खपुष्पाद्यपि क्वचिद् आरोप्येत. प्रकृताधिकरणे च निरङ्कुशजगत्कर्तृत्वेन शास्त्रप्रतिपाद्यत्वं ब्रह्मणो लक्षणं दर्शितम्. तत्र धर्मादौ अतिप्रसङ्गवारणाय तृतीयान्तम्. प्रकृत्यादौ तद्वारणाय उत्तरदलं **“प्रजापतिः अकामयत प्रजाः सृजेय इति”** (तैत्ति.ब्रा.२।२।१।१) इत्यादि शास्त्रप्रतिपादितकर्तृताकप्राजापत्यादौ तद्वारणाय निरङ्कुशः इति. तेषाम् अवान्तरकर्तृत्वाद् **“हिरण्यगर्भः समवर्तत अग्रे”**(ऋक्.संहि. १०।१२१।१), **“यो ब्रह्माणं विदधाति पूर्वम्”** (श्वेता.उप.६।१८) इति जन्यत्वश्रवणात्. अतः इदं ब्रह्मातिरिक्ते क्वापि असिद्धं ब्रह्मणि आरोपितम् इति कथं शक्यं वक्तुं **स्वयमेव** इति ईक्षत्यधिकरणादौ शङ्कराचार्यैरपि इति अर्थः. अत्रापि किञ्चिद् वक्ष्यते **सन्मार्गमात्रम्** इति, पूर्वकाण्डार्थे चोदनाप्रमाणके धर्मे उत्तरकाण्डार्थे ज्ञाने च अविश्वासापत्त्याः काण्डद्वयसिद्धाः सर्वेऽपि मार्गाः उच्छिद्येरन्. **अवास्तवम्** इति कर्तृत्वम् इति शेषः. **तत्र** इति स्वरूपलक्षणे **तेषाम्** इति. **“सत्यं ज्ञानम् अनन्तं ब्रह्म”** (तैत्ति.उप.२।१) इति उक्तानां **सत्यत्वादिना** इति ब्रह्मणि सत्यत्वाद्यप्रत्यये **“असन्नेव सः भवति”** (तैत्ति.उप.२।६) इति असत्त्वापत्तिः **तत्तद्भेद**... इति. असत्य-जड-सान्तप्रतियोगिकैः भेदैः धर्मित्वसिद्ध्या प्राग् उक्ते शिरोमणिसिद्धान्तलक्षणग्रन्थे तद्धर्मावच्छिन्नभिन्नभेदस्य तद्धर्मतायाः कथनादपि सत्यादिभिन्नभेदाः सत्यत्वादिरूपाएव फलन्ति इति तद्रीत्यापि घट्टकुटीप्रभातम्. एषः न्यायस्तु यथा कस्यचित् व्यापारिणो राजग्राह्यांशम् अदित्समानस्य तद्ग्रहणार्थघट्टे स्थापितकुटीस्थान् राजपुरुषान् वञ्चयित्वा रात्रावेव मार्गान्तरेण जिगमिषतो मार्गभ्रमाद् बहुपर्यट्य पुनः तत्रैव आगतस्य प्रभातं भवेद् इति. तथा अत्रापि सधर्मत्वापत्तिभिया व्यावृत्तिपरत्वादरणेऽपि पुनः तदेव आपन्नम्.

यथा कथञ्चिद् भेदस्य एकेनैव सिद्ध्या पदत्रयोपादाने व्यर्थपौनरुक्त्यमपि ध्येयम्. **कर्तृत्वमपि लौकिकम्** इति कुलालादौ दृष्टम् उपादानकारण-कालादिपरं तत् कर्तृत्वं लौकिकम्. किञ्च यथा कारणगतमेव सत्यत्वादिकं कार्ये अस्ति-भाति-प्रिया-ऽऽत्मना समन्वयात् सिद्धान्तेऽपि प्रतीयते तथा कर्तृत्वमपि ब्रह्मगतमेव अंशतो लोके अनुवर्तते वह्न्यादिगतम् औष्ण्यं विस्फुलिङ्गादाविव. अतएव ‘‘**कर्ता शास्त्रार्थवत्त्वात्**’’ (ब्र.सू.२।३।३३) इत्यादिना जीवस्य कर्तृत्वं साधयित्वा ‘‘**परात्तु तच्छ्रुतेः**’’ (ब्र.सू.२।३।४१) इति सिद्धान्तितं व्यासपादैः इति अन्यत्र विस्तरः. (अणुभाष्ये) **अनेक...** इत्यादि, तैत्तिरीये ‘‘**आकाशः सम्भूतः**’’ इत्यादिः भूतसृष्टिः, ओषध्यादिः भौतिकसृष्टिः, छान्दोग्ये ‘‘**इमाः तिस्रो देवताः**’’ (छान्दो.उप.६।४।७) इति कथनाद् देवसृष्टिः. बृहन्नारायणभाववृत्तसूक्तादौ ‘‘**सः ब्रह्मा सः शिवः सः हरिः सः इन्द्रः**’’(नृ.पू.उप.८), ‘‘**अर्वाग्देवाः अस्य विसर्जनाय**’’ (तैत्ति.ब्रा.२।८।७५) इत्यादावपि सा. पुरुषविधब्राह्मणे ऐतरेये च तिर्यङ्ग-मनुष्यादिसृष्टिः, तत्र अम्भः-प्रभृतिलोकसृष्टिः. ‘जन्मादि’सूत्रस्थस्य ‘**अस्य**’इतिपदस्य अर्थो अयम् एतादृशकर्तृत्वबोधनायैव आचार्येण ‘**अस्य**’ इति उक्तम्. **मनसा** इत्यादि भाववृत्तसूक्ते ‘‘**को अद्धा वेद कः इह प्रवोचत् कुतः आजाता कुतः इयं विसृष्टिः**’’ (तैत्ति.ब्रा.२।८।७५) इति श्रावणात् तथा इति अर्थः. ‘**अनायासेन**’ इति पुरुषविधब्रह्मणे रमणार्थता कथनात्, प्रथमस्कन्धादावपि ‘‘**स वा इदं विश्वम् अमोघलीलः सृजत्यवत्यत्ति**’’ (भाग.पुरा.१।३।३६) इत्यादिकथनात् च तथा. उत्पत्तिः इति ‘**जन्मादि**’पदस्य अर्थो. अयं कारणम् इतितु पञ्चम्याः फलितार्थः. तत्रापि मूलं ‘‘**यतो वा इमानि**’’ इत्यादिकं स्पष्टमेव. **वक्तुं शक्यत्वेन** इति अन्यत्र वास्तवस्य तादृशकर्तृत्वस्य अभावाद् जडायां प्रकृतौ परतन्त्रेषु जीवेषु जगत्कारणत्वासम्भवस्य तत्र-तत्र अधिकरणेषु सूत्रकृतैव दर्शितत्वाच्च कर्तृत्वमपि अगत्या वास्तवं मन्तव्यम्. यदितु अन्यत्र अविद्यमानमपि ब्रह्मणि तद् आरोपितम् इति प्रसह्य उच्येत तर्हि तत्र सत्यत्वादिकमपि असद्वैलक्षण्यादिकमपि च आरोपितमेव तद्वद् इति वक्तुं शक्यम् अतः तत्रापि न अगतिः इति भावः. **वेदबोधितत्वाद्**

इति ‘‘**अपाणिपादो जवनो ग्रहीता**’’ (श्वेता.उप.३।१९), ‘‘**अणोः अणीयान् महतो महीयान्**’’, ‘‘**आसीनो दूरं व्रजति शयानो याति सर्वतः**’’ (कठोप.१।२।२१), ‘‘**अनेजद् एकं मनसो जवीयः**’’ (ईशा.उप.४), ‘‘**तद् एजति तद् न एजति तद् दूरे तद् उ अन्तिके**’’ (ईशा.उप.५) ‘‘**अन्यदेव तद् विदिताद् अथो अविदिताद् अधि**’’ (केनोप.१।४) इत्यादिश्वेताश्वेतर-तैत्तिरीय-कठेशावास्य-तलवकारादिश्रुतिभिः बोधितत्वात्. **निर्विकारत्वम्** इति ‘‘**उभयव्यपदेशात्तु अहिकुण्डलवत्**’’ (ब्र.सू.३।२।२७) इत्यादिन्यायानुरोधात् तथा. नहि स्वं कुण्डलाकारं कुर्वन्नपि दर्वीकरो विकारीति व्यपदिश्यते. **अपास्ता** इति. तदुक्तरीतिकपूर्वपक्षस्य अयुक्तत्वम् उक्तं; किन्तु, शुद्धस्यैव अविद्यासम्बन्धेन जीवाभावाविद्याख्यमायाकल्पकत्वाच्च विकारित्वं दुरुद्धरमेव. यच्च उत्तरं मायया सिंहादिभूतस्य इत्यादि तदपि असद् ऐन्द्रजालिकोहि स्वनिष्ठया वास्तव्यमायया सिंहादिभावं दर्शयति नतु द्रष्टृगतोपाधिवशात् तथा दृश्यते, अन्यथा तैः अन्येऽपि सिंहादयएव दृश्येरन्. तत्रापि वास्तवाभ्यां तस्य तथा प्रदर्शने इच्छाप्रयत्नाभ्यामेव तथा अन्यथा सर्वदा सः तथैव प्रतीयेत. वास्तवतदुपायज्ञानेच्छाप्रयत्नवत्त्वादेव तत्र कर्तृत्वं युक्तम्. साकारस्यैव च तस्य सिंहादिसाकारपदार्थान्तरभावः. तथा प्रकृते: ब्रह्मणि वास्तव्याः मायाशक्तेः अभावात्. तस्याः द्रष्टृमात्रकल्पितत्वात् तस्य वास्तवेच्छाप्रयत्नत्वात् सर्वथा निर्विशेषत्वाच्च न तद्वत् कर्तृत्वस्य उपपत्तिः. एतेन मानाभावादिकं निरस्ते तादृशप्रत्यक्षस्यैव मानत्वात्. यच्च सिंहादिप्रकारकम् इत्यादि तत्तु कर्तृत्वादिबोधकश्रुतिशतविप्लावकमेव. नहि शुक्तौ कस्यचिद् रजतप्रत्यये तदा शुक्तेः रजतकर्तृत्वशक्यवचनम् अन्यस्य तत्र तदप्रतीतेः ‘‘देवदत्तः न अहं रजततया प्रतीयेय’’ इति इच्छायाः शुक्तौ असम्भवाच्च ‘‘**इन्द्रो मायाभिः**’’ इति वाक्यन्तु व्याख्यातं प्राक्. कारकस्य इत्यादिकथनन्तु अस्मन्मतप्रवेशरूपमेव, कर्तृत्वस्य वास्तवत्वादेव ‘‘**यतो वा**’’ इत्यादिकार्यलक्षणं ब्रह्मणः. आरोपितत्वे तटस्थलक्षणमपि तद् न सिध्येद्, नहि रजतत्वं शुक्तेः लक्षणं भवितुम् अर्हति तदेतत् सर्वं सुगमम् इति उपेक्षन्ते **अतएव तदुत्तरम्** इत्यादिना.

(१) [प्रकारान्तरम् आह शाखेन्दुवद् इति. शुद्धे उपादानत्वं न अस्ति, किं तर्हि ? शबले, शबलगतञ्च उपादानत्वं तदनुगतस्य शुद्धस्य लक्षणं शाखेव चन्द्रस्य. मायैव वा उपादानं तद्गतञ्च उपादानत्वं तदधिष्ठानस्य लक्षणम्. एतेन निर्गुण-ब्रह्म-जिज्ञासां प्रतिज्ञाय सगुणब्रह्मणो मायायाः वा लक्षणकथने व्यासस्य प्रतिज्ञाहान्युपक्रमविरोधौ स्याताम् इति ‘‘जन्माद्यस्य’’ (ब्र.सू.१।१।२) इति सूत्रं निर्गुणलक्षणपरतया व्याख्येयं, तथाच तद्विरोधः इति अपास्तं, शाखाचन्द्रवद् निर्गुणतटस्थलक्षणतायाएव स्वीकारात्. अत्र शुद्धकारणत्वपक्षे ‘‘तद् ऐक्षत बहु स्यां प्रजायेय’’ (छान्दो.उप.६।२।३) इत्यत्र प्रकृतः सत्पदार्थः परामृश्यते. तस्य बहुभावो मायया. नहि मायारूपसहकारिसमवधाने ऐन्द्रजालिकस्य तथाभावो गौणो द्वैतापादको वा. शबलकारणत्वपक्षेऽपि ऐन्द्रजालिकपर‘तच्छ’ब्दघटिते ‘‘सः ऐक्षत सिंहो भवेयम्’’ इति वाक्यइव ‘तच्छ’ब्देन सत्पदार्थस्यैव परामर्शः ईक्षणञ्च मुख्यमेव नतु ‘‘ता आपः ऐक्षन्त’’ (छान्दो.उप.६।२।४) इतिवद् गौणम्. एवं मायामात्रहेतुत्वपक्षेऽपि सत्पदार्थस्यैव ‘तच्छ’ब्दवाच्यत्वम् ईक्षणञ्च तेच मुख्येएव, परन्तु सेनाभिप्रायेण यथा राज्ञो ‘योत्स्ये’ इति वाक्यम् औपचारिकं तथा मायाभिप्रायेण ‘‘बहु स्याम्’’ इति औपचारिकम्. ‘‘सा इयं देवता ऐक्षत हन्ता अहम् इमाः तिस्रो देवता अनेन जीवेन आत्मना अनुप्रविष्य नामरूपे व्याकरवाणि’’ (छान्दो.उप.६।३।२) इति वाक्येऽपि ‘‘सा इयं देवता ऐक्षत’’, ‘अहम्’, ‘आत्मना’ शब्दार्थाः मुख्याएव. जीवाभेदोऽपि मुख्यः. नामरूपव्याकरणमेव शुद्धऔपचारिकम् इति ‘‘गौणः चेद्, न आत्मशब्दात्’’ (ब्र.सू.१।१।५) ‘‘तन्निष्ठस्य मोक्षोपदेशाद्’’ (ब्र.सू.१।-

१।६), "हेयत्वावचनाच्च" (ब्र.सू.१।१।७) इति सूत्रत्रयस्य विरोधो न अस्माकं; किन्तु, सांख्यमतखण्डनपरमेव तत्. तन्मते ईश्वराभावेन उक्तरीत्या योजनायाः असम्भवात्. मायाकारणत्वपर-बहुवाक्यबलेन ईश्वरहेतुत्ववादिनीनां श्रुतीनां 'जन्मादि'सूत्रस्यच केवलम् औपचारिकत्वम्. यथा त्वन्मते अक्षरब्रह्मणो हेतुत्वेन पुरुषोत्तमम् उपक्रम्य कारणत्ववादिनीनां तत्र औपचारिकत्वम् इति पुरुषोत्तमजिज्ञासां प्रतिज्ञाय पठितस्य "जन्माद्यस्य यतः" इत्यस्यापि तथात्वम्.

यत्तु टीकायां प्रकृतिगतं कर्तृत्वं ब्रह्मणि आरोप्यते. एवं "भृगुः वै वारुणिः" (तैत्ति.उप.३।१) इत्यत्रापि गौणमेव कर्तृत्वम् अनूद्यते इति पूर्वपक्षे अस्माकं मतं न्यस्य "जन्माद्यस्य यतः शास्त्रयोनित्वाद्" इति सूत्रम् एकं कृत्वा अवतारितम्, 'अस्य' प्रत्यक्षस्य जगतो 'जन्मादि' जन्म-स्थिति-लयाः, 'यतः' तत्कर्तृ. कुतः ? 'शास्त्रयोनित्वात्' शास्त्रे योनिः शास्त्रयोनिः तस्य भावः शास्त्रयोनित्वं, तस्मात् शास्त्रोक्तकारणत्वाद् इति अर्थः इति व्याचख्यौ, तद् न सम्यक्, तथा व्याख्यानेहि जगज्जन्माद्याश्रयस्य शास्त्रोक्तकारणत्वेन हेतुना कर्तृत्वमात्रम् अनेन सूत्रेण साध्यते. तथाच पूर्वपक्षिणा "भृगुः वै वारुणिः" इत्यत्रापि ब्रह्मणि प्रकृतिस्थं गौणमेव कर्तृत्वम् अनूद्यते इति चेद्, उक्तं तर्हि जगज्जन्मादिकं प्रकृतेः अन्यत्र स्थापयित्वा प्रवृत्तेन अनेन सूत्रेण प्रकृतावेव कर्तृत्वमपि साध्यते इति आपतति. "जीवेशौ आभासेन करोति" (नृ.उ.उप.९), "मायान्तु प्रकृतिं विद्याद्" (श्वेता.उप.४।१०), "इन्द्रो मायाभिः पुरुरूपः ईयते" (बृह.उप.२।५।१९) इत्यादिशास्त्रैः प्रकृतौ कारणत्वस्य

उक्तत्वात् प्रकृतिनिष्ठकर्तृत्वस्य बोधने च 'जीवेशौ' इति श्रुतिः उपष्टम्भिका स्यात्. सिद्धसाधनञ्च एवं व्याख्याने स्यात् कर्तृत्वस्य पूर्वपक्षिणा स्वीकृतत्वात्. तथाच सुव्याख्याता ब्रह्मजिज्ञासाप्रतिज्ञोपपत्तिः. तस्माद् ब्रह्मजिज्ञासां प्रतिज्ञाय ब्रह्मलक्षणमात्रम् अनेन उक्तवान् इति उक्तम्. तथा पूर्वकाण्डे "अथातो धर्मजिज्ञासा" (जै.मी.सू.१।१।१) इति धर्मजिज्ञासां प्रतिज्ञाय "चोदनालक्षणो अर्थो धर्मः" (जै.मी.सू.१।१।२) इत्यनेन धर्मलक्षणमात्रत्वम् उक्तं तद्वत्. 'ब्रह्म'पदस्य विशेषणत्वेऽपि "पटोलपत्रं पित्तघ्नं मूलं तस्य विरेचनम्" इत्यादिष्विव बुध्याः सन्निकृष्टत्वात् 'यत्'शब्दापेक्षित'तत्'शब्देन युक्तः परामर्शः कर्तृपदाध्याहारस्तु अत्यन्तासन्निकर्षाद् अयुक्तः. किञ्च शौण्डादिषु 'योनि'शब्दस्य पाठाभावेन सप्तमीति योगविभागस्य भाष्यानारूढत्वेन "शास्त्रे योनिः" इति विग्रहे "सह सुपा" (पाणि.सू.२।१।४) इति समासः वाच्यः सच अगतिकगतिः. किञ्च शब्दाध्याहारे असामर्थ्यप्रसङ्गात् 'शास्त्र'शब्दस्य तदुक्तेः लक्षणा वाच्या तथाच विग्रहो अनुपपन्नः. "उत्क्रान्तिगत्यागतीनाम्" (ब्र.सू.२।१।१९) इत्यादिषु हेत्वदर्शनेन सूत्रेषु हेतुबोधिपद-घटितत्वनियमो न युक्तः. "ब्रह्मसूत्रपदैश्चैव हेतुमद्भिः" (भग.गीता १३।४) इत्यत्र हेतुपदं कारणपरं प्रयोजनपरं वा. सूत्राणां कारणानितु विषयवाक्यानि. किञ्च अत्र 'हेतुमद्भिः' इत्येतद् 'ब्रह्मसूत्रपदैः' इत्यस्य पदान्तप्रकृतिक-सुबन्तस्य विशेषणम् इति प्रतिपदं हेतोः पञ्चम्यन्तस्य कल्पनायां प्रयासः ते स्याद् नच सा सम्भवति, अस्माकन्तु न कापि अनुपपत्तिः. यद्-हेतुकत्वं वाक्यस्य तद्-हेतुकतायाः पदेऽपि सत्त्वात्. एतेन हेतुरहितत्वाद् "जन्माद्यस्य यतः" इति न पृथक्सूत्रं, किन्तु;

“शास्त्रयोनित्वाद्” इत्यनेन मिलितम्. एवञ्च तत्रापि साध्यलाभे इति अपास्तम्. एवञ्च “शास्त्रयोनित्वाद्” इति सूत्रमपि साध्याध्याहारेण योज्यम्. एवं “तत्तु समन्वयाद्” इत्यत्र “समन्वयाद्” इत्यस्य सम्यगनुवृत्तत्वाद्, अनारोपितानागन्तुकरूपेण अन्वयाद् इति तद्व्याख्याने तादृगर्थे लक्षणायां मानम् अन्वेष्यम् इत्यलं प्रसङ्गागतेन.]

(२) यत्तु शुद्धे उपादानत्वं न अस्ति, किं तर्हि, शबले, शबलगतञ्च उपादानत्वं तदनुगतस्य शुद्धस्य लक्षणं शाखेव चन्द्रस्य मायैव वा उपादानं तद्गतञ्च उपादानत्वं तदधिष्ठानस्य लक्षणम् **इति तद् असत्. शुद्धब्रह्मणएव उपादानत्वं व्यासैः “तत्तु समन्वयाद्” (ब्र.सू.१।१।३) इति सूत्रेण वर्णितम्. तत्र यस्य ब्रह्मणो जिज्ञासा प्रतिपादिता तत् किं समवायि निमित्तं कर्तृ वा? कथम् एवं सन्देहः यावता “यतो वा इमानि भूतानि जायन्ते” (तैत्ति.उप.३।१) इत्यादिना निःसन्देहं श्रूयते एवंहि सः. ननु तत्र पञ्चमी श्रूयते ‘यतः’ इति “पञ्चम्याः तसिः” (द्र.पाणि.सू.५।४।४४) पञ्चमी च हेतौ हेतुत्वं निमित्तएव दण्डादौ प्रायः प्रसिद्धम्, अतो निमित्तमात्रं ब्रह्मोपादानवाचकपदाभावात् कल्पनायां प्रमाणाभावात्. एवं प्राप्ते आह “‘तत्तु समन्वयाद्’ इति. ‘तु’शब्दः पूर्वपक्षव्यावृत्त्यर्थः. तद् ब्रह्मैव समवायिकारणं, कुतः समन्वयात्, सम्यगनुवृत्तत्वात्. अस्ति-भाति-प्रियत्वेन सच्चिदानन्दरूपेण अन्वयाद्...जडजीवान्तर्यामिषु एकैकांशस्य प्राकट्यम् अन्यांशस्य तिरोभावः भगवदिच्छायाएव सर्वत्र नियामकत्वाद्” (द्र.ब्र.सू.भा.१।१।३) अलीकत्वप्रतीतेः सर्वत्र असत्त्वाद्. न अलीकत्वं पटादिषु अनुगतम् अतो न मायायाः उपादानत्वसम्भवाद्, ब्रह्मणः समवायित्वे “तद् आत्मानं**

स्वयम् अकुरुत’’ इत्यादिश्रुतिः अनुगृहीता भवति. नच शाखाचन्द्रन्यायोऽपि अत्र सम्भवति, यथा चन्द्रं दिदर्शयिषुः शाखां दर्शयित्वा पुनः तां त्याजयित्वा ‘‘तद् अग्रस्थचन्द्रं पश्य’’ इति वदति तथा अत्रापि भृगुपित्रा यदि ‘‘यतो वा इमानि भूतानि’’(तैत्ति.उप.३।१) इत्यादिना जगत्कारणं जिज्ञास्यम् उक्त्वा पुनः अन्यद् उक्तं स्यात् तदा त्वदुक्तन्यायो अत्र प्रवर्तेत. तस्माद् जगत्कारणं शुद्धमेव जिज्ञास्यं नतु शबलं पारिभाषिकम्. एवं शाखाचन्द्रन्यायस्य अत्र असम्भवात् त्वन्मते निर्गुणब्रह्मजिज्ञासां प्रतिज्ञाय सगुणब्रह्मणो मायायाः लक्षणकथने व्यासस्य प्रतिज्ञाहान्युपक्रमविरोधरूपदोषौ स्यातामेव. तस्माद् ‘‘जन्माद्यस्य यतः’’(ब्र.सू.१।१।२) इति सूत्रं निर्गुणब्रह्मणः कारणत्वं वदति इति त्वयापि स्वीकरणीयम्. शुद्धस्य कारणत्वे च ‘‘तद् ऐक्षत बहु स्यां प्रजायेय’’ इति श्रुतौ ‘तत्’पदेन शुद्धस्यैव परामर्शः कर्तव्यः, तस्य बहुभावः उत्पत्तिश्च यदि स्वीक्रियते तदा शुद्धत्वहानिरिति उभयतः पाशारज्जुः तव स्यात्. नच मायया बहुभावः तस्मिन् प्रपाठके मायावाचकपदाभावाद् ऐन्द्रजालिकदृष्टान्तस्यापि तत्र अभावात्; किन्तु, मृत्सुवर्णादिदृष्टान्तएव तत्र श्रुतः, सच शुद्धस्य कारणस्य कार्यरूपत्वस्वीकारएव अनुकूलः. नहि मृत्सुवर्णादीनां मायया घटकुण्डलादिरूपता येन ब्रह्मणो मायया जगद्रूपतायां दृष्टान्तता स्यात्. एतेन अत्र इत्यादिकं सर्वम् अपास्तम्. ‘तत्’शब्देन सत्पदार्थस्य शुद्धस्य(सत्पदार्थस्यैव) परामर्शः ईक्षणञ्च मुख्यमेव इतितु न सम्भवति. शुद्धे ईक्षणकर्तृत्वस्य अनङ्गीकृतत्वात्. नहि ऐन्द्रजालिकवत् शुद्धेऽपि अन्तःकरणादिः अस्ति येन तद्वद् अत्रापि ईक्षणं मुख्यं स्यात्; किन्तु, तदपि औपचारिकमेव तथाच ‘‘सा इयं देवता ऐक्षत हन्ता अहम् इमाः तिस्रो देवता अनेन जीवेन आत्मना अनुप्रविश्य नामरूपे व्याकरवाणि’’ (छान्दो.उप.६।३-

।२) इति वाक्येऽपि “सा इयं देवता ऐक्षत” ‘अहम्’ ‘आत्मना’ शब्दार्था: मुख्याएव इति असङ्गतम्. किञ्च शबलस्य जगत्कारणत्वे तस्य मुख्यत्वाभावाद् गौणस्यैव जगत्कारणत्वम् उक्तं स्यात् तथाच “गौणः चेद् न आत्मशब्दाद्” (ब्र.सू.१।१।५) इति सूत्रविरोधः. तस्य अर्थस्तु ईक्षत्यादिगुणयुक्तः परमात्मा मायासम्बन्धयुक्तो गौणो जगत्कारणम् इति चेद्, “न तथात्वं वक्तुं शक्यते, कुतः आत्मशब्दात्. ‘आत्मा वा इदम् एकएव अग्रे आसीद्’ (ऐत.उप.१।१) इति उपक्रम्य ‘स ऐक्षत’ इति उक्तेः. ‘आत्म’शब्दः पुनः सर्वेषु वेदान्तेषु निर्गुणब्रह्मवाचकत्वेनैव सिद्धः. तस्यैव जगत्कर्तृत्वं श्रुतिः आह...स्वातन्त्र्याभावेन सगुणस्य कर्तृत्वमेव न सम्भवति. वेदाश्च प्रमाणभूताः. ततः सर्वभवनसामर्थ्यमेव श्रुतिबललभ्यम् अङ्गीकर्तव्यम्. अस्ति-भाति-प्रियत्वादयो धर्माः यथा ब्रह्मगताः तथा कर्तृत्वमपि लोके प्रतीयते. तस्माद् ‘आत्म’शब्दप्रयोगाद् गुणातीतमेव कर्तृ” (ब्र.सू.भा.१।१।५). किञ्च “‘सो अकामयत’ (तैत्ति.उप.२।६) इति उपक्रम्य, ‘तद् आत्मानं स्वयम् अकुरुत’ ‘यदा ह्येव एषः एतस्मिन् अदृश्ये अनिरुक्ते अनिलयने अभयं प्रतिष्ठां विन्दते अथ सो अभयं गतो भवति’ (तैत्ति.उप.२।७) इति प्रापञ्चिकधर्मरहिते ब्रह्मणि एतस्मिन् जगत्कर्तरि परिनिष्ठितो मुक्तो भवति इति अर्थः. तत्र यदि जगत्कर्ता गौणः स्यात् तदा तन्निष्ठस्य संसारएव स्याद् न मोक्षः” (ब्र.सू.भा.१।१।६) अतः “तन्निष्ठस्य मोक्षोपदेशाद्” (ब्र.सू.१।१।६) इति सूत्रविरोधः त्वन्मते स्यात्. किञ्च यदि शाखाचन्द्रन्यायेन गौणं कर्तृत्वादिधर्मविशिष्टं प्रदर्शयित्वा वेदान्तैः निर्गुणं ब्रह्म बोधनीयं स्यात् तदा जगत्कर्ता हेयत्वेन उपदिश्येत. सच हेयत्वेन न उपदिश्यते अतो निर्गुणएव जगत्कर्ता. एवञ्च मायोपहितस्य कारणत्वे सूत्रत्रयविरोधः स्यात्. नच तादृशसूत्रत्रयं प्रकृतेः कारणत्ववा-

दिनां सांख्यानामेव खण्डनपरं न अस्मन्मतखण्डनपरम् इति वाच्यं, मायिकस्य कारणत्वं वदतः तव मतेऽपि औपाधिकधर्माणाम् उपाधिवृत्तित्वनियमेन मायायाः कारणत्वं पर्यवस्यति इति तत्खण्डने न अस्माकं विरोधः इत्यस्य वक्तुम् अशक्यत्वाद् ‘माया’-‘प्रकृति’शब्दानां परस्परपर्यायत्वाद्. यत्तु मायाकारणत्वबोधिकानां बलेन केवलेश्वरकारणत्वबोधिकानां श्रुतीनां “जन्मादि” सूत्रस्यच केवलम् औपचारिकत्वम्. यथा त्वन्मते अक्षरब्रह्मणः हेतुत्वेन पुरुषोत्तमम् उपक्रम्य कारणत्ववादिनीनां तत्र औपचारिकत्वम् इति पुरुषोत्तमजिज्ञासां प्रतिज्ञाय पठितस्य “जन्माद्यस्य यतः” इत्यस्यापि तथात्वम् **इति उक्तं तत् तुच्छम्. ईश्वरकारणत्वबोधकश्रुतीनाम् उपक्रमोपसंहारादि-षड्विधतात्पर्यनिश्चायकलिङ्गसहकृतानाम् औपचारिकत्वकल्पनापेक्षया मायाकारणत्वबोधिकायाः कस्याश्चित् श्रुतेः औपचारिकत्वकल्पने लाघवात्. यथा** त्वन्मते **इत्यादिना दृष्टान्तस्तु अस्मन्मतानभिज्ञतां द्योतयति धृष्टत्वञ्च. नहि अस्मन्मते निर्गुणवत् पुरुषोत्तमस्य अकारणत्वं निर्धर्मिकत्वं वा कुत्रचिदपि सिद्धान्तितं नापि “जन्मादि”सूत्रस्य श्रुतीनां वा औपचारिकत्वम्. तस्मात् परमतम् अज्ञात्वा खण्डनं कुर्वन् प्रतारकएव असि.**

अग्रेच यत्तु टीकायां प्रकृतिगतं कर्तृत्वम् **इति आरभ्य** तद् न सम्यक् **इत्यन्तेन शुद्धाद्वैतमार्तण्डटीकाकृदुक्तं किञ्चिद् अनूद्य,** तथा व्याख्यानेहि जगज्जन्माद्याश्रयस्य शास्त्रोक्तकारणत्वेन हेतुना कर्तृत्वमात्रम् अनेन सूत्रेण साध्यते. तथाच पूर्वपक्षिणा “भृगुः वै वारुणिः” (तैत्ति.उप.३।१) इत्यत्रापि ब्रह्मणि प्रकृतिस्थं गौणमेव कर्तृत्वम् अनूद्यते इति चेद्, उक्तं तर्हि जगज्जन्मादिकं प्रकृतेः अन्यत्र

स्थापयित्वा प्रवृत्तेन अनेन सूत्रेण प्रकृतावेव कर्तृत्वमपि साध्यते इति आपतति. "जीवेशौ आभासेन करोति" (नृ.उ.उप.९), "मायान्तु प्रकृतिं विद्याद्" (श्वेता.उप.-४।१०) इत्यादिशास्त्रैः... प्रकृतौ कारणत्वस्य उक्तत्वात् (प्रकृतिनिष्ठ)कर्तृत्वस्य बोधने च 'जीवेशौ' इति श्रुतिः उपष्टम्भिका स्यात्. सिद्धसाधनञ्च एवं व्याख्याने स्यात्, प्रकृतिगतकर्तृत्वस्य पूर्वपक्षिणा स्वीकृतत्वात्. तथाच सुव्याख्याता ब्रह्मजिज्ञासाप्रतिज्ञोपपत्तिः **इत्यादिना हासः कृतः सोऽपि अस्मत्सिद्धान्तानभिज्ञतयैव. पूर्वाधिकरणे वेदार्थभूतब्रह्मणो जिज्ञासाधिकृते इति कथं जिज्ञास्यम्? इति प्रकारविशेषाकांक्षायां समन्वयाविरोधाभ्यां तद्वक्तव्यं तद्बोधकम् अग्रिमं सूत्रम्. "तत्र किं लक्षणं किं प्रमाणकं 'ब्रह्म' इति जिज्ञासायां...लक्षणप्रमाणात्मकं प्रकारद्वयम् आह 'जन्माद्यस्य यतः शास्त्रयोनित्वाद्' (ब्र.सू.१।१।२) इति. तत्र 'जन्माद्यस्य यतः' इत्यंशेन लक्षणं, 'शास्त्रयोनित्वाद्' इत्यंशेन प्रमाणम्. अत्र सर्वेऽपि योगविभागेन 'शास्त्रयोनित्वाद्' इति सूत्रं भिन्नम् अभ्युपगच्छन्ति, तद् न युक्तम्; अग्रिमसूत्रेषु 'तत्तु समन्वयाद्', 'ईक्षतेः न अशब्दम्' इत्यादिषु साध्यहेतुनिर्देशपूर्वकमेव अधिकरणरचनस्य दर्शनेन अत्रापि तथैव युक्तत्वाद्... येतु जन्माद्यधिकरणं शास्त्रयोनित्वाधिकरणं च भिन्नम् इच्छन्ति (अङ्गीकुर्वन्ति) तेषां मतेः प्रथमस्य हेतुशून्यत्वाद् द्वितीयस्य च साध्यशून्यत्वात् साकांक्षतया अतिक्लिष्टत्वेन तद्विवक्षितप्रमेयासाधकत्वं बोध्यं" (ब्र.सू.भा.प्र.१।१।२) तत्र "सत्यं ज्ञानम् अनन्तं ब्रह्म" (तैत्ति.उप.२।१) "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" (श्वेता.उप.६।१९) इत्यादिश्रुत्या ब्रह्मणः सर्वधर्मराहित्यप्रतिपादनात् कर्तृत्वस्यापि अभावः प्रतीयते "यतो वा इमानि भूतानि" इत्यादिश्रुत्या कर्तृत्वं प्रतिपाद्यते. "तत्र सन्देहः (किं) ब्रह्म कर्तृ आहोस्विद् अकर्तृ?" इति.**

तत्र अयं पूर्वपक्ष: ''शेषलक्षणे 'कर्म फलार्थत्वाद्' (द्र.जै.मी.सू.१।३।४) इत्यनेन उपलक्षणविधया ज्ञानस्यापि फलशेषत्वे सिद्धे प्राधान्यं फलस्यैवेति तत्सम्बन्धाद् 'ब्रह्मविद् आप्नोति परम्' इति वाक्यमेव प्रधानं नतु कार्यलक्षणं तथा...अतएव तत् ऋचापि विवृतं, यदि तस्य प्राधान्यं न स्यात् किम् इति विवृणुयात्...तथासति ज्ञानं फलार्थं फलञ्च च फलवाक्योक्तपरत्वज्ञानात्. अत: परत्वज्ञानार्थं कर्तृत्वं परविवरणतया उक्तम्. स्वरूपलक्षणे प्रापञ्चिकधर्मराहित्यप्रतीते: ब्रह्मणि कर्तृत्वस्य अशक्यवचनत्वात् ''तस्माद् वा एतस्माद्'' इत्यादिना यत् कर्तृत्वम् उक्तं तद् ज्ञेयात् फलरूपं परं पृथक्कृत्य तं विवरीतुम् उक्तम्. तत: तत्स्वरूपजिज्ञासायां सर्वान्तरत्वकथनपूर्वकम् आनन्द: इति स्वरूपम् उक्तम्... अन्यथा तन्निरूपणम् असङ्गतं स्यात्. सर्वान्तरत्वञ्च तस्य परत्वनिर्वाहकतया उक्तम्. ''सर्वं वै ते अन्नम् आप्नुवन्ति ये अन्नं ब्रह्म उपासते'' (तैत्ति.उप.२।२) इत्यादिना अन्नब्रह्माद्युपासनाफलं (प्रधानशेषतया) 'अस्ति 'ब्रह्म' इति चेद् वेद सन्तम् एनम् तत: विदु:' (तैत्ति.उप.२।६) इत्यादिना अनुवाकचतुष्टयेन कथितस्य सत्त्वब्रह्मानन्दावाप्ति: सर्वभयाभावरूपप्रधानफलस्य शेषतया सर्वोत्कृष्टत्वज्ञापनाय उक्तम् इति कर्तृत्वं परस्मिन् यद्यपि सिध्यति. तथापि स्वरूपलक्षणविरोधात् पूर्वकाण्डोक्तप्रजापतिगतस्य प्रकृतिगतस्य वा कर्तृत्वस्य आरोपेण अनुवादोऽपि सम्भवतीति. भृगुप्रपाठकेऽपि फलाश्रवणेन अमुख्यत्वात् तत्रापि एवं नेतव्यम्. तथाच न कर्तृत्वं (अस्य) ब्रह्मलक्षणम् इति (पूर्वपक्षार्थ:). सिद्धान्तस्तु स्याद् अन्यगतकर्तृत्वारोपानुवाद: कार्यलक्षणे यदि स्वरूपलक्षणं विरुद्ध्येत तदेवतु न. विवरणर्चि परस्य तृतीयान्तेन 'ब्रह्म'पदेनैव विवृतत्वात्. नच तत्र वेदहिरण्यगर्भब्राह्मणजातिजीवा: अर्थत्वेन ग्रहीतुं शक्या:. 'पर'पदविवरणत्वात् सान्तत्वादिना ब्रह्मापेक्षया उत्कर्षस्य तेषु

अशक्यवचनत्वात्. 'पर'शब्दस्य अन्यार्थकत्वोपगमेऽपि विवरणोक्त'ब्रह्म'शब्दानुरोधाद् एतएव परत्वेन ग्राह्याः तत्प्राप्तिस्तु कर्मणापि इति साधनान्तरेण ज्ञानेन को वा विशेषः स्यात्? अतः उत्कृष्टार्थकत्वम् आदरणीयम्. उत्कृष्टञ्च किम्? इति अपेक्षायां विवरणानुरोधाद् ब्रह्मान्तरं कल्प्यम्. तच्च अप्रसिद्धं स्वरूपलक्षणहीनञ्च. नच प्रकृतिः सांख्यमतेऽपि ज्ञानात्मकपुरुषापेक्षया तस्याः हीनत्वात् परार्थत्वाच्च, अश्रौतत्वस्य वक्ष्यमाणत्वाच्च. अतो ब्रह्मापेक्षया अन्यस्य परत्वेन वक्तुम् अशक्यत्वाद् उक्तलक्षणविशिष्टस्यैव ब्रह्मणः कर्तृत्वं वेदेन बोध्यते. नच तद् आरोपितम् इति शक्यं वक्तुं, निरंकुशस्य तस्य अन्यत्र असिद्धतायाः अनुपदमेव वक्ष्यमाणत्वाद्....ननु लक्षणद्वयस्य एकपरत्वे सर्वासु श्रुतिषु एकमेव ब्रह्म प्रतिपाद्यं तदा अस्थूलादिवाक्येष्वपि तदेव निरूप्यते इति निर्धर्मकत्वसिद्धौ कर्तृत्वस्यापि निषेधः इति चेद्, न; ...अस्थूलादिवाक्ये लोकप्रतीताएव प्रतिषिध्यन्ते न अप्रतीताः नापि श्रुतिप्रतीताः तस्माद् लौकिककर्तृत्वनिषेधेऽपि जगत्कर्तृत्वस्य निषेधो न सम्भवत्येव श्रुतिप्रतिपादितत्वात्. तस्माद् ब्रह्मणएव कर्तृत्वम् इति सिद्धान्तः. तत्र प्रमाणम् आह "शास्त्रयोनित्वाद्" (ब्र.सू.१।१।२)इति अंशेन. शास्त्रे योनिः शास्त्रयोनिः अत्र सप्तम्या वैषयिकम् अधिकरणत्वं बोध्यते विषयत्वञ्च प्रतिपाद्यत्वम्. एवञ्च शास्त्रप्रतिपाद्यकारणत्वाद् इति अर्थः" (द्र.ब्र.सू.भा.प्र.१-।१।२). एतेन किञ्च (उक्त)शब्दाध्याहारे असामर्थ्यप्रसङ्गात् 'शास्त्र'शब्दस्य तदुक्तेः लक्षणा वाच्या तथाच विग्रहो अनुपपन्नः इति प्रलपितम् अपास्तम्. शास्ति = राजवद् आज्ञापयति. एवञ्च तद्विरोधे अपराधोऽपि बोधितः. ननु अत्र उत्तरकाण्डार्थएव विचार्यते इति 'शास्त्र'शब्दस्य कुतः प्रयोगः इति चेद्, न; पूर्वकाण्डस्थवाक्यानामपि ब्रह्मपरत्व इति अभिप्रायेण 'शास्त्र'शब्दप्रयोगः. ननु जन्मादिसूत्रस्थेन

‘यतः’ इति पदेनैव विषयश्रुतेः स्मारणात् शास्त्रप्रमाणकत्वसिद्धौ शास्त्रयोनित्वांशो व्यर्थः इति चेद्, न; ‘यतः’इत्यस्य हेतुकोटिप्रवेशे ‘जन्माद्यस्य’ इति भागस्य प्रपञ्चवृत्तान्तपरतया ब्रह्मलक्षणत्वायोगेन असङ्गतिप्रसङ्गात्. नच लक्षणे प्रविष्टस्यैव ‘यतः’शब्दस्य तच्छ्रुतिस्मारकत्वम् इति वाच्यं, श्रुतिस्थितस्य ‘भूतानि’ इति पदस्य बहुवचनान्तत्वेन तद्विरुद्धतापत्तेः वाक्यान्तरासंग्रहापत्तेश्च इति. तस्मात् “शास्त्रयोनित्वाद्” इति वक्तव्यमेव. मतान्तरवद् जन्मनो न विकारत्वं; किन्तु, आविर्भावतिरोभावावेव. नच प्रकृतिगतकर्तृत्वानुवादोऽपि सम्भवति, पूर्वपक्षिमतसिद्धस्य प्रधानस्य शास्त्राप्रतिपाद्यत्वेन तत्कर्तृत्वस्य दूरपराहतत्वात्. तस्मात् शास्त्रोक्तकर्तृत्वं ब्रह्मणो अन्यत्र न सम्भवति. अतएव सिद्धसाधनादिवदन् अनभिज्ञएव. यदपि शौण्डादिषु ‘योनि’शब्दस्य पाठाभावेन सप्तमीति योगविभागस्य भाष्यानारूढत्वेन “शास्त्रे योनिः” इति विग्रहे “सह सुपा” (पाणि.सू.२।१।४) इति समासः वाच्यः सच अगतिकगतिः इति तद् न. यदि शौण्डादिगणपठितशब्दैरेव सप्तमीसमासः सर्वत्र स्यात् तदा अयं दोषः, दृश्यतेतु अन्यशब्दैरपि. अतएव “तुल्यास्यप्रयत्नं सवर्णम्” (पाणि.सू.१।१।९) इति सूत्रभाष्ये “अथवा पूर्वः तत्पुरुषः ततो बहुव्रीहिः तुल्यः आस्ये तुल्यास्यः. तुल्यास्यः प्रयत्नः एषाम् इति अथवा परः तत्पुरुषः ततो बहुव्रीहिः आस्ये प्रयत्नः आस्यप्रयत्नः तुल्यः आस्य प्रयत्नः एषाम्” (पातं.महाभा.१।१।९) इति उक्तम्. एवञ्च तुल्यप्रयत्नादिशब्दानां शौण्डादिषु पाठाभावात् सप्तमी इति योगविभागेनैव समासः तत्र भाष्यकाराभिप्रेतः इति गम्यते. एवम् अत्रापि समासो भाष्यविरोधाभावात्. किञ्च त्वन्मते जन्मादिसूत्रस्य भिन्नत्वेन हेतुशून्यत्वं ‘शास्त्रयोनित्वाद्’ इत्यस्य च साध्यशून्यत्वेन अतिक्लिष्टतया अभिमतासाधकत्वं “ब्रह्मसू-

त्रपदेश्चैव हेतुमद्भिः विनिश्चितैः” (भग.गीता १३।४) इति भगवद्वाक्यात् सूत्रेषु हेतुमत्त्वस्य अवश्यम् अपेक्षितत्वे “जन्माद्यस्य” इति सूत्रे तदभावे भगवद्वाक्यविरोधश्च स्यात्. ननु “उत्क्रान्तिगत्यागतीनाम्” (ब्र.सू.२।३।१९) इति सूत्रे हेत्वदर्शनेन सूत्रेषु हेतुबोधकपदघटितत्वमेव इति नियमो न संभवति “ब्रह्मसूत्रपदैश्चैव” इति वाक्ये ‘हेतु’पदं कारणपरं, प्रयोजनपरं वा. सूत्राणां कारणानितु विषयवाक्यानि सन्तिएव इति चेद्, न; “उत्क्रान्तिगत्यागतीनाम्” इति सूत्रे हेतुवाचकपदाभावेऽपि “ज्ञो अतएव” (ब्र.सू.२।३।१८) इति पूर्वस्मिन् सूत्रे ‘अतएव’इतिपदसत्त्वात्. तस्माद् “अतएव” इति हेतुवाचकपदम् अनुवर्त्यते अन्यथा सूत्रस्य एकषष्ठ्यन्तपदरूपत्वात् तस्य सम्बन्धस्य क्वापि अप्रतीतेः अनन्वयएव स्यात्. तथाच अतः श्रुतितएव “उत्क्रान्तिगत्यागतीनां” जीवे श्रवणाद् यथायोग्यं जीवस्य परिमाणम् अङ्गीकर्तव्यम् इति अर्थः. सूत्रयोजनातु जीवात्मा उत्क्रान्तिगत्यागतिसम्बन्धी अतएव = तद्बोधकश्रुतितएव. श्रुतिस्तु “सः यदा अस्मात् शरीराद् उत्क्रामति सहैव एतैः सर्वैः उत्क्रामति” (कौषी.ब्रा.उप.-३।४), “ये के च अस्माद् लोकात् प्रयान्ति चन्द्रमसमेव ते सर्वे गच्छन्ति” (कौषी.ब्रा.उप. १।२), “तस्माद् लोकात् पुनः इति अस्मै लोकाय कर्मणः” (बृह.उप.४।४।६) इति. तादृशसूत्राणां हेतुरहितत्वं ‘हेतु’पदस्य च कारणपरत्वं यद् उक्तं तदपि न सङ्गच्छते. ‘हेतुमत्’शब्दस्य सकारणकत्वार्थकतया जन्यैः इति लभ्यते. सूत्राणां जन्यत्वस्य ब्रह्मनिश्चये अहेतुत्वात् तादृशविशेषणस्य वैयर्थ्यापत्तेः. नहि “जन्येनैव निश्चयो न नित्येन” इति नियमो अस्ति येन ‘जन्य’पदं नित्यव्यावृत्त्यर्थत्वेन सार्थकं स्यात्. ‘जन्य’शब्दस्वीकर्तृनये ‘ब्रह्मसूत्रपदैः’ इत्यनेनैव जन्यत्वलाभे सुतरां तन्निरर्थकम् इति. अस्मन्मते ‘हेतु’पदं हेतुत्वप्रतिपादकपञ्चम्यन्तपरं, हेतुत्वं च

ज्ञापकज्ञानविषयत्वं ज्ञापकत्वं निश्चयजनकत्वं तथाच निश्चयजनकज्ञानविषयप्रतिपादकपदघटितैः ब्रह्मसूत्रैः इति अर्थो लभ्यते. एवञ्च निश्चायकपदघटितत्वस्य निश्चयजनकत्वार्थम् उपयोगात् तद्विशेषणसार्थक्यम्. एतेन'हेतुमद्भिः' इत्येतद् इत्यादिकं सर्वम् अपास्तम्. तस्माद् ''जन्माद्यस्य यतः'' इति न पृथक्सूत्रं; किन्तु, ''जन्माद्यस्य यतः शास्त्रयोनित्वाद्'' (ब्र.सू.१।१।२) इति एकमेव. नच 'उक्ता'पदाध्याहारकल्पने गौरवम् इति वाच्यं, सप्तम्याः विषयत्वार्थकत्वेन परिहृतत्वात्. यदपि ''तत्तु समन्वयाद्'' इत्यत्र 'समन्वयाद्' इत्यस्य सम्यगनुवृत्तत्वाद् अनारोपितानागन्तुकरूपेण 'अन्वयाद्' इति तद्व्याख्याने तादृगर्थे लक्षणायां मानम् अन्वेष्यम् इति उक्तं तदपि 'समन्वय'शब्दस्य सम्यगन्वयबोधकत्वं न सम्भवति...(!?) इति अभिप्रायेण वा? न आद्यः, उपसर्गसमभिव्याहृतधातोः अनेकार्थबोधकत्वस्य सर्वसम्मतत्वात्. अतएव उक्तम् ''उपसर्गेण धात्वर्थो बलाद् अन्यत्र नीयते'' (पाणि.सू.सि.कौ.-८।४।१८) इत्यादि. नापि द्वितीयः सम्यक्त्वविवरणरूपत्वात्. अन्यथा त्वन्मतेऽपि सर्वेषां वेदान्तवाक्यानां तात्पर्येण अस्मिन् अर्थे 'अन्वयाद्' इति व्याख्यानमपि मानाभावाद् न स्यात्. किञ्च त्वन्मते शास्त्रयोनित्वपूर्वपक्षनिरासार्थं ''तत्तु समन्वयाद्'' इति सूत्रं तच्च न सम्भवति. सर्वस्य वेदस्य ब्रह्मणि अन्वयासम्भवात् पूर्वकाण्डस्य क्रियार्थत्वाद् एकशास्त्रानुरोधाद् उत्तरकाण्डस्य पूर्वशेषता कुतो न स्यात्? नच वैपरीत्यं शङ्कनीयं सिद्धे ब्रह्मणि साध्यार्थानां वाक्यानाम् अन्वयायोगात्. नच प्रापकत्वेन अन्वयः तत्तद्वाक्यगतफलोक्तिबाधाप्रसङ्गाद्. अस्तु वा कथञ्चित् समन्वयः तथापि प्रतिपादनीयत्वे साध्यः सः, नहि सन्दिग्धस्य हेतुत्वं सम्भवति सिद्धस्यैव हेतुत्वात्. किञ्च समन्वयस्य असिद्धत्वे अग्रिमसूत्राणां वैयर्थ्यं स्यात्.

तस्मात् त्वन्मते तादृशसूत्रम् असङ्गतमेव.

(३) सहस्राक्षे प्रकारान्तरम् आह इत्यादिं प्रसङ्गागतेन इत्यन्तं भागं दूषयन्ति यत्तु शुद्धे उपादानत्वम् इत्यादिना सूत्रम् असङ्गतमेव इत्यन्तेन. अयं भावः: यत्तु शुद्धे उपादानत्वं न अस्ति किं तर्हि? शबले इत्याद्युक्तं तत्तु प्रसिद्धासु शङ्कराचार्यैरपि व्याख्यातासु ईशावास्यादिदशोपनिषत्सु भगवद्गीतायां समग्रायां चतुर्लक्षण्याञ्च एकत्रापि शबलब्रह्मणः अकथनात् तत्पर'शबल'शब्दस्यापि अनुच्चारणाच्च तस्यैव निर्मूलतया सकलं निर्मूलम्. यदिच तत्र तत् स्यात् तर्हि एकामपि तदर्थक'शबल'शब्दघटितां त्वदाचार्यादिव्याख्यातप्रसिद्धोपनिषत्स्थां श्रुतिं भगवद्वाक्यं वा प्रदर्शय. यदिच व्यासस्य तथा सिद्धान्तः स्यात् तर्हि सर्वसन्देहवारणाय प्रवृत्तो भगवान् कथं न एकमपि तद्बोधकं सूत्रं प्रणयेत्. तस्मात् केवलकपोलकल्पितएव अयं शबलवादः. किञ्च शबलेऽपि त्वद्रीत्या ब्रह्मांशस्य उपादानत्वायोगाद् उपाधावेव अन्ततः तद् वाच्यम्. अतएव मायैव वा उपादानम् इति त्वयैव अवधारितम्. तथाच तदेव स्पष्टम् उच्यताम् अलम् असन्दिग्धब्रह्मकारणताबोधकश्रुतिषु श्रद्धावतां प्रतारणाय 'शबला'ख्य ब्रह्मविशेषस्य उपादानत्वम् इति प्रवादेन. नापि शुद्धस्य तत्र अनुगतत्वं सम्भवति उपाधेः तुच्छत्वात्. नहि कल्पितरजते शुक्तिः अनुगता भवति. अन्यथा तदाच्छन्नतया सर्वस्य तत्र रजतप्रत्ययावश्यम्भावापातात्. नापि गन्धर्वनगरं कोऽपि प्रवेष्टुम् इष्टे. अतो अननुगततया शुद्धस्य तत्तटस्थलक्षणं भवितुं न अर्हति शाखाचन्द्रदृष्टान्तस्तु निराकरिष्यते. यच्च मायैव वा उपादानम् इत्यादि तत् तुच्छं सा जगदुपादानम् इति बोधिकायाः एकस्यापि प्रसिद्धोपनिषच्छ्रुतेः भगवद्वाक्यस्मृतेः च अनुपलम्भात्. भगवता सूत्रकृताच एतावत्सु अधिकरणेषु न एकमपि तन्मायायाः जगदुपादानत्वसाधकं प्राणायि. यदि 'तथा' सो अभिप्रैष्यत् कथं न प्राणेष्यद्? जीवे चराचरभावभावित्वात् तद्व्यपदेशस्येव भाक्तत्वञ्च ब्रह्मणि उपादानत्वादिव्यपदेशस्य कण्ठरवेण कथं न अवक्ष्यत्. वक्तितु तत्र-तत्र मायायाः कारणत्वादिनिषेधमेव. तद्यथा त्वद्रीत्या प्रथमस्य प्रथमे **"ईक्षतेः न अशब्दम्"**

(ब्र.सू.१।१।४) इति प्रकृतेः कारणत्वं निरस्तम्. आनन्दमयाधिकरणेऽपि **"कामाच्च न अनुमानापेक्षा"** (ब्र.सू.१।१।१८) इति जडायाः तस्याः कामासम्भवात् तन्निरस्तम्. तेन **"सो अकामयत"**, **"आनन्दाद्ध्येव"** (तैत्ति.उप.२।६, ३।६) इत्यादौ ब्रह्मणएव कारणता. यच्च मुण्डके **"तथा अक्षराद्"** (मुण्ड.उप.१।१।७) इत्यादि उक्तं तत्रापि ब्रह्मणएव कारणता इति तस्य द्वितीये **"विशेषणभेदव्यपदेशाभ्यां च न इतरौ"** (ब्र.सू.१।२।२२) इति तस्याः तद् अपास्तम्. यदिच सा सर्वोपादानं स्याद्, द्युभ्वाद्यायतनत्वं तस्याएव स्यात्.

वस्तुतस्तु तृतीये ब्रह्मणएव तथात्वं साधयित्वा **"न अनुमानम् 'अतच्छ'ब्दाद्"** (ब्र.सू.१।३।३) इत्यादिना प्रकृतेः तद् निराकृतम्. यच्च सर्वभूताद्याश्रयोः अक्षरं वेदेषु तत्र-तत्र पठ्यते तदपि सा चेत् स्यात्, तस्याः तत्त्वं तदपि वारयितुम् आकाशान्तधारणमेव हेतूकृत्य ब्रह्मैव अक्षरम् इति समर्थितम् **"अक्षरम् अम्बरान्तधृतेः"** (ब्र.सू.१।३।१०) इत्यादिना. यदिच तथा अभिप्रेतं स्यात् तर्हि तत्साधकानीव प्रतीयमानानि अक्षरवाक्यानि न एवं निर्णीयेरन् तदनुगतब्रह्मसम्बन्धाद् अपचारतः प्रशासनस्यापि उपपत्तेः निर्विशेषवादिना त्वया ततोऽपि उपचारस्यैव वाच्यत्वात्. दहराधिकरणे च असकृत्त्वाद् वादोऽपि अपाकृतः. अव्यक्तकारणताबोधकवाक्यानामपि मायापरता निरासाय कठवाक्येषु अव्यक्तमपि ब्रह्मैव इति तुरीये आनुमानिकाधिकरणे स्थापयित्वा **"अजाम् एकां लोहितशुक्लकृष्णाम्"** (श्वे.उप.४।५) इति तत्साधकाभासस्यापि अन्यथा निर्णयः **"चमसवद् अविशेषाद्"** (ब्र.सू.१।४।८) इत्यादिना प्रदर्शितः इति दिक्. एवम् अग्रेऽपि तत्र-तत्र स्पष्टमेव इदम् इति अलं सकलब्रह्ममीमांसाविलेखनप्रयासेन; किन्तु, श्रुतिषु तत्र-तत्र शुद्धब्रह्मणएव उपादानत्वम् आम्नायते **"सः ह एतावान् आस"** (बृह.उप.१।४।३), **"तद् आत्मानं स्वयम् अकुरुत"** (तैत्ति.उप.२।७) इत्यादौ. न तत्र शबलस्य मायायाः वा नामापि अस्ति. स्मृतिषुच **"अहं सर्वस्य प्रभवः"**, **"वासुदेवः सर्वम् इति"**, **"एकांशेन स्थितो जगत्"**, **"अव्यक्ताद् व्यक्तयः सर्वाः"**, **"कूटस्थो अक्षरः उच्यते"**, (भग.गीता १०।-

८, ७।१९, १०।४२, ८।१८, १५।१६) एवमादिषु तदेव उच्यते. मायायास्तु व्यामोहकत्वमात्रं तत्र नतु जगदुपादानत्वादि. सूत्रेष्वपि आरम्भएव जिज्ञास्यं ब्रह्म किं लक्षणकं किं प्रमाणकञ्च इति आकांक्षायां “**जन्माद्यस्य यतः शास्त्रयोनित्वाद्**” (ब्र.सू.१।१।२) इति उक्त्वा किं जगतो निमित्तमात्रं तद्, उत उपादानमपि तदेव इति संशये निमित्तमात्रम् इति पूर्वपक्षे उपादानमपि तदेव इति समर्थयितुम् उक्तं “**तत्तु समन्वयाद्**” (ब्र.सू. १।१।३) इति. अधिकरणान्तराण्यपि वक्ष्यामः किञ्च कल्पितायाः मायायाः उपादानत्वमपि अशक्यम्. नहि कल्पितरजतं भूषणभाजनाद्युपादानं भवति. ब्रह्मभिन्नकल्पकस्य संस्कारसादृश्ययोश्च अभावात् तत्कल्पनस्यैव असिद्ध्याः ब्रह्मणो अधिष्ठानत्वमपि अशक्यं वक्तुं सर्वथा निर्विशेषत्वाच्च. नापि रज्जौ अविद्यमानं कल्पितभुजङ्गएव भासमानं तीव्रविषत्वमन्त्रनियम्यत्वादिकं तदधिष्ठानस्य रज्जोः कथञ्चिदपि लक्षणं भवति यावद् लक्षणज्ञानं लक्षस्य अधिष्ठानस्य अज्ञानाद् अधिष्ठानज्ञाने सति लक्षणस्यैव नाशाच्च. एतेन तद्गतञ्च उपादानत्वं तदधिष्ठानस्य लक्षणम् इति निरस्तम्. तदेतद् अभिसन्धाय आहुः **तद् असद्** इत्यादिना शुद्धब्रह्मणः इति, सूत्रयोः शबलपरतायाः सूत्राक्षरैः अलाभात् शबलबोधकपदाभावात् शङ्कराचार्यैः “**श्रुतत्वाच्च**” (ब्र.सू.१।१।११) इत्यन्तेन एकादशसूत्र्याः निर्गुणब्रह्मपरत्वं ततः उत्तरस्य ग्रन्थस्य सगुणपरत्वम् इति स्वयमेव भाष्ये विभागाच्च शुद्धस्यैव तद् इति सिध्यति. विभागानङ्गीकारेऽपि जिज्ञासितस्य शुद्धस्यैव उपास्यत्वं तत्त्वञ्च स्यात्. **श्रूयते** इति असङ्कुचितं कारणत्वम् इति शेषः. तेन समवायादिविविधमपि तदेव अस्तु इति भावः. **यतः इति** इति इदं “**तस्माद् वा एतस्माद् आत्मनः**” (तैत्ति.उप.२।१) इत्यादेः उपलक्षणम्. **हेतौ** इति भावः. “**विभाषा गुणे अस्त्रियाम्**” (पाणि.सू.२।३।२५) इत्यत्र विभाषः इति यो विभागाद् अगुणेऽपि हेतौ पञ्चमी. ...**उपादानवाचक**... इति “**यतो वा**” इत्यादिवाक्येषु इति शेषः. **तद् ब्रह्मैव** इति “**तत् प्रसिद्धम् अनुभूतं वा समवायिकारणं ब्रह्मैव इति अन्वयः**” (ब्र.सू.भा.प्र.१।१।३) सम्यग् अन्वयरूपहेतुबलात् ‘तत्’शब्दस्य उक्तएव अर्थः प्रतीयते. किञ्च पूर्वसूत्रे जन्मादिहेतुत्वम् उक्तं तत्र ‘आदि’पदोपात्तस्थितिप्रलयाभिसंवेशानां केवलनिमित्तत्वे सति असम्भवः

कुलाल-दण्डादौ तथा अदर्शनात्. अत: पूर्वसूत्रएव असङ्कुचितकारणत्वं विवक्षितम्, अतोऽपि सएव ‘तत्’शब्दार्थ:. नच एवं पूर्वेण गतार्थता शंक्या, भाष्यस्थपूर्वपक्षे उक्तदोषाणाम् अनपायेन घटादौ मृदाद्यन्वयस्यैव जगति ब्रह्मान्वयस्य अननुभवे स्थित्यादिवाक्ये उपचारशङ्कानपगमेन च सामान्यविशेषभावसङ्गत्या पुन: समवायित्वदृढीकरणस्य आवश्यकत्वात्. “**सम्यग् अनुवृत्तत्वाद्**” (ब्र.सू.भा.१।१।३) इत्यादि इमां भाष्यपंक्तिं प्रकाशकारा: “**ननु सम्यग् अनुवृत्तत्वम् अनारोपितानागन्तुकरूपेण सर्वं लक्षीकृत्य वर्तमानत्वं, तद् जगति ब्रह्मण: कथम्? नहि जगति ब्रह्मणो अनारोपितानागन्तुकेन ब्रह्मत्वेन रूपेण अन्वयो अवगम्यते, यथा पटे तन्तो: घटे मृद: इति आकाङ्क्षायां तद् आहु: ‘अस्ति’ इत्यादि. तेषु-तेषु वस्तुषु तत्तत्पुरुषप्रतीतिविषयेण अस्तित्वादिधर्मेण अवगम्यमानात् सदादिरूपेण अन्वयात्. योहि यदन्वित: स: स्वस्मिन् तद्विषयां प्रतीतिम् आधत्ते, यथा घटादि: पृथिवीत्यादिप्रतीतिं तथा अत्र सर्वम् अस्तीत्यादिप्रतीतिजनकत्वात् सदाद्यन्वितम्. ततश्च सदाद्यात्मकं सच्चिदानन्दात्मकञ्च ‘ब्रह्मे’ति तेन रूपेण ब्रह्मान्वयो अवगम्यतएव इति अर्थ:**” (ब्र.सू.भा.प्र.१।१।३) इति व्याचक्षते. ब्रह्मत्वञ्च “**सत्यं ज्ञानम् अनन्तं ब्रह्म**” (तैत्ति.उप.२।१), “**विज्ञानम् आनन्दं ब्रह्म**”(बृह.उप.३।९।१), “**सच्चिदानन्दरूपाय कृष्णाय अक्लिष्टकर्मणे**” (गो.तापि.उप.१।१।१) इत्यादिश्रुतिभ्य: सच्चिदानन्दत्वमेव. अत: तेन रूपेण अन्वयसिद्ध्या तदेव समवायिकारणं सिद्धम्. सूत्रे अयमेव ‘समन्वय’शब्दार्थो व्यासाभिप्रेत: इति ज्ञायते तेनैव “**जन्माद्यस्य यत: अन्वयाद् इतरतश्च अर्थेषु अभिज्ञ: स्वराट्**” (भाग.पुरा.१।१।१) इति श्रीभागवतारम्भश्लोके स्वद्वितीयसूत्रांशम् अनूद्य अन्वयाद् इति स्पष्टं समवायिकारणताबोधनात्. तत्रैव अग्रे “**अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्वत्र सर्वदा**” (भाग.पुरा.२।९।३५)इत्यादौ मुहु: अन्वयस्यापि कथनात् समन्वयेन व्यतिरेकत: च इति स्फुटम् उक्तार्थक‘समन्वय’शब्दस्य स्वयम् उपादानाच्च. अत: तस्य सूत्रेऽपि सएव अर्थ:. व्यतिरेकोऽपि सूत्रेषु ईक्षत्यानन्दमयाद्यधिकरणेषु तन्निष्ठमोक्षोपदेश-तद्धेतुव्यपदेशादिना इतरस्य तन्निषेधेन च सिद्धएव. **जडे**त्यादि, जडे सदंशस्य जीवे चिदंशस्य अन्तर्यामिणि

आनन्दांशस्य च प्राकट्यं प्राधान्येन अनुभवः. वस्तुतस्तु सर्वत्र त्रयाणामपि अंशानां तारतम्येन अन्वयः. अत्र विस्तरस्तु भाष्य-निबन्ध-तत्तव्याख्यानादिषु ध्येयः. सुगमप्रक्रियातु शुद्धाद्वैतमार्तण्डे मदीयवेदान्तचिन्तामणेः तृतीयप्रकरणेच ज्ञेया. तत्तदंशमात्रस्य तत्र प्राकट्ये मानन्तु नृसिंहोत्तरतापनीयनवमखण्डादौ अवधेयम्. अत्रापि **तत् किं समवायि निमित्तं कर्तृ वा?** इत्यारभ्य एतदवधि समन्वयसूत्रभाष्यमेव किञ्चिद् अक्षरशः अर्थतः च अनूदितम्. एवम् अग्रेऽपि अस्मिन् खण्डे 'जन्मादि'सूत्रभाष्यं तत्रत्यप्रकाशः च यथोचितम् एकीकृत्य अक्षरशः अर्थतः च अनुवदिष्यते. अतः सर्वम् अस्माकम् आकरसिद्धमेव उच्यते नतु सहस्राक्षकारवत् स्वभाष्याद्युल्लंघ्य स्वकपोलकल्पितम् इति ध्येयम्. किञ्च यदि मायैव जगदुपादानं स्यात् तर्हि सर्वत्र मायात्वम् अलीकत्वनियमेन प्रतीयेत नतु एवं प्रतीयते नापि प्रमाविषयेषु प्रापञ्चिकघटादिषु त्वदतिरिक्ताः तार्किकादयोऽपि अलीकत्वं मन्यन्ते. अतो न सा तथा इति आहुः **अलीकत्वेव** इति. सूत्रकृता तत्र-तत्र निराकृतत्वादपि न तथा. निराकरणन्तु दिङ्मात्रेण दर्शितम्. नच इदं सर्वं सांख्यमात्रपरम् इति वाच्यं, तुल्ययुक्त्या तवापि निरासस्य अनपायात्. तर्कपादेऽपि अर्द्धवैनाशिकयोः प्रक्रियानिराकरणेन आधुनिकविलक्षणार्धवैनाशिकानां जैन्याद्यर्वाचीनवैनाशिकानां च तुल्ययुक्त्या निराकरणं यथा सर्वसम्मतं तथा अत्रापि. **"मायान्तु प्रकृतिं विद्याद्"** (श्वेता.उप.४।१०) इत्यादिवाक्यैः 'प्रकृति''माया'शब्दयोः पर्यायत्वात् च. अन्यथा सांख्यं निराकृत्य ब्रह्मणएव कारणतां न स्थापयेत्. अग्रेच त्वत्सम्मतस्वरूपां मायां स्फुटम् उपपाद्य तस्याः तथात्वं साधयेद् नतु एवं दृश्यते. अतः तवापि तत्तदधिकरणतो निरासो न वारयितुं शक्यः. किञ्च तथा सिद्धान्ते सति प्रकृतिकारणवादवारणे को अयं भगवतो निर्बन्धः; किन्तु, पुरुषानेकत्वमात्रनिराकार्यं प्रकृतेः च अलीकत्वमेव साधनीयम्. प्रकृतेरेव उपादानत्वम् अनादेरपि तस्याम् उक्तपुरुषे संसर्गाभावः पुरुषस्य प्रकृतिविकृतिभिन्नत्वं निर्लेपत्वञ्च इत्यादिकन्तु प्रायेण तुल्यमेव. स्थापयतितु तत्र-तत्र प्रकृतिं निरस्य परस्यैव सर्वविधकारणतां मायायाश्च नामापि प्रपञ्चोत्पत्तिविचारे न उच्चारयति ततो निश्चीयते न मायावादगन्धोऽपि श्रीव्यासाशयगोचरः इति. **"तद् आत्मानम्"** इति. ब्रह्मवल्ल्यां **"तद्**

आत्मानं स्वयम् अकुरुत, तस्मात् तत् सुकृतम् उच्यते इति'' (तैत्ति.उप.२।७) इति पठ्यते. 'आदि'पदात् ''**स द्वितीयम् ऐच्छत्...सः ह एतावान् आस**''(बृह.उप.१।४।३), ''**सः सर्वम् अभवत्**''( ) , ''**सच्चत्यच्च अभवत्**'' (तैत्ति.उप.२।६) ''**सर्वं खलु इदं ब्रह्म तज्जलान्**'' (छान्दो.उप.३।१४।१) इत्याद्याः शतशो ज्ञेयाः. अतो ब्रह्मैव उपादनं नतु माया एषु क्वापि अनुल्लेखात्. एवं सूत्रेषु ''**प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधाद्**'' (ब्र.सू.१।४।२३) ''**अश्मादिवच्च तदनुपपत्तिः**'' (ब्र.सू.२।१।२३) इत्यादीनि द्रष्टव्यानि. विस्तरभयाद् इह न प्रपञ्च्यन्ते. तदुक्तं शाखाचन्द्रदृष्टान्तं दूषयन्ति **नच शाखा**...इत्यादिना. अयं भावः : एकत्र वास्तवमेव परत्र अवास्तवमपि लक्षणं भवति. शाखाहि वृक्षस्य वास्तवं ज्ञापकं सा चन्द्रमसः आगन्तुकं तद् भवति. कारणत्वन्तु कुत्रापि न वास्तवम् इति ब्रह्मणो आरोपितलक्षणमपि शाखावत् कथं स्यात्? किञ्च चन्द्रं दिदृक्षमाणं प्रति स्वयं चन्द्रं दृष्टवता पूर्वं चन्द्रएव अंगुल्या निर्दिश्यते. ततोऽपि अदर्शने शाखा प्रदर्श्यते नतु चन्द्रदर्शनार्थं नियमेन शाखाप्रदर्शनम् आवश्यकम् इति सिद्ध्यति. अत्रतु ''**यतो वा**'' इति लक्षणं शाखास्थानीयम्. तच्च ''**भृगुः वै वारुणिः वरुणं पितरम् उपससारः अधीहि भगवो ब्रह्म इति**'' (तैत्ति.उप.३।१) इति भृगुणा ब्रह्मस्वरूपे पृष्टे तत्पित्रा वरुणेन ''**यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्ति, अभिसंविशन्ति, तद् विजिज्ञासस्व तद् 'ब्रह्म' इति**'' (तैत्ति.उप.३।१) इत्येव उक्तं नतु प्रथमतो ब्रह्मस्वरूपं त्वद्रीत्या वास्तवं किञ्चद् उक्तम्. एवं सर्ववेदान्तनिर्णयार्थं प्रवृत्तेन सूत्रकारेणापि ब्रह्मजिज्ञासां प्रतिज्ञाय ''**जन्माद्यस्य यतः**'' इत्येव असन्दिग्धम् उक्तं नापि गत्वा तत् त्यक्तं; किन्तु, यत्र-यत्र श्रुतिषु तत् सन्दिग्धं तं तं भागं निर्णियता तत् सुदृढीकृतं नहि कर्तृत्वादिनिषेधकम् एकमपि अधिकरणम् अस्ति. शाखातु अग्रे गत्वा त्यज्यतएव प्रदर्श्यते च शुद्धचन्द्रः **भृगुपित्रा** इत्यादि. अत्रतु वरुणेन उपसन्नं स्वपुत्रं प्रति ''**यतो वा**'' इत्येव उक्तम्. तेन च अन्नादिषु लौकिकेषु विभूतिरूपेषु वा ब्रह्मत्वेन ज्ञातेषु भूयोभूयः पित्रा तपएव उपदिष्टम्. उत्तमाधिकारिणः तस्य अपरितोषात् पुनः पुनः उपसत्तिः च दर्शिता. सिद्धे तपः परिपाके

''आनन्दो 'ब्रह्म'इति व्यजानाद् आनन्दाद्ह्येव खलु इमानि भूतानि जायन्ते'' (तैत्ति.उप. ३।६) इत्यादिना तल्लक्षणएव आनन्दरूपे ब्रह्मणि ज्ञाते तत्त्वतः परितोषाद् न पुनः उपसत्तिः. अप्रतारकेण वरुणेन च न किञ्चिद् अन्यद् उपदिष्टं; किन्तु, वेदेन **''सा एषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिता''** (तैत्ति.उप.३।६) इत्यादिना विद्यायाः उपसंहारः ब्रह्मधामस्थत्वं तत्फलानि च दर्शितानि. यदि चन्द्रवद् अन्यत् स्याद् इदञ्च शाखावद् हेयं तर्हि परमोत्तमस्य भृगोः न तन्मात्रलक्षणकब्रह्मज्ञानम् उपपद्येत. तदनुपदेशे वरुणस्य प्रतारकत्वञ्च स्यात्. उपसंहारश्च न घटेत विद्यात्वं परमव्योमप्रतिष्ठितत्वं च तादृशसंवादस्य न संगच्छेत. एवं मुण्डक-श्वेतकेतुविद्यादिषु विद्यान्तरेष्वपि ज्ञेयम्. शाखावद् अग्रे गत्वापि कर्तृत्वस्य हेयत्वाभावादेव सूत्रकारः तस्य वेदे क्वापि हेयत्वस्य अनाम्नातत्वं वक्ति **''हेयत्वावचनाच्च''** (ब्र.सू.१।१।८) इति. अतो न कर्तृत्वे कथञ्चिदपि शाखाचन्द्रन्यायावतारः. अतएव त्वन्मते व्यासस्य प्रतिज्ञाहान्युपक्रमविरोधापि सुस्थौ. तथाहि **''अथातो ब्रह्म जिज्ञासा''** (ब्र.सू.१।१।१) इत्यत्र किं सगुणस्य जिज्ञासा प्रतिज्ञायते आहोस्विद् निर्गुणस्य ? न आद्यः, निर्गुणस्य तत्त्वसूत्रासम्मतत्वापत्त्या अनादरणीयत्वप्रसङ्गाद् ब्रह्मणो ज्ञातुम् इच्छा कर्तव्या इति त्वन्मते अर्थाङ्गीकारेण सगुणपरत्वे सर्ववेदतत्त्वनिर्णयार्थं प्रवृत्तस्य सर्ववेदव्यासकर्तुः वेदव्यासस्यापि निर्गुणज्ञानम् अनिष्टम् इति अवैदिकं निर्मूलं स्यात्. अग्रे त्वदभिमते निर्गुणनिरूपणे अप्रतिज्ञातनिरूपणञ्च आपद्येत. द्वितीयः चेद्, निर्गुणजिज्ञासां प्रतिज्ञाय मायायाः व्यवहितसगुणलक्षणमेव वदतः तस्य प्रतिज्ञाहान्युपक्रमविरोधौ स्यातामेव. नच शाखाचन्द्रवद् निर्गुणतटस्थलक्षणता अस्य स्वीकर्तुं शक्या, तन्न्यायनिरासात् तथा व्यासाशये गमकाभावाद् अनुपदंकथनेन साक्षाद्लक्षणतायाएव प्रतीतेः. अन्यथा पूर्वतन्त्रे **''चोदनालक्षणो अर्थो धर्मः''** (जै.मी.सू.१।१।२) इति लक्षणमपि शाखाचन्द्रवद् आरोपितम् इति शक्येत वक्तुम्. नहि इदं कस्यापि सम्मतम् अतः तद्वद् इदमपि अनारोपितलक्षणमेव सिद्ध्यति. किञ्च तथा सति ब्रह्मजिज्ञासां प्रतिज्ञाय व्यासः द्वे ब्रह्मणी सगुणं निर्गुणं च तत्र **''जन्माद्यस्य यतः''** तत् सगुणं मायैव वा तदधिष्ठानन्तु निर्गुणं पूर्वं परस्य तटस्थलक्षणं शाखाचन्द्रवद् इत्येव क्रमेण असूत्रयत. नच

किञ्चिदपि तथा वदति अत: तादृशप्रक्रियाकल्पनं सर्वथा व्यासानभिमतं निर्मूलमेव. **शुद्धत्वहानि:** इति. त्वदभिमतशुद्धत्वस्य स: इति अर्थ:. **श्रुत**इति. **"यथा सोम्य एकेन मृत्पिण्डेन...एकेन लोहमणिना"** (छान्दो.उप.६।१।४-५) इत्यादिना श्रुत:. **सर्वम् अपास्तम्** इति. किञ्च ऐन्द्रजालिकस्य सिंहादिभाव: केवलमायिको नतु स्वरूपतो मृद्घटादिवत् सिंहादिभावो, अतो गौणता तत्र अस्त्येव बद्धदृष्टीनां तथा प्रतीतेरेव स्वीकारात्. एतेन सहकारित्वकथनमपि अपास्तम्. द्वैतापत्तिरपि तत्र अस्त्येव ऐन्द्रजालिकस्य मायायां तस्य शक्तित्वे अङ्गीक्रियमाणेऽपि शक्तिशक्तिमतो: भेदस्य त्वया उक्तत्वात्. पदार्थान्तरत्वे सुतरां सा तद्दर्शितवस्तूनां मिथ्यात्वेऽपि तस्य अवास्तवत्वात्. शबलकारणत्वपक्षे तस्यैव परामर्शो योग्य:. अन्यथा तस्मिन् कारणताकथनस्यैव व्याघातापातात्. **"ता आप: ऐक्षन्त:"** (छान्दो.उप.६।२।४) इत्यादावपि तद्रूपेण परिणतस्य ब्रह्मणएव ईक्षणम् अतो न गौणम्. प्रथमस्य तेजो वाक्यस्य अत्र अनुपादाने बीजं चिन्त्यम्. यच्च मायामात्र... इत्यादि तद् अत्यन्तं तुच्छम् ईक्षणं ब्रह्मकर्तृकं मुख्यं च इति स्वीकारे 'मात्र'पदविरोधात्. शुद्धस्य सविशेषत्वापत्तेश्च. एवं सत्, 'तत्' शब्दवाच्यत्वेपि मुख्ये तदापत्ति: केवललक्ष्यत्वभङ्ग: त्वद्रीत्या **"यतो वाच:"** इत्यादिविरोधश्च द्रष्टव्य:. सेनाभिप्रायेण यथा राज्ञो 'योत्स्ये' इति वाक्यन्तु गौणमेव; किन्तु, स्वयं युद्धाभिप्रायेण वाक्यमेव मुख्यम् अत: तद्दृष्टान्तेन ईक्षणे पुनरुपचारदाढर्चाद् घट्टकुटीप्रभातम् ईक्षणाकारे उत्तमपुरुषप्रयोगस्य गौणत्वे ईक्षणस्य सुतरां तत्सिद्धे: शुद्धे अन्त:करणादे: अभावात् च. तद् आहु: **न सम्भवति** इत्यादिना. **"सा इयं देवता"** इत्यत्र तेषां शब्दानां मुख्यत्वे मायां विना जीवभाव: कार्यतया परिणामश्च अस्मदिष्ट: सिद्धचेद् इत्यादि ऊह्यम्. नामरूपव्याकरणञ्च न गौणम् अन्यथा अनेकश्रुतीनां **"संज्ञामूर्तिक्लृप्तिस्तु"** (ब्र.सू.२।४।२०) इत्यधिकरणस्य च व्याकोपाद् इति उक्तं प्राक्. श्रुतिषु तुल्यतया श्रावणेऽपि स्वेच्छया कस्यचिद् अंशस्य मुख्यत्वं कस्यचिद् गौणत्वम् इति कल्पनन्तु श्रुतिविप्लावनमेव. परेण विपर्यय: च आपादयितुं विनिगमनाविरहात् शक्य:. अतो वेदे यथा श्रूयते तथैव सर्वं मुख्यं मन्तव्यम्. तन्मते **"गौणश्चेद् न"** (ब्र.सू.१।१।५) इत्यादि सूत्रत्रयविरोधं पुनरापादयितुम् आहु: **किञ्च शबलस्य** इत्यादि

‘शबल’पदं केवलमायायाअपि उपलक्षणम्. “**तन्निष्ठस्य मोक्षोपदेशाद्**” (ब्र.सू.१।१।६) इति सूत्रस्य अर्थम् आहुः **किञ्च सो अकामयत** इत्यादिना. “**यदा ह्येव एषः**”(तैत्ति.उप.२।७) इति ब्रह्मवल्लीश्रुतौ सप्तम्यन्तेन तदा पूर्वोक्तो बहुभवनप्रकृष्टजननकामनापूर्वक ‘तपः’शब्दवाच्यपर्यालोचनपूर्वक-सर्वसृष्टिकर्तैव परामृश्यते सान्निध्यात्. एतस्मिन् जगत्कर्तरि अदृश्ये लौकिकेन्द्रियागोचरे अनात्म्ये आत्मभिन्नशरीररहिते अनिरुक्ते तत्सृष्टैः अस्माभिः निर्वक्तुम् अशक्ये, अनिलयने निरधिष्ठाने यः उभयाभावं प्रकृष्टस्थितिं नित्यनिराबाधतारूपां विन्दते. अथ तन्निष्ठतासिद्ध्यनन्तरमेव स साधकः अभयं मोक्षं गतो भवति इति तदर्थः. अत्र ‘अदृश्यादि’पदैः जगत्कर्तुरेव प्रापञ्चिकधर्मराहित्यं निरधिष्ठानत्वाद् अविवर्तत्वञ्च उक्तं संसारएव इति. यदि मायासंवलितनिष्ठस्यापि मोक्षः स्यात् तर्हि स्त्रीपुत्रादिनिष्ठस्यापि सः स्यादेवेति अलं साधनैः इति भावः. जगत्कर्तृनिष्ठस्य मोक्षोपदेशात्तु न सः मायासंवलितो गौणः; किन्तु, शुद्धएव अनौपचारिकः इति निष्कर्षः. “**हेयत्वावचनाच्च**” (ब्र.सू.१।१।८) इति सूत्रस्य अर्थम् आहुः किञ्च **शाखेत्यादिना उपदिश्येत** इति पुत्रेषणादिवद् इति भावः. अन्यत् सर्वं प्रायेण उत्तानार्थं भाष्याद्यनुवादरूपञ्च. यत्तु तन्मते ईश्वराभावेन इत्यादि, तत्प्रकृतानुपयोगि त्वद्योजनयापि सूत्रविरोधानपायात्. एकेश्वरसाधनार्थम् एषु सूत्रेषु तुल्यबहुपुरुषवादे दूषणानाम् अनुपन्यासात्. द्वितीयस्य तृतीयपादसमाप्तविव तन्निरासाच्च **औपाधिके**त्यादि. घटगतम् उत्क्षेपणापक्षेपणादिकं परिच्छेदादिकं च घटवर्त्येव नतु आकाशवर्ति इति भावः. ...**पर्यायत्वाद्** इति “**मायान्तु प्रकृतिं विद्याद्**” (श्वेता.उप.४।१०) इति श्रुतेः इति आशयः. **शब्दानाम्** इति बहुवचनन्तु प्रधानादिशब्दान्तरसङ्ग्रहाय ‘माया’वाचकानां ‘प्रकृति’वाचकानां च तेषां शक्ततावच्छेदकभेदेऽपि शक्यतावच्छेदकैक्यं ध्येयं उक्तश्रुतेः ...**षड्विधे**... इति. तानितु “**उपक्रमोपसंहारौ अभ्यासो अपूर्वता फलम् अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये**” (द्र.सर्वदर्श.पूर्णप्र.) इति उक्तानि. **लिङ्गं** ज्ञापकम्. **कस्याश्चिद्** इति. “**इन्द्रो मायाभिः**” इति आद्या माया-कारणतावाक्याभासाद् द्वित्राएव. ईश्वरकारणतावाक्यानितु तत्र-तत्र वेदे शतशएव सन्ति इति लिङ्गाभावेऽपि बहूनाम् अनुग्रहस्यैव न्यायत्वाद् द्वित्रेष्वेव

उपचारकल्पना लघीयसी किं पुनः तेषां लिङ्गादिसहकृतत्वे वक्तव्यम्. वाक्याभासाः च उपक्रमादिप्रदर्शनपुरःसरं व्याख्याताः प्राक्. यच्च **जन्मादिसूत्रस्य** उपचारिकत्वकथनं तत्तु शास्त्रविप्लावनमेव. श्रुतिषु उपचारानुपचारनिर्णयार्थंहि **सूत्रप्रादुर्भावनम्**. तत्रापि व्याख्यातृभिः स्वेच्छयोपचारानुपचारयोः कल्प्यत्वे कृतं वृथा कण्ठगडुभूतैः सूत्रैः. असन्दिग्धानवहेल्यानवद्यमेव च सूत्रकारः कुतो न सूत्रितवान् **“अल्पाक्षरम् असन्दिग्धं सारवद् विश्वतोमुखम् अस्तोभम् अनवद्यं च सूत्रं सूत्रविदो विदुः”** (   ) इति तल्लक्षणात्. तथा कल्पनेतु तत्र-तत्र सूत्रत्वमेव व्याहन्येत. **नहि अस्मन्मते**इत्यादि अयम् आशयः : जिज्ञासासूत्रपुरुषोत्तमविचारारम्भएव प्रतिज्ञातः. पुरुषोत्तमस्यापि लीलासर्गप्रतिसाक्षात्कारणता निबन्धादिषु **“एवं कदाचिद् भगवान् साक्षात् सर्वं करोति अजः”**(त.दी.नि.१।३६) इति सृष्ट्युपक्रमे **“कदाचित् सर्वम् आत्मैव”**(न.दी.नि.१।३७) इत्यादिस्थले स्वीकृता. दहरविद्या बृहदारण्यकादिसिद्धा च सा. यद्यपि क्षरसृष्टिं प्रति अक्षरस्य कारणता **“तथा अक्षरात् सम्भवति इह विश्वम्”**(मुण्ड.उप.१।१।७) इत्यादिमुण्डकादिश्रुतिभिः अव्यक्तादीनि भूतानि. **“अव्यक्ताद् व्यक्तयः सर्वाः”**, **“कूटस्थो अक्षरः उच्यते”** (भग.गीता ८।१८,१५।१६) इत्यादिस्मृतिभिश्च सिद्ध्यति तथापि **“ब्रह्म पुच्छं प्रतिष्ठा”** (तैत्ति.उप.२।५) इत्यादिश्रुतिभिः **“त्वम् अक्षरं परमं वेदितव्यं त्वम् अक्षरं सदसत् तत्परं यत्”** (भग.गीता ११।१८) इत्यादिस्मृतिभिः च अक्षरस्य पुरुषोत्तमांशत्वात् पृथिव्यंशमृद्राशिमृत्पिण्डादिहेतुकघटादिकं प्रति पृथिव्याइव क्षरं प्रत्यपि पुरुषोत्तमस्य कारणता न अपैति. अतो **“जन्माद्यस्य यतः”** इत्यपि पुरुषोत्तमस्यैव अनौपचारिकं लक्षणम्. अतएव भगवन्तो भाष्यकाराः तत्र सूत्रे समासभेदेन पुष्ट्यादिसर्वसृष्टिप्रकारान् संगृह्णन्ति. अतएवच सूत्रकारो ‘अक्षर’शब्दस्यापि तत्रैव प्रवृत्तिं प्रथमस्य तृतीये **“अक्षरम् अम्बरान्तधृतेः”**(ब्र.सू.१।३।१०) इति अधिकरणे साधयति. अक्षरस्य अंशत्वादेव **“अक्षरधियान्तु”** (ब्र.सू.३।३।३३) इत्यादौ निरूपणेऽपि न अप्रतिज्ञातनिरूपणम्. नहि श्रीरामवर्णनार्थं प्रवृत्ते रामायणे तच्चरणादिवर्णने तत्रापि अप्रतिज्ञातनिरूपणं कोऽपि मनुते. तस्माद् अस्माकं सूत्रेषु न प्रतिज्ञाहान्युपक्रमविरोधदोषगन्धोऽपि नापि पुरुषोत्तमकारणतावाक्येषु उपचार-

लेशोऽपि. नहि ‘‘वदनेन वदति’’, ‘‘कराभ्याम् आचरति’’, ‘‘चरणाभ्यां चरति’’ पुरुषे एकैकांशएव सा क्रियेति तत्र ‘वदति’ ‘आचरति’ ‘चरति’ प्रयोगाः औपचारिकाः कस्यापि अभिमताः.

यस्तु ‘‘**जन्माद्यस्य**’’ इत्यादिसूत्रैः व्यासपादैः निरूपितम् इति मार्तण्डकारिकाव्याख्यास्थं सूत्रार्थम् अनूद्य तद् न सम्यग् इत्यादिः अत्यन्तासन्निकर्षाद् अयुक्तः इत्यन्तः प्रलापः कृतः सोऽपि अस्मन्मताज्ञानाद् अकाण्डताण्डवरूपः. नहि जगज्जन्माद्याश्रयस्य शास्त्रोक्तकारणत्वहेतुना कर्तृत्वमात्रम् अत्र साध्यते इति अस्माकम् अभिप्रायः नापि ‘कर्तृ’पदाध्याहारो विवक्षितः किन्तु; ‘‘**जन्माद्यस्य यतः**’’ इति सूत्रांशस्यैव फलितार्थकथनं कर्तृ इति भाष्यादौ ब्रह्मणि जगज्जन्मादिकारणत्वम् अनेन साध्यते. सूत्रे **अस्य** इत्यनेन जगतः इति लभ्यते ‘‘**जनिकर्तुः प्रकृतिः**’’ (पाणि.सू.१।४।३९) इति अपादानताम् आश्रित्य प्रवृत्तयोः श्रुतिसूत्रयोः ‘यतः’ इति पञ्चम्याच कारणत्वम्. ‘**जन्मादि**’पदन्तु सौत्रमेव अतो न असौत्रम् अत्र किञ्चित्. तच्च कारणत्वं सांख्यैः कार्येश्वरवादिभिः सेश्वरैः च पातञ्जलैः तत्र न अङ्गीक्रियते; किन्तु, प्रकृतावेव तद् उच्यते, ब्रह्मकारणताबोधकश्रुतिषु च उपचारः कल्प्यते. अतः तन्मतानुरोधाद् ब्रह्म न जगज्जन्मादिकारणं, वाक्यानितु गौणकर्तृत्वाभिप्रायाणि इति पूर्वः पक्षः. तेन तदंशे प्रायेण समानयोगक्षेमत्वात् त्वन्मतमपि अर्थादेव सङ्गृहीतं भवति. सूत्रकृतातु ब्रह्मण्येव निरङ्कुशकारणतां सिद्धान्तयता सांख्यादिभिः सह तदपि अयत्नाद् अपाकृतम्. यत्तु तर्हि जगज्जन्मादिकं प्रकृतेः अन्यत्र स्थापयित्वा प्रवृत्तेन अनेन सूत्रेण प्रकृतावेव कर्तृत्वमपि साध्यते इति आपतति इति तद्, न; सकलवाक्यसमन्वयप्रतिपादके समग्रे अध्याये एकत्रापि ‘माया’पदः ततद्वाचकपदान्तरस्य वा गन्धस्यापि अभावेन प्रकृतौ कर्तृत्वसाधनस्य कथञ्चिदपि वक्तुम् अशक्यत्वात्. अन्यथा ‘‘जन्माद्यस्य यतः सा प्रकृतिः’’ इति वदेत्. परामृश्यतेतु ‘यच्छ’ब्दोपस्थापित‘तच्छ’ब्देन पूर्वसूत्रोक्तं ब्रह्मैव. इष्टञ्च इदं तवापि इत्थमेव. निरुपचारबहुतरशास्त्रेषु तथाकथनाद् ब्रह्मण्येव निरङ्कुशकारणत्वे स्थापिते शास्त्रविरोधादेव प्रकृतौ तन्निरासस्य आर्थिकत्वात्

च. “**जीवेशौ आभासेन करोति**”(नृ.उ.उप.९) इति वाक्याभासस्तु पूर्वपक्षोपष्टम्भको भविष्यत्येव. त्रयोऽपि वाक्याभासाः प्राग्व्याख्याताः. व्याख्यास्यते च यथोपयोगं चतुर्थाष्टमश्लोकखण्डनादौ. नच अत्र सूत्रे ते विषयवाक्यतया सूत्रयितुः अभिप्रेताः तत्र तद्गमकाभावात्. ब्रह्मणएव तदा परामर्शाद् विपक्षे उक्तदोषाच्च; किन्तु, “**यतो वा**” इत्यादीनि ब्रह्ममात्रकारणतावाक्यान्येव. अतएव श्रुतिघटकं ‘**यतः**’ इति पदं तदुपस्थापनाय उपात्तम्. तत्र ‘जायन्ते’ इति ‘जनि’धातुप्रयोगाद् अत्रापि तद्धातुनिष्पन्नं ‘जन्म’पदञ्च उक्तम्. तेन ‘आदि’पदेन श्रुत्युक्तं जीवनादिकमेव सङ्गृह्यते. ‘**अस्य**’ इति एकवचनन्तु “**इदं सर्वम् असृजत**”(तैत्ति.उप.२।६), “**सदेव सोम्य इदम् अग्रे आसीत्**” (छान्दो.उप.३।१४।१), “**आत्मा वा इदम् एकएव अग्रे आसीत्**”(ऐत.उप.१।१), “**सर्वं खलु इदं ब्रह्म**” (छान्दो.उप.३।१४।१), “**पुरुषएव इदं सर्वम्**” (श्वेता.उप.३।१५), “**यस्मिन् इदं संचविचैति सर्वम्**” (महाना.उप.१।३), “**सलिलं सर्वम् इदं**” (ऋक्.संहि.१०।१२९।३), “**यो अस्याः अध्यक्षः**” (ऋक्.संहि.१०।१२९।१) इत्यादेः एकवचनान्त ‘**इदमा**’ जगद् निर्दिशतः श्रुतिशतस्य संग्रहाय. “**शास्त्रयोनित्वाद्**” इति सामान्यतः शास्त्रपदं द्वयोरपि काण्डयोः संग्रहाय. तेन “**न असद् आसीद्**” (ऋक्.संहि.१०।११।१२९।१) इत्यादीनां “**प्रजापतिः अकामयत**” (तैत्ति.संहि.३।१।१।१,७।१।१) इत्यादीनाञ्च साक्षात् परम्परया वा यथायथं तत्रैव समन्वयो दर्शितः. ‘**योनि**’पदन्तु “**कर्तारम् इशं पुरुषं ब्रह्मयोनिं**” (मुण्डो.उप.३।१।३) “**मम योनिः अप्स्वन्तः समुद्रे**” (देव्यु.४) इत्यादिवाक्यान्तरस्मारणाय. अत्र प्रकृतेरपि योनिः सएव इति कथनाद् यतो अस्य जन्मादि तद् ब्रह्मैव नतु सा इति प्रकृतेः कर्तृत्वादिकम् अनेनैव निरस्तं भवति. अयञ्च अस्माकं पूर्वोत्तरपक्षयोः विशेषः पूर्वपक्षे प्रकृतिपदाभिधेयमायायामेव मुख्यं कर्तृत्वादिकम्. ब्रह्मणितु आरोपितमात्रं तत्. अतो “**भुवः प्रभवः**” इति वा विभाषेति योगविभागाद् वा पञ्चमी. सिद्धान्तेतु ब्रह्मण्येव मुख्यं निरङ्कुशं तत् नतु प्रकृतौ. नापि श्रुतिषु उपचारगन्धः, अतः उक्तशास्त्रात् पञ्चमी. तत्र शास्त्रयोनित्वमपि गमकं समन्वयसूत्रञ्च. अतो न सिद्धसाधनं नापि उपहासावकाशः. ब्रह्मविचारप्रतिज्ञोत्तरं

लक्षणप्रमाणबोधकम् इदम् अधिकरणम् इतितु वयमेव वदामः. पूर्वतन्त्रतौल्यन्तु अस्मद्मतएव नतु त्वन्मते इति वक्ष्यते. पूर्वं समस्तपदेऽपि ब्रह्मणएव परामर्शस्तु ‘पटोलपत्रम्’ इतिवद् ‘‘दशैते राजमातङ्गाः तस्यैव अमी तुरङ्गमा’’ इत्यादिवत् च युक्तएव. यतो अस्य जन्मादि तद् इति अंशस्यैव फलितार्थो भाष्यादौ कर्तृ इति प्रागुक्तम् अतो न अस्माकम् अत्र ‘कर्तृ’पदाध्याहारः; किन्तु, तवैव ‘‘**शास्त्रयोनित्वाद्**’’ इति पृथगधिकरणे सुतरां सङ्गतः सः. तत्र त्वन्मते ‘‘**शास्त्रयोनित्वाद्**’’ इत्यत्र न कर्तृब्रह्मवेदस्य किं वा कर्तृन् अकर्तृ तत्. ‘‘**वाचा विरूप नित्यया**’’ (ऋक्.संहि.८।७५।६) इत्येवं नित्यत्वकीर्तनात्. कर्तृनिःश्वसितादि उक्ते नित्यत्वं पूर्वसाम्यतः सर्वावभासि वेदस्य कर्तृत्वात् सर्वविद् भवेद् इति व्याख्यानात्. किञ्च ब्रह्मणो अकर्तृत्वे आचार्यस्य अभिप्रेते ‘‘**जन्माद्यस्य यतः**’’ इति अनुक्त्वा ‘‘अकर्तृ तद्’’ इति ‘‘अधिष्ठानं तद्’’ इत्येव वा लक्षयेत् नतु यथाश्रुतम्. तद् एतत्सर्वम् अनुसन्धाय आहुः **सोऽपि अस्मद्...** इत्यादिना. **वेदार्थभूतः...** इति, ‘‘**अथातो ब्रह्मजिज्ञासा**’’ इत्यत्र ‘‘**वेदः तत्त्वं तपो ब्रह्म**’’ (अम.को.३।३।१-१४) इति कोशाद् ‘ब्रह्म’पदं वेदोपस्थापकं परमात्मपरञ्च. ‘जिज्ञासा’पदं विचारपरम् ‘‘**अजिज्ञासितमद्धर्मो गुरुं मुनिम् उपाव्रजेद्**’’ (भाग.पुरा.११।१८।-३८) इति एकादशस्कन्धादौ तथा प्रयोगदर्शनात्, शास्त्रे अस्मिन् मीमांसा इति प्रसिद्धेः च. मीमांसतिश्च विचारे प्रसिद्धः मानेः जिज्ञासायाम् इतिहि सन् तत्रापि जिज्ञासाविचारएव ज्ञानेच्छापरत्वे मानेः ज्ञानार्थकतयैव सिद्धौ मानबधदानूशान्भ्य(?) इति स नो विधानमेव व्यर्थस्यात् ‘‘**मीमांसमानस्य समुत्थितो अग्रतः**’’ (भाग.पुरा.७।८।२०) इत्यादिषु मीमांसतेः प्रचुरतरप्रयोगेष्वपि विचारएव अर्थः सङ्गच्छते नतु ज्ञानेच्छा इति अलं प्रासङ्गिकेन. ‘अथ’शब्दश्च आरम्भार्थकः योगसूत्रव्यासभाष्यमहाभाष्यादिषु ‘‘‘**अथ’ योगानुशासनम्**’’ (पातं.यो.सू.१।१।१) ‘‘‘**अथ’ शब्दानुशासनम्**’’ (पाणि.सू.१।१।१) इत्यादौ तथा दर्शनात्. अविकार आरम्भः इति अनर्थान्तरम्. ‘अतः’शब्दो हेत्वर्थः. यस्मात् कर्मादिभ्यो ब्रह्मज्ञानमेव पुरुषार्थसाधकम् अतः तज्ज्ञानाय वेदार्थब्रह्मणो वेदानुकूलो विचारो अधिक्रियते इति सूत्रार्थः.

सच विचारः प्रथमे अध्याये सर्वेषां वेदान्तवाक्यानां ब्रह्मण्येव समन्वयस्य, द्वितीयस्मिन् अध्याये बाह्यस्मृतिनिरासपूर्वकं श्रुतीनां परस्परविरोधस्य तृतीयस्मिन् साधनानां, तुरीये फलानां च प्रतिपादनेन दर्शितः. अयञ्च सर्वोऽपि विचारः पूर्वलक्षणप्रमाणज्ञानमन्तरा न शक्यः इति ब्रह्मणो लक्षण-प्रमाणबोधकं द्वितीयाधिकरणम्. **प्रमाणम्** इति, सूत्रे शास्ति इति शास्त्रं वेदः इति व्याख्यानाद् अशेषो वेदएव ब्रह्मणि प्रमाणम् इति भावः. तथाच यथा पूर्वतन्त्रे "**अथातो धर्मजिज्ञासा**" (जै.मी.सू.१।१।१) इति धर्मविचारं प्रतिज्ञाय "**मानाधीना मेयसिद्धिः मानसिद्धिश्च लक्षणाद्**" इति उक्त्वा धर्मस्य लक्षणप्रमाणाकांक्षायां "**चोदनालक्षणो अर्थो धर्मः**" (जै.मी.सू.१।१।२) इति द्वितीयाधिकरणं प्रणीतम्. तेन विधिगम्यार्थत्वं लक्षणं चोदनैव मानञ्च इति एकेनैव अधिकरणेन सिध्यति तथा अत्रापि अस्मन्मते. येषान्तु भिन्नं शास्त्रयोनित्वाधिकरणं तेषां न एतत् तौल्यम्. किञ्च न इदम् इतरलक्षणं धर्मे आरोप्यते नापि इदं सूत्रम् औपचारिकम् एवमेव उत्तरतन्त्रेऽपि अस्तु. येषान्तु शबलगतं मायागतं वा लक्षणं परस्मिन् आरोप्यते इति सूत्रञ्च औपचारिकम् इति मतं तेषां न तत्तौल्यगन्धोऽपि. अत्र प्रकाशस्थं प्रायेण अनुवदन्ति **अत्र सर्वेऽपि योगविभागेन** इत्यादिना. योगः सूत्रं तद्विभागः इति अर्थः. **शेषलक्षणे** इति पूर्वतन्त्रतृतीयाध्याये "**अथ अतः शेषलक्षणम्**" (जै.मी.सू.३।१।१) इति तत्कथनं प्रतिज्ञाय "**शेषः परार्थत्वात्**" (जै.मी.सू.३।१।२) इति यो अत्यन्तं परार्थः सः शेषः इति लक्षयित्वा "**द्रव्यगुणसंस्कारेषु बादरिः**" (जै.मी.सू.३।१।३) इति द्रव्यादीनामेव शेषत्वं न यागफलपुरुषाणाम् इति बादरिमतम् उक्त्वा "**कर्माण्यपि जैमिनिः**" (ब्र.सू.३।१।४) फलार्थत्वात् फलञ्च पुरुषार्थत्वात् पुरुषश्च कर्मार्थत्वाद्" इति यागादीनामपि तत्त्वं समर्थितम्. अत्र **कर्माणि** इति ज्ञानस्यापि उपलक्षणं काण्डार्थत्वाविशेषाद् '**अपि**'ना वा तत्संग्रहः. अतो ज्ञानस्यापि फलशेषत्वं फलस्य च प्राधान्यम्. तद् एतद् आर्थिकम् आहुः **कर्म** इत्यादिना. **तत्सम्बन्धाद्** इत्यादि, अयम् अत्र निष्कर्षः : "**ब्रह्मविद् आप्नोति परम्**" (तैत्ति.उप.२।१) इति वाक्यं **ब्रह्मविद्** अक्षरवित् **परम्** अक्षराद् उत्तमं - पुरुषोत्तमम् **आप्नोति** इत्यर्थकं परप्राप्तिलक्षणप्रधानफलसम्बन्धात् प्रधानं

"तस्माद् वा एतस्माद् आत्मनः" (तैत्ति.उप.२।१) इति कार्यलक्षणन्तु फलसम्बन्धाभावात् न प्रधानम्. यतश्च उक्तवाक्यं प्रधानम् अतएव फलं कथं भावाकांक्षोपशमनाय **"सत्यं ज्ञानम्"** (तैत्ति.उप.२।१) इति ऋचाविवृतम्. अन्यथा तन्मात्रस्य विवरणम् अप्रयोजनकं स्यात्. परप्राप्तिरूपं फलं च परापरभावपुरस्सराक्षरपुरुषोत्तमज्ञानादेव. अतः आवश्यकपरत्वज्ञानार्थं **"तस्माद् वा"** इत्यादिना सर्वभूतभौतिककर्तृतया परत्वं विवृतम्. अनिरूपेण **"सत्यं ज्ञानम्"** इति अत्र प्रपञ्चविलक्षणधर्माणामेव प्रतीत्याब्रह्मणि कर्तृत्वं न प्रतीयेत. अतः **"आकाशः सम्भूतः"** (तैत्ति.उप.२।१) इत्यादिना यत् कर्तृत्वम् उक्तं तत् विवरणञ्च कर्मार्थक"ब्रह्म'पदनिर्दिष्टाद् ज्ञेयाद् अक्षरात् 'पर'पदाभिधेयं लीलाभोक्तारं पुरुषोत्तमं तृतीयान्त'ब्रह्म'पदनिर्दिष्टं पृथक्कृत्य तस्य परत्वं विवेक्तुम् उक्तं भूतभौतिकसर्गरूपकायनिर्देशेऽपि परस्य स्वरूपजिज्ञासायाम् अन्नमयादिभ्यः सर्वेभ्यः आन्तरत्वकथनपूर्वकम् आनन्दाकारलक्षणं तदुक्तम् इति. **अन्यथा** इति. आनन्दमयस्य परत्वाभावे तस्य सर्वान्ते निरूपणं कर्तृत्वादिना निरूपणं च असङ्गतं स्यात्. **"सर्वं वै ते अन्नम्"** (तैत्ति.उप.२।२) इत्यादि. **अन्नं ब्रह्मोपासने** सर्वान्नप्राप्तिः फलम्. **प्राणब्रह्मोपासने** सम्पूर्णायुः प्राप्तिः. **मनो ब्रह्मोपासने** कालकृतभयाभावः. **विज्ञानब्रह्मोपासने** शरीरएव पाप्महानपूर्वकं सर्वकामाशनं ज्ञेयम्. **सत्व...**इत्यादि. ब्रह्मास्तिज्ञानेन सद्भावः **"रसः ह्येव अयं लब्ध्वा आनन्दी भवति"** (तैत्ति.उप.२।७) इत्यादिना **"अथ सो अभयं गतो भवति"** (तैत्ति.उप.२।७) इत्यादिना च **"आनन्दब्रह्मणो विद्वान् न बिभेति कुतश्चन इति"** (तैत्ति.उप.२।९) इत्यन्तेन तत्तत्फलं च प्रधानम्. तेषाञ्च शेषभूतानि पूर्वोक्तफलानि शिष्टं स्पष्टम्. **भृगुप्रपाठके...** इति, इदम् अत्र हृदयं : प्रकृताधिकरणस्य **"यतो वा इमानि"** (तैत्ति.उप.३।१) इति मुख्यं विषयवाक्यं सौत्रेण 'यत:'पदेन 'जन्मादि'पदेन च तस्यैव उपस्थापनाद्, भृगुवल्ल्यां विस्पष्टतया संशय-पूर्वपक्षयोः उत्थानाभावेऽपि तस्याः ब्रह्मवल्ल्याः च एकविषयकत्वस्य असन्दिग्धतया दर्शितचरदिशा ब्रह्मवल्ल्याम् उत्तिष्ठमानं संशयादिकं तत्रापि प्रसज्यतएवइति ब्रह्मवल्लीमवलम्ब्य विस्पष्टतया तस्य उत्थापनम्. भूतभौतिककर्तृत्वम् आरोप्यमाणमपि पराभिमतरीत्या परिचायकं

भविष्यति शाखाचन्द्रवद् इति पूर्वपक्षाशयः. सिद्धान्तेतु मुख्यं निरंकुशं कर्तृत्वं सेत्स्यत इति न तदुक्तसिद्धसाधनादेः प्रसंगः. **तदेवतु न** इति. नहि “**सत्यं ज्ञानम्**” इत्यत्र कर्तृत्त्वं निषिध्यते येन विरोधः स्यात्. नच तत्र अनुक्तत्वादेव लक्ष्यतदभावः शंक्यः. आनन्दस्यापि स्पष्टं कथनाभावेन तस्यापि अभावप्रसङ्गात्. अथ अग्रिमवाक्यान्तरैकवाक्यतया आनन्दस्य लाभः इति चेत्, कर्तृत्वस्यापि अस्तु. किञ्च विवरणर्चि प्रत्युत परस्य तृतीयान्त‘ब्रह्म’पदेन विवृतस्य कर्तृत्वं कामाशने सहभावश्रावणात् प्रत्यायते. **तत्र** इति तृतीयान्त‘ब्रह्म’पदे ब्रह्मापेक्षया इति. वेद्य ब्रह्मापेक्षया नच प्रकृतिः इति तृतीयान्त‘ब्रह्म’पदेन सापि न ग्रहीतुं शक्या वक्ष्यमाणत्वात् च इति. अग्रिमसूत्रेषु सूत्रकृतः इति भावः. **तत्र प्रमाणम् आह** इति,. यत्तु किञ्च शौंडेत्यादि अनुपपन्नः इत्यन्तं तद् असत्. नहि उक्तशब्दस्य अध्याहारो अस्माकं सम्मतो येन असामर्थ्य नापि लक्षणा. यतो विग्रहानुपपत्तिः स्यात्, किन्तु; विषयत्वं, शास्त्रे इति सप्तम्यर्थः शास्त्रविषयोः योनिः इति अर्थः. विषयत्वञ्च इह प्रतिपाद्यत्वं व्यापकादिभेदेन अधिकरणत्रैविध्यञ्च “**संहितायाम्**” (पाणि.सू.६।१।७२) इति सूत्रे महाभाष्ये “**अधिकरणं नामत्रिप्रकारं व्यापकम् औपश्लेषिकं वैषयिकम् इति**”(पातं.महाभा.६।१।७२) इति दर्शितम्. शास्त्रस्य च अर्थे प्रतिपाद्यता सम्बन्धएव युक्तः तथाच “वेदे धर्मः”, “स्मृतौ धर्मः” इत्यादिवत् प्रकृतेऽपि अर्थो बोध्यः. “वेदधर्मम् अनुव्रताः”, “स्मृतिधर्मेकनिष्ठानाम्” इत्यादिवच्च समासः. नच योनेः अक्रियात्वाद् अधिकरणतानुपपत्तिः शंक्या “गुरुः वचसि अर्जुनो अयं कीर्तौ भीष्मः शरासने अकृशं कुचयोः कृशंवलग्ने गतौ गजो बले सिंहः” इत्यादिप्रयोगदर्शनाद्. अतः ईदृश स्थले “**परम्परासम्बन्धस्यापि क्रियान्वयित्वरूपकारकत्वघटकता-शास्त्रप्रामाण्यात्**” (   ) इति वदन्ति भूषणव्याख्याकारादयः. अन्यथा ‘अक्ष’-‘शौंड’इत्यादिमपि असामर्थ्याद् न उपपद्येत शौंडादेः अक्रियात्वात्. ‘अक्षेषु’ इत्यादिकमपि वैषयिकमेव अधिकरणं व्याप्त्यपश्लेषयोः असम्भवात्. कैयटस्तु उक्तसूत्रे “**खे शकुनयः**”, “**गुरौ वसति**” (पातं.महाभा.६।१।७२) इत्यपि वैषयिकाधिकरणम् उदाहरति. आस्ताम् एतत्. प्रकृतेः शास्त्रस्य विषयतानिरूपकाधारत्वमेव सम्भवति इतरयोः अयोगात्.

तेन 'वेदधर्मः' इत्यादिवद् विवक्षितार्थसिद्धिः निर्बाधाः. तदेतद् अनुसन्धाय प्रकाशकारैः उक्तम् आहुः **अत्र सप्तम्या** इत्यादिना, समासदोषन्तु परिहरिष्यन्ति. **वक्तव्यमेव** इति यतः इति निर्देशस्य श्रुतिस्मारकत्वेऽपि "उच्चारितएव शब्दः प्रत्यायको नानुच्चारितः" इति न्यायेन वाक्यार्थबोधे स्मृतमात्रस्य हेतुत्वासम्भवात् सर्वविधसृष्टिबोधकवाक्यराशेः असंग्रहप्रसंगात् च वक्तव्यमेव. एवम् अकथने लक्षणमात्राकांक्षोपशमः इति पूर्वतन्त्रवद् लक्षणप्रमाणोभयाकांक्षायाः अप्रशमाच्च तथा वक्तव्यमेव. समासदोषं परिहरन्ति **यदि शौंडादिगण...** इति, अतो योगविभागो न सम्मतः इति नव्यानामेव आग्रहः प्राचीनग्रन्थेषुतु बहुस्थलेषु तदादरो दृश्यते. यथा स्वरप्रक्रियायां "**बहुव्रीहौ इदम् एतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने**" (पाणि.सू.६।२।१६२) इति सूत्रे इदं प्रथमं यस्य स इदं प्रथमं इत्याद्युदाहृत्य "**बहुव्रीहौ किम् अनेन प्रथमः इदं प्रथमः तृतीये इति योगविभागात् समासः**" (पाणि.सू.सि.कौ.६।२।१६२) इत्युक्तम्. सूत्रे 'बहुव्रीहि'पदमपि योगविभागाद् ज्ञापयति असतिबाधके प्रमाणानां सामान्ये पक्षपाताद् एवम् उत्तरत्रापि तत्तत्पदं ज्ञापकं ज्ञेयम्. आत्मनेपदं परस्मैपदम् इत्यादावपि योगविभागादेव समासः. अलुक्प्रकरणे "**वैयाकरणाख्यायां चतुर्थ्याः**" (पाणि.सू.६।३।७) इति सूत्रे "**आत्मनेपदम् आत्मनेभाषाः**" (पाणि.सू.काशि.६।३।७) इति उदाहृत्य चतुर्थी इति योगविभागात् समासः उक्तः. एवं तत्रैव प्रकरणे "**आत्मना पञ्चमः**" (पातं.महाभा.६।३।६) इत्यत्र तृतीयासमासः "**अविकटोरणः**" (पातं.महाभा.६।३।१०) इति सप्तमीसमासः च स्पष्टं योगविभागादेवर्दितः(?) तद्व्याख्यातृभिः. किञ्च तत्र प्रकरणे सूत्र-वार्तिककृद्भ्याम् "**मध्याद् गुरौ**" (पाणि.सू.६।३।११) "मध्येगुरुः", "गुरौ अन्ताच्च" अन्ते गुरुः "**शयवासवसिष्वकालात्**" (पाणि.सू.६।३।१८) "**खेशयः खशयः ग्रामेवासः ग्रामवासः ग्रामेवासी ग्रामवासी**" (पाणि.सू.सि.कौ.६।३।१८) "**हलदन्ताधिकारे गोरूपसंख्यानं**" गविष्ठिरः एवम् आदिषु अलुग्विधीयते. नहि गुर्वादयः शब्दाः शौंडादिषु पठ्यन्ते. एवमादिषु अलुग्विधानाद् योगविभागः सूत्रकाराद्यभिमतो ज्ञायते. किञ्च अत्रैव प्रकरणे "**कारनाम्नि च प्राचां हलादौ**" (पाणि.सू.६।३।१०) इति सूत्रे भाष्ये "**अविकटे उरणो दातव्यः अविकटोरणः**"

(पातं.महाभा.६।३।१०) इति प्रत्युदाहृतम्. अवीनां सङ्घातो अविकटः सङ्घाते कटच्. एकै कस्मिन् सङ्घाते मेषः एकै को राज्ञे करत्वे न देयः सो अविकटोरणः करविशेषः. ‘‘**हलदन्तात् सप्तम्याः संज्ञायाम्**’’ (पाणि.सू.६।३।९) इति पूर्वसूत्राद् इह ‘संज्ञा’पदम् अननुवर्त्या प्राप्तविभाषापक्षे यदि अप्राप्ते समासो विधेयः प्राप्ते पुनः सति संज्ञायाम् इत्येव समासः सिद्धः. न एषः दोषः, एतदेव ज्ञापयति भवति अत्र समासः इति यद् अयं ‘‘**कारनाम्नः सप्तम्या अलुकं शास्ति**’’ (पातं.महाभा.६।३।१०) इति भाष्यकृतायोगविभागानुमितिः बोधिता. अत्र कैयटोऽपि ‘‘**एतदेव इति समासमन्तरेण लुक्प्रसंगाभावाद् अलुग्विधानाद् अत्र समासो अनुमीयते इत्यर्थः...अत्र हलादिग्रहणाद् अजादिनिवृत्त्यर्थाद् अजादावपि समासानुमानम्**’’ (पातं.महाभा.६।३।१०) इति आह. इह पुनः प्राप्तविभाषास्थापनेऽपि अनयादिशा उत्तरत्र योगविभागादेव समासः. नहि मध्ये गुरुखशयग्रामवासादयोपि संज्ञाः.

नच सूत्रोद्दिष्टशब्दैरेव समासः इति वाच्यम्. कारनाम्नि इत्यादि उक्त्या अन्यैः सहापि समासस्य ज्ञापनात्. अन्यथा तद् अव्यावर्तकं स्यात्. ‘‘**घकालतनेषु कालनाम्नः**’’ (पाणि.सू.६।३।१७) इति कालशब्दोऽपि अशौंडादिरेव तेनापि योगविभागादेव समासः. नच अलुक्स्थलएव एते समासाः शंक्याः. अकालाद् इति उक्त्या अन्यत्रापि ‘वसंतवासः’, ‘शरद्वासि’ इत्यादि समाससिद्धेः. ‘‘**अपो योनियन्मतिषु चोपसंख्यानम्**’’ (पातं.महाभा.६।३।१) इति भाष्यस्थं वार्तिकं चापः सप्तम्या ‘योनि’शब्दे ‘मति’शब्दे च अलुकं विदधद् अन्यैरपि सप्तम्यन्तैः तयोः समासम् असंदिग्धं ज्ञापयति असति बाधके प्रमाणानां सामान्ये पक्षपातात्. तेन **शास्त्रे योनिः शास्त्रयोनिः** इत्यादि सिद्धम्. मतुषु इति पाठमतेऽपि पूर्वम् अक्षतं प्रतिपाद्यत्वं च अत्र अर्थलभ्यम् ‘‘**आत्मना पञ्चमः**’’ (पातं.महाभा.६।३।६) इत्यादौ कृतत्वादिवत् ‘‘**आत्मनश्च**’’ (पाणि.सू.६।३।६) इति सूत्रे भाष्यम् ‘‘**अथवा युक्तएव अत्र तृतीयार्थः आत्मना कृतं तस्य तत् येन असौ पञ्चमः**’’ (पातं.महाभा.६।३।६) इति. अत्र कैयटोऽपि ‘‘**आत्मना कृतम् इति,**

वृत्तिविषये प्रतीयमाना करोति क्रिया कारकत्वनिमित्तं भवति. हेतौ वा तृतीया कार्या. अथवा दध्योदनादौ उपसेकादिवत्. करोति क्रियाया: अन्तर्भावात् करोतेः अप्रयोगः. ‘आत्मना पंचमः’ इति उक्तेः आत्मना अस्य कृतं पंचमत्वम् इति सम्प्रत्ययात्’’ (पातं.महाभा.प्र.६।३।६) इति आह. एवम् इहापि शास्त्रेयोनिः इति विग्रहवाक्ये प्रतिपादित इति गम्यतएव. यदितु पात्रे समितादेः आकृतिगणत्वात् तत्र अस्य पाठः स्वीक्रियेत तदातु ‘‘**पात्रे समितादयश्च**’’ (पाणि.सू.२।१।४८) इत्येव समासः सिद्धः तेषु ‘कूपकच्छपः’ ‘उदपानमंडूक’ इत्यादिवत्. तत्र स्थितिक्रियेव अत्र प्रतिपादनक्रियाऽऽपि आर्थिकीवृत्तिगम्या स्याद् इति दिक्. एतेन किञ्च उक्तशब्देत्यादि अनुपपन्नः इत्यन्तमपि निरस्तम्.

इह शास्त्रे योनिः इत्येव अर्थे व्यासस्य तात्पर्यनिर्णायकन्तु जन्माद्यधिकरणस्य प्रपञ्चनरूपे चरमे प्रकृतिश्चेत्यधिकरणे ‘‘**योनिश्च हि गीयते**’’ (ब्र.सू.१।४।२७) इति तदीयमेव सूत्रम्. तेन अध्यायस्य उपक्रमोपसंहारयोः ऐकार्थ्यं सिद्धम् इत्यपि ध्येयम्. तद् एतत् सर्वम् अनुसन्धाय आहुः **दृश्यतेतु** इत्यादि. योगविभागे भाष्यसम्मतिम् अनुमापयितुम् आहुः **अतएव** इति. इह भाष्योक्तसमासद्वये यद्यपि तुल्यः आस्ये तुल्यास्य इति प्रथमसमासस्तु कैयटेन ‘‘**मयूरव्यंसकादित्वात् सप्तम्यन्तोत्तरपदः तत्पुरुषः**’’ (   ) इति व्याख्यातः तथापि ‘‘आस्ये प्रयत्नः’’ इति समासस्तु शौंडादिषु ‘प्रयत्न’शब्दस्य अपाठात् सप्तमी इति योगविभागैकशरणइति योगविभागो भाष्यसंमतएव नतु तदनारूढ इति भावः. यत्तु उत्क्रान्ति इत्यादि योज्यम् इत्यन्तं तदपि अबोधविलसितम्. ‘‘**ऋषिभिः बहुधा गीतं छन्दोभिः विविधैः पृथक्. ब्रह्मसूत्रपदैः चैव हेतुमद्भिः विनिश्चितैः**’’ (भग.गीता १३।५) इति भगवद्वाक्याद् ब्रह्मसूत्राधिकरणानां हेतुमत्तानियमेन जन्माद्यधिकरणस्यापि शास्त्रयोनित्वरूपहेतुम् अतएव आदरणीयत्वाद् अन्यथा भगवद्वाक्यविरोधापातात्. नच उत्क्रान्त्यादिसूत्रेषु व्यभिचारः शंक्यः ‘‘**ज्ञोऽतएव**’’ (ब्र.सू.२।३।१८) इति पूर्वसूत्राद् ‘अतएव’ इत्यस्य श्रुतिभ्यएव इत्यर्थकस्य तत्र अनुवृत्त्या तदभावाद् अन्यथा षष्ठ्यन्तैकपदमात्रस्य सूत्रस्य

अबोधकत्वप्रसंगात्. त्वद्भाष्येऽपि ‘‘**उत्क्रान्त्यगत्यागतीनां श्रवणाद्**’’ (ब्र.सू.शां.भा.२।३।१९) इति व्याख्यानस्य अनुवृत्त्यैव उपपत्तेश्च. अतः शब्दस्य श्रुतिभ्यः इति अर्थस्तु ‘‘**नात्मा अश्रुतेः नित्यत्वाच्च ताभ्यः**’’ (ब्र.सू.२।३।१७) इति पूर्वसूत्रानुरोधात्. वस्तुतस्तु ‘‘**मान्त्रवर्णिकमेव च गीयते**’’, ‘‘**अस्मिन्नस्य च तद्योगं शास्ति**’’ (ब्र.सू.१।१।१५, १८) इत्यादीनि प्रथमतराणि स्वयं हेतुरूपाणि स्ववाक्यार्थसाधकहेत्वन्तरशून्यानि विहाय उत्क्रान्तिसूत्रपर्यन्तम् अनुधावनं ब्रह्ममीमांसासांप्रदायिकाभ्यासाभावात्. ननु तर्हि तत्रापि व्यभिचारः तदवस्थः इति चेद्; न, गुणसूत्राणां तेषामेव अधिकरणत्त्वस्य अभावात्. भगवद्वाक्येहि ‘पद’शब्दो अधिकरणपरः वाक्यपर्यायत्वात् स्थानपर्यायत्वाद् वा. ‘‘**पदं शब्देच वाक्येच व्यवसायापदेशयोः पादपचिह्नयोः स्थानत्राणयोः अंकवस्तुनोः**’’ ( ) इति विश्वोक्तेः. ‘‘पद्यते ज्ञायते तत्त्वम् एभिः’’ इति व्युत्पत्तेः वा. सिद्धान्तस्तु विषयादि पञ्चांगैः अधिकरणैरेव ज्ञातुं शक्यः.

अतो मान्त्रवर्णिकादि सूत्राणि यद्घटकानि तेषाम् आनन्दमयाद्यधिकरणानां बहुहेतुघटितत्वाद् न व्यभिचारः. एवम् उत्क्रान्त्यद्यधिकरणमपि दशसूत्रं जीवाणुत्वप्रतिपादकं बहुहेतुघटितमेव. एतेन प्रतिपदं हेतोः पञ्चम्यन्तस्य कल्पनायाम् इत्यादि निरस्तम्. सूत्रघटकसुप्तिङंतान्यतरपदानान्तु विषयवाक्यवत्वाद् असम्भवाधिकरणानामेव तथात्वात् तवैव प्रयासः यद्धेतुकत्वं वाक्यस्य तद्धेतुकतायाः पदेऽपि सत्त्वाद् इतितु दूष्यपक्षेऽपि शक्यवचनम्. किञ्च ‘हेतु’पदं कारणपरं प्रयोजनपरं वा इति व्याख्याने भगवद्वाक्ये ‘हेतुमत्’पदं व्यर्थं स्यात्. ‘‘प्रयोजनम् अनुद्दिश्य’’ इति न्यायेन प्रयोजनवत्तायाः स्वतो लाभात्. अन्यथा विनिश्चितत्वव्याघातापाताद् विषयवाक्येषु कारणत्व व्यवहारस्य क्वापि अदर्शनात् च. अतएव शंकराचार्य-मधुसूदनसरस्वत्यादिभिः इह ‘हेतु’पदं तथा न व्याख्यातं किन्तु युक्तिपरमेव. किञ्च शंकराचार्यैः अत्र ‘सूत्र’पदेन सूचकानि ‘पद’पदेन ज्ञानसाधनानि च वेदवाक्यान्येव गृह्यन्ते इति स्वग्रन्थान् अदृष्ट्वैव सम्यग्व्याख्यानकौशलं स्वप्रथमश्लोकोक्तादिशास्वस्मिन् शप्तत्वापादकं प्रकाशयति भवान्. युक्तन्तु प्रागुक्तमेव व्याख्यानं नतु तावककृतं क्लिष्टत्वात्

शीघ्रोपस्थितिकत्वाभावात्. द्वन्द्वप्रयोगे प्रयोजनाभावाच्च. अतो हेतुरहितत्वात् जन्मादिसूत्रं न पृथग् इति युक्तमेव, नतु भगवद्वाक्यविरोधेपि पृथक्सूत्रं कृत्वा साध्याध्याहारक्लेशः. नच जन्मादिसूत्रेपि जिज्ञासासूत्राद् अतः इति अनुवर्तनाद् अदोषः शंक्यो अव्याख्यानाद् यादृशार्थकोऽयंशब्दः तत्र त्वद्भाष्यादौ व्याख्यातः तादृशार्थकस्य अत्र असंगतेश्च. तदेतद् अनुसन्धाय आहुः **किञ्च त्वन्मते** इत्यादिना. उत्क्रान्तिसूत्रार्थादिकन्तु सप्तमश्लोकखण्डने प्रपञ्चयिष्यामः. **श्रुतिस्तु** इति जात्यभिप्रायम् एकवचनं तथाच निश्चयेति भगवद्वाक्ये 'विनिश्चित'पदं 'सूत्र'पदानां विशेषणं छन्दसां विशेषणं वा. तथाच "**वेदान्तविज्ञानसुनिश्चितार्थाः**" (मुण्ड.उप.३।२।६) इति श्रुत्या वेदार्थनिश्चयं प्रतिवेदान्तविज्ञानस्य कारणतायाः बोधनाद् ब्रह्मसूत्रपदैः करणैः विशेषतो निश्चितैः छन्दोभि इति तत्र अर्थः. आद्यपक्षेऽपि विनिश्चिततत्वम् असन्दिग्धत्वं निश्चयजनकत्वम् इति यावत्. अतएव तत्र शंकराचार्यैरपि "**विनिश्चितैः न संशयरूपैः निश्चितप्रत्ययोत्पादकैः इति अर्थः**" (भग.गीता शां.भा.१३।५) इति व्याख्यातम्. तस्माद् युक्तम् उक्तं मूले. यच्च एवं तत्तुसमन्वयाद् इत्यादि अन्वेष्यम् इत्यन्तम् उक्तं तदपि अविचारात्. नहि अस्माभिः तत्र लक्षणांगीक्रियते. तादृशार्थे व्यासस्यैव 'समन्वय'शब्दप्रयोगस्तु "समन्वयेन व्यतिरेकतश्च" इत्यादौ दृश्यतएव. तत्र मानञ्च "**अन्वयादितरतः** इत्यादि प्रागुक्तम्, अतः आप्तव्यवहारात् 'समन्वय'शब्दस्य तादृशार्थे शक्तिरेव. 'अन्वय'शब्दोऽपि तादृशार्थे पञ्चभूतपरान्वयादिप्रतिपादनस्थलेषु बहुवारं व्यासपादैः प्रयुज्यतएव. एतद् उरसिकृत्य तदुक्तं विकल्प्य दूषयन्ति **तदपि समन्वय** इत्यादिना. **शास्त्रयोनित्वपूर्वपक्ष**... इति. अत्र पूर्वपक्षसिद्धान्तयोः द्वयोः असंगतिः भाष्ये प्रकाशादिषु च व्युत्पादिता. **सर्वस्य** इत्यादि. इदम् अत्र ज्ञेयं : वेदे क्रियाशक्तिः क्रियारूपो भगवान् पूर्वकाण्डार्थो ज्ञानशक्तिः शक्तिः ज्ञानरूपः स उत्तरकाण्डार्थः इति सर्वस्यापि वेदस्य वस्तुतो ब्रह्मण्येव समन्वयः तयोः परस्परोपकारकभावश्च इष्टएव तथापि तैः सर्ववेदस्य क्रियापरत्वं ब्रह्मणोऽपि उपासनाविधिशेषत्वम् इत्यादि पूर्वपक्षम् उपन्यस्य सिद्धान्ते ब्रह्मणि समन्वयः तस्य विधिशेषत्वाभावः पूर्वकाण्डार्थस्य कथञ्चिद् उत्तराङ्गत्वं च दर्शितम्. अत्र परोक्तरीत्या उत्तरस्यैव पूर्वांगत्वं कुतो न स्याद् इति

आशयेन अयं दोषः. **ऐकशास्त्रया** इति. संहतम् **''एतच्छारीरकं जैमिनीयेन षोडशलक्षणेन''** (श्रीभाष्यविवृति) इति बौधायनोक्तेः पूर्वोत्तरमीमांसयोः एकशास्त्रं तेन तद्विषययोः काण्डयोरपि एकवेदस्य विभागत्वात् तद् इति भावः. **प्रापकत्वेन** इति. तत्तत्कर्मफलदातृत्वेन तथाच येषां फलसमर्पकं ब्रह्म तादृशकर्मप्रतिपादकत्वात् पूर्वकाण्डस्य ब्रह्मणि अन्वयः. **तत्तद्वाक्य...** इति. **''सएव एनं भूतिं गमयति''** (तैत्ति.सं.२।१।५।५) इत्यादौ वाय्वादितएव तत्तत्फलाप्तिकथनात् तद्बाधप्रसंग इति भावः. अथ **प्रापकत्वेन** इति कर्मणां चित्तशुद्धिद्वारा ब्रह्मप्रापकत्त्वेन तथाच ब्रह्मफलककर्मप्रतिपादकत्वात् तस्य तत्र अन्वयः. **तत्तद्वाक्य...**इति वायव्यश्वेतालभनादेः भूत्यादिकमेव फलं सन्निहितवाक्याद् अवगम्यते नतु चित्तशुद्धिः ब्रह्मावाप्तिः वा. ननु तदुक्तपूर्वपक्षसिद्धान्तयोः असंगतावपि प्रकारान्तरेण तत्र सर्वसमन्वयस्य सम्मतत्वात्सूत्रे सोर्थः कुतो नाद्रियत इत्यतः आहुः **अस्तुवा** इति. **अग्रिम...** इति. समग्रप्रथमाध्यायस्य इति भावः नच प्रथमाध्यायस्य समन्वयार्थकत्वात् तस्य तदर्थकताबोधकः तथासूत्रार्थः आवश्यकः इति वाच्यम्. द्वितीयाद्यध्यायेषु आरम्भे 'अविरोध'-'साधना'दिपदघटितस्य तत्तदर्थकताबोधकसूत्रस्य अभावेन अत्रैव तादृशसूत्रावश्यकताया वक्तुम् अशक्यत्वात् तेषु अविरोधादिप्रतिपादनादेव तदर्थकतायाः सुखेन सिद्धेः. तत्संमत-स्वसंमतसूत्रार्थयोः अधिकं दूषणं भूषणं च भाष्यादेरेव अवगन्तव्यम्.

मूलेषु अत्र द्वितीयतृतीयाधिकरणयोः भाष्यं तत्प्रकाशं च एकीकृत्य तत्पंक्तयः प्रायोऽक्षरशः काश्चिद् अर्थतश्च अनूदिता इति ध्येयम्.

(१) इयञ्च माया शुद्धचैतन्ये तिष्ठति इति बहवः. नच अविद्याश्रयत्वे अज्ञत्वापत्तिः इति वाच्यम्. अविद्यायाः तमःसदृशत्वेन तमसः स्वाश्रयविषयकज्ञानप्रतिबन्धकत्वेऽपि तन्निष्ठज्ञानप्रतिबन्धकत्वस्य अदर्शनेन मायायामपि तथाकल्पनात्. अतएव तमःस्थाः जनाः प्रकाशस्थान् पश्यन्ति. अन्यथा त्वन्मतेऽपि अविद्याश्रयत्वेन ब्रह्मणो

अज्ञत्वप्रसङ्गात्. तस्याः अविद्यायाः लौकिकाज्ञानवैलक्षण्येतु ‘अविद्या’पदस्य तत्र परिभाषात्वमेव स्यात्. अविद्या जीवे तिष्ठति इति एके. यत्तु जीवो अज्ञानस्वरूपत्वाद् न अज्ञानाश्रयः इति आह. नतु अनंगीकारपराहतम्. अस्मिन्पक्षे अज्ञानस्य ‘तिमिरा’ख्यरोगवत्स्वाश्रयमात्रदोषत्वं नतु विषयावरकत्वम्. अतो ब्रह्मणो न अज्ञत्वम्. अभेदस्य वास्तवत्वेऽपि अवास्तवभेदस्याऽपि सत्त्वेन जीवस्य अज्ञानेऽपि ब्रह्मणो न अज्ञत्वम्. अभेदस्य वास्तवत्वेऽपि अवास्तवभेदस्यापि सत्त्वेन जीवस्य अज्ञानेऽपि ब्रह्मणो न अज्ञत्वम्.

(२) इयञ्च माया **इत्यादिक: प्रलापस्तु मायानिरासेनैव निरस्त: ‘‘सति कुडये चित्रम्’’ (लौ.न्या.सा.४३२) इतिन्यायात्. तथापि किञ्चिद् उच्यते ‘‘यक्षानुरोधीहि बलि:’’ (   ) इति न्यायात्. शुद्धचैतन्ये माया तिष्ठति इति पक्षस्तु न सम्भवति मायाया: तमोरूपत्वेन चैतन्यस्य प्रकाशरूपत्वेन तम:प्रकाशयो: विरुद्धस्वभावत्वेन आधाराधेयभावासम्भवात्. नहि सूर्यांधकारयोः वह्निशैत्ययोः वा आधाराधेयभावः सम्भवति. किञ्च अविद्याश्रयत्वे ब्रह्मणो अल्पज्ञत्वापत्ति:. नच अविद्याया: तमोरूपत्वेन तमस: स्वाश्रयविषयकज्ञानप्रतिबन्धकत्वेऽपि तन्निष्ठज्ञानप्रतिबन्धकत्वादर्शनेन न अज्ञत्वसम्पादकत्वम्** अतएव तमःस्थाः जनाः प्रकाशस्थान् पश्यन्ति **इति वाच्यम्. यथा तमसि स्थित: पुरुष: तमसि स्थितान् घटपटादीन् न पश्यति तथा अविद्यावद् ब्रह्म अविद्याकार्यं जगद् न जानीयादेव, नहि जगत् प्रकाशस्थं येन अविद्याश्रयेण ब्रह्मणा ज्ञातं भवेत्. तथाच ब्रह्मणि अज्ञत्वं दुर्वारमेव. अस्मन्मतेच ‘माया’भिधा ब्रह्मण: शक्तिरेव इति न कोपि दोष:. येच त्वन्मतपक्षपातिनो अविद्यायाः ब्रह्मनिष्ठत्वस्वीकारे**

अल्पज्ञत्वादीन् दोषान् पश्यन्तो जीवे तां स्वीकुर्वन्ति. तन्मतेतु ''परास्य शक्तिः विविधैव श्रूयते'' (श्वेता.उप.६।८) ''मायान्तु प्रकृतिं विद्याद् मायिनञ्च महेश्वरम्'' (श्वेता.उप.४।१०) इत्यादिवाक्यविरोधः. किञ्च तमसः स्वाश्रयावरकत्वदर्शनेन अविद्यायाः जीवावरकत्वाद् जीवज्ञानं ब्रह्मणो न स्याद् इति ब्रह्मणो अज्ञत्वापत्तिः, तमःस्थेन प्रकाशस्थस्य ज्ञानाद् जीवस्य ब्रह्मवित्त्वं स्यात् तथा सति तस्यैव अनायासेन मोक्षसिद्धौ साधनवैयर्थ्यं स्यात्. किञ्च जीवाश्रिता अविद्या इति स्वीकर्तृनये जीवत्वम् अविद्यारूपोपाधिकृतं स्वतःसिद्धं वा?. आद्ये या उपाधिरूपा अविद्या सा विशेषणीभूता अविद्यातो अभिन्ना भिन्ना वा? आद्ये आत्माश्रयः स्वावच्छिन्ने स्वस्य वृत्तित्वात्. द्वितीये सापि जीवे वक्तव्या अजीवत्वञ्च उपाधिकृतं सच विशेषणीभूताविद्या चेद् अन्योन्याश्रयः अन्या चेद् चक्रकानवस्थे स्याताम्. स्वतःसिद्धत्वस्वीकारेतु अपसिद्धान्तः द्वैतापत्तिश्च इति अलम् अप्रकृतविचारेण.

(३) सहस्राक्षे इयञ्च माया इत्यादिं अज्ञानेऽपि ब्रह्मणो न अज्ञत्वम् इत्यन्तं भागं दूषयन्ति **इयञ्च माया इत्यादिक** इत्यादिना. अप्रकृतविचारेण इति एतेन **मायानिरासेन...** इति तदभिमतरीतिकतन्निरासेन. **तन्निष्ठ...**इति, स्वाश्रयमनुष्यादिनिष्ठः इति अर्थः. **घटपटादीन्** इति. नहि तमःस्थः स्वशरीरमपि पश्यति अतः इदम् आत्मनोऽपि उपलक्षणम्. **अविद्यावद्** इति, तद्विशिष्टं तदाश्रयः इति यावत्. **प्रकाशस्थम्** इति मायोपादानकत्वात् प्रकाशस्थानीय-विशुद्धचित्स्थं न भवति इति आशयः. तथाच तमःस्थदेवदत्तेन तत्स्थ घटादिरिव स्वशरीरमिव च प्रपञ्चे आत्माविद्याश्रयब्रह्मणा नैव ज्ञायेत इति निगर्वः दुर्वारम् इति. मायायाः तुच्छत्वांगीकाराद् ब्रह्मातिरिक्तचेतनानंगीकारात् च ब्रह्मणैव स्वस्मिन् रजतादिवद् मायाध्यस्ता इति आपत्त्यापि सुतरां दुर्वारम्. ननु त्वन्मतेऽपि अविद्याश्रयत्वेन ब्रह्मणो अज्ञत्वप्रसंगः इति चेद्;

न, ''**विद्ययाऽविद्ययाशक्त्या मायया च निषेवितम्**'' (भाग.पुरा.१०।३६।५५) इत्यादिवचनैः तस्याः तच्छक्तित्वेन तदिच्छया परेषामेव अज्ञतायाः तया संपादनस्य औचित्यात्. परेच स्वेच्छया भेदं प्रापिता अणवो अंशाएव. नहि वह्निशक्तिः वह्निमेव दहति हिमशक्तिः हिममेव वा जाड्येन पीडयति. अतएव उक्तं ''**नाग्नेर्हि तापो न हिमस्य तत्स्याद्**'' (भाग.पुरा.११।२३।५६) इति. क्वचिद् जीवे कथञ्चित् व्यभिचारेऽपि सर्वज्ञे सर्वशक्तौ स्वतन्त्रे ज्ञानघने ब्रह्मणि न स्वशक्त्या अज्ञत्वसंभवः. अतएव उक्तं ''**एकस्यैव ममांशस्य**'' (भाग.पुरा.११।११।४) इति ''**न मे मोक्षो न बन्धनम्**'' (भाग.पुरा.११।११।१) इति च. नच तवापि शक्तित्वांगीकाराद् निस्तारः सविशेषत्वभयात् शक्तितायाः अशक्यवचनत्वात्. तदेतदाहुः **न कोपि दोषः** इति. यत्तु अविद्यायाः लौकिकाज्ञानवैलक्षण्येतु 'अविद्या'पदस्य तत्र परिभाषात्वमेव इति तद्; न, तस्याः शक्तितया लौकिकाज्ञानस्य तत्कार्यतयाच तस्यां तद्वैलक्षण्यस्य अवश्य अभ्युपेयत्वात्. अन्यथा नाशनादिशक्तिः शस्त्रादिषु नष्टं शस्त्रम् इत्यादिव्यवहारो दुर्वारः स्यात्. अतः तस्यामेव अज्ञानत्वकल्पना निर्मूलैव. **येच** इत्यादि. अविद्यावच्छिन्नं चैतन्यं जीवः तत्र अवच्छेदकतया विशेषणीभूता अविद्या आधेया अविद्यैव चेद् आत्माश्रयः, भिन्ना चेत् सा शुद्धचैतन्यएव स्थिता इति उक्तदोषाः. सापि अविद्योपहितएव स्थिता इति चेद् उपाधिभूता. प्रथमा चेत् तर्हि अन्योन्याश्रयः भिन्ना चेत् तत्रापि उक्तविकल्पः. आद्ये चक्रकापत्तिः, द्वितीये अनवस्था. किञ्च विशुद्धचितो जीवत्वानंगीकाराद् जीवभावस्यैव अविद्याजन्यत्वांगीकारात् च ततो जीवस्य अज्ञानरूपत्वमेव आपद्यते. अतएव मुक्तौ जीवभावस्य निवृत्तिः. एतेन यत्तु जीवो इत्यादि निरस्तम्. यत्तु अभेदस्य इत्यादि तद्, न; विस्फुलिंगवद् उच्चरणेन ऐच्छिकभेदांगीकारएव विस्फुलिंगस्य जले निर्वापणे वह्ने अनिर्वापणवत् चक्षुराद्यंशस्य तिमिरादिसम्बन्धेऽपि सूर्यादेः तदसम्बन्धवच्च परमेश्वरस्य अज्ञत्वं न आपद्येत. त्वन्मतेतु शुद्धस्यैव अविद्यासम्बन्धेन जीवभावात् तदापत्तिः दुर्वारा. अवास्तवभेदस्य अज्ञानमूलकस्य सत्त्वमपि ब्रह्मण्येव वाच्यं तथाच आपन्नमेव तत्र अज्ञानम्. यदि अवास्तवभेदोत्तरम् अज्ञानसम्बन्धः स्यात् तदा तदापत्तिः न स्यात्.

अज्ञानकृतमवास्तवभेदं वदतः तवतु न निस्तारः.

मायागतत्वम् आस्तां परस्य सर्गे अभिधाश्रुतेः न अस्मिन्।।
क्षणकारणम् अखिलम् इदं वदतो बौद्धप्रपञ्चउचितस्ते.

इति तृतीयश्लोकखण्डनम्.

◆

॥ श्रीकृष्णाय नमः ॥

गोस्वामि-श्रीगिरिधरविरचितः

शुद्धाद्वैत-मार्तण्डः

श्रीमदाचार्यचरणौ श्रीविठ्ठलपदाम्बुजे ॥
श्रीमतां यदुनाथानां श्रीमद्गिरिधरः सुधीः ॥१॥
चरणाम्बुज-किञ्जल्क-परागान् प्रणिपत्य तम् ॥
शुद्धाद्वैत-विचारार्कं तनुते सुधियां मुदे ॥२॥
द्विधा ज्ञानन्तु यद्यत् स्याद् नाम-रूपात्मना मुहुः ॥
ईश-जीवात्मना वापि कार्य-कारणतोऽथवा ॥३॥
द्वीतं तदेव द्वैतं स्याद् अद्वैतन्तु ततोऽन्यथा ॥
‘‘**सर्वं खल्विदं ब्रह्म तज्जलानि**’’[1]ति पठ्यते ॥४॥
सर्वं ब्रह्मात्मकं विश्वम् इदमा बोद्ध्यते पुरः ॥
‘सर्व’शब्देन यावद्धि दृष्टःश्रुतमदो जगत् ॥५॥
बोध्यते तेन सर्वं हि ब्रह्मरूपं सनातनम् ॥
कार्यस्य ब्रह्मरूपस्य ब्रह्मैव स्यात्तु कारणम् ॥६॥
‘‘**जन्माद्यस्ये**’’[2]त्यादि-सूत्रैः व्यासपादैर्निरूपितम् ॥
‘‘**यतो वे**’’[3] त्यादि-वाक्येषु वेदे स्पष्टं प्रतीयते ॥७॥
साकारं सर्वशक्त्येकं सर्वज्ञं सर्वकर्तृ च ॥
सच्चिदानन्दरूपं हि ब्रह्म तस्माद् इदं जगत् ॥८॥
जड-जीवान्तःस्थितानां यथाक्रमश उद्गमः ॥
‘‘**अग्नेः यथा विस्फुलिङ्गा**’’[4] स्तथा जीवोद्गमः स्फुटः ॥९॥
विसर्पिगुण-चैतन्योऽणुः जीवोंऽशो हरेः स्मृतः ॥
जडे चिदानन्दयोस्तु चित्यानन्दस्य सर्वशः ॥१०॥
तिरोधानं हरीच्छातो निबन्धादिषु वर्णितम् ॥
आविर्भावेतु सर्वं हि ब्रह्मैवेति न संशयः ॥११॥
रमणार्थमिदं सर्वं ब्रह्मैव स्वेच्छयाऽभवत् ॥

यथा सर्पः स्वेच्छया हि कुण्डलाकारतां गतः ॥१२॥
न विकारि तथा ब्रह्म व्यासैः सूत्रे निरूपितम् ॥
सुवर्णस्याविकारित्वं कामधेनोर्मणेरपि ॥१३॥
आविर्भाव-तिरोभावौ पदार्थानां यतः ततः ॥
नाऽनित्यता तु विज्ञेया शास्त्रविद्भिर्विचक्षणैः ॥१४॥
तिरोभावे तु कार्यं हि वर्तते कारणात्मना ॥
आविर्भावे तु कार्यं हि यथा मृदि घटादयः ॥१५॥
यदानुभवयोग्यत्वं वर्तमानस्य वस्तुनः ॥
आविर्भावः स विज्ञेयस्तिरोभावस्ततोऽन्यथा ॥१६॥
प्रागभावादयो नांगीकार्या आभ्यां यतोऽखिलम् ॥
तद्विस्तरभिया नात्र लिख्यतेऽन्यत्र दृश्यताम् ॥१७॥
''यत्र येन यतो यस्य यस्मै यद्यद् यथा यदा ॥
स्यादिदं भगवान् साक्षात् प्रधानपुरुषेश्वरः''[५] ॥१८॥
इति भागवते पद्ये सर्वस्य ब्रह्मता श्रुता ॥
श्रुति-सूत्रैः स्मृतिगणैर्दृष्टिः स्वर्णार्थिनो यथा ॥१९॥
सुवर्णस्य च ये खण्डाः कटका मुद्रिकादयः ॥
सुवर्णत्वेन गृह्णाति तथा ब्रह्मविदो मतिः ॥२०॥
''यथा सोम्ये''[६]त्यादि-श्रुतौ स्पष्टमेव निरूपितम् ॥
तथा **''तत्त्वमसी''**[७]त्यत्राभेदोऽशांशि-विचारतः ॥२१॥
अत्रैव शांकराः प्राहुर्मायिकं नश्वरं जगत् ॥
माया-सम्बन्धतो ब्रह्म कारणं नाऽन्यथैव हि ॥२२॥
किञ्च जन्या त्वजन्या वा मायाऽऽद्ये जनको हि कः ? ॥
अन्याभावात्तु ब्रह्मैव सविशेषत्वम् आगतम् ॥२३॥
द्वितीये त्वद्वैतभङ्गः कादाचित्कं त्वसङ्गतम् ॥
''आत्मैवेदमग्र आसीद्''[८] इत्यादि श्रुतिबाधतः ॥२४॥
अनादित्वेतु सान्तत्वमिति पक्षोऽप्यसङ्गतः ॥
अनादित्वे त्वनन्तत्वं मायाया इति निश्चयात् ॥२५॥
एतन्मते सुनिष्पन्नं सांकर्यं कार्य-कारणे ॥

तन्निवृत्त्यर्थमाचार्यैः पदं ‘शुद्धं’ विशेषितम्॥२६॥
‘शुद्धाद्वैत’पदे ज्ञेयः समासः कर्मधारयः॥
अद्वैतं शुद्धयोः प्राहुः षष्ठीतत्पुरुषं बुधाः॥२७॥
माया-सम्बन्ध-रहितं शुद्धमित्युच्यते बुधैः॥
कार्य-कारण-रूपं हि शुद्धं ब्रह्म न मायिकम्॥२८॥
इति ब्रह्मविदां हार्दं शुद्धाद्वैतं श्रुतेर्मतम्॥
तत्रोत्तमाः मध्यमाश्च कनिष्ठा ह्यधिकारिणः॥२९॥
तेषां प्रतीतिः प्रथमस्कन्धेतु श्रीहुताशनैः॥
“इदं हि विश्वम्”[१] इत्यत्र सुबोधिन्यां निरूपिता॥३०॥
सर्वं ब्रह्मैव तत्राद्ये द्वितीये भगवान् यथा॥
तथा विश्वमिदं सर्वं ब्रह्मकार्यं निजेच्छया॥३१॥
कार्यरूपेण भेदो हि न भेदः कारणात्मना॥
भेदसह्यस्त्वभेदोऽत्र तादात्म्यं परिकीर्तितम्॥३२॥
तृतीये भगवान् भिन्नो जगतः कर्तृतः स्फुट॥
इति द्वैत-प्रतीतिस्तु श्रुति-बाधान्न गृह्यते॥३३॥
शुद्धाद्वैतविदां या हि प्रतीतिः सोत्तमा मता॥
भेदाभेद-प्रतीतिस्तु मध्यमानां प्रकीर्तिता॥३४॥
अतो हि मध्यमः पक्षः शुद्धाद्वैतानुरोधतः॥
बोधाय बहु सन्दर्भे गोस्वामि-पुरुषोत्तमैः॥३५॥
श्रीमदाचार्यचरणैर्यत्र कुत्रापि दर्शितः॥
निम्बार्क-भास्कराचार्यौ भेदाभेद-निरूपकौ॥३६॥
तत्राद्यानां वास्तवः स भास्कराणाम् उपाधितः॥
तत्राद्ये वास्तवो भेदो मध्वाचार्यवदेव हि॥३७॥
विभिन्नांशाः सदा जीवा न स्वांशा इति निश्चयः॥
अभेदश्चित्त्व-साधर्म्यादिवं तेषां मत-स्थितिः॥३८॥
कनिष्ठा सा प्रतीतिस्तु नाऽस्मन्मतमवेक्षते॥
अभेदो वास्तवः स्वांशा जीवा इति निजे मते॥३९॥
भेदः कार्यतया जातः क्रीडार्थं तु हरीच्छया॥

पश्चाल्लये कारणे हि स्थितिर्दृष्टा यथा मृदि ॥४०॥
पूर्वावस्थातु मृद्रुपा घटावस्था ततोऽभवत् ॥
घटोऽपि मृत्तिकारूपो लये पश्चाच्च मृत्तिका ॥४१॥
कार्यकारणयोरैक्यं स्वमते न परे मते ॥
नैम्बार्के नेदृशो मार्गं इति बोद्धव्यम् अञ्जसा ॥४२॥
सोपाधिको भास्करे हि स्वस्माद् भिन्नस्तु सर्वथा ॥
भेदपक्षेतु जीवानां सुख-दुःखादि-दानतः ॥४३॥
वैषम्य-नैर्घृण्य-संज्ञे दूषणे द्वे परे स्थिते ॥
अनादि कर्म चाश्रित्य समाधाने त्वनीशता ॥४४॥
अत्रापि शांकराः शैवाः माध्वाः रामानुजादयः ॥
निम्बार्काः भास्कराः भिक्षुः येऽन्ये ते दोषसंश्रिताः ॥४५॥
"आत्मसृष्टेः न वैषम्यं नैर्घृण्यं चापि विद्यते"[१०] ॥
श्रीमदाचार्यचरणैः निबन्धे इदमीरितम् ॥४६॥
श्रीमत्प्रभुवरैः विद्वन्मण्डनेऽपि निरूपितम् ॥
रमणार्थमिदं विश्वम् उच्चनीचादिभावतः ॥४७॥
आत्मरूपं चकारातो हरिर्यस्मान्न दूषणम् ॥
शक्ति-शक्तिमतोर्भेदाभेदो यः स न बाधकः ॥४८॥
तत्र भेदो न चैवास्ति शक्तेर्ब्रह्मत्व-निश्चयात् ॥
भिन्नत्वे तु जडत्वं स्याद् भेदो यो बोधनाय सः ॥४९॥
धर्म-धर्मि-विचारेऽपि ज्ञेयमेवं विचक्षणैः ॥
प्रकाशाश्रय-दृष्टान्तेऽप्यभेदो बोध्यते किल ॥५०॥
'अरूपवत्सू'त्र-वाक्ये धर्माणामपि ब्रह्मता ॥
निरूपिता प्रभुवरैः श्रीविद्वन्मण्डने स्फुटम् ॥५१॥
अथ श्रीमन्निजाचार्यैर्निबन्धे इदमीरितम् ॥
"यः सर्वत्रैव सन्तिष्ठन्नन्तरः संस्पृशेन्न तत् ॥
शरीरं तं न वेदेत्थं योऽनुविश्य प्रकाशते ॥"[११] ॥५२॥
इति तेन शरीरं तु हरेर्हि चिदचित् स्मृतम् ॥
जडजीवान्तःस्थितानां भेदेन सुनिरूपणैः ॥५३॥

तत्त्वत्रयं समायाति विशिष्टाद्वैतवादिनाम् ॥
रामानुजानामिति चेन्न दोषोऽस्मन्मते श्रृणु ॥५४॥
जड-जीवान्तरात्मान इति कार्ये भिदाश्रिताः ॥
‘‘**बहुं स्यां**’’[१२] तु प्रजायेयेत्यादि-श्रुतिषु वर्णनात् ॥५५॥
न कारणे भिदा ज्ञेया तत्रै‘**कोऽहं**’ निरूपणात् ॥
‘‘**आत्मैवेदमग्र आसीद्**’’[१३] इत्यादिषु च दर्शनात् ॥५६॥
तत्रैकाकी न रमते द्वितीयेच्छा निरूपिता ॥
श्रुतिविद्भिरतो ज्ञेयं ब्रह्मैकं नान्यदेव हि ॥५७॥
अन्यस्य च स्थितौ तत्र द्वितीयस्य च सम्भवात् ॥
रमणार्थं द्वितीयेच्छा श्रुत्युक्ता भग्नतामियात् ॥५८॥
‘‘**एकोऽहम्**’’[१४] इत्यपि मुधा तस्माच्छ्रुतिविरोधतः ॥
तत्त्वत्रयं कारणे हि त्याज्यमेव विचक्षणैः ॥५९॥
‘‘**यत्र येन**’’[१५] इति पद्ये तु निबन्धे सुनिरूपितम् ॥
प्रकृतिः पुरुषश्चैव कालश्च हरिरेव हि ॥६०॥
एकमेवाद्वितीयन्तु ब्रह्म सर्वत्र रूप्यते ॥
‘‘**यः सर्वत्रैवे**’’[१६]ति पद्ये गोस्वामि-पुरुषोत्तमैः ॥६१॥
सृष्टिकाले भगवतः शरीरं चिदचित् स्मृतम् ॥
अन्तर्यामिणः एतेन विशिष्टाद्वैतमेव यत् ॥६२॥
तदेकदेशि विज्ञेयम् इत्युक्तं तैः विचक्षणैः ॥
शैवोऽप्येतेन विध्वस्तो यतस्तच्चोरएव हि ॥६३॥
मायोपाधिक-कर्तृत्वं भैक्षवे दृश्यते तु यत् ॥
तन्मायिवाद-ध्वंसेन ध्वस्तप्रायं विशेषतः ॥६४॥
शाक्तानान्तु मते ब्रह्म विश्वोपादानमेव हि ॥
निमित्त-कारणं शक्तिर्विकारित्व-भयादतः ॥६५॥
तत्रात्मनो विकारित्वं श्रुतिशास्त्रविरोधि हि ॥
‘‘**प्रकृतिर्ह्यस्योपादानम् आधारः पुरुषः परः** ॥६६॥
सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वहम्’’[१७] ॥
इति भागवते पद्ये उपादानत्वम् ईरितम् ॥

तद् विरुद्ध्येत मम तु ब्रह्मतो न पृथक् च सा ॥६७॥
“**मनस्त्वम्**”[१८] इति पद्ये हि शङ्कराणां च शाम्भवी ॥
परिमाणन्तु सम्प्राप्तेत्युक्तेः बाधः प्रसज्ज्यते ॥६८॥
“**पवनमयि पावकमयि क्षोणीमयि**
गगनमयि कृपीटमयि ॥
रविमयि शशिमयि दिङ्मयि
समयमयि प्राणमयि शिवे! पाहि”[१९] ॥६९॥
इति दुर्वाससा प्रोक्तं सर्वात्मत्वं विरुद्ध्यते ॥
सर्वोपनिषदो या हि ब्रह्मतत्त्व-निरूपिकाः ॥७०॥
नास्ति शक्तेर्वर्णनं हि कारणत्वं तु दूरतः ॥
व्यासैस्तु प्रकृतेः सर्वकारणत्वं तिरस्कृतम् ॥७१॥
ब्रह्मणः समवायित्व-निमित्तत्वे निरूपिते ॥
ऋग्वेदे तु यतो देवीसूक्तमस्ति तु तत्र हि ॥७२॥
“**अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ॥**
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तम् ऋषिं तं सुमेधाम्”[२०] ॥
“**अहं सुवे पितरमस्य मूर्द्धन्, मम योनिरप्स्वन्तः समुद्रे**”[२१] ७३॥
एवं श्रुतौ तु देव्या हि स्वकारणतयोदितः ॥
पयोधिशायी यो विष्णुः स उक्तोऽतो न साऽपरा ॥७४॥
“**उग्रः कपर्दी श्रीकण्ठः**”[२२] इति कोशाच्छिवः स्मृतः ॥
अस्येति रुद्रो निर्दिष्टो “**अहं रुद्राये**”ति[२३] वाक्यतः ॥७५॥
प्रक्रान्तत्वात् पिता ब्रह्मा तद्योनिः शक्तिरत्र हि ॥
तस्यास्तु जनको विष्णुः सिन्धुशायि निरूपितः ॥७६॥
अस्माकं व्यासचरणैः यदुक्तं न ततो अन्यथा ॥
“**अथाऽतो ब्रह्म जिज्ञासे**”[२४] त्युक्त्वा तल्लक्षणेन हि ॥७७॥
जन्माद्यस्येत्यादि-सूत्रैः कारणं ब्रह्म कीर्तितम् ॥
तन्त्रशास्त्रेण चेद् ब्रूषे तदवैदिक-सम्मतम् ॥७८॥
“**वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि ॥**
समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम्”[२५] ॥७९॥

श्रीमदाचार्यचरणैरतएव निरूपितम्॥
शाक्तास्तांश्चेत् ततो ब्रूयुः ते सन्मार्गाद् बहिष्कृताः॥८०॥
इति सर्वेषु मार्गेषु दोषाः सन्ति ततो हरिम्॥
शुद्धाद्वैतावलम्बेन भजेत सुविनिश्चितम्॥८१॥
चेतस्तत्प्रवणं सेवा फलरूपा तु मानसी॥
तत्सिद्ध्यर्थं तनु-वित्तजनिः कार्या ततो भवेत्॥८२॥
संसारदुःखनाशो हि ब्रह्मात्मत्वावबोधनम्॥
ब्रह्मज्ञस्य परप्राप्तिरानन्दव्रततौ स्फुटा॥८३॥
''मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते'' [२६]॥
इति वाक्यात्तु भक्तानाम् अविद्या-विनिवृत्तितः॥८४॥
अलौकिकाकारसिद्ध्यै प्रवेशो हरिणोदितः॥
''अव्यक्तोऽक्षर इत्युक्तः तमाहुः परमां गतिम्॥
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम'' [२७]॥
इति वाक्येन भगवद्गृहं ब्रह्म प्रकीर्तितम्॥८५-८६॥
''पुरुषः स परः पार्थ! भक्त्या लभ्यस्त्वनन्यया'' [२८]॥
इत्यग्रिमेण वाक्येन गेहाऽधीशो निरूपितः॥८७॥
भक्त्या लाभो हि निर्दिष्टो भक्तिश्चाऽऽचार्य-संश्रयात्॥
श्रीमदाचार्यचरण-भजनादेव नान्यथा॥८८॥
ब्रह्मभावं तु सम्पाद्य परमानुग्रहाद् विभुः॥
गृहस्थितं स्वीयजीवं समुद्धरति यत्नतः॥८९॥
उद्धृतौ परमक्लेशो विरहानलसम्भवः॥
यदा देहादि-नाशाय समर्थो जायते तदा॥९०॥
निजं श्रीमत्कृष्णचन्द्रः स्वाधिकारानुसारतः॥
परमानन्दलीलां तामनुभावयति प्रभुः॥९१॥
इति-श्रीवल्लभाचार्य-चरणाब्ज-कृपाभरात्॥
प्राप्यते नान्यथा चैतद् ब्रह्मादीनां सुदुर्लभम्॥९२॥
ये तु ज्ञानैकसन्निष्ठाः तेषाञ्च लयएव हि॥
भक्तानामेव भवति लीलाऽऽस्वादोऽतिदुर्लभः॥९३॥

इति श्री-श्रीमदाचार्यचरणाब्ज-प्रसादतः ॥
प्रोक्तं गिरिधरणेदं पश्यन्तु हरिभावुकाः ॥९४॥
सूर्योदये शीतमपैति सर्वं मार्गावलोको जलजप्रकाशः ॥
तमोनिवृत्तिर्द्विजकर्मवृत्तिस्तथैव मार्तण्ड-निबन्ध-बोधे ॥९५॥

इतिश्रीमन्मुकुन्दराय-सहज-माधुरी-परमानिर्वचनीय-सरस-वदन-तामरस-सुधा
हृदावगाहि-श्रीमदाचार्य-कृपापारसार-श्रीमत्प्रभुचरणात्मज-महाराज-
श्रीयदुनाथ-कुलोद्भव-गोस्वामि-श्रीगोपाल-जनुषा-
श्रीगिरिधरेण विरचितः 'शुद्धाद्वैत-मार्तण्डः'
समाप्तिमफाणीत्।

....

१. छान्दो.उप.३।१४।१.
२. ब्र.सू.१।१।२.
३. तैत्ति.उप.३।१।१.
४. बृह.उप.२।१।२०.
५. भाग.पुरा.१०।८५।४.
६. छान्दो.उप.६।१।४.
७. छान्दो.उप.६।८।७.
८. छान्दो.उप.७।२५।२.
९. भाग.पुरा.१।५।२०.
१०. त.दी.नि.१।७६.
११. त.दी.नि.१।७०
१२. तैत्ति.उप.२।६।१.
१३. बृह.उप.१।४।१.
१४. तैत्ति.उप.२।६।१
१५. भाग.पुरा.१०।८२।४, त.दी.नि.१।६९
१६. त.दी.नि.१।७०

श्रीहरिः

मारुतशक्तिः

श्रीमन्मथुराधीश्वरचरणाब्जचञ्चरीकगोस्वामिवर्यश्रीमद्विट्ठल-
नाथमहाशयविरचितस्य प्राभञ्जनस्य शुद्धाद्वैत-
सिद्धान्तमण्डनग्रन्थस्य

पूर्वभागेण सहिता

तट्टीका

पञ्चनद्युपाह्वेन विद्वद्रत्न श्रीघनश्यामभट्टस्यात्मजेन शिष्येण च
गट्टूलालेत्यपरनामकेनभारतमार्तण्ड-
श्रीगोवर्धनशर्मणाप्रणीता

स्वसंप्रदायायानवरतं प्रयतमानैस्तैः स्वयमेव स्ववसुव्ययेन मुद्रयित्वा
प्रथमं संस्करणं प्रकाशितम् । अस्य द्वितीयं संस्करणं श्रीजगद्गुरु-
वल्लभाचार्यवंशान्वयविश्रुतयशःपटहपरिपूरितदिगंतर-
श्रीमद्गोकुलनाथाचार्यस्यात्मजेन गोस्वामिदीक्षितेन
निर्णयसागराख्यमुद्रणालये संमुद्र्य
प्रकाशितम् ।

शके १८८७



उद्धृतवचनानुक्रमणिका

ॐ

ॐ इति एतदक्षरम् (माण्डु.उप.१।१) ६१
ॐ इत्येतद् अक्षरम्... (माण्डु.उप.१) ४००
ॐकारः च अथ शब्दश्च... उभौ (नार.पुरा.१।५१।१०) ५८
ॐकार च अथ शब्दः च (द्र.ब्र.सू.शां.भा.र.१।१।१) ६१
ॐतत्सद् इति निर्देशो... (भग.गीता१७।२३) ५५,३६६

अ

अकल्पकम् अजं ज्ञानं... (माण्डु.गौ.का.३।३३) ३९१
अकुर्वन् विहितं... प्रायश्चित्तीयते नरः (मनुस्मृ.११।४४) ४७
अक्षमा भवतः... तत्रैव अज्ञानकल्पितम् (खं.खा.) ४५९
अक्षय्यं हवै सुकृतं... (शतपथ.ब्रा.२।६।३।१) ४३०
अक्षरधियान्तु (ब्र.सू.३।३।३३) ४९४
अक्षरम् अम्बरान्तधृतेः (ब्र.सू.१।३।१०) ४८६, ४९४
अक्षरात् परतः परः (मुण्ड.उप.२।१।२) ३
अक्षान्तिः ईर्ष्या... (अम.को.१।७।४५७) १४
अगृह्यो नहि गृह्यते (बृह.उप.३।९।२६) ५
अग्निः मूर्द्धा चक्षुषी... (मुण्ड.उप.२।१।४) २८३
अग्निम् आत्मनि संस्थाप्य... ब्रह्मविद्यापरायणः (कूर्मपुरा.२।२८।२) १८
अग्निहोत्रादितु तत्कार्यायैव तद्दर्शनात् (ब्र.सू.४।१।१६) ४१३
अजरत्वामरत्वाविक्रियत्वादि (द्र.नृ.उप.७) २४४
अजाम् एकां लोहितशुक्लकृष्णाम् (श्वेता.उप.४।५) ३३९,४८६
अजाम् एकाम् (महाना.उप.९।२) १३८
अजिज्ञासितमद्धर्मोगुरुं... (भाग.पुरा.११।१८।३८) ४९७
अजो नित्यः शाश्वतो... (कठोप.१।२।१८,भग.गीता२।२०) २०७
अजोऽपि सन् अव्ययात्मा... (भग.गीता४।६) ३४०
अज्ञानञ्च अभिजातस्य पार्थ... (भग.गीता१६।४) २३६, २३७
अज्ञानेन आवृतं ज्ञानं... (भग.गीता५।१५) ३०५
अणोः अणीयान् महतो... (श्वेता.उप.३।२०) १९८
अतः शिवश्च विष्णुश्च... (बा.बो.११) १५१
अतएव वृद्धैरपि... अनैयत्यं सूचितम् ( ) २१३
अतएव स्पष्टतया बोधाय... (शु.मा.प्र.२७) २३६
अतथ्यानि... मां कुरु इति (पद्मपुरा.६।७१।१०८–१०९) ८१

अतश्च दृग्दर्शनशक्त्योः... व्याख्यातः इति (पातं.यो.सू.भा.२।२२) १३८
अतिवादान् तितिक्षेत... विचरेद् इह (मनुस्मृ.६।४७–४९) ३७
अतैजसानि पात्राणि... स्वायम्भुवो अब्रवीत् (मनुस्मृ.६।५३) ३८
अतो अन्यापि हि... (ब्र.सू.४।१।१७) ४०७, ४१२
अतो अस्मि लोके वेदे... (भग.गीता १५।१८) ३२७
अतो बुध आभजेत भक्त्या... (भाग.पुरा.११।२।३७) ५
अतोहि मध्यमः... कुत्रापि दर्शितः (शु.मा.३५) ४५९
अत्यद्भुतं तच्चरितं सुमङ्गलं... (भाग.पुरा.८।३।२०) ५४
अत्र षट्पदार्थकीर्तनं... मुनेः अभिप्रेतः (वैशे.सू.वृ.१।१।४) १८८
अत्रच द्रव्यादिपदार्थानाम्... नियमः पर्यवस्यति (वैशे.सू.उप.१।१।४) १८९
अत्रहि जन्तोः प्राणेषु... (जाबा.उप.१।१) ४०५
अत्रैव शांकराः प्राहुः... (शु.मा.२२)
२०८, २१०, ३२९, ३४१
अथ अतः पाशुपतयोगविधिं व्याख्यास्यामः (पाशु.सू.१।१) १०४
अथ अतः शेषलक्षणम् (जै.मी.सू.३।१।१) ४९८
अथ किं समाख्यैव... विदधाति इति (जै.मी.सू.शा.भा.३।५।३१) २४
अथ गूहत्यन्ताः... अव्यक्ते शब्दे (पाणि.सू.सि.कौ.१।३।६०) ७८
अथ परा यया तद्... परिपश्यन्ति धीराः (मुण्ड.उप.१।१।५–६) २४४
अथ प्रातः समुत्थाय... आचरेद् (कुला.त.उल्ला.४।१०) १०७
अथ भवति वै... मनसो असान्निध्याद् (पातं.महाभा.३।२।११५।३) ५२
अथ यः कपूय... श्वयोनिं वा (छान्दो.उप.५।१०।७) २७७
अथ यदतः परो... (छान्दो.उप.३।१३।७) ३
अथ यो ह खलु... यो अयं विष्णुः (मैत्रा.उप.५।२) १७६
अथ योगानुशासनम् (पातं.यो.सू.१।१।१) ४९७
अथ वर्णसमाम्नायः (तैत्ति.प्राति.१।१) ५९
अथ वा समर्थाधिकारो... अन्येभ्यः स्वेभ्यः (पातं.महाभा.२।१।१) २१५
अथ सो अभयं गतो... (तैत्ति.उप.२।७) ४९९
अथ सो अरोदीद्... इत्यस्य (जै.मी.सू.शा.भा.१।२।१०) १६७
अथ शब्दानुशासनं (पाणि.सू.१।१।१) ४९७
अथ शब्दः आनन्तर्यार्थः... (ब्र.सू.शां.भा.१।१।१) २५
अथवा पूर्वः... प्रयत्नः एषाम् (पातं.महाभा.१।१।९) ४८२
अथवा युक्तएव अत्र... असौ पञ्चमः (पातं.महाभा.६।३।६) ५०२
अथवा शून्यवद् गाढं... (त.दी.नि.१।७५) ३४३
अथातो धर्मं व्याख्यास्यामः (वैशे.सू.१।१।१) १३८

अथातो धर्मजिज्ञासा	(जै.मी.सू.१ ।१ ।१)	४७४, ४९८
अथातो ब्रह्मजिज्ञासा	(ब्र.सू.१ ।१ ।१)	१६९, ४९१
अद्वैतन्तु ततो अन्यथा…	(शु.मा.४)	१८५
अधार्मिकाः निराहाराः… पठन्ते च अल्पबुद्धयः	(कूर्मपुरा.१ ।३० ।३–५)	१४८
अधिकन्तु भेदनिर्देशाद्	(ब्र.सू.२ ।१ ।२२)	३०१
अधिकरणं नामत्रिप्रकारं… वैषयिकम् इति	(पातं.महाभा.६ ।१ ।७२)	५००
अधिकरणात्मकत्वपक्षे अनन्ता…कल्पनैव लघीयसि	( )	१९०
अधिपरी अनर्थकौ	(पाणि.सू.१ ।४ ।९३)	२३७
अधीत्य चतुरो वेदान्… जायते कृमिः	(अत्रिस्मृ.१ ।३०३)	४४
अध्यात्मसम्बन्धभूमा…	(ब्र.सू.१ ।१ ।३०)	२६१
अनचि च	(पाणि.सू.८ ।४ ।४७)	१६१
अनन्तरा(आनन्तर्या)भिधान… अर्थः	(तत्त्वचि.अनु.खं.)	५८
अनन्या निष्कले… अतुलं महद्	(कूर्मपुरा.१ ।१२ ।८–१४)	४५३
अनश्नन् अन्योः अभिचाकशीति	(मुण्ड.उप.३ ।१ ।१)	२९३
अनादि कर्म च…	(शु.मा.४४)	२८७, २८६
अनादित्वाद् निर्गुणत्वात् परमात्मा…	(भग.गीता १३ ।३१)	२९३
अनारब्धकार्येएवतु पूर्वेतदवधेः	(ब्र.सू.४ ।१ ।१५)	१६, ४०६
अनावृत्तिः शब्दाद्	(ब्र.सू.४ ।४ ।२२)	४२९, ४३३, ४४२
अनिग्रहस्थाने निग्रहस्थानाभियोगो…	(गौ.न्या.सू.५ ।२ ।२३)	२३८
अनित्या–ऽशुचि–दुःखा–ऽनात्मसु…	(पातं.यो.सू.२ ।५)	१८६
अनित्ये जननम्	(सुबो.२ ।६ ।१)	२५५
अनीशया शोचति मुह्यमानः	(मुण्ड.उप.३ ।१ ।२)	२०३, ४६६
अनुच्छित्तिधर्मा	(बृह.उप.४ ।५ ।१४)	२४५, २५६, ४५७
अनुपपत्तेस्तु न शारीरः	(ब्र.सू.१ ।२ ।३)	२५६
अनुमितम् अन्तरा त्वयि…	(भाग.पुरा.१० ।८४ ।३७)	३४५, ४६३
अनुर्लक्षणे	(पाणि.सू.१ ।४ ।८३)	१४४
अनृणा अस्मिन्… अनृणाः आक्षीयेम	(तैत्ति.ब्रा.३ ।७ ।९ ।८–९)	१९
अनेक जन्मसंसिद्धान्… अन्ये बिभीषणाद्	(ब्रह्मपुरा.)	४१७
अनेकपुत्रसद्भावेऽपि ज्येष्ठो… पुत्रकार्यकरणे मुख्यत्वात्	(याज्ञ.स्मृ.मिता.२ ।८ ।१३०)	२१
अनेकार्थस्य एकार्थत्वम्… इति अर्थः	(पातं.महाभा.वि.२ ।१ ।१)	२१६
अनेजद् एकं मनसो जवीयः	(ईशा.उप.१ ।१ ।४)	४७१

अनेन जीवेन आत्मना	(छान्दो.उप.६।२।२)	४०१
अनैकान्तिकः सव्यभिचारः	(गौ.न्या.सू.१।२।४६)	९६
अन्तर्हिते भगवति… शरणागतरक्षकः	(कूर्मपुरा.१।१५।२३–२४)	१२१
अन्तर्हिते महादेवे… कृत्तिवाससम्	(कूर्मपुरा.१।१५।८०–९४)	१२९
अन्नम् अशितं त्रेधा विधीयते	(छान्दो.उप.६।५।१)	३८२
अन्यच्च श्रूयतां… मेरुतां व्रजेत्	(पद्मपुरा.६।१२७।१३८)	४१५
अन्यत्र धर्माद् अन्यत्र अधर्माद्	(कठोप.१।२।१४)	१९८, ३४८
अन्यथा भेदज्ञानाभावे न…	(शु.मा.टी.४)	२०३
अन्यदेव तद् विदिताद्…	(केनो.उप.१।४)	४७१
अन्योऽन्तर आत्मा आनन्दमयः	(तैत्ति.उप.२।५)	१०८,३१०
अन्वयव्यतिरेकाभ्यां यत् स्यात्…	(भाग.पुरा.२।९।३५)	४८८
अपराजितम् आयतनम्… अमितौज पर्यमः	(कौषी.ब्रा.उप.१।३)	९
अपरेऽपि अभवद् दिवौकसः	(श्रीशंक.दिग्वि.३।७)	७४
अपशवो वा अन्ये…	(तैत्ति.संहि.५।२।९।४)	९१
अपश्यत् पुरुषं पूर्णं…तत्कृतञ्च अभिपद्यते	(भाग.पुरा.१।७।४–५)	३३५
अपाणिपादो जवनो ग्रहीता…	(श्वेता.उप.३।१९)	१९५, ४७१
अपि चेत् सुदुराचारो… व्यवसितो हि सः	(भग.गीता ९।३०)	१४२, २८७
अपि भवान् कमण्डलुपाणिं…	(पातं.महाभा.१।४।८३)	१४४
अपि संराधने प्रत्यक्षानुमानाभ्यां	(ब्र.सू.३।२।२४)	४२७
अपि इति… इति अर्थः	(त.दी.नि.आ.३।४।४३)	१५१
अपृक्तएकाल्प्रत्ययः	(पाणि.सू.१।२।४१)	२१३
अपो अब्रुवन्	(शतप.ब्रा.६।१।३।२।४)	३४९
अपो योनियन्मतिषु…	(पातं.महाभा.६।३।१)	५०२
अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः…	(धर्मकीर्ति द्र.सर्वदर्शनसंग्रह.पृ.३०)	३९०
अप्रमत्तः चरेद् भैक्षं… गोवालैश्चावघर्षणम्	(याज्ञ.स्मृ.३।४।५९)	३९
अभावश्च वक्तव्यो…	(न्या.लीला)	१८८
अभावास्तु अस्मन्मते…	(सुबो.२।९।३२)	१९३
अभिध्योपदेशात् च	(ब्र.सू.१।४।२३–२४)	२४३, २६७, ३०४
अभिपूजितलाभांस्तु जुगुप्सेतैव… मुक्तोऽपि बध्यते	(मनुस्मृ.६।५८)	३८
अभिमानिव्यपदेशः	(ब्र.सू.२।१।५)	३४९
अभिषेकेन युक्तेन… शमरम्	(कूर्मपुरा.१।१६।७७–७८)	८९
अमर्त्यभूषं कुरु… पतिता गले ते	(स्कन्दपुरा.)	४१८
अमृत्युः सर्वदृक् सिंहः	(विष्णुस.ना.३५।१९८,१९९,२००)	२४६

अम्भसां द्वादशप्रस्थं प्रस्थार्धं तक्रमेव च	(कुला.त.उल्ला.५ ।१०)	१०८
अयथावत् प्रजानाति बुद्धिः...	(भग.गीता १८ ।३१)	३४४
अयन्तु लोकपालानाम्	(भाग.पुरा.४ ।२ ।१०)	१०२
अरुर–द्विषद् अजन्तस्य...	(पाणि.सू.६ ।३ ।६७)	१४
अरूपवद् हि तत्प्रधानत्वाद्	(ब्र.सू.३ ।२ ।१४)	४५०, ४५२
अर्थवद् अधातुः अप्रत्ययः...	(पाणि.सू.१ ।२ ।४५)	२२१
अर्थेन नित्यसमासो विशेष्यलिंगता च	(पाणि.सू.वा.२ ।१ ।३६)	६४
अर्वाग्देवाः अस्य विसर्जनाय	(तैत्ति.ब्रा.२ ।८ ।७५)	४७०
अल्पाक्षरम् असन्दिग्धं... सूत्रविदो विदुः	( )	४९४
अल्पान्नाभ्यवहारेण... अमृतत्वाय कल्पते	(मनुस्मृ.६ ।५९–६०)	४२
अवजानन्ति मां मूढाः	(भग.गीता ९ ।११)	३२७
अवस्तारो जवनिका	(पाणि.सू.सि.कौ.३ ।३ ।१२०)	६४
अवयिन्ते अस्मिन् अवहारः	(पातं.महाभा.३ ।३ ।१२१)	६४
अवाप तद् महद्... पर्वतात्मजाम्	(कूर्मपुरा.१ ।१६ ।९५–९६)	८९
अविकटे उरणो दातव्यः...	(पातं.महाभा.६ ।३ ।१०)	५०१
अविद्या नियतिः माया...	(कूर्मपुरा.१ ।१२ ।२११)	४५५
अविद्यायाम् अन्तरे वर्तमानाः	(कठोप.१ ।२ ।५)	४६६
अविद्यावच्छिन्नं चैतन्यं... इति सांकर्यम्	(शु.मा.प्र.२६)	१८५
अविधिपूर्वकत्वो	(भग.गीता ९ ।२३)	१४२
अविनाशी वा अरे अयम्...	(बृह.उप.४ ।५ ।१४)	२५२
अविमुक्ते कृतं/किञ्चित्... तस्मै वृद्धाय रक्षसे	(पद्मपुरा.६ ।१२७ ।१४०–१५७)	४१५, ४१६
अविमुक्ते म्रियेद् यस्तु... कस्यचित् क्वचिद्	(ब्रह्मपुरा.)	४१७
अविमुक्तेतु अन्तकाले... अकृतात्मभिः	(मत्स्य.)	४१७
अविमुक्तेन गृह्यन्ते भवेन विभुना स्वयं	( )	४१९
अविरोधेन धर्मस्य...	(वायुपुरा.१६ ।५)	३६
अविवेककृतः सङ्गो नियमः च	(पंचदशी.६ ।२३२)	१५३
अवे उपपदे तृस्तृभ्यां... अपवादः	(पाणि.सू.त.बो.३ ।३ ।११८)	६३
अवे तृस्त्रोः	(पाणि.सू.३ ।३ ।१२०)	५६, ६३
अव्यक्तं लिङ्गम् इति...	(कूर्मपुरा.१ ।२६ ।६३)	६७
अव्यक्ताद् व्यक्तयः सर्वाः	(भग.गीता ८ ।१८)	४८६
अव्ययानि दशैतानि...	(कूर्मपुरा.१ ।१० ।४१)	६२
अशनं वसनं वासः... सत्यं खगेश्वर	(गरु.पुरा)	४१७
अशनापिपासे इमे...	(छान्दो.उप.६ ।८ ।३)	३८२

अशब्दंहि तद् (ब्र.सू.शां.भा.१।१।५) १५२
अशेष–विशेष–गुणध्वंसावधिक–
दुःख–प्रागभावः (वैशे.सू.उप.१।१।४) १३९
अश्मादिवच्च तदनुपपत्तिः (ब्र.सू.२।१।२३) ४९०
अष्टौ भिक्षाः समादाय... च वाग्यतः ( ) ४१
अष्टौ मासान् विहारः... (मत्स्यपुरा.१८४।३२) ४२
असंकुसुकः स्थिरमतिः... (मनुस्मृ.६।४२–४३) ४२
असच्छास्त्रस्य चार्वाकादिग्रन्थस्य... (याज्ञ.स्मृ.मिता.३।५।२४२) ११५
असच्छास्त्राधिगमनं कौशीलव्यस्य च क्रिया (मनुस्मृ.११।६५) ११४
असच्छास्त्राधिगमनम् आकरेषु अधिकारिता (याज्ञ.स्मृ.३।५।२४२) ११५
असच्छास्त्राभिगमनं ... उपपातकानि (वि.ध.सू.३७।३१–३४) ११५
असश्चायकः... ( ) ४२
असत्यं यथा...अतः अप्रतिष्ठम् (भग.गीता.शां.भा.१६।८) ३६९
असत्यत्वेन ज्ञानन्तु...इति उक्तम् (शु.मा.प्र.६) ३६२
असत्यम् अप्रतिष्ठं ते... (भग.गीता१६।८) ३६४, ३६८
असत्ये वर्त्मनि स्थित्वा... (वाक्प.२।२३८) ३५५
असदकरणाद् उपादानग्रहणात्... (सां.का.९) ३९८
असद् इति चेद्... (ब्र.सू.२।१।७) ३६८
असद् वा इदम् (तैत्ति.उप.२।७।१) ३२४
असद्व्यपदेशाद् न... (ब्र.सू.२।१।१७) ३२४
असन्नेव सः भवति (तैत्ति.उप.२।६) ४६९
असान्निध्याद् इति... इति भावः (पातं.महाभा.३।२।११५) ५२
अस्ति च अत्र... (महाभा.३।३०१।९) ३४७
अस्ति चेद् ईश्वरः... प्रभुर्हि सः (भाग.पुरा.१०।२१।१४) १६
अस्ति प्राधान्ये...इदं ग्रहणम् (पातं.महाभा.१।४।५४) २८८
अस्ति ब्रह्म इति चेद् वेद... (तैत्ति.उप.२।६) ११
अस्ति ब्रह्म इति...
शास्त्रप्रतिपाद्यकारणत्वाद् इति अर्थः (द्र.ब्र.सू.भा.प्र.१।२) ४८०
अस्ति भाति प्रियं रूपं... (सि.ले.सं.२।८)
२१०,३९६, ३९७
अस्ति शूद्रस्य शुश्रूषा... महामुने ! ( ) १०१
अस्तेः भूः... प्रवृत्तः इत्यर्थः (कुमा.सं.म.१।३५) ७८
अस्थूला (बृह.उप.३।८।८) ४६१
अस्मत्कृते च व्याख्याने... प्रसूतं कपिलम् (ब्र.सू.शां.भा.२।१।१) १५०

अस्मान् लोकात् प्रेत्य	(तैत्ति.उप.२।८)	४१३
अस्मिन्नस्य च तद्योगं...	(ब्र.सू.१।१।१८)	२६१,५०४
अस्मिन् कलियुगे... वर्णाश्रमविवर्जिताः	(कूर्मपुरा.१।२९।२)	८५
अस्य पूर्वार्धेआश्रित्य... नास्तिकानाम्	( )	९५
अस्य महतो... विद्योपनिषदः	(बृह.उप.२।४।१०)	१७१
अस्य व्यंजिका नित्यनिवृत्ता	(नृ.उ.उप.९)	४६२
अहं तात ! सहस्रांशुः...	(महाभा.३।३००।२२)	३४६
अहं त्वा सर्वपापेभ्यो	(भग.गीता १८।६६)	२८७
अहं भक्तपराधीनः	(भाग.पुरा.९।४।६३)	६
अहं सर्वस्य प्रभवो...	(भग.गीता १०।८)	२४७, ४८६
अहं हि सर्वयज्ञानां...	(भग.गीता ९।२४)	२८३
अहमेव अक्षयः कालः	(भग.गीता १०।३३)	३२२
अहमेव आसमेव अग्रे	(भाग.पुरा.२।९।३२)	१९३, ३०४, ३१०, ४३४
अहम् इति शब्दस्य व्यतिरेकाद् न आगमिकम्	(वैशे.सू.३।२।९)	१३९
अहोरात्राणि विदधत्	(ऋक् .संहि.१०।१९०।२)	२६२
अह्न्यापृतं निशि शयानम्...	(भाग.पुरा.२।७।३१)	३०२

आ

आकाशः सम्भूतः	(तैत्ति.उप.२।१।१)	३२३, ४९९
आकाशवद् व्यापकंहि	(त.दी.नि.१।२५)	२६८
आख्याहि मे को भवान्	(भग.गीता ११।३१)	३२५
आगाराद् अभिनिष्क्रान्तः... परिव्रजेद्	(मनुस्मृ.६।४१)	३८
आग्नेयी वै... आग्नेयं स्याद्	(तैत्ति.ब्रा.१।१।४।२)	१६७
आङ्गेयमहनः... च्युतसंस्कारत्वम्	(साहि.दर्प.७।४)	२२७
आचार्यवान् पुरुषो वेद	(छान्दो.उप.६।१४।२)	१०
आत्मकृतेः परिणामाद्	(ब्र.सू.१।४।२६)	३०२
आत्मनः संकल्पेन	(द्र.भग.गीता रा.भा.४।६)	३४०
आत्मनश्च	(पाणि.सू.६।३।६)	५०२
आत्मना कृतम् इति... इति सम्प्रत्ययात्	(पातं.महाभा.प्र.६।३।५)	५०२
आत्मना पञ्चमः	(पातं.महाभा.६।३।६)	५०१,५०२
आत्मनि च एवं विचित्राश्च हि	(ब्र.सू.२।१।२८)	३४०
आत्मनेपदम् आत्मनेभाषाः	(पाणि.सू.का.६।३।७)	५०१
आत्मनो वा अरे दर्शनेन...	(बृह.उप.२।४।५)	१९६

आत्मभिदाबाधात्मने नमः ( ) ४४७
आत्ममाने खश्च… (पाणि.सू.३।२।८३) १४
आत्मसृष्टेः न वैषम्यं…यस्माद् अदूषणम् (शु.मा.४६–४८) २९५,३०५
आत्मसृष्टेः न वैषम्यम् (त.दी.नि.१।७६) २७२, २८६, ३०३
आत्मा वा अरे द्रष्टव्यः (बृह.उप.२।३।५) ३१०
आत्मा वा इदम्… लोकान् असृजत (ऐत.उप.१।१।१) २४२, २७०, ४२९, ४३१, ४३३, ४९६
आत्मानं चेद् विजानीयाद्… (बृह.उप.४।४।१२) ३०६
आत्मानं स्पृणुते (तैत्ति.उप.२।९) ४१३
आत्माहि एषां सम्भवति (बृह.उप.१।४।११) ४०९
आत्मेश्वरः उपद्रष्टा… अनुसन्धेयम् इति अर्थः (त.दी.नि.आ.८।७।४७) १५२
आत्मैव इदं सर्वम् (छान्दो.उप.७।२५।२) ४५१
आत्मैव इदम् अग्रे… आत्मनो अपश्यद् (बृह.उप.१।४।१) २४२, ३९९, ४३३, ४४९
आदावन्ते च यद्… वितथाइव लक्षिता (गौड.का.वैत.२।६) ४३२
आदित्यः चक्षुः भूत्वा… (ऐत.उप.२।४) ३०६
आदित्यो वा एष… ता ऋचः (महाना.उप.१२।२) १२०
आदौ लोकसिसृक्षया (भाग.पुरा.१।३।१) २५२
आद्यभक्षे वषट्कर्तुः..वषट्कारोऽपि कारणम् (जै.मी.सू.न्या.मा.३।५।३१) २२२
आनन्दब्रह्मणो विद्वान् न… (तैत्ति.उप.२।९) ४९९
आनन्दरूपम् अमृतं यद् विभाति (मुण्ड.उप.२।२।७) १०८, ३०६, ३१०
आनन्दो ब्रह्मइति…. भूतानि जायन्ते (तैत्ति.उप. ३।६) १०८,४८६,४९१
आनुमानिकमपि एकेषां (ब्र.सू.१।४।१) १५३
आपदि इत्युक्तेः अनापदि… () २४
आपद्ग्रहणाद् अनापदि… (याज्ञ.स्मृ.२।८।१३०) २४
आपो वा इदम् अग्रे… (तैत्ति.संहि.७।१।५) ३५९
आयुः प्रजां… नृणां पितामहाः (याज्ञ.स्मृ.१।१०।२७०) २८३
आविस्संनिहितं गुहाचरं… (मुण्ड.उप.२।२।१) ४
आवृत्तचक्षुः (कठोप.२।१।१) ४२७
आवृत्तिः असकृदुपदेशात्… (ब्र.सू.४।१।१) ३५
आशीः नमस्क्रिया वस्तुनिर्देशो… (काव्यादर्शः१।१४) ६

आश्रमत्रयम् उत्सृज्य...एकमना भवेद् (वायुपुरा.१७।१–५) ३६
आश्रमाद् आश्रमं गच्छेद्... (भाग.पुरा.११।१७।३८) २१
आश्रमो वैष्णवो... ब्रह्मविद्यापरायणः (कूर्मपुरा.१।२।९८–९९) ७५
आसीद् इदं तमोभूतम्... सर्वतः (मनुस्मृ.१।५) ४३६
आसीनो दूरं व्रजति... (कठोप.१।२।२१) १९५, ४७१
आसुरं पार्थ मे... (भग.गीता१६।६) १३
आस्ते शेते (पाणि.सू.१।३।१२) २८८
आह च तन्मात्रम् (ब्र.सू.३।२।१६) ६

इ

इच्छा–द्वेष–प्रयत्न–सुख–... लिङ्गम् इति (गौ.न्या.सू.१।१।१०) १३७
इच्छा–द्वेष–समुत्थेन... यान्ति परन्तप ! (भग.गीता ७।२७) २७८
इतरव्यपदेशाद् हिताकरणादि... (ब्र.सू.२।१।२१) ३००, ३१०
इतरस्य... (ब्र.सू.४।१।१४) ४१२
इतरे इत्यादिः... भोगेनतु इतरे (ब्र.सू.४।१।१९) ४१३
इतरेतु आरब्धकार्ये... सम्पद्यते (ब्र.सू.शां.भा.४।१।१९) ४१३
इतरेषाञ्च अनुपलब्धेः (ब्र.सू.२।१।२) ४३४
इति आकर्ण्य... पतक्त्येव न संशयः (पद्मपुरा.६।२३५।२२–३६) ८०
इति आह नास्तिक्यनिराकरिष्णुः... (जै.मी.सू.श्लो. वा.१।१।५) ३१९
इति नृगतिं विविच्य... निगमावपनं (भाग.पुरा.१०।८४।२०) ७७
इति ब्रह्मविदां हार्दं... (शु.मा.२९) २०८, २२९
इतिहास–पुराणं च... (तैत्ति.ब्रा.३।१२।८।२) १७७
इत्येतद् लक्षणं प्रोक्तं... यावद् मन्वन्तरक्षयः (कूर्मपुरा.१।३०।५३) १४६, १४८
इदं कलियुगं घोरं... (कूर्मपुरा.१।२९।१) ६५
इदं कृतिसाध्यम्... वमतिः तथा (न्या.सि.मु.का.१५०) ४३८
इदं विहितम्...प्रयत्ने कामापेक्षः (ब्र.सू.भा.प्र.२।३।४२) २९९
इदं वेदान्त–ब्रह्ममीमांसातिरिक्त–... ( ) ३६
इदं सर्वं यद् अयम्... (बृह.उप.२।४।६)
१९६, ३०४, ३९६, ४५३
इदं सर्वम् असृजत (तैत्ति.उप.२।६)
२७२,४६९,४९६
इदि परमैश्वर्ये (धा.पा.१।६३) ३३७
इध्मप्रवश्चनादि (पातं.महाभा.२।२।१४) २७२
इन्द्रप्रणः पुरः...शरणाः बृहन्ता (ऋक्.संहि.६।४७।७–८) ३५१

इन्द्रादयो बाहवः आहुरुस्त्रा... (भाग.पुरा.२।१।२९) २८३

इन्द्रियाणि हयान् आहुः (कठोप.१।३।४) ३३७

इन्द्रो मायाभिः पुरुरूपः ईयते (बृह.उप.२।५।१९)
३२९,३३१,३४१,४५९,४७३

इन्द्रो मायाभिः पुरुरूपः ईयते (ऋक्.संहि.६।४७।१८) २६५,३२९

इमाः तिस्रो देवताः (छान्दो.उप.६।४।७) ४७०

इमाम् अगृभ्णन् रशनाम्... (शु.यजु.सं.२२।२) २७८

इसुसोः सामर्थ्ये (पाणि.सू.८।३।४४) २१७

इह तद्योगात् (ब्र.सू.१।१।३२) २६१

इह तावत्... आसनक्रियायाः लक्षणं (पाणि.सू.वा.३।२।१२६) १५३

ईक्षति... (ब्र.सू.१।३।४) १५२

ईक्षतेः न अशब्दम् (ब्र.सू.१।१।४)
१५०, २४३, २६६, ४८५

ईक्षां चक्रे, ईक्षणं दर्शनं... (प्रश्नोप.शां.भा.६।३) २५२

ईदूदेद् (पाणि.सू.१।१।११) ३०३

ईशानः सर्वविद्यानाम्... सदाशिवोम् (महाना.उप.२१।१) ७७

ईश्वरः शर्वः ईशानः (अम.को.१।१।३०) १७४

ईश्वरः सर्वभूतानां... यन्त्रारूढानि मायया (भग.गीता १८।६१) ४६६

ईश्वरस्य कर्माधीनत्वेन... (शु.मा.प्र.४४) २८७

ईश्वराधीनो जनः... (महाभा.टी.१३।१।६७) ३२६

ईश्वरेण पुरा... ज्ञानानाम् उत्तमोत्तमम् (कूर्मपुरा.१।३१।१४–१५) ६९

ईश्वरो हि जगत्स्रष्टा... सर्वकर्मसु (कूर्मपुरा.१।१५।१२) १२०

उ

उक्तार्थानामप्रयोगः (पातं.महाभा.१।४।९३) २३७

उत अविद्वान् अमुं लोकं प्रेत्य (तैत्ति.उप.२।६) ४१३

उत तम् आदेशम्...विज्ञातम् इति (छान्दो.उप.६।१।२–३) १९६,३७५

उत्क्रान्त्यगत्यागतीनां... (ब्र.सू.शां.भा.२।३।१९) ५०४

उत्क्रान्तिगत्यागतीनाम् (ब्र.सू.२।३।१९) ४७४,४८३

उत्पत्ति–स्थिति–... अचिक्त्यैश्वर्य्यवद् बृहत् (अणु.भा.कारि.१।१।२) ४६०

उत्सर्गेण इति शेषो... ( ) २२७

उदक्याशुचिभिः स्नायाद् (याज्ञ.स्मृ.३।१।३०) १०६

उदासीनानामपि चैवं सिद्धिः (ब्र.सू.२।२।२७) ४१४

उदिते सूर्येप्रातः... (तैत्ति.ब्रा.२।१।२।७) १६७

उद्देश्यं विधेयञ्च... तथा व्युत्पत्तिः (काव्यप्रदी.) २२७
उद्देश्यतावच्छेदक–कालावच्छिन्नत्वस्य... ( ) ४०४
उद्भिदा यजेत पशुकामः ( ) ३४२
उपक्रमोपसंहारौ अभ्यासो... लिङ्गं तात्पर्यनिर्णये (द्र.सर्वदर्श.पूर्णप्र.) १४८, ४९३
उपदेक्ष्यति तज्ज्ञानं... (कूर्मपुरा.१।३०।३४) ५६
उपदेशे अज् (पाणि.सू.१।३।२) ६५
उपद्रष्टाः अनुमन्ताः एषः... (नृसिं.उत्त.उप.९) ४६३
उपपद्यते च अपि (ब्र.सू.२।१।३६) ३०९
उपभोगेन कर्मारब्धं व्यपनयन् (भाग.पुरा.५।१०।१४) ४०७
उपमानानि सामान्यवचनैः... (पाणि.सू.काशि.२।१।५५) ४९
उपसर्गेण धात्वर्थोबलाद्... (पाणि.सू.सि.कौ.८।४।१८) ४८४
उपादानस्यच अध्यक्षं प्रवृत्तौ... (न्या.सि.मु.१५१) ४३०
उपायास्यति शक्रः त्वां... (पातं.महाभा.३।३००।११) ३४६
उभयप्राप्तौ कर्मणि... (पाणि.सू.२।३।६६) ४९
उभयविशेषणत्वाद् उभयोश्च... (पाणि.सू.वा.२।१।५६) २२६
उभयव्यपदेशात्तु अहिकुण्डलवत् (ब्र.सू.३।२।२७) ४७१
उमापतिः भूतपतिः... पाशुपतं शिवः (महाभा.१२।३३८।६२) १०४
उवाच परमप्रीत्या... पद्मदलेक्षण! (कूर्मपुरा.१।२८।५–६) ६५
उवाच सप्रियो रुद्रैः... वयं ततः (कूर्मपुरा.१।१५।५०–५३) १२६
ऊर्ध्व वार्षिकाभ्यां मासाभ्यां... ( ) ४१
ऊर्ध्वं तद् ब्रह्मसदनात्... स वै स्मृतः (कूर्मपुरा.१।४४।११–१४) ७०
ऊर्ध्वगमनं विसृजेत्... उपनिषदाम् आवर्तयेत् (आरुणि.उप.२) ३५

ऋ

ऋग्भिः पूर्वाह्ने दिवि... एति सूर्यः (तैत्ति.ब्रा.३।१२।९।१) १२०
ऋचो अक्षरे परमे... (ऋक्.संहि.१।१६४।३९) २०१
ऋचो यजूंषि सामानि... (तैत्ति.ब्रा.३।१२।८।१–२) १७७
ऋणत्रयम् अपाकृत्य निर्ममो... प्रव्रजेद् गृहाद् ( ) १८
ऋणानि त्रीणि अपाकृत्य (मनुस्मृ.६।३५) १९
ऋतं सत्यं परं ब्रह्म (जाबा.दर्श.उप.९।१) ६८
ऋतुः सुदर्शनः कालः (विष्णुसह.ना.५८) ३२५
ऋते अर्थं यत् प्रतीयेत (भाग.पुरा.२।९।३३)
३४५, ३५०, ३५२, ३५६, ४६३
ऋभूणां त्वा देवानां... (तैत्ति.ब्रा.१।१।४।८) २२०

ऋषिं प्रसूतम् (ब्र.सू.शां.भा.२।१।१) १५२

ऋषिभिः बहुधा गीतं... (भग.गीता १३।५) ५०३

ऋषीणां नामधेयानि... ददाति अजः (द्र.ब्र.सू.शां.भा.१।३।३०) ४२८, ४३१,४४०

ऋचां मूर्द्धानं यजुषाम् उत्तमाङ्ग... (शांखा.आ.) ५

ए

एक आहुः असदेव... (छान्दो.उप.६।२।१) ३६३

एकः चरेद् महीम्...मद्भावविमलाशयः (भाग.पुरा.११।१८।२०–२१) ४२

एकः सृजति भूतानि... (भाग.पुरा.६।१७।२१) ३०६

एकं सद् विप्राः... (ऋक्. संहि.२।३।२२।४६) ४५५

एकएव चरेद् नित्यं... भावसमाहितः (मनुस्मृ.६।४२–४३) ४२

एकएव चरेद् भिक्षुः... नारायणपरायणः (भाग.पुरा.७।१३।३) २४,४२

एककालं चरेद्भैक्षं न... विषयेष्वपि सज्जते (मनुस्मृ.६।५५) ३८

एकत्र लोभाद् वा... किल्बिषम् ( ) ४३

एकदण्डं समाश्रित्य... ( ) ३४

एकदण्डी भवेद् वापि... ( ) ३१

एकदण्डी वेति बौधायना... सर्वसंगविवर्जितः ( ) ३०

एकमेव अद्वितीयम् (छान्दो.उप.६।२।१) १८६, २७१, ४३३

एकमेव अस्मि हन्त... (गोपथब्रा.१।१।१) ४३३

एकरात्रं वसेद् ग्रामे नगरे... (नारदपरि.उप.४।१४) ४१

एकविज्ञानेन सर्वविज्ञानश्रुतिरपि.... (द्र.छान्दो.उप.६।६।२–७) १९९

एकस्मै स्वाहा द्वाभ्यां... (तैत्ति.संहि.७।२।११) २३४

एकस्य एवं पुनः... (जै.मी.सू.२।२।२) ३२२, ३४२

एकस्यैव ममांशस्य... विद्ययाच तथेतर (भाग.पुरा.११।११।४) ४३९, ४६२, ५०९

एका शक्तिः... मुनिभिः तत्त्वदर्शिभिः (कूर्मपुरा.पूर्व.१२।२७।३२) ४५४

एकांशेन स्थितो जगत् (भग.गीता १०।४२) ४८६

एकाकी न रमते... (बृह.उप.१।४।३) २४०

एकादश्यान्तु प्राप्तायां समुपोष्येह... (पद्मपुरा.६।२३४।४) ७९

एके मुख्यान्यकेवलाः (अम.को.३।३।१६) ५, ४१२

एकेषां पुष्टिमार्गीयाणां... विषयभेदो वाच्यः (ब्र.सू.भा.४।१।१७) ४०७, ४१२

एङ्प्राचां देशे (पाणि.सू.१।१।७५) ११६

एतं वै आत्मानं विदित्वा...	(बृह.उप.३।५।१)	२५
एतंह वाव न तपति...	(तैत्ति.उप.२।९)	२९४
एतच्छारीरकं जैमिनीयेन षोडशलक्षणेन	(श्रीभाष्यविवृत्ति)	५०६
एतत्कूर्मपुराणन्तु	( )	१७४
एतत्सर्वं भू स्वाहा इति...	(जाबा.उप.६)	३५
एतदात्म्यम् इदं सर्वं तत् सत्यं	(छान्दो.उप.६।८।७)	३९७
एतदालम्बनं श्रेष्ठम्	(कठोप.१।२।१७)	६१
एतदेव इति समासमन्तरेण... अजादावपि समासानुमानम्	(पातं.महाभा.६।३।१०)	५०२
एतद्ध स्म वै तद्विद्वांस... वयं यक्ष्यामहे	(ऐते.ब्रा.३।२।६)	३४
एतद्ध्येव अक्षरं ब्रह्म	(कठोप.१।२।१६)	५१
एतन्मते सुनिष्पन्नं... न मायिकम्	(शु.मा.२६–२८)	१८६, २२९
एतन्मते = शंकराचार्यमते... तत्पुरुषम् आहु	(शु.मा.प्र.२६–२७)	१८७
एतमेव विदित्वा मुनिः...	(बृह.उप.४।४।२२)	३५
एतस्माद् जायते... विश्वस्य धारिणी	(मुण्ड.उप.२।१।३)	२७६
एतस्मिन् अन्तरे देवी... सर्वदृक्	(कूर्मपुरा.१।१५।३४)	१२५
एतेच पदार्थाः प्रधानतया...	(न्या.लीला)	१८८
एतेन योगः प्रयुक्त	(ब्र.सू.२।१।३)	१३३
एभिश्च सूत्रैः ब्रह्ममीमांसासिद्धान्तो...	( )	९४
एवं कदाचिद् भगवान्... करोति अजः	(त.दी.नि.१।३६)	४९४
एवं कालोऽपि अनुमितः...	(भाग.पुरा.३।११।३)	३२४
एवं द्वितीयाध्यायार्थः... इति उक्तम्	(त.दी.नि.यो.३।१२।३१–३३)	१६२
एवं मायादिष्वपि यथायथं बाधः	(ब्र.सू.शां.भा.२।२।२९)	३९६
एवं विज्ञापितो देव्या... दक्षयज्ञजिघांसया	(कूर्मपुरा.१।१५।३७)	१२६
एवं विवादे... विष्णवाराधनम् अर्हति	(कूर्मपुरा.१।२२।३८–४७)	७४
एवं सम्बोधितो... मोहशास्त्राणि	(कूर्मपुरा.१।१६।११८)	९१
एवं सर्वं ततः सर्व...	(त.दी.नि.१।१०१)	२०१
एवञ्च एतं वै तम्... भिक्षाचर्यं चरन्ति	(बृह.उप.३।५।१)	१९
एवञ्च श्रुतिषु सर्वस्य...	(शु.मा.टी.२९)	२०८
एवञ्च स्वप्नसाधर्म्येण...	(ब्र.सू.२।२।२९)	३८८
एवमेव इह आचार्यवान्...	(छान्दो.उप.६।१४।२)	२५
एवम् अद्वैतपदार्थं...व्यावर्त्यम् आहुः	(शु.मा.टी.२२)	२०८
एवम् अन्येऽपि... इह उत्तिष्ठन्ते	(ब्र.सू.शां.भा.१।१।४)	१५२
एवम् अष्टविधं... पुरुषनिःश्वासवद्	(बृह.उप.शां.भा.२।४।१०)	१७७

एवम् उक्ता अथ विप्रेण... (कूर्मपुरा.१।१।६४) ८
एवम् उक्तो भगवता... युगधर्मान् द्विजोत्तमा: (कूर्मपुरा.१।२९।६) १४७
एवम् उक्तो... अव्यभिचारिणीम् (कूर्मपुरा.१।३०।५६) ६७
एवम् उक्त्वा ददौ... अक्लिष्टकर्मणे (कूर्मपुरा.१।२४।४७) ६९
एवम् उक्त्वा स विप्रर्षि:..कुशास्त्रासक्तचेतस: (कूर्मपुरा.१।१५।२८–३०) १००
एवम् उक्त्वा स... तत्परमो अभवद् (कूर्मपुरा.१।३०।६३–६४) ६७
एवम् उक्त्वा स... दक्षसाहाय्यकारिण: (कूर्मपुरा.१।१५।२८) १२१
एवम् उक्त्वा... सूर्य: स्मयन्निव (महाभा.३।३०२।१८–२०) ३४७
एष देवो महादेव:... लिङ्गे महेश्वर: (कूर्मपुरा.१।२६।६१) ६७
एष: उ एव साधु (कौषी.उप.३।९)
२५९,२७३,२७४,२८६,२९१,२९५,२९८,३०२,३२०,४३७
एषह्येव आनन्दयाति (तैत्ति.उप.२।७।१) ४
एषह्येव शून्यः एषह्येव... निर्गुणश्च इति ( ) ४३५
ऐकाश्रम्यन्तु आचार्या:... (गौ.गृ.सू.१।३।३५) २१
ऐतदात्म्यम् इदं सर्वं... (छान्दो.उप.६।८।७)
३५४, ३६८, ३७१, ३७२, ३८०
ऐन्द्रवायवेतु वचनात् प्रतिकर्मभक्ष:... (जै.मी.सू.३।५।१८) २२३
ऐश्वरं मार्गम् (कूर्मपुरा.१।१५।३०) १०४

औ

औत्पत्तिकस्तु शब्दस्य अर्थेन... (जै.मी.सू.१।१।५) २१३, ४०२

अंशिन: स्वांशगात्यन्ताभावस्य... (चित्सुखी.१।८) ३८८
अंशो नानाव्यपदेशाद् (ब्र.सू.२।३।४३) ३३९

क

कति सन्ति इह शास्तार: ? (भाग.पुरा.६।३।५) १२
कथं नु भगव: स... (छान्दो.उप.६।१।२) १९६,३७६
कथं पुन:...स्पन्दतइव इति अर्थ: (माण्डु.गौ.का.शां.भा.२९।३०) ३९१
कथं स भगवान् ईशो... (कूर्मपुरा.१।२५।३३) ६८
कथम् असतः सद् जायेत ? (छान्दो.उप.६।२।२)
३५८, ३६२, ३६३, ३६६, ३७०
कदाचित् सर्वम् आत्मैव (त.दी.नि.१।३७) ४९४
कपालं वृक्षमूलानि कुचेलम्... मुक्तस्य लक्षणम् (मनुस्मृ.६।४४) ४९

कपिलाक्षीरपानेन ब्राह्मणीगमनेन…	(परा.स्मृ.१ ।६७)	१०१
कपिलो यदि सर्वज्ञः…	(द्र.ब्र.सू.शां.भा.र.२ ।१ ।११)	७६
कमलानिलयः कलानिधेः	(श्रीशंक.दिग्वि.३ ।२)	७३
करणाधिकरणयोः च	(पाणि.सू.३ ।३ ।११७)	१२
करिष्यति अवताराणि… महान् गुणः	(कूर्मपुरा.१ ।३० ।३३–३७)	५५, ६६, ७४, १७५
कर्ण ! मद्वचनं तात !…	(महाभा.३ ।३०० ।१०)	३४६
कर्तव्या आशयशुद्धिस्तु… करणाय च इति	(याज्ञ.स्मृ.३ ।४ ।६२)	३१
कर्ता कारयिता हरिः	( )	४६८
कर्ता शास्त्रार्थवत्त्वाद्	(ब्र.सू.२ ।३ ।३३)	२९१, २९३, ४७०
कर्ता स्वतन्त्रएव स्यात्…	(त.दी.नि.१ ।७७)	२९०
कर्तारम् ईशं पुरुषं ब्रह्मयोनिं	(मुण्ड.उप.३ ।१ ।३)	२४७, ४६२, ४६९, ४९६
कर्तुश्च लक्षणयोः पर्यायेण…	(पाणि.सू.वा.३ ।२ ।१२६)	१५५
कर्तृत्वं बोध्यम्	(शु.मा.प्र.४४)	२९४
कर्तृत्वानुपपत्तौ ईश्वरत्वासिद्धिः…	(शु.मा.प्र.४४)	२८५
कर्मणा मनसा वाचा…	(कूर्मपुरा.१ ।२७ ।१६)	८९
कर्मणा मनसा… कलौ पाषण्डसंकुले	(स्क.पुरा.)	१५९
कर्मणि च	(पाणि.सू.२ ।२ ।१४)	२७२
कर्मभिः त्यज्यते योगि	( )	५५७
कर्मभिः भ्राम्यमाणानां… ईश्वरेच्छया	(भाग.पुरा.१० ।४४ ।६७)	४३८
कर्माण्यपि जैमिनिः	(ब्र.सू.३ ।१ ।४)	४९८
कर्मापि एकं तस्य देवस्य सेवा	(त.दी.नि.१ ।४)	५
कर्मेन्द्रियाणि संयम्य…	(भग.गीता३ ।६)	३३
कर्मैके तत्र दर्शनात्	(जैमि.सू.१ ।१ ।६)	४०३
कलः संख्याने	(पाणि.धातु ३४१५)	३१८
कलयतां कलनं गणनं…	(भग.गीता शां.भा.१० ।३०)	३१८
कलाकाष्ठादिरूपेण निमेष…	(पद्मपुरा.)	३२४
कलिं सभाजयन्ति… स्वार्थोअभिलभ्यते	(भाग.पुरा.११ ।५ ।३६)	१५९
कलेः एको महान् गुणः	(कूर्मपुरा.१ ।३० ।३७)	६६
कलौ तु केवलं कर्ता	(पद्मपुरा.६ ।११२ ।१०)	७१
कलौ दानं महाश्रेष्ठं…	(धर्मसिंधु.तृ.परि.पू.कलि.४)	७१
कलौ देवो महेश्वरः	(कूर्मपुरा.१ ।२९ ।११)	७४

कलौ रुद्रो… च दैवतम् (कूर्मपुरा.१।३०।३२–३३) ६६

कलौतु केवलं कर्ता… जीवितमेव च (कूर्मपुरा.१।३०।३८–४३) ६६

कल्पस्तु एवं परिव्रज्य… चरेद् महीम् (भाग.पुरा.७।९।१३) ४२

कल्पान्ते रौरवादिषु… (कूर्मपुरा.१।१५।१५) ८२

कश्चित् धीरः प्रत्यगात्मानम्… इच्छन् (कठोप.२।१।१) ४२६

कस्तं मदामदं देवं… (कठोप.१।२।२१) १९८

कस्मिन् नु भगवो… (मुण्ड.उप.१।१।३) १९६

कस्मिन् पुनः परोक्षे… (पातं.महाभा.३।२।११५) ५२

काकवद् देवदत्तस्य गृहम् (द्र.पातं.महाभा.१।१।२६) १४४

कान्दिशीको भयद्रुतः… (अम.को.३।१।८७) ५३

कापालं भैरवम् (कूर्मपुरा.१।१२।२६२) ११०

कापालं लाङ्गलं वामं… (कूर्मपुरा.१।१६।११९) ८४

कापालिकाः च ये… तीर्थविक्रयिणः परे (कूर्मपुरा.१।३०।१६) १४६

कामः तदग्रे समवर्तताधि (ऋक्.संहि.१०।१२९।४/तैत्ति.ब्रा.२।८।९।६) ४३५

कामजान् इतरान् विदुः… ( ) २३

कामाच्च न अनुमानापेक्षा (ब्र.सू.१।१।१८)
१५२, २४३, २५२, २६६, २६७, ४३५, ४८६

कामान् नीकामरूपि… (तैत्ति.उप.३।१०।५) ३९२

कामैः तैस्तैः हृतज्ञानाः (भग.गीता ७।२०) १४२

कारके (पाणि.सू.१।४।२३) २८८

कारणाद् अभिन्नम् (शु.मा.प्र.४१) ३७३

कारणान्तरेष्वपि कल्पितेष्वेव… (पातं.यो.व्या.भा.२।२३) १३८

कारणाभावात् कार्याभावः (वैशे.सू. १।२।१) १८८

कारनाम्नः सप्तम्या… (पातं.महाभा.६।३।१०) ५०२

कारनाम्नि च प्राचां… (पाणि.सू.६।३।१०) ५०१

कार्यकारणरूपं हि शुद्धं… (शु.मा.२८) २०३

कार्योपाधिः अयं… पूर्णबोधो अवशिष्यते (शुकर.उप.४२)
२११, २२९, २३२

काल कर्म स्वभावं च (भाग.पुरा.२।५।२१) ३२०

कालः कलयताम् अहम् (भग.गीता १०।३०)
३११, ३१२, ३१५, ३१८

कालः क्रियाशक्त्युपहितः परमेश्वरः (भग.गीता आ.गिरि व्या.११।३२) ३२६

कालः स्वभावो नियतिः… (श्वेता.उप.१।२) ३२०

कालरूपो अवतीर्ण: (भाग.पुरा.१।१३।४८) ३१२, ३१६, ३२७
कालरूपोऽपि अन्वमोदत: (भाग.पुरा.११।१।२४) ३२७
कालवृत्त्यातु मायायां गुणमय्याम्... (भाग.पुरा.३।५।२६) ३३८
कालात्मना निवसता... (भाग.पुरा.११।१।११) ३२७
काले वेत्स्यति तद्... (महाभा.३।३०१।१०) ३४७
कालेन अव्यक्तमूर्तिना (भाग.पुरा.३।१०।१२)
कालेन गच्छता... सपत्नीको नरेश्वर ( ) ४२०
कालो अस्मि लोकक्षयकृत्प्रवृद्ध: (भग.गीता ११।३२) ३१२, ३१५, ३२७
कालो भगवानेव (द्र.लिङ्ग.पुरा.१।३१।५) ३२३
काव्यालापाश्च ये केचिद्... (विष्णुपुरा.१।२१।८५) ४०३
काशीपति: त्रिलोकेशो... (पत्रा.३७) १५२
काशीमरणाद् मुक्ति: ( ) ३३१
काश्यां तमहं गच्छामि (कूर्मपुरा.१।२९।१) ६६
काषायिनो अन्ये निर्ग्रन्था: ( ) १४६
काषायी त्रिदण्डी... (द्र.याज्ञ.स्मृ.मिता.३।४।५८) २९
काष्ठदण्डो धृतो... महारौरवसंज्ञितान् (परमहंस.उप.३) ३४
काष्ठानि पचन्ति... (पाणि.सू.त.बो.१।४।५४) २८९
कि स्विद् वनं... भुवनानि धारयन्
(ऋक्संहि.१०।८१।४ / तैत्ति.ब्रा.१।८।९।३) ४३५
किं तदानीं तस्मै... (सुबा.उप.२) ३६०
किं तल्लिङ्गं सुरश्रेष्ठ... (कूर्मपुरा.१।२६।६२) ६७
किं न पश्यसि संसारम् (खं.खा.) ४६२
किं पुनः...अन्धपरम्परापत्तिन्यायापत्तेः (ब्र.सू.शां.भा.२।२।३७) ३०४
किं पुनः...प्रवर्तयिता भवति (पातं.महाभा.१।४।२३) २८९
किं वर्णनिष्ठः ? (प्रश्नः.६) १०२
किञ्च अन्तरा विभाति... (सुबो.१०।८४।३७) ३४५
किञ्च इदम् अदर्शनं नाम (पातं.यो.सू.व्या.भा.२।२३) १३८
किञ्च जन्यातु... इति निश्चयाद् (शु.मा.२३–२५) २०२, ४४६
किम् आसनं ते गरुडासनाय (गरु.पुरा.३।७।३६) ७
किम् एषाञ्च भवेत्... वक्तुम् अर्हसि (कूर्मपुरा.१।३१।११) ६९
कीटा: पतंगा... मर्त्या:/जीवा: (स्कन्दपुरा.२।४।३५।४१) ४१८
कुटीचर–बहूदकयोरेव... ( ) ३५

कुटीचरा नाम... संन्यासं कृत्वा ( ) २९
कुणिः चैव च गर्गः... योगिनाम् (कूर्मपुरा.१।५३।२५) ७३
कुण्डानि तिष्ठन्ति वनानि... (पातं.महाभा. १।१।२१) १८६
कुन्तीपुत्रस्तु तं...ध्यायन्तं गरुडध्वजः (महाभा.८०।१-२) ३५०
कुर्वन्ति अवेददृष्टानि... वैडालव्रतिकाधमाः (कूर्मपुरा.१।३०।३०-३२) १६८
कुर्वन्ति च ... तासु योनिषु (कूर्मपुरा.१।२९।२७-२९) ८२,९९,१४५
कुलधर्मम् अजानन्... स भवेत् तदा (कुला.त.उल्ला.२।४७) १०७
कुलशास्त्राणि सर्वाणि... श्रुतयः प्रिये (कुला.त.उल्ला.२।१३९-१४१) १०७
कुशलानि आशु सिध्यन्ति... (भाग.पुरा.१।१८।७) ७१
कूटस्थो अक्षरः उच्यते (भग.गीता ८।१८,१५।१६) ४८६, ४९४
कृतं त्रेता द्वापरं च... सत्यवादिनः (कूर्मपुरा.१।२९।४) ६३
कृतं त्रेता द्वापरं... कथयस्व समासतः (कूर्मपुरा.१।२८।१) १४५,१४७
कृतप्रयत्नापेक्षस्तु विहित... (ब्र.सू.२।३।४२) २४२, २७९, २९६, २९८, ३२७
कृतादिषु प्रजा... वासुदेवे अमलाशयाः (भाग.पुरा.११।५।३८-४०) १५९
कृतार्थं प्रतिनष्टमपि अनष्टं... (पातं.यो.सू.२।२२) १३७
कृते यद् ध्यायतो... परं व्रजेत् (भाग.पुरा.१२।३।५१-५२) १५९
कृतेतु (कूर्मपुरा.१।२८।१) १४७
कृतेतु मिथुनोत्पत्तिः (कूर्मपुरा.१।२९।१४) १४६
कृत्तद्धितसमासाश्च (पाणि.सू.१।२।४६) २२१
कृत्यल्युटो बहुलम् (पाणि.सू.३।३।११३) १२, १९९, ३७२
कृत्वा पापसहस्राणि... पुरीं विना (शिवपुरा.४।२३।२५) ४१६
कृत्वा वा नैष्ठिकीं... परं पदम् (कूर्मपुरा.१।३१।४५) ७०
कृषि-वाणिज्य-सेवादौ... (पञ्चद.सप्त.तृप्ति) ३३
कृष्णास्तु भगवान् स्वयं (भाग.पुरा.१।३।२८) ३२७
केचिद् इति मतभेददर्शनाय... लिट प्रत्ययः (पातं.महाभा.प्र.३।२।११५) ५२
केचिद् अत्र अतिविमलप्रज्ञा (त.दी.नि.१।७८) ३५२
कैः लिङ्गैः चिन्हिताः भुवि (पद्मपुरा.६।२३५।२) ७९
को अद्धा वेद कः इह... (तैत्ति.ब्रा.२।८।७५) ४७०
को मामेव भवान् प्राह (महाभा.३।३००।२१) ३४६
कोऽसौ प्रतिकारकं...पचिः वर्तते (पातं.महाभा.१।४।२३।) २८९
कौपीनाच्छादनं वस्त्रं...समाचरेद् ( ) ३२
क्रमेण तान् प्रवक्ष्यामि... केतुमान् तथा (कूर्मपुरा.१।५३।११-१२) ७३

क्रियाकारकभावेन... समाप्तपुनराप्तम् ( ) ७७
क्रियागुणव्यपदेशाभावाद् (वैशे.सू.९।१।१) १८८
क्रियाया: गुणे इति... (पातं.महाभा.प्र.३।२।१२६) १५५
क्रियाया: फलनिष्पत्ति:... तदा स्मृतम् (वाक्पदीय.३।७।९०) ४३९
क्रीडार्थम् आत्मन: (भाग.पुरा.८।२२।२०) ३०२
क्लृप्तकेशनखश्मश्रु: पात्री... सर्वभूतानि अपीडयन् (मनुस्मृ.६।५२) ३८
क्वसुश्च (पाणि.सू.३।२।१०७) ७८
क्वैषानुज्ञा इति एषएव... (नृसिं.उत्त.९) ४६२
क्षीयन्ते च अस्य कर्माणि... (मुण्ड.उप.२।२।८) १६, ४१२
क्षेत्राणि दर्शयित्वा जीवेशौ... (नृ.उ.ता.उप.९) ४६७

ख

ख इव रजांसि वान्ति (भाग.पुरा.१०।८४।४१) ३५९
खनो घ च (पाणि.सू.३।३।१२५) ६४
खलानां मयि शास्तरि (भाग.पुरा.१।१७।९) १२३
खेशय: खशय: ग्रामेवास:... (पाणि.सू.सि.कौ.६।३।१८) ५०१

ग

गते नारायणे कृष्णे... पाण्डव: शत्रुतापन: (कूर्मपुरा.१।२८।२) १४५,१४७
गन्धाभावस्य जलादिरूपत्वे...
प्राभाकराणाम् अभिप्राय: (न्या.मु.रा..प्र.खं.१।१२) १९२
गमिष्यामि परं स्थानं... तत्परमं पदम् (कूर्मपुरा.१।२७।७–२०) ८३
गरीयसे ब्रह्मणोऽपि आदिकर्त्रे (भग.गीता ११।३७) ३२५
गर्भाधानादिभि: युक्त:... ब्राह्मणब्रुव: ( ) २८
गलेपादुकन्यायेन (लौकि.न्या.३८४)
गाण्डीवी कनकशिलानिभं भुजाभ्याम्... (साहि.दर्प.७।२) २२७
गामाविश्य च भूतानि (भग.गीता १५।१३) ४६६
गायन्ति चैव नृत्यन्ति... (कूर्मपुरा.१।४७।१९) ५४
गुण: उपसख्व्यानं कर्तव्यं... (पातं.महाभा.३।२।१२६) १५३
गुणशब्देन अत्र साधनम्... (पातं.महाभा.प्र.३।२।१२६) १५४,१५५
गुणवादस्तु (जै.मी.सू.१।२।१०) १६७
गुणव्यतिकराकारो निर्विशेषो... (भाग.पुरा.३।१०।११) ३२१
गुणाभिमानिनो देवा: (भाग.पुरा.३।२९।४४) ३२६
गुरोरपि हिते... ज्ञानयोगम् अनुत्तमम् (लिङ्गपुरा.१।८९।५–६) ३६

गुरौ वसति	(पातं.महाभा.६।१।७२)	५००
गूढं परंब्रह्ममनुष्यलिङ्गम्	(भाग.पुरा.७।१०।४८)	३२७
गृहशुश्रूषणं मह्यं दासवद्...	(भाग.पुरा.११।११।३९)	५
गृहेषु कूटधर्मेषु... असौ जडः	(भाग.पुरा.४।२।२२-२४)	१०२
गृह्यमाणैः त्वम् अग्राह्यो...	(भाग.पुरा.१०।१०।३२)	२४६
गोचरादीनां ग्रहणं... न भवति	(पातं.महाभा.३।३।११९)	६३
गोनर्दीयस्तु आह	(पातं.महाभा.१।१।२९)	११६
गोपे गोपाल गोसंख्यगोधु-...	(अम.को.२।९।१२८८)	७
गोप्यः कामाद् भयात्...	(भाग.पुरा.७।१।३१)	३०२
गोवधो व्रात्यता स्तेयम्	(याज्ञ.स्मृ.३।५।२३४)	१०९
गौणः चेद् न आत्मशब्दाद्	(ब्र.सू.१।१।५)	१५०,१५२,२६६,३६८,४७२,४७७,४९२
गौण्यसम्भवाद्	(ब्र.सू.२।३।३)	३२२

घ

घकालतनेषु कालनाम्नः	(पाणि.सू.६।३।१७)	५०२
घञजपाः पुंसि	( )	१३५
घनच्छन्नदृष्टिः घनच्छन्नम्... मन्यते च	(हस्ता.स्तो.१३)	१७८
घनो यदा... तर्हि अनुस्मरेद्	(भाग.पुरा.१२।४।३३)	१७९

च

चकार मोहशास्त्राणि	(कूर्मपुरा.१।१६।११८)	९५,११०
चक्षुषश्चक्षुः	(केनोप.१।२)	३७२
चक्षोः सूर्योअजायतः	(पु.सू.१२)	२८३
चजोः कुधिण्यतोः	(पाणि.सू.७।३।५२)	६४
चतुर्थम् आश्रमं गच्छेद्...	( )	३०
चतुर्थी तदर्थार्थ...	(पाणि.सू.२।१।३६)	६४
चतुर्धा वितते... यान्ति अकुतोभयम्	(पद्मपुरा.)	४२०
चतुर्भिः सह शिष्यैस्तु...	(वायुपुरा.)	५६
चतुर्विधा भिक्षवस्तु... आत्मानुग्रहं कुरुते	( )	२९
चत्वारः ते कलौ... उत्कले पुरुषोत्तमाद्	( )	१६०
चत्वारोऽपि आश्रमाहि एते... उपगतं बुधैः	( )	५३
चमसवद् अविशेषाद्	(ब्र.सू.१।४।८)	१३८,१५३,३३८,४८६

चमसेषु समाख्यानात् संयोगस्य… (जै.मी.सू.३।५।२२) २२३
चरेद् वने द्वादशाब्दान्… विपद्येत कृच्छ्रतः (भाग.पुरा.७।१२।२२) १९
चिकीर्षाकृतिसाध्य… (न्या.सि.मु.१५०) ४३०
चैतन्यदीप्ता (नृसिं.उत्त.उप.९) ४६३
चोदनालक्षणो अर्थोधर्मः (जै.सू.१।१।२)
४७४,४९१,४९८

छ

छंदसि लिट् (पाणि.सू.३।२।१०५) ७८
छन्दांसि यज्ञाः… मायया सन्निरुद्धः (श्वेता.उप.४।९) २००

ज

जगद्व्यापारवर्जं प्रकरणाद्… (ब्र.सू.४।४।१७) २४९
जगाम मनसा रुद्रम् (कूर्मपुरा.१।१५।३३) १२५
जनिकर्तुः प्रकृतिः (पाणि.सू.१।४।३९) ४९५
जनी प्रादुर्भावे (पा.धा.३३२९) ४४८
जन्माद्यस्य यतः (ब्र.सू.१।१।२)
३०८,४७२, ४७६
जन्माद्यस्य यतः अन्वयाद्… (भाग.पुरा.१।१।१) ४८८
जन्माद्यस्य यतः शास्त्रयोनित्वाद् (ब्र.सू.१।१।२) ४८४,४८७
जन्यातु अजन्या वा… (शु.मा.२३–२५) ४४९
जयध्वजस्तु मतिमान्… तव अनघ (कूर्मपुरा.१।२२।२३–२४) ७४
जसौ जसयला वसुग्रहयतिश्च… (वृत्तर.३।९१) ९
जहत्स्वार्था–ऽजहत्स्वार्थे… वाच्यव्यवस्थिते: (वै.भू.३०–३१) २१३
जाग्रज्जाग्रत्तथा जाग्रत… सुप्तिः तथैवच ( ) ३९३
जायमानो वै ब्राह्मणः… यज्वा ब्रह्मचारिवासि (तैत्ति.संहि.६।३।१०।५) १९
जायमानो वै… श्रुतिः विरुद्ध्येत (ब्र.सू.शां.भा.भाम.१।१।१) २२
जिह्वा न वक्ति… (भाग.पुरा.६।३।२९) १६०
जीवः ईशो विशुद्धा… (सि.ले.सं.१।१७) २२८,३३४
जीवः ईशो… अस्माकम् अनादयः (सि.ले.सं.१।१७) २२९
जीवेशौ आभासेन करोति (नृ.उ.उप.९)
४७१,४७३,४९६
जुष्टं यदा पश्यन्ति अन्यम् ईशं (श्वेता.उप.४।७) ४२७

ज्ञ

ज्ञातुं द्रष्टुं च तत्त्वेन (भग.गीता ११।५४) ४२७
ज्ञातृचान्द्रिसुरा बुधा... (अम.को.३।३।५६३) ११
ज्ञानप्रसादेन विशुद्धसत्त्वः... ध्यायमानः (मुण्ड.उप.३।१।८) ४२७
ज्ञानस्वरूपमेव आहुः जगद्... (द्र.विष्णुपुरा.१।४।२०) ३३२,३४२
ज्ञानाग्निः सर्वकर्माणि भस्मसात्... (भग.गीता४।३७) १६
ज्ञानामृतेन तृप्तस्य... ( ) ३९
ज्ञाने कर्मण्यपगते... कुर्वन्ति च अवताराणि (कूर्मपुरा.१।३०।२६-२७) १४९
ज्ञानेनतु तदज्ञानं येषां... (भग.गीता ५।१६) २३६
ज्ञानेनतु श्रवणादिसमुत्पन्नेन... इति एतद् (भग.गीता शं.ता.बो.५।१६) २३६
ज्ञो अतएव (ब्र.सू.२।३।१८) ४८३,५०३
ज्येष्ठेन जातमात्रेण... (मनुस्मृ.९।१०६) २३
ज्येष्ठेन जातमात्रेण...सद्भिः अगर्हितः (मनुस्मृ.९।१०६-१०९) २३
ज्योतिष्टोमेन स्वर्गकामः (द्र.आप.श्रौ.सू.१९।२५।१६) २७३,२७४,२७६,२९२

ट

टिड्ढाण (पाणि.सू.४।१।१५) १७५

ण

णश् अदर्शने (पा.धा.३३३५) ४४८
णिजन्तात् (द्र.पाणि.सू.१।३।७४) ३१८

त

तं मत्स्यः... घ्नन्ति शप्तोहि (तैत्ति.संहि.२।६।६) १६७
तच्छक्त्या अविद्ययातु... (त.दी.नि.१।२३) ३४१
ततः संसारदुःखस्य निवृत्तिः... (सि.मु.२) ६
ततः त्वां निहतं... मारुतं भुवनेश्वराः (रामा.४।६६।२५-२६) १२
ततः स रुद्रो भगवान्... दिवौकसाम् (कूर्मपुरा.१।१५।५७-६२) १२७
ततः सर्वात्मको देवः... महीतले (श्रीशंक.दिग्वि.) ६८
ततः स्वयंभूः... विविधाः प्रजाः (मनुस्मृ.१।६-८) ४३६
ततो अर्जुनस्य भवनं... (महाभा.७।७९।१) ३४९
ततो बन्धप्रमुक्तेन... ययौ गणः (कूर्मपुरा.१।१५।४२-४३) १२६
ततो महेशः किल... आविरासीद (श्रीशंक.दिग्वि.२।१) ६८

ततो लब्धवरः कृष्णो... उत्तमम् (कूर्मपुरा.१।२७।१) ६३
तत्तद्भोगप्रापणायैव देहा... (पद्मपुरा.) ४१९
तत्तु समन्वयाद् (ब्र.सू.१।१।३) ४७५,४८७
तत्तु समन्वयाद्... नियामकत्वाद् (द्र.ब्र.सू.भा.१।१।३) ४७५
तत्त्वतः परमार्थाद् (भाग.पुरा.श्रीध.४।२।२१) १०३
तत्त्वमसि (छान्दो.उप.६।८।७) ४२६
तत्त्वाध्यवसायसंरक्षणार्थं जल्प–वितण्डे... (गौ.न्या.सू.भा.१।२।२–३) २६५
तत्त्वेव भयं विदुषोऽमन्वानस्य (तैत्ति.उप.२।७।१) ५
तत्र उत्तमा... इदंहि विश्वम् (भाग.पुरा.१।५।२०) ४५८
तत्र एतच्छुङ्गम्...सदायतनाः सत्प्रतिष्ठाः (छान्दो.उप.६।८।५–६) ३६५
तत्र किं लक्षणं..तद्विवक्षितप्रमेयासाधकत्वं बोध्यम् (ब्र.सू.भा.प्र.१।१।२) ४७९
तत्र बहूदका नाम त्रिदण्ड... वस्त्रधारिणः ( ) २९
तत्र भेदः इति... प्रत्यायकत्वं सामर्थ्यम् (पातं.महाभा.उद्यो.२।१।१) २१५
तत्र भेदो न चैव (शु.मा.४९) ४५०
तत्र शैवानि शैवं च ( ) १७६
तत्र स्थितस्य... इदं परम् (ब्रह्मपुरा.) ४१९
तत्रच मैत्रेयीब्राह्मणोक्तस्य...तत्र ग्राह्या (सुबो.प्र.२।९।३३) ३५२
तत्रापि विशेषम्... बहिः आगच्छेद् (त.दी.नि.प्र.३।४।१६४–१६५) १६१
तत्सादृश्यम् अभावः... षट् प्रकीर्तिताः (द्र.पाणि.सू.बा.म.६।३।७३) ९१
तत्सृष्ट्वा तदेव अनुप्राविशद् (तैत्ति.उप.२।६।१) ३१०
तत्सृष्ट्वा इति...च प्रसक्तिः (ब्र.सू.भा.प्र.२।१।२१) ३०१
तत् तर्हि वक्तव्यं (पाणि.सू.वा.३।२।१२६) १५६
तत् ते पदं संग्रहेण... (कठोप.१।२।१५) ६१
तत् तेजः ऐक्षत... (छान्दो.उप.६।२।३–४) ३६८
तत् तेजो असृजत (छान्दो.उप.६।२।३) ४६९
तत् त्वम् असि (छान्दो.उप.६।८।७) २४७
तत् प्रसिद्धं अनुभूतं... इति अन्वयः (ब्र.सू.भा.१।१।३) ४८७
तत् शृणुध्वं मुनिश्रेष्ठाः... तीव्रं महत्तपः (कूर्मपुरा.१।२४।८६) ६३
तत् सत्यं (छान्दो.उप.६।८।७) ३६२
तथा अक्षरात् सम्भवति... (मुण्ड.उप.१।१।७) २४४,४८६,४९४
तथा अन्यानि सहस्रशः (कूर्मपुरा.१।१६।११९) ११०
तथा आद्रियन्ते न... (नैषधीयचरितम्१।१) ११
तथा इदम्... वा इति (पातं.महाभा.२।१।१) २१६

तथा पाशुपतं शास्त्रं... तामसाः (पद्मपुरा.६।२३५।३१–३३) १२२
तथा विद्वान् नाम–रूपाद् विमुक्तः (मुण्ड.उप.३।२।८) ४०८,४४६
तथा विष्णुं सगरुडं... च केशवम् (कूर्मपुरा.१।१५।६४–७०) १२८
तथा हि अत्यन्तम्... इति उपनिषद्... (ब्र.सू.शां.भा.३।४।४०) २२
तथैव स्मृतयः प्रोक्ताः... (पद्मपुरा.६।२३६।२२) १७४
तथैव स्मृतयः... चैव हारीतम् (पद्मपुरा.६।२३६।२२–२३) १७१,१७५
तद् भैक्षं गृहीत्वा एकान्ते... ( ) ३९
तद् मूलभूतं पदम् आमनन्ति (भाग.पुरा.१२।४।२१) ४
तद् यथा इह कर्मचितो... (छान्दो.उप.८।१।६) २६
तद् विष्णोः परमं पदं... (अथर्ववेद७।२६।७) ४
तदज्ञानं येषां जन्तूनां... आत्मनो भवति (भग.गीता शां.भा.५।१६) २३६
तदधिगम... (ब्र.सू.४।१।१३) ४१२
तदनन्यत्वम् आरम्भण शब्दादिभ्यः (ब्र.सू.२।१।१४)
२०२,३७०,३७३,३७५,३७९
तदेतद् अक्षयं/अक्षरं... –नाशविकल्पवद् (विष्णुपुरा.१।२२।६०) ४४८
तदेव अग्निः तदादित्यः... वा कुमारी (श्वेता.उप.४।२–३) २०२,३३८
तदेव अनुप्राविशत् (तैत्ति.उप.२।६) ४६६
तदेव भूतं तदु भव्यमा... (महाना.उप.१।२) ३२१
तदेव सर्वमेव एतद्... नित्यं सदसदात्मकम् (विष्णुपुरा.१।२।१४–१९) ३३९
तदेवं प्राप्य तत्पुण्यः... तेजोभास्वरविग्रहः (पद्मपु.६।१२७।१५७–१५८) ४१६
तदैक्षत... (छान्दो.उप.६।२।३) ३६८
तद् अव्यक्तम् आह हि (ब्र.सू.३।२।२३) २८०
तद् आत्मानं स्वयम् (तैत्ति.उप.२।७)
१८६, १९४, १९७, १९८, १९९, १९५, २३४, २४०, २४३,
२४४, ३०२, ३०७, ३३१, ३७६, ३९२, ३९७, ४८६, ४८९
तद् एजति तद् न एजति... (ईशा.उप.५) २४४,४७१
तद् एतत् सत्यम्... ओम्इति सत्यम् (नृ.उ.उप.९) ४६७
तद् एतद् अक्षरं नित्यं... (विष्णुपुरा.७।२२।५९) ३५४
तद् एतद् जडं मोहात्मकम्... (नृ.उ.उप.९) ४६७
तद् ऐक्षत बहु स्यां... (छान्दो.उप.६।२।३)
२४२,२४९,२५०,२६६,२९७,३०९,४७२
तद् न, ज्ञानविशेषजनकत्वं... जातिसंकरप्रसंगम् (चिन्ता.अव.प्रक.) ९७
तद् यथा इह... क्षीयते (छान्दो.उप.८।१।६) ४३१
तद् यथा... आत्मानम् उपसंहरति (बृह.उप.४।४।३) २७७

तद् यथेह कर्मचितो लोके (छान्दो.उप.८।१।६) ४२८
तद् ह एतत्पश्यन्... (बृह.उप.१।४।१०) ३८१,३९२
तद्ध तद्वनं नाम तद्वनम्... (केनोप.४।६) ९
तद्धर्मावच्छिन्नभिन्नभेदस्य..अतिरिक्तएव कल्प्यते (दीधिति.विशेषव्याप्ति) ३७४
तद्धेतुव्यपदेशाच्च (ब्र.सू.१।१।४) ५
तद्धेदं तर्हि अव्याकृतम्... व्याक्रियत (बृह.उप.१।४।७) ७७,४०१
तद्भूतस्यतु न अतद्भावो... (ब्र.सू.३।४।४०) २२
तद्य इह... ब्राह्मणयोनिं वा (छान्दो.उप.५।१०।७) २७७
तद्वचनाद् आम्नायस्य प्रामाण्यम् (वैशे.सू.१।१।३) १३८
तद्वद् अस्माकम्... भगवतो मुखाद् (कूर्मपुरा.१।३४।१५) ६९
तद्विज्ञानार्थं स गुरुमेव... (मुण्ड.उप.१।२।१२) २४,२५,२८,४१२
तद्विष्णुः ईशानो ब्रह्मा... (नृ.उ.उप.९) ४६७
तन्तु औपनिषदं पुरुषं पृच्छामि (बृह.उप.३।९।२६) ५,१९४,१९८
तन्निष्ठस्य मोक्षोपदेशाद् (ब्र.सू.१।१।६) २८७,४७२,४७७,४९३
तन्मायावादि विध्वंस–ध्वस्तप्रायम् (शु.मा.६४) २९६,४२१
तपः श्रद्धे ये हि... (मुण्ड.उप.१।२।११) २६
तपः आलोचने (द्र.तैत्ति.उप.शांक.भा.२।६) २४५
तपसा साधने... विश्वासार्थं परम्परा (त.दी.नि.३।४।१६४–१६६) १६१
तपामि अहम् अहं वर्षं... (भग.गीता ९।१९) २४७
तमः आसीत् तमसा... (तैत्ति.ब्रा.२।८।९।४) ३२८
तमः आसीत्... अजायत एकम् (ऋक्.संहि.१०।१२९।३) ४३४
तमसाविष्टमानसाः (कूर्मपुरा.१।१५।११) १२४
तमु स्तोतारः पूर्व्यं... (ऋक्.संहि.१।१५६।३) १६०
तमेव विदित्वा अतिमृत्युम्... (श्वेता.उप.६।१५) ३१०
तम् अद्भुतं बालकम् अम्बुजेक्षणम् (भाग.पुरा.१०।३।९) ८
तम् एतं वेदानुवचनेन... तपसा अनाशकेन (बृह.उप.४।४।२२) २५
तम् एवं विद्वानम् अमृतः इह भवति (तैत्ति.आर.३।१३।२) ३१०
तम् एवं विद्वान्... (पु.सू.८) ४०९
तयोः अन्यः पिप्पलं स्वादु अत्ति (मुण्ड.उप. ३।१।१) २९४
तयोः कार्यकारणयोः अनन्यत्वम् अवगम्यते (ब्र.सू.शां.भा.२।१।१४) २३७,३८४
तरति अविद्यां... विद्यात्मने नमः (विष्णुपुरा.५।१७।१४) ४४२,४४४,४४६

तरति शोकम् आत्मविद्	(छान्दो.उप.७।१।३)	३३१
तर्काप्रतिष्ठानादपि अन्यथा...	(ब्र.सू.२।१।११)	२४०
तस्मात् कारणात् परमार्थतो...	(ब्र.सू.शां.भा.२।१।१४)	३८४
तस्मात् किमपि वक्तव्यं... सम्पपत्त्यानन्तर्यम् उपदिश्यते	(ब्र.सू.शां.भा.१।१।१)	२५
तस्मात् किमपि... भवत्येव इत्यर्थः	(ब्र.सू.शां.भा.भाम.१।१।१)	२६
तस्मात् पूषाप्रपिष्टभागो...	(तैत्ति.संहि.२।६।८)	२७
तस्मात् शान्तो दान्तः... आत्मनि पश्यति	(बृह.उप.४।४।२३)	२७
तस्मात् सम्परिहर्तव्या... मद्भक्तेष्वपि यत्नतः	(कूर्मपुरा.१।२७।१६)	९८,१६९,१६६
तस्मात् सर्वप्रयत्नेन... शरणं व्रजेद्	(कूर्मपुरा.१।३०।३८)	७४,१४८,१६६
तस्मात् सेवा बुधैः प्रोक्ता...	(गरु.पुरा.२।९।३)	६
तस्माद् एवं विच्छान्तो... आत्मानं पश्यति	(बृह.उप.४।४।२३)	२७
तस्माद् यथोक्तसाधनसम्पत्त्यनन्तरं... वक्ष्यमाणलक्षणम्	(ब्र.सू.शां.भा.१।१।१)	२७
तस्माद् अद्वयएव अयम् आत्मा	(नृ.उ.उप.९)	४६४
तस्माद् अनादिमध्यान्तं... हि ताः	(कूर्मपुरा.१।१५।८५–८७)	१६६
तस्माद् अन्यतरद्द्वेषे न...	(त.दी.नि.३।४।२४)	१५१
तस्माद् आत्मनएव त्रैविध्यं...	(नृ.उ.उप.९)	४६४,४६७
तस्माद् एतद् ब्रह्म...	(मुण्ड.उप.१।१।९)	४०२
तस्माद् लोकात् पुनः...	(बृह.उप.४।४।६)	४८३
तस्माद् वा एतस्माद् आत्मनः	(तैत्ति.उप.२।१)	४६८,४८७,४९८
तस्माद्धा अन्यं न परः...	(ऋक्.संहि.१०।१२९।२)	४३४
तस्मिन् जज्ञे स्वयं...	(मनुस्मृ.१।९)	४३६
तस्मै प्रयाचमानाय...	(महाभा.३।३००।१५)	३४६
तस्मै प्रोवाच	(कूर्मपुरा.१।२९।७)	१४७
तस्मै स विद्वान् उपसन्नाय सम्यक्	(मुण्ड.उप.१।२।१३)	४१३
तस्य अवयवः	(श्वेता.उप.४।१०)	३३९
तस्य आकाङ्क्षा... आकाङ्क्षा	(न्या.मु.श.खं.८४)	६०
तस्य इच्छया आत्तवपुषः...	(भाग.पुरा.१०।३०।३५)	२५२
तस्य इदम्	(पाणि.सू.४।३।१२०)	१२
तस्य एकशिखरे... महेश्वरः	(कूर्मपुरा.१।४८।१७–२२)	७३

तस्य कार्यं लिङ्गम्	(वैशे.सू.४।१।२)	१३९
तस्य तावदेव चिरं...	(छान्दो.उप.६।१४।२)	२६६,४०४,४०६,४०८,४११
तस्य द्रव्यत्व–नित्यत्वे वायुना व्याख्याते	(वैशे.सू.३।२।५)	१३९
तस्य पुत्राः इति... सर्वेप्रमुच्यन्ते	(कठोप.२।३।१४)	४१३
तस्य प्रकृतस्य परमेश्वरस्य... मायिकैः स्वावयवैः	(श्वेता.उप.शां.भा.४।१०)	३३९
तस्य वै बहवः... महेश्वरम्	(कूर्मपुरा.१।३४।२२)	६८
तस्य सर्वजगत्सूतिः... इदं जगद्	(कूर्मपुरा.१।१२।१९–२४)	४५४
तस्य ह नचिकेता नाम पुत्र आस	(कठोप.१।१)	७८
तस्याः च अमित्रा–... अविद्या इति	(पातं.यो.सू.भा.२।५)	१८६
तस्यैव आनन्दस्य अन्यानि...	(बृह.उप.४।३।३२)	४
तस्यैव ते वपुः...	(भाग.पुरा.७।९।३३)	३२३
तस्यैवं वर्तमानस्य कदाचित्... भगवतः प्रभाम्	(कूर्मपुरा.१।१।५४–५५)	८
ता आप...अन्नाद्यं जायते	(छान्दो.उप.६।२।४)	३०३
ता आपः ऐक्षन्त	(छान्दो.उप.६।२।४)	४७२,४९२
ताच्छील्यवयोवचनशक्तिष्विति...	(पाणि.सू.३।२।१२९)	२८
तानि अहं वेद सर्वाणि...	(भग.गीता ४।५)	२४७
तान् आनयध्वम् असतो...	(भाग.पुरा.६।३।२९)	९१
तान् शिष्यान्... पैलपूर्वकान्	(कूर्मपुरा.१।३४।१६–१८)	६९
तामसा देवि निरय...	( )	१७४
तामसानि च... समाचक्ष्व सुरेश्वरः	(पद्मपुरा.६।२३६।१)	१७३
तालवेणु–मृदङ्गादिध्वनियुक्तान्...तिष्ठामि नारद’	(पद्मपुरा.६।९२।२१)	५३
तासु योनिषु	(कूर्मपुरा.१।३०।३०)	१६५,१६८
तिष्ठतिक्रिया इति... इति भावः	(पाणि.सू.वा.३।२।१२६)	१५६
तिष्ठन् मूत्रयति... क्रियायाः लक्षणम्	(पातं.महाभा.३।२।१२६)	१४४
तिष्ये मायाम्... तमसा व्याकुलीकृताः	(कूर्मपुरा.१।३०।१)	६६,७०,१४६,१४८
तिस्रएव परस्परमिश्रणात्...	( )	३९३
तीर्थादावपि या... इति विनिश्चयः	(त.दी.नि.१।४७)	४१८,४२१
तुशब्दः... वृश्चिकादीनाम् उत्पत्तिः’...	(ब्र.सू.शां.भा.२।१।६)	२७५
तुल्यं च साम्प्रदायिकम्	(जै.मी.सू.१।२।८)	२१३
तुल्यास्यप्रयत्नं सवर्णम्	(पाणि.सू.१।१।९)	४८२

तुष्यतु दुर्जनः (लौकि.न्या.सा.१८१) ९४
तृजकाभ्यां कर्तरि... (पाणि.सू.२।२।१५) २८
तृतीयं भागम् आयुषः... (मनुस्मृ.६।३३) १९
तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां... (पाणि.सू.बा.म.६।४।१) १२३
ते ध्यानयोगानुगताः अपश्यन् (श्वेता.उप.१।३) ३२०
ते नाधीतश्रुतिगणाः (भाग.पुरा.११।१२।७) ३००,३०२
तेषां लिङ्गाद् महादेवः... भक्तवत्सलः (कूर्मपुरा.१।३२।१७) ६८
तेषां सर्वेषु लोकेषु... (छान्दो.उप.७।२५।२) ३९२
तेषामेव अनुकम्पार्थम् अहम्... (भग.गीता १०।११) २८७
तेषाम् अहं समुद्धर्ता... (भग.गीता १२।७) २८७
त्यक्त्वा संगान् (मनुस्मृ.६।३३) १९
त्यदादिषु दृशो नालोचन (पाणि.सू.३।२।६०) ३९१

त्र

त्रयं वा इदं नाम–रूप–कर्म प्राणः छन्नः (बृह.उप.१।६।१–३) ३९८
त्रयाः प्राजापत्याः (बृह.उप.७।२) १७४
त्रयाणाम् आनुलोम्यं... यो गृहाश्रमम् आस्थाय... (दक्षस्मृ.१।१।१०) २२
त्रिदण्डम् एकदण्डं वा व्रतम्... स्थिरी भवेद् ( ) ३१
त्रिदण्डेन यतिश्चैव... ( ) ३०
त्रिविधा जीवसंघास्तु (नारदपञ्च.) १७४
त्रिविधा जीवसंघास्तु (बृह.उप.५।२।१) ४६६
त्रिविधा भवति श्रद्धा... (भग.गीता १७।२) १७४
त्रीणि रूपाणि इत्येव सत्यम् (छान्दो.उप.६।४।१) ३८२
त्रीन् वैणवान् दण्डान्... (द्र.याज्ञ.स्मृ.मिता.३।४।५८) २९
त्वंहि सा... परंब्रह्म सनातनम् (कूर्मपुरा.१।१२।२११–२१५) ४५५
त्वञ्च रुद्र! महाबाहो!... (वारा.पुरा.७०।३६) ८१,९५

त्वदीयौ हस्तौ शरणाः... उपतिष्ठेम सेवेमहि
(ऋक्.संहि.सा.भा ६।४७।७–८) ३५१
त्वन्तु सर्वं परित्यज्य... (भाग.पुरा.११।७।६) ३५५
त्वमेकएव अस्य सतः... (भाग.पुरा.१०।२।२८) ३५३
त्वम् अक्षरं परमं... तत्परं यत् (भग.गीता ११।१८) ४९४
त्वम् एकएव अस्य... (भाग.पुरा.१०।२।२८) ३५८

त्वयि अग्र आसीत्... परः परस्माद्	(भाग.पुरा.८ ।६ ।१०)	१९४,१९६,३५३,३७९
त्वष्टा रूपाणाम् अधिपतिः	(तैत्ति.आर.२ ।११ ।२)	३९९
त्वष्टारं रूपाणि विकुर्वन्तं विपश्चिं	(शतपथ.ब्रा.१ ।४ ।३ ।१७)	३९९
त्वां सदा परिचिन्तयन्...	(भग.गीता १० ।१७)	३२७
त्वामेव अन्ये शिवोक्तेन...	(भाग.पुरा.१० ।३७ ।८)	४५५

द

दक्षः एको भिक्षुः... न संशयः	(याज्ञ.स्मृ.मिता.३ ।४ ।५८)	४२
दक्षः उवाच नहि... न उपपद्यते	(कूर्मपुरा.१ ।१५ ।११)	११९
दक्षः उवाच य एते... भूयएव हि	(कूर्मपुरा.१ ।१५ ।१७–१९)	१२०
दक्षः उवाच सर्वेष्वेव हि... न इज्यते	(कूर्मपुरा.१ ।१५ ।८)	११७
दक्षः उवाच य एते... विद्यते रविः	(कूर्मपुरा.१ ।१५ ।१७)	११७
दक्षो यज्ञेन यजते पिता मे पूर्वजन्मनि	(कूर्मपुरा.१ ।१५ ।३५)	९३
दण्डम् आच्छादनं..	(आरुणि.उप.१)	३५
ददतुः तौ बलिं चैव	(मार्क.पुरा.१३ ।९)	९४
दद्याद् माता पिता...	(याज्ञ.स्मृ.मिता.२ ।८ ।१३०)	२३
दधिक्षीरगोमय...	(द्र.लौ.न्या.साह.८७०)	२८७
दधीचः उवाच किं... त्रयीमयम्	(कूर्मपुरा.१ ।१५ ।१३–१६)	१२०
दर्शनकार्यावसानः... स मोक्षः इति	(पातं.यो.सू.भा. २ ।२३)	१३७
दर्शपूर्णमासाभ्याम् इष्ट्वा...	( )	२५
दश शैवपुराणानि सात्त्विकानि...	( )	१७६
दशभ्यस्तु प्रचेतोभ्यो... अभवद्	(कूर्मपुरा.१ ।१४ ।५४–५५)	११८
दारवं वैणवं वापि... कन्थां शीतनिवारिणीम्	( )	३९
दिवञ्च पृथिवीञ्च अन्तरिक्षम्...	(ऋक्.संहि.८ ।८ ।४८)	४४०
दिवा ब्राह्मणो गायेद...	(तैत्ति.ब्रा.३ ।९ ।१४ ।५४)	५३
दिव्यं ददामि ते चक्षुः	(भग.गीता.११ ।८)	४२७
दुःख–जन्म–प्रवृत्ति–दोष–... अपवर्गः	(गौ.न्या.सू.१ ।१ ।१२)	१३६
दुःखोदर्केषु कामेषु... गुरुम् आदृतः	(भाग.पुरा.११ ।१८ ।३८–३९)	३६
दुग्धं विहाय रुधिरं...	(द्र.श.कल्प)	१८३
दृढाहन्तास्पदं देहं...क्षणिके वृथा	(वेदा.चिन्ता.४ ।३९–४१)	३५४
दृशेः क्वनिप्	(पाणि.सू.३ ।२ ।९४)	११६
दृश्यते तु	(ब्र.सू.२ ।१ ।६)	२२९,२७५,२७६,३६८,४६७

दृश्यते हि (ब्र.सू.शां.भा.२।१।६) २७४

दृश्यतेतु अग्र्यया बुद्ध्या (कठोप.१।३।१२) ४२६

दृष्टम् अनुमानम्... प्रमेयसिद्धिः प्रमाणाद्धि (सां.त.कौ.४) २०७

दृष्टवान् असि... विदितं त्वया (कूर्मपुरा.१।३०।६०–६१) ६७

दृष्ट्वा देवकुलं... न इज्यते (कूर्मपुरा.१।१५।६–८) ११९

देवः क्षेत्रेषु एवम् अजः... (ब्रह्मबिन्दु उप.१२) ४६७

देवदत्तो लक्ष्यते इति... (पातं.महाभा.प्र.३।२।१२६) १५५

देवम् ईशानम् (कूर्मपुरा.१।२७।१८) ८४,९१

देवा ऊचुः प्रमाणं वो न... (कूर्मपुरा.१।१५।५४) १२७

देवाः नारायणांगजाः... (भाग.पुरा.२।५।१५) २८३

देवाः महर्षयश्च आसन्... वृणोमि अहम् (कूर्मपुरा.१।१५।३६) १२६

देवात्मशक्तिं स्वगुणैः निगूढाम् (श्वेता.उप.१।३) ४६२

देवान् पितॄन् समभ्यर्च्य... न दोषभाक् (कुला.त.उल्ला.५।८९) १०८

देवीशापविनिर्दग्धा (कूर्मपुरा.१।३०।२७) १२६,१२८

देव्युवाच दक्षो यज्ञेन... चापि शंकर (कूर्मपुरा.१।१५।३५) १२५

देशकालौ विषयसन्निधिः... (ब्र.सू.भा.प्र.३।२।३) ३४८

देहिनां देहसंयोगाद् द्वन्द्वान्... (भाग.पुरा.६।१७।२९) ३०७

दैवी संपद् विमोक्षाय (भग.गीता १६।५) १६१

दैवी ह्येषा... तरन्ति ते (भग.गीता ७।१४) ४४७

द्रव्य–गुण–कर्म–सामान्य... (वैशे.सू.१।१।४) २०६

द्रव्यं वयः कर्मगुणान्... (भाग.पुरा.८।५।४३) ३२१

द्रव्यगुणसंस्कारेषु बादरिः (जै.मी.सू.३।१।३) ४९८

द्रव्यात्मानः त्रयः... पूर्वेभ्यः आगम (वा.प्र.३।१४।२०) १९३

द्रष्टृदृश्ययोः संयोगो हेयहेतुः (पातं.यो.सू.२।१७) १३७

द्वा सुपर्णा (श्वेता.उप.४।६) ३३८

द्वादशे समतिक्रान्ते... इदं वचः (महाभा.३।३००।५–९) ३४६

द्वादशैते विजानीमो (भाग.पुरा.६।३।२१) १९८

द्वापरेऽपि अथ (कूर्मपुरा.१।२८।४२) १४७

द्वापरेऽपि अथ... सत्त्वानाम् अविनिश्चयम् (कूर्मपुरा.१।२९।४३) १४६

द्विः ऐन्द्रवायवस्य भक्षयति... (जै.मी.सू.भाट्टदी.३।५।१८) २२३

द्वितीयमौर्वीमिव कार्मुकस्य...वपुर्विरूपाक्षम् अलक्ष्यजन्मता
(काव्यप्र.७।५१।१६१–१६२) २२७

द्विधा इतं द्वीतं... (शु.मा.प्र.४) २००

द्विधा ज्ञानन्तु... ततो अन्यथा (शु.मा.३–४) १८२,१८५

द्विधा समभवद् बृहत् (भाग.पुरा.११।२४।३) ४६२
द्विधाज्ञानम्... (शु.मा.४) २०३
द्विषन्तो देवम्... द्विजोत्तमैः (कूर्मपुरा.१।२७।१८) ८२,९१,१५३,१६८
द्वैत शब्देनच द्वाभ्यां... अद्वैत शब्देन (ल.मञ्जू.बौ.नि.) २०९
द्वैपायनात् शुको जज्ञे... परमं पदम् (कूर्मपुरा.१।१९।२५) ६२
द्वौ ज्ञाज्ञौ ईशानीशौ (श्वेता.उप.१।९) ४६६

ध

धर्म–धर्मि–विचारेऽपि... श्रीविद्वन्मण्डने स्फुटम् (शु.मा.५०–५१) ४५०
धर्मं जैमिनिरतएव (ब्र.सू.३।२।४०) २८०,२८२,२८४,२९५
धर्मजिज्ञासायाः प्रागपि... (ब्र.सू.शां.भा.१।१।१) २५
धर्मविशेषप्रसूताद् द्रव्य–... तत्त्वज्ञानाद् निःश्रेयसम् (वैशे.सू. १।१।४) १३५,१३८,१८८
धर्मान् वेदनिदर्शनाद् (कूर्मपुरा.१।३०।३५) ५७
धर्मार्थानां प्रवक्तारोहि... कलियुगेऽपि वा (कूर्मपुरा.१।५१।१–२) ७२
धर्माविरुद्धो भूतेषु कामो... (भग.गीता ७।११) ४५३
धाता यथा पूर्वम् अकल्पयद् (ऋक्.संहि.१०।१९०।३/तैत्ति.आर.१०।१।१४) २६५,४२८,४३१,४४०
धातूपात्तक्रिये नित्यं कारके... ( ) २८८
धिग् जन्म नः त्रिवृद्विद्याम् (भाग.पुरा.१०।२०।३९) ११०
ध्रुवम् अपाये (पाणि.सू.१।४।२४) २८९

न

न अध्येतव्यं न वक्तव्यं... भवति नेतर (कूर्मपुरा.२।२८।१३) ३४
न अनवाप्तम् अवाप्तव्यम् (भग.गीता ३।२२) २७५
न अनुमानम् अतच्छब्दाद् (ब्र.सू.१।३।३) ४८६
न अन्तो अस्ति... (भग.गीता १०।४०) ३२७
न अन्यत् पश्यामि... कलौ युगे (कूर्मपुरा.१।२९।३) ६६
न अन्यो...अस्ति विज्ञाता (बृह.उप.३।६।२३) ३०३
न अयं जनो... (भाग.पुरा.११।२३।४३) ३०५
न अर्चयन्ति इह ये रुद्रम् (कूर्मपुरा.१।३०।४३) ६८

न अविद्या अनुभवात्मनि... (नृ.उ.उप.९) ४६२
न अविमुक्तमृत:... परां गतिम् (द्र.कूर्मपुरा.१।३१।३४) ४१५
न असच्छास्त्रेषु... अनारभेत् क्वचित् (भाग.पुरा.७।१३।७–८) ३४
न असतो विद्यते भावः (भग.गीता २।१६) ४४८
न असद् आसीद् ... किन्तु तम: (ऋक्.संहि.१०।११।१२९।१) ३५६, ३५७,४२७,४२९,४९६
न असद् आसीद्... (तैत्ति.ब्रा.२।८।९।३) ४३३
न असद् आसीद्... सर्वमा इदम्. (तैत्ति.ब्रा.२।८।९।४) ३५८
न अहं प्रकाश: सर्वस्य... (भग.गीता ७।२५) ४६६
न आद्य:, सत्त्वमात्राधारे... साध्यवैकल्यात् च (अद्वै.सि.परि.१) १३२
न आरम्भान् आरभेत्... (भाग.पुरा.७।१३।८) ४९
न आश्रम: कारणं धर्मे... (याज्ञ.स्मृ.३।४।६५) ३१
न इतरो अनुपपत्ते: (ब्र.सू.१।१।१६) २५६
न इह नाना अस्ति किञ्चन (बृह.उप.४।४।१९) ३८३
न एषा परावरमति:... (भाग.पुरा.९।७।२७) ३०७
न कृत्स्नब्रह्मवृत्ति:... वदति श्रुति: (पञ्चद.२।५४–५५) २०९
न केवलं प्रधाने... चर्चोविचार: (पातं.यो.सू.वा.२।२३) १३८
न च पुनरावर्तते (छान्दो.उप.८।१५।१) ४४२
न तत्र रथा: न रथयोगा: (बृह.उप.४।३।१०) २५७,३३३,३४७
न तथात्वं वक्तुं... गुणातीतमेव कर्तृ (ब्र.सू.भा.१।१।५) ४७७
न तद् भासयते सूर्य: (भग.गीता१५।६) ४
न तस्य कश्चिद् दयित:... (भाग.पुरा.६।१७।२२) ३०७
न तस्य कश्चिद्... (भाग.पुरा.१०।३५।२२) ३०४
न तस्य कार्यं... (श्वेता.उप.६।८) २७५,२९३,४५४
न तस्य कालावयवै:... (भाग.पुरा.१२।४।१९) ४
न तस्य देवाश्च... (बृह.उप.१।४।१०) ४०९
न तीर्थवासी नित्यं... ( ) ३६
न तेषां पुनरावृत्ति: कल्पकोटिशतैरपि (स्कन्दपुरा.२।३।७।३४) ४१९
न त्वत्समो अस्ति... (भग.गीता ११।४३) ३२५
न दण्डं न शिखां न... (परमहंस.उप.२) ३५
न धर्मस्तु मया... नरकं गत: (पद्मपुरा. ६।१२७।१३८–१३९) ४१५
न प्रयोजनवत्त्वाद् (ब्र.सू.२।१।३२) २८२

न बहुव्रीहौ	(पाणि.सू.१।१।२९)	११६
न भावो अनुपलब्धेः	(ब्र.सू.२।२।३०)	४२७,४३७
न भावो वासनानाम्... वासनाः भवन्ति	(ब्र.सू.शां.भा.२।२।३०)	४३७
न मन्त्राः भार्यया सार्धम्	(कूर्मपुरा. १।१५।८)	१००,१११
न मां कर्माणि...	(भग.गीता ४।१४)	३०८
न मे नारायणाद् भेदो... विष्णुः परमेश्वरः	(कूर्मपुरा.१।१।५९)	८
न मे मोक्षो न बन्धनम्	( )	५०९
न यत्र कालो...	(भाग.पुरा.२।२।१७)	३२२
न यत्र सूर्योभाति...इदं विभाति	(मुण्ड.उप.२।२।१०)	३
न यद् इदम् अग्र आस...	(भाग.पुरा.१०।८४।३७)	७८
न लिङ्गं धर्मकारणम्...	(मनुस्मृ.६।६६)	३०,४९
न वक्तव्यम्... आसनक्रियायाः लक्षणम्	(पाणि.सू.वा.३।२।१२६)	१५६
न वियद् अश्रुतेः	(ब्र.सू.२।३।१)	३२३
न विलक्षणत्वाद् अस्य...	(ब्र.सू.२।१।४)	२७५,२७६,३४९
न वेदबाह्ये पुरुषे... विनिर्बभौ	(कूर्मपुरा.१।१६।११५)	१०१
न शोचति न कांक्षति	(भग.गीता.१८।५४)	४०९,४१९
न स पुनरावर्तते	(निरा.उप.१५।६)	४२९
न संदृशे तिष्ठति रूपम् अस्य	(श्वेता.उप.४।२०)	४००
न साधुना कर्मणा...	(कौषी.ब्रा.३।९)	२९३,३०८
न साङ्ख्यपरिकल्पितम्... अशब्दंहि तद्	(ब्र.सू.शां.भा.१।१।५)	१५०
न स्तुवीत न निन्देत...	(भाग.पुरा.७।१४।४२)	२८१
नखच्छेद्ये किं कुठारप्रहारेण	( )	४२१
नग्नः कपाली विदितो...	(कूर्मपुरा.१।१५।११)	१२४
नच उत्पातनिमित्ताभ्यां... लिप्सेत कर्हिचित्	(मनुस्मृ.६।५०)	४१
नच अभावयतः शान्तिः...	(भग.गीता२।६६)	३
नच अशुश्रूषवे वाच्यम्...	(भग.गीता१८।६७)	२७
नच प्रधानवद्... साक्षात्प्रतिपादनाद्	(पातं.यो.सू.भा.तत्त्व.२।२२)	१३८
नच मां तानि कर्माणि	(भग.गीता ९।९)	३०८
नच वेदादृते किञ्चिद्... एषां भवान्तरे	(कूर्मपुरा.१।१२।२६०–२६३)	११४,१६९
नच स्मार्तम् अतद्धर्माभिलापाद्...	(ब्र.सू.१।२।१९)	१५३
नतु कारणाद् व्यक्तिभेदापादक	(शु.मा.प्र.४१)	३७८
नतु मां शक्यसे द्रष्टुम्... योगम् ऐश्वरम्	(भग.गीता.११।८)	४२७
नतु लिङ्गन्तु वैणवं तेषां...	( )	३१

ननु क्रिययोरेव... इति बोध्यम्	(पाणि.सू.वा.३ ।२ ।१२६)	१५६
ननु पदम् इत्यत्र...	(पाणि.सू.त.बो.३ ।३ ।१२५)	६४
ननु च भोः...प्रधानम् ? कर्ता	(पातं.महाभा.१ ।४ ।२३)	२९०
ननु देहस्य कर्मजन्यत्वात्... तथा वक्ष्यते	(ब्र.सू.अणुभा.४ ।१ ।१५)	४०६
ननु वैषम्य–नैर्घृण्ययोः... निवारयति	(ब्र.सू.भा.२ ।३ ।४२)	२९८
ननु सम्यग् अनुवृत्तत्वम्... अवगम्यतएव इति अर्थः	(ब्र.सू.भा.प्र.१ ।१ ।३)	४८८
नभस्वद्–वात–पवन–पवमान–प्रभञ्जनाः	(अम.को.१ ।१ ।१४६)	१२
नभावो अनुपलब्धेः	(ब्र.सू.२ ।२ ।३०)	३९२
नमस्कृत्यहि वसीयांसम् उपचरन्ति	(तैत्ति.संहि.५ ।४ ।४ ।५)	७
नमि कम्पि...	(पाणि.सू.३ ।२ ।१६७)	३३७
नमुच्याद्याः महादैत्याः पुरा...	(पद्मपुरा.६ ।२३५ ।१९)	८०
नमो ब्रह्मणे... प्रत्यक्षं ब्रह्मवदिष्यामि	(तैत्ति.उप.१ ।१)	१३
नमो भगवते तस्मै	(त.दी.नि.१ ।१)	७
नमो रुद्राय महते	(कूर्मपुरा.१ ।३० ।४४)	६६
नमोस्तु अनन्ताय सहस्रमूर्तये...	( )	४००
नष्टे जलपवित्रे वा... त्रिदण्डकम्	( )	३०
नहि अयं शंकरो रुद्रः... न उपपद्यते	(कूर्मपुरा.१ ।१५ ।११)	१००
नहि अस्ति द्वैतसिद्धिः...	(नृ.उ.उप.९)	४६३
नहि अस्य अस्ति प्रियः...	(भाग.पुरा.६ ।१७ ।३३)	३०७
नहि आसनं वृद्धेः...	(पातं.महाभा.प्र.३ ।२ ।१२६)	१५६
नहि इदं सर्वं कदाचित्	(नृ.उ.उप.९)	४६५
नहि उपाधेः उपाधिः...	(पातं.महाभा.१ ।३ ।२)	६५
नहि कश्चित् क्षणमपि...	(भग.गीता ३ ।५)	२५७
नहि क्रियाविनिर्मुक्तं...	(पाणि.सू.महाभा.)	४३०
नहि वां विषमादृष्टिः...	(भाग.पुरा.१० ।३८ ।४७)	३०७
नाकस्य पृष्ठे ते... च आविशन्ति	(मुण्ड.उप.१ ।२ ।१०)	२६
नागृहीतविशेषण...	(लौकि.न्या.सा.४ ।६१)	१९२
नाग्नेर्हि तापो न हिमस्य...	( )	५०९
नात्मा अश्रुतेः नित्यत्वाच्च...	(ब्र.सू.२ ।३ ।१७)	५०४
नानुभूय न जानाति...	(भाग.पुरा.६ ।५ ।४१)	३३
नान्यः पन्थाः	(पु.सू.७)	४०९
नापृष्टः कस्यचिद् ब्रूयाद्...	(मनुस्मृ.२ ।११०)	१४७
नाभावः उपलब्धेः	(ब्र.सू.२ ।२ ।२८)	३८५,३८६,३९१

नाभ्यसेद् बहून् शब्दान्...	(बृह.उप.४।४।२१)	३४
नाम–रूपविभेदेन जगत् क्रीडति यो यतः	(त.दी.नि.१।१)	३९६
नाम–रूपे व्याकरोत्	(छान्दो.उप.६।३।३)	४०१
नामधेयमात्रं हि एतद् अनृतम्	(ब्र.सू.शां.भा.२।१।१४)	३७८
नामरूपाद् विमुक्तः	(मुण्ड.उप.३।२।८)	३९७
नामरूपे व्याकरवाणि	(छान्दो.उप.६।३।२–३)	३९७,४०१
नामानि अनन्तस्य यशोमितानि...	(भाग.पुरा.१।५।११)	५४
नामानि सर्वाणि यम् आविशन्ति	(द्रष्ट.ब्र.सू.माध्वभा.१।१।२२)	४००
नामैव एनं न...	(महाना.१९।२)	३९८
नायं प्रसज्यप्रतिषेधो... न व्यापार:	(पातं.महाभा.१।१।४३)	१८६
नायं श्रियो अङ्ग उ...	(भाग.पुरा.१०।४४।६०)	७
नारायणपराः सर्वे...स्त्रजिवत् कृतः	(भाग.पुरा.६।१७।२८–३०)	३०६
नित्यानित्यवस्तुविवेकः..तेषामेव आनन्तर्यम्	(ब्र.सू.शां.भा.भाम.१।१।१)	२६
निन्दन्ति इह ऐश्वरं मार्गम्	(कूर्मपुरा.१।१५।३०)	१२५
निन्दन्ति च... विनिन्दन्ति हृषीकेशम्	(कूर्मपुरा.१।३०।२८–३०)	९५,१००
निन्दन्तो वैदिकान्... हरिम्	(कूर्मपुरा.१।१५।२०–२१)	१२१
निपातस्तु स्वरूपेणैव... वृद्धिरादैच्	(पातं.महाभा.१।१।१)	५९
निरञ्जन: परमं साम्यम् उपैति	(मुण्ड.उप.३।१।३)	४०४
निर्दोषं हि समं ब्रह्म	(भग.गीता ५।१९)	३०४
निर्दोषपूर्णगुणविग्रह: आत्मतन्त्रो...	(महाभा.ता.नि.१।११)	२४६
निर्मातारं च एके पुत्रादयश्च	(ब्र.सू.३।२।२)	३४७
निशम्य भगवान्... नीललोहितान्	(कूर्मपुरा.१।७।२९)	६२
निषिद्धभक्षणं जैह्व्यम्... सुरापानसमानि तु	(याज्ञ.स्मृ.३।४।२२९)	३७,१०६,१०९
निष्कलं निष्क्रियं शान्तं...	(श्वेता.उप.६।१९)	४७९
निष्पत्तिमात्रे कर्तृत्वं...	(वाक्प.साधन.१८)	२८९
नीलं महत्... अबाधितत्वे व्युत्पन्नः	(तैत्ति.उप.शां.भा.२।१।१)	२०५
नेह नाना	(बृह.उप.४।४।१९)	३८०
नेह नानास्ति	(कठोप.२।१।११, बृह.उप.४।४।१९)	३७१
नेह नानास्ति किञ्चन	(कठोप.२।१।११)	२०३
नैमिषेया ऊचु... मुनिपुंगवा	(कूर्मपुरा.१।१५।१–५)	११९
नैम्बार्काः भास्कराः भिक्षुः	(शु.मा.४५)	३०३
नो सदासीद्	(तैत्ति.ब्राह्म.२।८।९।३)	४५०,४५७
न्यग्रोधफलम् अदः आहरः	(छान्दो.उप.६।१२।१)	४६५

प

पक्षतावच्छेदकसामानाधिकरण्येन... ( ) १४३
पञ्च पञ्चनखाः भक्ष्याः (रामा.४।१७।३९) २७८
पञ्चम्याः तसिः (द्र.पाणि.सू.५।४।४४) ४७५
पञ्चावयवाद्... न्यायत्वम् (चिन्ता.अव.प्रक.) ९७
पतिलोकम् अवाप्नोति ( ) ४१९
पत्या श्रीरिव मोदते (भाग.पुरा.७।११।२९) ४१४
पत्युः असामञ्जस्याद् (ब्र.सू.२।२।३७) २९७,३०४,३०८,३०९
पदं शब्देच... स्थानत्राणयोः अंकवस्तुनोः ( ) ५०४
पदम् अवभाति भूरि (ऋक्.संहि.२।२।२४।६) ३
परं ज्योतिरुपसम्पद्य (छान्दो.उप.८।३।४) ३
परतन्त्रप्रज्ञास्तु प्रायेण जनाः (ब्र.सू.शां.भा.२।१।१) १५०
परमं रूपम् ऐश्वरम् (भग.गीता ११।३,११।९) ३२५
परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः (ब्र.सू. ३।२।३१) ३,२६१,२८२
परम्परासम्बन्धस्यापि क्रियान्वयित्व– ( ) ५००
परस्परव्यपेक्षां सामर्थ्यम् एके (पाणि.सू.वा.२।१।१) २१४
पराऽस्य शक्तिः... ज्ञान–बल–क्रिया च (श्वेता.उप.६।८) २०१,२१०,२२८,२५६,२६१,४५३,४४९,४५४,४५८,५०८
पराच्छिवपराद् उर्ध्वं... दुःखसागरे ( ) ४१९
परात्तु तच्छ्रुतेः (ब्र.सू.२।३।४१) २५७,२८६,२९३,२९५,३०३,४३०,४३८,४७०
परात् परतरं यान्ति नारायणपरायणाः (कूर्मपुरा.१।२७।१३) ९८
पराभिध्यानात्तु (ब्र.सू.३।२।५) २५२
पराभिध्यानात्तु तिरोहितं... बन्ध–विपर्ययौ (ब्र.सू.३।२।५) ४३९,४४४,४४७
परिम्लानं पीनस्तनजघनसंगाद्... (रत्नावलि.२।११) ३८५
परीक्ष्य लोकान्... तत्त्वतो ब्रह्मविद्याम् (मुण्ड.उप.१।२।१२–१३) २४,२६
परीभावस्तिरस्क्रिया (अम.को.१।७।४५३) १७९
परेण स्थापितं वा न... (गौ.न्या.सू.भा.१।२।१९) २३८
परोक्षे धातौ परोक्षे...परोक्षायाम् (पातं.महाभा.३।२।११५) ५२
पश्यत इहापि सन्मात्रम्... (नृ.उ.उप.९) ४६४
पश्यति अचक्षुः सः शृणोति... (श्वेता.उप.३।१९) २४६
पश्यन्ति ते मे रुचिराणि... (भाग.पुरा.३।२५।३५) ४२७

पात्रे समितादयश्च	(पाणि.सू.२ ।१ ।४८)	५०३
पापं कृत्वा क्षेत्रमध्ये... मलावसाने	(ब्रह्मवै.पुरा.)	४१६
पापानि ये कुर्युः... मोचयसि प्रसीद	(सनत्कु.सं)	४१५
पारदार्यं पारिवित्त्यम्	(याज्ञ.स्मृ.३ ।५ ।२३५)	१०६,१०९
पारमार्थिकम् अद्वैतं... बिभेति कदाचन	(खं.खं.खा.१ ।२२)	२३१
पार्वती उवाच तामसानिच... निबोध मे	(पद्मपुरा.६ ।२३६ ।१–१३)	८१
पालय अद्य परं धर्म...	(कूर्मपुरा.१ ।२९ ।५)	६७
पाषण्डानाञ्च संलापं... भगवान्!	(पद्मपुरा.६ ।२३५ ।१)	७९
पाषण्डिनं विकर्मस्थं... एषः सुनिर्णयः	(पद्मपुरा.६ ।२३४ ।२६–२८)	७९
पिता गुरुः त्वं...	(भाग.पुरा.१० ।२४ ।६)	३२४
पिशाचः पिशाचभाषया	( )	३४१
पुंसि संज्ञायां घः प्रायेण	(पाणि.सू.३ ।३ ।११८)	६३
पुण्यो गन्धः पृथिव्यां च	(भग.गीता ७ ।९)	४५३
पुण्यो वै पुण्येन कर्मणा	(बृह.उप.४ ।४ ।५)	२७६
पुत्रः तस्याम् अमरेशेन..काष्ठकुड्योपमाः स्थिताः	(रामा.७।३५।५९–६३)	१३
पुनः प्राह च... पतति दारुणः	(कूर्मपुरा.१ ।१५ ।२५–२७)	१००,१२१
पुनर्दाक्रियाभावे मृतभार्यः... पन्थानम् आश्रयेद्	( )	२०
पुरग्रामव्रजान् सार्थान्..शुद्धसत्त्वशिलान्धसा	(भाग.पुरा.११।१८।२४–२५)	४२
पुरा दारुवने पुण्ये मुनयोः गृहमेधिनः	(कूर्मपुरा.१ ।१६ ।९७)	११३
पुराण–न्याय... धर्मस्य च चतुर्दशः	(याज्ञ.स्मृ.१ ।१ ।३)	१७१,१७२,१७३
पुराणं वेदसम्मितम्	(ब्रह्मपुरा.१ ।२९)	१७४
पुराणसंहितां दिव्यां...	(भाग.पुरा.८ ।२४ ।५५)	१७५
पुरि लुङ् चास्म	(पाणि.सू.३ ।२ ।१२२)	९४
पुरुरूपः ईयते इति...	(शु.मा.प्र.२२)	३४१
पुरुषः स परः पार्थ...	(भग.गीता८ ।२२)	४
पुरुषः स्वामी दृश्येन... सो अपवर्गः	(पातं.यो.सू.भा.२ ।२३)	१३५,१३७
पुरुषएव इदं सर्वं	(तैत्ति.आर.३ ।१२ ।१)	३२१,३४१,३९३,४५३,४९६
पुरुषाद् न परं किंचित्...	(कठोप.१ ।३ ।११)	३
पुरुषाश्मवद् इति चेत्...	(ब्र.सू.२ ।२ ।७)	२६६
पुस्तकप्रत्ययाधीतं... इव स्त्रिया:	(हितोप.३९)	१७७
पूर्णमदः...	(ईशा.उप.शां.पा)	३११

पूर्वन्तु बादरायणो हेतुव्यपदेशाद्	(ब्र.सू. ३।२।४१)	२८०,२९५,४३८
पूर्वम् इच्छारूपेण ततो...	(त.दी.नि.आ.भं.१।२५)	२६८
पूर्ववद् वा	(ब्र.सू.३।२।२९)	२६७
पूर्वावस्थातु मृद्रूपा घटावस्था...	(शु.मा.४१)	३७६
पृथिवी गन्धवती घटत्वाद्	( )	१४३
पृथिव्यादय: चत्वार: परमाणवो...	( )	१४३
पृथूदकादौ मरणं तदपि अत्यंतशुद्धिकृद्	(बृह.भा.वार्ति.)	४१७
पृष्टवान् प्रणिपत्य... युगधर्मान् सनातनान्	(कूर्मपुरा.१।२९।६-७)	१४५
पेयं मद्यं पलं खाद्यं... भुक्तिमुक्तिदम्	(कुला.त.उल्ला.२।११२-११३)	१०७
पौर्णमास्यां च... पयो अमावास्यायाम्	(कृ.यजु.२।५।३।२)	२८३
प्रकाशादिवद् न एवं पर:	(ब्र.सू.२।३।४६)	३०६,३११
प्रकाशाश्रयवद् वा तेजस्त्वाद्	(ब्र.सू.३।२।२८)	३,४५०,४५२
प्रकृतपुरुषस्तु मूलतएव...	( )	३५
प्रकृताद् अर्थाद् अप्रतिसम्बद्धार्थम्...	(गौ.न्या.सू.५।२।७)	१४७
प्रकृति: गुणसाम्यं स्याद्	(द्र.भाग.पुरा.११।२२।१२)	३३८
प्रकृतिर्हि अस्य उपादानम्	(भाग.पुरा.११।२४।१९)	३२४,३३८,३५४
प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधाद्	(ब्र.सू.१।४।२३)	१९४,२७८,३४०,३८०,३८४,४९०
प्रकृतिस्त्वां नियोक्ष्यति	(भग.गीता१८।५९)	आद्यप्र.८
प्रकृते: क्रियमाणानि गुणै:...	(भग.गीता ३।२७)	२९१
प्रकृते: गुणसाम्यस्य...	(भाग.पुरा.३।२६।१७)	३२४
प्रकृतैतावत्त्वंहि प्रतिषेधति...	(ब्र.सू.३।२।२२)	५
प्रचोदिता येन पुरा...	(भाग.पुरा.२।४।२२)	४०३
प्रचोदितो अहं कालेन...	(महाभा.१३।१।५१)	३२६
प्रजा सृज यथा... अनुशेरते	(भाग.पुरा.३।९।४३)	४४१
प्रजापति: अकामयत	(तैत्ति.संहि.३।१।१।१,७।१।१)	४९६
प्रजापति: अकामयत प्रजा:...	(तैत्ति.ब्रा.२।२।१।१)	४६९
प्रजापति: वा एषो... प्रजा: असृजत	(मैत्रा.उप.१।२।६)	२४२
प्रजायन्ते तत्रचैव अपियन्ति	(मुण्ड.उप.२।११)	२२९
प्रतिज्ञाहानि: अव्यतिरेकाद्...	(ब्र.सू.२।३।६)	३२२
प्रतिज्ञाहानि: प्रतिज्ञान्तरं... निग्रहस्थानानि	(गौ.न्या.सू.५।२।१)	१३६
प्रतिज्ञाहानि: प्रतिज्ञान्तरं...प्रभृति	(गौ.न्या.सू.५।२।१)	१४७

प्रतियोगिनिरूपणाधीननिरूपणत्वाद्… (द्रव्यकि) १८९
प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि (गौ.न्या.सू.१।१।३) १३६
प्रत्यक्षेतु रजतं न… बुद्धिरेव करणम् (सुबो.१०।८४।३७) ३४५
प्रथमः प्रकृतेः हंसः… कल्पतां मनुः (कुला.त.उल्ला.६।४७–४८) १०८
प्रथमंहि मया… कणादेनतु सम्प्रोक्तम् (पद्मपुरा.६।२३६।४) १७३
प्रथमभक्षः इति… सिद्धं भवति (जै.मी.सू.भाट्टदी.३।५।३१) २२४
प्रथमाद् आश्रमाद् … संगान् परिव्रजेद् ( ) २०
प्रद्विषन्तो अभ्यसूयकाः… (भग.गीता१६।१८) १३
प्रधानम् अचेतनं सत्… (ब्र.सू.शां.भा.१।१।६) १५०
प्रपञ्चेन रमणेच्छयाहि…विधि–निषेधवैयर्थ्यं (द्र.शु.मा.प्र.४७.) २९६
प्रमाण–प्रमेय–संशय–… निःश्रेयसाधिगमः (गौ.न्या.सू.१।१।१) १३६
प्रमादमोहौ तमसो… (भग.गीता.१४।१७) ३४५
प्रयत्नपर्यन्तं जीवकृत्यम्… तथैव कारयति (ब्र.सू.भा.२।३।४२) २९८
प्रवृत्तिं च निवृत्तिं च… (भग.गीता १८।३०) ३४४
प्रसादयामास च… दक्षस्य अमिततेजसः (कूर्मपुरा.१।१५।७०–८०) १२९
प्राक् शरीराद्युत्पत्तेः… अन्यत्र उपपद्यते (ब्र.सू.शां.भा.१।१।१६) २५६
प्रागन्यतः शक्तिलाभाद्…कर्तुः उच्यते (वाक्प.साध.१०१–१०२) २८८
प्रागभावादयो न अंगीकार्या… अखिलम् (शु.मा.१७) १९३,४४८
प्राजापत्यां निरूप्य इष्टिम्… ब्रह्माश्रम उपाश्रयेद् (कूर्मपुरा.२।२८।४) १८
प्राणन्नेव प्राणो नाम… (बृह.उप.१।४।७) २६१
प्राणभृच्च (ब्र.सू.शां.भा.१।३।४) २५६
प्राणयात्रिकमात्रः स्याद्… (मनुस्मृ.६।५७) ३८
प्राणापान–निमेषोन्मेष–… लिङ्गानि (वैशे.सू.३।२।४) १३९
प्राणिनां कृताकृतं सर्वं… (विष्णुस.ना.शां.भा.३५।१९९) २४६
प्राणो वा अमृतं नाम–रूपे सत्यम् (बृह.उप.१।६।३) ४००
प्राप्ते कर्मणि नानेको… (तन्त्रवा.२।२।६) ३४२,३५०
प्रायेण मुनयो राजन् !… (भाग.पुरा.२।१।७) २९४
प्रीत्यप्रीतिविषादात्मकाः… विमुखो भवेद् (भाग.पुरा.४।२।२१) ९२
प्रीयते अमलया भक्त्या… (भाग.पुरा.७।७।५२) ४
प्रेक्षा उपलब्धिः चित् संविद (अम.को.१।५।१) ८
प्रैतुहोतुः चमसः प्रब्रह्मणः… (जै.मी.सू.शा.भा.३।५।३३) २२३
प्रोच्यते भगवान्… अखिलं जगद् (कूर्म.पुरा.१।१२।१५–१६) ४५४
प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् (मुण्ड.उप. १।२।१३) ४१३
प्लवाः ह्येते अदृढाः… (मुण्ड.उप.१।२।७) २६

फ

फलम् अतः उपपत्तेः (ब्र.सू.३।२।३८) ७६,२४५,२७१,२७९,२८०,३२७,३६०

ब

बन्धो अस्य अविद्यया अनादिः (भाग.पुरा.११।११।४) ४२८,४३०,४३८
बर्हापीडम् (भाग.पुरा.१०।१८।५) ८
बलं बलवतां च अहं (भग.गीता ७।११) ४५३
बलाद् आपतितो मायावादः... (पञ्चद.६।२३२) १५०
बहु स्यां प्रजायेय (छान्दो.उप.६।२।३) २३४,२५३,२५५,२९८,३८१,३९७
बहु स्याम् (तैत्ति.उप.२।६) ३१७,३२३
बहुलम् अन्यत्रापि (पाणि.सू.सि.कौ.२।४।७६) ६,१२
बहुव्रीहौ इदम्... क्रियागणने (पाणि.सू.६।२।१६२) ५०१
बहुव्रीहौ किम् अनेन..योगविभागात् समासः (पाणि.सू.सि.कौ.६।२।१६२) ५०१
बहुव्रीहौ सक्थ्यक्ष्णोःस्वाङ्गात्... (पाणि.सू.५।४।११३) ११६
बहूनां वृत्तिधर्माणां... तद् इतिस्थितिः (वै.भू.३२–३३) २२१
बाढम् इति... स्वीकृता (कूर्मपुरा.१।१५।१८) १००
बीजं मां सर्वभूतानां... (भग.गीता ७।१४) ४६५
बीजजाग्रत् तथा जाग्रत् ... ( ) ३९३
बुद्धावतारेतु अधुना... (त.दी.नि.१।१५) ८१
बुद्धियुक्तो जहाति इह... (भग.गीता २।५०) २९४
बुद्धिस्वरूपमेकंहि...बुद्धितत्त्वं परंहि नः (द्र.सर्वदर्शनसंग्रहः.बौद्ध.पृ.३०) ३८७
बुद्धेः वृत्तिः स्थितिः... (त.दी.नि.२।१३७) २५५
बुद्धोनाम्ना जिनसुतः... (भाग.पुरा.१।३।२४) ९१
बुधो वृद्धौ पण्डितेऽपि... (अम.को.३।३।५५३) ११
ब्रह्म तं परादाद् यो... (बृह.उप.२।४।६) १७९,१९६
ब्रह्म पुच्छं प्रतिष्ठा (तैत्ति.उप.२।५) १९८,४९४
ब्रह्म वनं ब्रह्म स... भुवनानि धारयन् (तैत्ति.ब्रा.२।८।९।६) ४३३,४३५
ब्रह्म वा इदम् अग्रे... (बृह.उप.१।४।१०) २५५
ब्रह्म ह वा इदम् अग्रे... द्वितीयं देवनिर्ममे (गोपथब्रा.१।१।१) २४३,४३३
ब्रह्म–विष्णु–शिवरूपिणा... (नृ.उ.उप.९) ४६६
ब्रह्म–विष्णु–शिवाः... प्रोक्ताः (सि.मु.१०) ७७,१५१

ब्रह्मचर्यं परिसमाप्य गृही... भूत्वा प्रव्रजेद्	(जाबा.उप.४)	१९
ब्रह्मचर्येण ऋषिभ्यः...	(तैत्ति.संहि.६ ।३ ।१० ।५)	२२
ब्रह्मचारी गृहस्थः च... अनृणो द्विजः	(मनुस्मृ.६ ।९४)	१८
ब्रह्मभूतः प्रसन्नात्मा	(भग.गीता.१८ ।५४)	४०९
ब्रह्मवादिनो वदन्ति...	(श्वेता.उप.१ ।१)	३२०
ब्रह्मविद् आप्नोति परम्	(तैत्ति.उप.२ ।१)	४५८,४९८
ब्रह्मवेद ब्रह्मैव भवति	(मुण्ड.उप.३ ।४ ।९)	४०९
ब्रह्मसंस्थो अमृतत्वम् एति	(छान्दो.उप.२ ।२३ ।१)	४,१६०
ब्रह्मसूत्रपदेश्चैव हेतुमद्भिः...	(भग.गीता १३ ।४)	४७४,४८२
ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः	(कूर्मपुरा.२ ।३२ ।२२)	१०६,१०९
ब्रह्महत्या सुरापानं... तैः सह	(मनुस्मृ.११ ।५४)	१०९
ब्रह्मा कृतयुगे देवः... देवो महेश्वरः	(कूर्मपुरा.१ ।२९ ।११)	६६
ब्रह्मा विष्णुः तथा... पिनाकधृक्	(कूर्मपुरा.१ ।२९ ।१२)	७४
ब्रह्मैव इदम् अमृतं... इदं वरिष्ठम्	(मुण्ड.उप.२ ।२ ।११)	१९४
ब्रह्मैव इदम् अमृतम्	(मुण्ड.उप.२ ।२ ।११)	१९७
ब्रह्मैव तादृशं यस्मात् सर्वात्मकतया उदितौ	(बा.बो.१२)	७७
ब्रह्मैव सन् ब्रह्मप्येति	(बृह.उप.४ ।४ ।६)	४११
ब्राह्मणः प्रव्रजेद् गृहात्...	(मनुस्मृ.६ ।३८)	२१
ब्राह्मणक्षत्रियविशां... प्राणाः विजानता	( )	४३
ब्राह्मणाः क्षत्रियाः... तत्र मानवाः	(स्कन्द.पुरा.)	४१८
ब्राह्मणौ वीणागाथिनौ... तद अद्भुतः	(तैत्ति.ब्रा.३ ।९ ।१४ ।५२)	५३
ब्रूहि त्वं गर्हितान्... समाचक्ष्व	( )	७९

भ

भक्तानां हितकाम्यया	(कूर्मपुरा.१ ।३० ।३४)	५७
भक्तिः अस्य भजनम्	(गो.पू.ताप.उप.१ ।३)	१६०
भक्त्या अहम् एकया ग्राह्यः	(भाग.पुरा.११ ।१४ ।२१)	४
भक्त्या तु अनन्यया शक्यः	(भग.गीता११ ।५३–५४)	४
भक्त्यैव तुष्टिम् अभ्येति...	(महाभा.ता.नि.१ ।११६)	४
भगवन् भवता... माहेश्वरं परम्	(कूर्मपुरा.१ ।३४ ।१४)	६९
भगवन् श्रौतुम्... तत्र वै प्रभोः	(पद्मपुरा.६ ।२३४ ।१)	७९
भगवान् उक्तो... यत्नतः	(कूर्मपुरा.१ ।२४ ।३४–३५)	६८
भज् इति एष वै धातुः...	(गरु.पुरा.२ ।९ ।३)	६
भञ्जो=आमर्दने	(पाणि.सू.धा.पा.१४७८)	६

भयं द्वितीयाभिनिवेशतः... ईशं गुरुदेवतात्मा (भाग.पुरा.११।२।३७) ६
भर्ता सन् भ्रियमाणो... (चित्युप.७।१) १६०
भवन्ति भावा भूतानां... (भग.गीता.१०।५) ४३८
भवप्रसादेन कृतोपदेशः... मुक्तिम् एति (सनत्कु.सं) ४१६
भवव्रतधरा येच... यत्र भूतराड् (भाग.पुरा.४।२।२८–३२) ९०, १०२, १६७
भविष्यति हृषिकेशः (कूर्मपुरा.१।१५।३२) १२४, १२८, १४१
भविष्यध्वं त्रयीबाह्याः... पराङ्मुखः (कूर्मपुरा.१।१५।३०–३२) ११७,८२
भविष्यन्ति त्रयीबाह्याः (कूर्मपुरा.१।१५।३०) ८५,१००
भव्यगेय... (पाणि.सू.३।४।६८) ६
भारतव्यपदेशेनहि आम्नायार्थश्च दर्शितः (भाग.पुरा.१।४।२९) १०१
भारद्वाजं काश्यपं... (पद्मपुरा.६।२३६।२४) १७१
भारूपः सत्यसंकल्पः (छान्दो.उप.३।१४।२) ३, २५२
भार्यायाः विक्रयः च... (याज्ञ.स्मृ.३।५।२४२) १०९
भावप्रधानम् आख्यातं सत्त्वप्रधानानि... (निरु.१।१।१) २०७, २१३
भावाऽभावातिगा अविद्या ( ) ४४५, ४४८
भावेच उपलब्धेः (ब्र.सू.२।१।१५) ३८०, ३८४
भास्करं परमं तपः (कूर्मपुरा.१।३०।५२) ६६
भिक्षां चतुर्षु वर्णेषु... लब्धेन तावता (भाग.पुरा.११।१८।१८) ४४
भिक्षापात्रादिशुद्ध्यर्थम्... विगतस्पृहः ( ) ४३
भिक्षाप्रयोजनात् ग्रामम्... (याज्ञ.स्मृ.मिता.३।४।५८) ४१
भिद्यते हृदयग्रन्थिः छिद्यन्ते... दृष्टे परावरे (मुण्ड.उप.२।२।८) ४२२, ४२६
भृकुटीकुटिलात् तस्य... (कूर्मपुरा.१।७।२६) ६२
भृगुः वै वारुणिः... ब्रह्म इति (तैत्ति.उप.३।१) ३५६,४७३, ४७८, ४९०
भृशादिभ्यो भुव्यच्वेः... (पाणि.सू.३।१।१२) १८५
भेदः संसर्गः उभयं... (वै.भू.३१) २१२
भेदज्ञानाभावे (शु.मा.प्र.४) १८६
भेदव्यासेधएव क्रियते... (ब्र.सू.शां.भा.भा.२।१।१४) ३८१, ३८३
भेदो यो बोधनाय सः (शु.मा.४९) ४५३
भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् (भग.गीता ५।२९) २८३
भोक्त्रापत्तेः (ब्र.सू.२।१।१३) ४४१

भोगेनतु इतरे क्षपयित्वा...	(ब्र.सू.४।१।१९)	१६, ४०४, ४०६,४०७
भ्रुवो: यम: पक्ष्मभवस्तु काल: प्रसीदतां न: स महाविभूति:	(भाग.पुरा.८।५।४२)	३२१

म

मंडूककूर्मा: कृमयोऽपि... तथाविधा	(पद्मपुरा.)	४१८
मङ्गलादीनि हि... यथा स्यु:	(पातं.महा.भा.१।१।१)	५९
मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येषु...	(अम.को.३।३।२४८)	१६
मत्त: परतरं न अन्यद्	(भग.गीता७।७)	३
मत्त: सर्वं प्रवर्तते	(भग.गीता १०।८)	३२६, ४३७
मत्तएव पृथग्विधा:	(भग.गीता १०।५)	३०२
मत्पुराणकथां श्रुत्वा... भवन्ति हि	(पद्मपुरा.६।९२।२२–२३)	५३
मत्वा धीरो हर्षशोकौ...	(कठोप.२।१२)	३०५
मद्भक्तेष्वपि यत्नत:	(कूर्मपुरा.१।२७।१६)	१४३
मद्यानि एकादशैतानि... भोगप्रदायिनी	(कुला.त.उल्ला.५।३३–३४)	१०८
मधुवाता ऋतायते	(बृह.उप.६।३।६)	१०७
मधुव्रतव्रातविघुष्टया स्वया...	(भाग.पुरा.८।१८।३)	८
मध्याद् गुरौ	(पाणि.सू.६।३।११)	५०१
मन: स्मरेत् असुपते:... करोतु काय	(भाग.पुरा.६।११।२४)	९
मनसा वचसा दृष्ट्या...	(भाग.पुरा.११।१३।२४)	३०४
मनसैव अर्चय हृदि... शुभं तव	(पद्मपुरा.६।२३५।४९)	८०
मनसैव इदम्... अस्ति किञ्चन	(कठोप.२।१।११)	४५३
मनोदृश्यम् इदं द्वैतं...	(माण्डु.गौ.का.३।२९–३१)	३९१
मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोङ्गिरा	(याज्ञ.स्मृ.१।१।४)	१८
मम तेजोंऽशसम्भवम्	(भग.गीता १०।४१)	३२७
मम योनि: अप्स्वन्त: समुद्रे	(देव्यु.४)	४९६
ममैव मायया... मोक्षम् अवाप्नुयु:	(स्कन्दपुरा.४।२।६०।१२७–१२९)	४१६
मया कालात्मना धात्रा	(भाग.पुरा.११।२४।१५)	३२२, ३२४
मयूरव्यंसकादित्वात् सप्तम्यन्तोत्तरपद:...	( )	५०३
मह पूजायां	(पाणि.सू.३।१।५५)	३
महद्दीर्घवद् वा	(ब्र.सू.२।२।११)	१९७
महादेव–स्वरूप: च...	(पु.ना.स.१२।२४७)	१६१
महान्तं विभुम् आत्मानं...	(कठोप.२।२२)	३०५

महापापं च अतिपापं... पञ्चको गणः	(याज्ञ.स्मृ.मिता.३ ।५ ।२४२)	४०,११०
महिम्नि स्वे महीयते	(भाग.पुरा.१ ।३ ।३४)	३२३
मां विद्धि... सर्वात्मना शिवा	(कूर्म.पुरा.१ ।१२ ।४८–४९)	४५५
मांस सन्दर्शनं... न लिप्यते	(कुला.त.उल्ला.२ ।१३४–१३६)	१०७
मांसन्तु त्रिविधं प्रोक्तं... चोदिता	(कुला.त.उल्ला.५ ।४७–५२)	१०८
मांहि पार्थ ! व्यापाश्रित्य...	(भग.गीता ९ ।३२)	२८७
माता पिता वा दद्यातां...	(मनुस्मृ.९ ।१६८)	२३
मात्रं कात्स्न्र्येअवधारणे	(अम.को.३ ।३ ।१७७)	९६
मात्स्यं कौर्मं... निबोध: मे	(पद्मपुरा.६ ।२३६ ।१८)	१७०
मान्त्रवर्णिकमेव च...	(ब्र.सू.१ ।१ ।५)	५०४
माम् अप्राप्यैव कौन्तेय	(भग.गीता१६ ।२०)	५
मायया मे विनिर्मिते	(भाग.पुरा.११ ।११ ।३)	४३७
माया च अविद्या...	(नृ.उत्त.उप.९)	४५९
माया वयुनम् अभिख्या	(निरु.३ ।९)	३५०
माया–सम्बन्ध–रहितम्	(शु.मा.२८)	४४९
मायां वेदितुम् इच्छामः	(भाग.पुरा.११ ।३ ।१)	३४०
मायाच अविद्या च...	(नृ.उत्त.उप.९)	४६०, ४६२
मायाजवनिकाछन्नम्	(भाग.पुरा.१ ।८ ।१९)	४६६
मायाञ्च तदुपाश्रयाम्	(भाग.पुरा.१ ।७ ।४)	३४८
मायात्मने नमः	(महाभा.१२ ।४७ ।२६)	४६२
मायान्तु प्रकृतिं विद्याद्	(श्वेता.उप.४ ।१०)	३२९, ३३०, ३३८, ४७३, ४७९, ४८९, ४९३, ५०८
मायाभिः ज्ञानानाम् एतद्...	(सा.भा.६ ।४७ ।१८)	३३७
माया स्यात् शाम्बरी...	( )	३३७
माया शब्दस्य प्रज्ञापरत्वं...	(द्र.बृह.उप.शां.भा.२ ।५ ।१९)	३३७
मायामात्रन्तु कात्स्न्र्येन...	(ब्र.सू.३ ।२ ।३)	३४८, ३३३, ३३६,३४८, ३६०, ३९८
मायाम् एतां तरन्ति ते	(भग.गीता ७ ।१४)	४४२
मायावादम् असच्छास्त्रं... ब्राह्मणरूपिणा	(पद्मपुरा.६ ।२३६ ।७)	९४
मायासम्बन्धरहितं शुद्धम्... न मायिकम्	(शु.मा.२८)	२०८, २१०
मायिकत्वं पुराणेषु वैराग्यार्थम् उदीर्यते	(त.दी.नि.१ ।८२)	३५२, ३५५
मायी सृजते विश्वम्	(श्वेता.उप.४ ।९)	१९८, २०१
मायोपाधिककर्तृत्वं भैक्षवे... विशेषतः	(शु.मा.६४)	४२४
मासेभ्य: पितृलोकं... पुन: निवर्तन्ते	(छान्दो.उप.५ ।१० ।४–५)	२७७

माहिष्येण करण्यान्तु रथकार:... (याज्ञ.स्मृ.१।४।९५) २२०

मिथ्याशब्दो... अनिर्वचनीयतावचन: (ब्र.सू.शां.भा.पञ्चपा.१।१।१) १३२

मीमांसमानस्य समुत्थितो... (भाग.पुरा.७।८।२०) ४९७

मुक्तिः हित्वा अन्यथारूपं... (भाग.पुरा.२।१०।६) ४४२

मुखनासिकावचन (पाणि.सू.१।१।८) ३७७

मुख्यत्वाद्... (याज्ञ.स्मृ.मिता.२।८।१३०) २३

मुनीनपि मुनीश्वरा: (कूर्मपुरा.१।१५।६५) १२८

मुनीन्द्र: श्रीघन: शास्ता (अम.को.१।१।१४) १२३

मृगदारकाभासेन स्वारब्धकर्मणा... (भाग.पुरा.५।८।२६) ४०७

मृत्तिका इत्येव सत्यम् (छान्दो.उप.६।१।४) २००, ३७३

मृत्यु: धावति पञ्चम (तैत्ति.उप.२।८।१) ३२६

मृत्यो: स मृत्युं... (कठोप.२।१।११) ४५३

मैवम् सत्त्वात्यन्ताभावासत्त्वात्यन्ताभाव–... (अद्वै.सि.परि.१) १३३

मोहयन्ति जनान् सर्वान्... (कूर्मपुरा.१।२९।३१)
८२, १३१, १४५, १६६, १६८

मोहिता विष्णुमायया (कूर्मपुरा.१।१५।२०) १२४

मौनानीहानिलायामाः दण्डाः... न भवेद् यतिः (भाग.पुरा.११।१८।१७) ३१

य

य एतन् मर्त्यम् उद्दिश्य (भाग.पुरा.४।२।२१) १०२, १०३

य: इह रमणीयचरणा: (छान्दो.उप.५।१०।७) २७३

य: एको वर्णोबहुधा... (श्वेता.उप.४।१) ३३८

य: एष: सुप्तेषु... (कठोप.२।२।८) ३४७

य: कश्चित् कस्यचिद्... सर्वज्ञानमयो हि स: (मनुस्मृ.२।७) २१

य: सर्वज्ञ: सर्वविद्... (मुण्ड.उप.१।१।९) २४५

य: सर्वज्ञ: सर्वशक्ति: ( ) २४६,४५३

यं प्राप्य न निर्वतन्ते... (भग.गीता.८।२१) ४

यः तं न वेद किम्... (श्वेता.उप.४।८) २०१

यक्षानुरोधीहि बलि: ( ) ५०७

यज्ञभुग् यज्ञसाधन: (विष्णुस.ना.११८।९७९–९८०) २८३

यज्ञोपवीतं दण्डं च... अन्यो हंसपरिग्रह ( ) ३२

यज्ञोपवीतं सर्वेषां द्विजानां... ( ) ५३

यतः तैत्तिरीये...कर्मणो: वैयर्थ्यं (द्र.ब्र.सू.भा.प्र.२।३।४२) २९९

यतः प्रवृत्तिः विश्वात्मौ (कूर्मपुरा.१।१५।१०) ११७

यतय: च भविष्यन्ति... क्षत्रिया: तथा (कूर्मपुरा.१।३०।२३–२५) ८५, १४६
यतो अभ्युदय–नि:श्रेयससिद्धि: स धर्म: (वैशे.सू.१।१।२) १३८
यतो वा इमानि... तद् ब्रह्मेति (तैत्ति.उप.३।१)
२००, २०२,३७०, ३७५, ३७६, ४६८, ४७५, ४७६, ४९०, ४९९
यतो वाच (तैत्ति.उप.२।१) ४१३
यतो वाचारम्भं... एतद् अनृतम् (ब्र.सू.शां.भा.२।१।१४) ३७३
यत्किञ्चिद् दूषणन्तु... (सुबो.२।९।३२) ३००
यत्तु वेदान्तिब्रुवाणाम्...युक्तमेव ( ) ९४
यत्पादपोतेन महत्कृतेन... (भाग.पुरा.१०।२।३०) ६
यत्र उभयो: समो... तादृशार्थविनिर्णये (श्लो.वा.शून्य.प्र.२५२) २३२
यत्र एतत्पुरुष: पिपासति... (छान्दो.उप.६।८।५) ३८३
यत्र एतत् पुरुषो अशिशिषति नाम (छान्दो.उप.६।८।३) ३६५, ३८२
यत्र पदानि... परस्पराकांक्षारूपा व्यपेक्षा (पातं.महाभा.प्र.२।१।१) २१६
यत्र येन यतो यस्य... साक्षात् प्रधानपुरुषेश्वर: (भाग.पुरा.१०।८२।४) १९६, २४५
यत्र साक्षाद् महादेवो... अविमुक्तकम् (कूर्मपुरा.१।३१।६०–६१) ७०
यत्र हि द्वैतमिव भवति... (बृह.उप.२।४।१४) १७९, २०३
यत्रतु अस्य सर्वम्... (बृह.उप.२।४।१४) १७९
यत् किञ्चिद् दूषणन्तु अत्र (सुबो.२।९।३२) ३१०
यत् तत्प्रमाणै:... स्वपक्षं रक्षयन्ति (गौ.न्या.सू.भा.१।२।२–३) २६४
यत् पश्यतां शिशु:... शंकर नामधेयम् (श्रीशंक.दिग्व.२।८२–८३) ७३
यथा इदानीं... ईदृशम् (भाग.पुरा.३।१०।१३) ४३९
यथा ऊर्णनाभि: (मुण्ड.उप.१।१।७) ३०७
यथा ऊर्णनाभि: हृदयाद्... (भाग.पुरा.११।९।२१) १९७
यथा ऊर्णनाभि:... इह विश्वम् (मुण्ड.उप.१।१।७) १९६, २९७
यथा क्रीडोपस्कराणां संयोग–विगमौ... (भाग.पुरा.१।१३।४२) ३५६
यथा तम:... तम: शब्देन व्यवहार: (ऋक्संहि.सा.भा.) ४३४
यथा नद्य: स्यन्दमाना:... विहाय (मुण्ड.उप.३।२।८) ४०४, ४४४
यथा न्यासमेव... इति अर्थ: (पातं.महाभा.प्र.३।१।१२) १८६
यथा पुष्करपलाशे आपो... (छान्दो.उप.४।१४।३) २९४
यथा भासो यथा... (भाग.पुरा.२।९।३३) १९१
यथा यथा हि पुरुष:... अस्य रोचते (मनुस्मृ.४।२०) ११५
यथा वायु: जलधरान्...पुन:पुन: (महाभा.१३।१।५२–५७) ३२६
यथा सत: पुरुषात्... (मुण्ड.उप.१।१।७) ३११
यथा सुवर्णं सुकृतं... ( ) १९७

यथा सोम्य एकेन... एकेन लोहमणिना (छान्दो.उप.६ ।१ ।४–५)
१९४, १९७, २४४, ३६५,३७३, ४९२
यथा सोम्य पुरुषं... सम्पत्स्ये इति (छान्दो.उप. ६ ।१४ ।१–२) ४११
यथा सोम्य... विज्ञातं स्याद् (छान्दो.उप.६ ।१ ।४–६) १९६
यथा सोम्य...आदेशो भवतीति (छान्दो.उप.६ ।१ ।४–६) ३७६
यथा स्वप्ने द्वयाभासं... न संशयः (माण्डु.गौडकारि.अद्वैत.२९–३०) ३८७
यथा हिरण्यं बहुधा समीयते... (भाग.पुरा.१२ ।४ ।३०) ३७९
यथा हिरण्यं बहुधा... (भाग.पुरा.१२ ।४ ।३१) १९७
यथा हिरण्यं स्वकृतं पुरस्तात्... (भाग.पुरा.११ ।२८ ।१९) ३७९
यथाकारी यथाचारी... पापो पापेन (बृह.उप.४ ।४ ।५) २७७
यथाजातरूपधरो... परमहंसो नाम (जाबा.उप.६) ४३
यथान्यासमेव अस्तु..च्विसदृशम् अभूततद्भावः (पातं.महाभा.३।१।१२) १८५
यथोक्तोपपन्नः... प्रतिपक्षस्थापनहीनो वितण्डा (गौ.न्या.सू.१ ।२ ।२–३) २६४
यद् यद् आकाङ्क्षितं... अवगम्यते (न्या.मु.श.खं.८२) ५९
यदपि उच्यते सर्वलिंगता... लिंगस्य (पातं.महाभा.२ ।१ ।३६) ६४
यदहरेव विरजेत् तदहरेव प्रव्रजेद् (जाबा.उप.४) १९, २०
यदा कर्मविपाकेषु... निरपेक्षः परिव्रजेत् (भाग.पुरा.११ ।१८ ।१२–१३) १८
यदा कर्मसु काम्येषु... (छान्दो.उप.५ ।२ ।८)
३५६, ३५८, ३६०
यदा पश्यः पश्यते रुक्मवर्णम् (मुण्ड.उप.३ ।१ ।३) ४२३, ४२६
यदा पूर्ववाक्ये... तदा विध्यर्थः (पातं.महाभा.प्र.३ ।२ ।१२६) १५५
यदा भागवती... भक्तिभाजो भवन्तिहि (पद्मपुरा.) १५९
यदा सर्वेप्रमुच्यन्ते कामाः (कठोप.२ ।३ ।१४) २५५, ४१३
यदा ह्येव एषः... भयं भवति (तैत्ति.उप.२ ।७)
१७९,२६६,४९३
यदाग्नेयो अष्टाकपालो... (तैत्ति.संहि.२ ।६ ।३ ।२) ३४२
यदि गृही कथञ्चित्... अभिलप्यो भवति ( ) २२
यदि च वृत्तौ... तदात्मकत्वात् सामर्थ्यस्य (पातं.महाभा.प्र.२ ।१ ।१) २१५
यदि दास्यसि...प्रियं तव (महाभा.३०० ।१८–२०) ३४६
यदितु उणादयो... अग्रे निरूपयिष्यते (जै.मी.सू.भाट्टदी.३ ।५ ।२२) २२३
यदिदं किञ्च... (तैत्ति.उप.२ ।६) ३९२
यदिवा इतरथा ब्रह्मचर्यादेव... वनाद् वा (जाबा.उप.४) २०
यदेकम् अव्यक्तम् अनन्तरूपं... (महा.नारा.१ ।५) ४००
यदेजति जगति यच्च... (महा.नारा.१९ ।२) ४०३

यद् अग्ने रोहितं रूपं...	(छान्दो.उप.६ ।४ ।१)	३८२
यद् आग्नेयो: अष्टाकपालो...	(तैत्ति.संहि.२ ।५ ।३ ।२)	२८३
यद् इदं किञ्च...	(तैत्ति.उप.२ ।६ ।१)	३६२,३६३
यद् उक्तं... शुद्धं च श्रूयते	(ब्र.सू.शां.भा.२ ।१ ।४)	२७५
यद् ऋग्वेदो... आसीद् इत्यादि	(बृह.उप.शां.भा.२ ।४ ।१०)	१७७
यद् एकम् अव्यक्तम् अनन्तरूपम्	(महानारा.उप.१ ।५)	३८३
यद् गत्वा न निवर्तन्ते	(भग.गीता.१५ ।६)	४२९, ४३३
यद्यपि प्राणभृतो... सर्वज्ञत्वाद्यसम्भवे सति	(ब्र.सू.शां.भा. १ ।३ ।१४)	२५६
यद्वाक्यतो धर्मइतीतर...	(भाग.पुरा.१ ।५ ।१६)	३५५
यद्वै किञ्च मनुः...	(तैत्ति.संहि.२ ।२ ।१० ।२)	१८
यम: अस्मि	(भग.गीता १० ।२९)	३२५
यस्तं न वेद	(श्वेता.उप.४ ।८)	२०१
यस्तु असंयतषड्वर्ग:... च विहीयते	(भाग.पुरा.११ ।१८ ।४०–४१)	३४
यस्तु यस्य आदिः अन्तः...	(भाग.पुरा.११ ।२४ ।१७)	३७९
यस्तु सर्वाणि भूतानि... एकत्वम् अनुपश्यत:	(ईशा.उप.६–७)	३९२
यस्मात् परं न अपरम्...	(श्वेता.उप.३ ।९)	१९३
यस्माद् बहिष्कृतो... अशेषाघविनाशनम्	(कूर्मपुरा.१ ।१५ ।२९–३३)	१००,१२२
यस्माद् मायी	(श्वेता.उप.४ ।९)	२२८
यस्मिन् इदं संचविचैति...	(महा.नारा.उप.१ ।३)	४९६
यस्मिन् यतो यर्हि येन... भवत: स्वरूपम्	(भाग.पुरा.७ ।९ ।२०)	२४६
यस्मिन् वाच:प्रतिष्ठा:... कैवल्याश्रमे वसेद्	( )	३७
यस्मिन् सर्वाणि भूतानि...	(ईशा.उप.७)	३०६
यस्मिन् स्थितो न...	(भग.गीता ६ ।२२)	३०६
यस्य एतल्लक्षणं नास्ति...	(दक्षस्मृ.१ ।१३)	३०
यस्य एते नियताः बुद्धौ स...	(याज्ञ.स्मृ.३ ।४ ।५८)	२९
यस्य देवे परा... प्रकाशन्ते महात्मन:	(श्वेता.उप.६ ।२३)	१०
यस्य देवो महादेव:...	(कूर्मपुरा.१ ।३४ ।११)	६२
यस्य हस्ते गदाचक्रम्	(पाण्डवगीता–७६)	३२४
यस्य हि सर्वविषयावभासनक्षमं... असर्वज्ञत्वमपि स्याद्	(ब्र.सू.शां.भा.१ ।१ ।५)	२५६
या काचिदेव...आवां निर्दिष्टकारिणौ	(महाभा.१३ ।१ ।६७–६८)	३२६
या तु श्रुतिः... श्रद्धातुं शक्यम्	(ब्र.सू.शां.भा.२ ।१ ।१)	१५०
या देवी सर्वभूतेषु...	(देवीसू.६)	१२८
या पतिं हरिभावेन... श्रीरिव मोदते	(भाग.पुरा.७ ।११ ।२९)	४१९

याज्ञवल्क्यानि ब्राह्मणानि... (पाणि.सू.सि.कौ.४।३।१०५) ११६
याभिः विभूतिभिः लोकान्... (भग.गीता १०।१६) ३२७
यावता कालेन तीव्रतपः...
मोक्षैक' लकः चर्तुथाश्रमः (याज्ञ.स्मृ.मिता.३।४।५६) १७
यावत् शरीराद्... सम्पत्स्यतएव (छान्दो.उप.शां.भा.६।१४।१) ४११
यावद् न स्युः त्रयो... ( ) ३०
यावद् हतो अस्मि... (भाग.पुरा.१०।४।२२) ३०५
युक्ते शब्दान्तरात् च (ब्र.सू.२।१।१६) ३९७
युगधर्मान् वक्ष्यामि (कूर्मपुरा.१।२९।८) १४७
युष्माकं वंशसम्भवाः (कूर्मपुरा.१।२७।१८) ८९
ये अन्यं देवं परत्वेन... येऽपि अवैष्णवाः (पद्मपुरा.६।२३५।१–११) ७९
ये अन्ये शापाग्निनिर्दग्धाः... कलिषु अथ (कूर्मपुरा.१।१५।९३) ८२,१५८
ये अन्ये शापाग्निनिर्दग्धाः...
शंकरस्य प्रसादतः (कूर्मपुरा.१।१५।९४–९८) १३०,१५८
ये कुशास्त्राभियोगेन (कूर्मपुरा.१।१२।२६३) ११४
ये के च अस्माद् लोकात्... (कौषी.उप. १।२) ४८३
ये गत्यर्थकाः ते... द्वैतम् अद्वैतम् (शु.मा.प्र.४) १८२
ये च दक्षाध्वरे... प्रयत्नतः (कूर्मपुरा.१।२७।१७) ९८
ये चैव सात्त्विकाः भावाः (भग.गीता ७।१२) ३२६
ये तं प्रीता निषेवन्ते (कूर्मपुरा.१।३०।३६) ६६, ७०
ये नमन्ति विरूपाक्षम् ईशानं... (कूर्मपुरा.१।३०।३९) ७०
ये नाम केचिदिह... निरवधिर्विपुला च पृथ्वी
(भवभूतिमालतिमाधवम्१।८) आद्यप्र.८
ये ब्राह्मणाः तत्र... विष्णुमाययौ (कूर्मपुरा.१।१५।१७–२०) ११७
ये भक्ता वरदं... यत्तन्मोक्षप्रदं शुभम् (स्कन्दपुरा.   ) ४१८
ये मां जनाः... पुरुषोत्तमे (कूर्मपुरा.१।२७।१०) ८४,९८
ये यजन्ति जपैः... न मोहय (कूर्मपुरा.२।२।१५–२०) ७०
ये ये कामाः दुर्लभाः मर्त्यलोके (कठोप.१।१।२५) ३४८
येऽपि अन्यदेवताभक्ताः... अविधिपूर्वकम् (भग.गीता ९।२३) १४०, ४५५
येन देवाः पवित्रेण... (तैत्ति.ब्रा.१।४।८।६) २०
येन पदेन विना... तत्पदविशिष्टत्वं (न्या.का.दि.श.खं.८४) ६०
येन स्वरोचिषा विश्वं... (ब्र.सू.१।१।२४) ३
यो अधिकारी... इयम् ईरिता (त.दी.नि.३।१२।३१–३३) १६२
यो अधीयानः आस्ते... (पाणि.सू.वा.३।२।१२६) १५४, १५६

यो अयं कालः... (भाग.पुरा.१०।३।२६) २६२,३२१

यो अस्य अध्यक्षः... (तैत्ति.ब्रा.२।८।९।६) ३५९

यो अस्य अध्यक्षः (ऋक्.संहि.१०।१२९।१) ४९६

यो दत्वा... नास्ति कुतश्चन (मनुस्मृ.६।३९-४०) ३८

यो द्रव्य-देवता-... फलेन च (याज्ञ.स्मृ.३।४।१२१) २७३, २७७

यो बर्हिषि... अरोदनम् इति (जै.मी.सू.शा.भा.१।२।१०) १६७

यो ब्रह्माणं विदधाति पूर्वम् (श्वेता.उप.६।१८) ४६९

यो यो यां यां तनुं भक्तः (भग.गीता.७।२१)
१४२, २८३, २८४, ४५५

यो विकार...वाक्यानि संगृह्यन्ते (शु.मा.प्र.४१) ३७०

यो वेद निहितं गुहायां... (तैत्ति.उप.१।१) ३

यो वै भूमा तत् सुखम् (छान्दो.उप.७।२३।१) ३१०

यो वै साक्षाद्... ज्ञानम् ऐश्वरम् (कूर्मपुरा.१।३४।१२) ६९

यो वै स्वां देवताम्... पापीयान् भवति (तैत्ति.संहि.२।५।४) ७५

योगः चित्तवृत्तिनिरोधः (पातं.यो.सू.१।२) २१३

योगाद् रूढिः बलीयसि (लौकि.न्या.सा.६५६) १३४

योगास्त्रयो मया ...अस्ति कर्हिचित् (भाग.पुरा.११।२०।६) ४

योनिश्च हि गीयते (ब्र.सू.१।४।२७) ५०३

यौ तौ... प्रवर्तते इति (गौ.न्या.सू.भा.१।२।२-३) २६४

र

रः कार्यकारणतां हित्वा... (शुकर.उप.४२)

रज्जुसर्पवद् विकल्पनारूपं...
असत्त्वम् इति अर्थः (माण्डु.गौ.का.भा.३।३१) ३९२

रमणार्थम् इदं सर्वं... (शु.मा.१२) २३९

रसः ह्येव अयं लब्ध्वा आनन्दी... (तैत्ति.उप.२।७) ३११, ४९९

रसो वै सः... आनन्दं ब्रह्मणः (तैत्ति.उप.२।७,२।९) ४

राक्षसीम् आसुरीं चैव (भग.गीता ९।१२) ३२७

रागवान् नतु विप्रोऽपि... ( ) ३१

राजान्तेवासियाज्येभ्यः सीदन्... (याज्ञ.स्मृ.१।६।१३०) १३४

राज्ञां प्रतिग्रहः... (यमस्मृ.४।५९) ४४

रामानुजानां सरणी रमातो... परमेष्ठितः च ( ) १८२

रूपं परं दर्शितम् आत्मयोगाद् (भग.गीता ११।४७) ३२५

रूपं रूपं प्रतिरूपो... (ऋक्.संहि.६।४७।१८) ३२९, ३३७

रूपभेदास्पदं दिव्यं... कलयतां प्रभुः (भाग.पुरा. ३।२९।३७–३८) ३२५
रूपात् प्रायाद् (जै.मी.सू.१।२।११) १६६
रेमे रमेशो व्रजसुन्दरीभिः (भाग.पुरा.१०।३०।१७) ७

ल

लक्षण–हेत्वोः क्रियायाः (पाणि.सू.३।२।१२६) १५, ८२, १४३, १५३
लक्षणहेत्वोः क्रियायाः... (पातं.महाभा.३।२।१२६) १५५
लक्षणे यथा शयानाः... (पाणि.सू.काशि.३।२।१२६) १५५
लक्षणे हेतौ... निषीदति तद् गुरुः (पाणि.सू.काशि.३।२।१२६) १५७
लक्षणेत्थंभूताख्यानभागवीप्सासु (पाणि.सू.१।४।९०) १४३
लक्ष्यते अनेन इति... (पाणि.सू.त.बो.३।२।१२६) १५४
लटः शतृशानचौ... (पाणि.सू.३।२।१२४) १५७
लभते च ततः... (भग.गीता ७।२२) २८३
लिंगदर्शनाच्च (जैमि.सू.१।१।२३) ४०३
लिङ्गम् अशिष्यं लोकाश्रयत्वाद् (पातं.महाभा.२।१।२६) ६४
लिङ्गानुशासनं सर्वमेव... वैयर्थ्यप्रसङ्गाद् (पाणि.सू.त.बो.२।४।२६) ६४
लिङ्गं तत्तु यतो ब्रह्मन्... (कूर्मपुरा.१।२६।१००) ६७
लिटः कानज्वा (पाणि.सू.३।२।१०६) ७८
लोकवत्तु लीलाकैवल्यम् (ब्र.सू.२।१।३३) २८२, ३००, ४३१, ४४०
लोकान्नुसृजाः (ऐत.उप.१।१।१) ३१७
लोकान् असृजत (ऐत.उप.१।१।२) २८८
लोभः प्रवृत्तिः आरम्भः... (भग.गीता१४।१२) ४९
लौकिकव्यापाराद् मनसो... शमादिसम्पत् (ब्र.सू.शां.भा.र.१।१।१) २७

व

वक्ष्यामि ते समासेन... कलिः उच्यते (कूर्मपुरा.१।२९।८–९) १४५,१४७
वचनाद् रथकारस्य आधाने... (जै.मी.सू.६।१।४४) २२०
वदन्ति केचित् त्वामेव... (कूर्मपुरा.१।१२।२०९) ४५५
वनाद् गृहाद् वा...तु न अन्यथा (याज्ञ.स्मृ.३।४।५६–५७) १७,१८,२०
वनेषु च विहृत्य एवं... इच्छन् व्रजति अधः (मनुस्मृ.६।३३–३४) १८, २१
वरुणो अजायत चित्सुखाह्वय (श्रीशंक.दिग्वि.३।६) ७३
वर्तमानकालं वस्तु... (पातं.महाभा.प्र.३।२।११५) ५२

वर्तयन्ति (कूर्मपुरा.१।२८।१२) १४७
वर्तयन्ति स्म तेभ्यः... (कूर्मपुरा.१।२९।२२) १४६
वर्षासु ध्रुवशीलो... (नारदपरि.उप.७।१) ४३
वषट्कर्तुः प्रथमभक्षः (जै.मी.सू.भाट्टदी.३।५।३१) २२१, २२४
वषट्कर्तुः प्रथमभक्षः...वषट्कारः कारणम् (जै.मी.सू.न्या.मा.३।५।३१) २२५
वषट्कारात् च भक्षयेत् (जै.मी.सू.३।५।३१) २२२, २२४
वसन्तीह पुराच्छात्रा (पाणि.सू.का.३।२।१२२) ९४
वसुदेवगृहे साक्षाद्... (भाग.पुरा.१०।१।२३) ३२७
वस्तुतस्तु बहुश्रुतिबाधितम्... (अव.प्रह.वा) १७४
वाक्यसमयग्राहिका... अथ शब्दः च (द्र.ब्र.सू.शां.भा.र.१।१।१) ६०
वाग्दण्डे मौनम् आतिष्ठेत्... प्राणायामो विधीयते ( ) ४९
वाग्दण्डो अथ... निगच्छति (मनुस्मृ.१२।१०–११) ३०
वाङ् मनसि संपद्यते (छान्दो.उप.६।८।६) ३८३
वाचा विरूप नित्यया (ऋक्. संहि.८।७५।६) ४०३, ४९७
वाचारम्भणं विकारो नामधेयम् (छान्दो.उप.६।१।४) १९९, ३६२, ३७१
वादवादान् त्यजेत् तर्कान्... (भाग.पुरा.७।१३।७–८) ३७
वादैः विमोहयति... (भाग.पुरा.११।४।२२) ९५
वायुः यमः अग्निः... (भग.गीता ११।३९) ३२५
वायुमेव स्वेन भागधेयेन... (द्र.ब्र.सू.शां.भा.र.१।३।३३) २८३
वाराणसीस्थतीर्थानाम्... सम्पाद्याधिकृतिं बुध (पद्मपुरा.) ४१७
वाराणस्यां निवसतिः... निर्वाणाय उपजायते (पद्मपुरा.) ४१७
वाराणस्यां मृतो यो... अनुत्तमम् (स्कन्दपुरा.४।२।६४।७१–७२) ४१६
वाराणस्यां विपन्नस्तु... कस्यचित् क्वचिद् (ब्रह्मपुरा.) ४१७
वासुदेवः सर्वम् इति (भग.गीता ७।१९) ३०४, ४८६
विजातीयद्वैतापत्तिश्च (सां.सू.भा.१।२२) ९४
विजित्य कलिजान् दोषान् (कूर्मपुरा.१।३०।३६) ५७
विज्ञानं यज्ञं तनुते (बृह.उप.३।९।२८) ३३३
विज्ञानम् आनन्दं ब्रह्म (बृह.उप.३।९।१) ४८८
विज्ञानम् आनन्दं ब्रह्म (बृह.उप.३।९।२८) ३३३
विद्धि उद्धव ! शरीरिणां... (भाग.पुरा.११।११।३) ४६२
विद्धि मायामनोमयम् (भाग.पुरा.११।७।७) ३५५
विद्यया अविद्यया शक्त्या... (भाग.पुरा.१०।३६।५५) २२८, ३४०, ४४७, ५०९

विद्याविद्ये मम तनू... मे विनिर्मिते (भाग.पुरा.११।११।३) ४३८
विद्वान् नामरूपाद् विमुक्तः (मुण्ड.उप.३।२।८) ३९७, ४०३, ४४२, ४४४
विधिः आस... व्यजायत इति (श्रीशंक.दिग्वि.३।६) ७८
विधिवत् प्रैषम् उच्चार्य... बहि व्रजेद् (नि.सि.३) ३८
विधूमे सन्नमुसले... च वाग्यतः ( ) ४३
वनिन्दन्ति हृषीकेशं... वैडालव्रतिकाधमाः (कूर्मपुरा.१।३०।३०–३२) ८४, ८५, ८९, ९९, १४९
विनिन्द्यैवं सगिरिशम् अप्रतीपम्... (भाग.पुरा.४।२।१७) १०२
विनिश्चितैः नसंशयरूपैः... इति अर्थः (भग.गीता शां.भा.१३।५) ५०५
विपर्यासो भिन्नार्थप्रतिपादकः... (सुबो.३।२६।३०) ३४३
विपाकः कर्मणां... तत्र प्रयोजनम् (याज्ञ.स्मृ.३।४।१३३) २७३, २७८
विप्रतिपत्तिः अप्रतिपत्तिश्च... (गौ.न्या.सू.१।२।१९) २३८
विप्राणां कुलसम्भवाः (कूर्मपुरा.१।१५।९५) १६५
विभाषा गुणे अस्त्रियाम् (पाणि.सू.२।३।२५) ४८७
विभेदजनके अज्ञाने... (विष्णुपुरा.६।७।९६) ४४३, ४४४, ४४७, ४५०
विमतं पटः... सर्वत्र ऊहनीयाः (चित्सुखी.तत्त्वप्रदी.१।१२) ३९५
विमतं मिथ्या... शुक्तिरूप्यवद् (अद्वै.सि. परि.१) १३२
विमुञ्चति यदा कामान्... भगवत्त्वाय कल्पते (भाग.पुरा.७।१०।९) २५५
विरक्तिः द्विविधा...विद्वानसाधने (परा.उपपुरा.९।८०–८२) ३१
विरोधेतु अनपेक्ष्यम् (जै.मी.सू.१।३।३) ४३६
विरोधेतु अनपेक्ष्यं स्याद् असतिहि अनुमानम् (जै.मी.सू.१।३।३) ३५४
विलज्जमानया यस्य स्थातुम्... (भाग.पुरा.२।५।१३) ४४७
विवक्षातः कारकाणि भवन्ति (पातं.महाभा.१।४।५४) २८८
विशते तदनन्तरम् (भग.गीता.१८।५५) ४१२
विशिष्टं शुद्धाद् न अतिरिच्यते (न्या.मु.प्रभा.अनु.६८) ९८
विशेषणं विशेष्येण बहुलम्... (पातं.महाभा.२।१।५६) २२६
विशेषणभेदव्यपदेशाभ्यां च न इतरौ (ब्र.सू.१।२।२२) ४८६
विशेषणार्थत्वेऽपि च... (तैत्ति.उप.शां.भा.२।१।१) २०५
विश्वंवै ब्रह्मतन्मात्रं... एतद् ईदृशम् (भाग.पुरा.३।१०।१२–१३) ३५३,४२८, ४३९
विश्वतः चक्षुः उत... (ऋक्.संहि.१०।८१।३) ४००
विष्णुः ब्रह्मा... जनयेत् क्वचिद् (त.दी.नि.३।८।४७) १५१

विष्णुं शिवं वा... निवसतामपि	(धर्मसिंधु.तृ.परि.पू.कलि.२)	७१
विष्णो हव्यं रक्षस्व	(तैत्ति.संहि.१ ।१ ।३)	१४२
विष्णोः धाम परं साक्षात्	(भाग.पुरा.३ ।११ ।४१)	४
विष्णोः माया... सम्भविष्यति	(भाग.पुरा.१० ।१ ।२५)	१२८
विष्णोः विमुक्ते/विष्णो... इह जायते	(स्कन्दपुरा.४ ।१ ।२६ ।११०)	४१८
विहस्य दक्षं कुपितो... किं न श’रः	(कूर्मपुरा.१ ।१५ ।९–१०)	११९
विहितस्य अननुष्ठानाद्... पतनम् ऋच्छति	(याज्ञ.स्मृ.३ ।४ ।२१९)	४१
वीणावादनतत्त्वज्ञः... मोक्षमार्गं निगच्छति	(याज्ञ.स्मृ.३ ।४ ।११५)	५३
वीरभद्र इतिख्यातं... गणेश्वरः	(कूर्मपुरा.१ ।१५ ।४०–४१)	१२६
वृक्षं प्रति विद्योतते विद्युद्	(पाणि.सू.का.१ ।४ ।९०)	१४४
वृत्तानुपूर्वेच नच... आस यत्नः	(कुमा.सं.१ ।३५)	७८
वृत्तिभेदेन भिन्नाः च... सपवित्रकम्	( )	३०
वृथा धर्मं चरिष्यन्ति	(कूर्मपुरा.१ ।३० ।२८)	९९
वृद्धा वेश्या तपस्विनी...	(महासुभाषितसंग्रह ३४५८)	आद्यप्र.५
वृद्धात् छः...	(पाणि.सू.४ ।२ ।११४)	५१, ११६
वृद्धिरादैच्	(पाणि.सू.१ ।१ ।१)	२१३
वृद्धो यूना	(पाणि.सू.१ ।२ ।६५)	८
वेणुभिः न भवेद् यति...	(भाग.पुरा.११ ।१८ ।१७)	१५
वेदः तत्त्वं तपो ब्रह्म	(अम.को.३ ।३ ।११४)	४९७
वेदवादरतो न... अवमन्येत कश्चन	(भाग.पुरा.११ ।१८ ।३०–३१)	३८
वेदव्यासावताराणि... वेदपारगाः	(कूर्मपुरा.१ ।५३ ।१–४)	७२
वेदान्तविज्ञानसुनिश्चितार्थाः...	(मुण्ड.उप.३ ।२ ।६)	५,१९, २४, ५०५
वेदार्थवन्महाशास्त्रं... नाशकारणाद्	(पद्मपुरा.६ ।२३६ ।११)	९५
वेदार्थवन्महाशास्त्रं... निराकृतं वेदितव्यम्	(सां.सू.भा.१ ।२२)	९४
वेदार्थवित्तमैः कार्यं यत् स्मृतं कर्म वैदिकम्	(कूर्मपुरा.१ ।१२ ।२६४)	११४
वेदाहं समतीतानि... वेद न कश्चन	(भग.गीता ७ ।२६)	२४६, २५१
वेदेन बोधितम्	(ब्र.सू.भा.१ ।१ ।२)	४६८
वेद अहम् एतं..	(पु.सू.७)	४०२
वैणवाः ये स्मृताः दण्डाः... वै तत्त्वदर्शिभिः	( )	३१
वैधर्म्याच्च न स्वप्नादिवद्	(ब्र.सू.२ ।२ ।२९)	३८५, ३८६
वैनतेयश्च पक्षिणाम्	(भग.गीता १० ।३०)	१२८
वैयाकरणाख्यायां चतुर्थ्याः	(पाणि.सू.६ ।३ ।७)	५०१
वैयाकरणानां शाकटायन... च भाष्ये	(पातं.महाभा.प्र.३ ।२ ।११५)	५२

वैषम्य–नैर्घृण्ये इति…ते दोषसंश्रिताः	(शु.मा.४४–४५)	२९१, २९५, ३०२
वैषम्यनैर्घृण्ये न सापेक्षत्वात्	(ब्र.सू.२।१।३४)	२४२, २९७, ३०८
व्यक्ते अव्यक्तं कालवेगेन… अशेषसंज्ञः	(भाग.पुरा.१०।३।२५)	३२२
व्यत्ययम् इच्छति शास्त्रकृद् एषाम्	(पाणि.सू.३।१।८५)	६३
व्यत्ययो बहुलम्…	(पाणि.सू.३।१।८५)	२७
व्यपदेशात् च क्रियायां…	(ब्र.सू.२।३।३६)	३४२
व्यभिचारः एकत्र अव्यवस्था	(गौ.न्या.सू.भा.१।२।४६)	९६
व्यवस्थातो नाना	(वैशे.सू. ३।२।२०)	आद्यप्र.१०
व्यवस्थातो नाना, शास्त्रसामर्थ्यात् च	(वैशे.सू.३।२।२०–२१)	१३९
व्याकुर्वन् व्याससूत्रार्थं श्रुतेः…	(शिवपुरा.?)	५७
व्यावृत्तिः इतरभेदः	(तर्कदी.३९)	१४३
व्रजस्व परया भक्त्या…	(कूर्मपुरा.१।३०।६२)	६७

श

शक्ति–शक्तिमतोः… जडत्वं स्याद्	(शु.मा.४८–४९)	४५०, ४५२, ४५७
शक्ति–संख्या… तद्व्यवच्छेदो नियमार्थः	(वैशे.सू.उप.१।१।४)	२०६
शतायुषः पुत्रपौत्रान् वृणीष्व	(कठोप.१।१।२३)	३४८
शब्दइति चेद् न…	(ब्र.सू.१।३।२८)	४०३, ४४०
शब्दगुणकम् आकाशम्…	(त.सं.प्र.२)	२०६
शब्दानुशासनम्	(पाणि.सू.१।१।१)	२७२
शमूनं कुरुते विष्णुः… व्यवहर्तुभिः	( )	४३५
शयनं भुज्यर्थपरिचायकं…	(परिभाषेन्दु.)	१५५
शयवासवसिष्वकालात्	(पाणि.सू.६।३।१८)	५०१
शयाना वर्धते दूर्वा…	(पाणि.सू.वा.३।२।१२६)	१५६
शान्ताः विद्वांसो भैक्षचर्यां…	(मुण्ड.उप.१।२।११)	२५
शान्तो दान्तः उपरतः… आत्मानं पश्येद्	(बृह.उप.४।४।२३)	२४
शासेः क्षदादित्वात् शासि क्षदादिभ्यः	(पाणि.सू.६।४।११)	१२३
शास्ता अभिगोप्ता नृपतिः प्रजानाम्	(भाग.पुरा.५।१०।२३)	१२३
शास्ता च उत्पथगामिनाम्	(भाग.पुरा.१।१२।२६)	१२३
शास्ता सम्मतभद्रेन अशासके पुनः अन्यवद्	( )	१२३
शास्तारो दण्डधारिणः	(भाग.पुरा.६।३।५)	१२३

शास्त्रयोनित्वाद् (ब्र.सू.१।१।२) ४८१
शास्त्राणि चैव... तामसानि यथाक्रमम् (पद्मपुरा.६।२३६।१३) १७४
शिखायज्ञोपवीतेन त्यक्तेन... ( ) ५२
शिवद्वेषं विनिन्दितो महादेव (कूर्मपुरा.१।१५।२९) १२५
शिवद्वेषनिवृत्त्यातु धर्मः... (त.दीनि.३।४।४३) १५१
शिवा सर्वगता... ज्ञानरूपातिलालसाः (कूर्म.पुरा.१।१२।७) ४५३
शुक्तिरजतादावपि बुद्धिवृत्तेः... (सुबो.प्र.२।९।३३) ३५०
शुक्लदन्ताजिताक्षाः चामुण्डाः... (कूर्मपुरा.१।३०।१३) १४६, १४८
शुद्धाद्वैत पदे ज्ञेयः... षष्ठीतत्पुरुषं बुधाः (शु.मा.२७) २३६
शूद्रो वर्णः चतुर्थोऽपि... (नि.सिं.१।व्रत) १०१
शृणु देवि... पातित्यं ज्ञानिनामपि (पद्मपुरा.६।२३६।२–३)
९५, १७२, १७३, १७७
शृणुष्व च एतत् प्रथमं... (कूर्मपुरा.१।१२।२४७) ११४
शृण्वन्ति मीलितदृशो विगता... (भाग.पुरा.१०।१८।१४) ९
शेषः परार्थत्वात् (जै.मी.सू.३।१।२) ४९८
शेषलक्षणे कर्म फलार्थत्वाद् (द्र.जै.मी.सू.१।३।४) ४८०
शैली दारुमयी लौही (भाग.पुरा.११।२७।१२) ३७९
शैवान् पाशुपतान्... जलम् आविशेद् (द्र.याज्ञ.स्मृ.मिता.३।१।३०) १०६
शोचति स्वेदते वा पुरुषः (छान्दो.उप.६।२।३) ३८१

श्र

श्रद्धाभक्तिध्यानयोगाद् अवेहि (कैव.उप.२) ४
श्रावयेत् चतुरो वर्णान्... अग्रतः (महाभा.१२।३१४।४५) १०१
श्री–ब्रह्म–रुद्र–सनक–वैष्णवाः... (पद्मपुरा.) १३६
श्रुतत्वाच्च (ब्र.सू.१।१।११) ४८७
श्रुतत्वाच्च, फलमतः... (ब्र.सू.३।२।३८–३९) २८४
श्रुतत्वात् च (ब्र.सू.१।१।१०) २८०,२८३
श्रुतिसामान्यमात्रत्वाद्...नाम्नः स्मरणाद् (ब्र.सू.शां.भा.२।१।१) १५०
श्रुतिस्मृतिपुराणानां विरोधो... (वेदव्यासस्मृ.१।४) ३५६
श्रुतिस्मृतिविरुद्धशास्त्रशिक्षणम् (शब्द.उप.४०) ११५
श्रुतिस्मृत्युदितं सम्यक्कर्मं...
यज्ञादिको मतः (कूर्मपुरा.१।१२।२५४–२५५) ११४,१६९
श्रेयएव मम...त्वां वरदम् (महाभा.३।३००।२३–२४) ३४६
श्वेतः श्वेतशिखः चैव... (कूर्मपुरा.१।५३।४) ७३

ष

षड् अस्माकम् अनादयः (सि.ले.सं.१।१७) ३२४

स

स आगच्छति अमितौजसं... इरा च अपरौ (कौषी.ब्रा.उप.१।५) ९
स आत्मानमेव अवेद्... (बृह.उप.१।४।१०) २४८,२५६
स इमान् लोकान् असृजत (ऐत.उप.१।१।२) २७२
स ईक्षत लोकान्नुसृजाः (ऐत.उप.१।१।१) २५२, २७२
स ईक्षत (ऐत.उप.१।१।१) २६६
स ईक्षां चक्रे (प्रश्नोप.६।३) २४३, २५२
स ईश्वरः कालः... (भाग.पुरा.७।८।९) ३२४
स एकधा भवति... एकश्चसहस्त्राणिच विंशतिः (छान्दो.उप.७।२७।२) २३४
स एष नेति नेति... (बृह.उप.३।९।२६) १९८
स एषः... इति विद्याद् (कौषी.उप.३।८) २७८
स कथं धर्मसेतूनां (भाग.पुरा.१०।३३।२८) ३०७
स तपो अतप्यतः (तैत्ति.उप.२।६) २४५,२५१,३०७
स तपो अतप्यतः (तैत्ति.उप.३।१) २६२
स तेषां मायया ... द्विजैः सह (कूर्मपुरा.१।१६।१०९–१२५) ११३
स त्वंहि नित्य...मां निजभृत्यपार्श्वम् (भाग.पुरा.७।८।२२–२४) ३२४
स दीक्षया आचार्यमूर्तिस्थः ( ) १०२
स देवः साम्प्रतं रुद्रो... (कूर्मपुरा.१।१५।७) ११७
स द्वितीयम् ऐच्छत्...ह एतावान् आस (बृह.उप.१।४।३) २४८, २५२, ४९०
स प्राणम् असृजत... च नाम च (ब्र.सू.भा.र.१।१।५) २४३
स य एषो अणिमा (छान्दो.उप.६।८।७) ३७६
स य एषो अणिमा... (छान्दो.उप.६।९।४) ३८३
स यथा आर्द्रैधाग्नेर्...सर्वाणि निःश्वसितानि (शतप.ब्रा.१७।७।३।११) १७७
स यथा दुन्दुभेः... वा शब्दो गृहीतः (बृह.उप.२।४।७) १९६
स याति परमं... कांक्षिणाम् (पद्मपुरा.३।३३।२६–२७) ४१९
स वा इदं विश्वम्... (भाग.पुरा.१।३।३६) ४७०
स वा एषः... अन्नादो वसुदानः (बृह.उप.४।४।२४) २८०, २८४
स विश्वकृत् स हि सर्वस्य कर्ता (बृह.उप.४।४।१३) ३०३
स वेत्ति वेद्यं... पुरुषं महान्तम् (श्वेता.उप.३।१९) १९८, २४६

स शप्तः शम्भुना पूर्वं... साम्प्रतम्	(कूर्मपुरा.१।१५।२)	११७
स सर्वनामा सच विश्वरूपः	(भाग.पुरा.६।४।२८)	४००
स ह एतावान् आस	(बृह.उप.१।४।३)	७७, ७८, २३४,३९२,४८६
स होवाच ऋग्वेदं... दैवं निधिम्	(छान्दो.उप.७।१।२)	१७७
सः ईक्षत लोकान्...	(ऐत.उप.१।१।१–२)	४६९
सः ब्रह्मा सः शिवः...	(नृ.पू.ता.उप.८)	४७०
सः यदा अस्मात् शरीराद्...	(कौषी.उप.३।४)	४८३
सः सर्वम् अभवत्	( )	४९०
संकल्पादेवतु	(ब्र.सू.४।४।८)	२५२
संख्या वंश्येन...	(पाणि.सू.२।१।१९)	५२
संख्याविप्रतिपत्तिं निराकरोति...	(सां.त.कौ.४)	२०७
संगात् संजायते कामः	(भग.गीता २।६२)	२५५
संज्ञामूर्तिक्लृप्तिस्तु...	(ब्र.सू.२।४।२०)	४०१, ४९२
संतुष्टो यर्हि वर्तेत...	(भाग.पुरा.१०।४९।३१)	आद्यप्र.११
संमुह्यन्तु हरद्विषः... अस्ति इति भावः	(त.दी.नि.प्र.३।४।४३)	१५१
संयोज्य वायुना सोमं...	(याज्ञ.स्मृ.३।४।१२२)	२७७
संशयो अथ विपर्यासो...	(भाग.पुरा.३।२६।३०)	३४३, ४२७, ४५६
संसारचक्रः एतस्मिन् जन्तुः...	(भाग.पुरा.६।१७।१८)	३०६
संसारमेव निस्सारं दृष्ट्वा... वैराग्यम् आश्रितः	(नारदपरि.उप.३।१५)	२०
संस्तूयते सहस्रांशु... त्रयीमयम्	(कूर्मपुरा.१।१५।१६)	११७
संहितायाम्	(पाणि.सू.६।१।७२)	५००
सएव एनं भूतिं गमयति	(तैत्ति.सं.२।१।५।५)	५०६
सएव एनम्	(द्रष्ट.छान्दो.उप.४।१५।५)	२८३
सकृद् असौ कमण्डलुपाणिः... तदेव लक्षणम्	(पातं.महाभा.१।४।८३)	१४४
सन्ध्ये सृष्टिः आहहि	(ब्र.सू.३।२।१)	२५७, ३४७
सन्ध्ये सृष्टिः मायामात्रं	(ब्र.सू.भा.३।२।३)	३४८
सखे मां गोपाय...	(द्र.याज्ञ.स्मृ.मिता.३।४।५८)	२०
सच्चत्यच्च अभवत्	(तैत्ति.उप.२।६)	४९०
सच्चिदानन्दरूपाय कृष्णाय...	(गो.तापि.उप.१।१।१)	४८८
सतः अभिव्यञ्जकः कालः	(भाग.पुरा.११।२४।१९)	३२१
सति कुड्ये चित्रम्	(लौ.न्या.सा.४३२)	१७२,५०७
सतो अभिव्यञ्जकः कालः	(भाग.पुरा.११।२४।१९)	३५८

सत्तामात्रंहि इदं सर्वं... (नृ.उ.उप.९) ४६४
सत्त्वं रज: तम ... (भाग.पुरा.१।२।२३) १७६
सत्त्वाच्च अवरस्य (ब्र.सू.२।१।१६) ३६६, ३८०, ३८१, ३९७
सत्त्वात् सञ्जायते ज्ञानं (भग.गीता १४।१७) ३४४
सत्यं ज्ञानम् अनन्तं ब्रह्म (तैत्ति.उप.२।१) १८६, १९९, २०४, २०५, २०७, २५६, ४६९, ४७९, ४८८, ४९९
सत्यं विज्ञानम् अनन्तं... (शाण्डि.उप.२।२) ३१०
सत्यम् इति यद्रूपेण...विकाराद् निवर्तयति (तैत्ति.उप.शां.भा.२।१।१) २०५
सत्यसंकल्प: (छान्दो.उप.८।१।५) २५६
सत्यसंकल्पत्वं हि सृष्टि-... इति श्रुतम् (ब्र.सू.शां.भा.१।२।२) २५६
सत्सम्प्रयोगे पुरुषस्य... (जै.मी.सू.१।१।४) ३४५
सत् च त्यत् च अभवद् (तैत्ति.उप.२।६) १९४, १९७, २९७,३५३
सद्कारणवद् नित्यम् (वैशे.सू.४।१।१) १३९
सदेव सोम्य इदम्... (छान्दो.उप.६।२।१-२) १८०,२४२, २५५, २६९, २७०, ३०२, ३१२, ३१३, ३२३,३६६, ३८१,४२९,४३३, ४९६
सद्भावे साधुभावे च (भग.गीता१७।२६) ५, ११
सन्निरुद्ध्य इन्द्रियग्रामं... भवति द्विज: (याज्ञ.स्मृ.३।४।६१) ३८
सन्मूलाः सोम्य इमाः (छान्दो.उप.६।८।४) ३६२
सप्तदशारत्निः वाजपेयस्य... इति मीमांसका: (ल.मञ्जू.) २२७
सप्तागाराणि असंकल्पितानि... (वसि.स्मृ.१०।७) ४४
सप्रसंग: उपोद्धातो हेतुता... मता: (अनु.जा.सं.प्र.) ५८
समं तु तत्र दर्शनं (जै.मी.सू.१।१।१२) २१३,४०३
समर्थ: पदविधि: (पाणि.सू.२।१।१) २१३, २१७
समवायाभ्युपगमाच्च साम्याद्... (ब्र.सू.२।२।१३) २३६, २५८
समवायीतु पुरुषो मोहेच्छा-द्वेष-कर्मण: (याज्ञ.स्मृ.३।४।१२५) २७३
समान-नाम-रूपत्वात्... स्मृतेश्च (ब्र.सू.१।३।३०) ४२८
समानकर्तृकयो: पूर्वकाले (पाणि.सू.३।४।२१) ३१८
समानतन्त्रसिद्ध: परतन्त्रासिद्ध:... (गौ.न्या.सू.१।१।२९) २६५
समाननामरूपत्वाद्... स्मृतेश्च (ब्र.सू.१।३।३०) ४३१
समानानेकधर्माध्यवसायाद्... न संशय: (गौ.न्या.सू.२।१।१) १३६
समानासमानजातीयव्यवच्छेदकत्वं... (न्या.वा.ता.१।१।३४) ८७
समानासमानजातीयव्यवच्छेदो... (सां.त.कौ.त.वै.५) ८७

समाने वृक्षे पुरुषो... (मुण्ड.उप.३ ।१ ।२) ३०५
समिधो यजति तनूनपातं... स्वाहाकारं यजति (ऋक्.संहि.२ ।६ ।१ ।१) २५
समुद्राय स्वाहा मध्याय... (तैत्ति.संहि.७ ।२ ।२०) २३४
समो मशकेन समो नागेन. (बृह.उप.१ ।३ ।२२) ४००
समोऽहं सर्वभूतेषु... (भग.गीता ९ ।२९) ३०४
सम्प्रदायविहीना ये... कलौ भाव्या (पद्मपुरा.) १६१
सम्प्रेक्ष्य ऋषिगणान्... (कूर्मपुरा.१ ।१५ ।२५) १००
सम्भवनं ग्रहणम् (पातं.महाभा.प्र.१ ।४ ।२३) २८९
सम्भवामि आत्ममायया (भग.गीता ४ ।६) ३२९, ३३०
सम्भूतो रस: उत्तम: (याज्ञ.स्मृ.३ ।४ ।१२१) २८२
सम्भोगप्राप्ति: इति चेद्... (ब्र.सू.१ ।२ ।८) २९४
सम्यग् अनुवृत्तत्वाद् (ब्र.सू.भा.१ ।१ ।३) ४८८
सर्ग: प्रवर्तते तावत्... (भाग.पुरा.११ ।२४ ।२०) ३२१
सर्वं खलु इदं ब्रह्म तज्जलान् (छान्दो.उप.३ ।१४ ।१)
१९४, १९७, २११, ३४१, ३७५, ३९३, ४२६, ४९०, ४९६
सर्वं तं परादाद्... (बृह.उप.४ ।५ ।७) ३७५
सर्वं वै ते अन्नम्... (तैत्ति.उप.२ ।२) ४८०, ४९९
सर्वं सर्वमयं सर्वेजीवा:... (नृसिं.उत्त.उप.९) ४६४
सर्वं स्यात् तैजसं लोहम् (अम.को.२ ।९ ।९९) ३७९
सर्वएव हि सर्वेषां... (भाग.पुरा.६ ।१६ ।५) २४६
सर्वकर्मा: (छान्दो.उप.३ ।१४ ।४) ३०९
सर्वकाम: सर्वगन्ध: (छान्दो.उप.३ ।१४ ।४) ४५३
सर्वकामनिर्विण्णस्य... च यत्नवान् (मनुस्मृ.१२ ।९२) ३६
सर्वत: पाणिपादान्तम् (भग.गीता.१३ ।१३) ४००
सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगम–... (गौ.न्या.सू.१ ।१ ।२७) २६५
सर्वत्रगम् अचिक्त्यं च (भग.गीता १२ ।३) ३२३
सर्वथा ज्ञानकर्मापगमलोकनिष्क्रियत्वयो:... (कूर्मपुरा.१ ।३० ।२८) १४९
सर्वदर्शी विमुक्तात्मा (विण्णुस.ना.६१ ।४५१,४५२) २४६
सर्वदेवनमस्कार: ( ) ४५५
सर्वधर्मोपपत्ते: च (ब्र.सू.२ ।१ ।३७) ३०९, ३१०
सर्वपदार्थप्रधानो... शास्त्रे प्रवृत्ति: (वैशे.सू.उप.१ ।१ ।४) १३९
सर्वभवनसमर्थत्वाद् अचिन्त्यशक्तिकम् (द्र.ब्र.सू.भा.१ ।१ ।२) ४६८
सर्वभूतस्थम् आत्मानं... (भग.गीता.६ ।२९) ४६४
सर्वभूतहित: शान्त:... ग्रामम् आश्रयेद् (याज्ञ.स्मृ.३ ।४ ।५८) २९,४१,४९

सर्वभूतानि संमोहं सर्गे... (भग.गीता ७ ।२७) ४३९
सर्वम् इदम् अभ्यात्तो... (छान्दो.उप.३ ।१४ ।४) २७५
सर्वलाभोपहरणम् (भाग.पुरा.११ ।११ ।३५) ५
सर्ववेदान्तसारं यद् धर्माद् वेदनिदर्शनाद् (कूर्मपुरा.१ ।३० ।३५) ६६
सर्वशक्तिः ( ) ४५३
सर्वस्तु शर्वोभगवान्... (अम.को.रामा.१ ।१ ।३०) १७४
सर्वस्य च अहं... (भग.गीता १५ ।१५) २८६, ४३९
सर्वस्य तदधीनत्वात्... ईष्यते व्यवहर्तृभिः (द्रष्ट.ब्र.सू.माध्व.भा.१।४।२९) ४००
सर्वस्य वशी सर्वस्य ईशानः (बृह.उप.४ ।४ ।२२) २८०
सर्वान् लोकान् अनृणो अनुसंचरति (तैत्ति.आर.२ ।१५ ।१) १९
सर्वार्थान् विपरीतांश्च बुद्धिः... (भग.गीता १८ ।३२) ३४५
सर्वाहंमानी हिरण्यगर्भः (नृ.उ.उप.९) ४६६
सर्वेनिमेषा जज्ञिरे विद्युतः (महाना.उप.१ ।८–९) २६२,३२०
सर्वेवेदा यत्पदम्... (कठोप.१ ।२ ।१५) १९८
सर्वेषां प्राणिनां कृताकृतं... इति सर्वदर्शी (विष्णुस.ना.शां.भा.६१ ।४५१) २४६
सर्वेषामपि भावानां... (चित्सुखी.१ ।१) ३९५
सर्वेष्वेव हि यज्ञेषु न... न इज्यते (कूर्मपुरा.१ ।१५ ।८) १००, १२२
सलिलं सर्वम् इदं (ऋक्.संहि.१० ।१२९ ।३) ४९६
सवा एषः भूतानि इन्द्रियाणि (नृसिं.उत्त.उप.९) ४६४
सविशेषणानां वृत्तिः न... (पाणि.सू.वा.२ ।१ ।१) २१४, २२१
सवै नैव रेमे... एतावान् आस (बृह.उप.१ ।४ ।३) २४२, ३०४
सह ज्येष्ठं पुत्रं... न इमम् इति ( ) २३
सह सुपा (पाणि.सू.२ ।१ ।४) ४७४, ४८२
सह शब्दार्थः... न समासानुपपत्तिः (व्यु.वा.तृती.कार.सहशब्दार्थविचारे) ७६
सहयुक्तेऽप्रधाने (पाणि.सू.२ ।३ ।१९) ९
सहस्रबाहो भव विश्वमूर्ते (भग.गीता ११ ।४६) ३२५
सहस्रशीर्षा पुरुषः (ऋक्.संहि.१० ।९ ।२) ४००
सहस्रशो अथ शतशो बहुशो... (कूर्मपुरा.१ ।१५ ।२०) १२४
सहस्राक्षः सहस्रपाद् (तैत्ति.आर.३ ।१२ ।१) १७८
सहोपलम्भनियमाद् न भेदो...
(द्र.भामती.२।२।२८,द्र.विवरणप्रमेयसंग्रहः पृ.९२,सर्वदर्शनसंग्रहः.पृ.३२) ३९०
सा इयं देवता... नामरूपे व्याकरवाणि (छान्दो.उप.६ ।३ ।२)
२५२,३१०,४७२,४७६
सा इयं देवता...नामरूपे व्याकरोद् (छान्दो.उप.६ ।३ ।३) ३१०

सा एषा चित्रा सुदृढा… (नृ.उ.उप.९) ४६७
सा एषा भार्गवी… व्योमन् प्रतिष्ठिता (तैत्ति.उप.३।६) ४९१
सा एषा वटबीजसामान्यवद्… स्वयमेव भवति (नृ.उ.उप.९) ४६५
सांकर्यं कार्यकारणे (शु.मा.२६) १८५
साच अनादिः अनश्वर ( ) ४५७
सात्त्विकाः मोक्षदाः… निरयप्राप्तिहेतवः (पद्मपुरा.६।२३६।२१) १७०
साधवे शुचये ब्रूयाद् भक्तिः… (भाग.पुरा.११।२९।३१) १०१
साधर्म्यं समानो धर्मः…वैधर्म्यं विरुद्धो धर्मः (न्या.मु.१।१३०) १३८
साधुकर्मकारि साधुः भवति (बृह.उप.४।४।५) २९१
साधुकारी साधुः… पापः पापेन (बृह.उप.४।४।५) २७३
सामानाधिकरण्यं… कुतः (शिशु.व.२।६२/महा.सु.सं.१७६८) ४१०
सिद्धान्तम् अभ्युपेत्य अनियमात्… (गौ.न्या.सू.५।२।२३) १३६
सिद्धान्तश्रवणं प्रोक्तं पुराणश्रवणं बुधैः (यो.याज्ञ.२।१०) १०१
सिद्धार्थः सिद्धसंकल्पः (विष्णुस.ना.४०।२५२,२५३) २५३
सिद्धिः सर्वादिः अच्युतः (विष्णुस.ना.२४।९८,९९,१००) २७२
सिद्धे शब्दार्थसम्बन्धे (पातं.महाभा.१।१।१) २५३,४०३
सिद्धे शब्दे अर्थे… (पाणि.सू.वार्ति.महाभा.प्र.१।१।१) ४०३
सुख–दुःख–ज्ञाननिष्पत्त्यविशेषाद् ऐकात्म्यम् (वैशे.सू.३।२।१९) १३९
सुडनपुंसकस्य (पाणि.सू.१।१।४३) १८६
सुमेधा अमृतोक्षितः (तैत्ति.उप.१।१०।१) ३०८
सुरा वै मलम् अन्नानाम् (कुला.त.उल्ला.२।१२७) १०७
सुरा शक्तिः… तेन पीयते (कुला.त.उल्ला.५।८३–८४) १०८
सुराः यूयं तमोपहतचेतसः… आलयम् (कूर्मपुरा.१।१५।५४–५७) १२७
सुरुचिः हुतभुग् विभुः (विष्णुस.ना.१०७।८७८–८८०) २८३
सुषुप्त्युत्क्रान्त्योः भेदेन (ब्र.सू.१।३।४२) ३४९
सुहृन्–मित्रार्युदासीन–… समबुद्धिः विशिष्यते (भग.गीता ६।९) २८१
सूचकश्चहि श्रुतेः आचक्षतेच तद्विदः (ब्र.सू.३।२।४) ३६०
सूर्याचन्दमसौ धाता यथा… (महाना.उप.५।७) २२९, ३१८
सूर्याश्वैः मसजः तताः… (वृत्तर.३।१०१) ७
सूर्योयथा सर्वलोकस्य… (कठोप.२।११) ३०६,३११
सूर्योदये शीतम् अपैति… मार्तण्डनिबन्धबोधे (शु.मा.उप) १८३
सेयं देवतैक्षत…एकैकां करवाणीति (छान्दो.उप.६।३।२–३) ३६८,३८१
सैषा त्रय्येव विद्या तपति (शतप.ब्रा.१०।५।२।२) १२०

सो अकामयत (तैत्ति.उप.२।६) २३९,२७२, २७४, २७५,४८६

सो अकामयत (बृह.उप.१।२।४) २३९,२४८, २५२, २५४, २५५, २५७, २५९, २६२, २६४

सो अकामयत बहु स्यां... सर्वम् असृजत (तैत्ति.उप. २।६) २४०,२४२,२४७

सो अकामयत... स्याद् न मोक्षः (ब्र.सू.भा.१।१।६) ४७७

सो अध्वनः पारम्... (कठोप.१।३।९) ४

सो अनन्तो अन्तकरः... (भाग.पुरा.३।२९।४५) ३२५

सो अनुवीक्ष्य... (बृह.उप.१।४।१) ३२४

सो अन्वेष्टव्यः... (छान्दो.उप.८।७।१) ३१०

सो अबिभेत् तस्माद्... भयं वीयाय (शतप.ब्रा.१४।४।२।३) ६

सो अरोदीद्... गृहे रुदन्ति (तैत्ति.संहि.१।५।१।२–३) १६७

सो अश्नुते सर्वान्... (तैत्ति.उप.२।१) ४०७, ४३२

सो अहम् अस्मि... एकाकी बिभेति (बृह.उप.१।४।१–२) २६४

सोमे अवचनाद् भक्षो... (जै.मी.सू.३।५।१९) २२३

सोम्य एकेन मृत्पिंडेन... (छान्दो.उप.६।१।४) ३६३

सौधन्वनानाम... आधानम् इति. (जै.मी.सू.शा.भा.६।१।५०) २२०

सौधन्वनास्तु हीनत्वाद् मन्त्रवर्णात्... (जै.मी.सू.६।१।५०) २२०

स्कन्देन बहूदकश्च... देवताराधनं चरेत् ( ) २९

स्तुतौ (पाणि.सू.धा.पा.१०६०) ९

स्तेनं मनो अनृतवादिनी... (मैत्रा.संहि.४।५।२) १६६

स्त्री–शूद्र–द्विजबन्धूनां... कृतम् (भाग.पुरा.१।४।२४–२५) १०१

स्थाणुम् अन्ये अनुसंयन्ति (कठोप.२।२।७) ३४८

स्नात्वा शुचिः... सर्वपातकनाशनम् ( ) ४३

स्नानं होमं जपं... ब्राह्मणानां प्रजायते (कूर्मपुरा.१।३०।८–१०) १४९

स्मयमानस्तु गोविन्दः फाल्गुनं... (महाभा.७।७९।५) ३४९

स्मृत्यनवकाशदोषप्रसङ्गः... दोषप्रसंगाद् (ब्र.सू.२।१।१) १५०,१५२

स्याद् वाचको लाक्षणिकः... तदर्थाः स्युः (काव्यप्र.२।५–६) २३३

स्यान्, माया शाम्बरी... ( ) ३३७

स्वकृतसेतुपरीप्सया ईशः (भाग.पुरा.१०।५५।३७) ३०७

स्वतन्त्रः कर्ता (पाणि.सू.१।४।५४) २८४, २८५, २८८

स्वतेजसा यो नु... (भाग.पुरा.७।८।२५) ४३६

स्वधर्मनिष्ठ: शतजन्मभि:... एति	(भाग.पुरा.४ ।१४ ।२९)	४४१
स्वधर्मेनिधनं श्रेय:	(भग.गीता३ ।३५)	७५
स्वधामनि ब्रह्मणि रंस्यते नम:	(भाग.पुरा.२ ।४ ।१४)	४
स्वधाम्नो ब्रह्मण:...	(भाग.पुरा.१२ ।६ ।४१)	६१
स्वपुरुषम् अभिवीक्ष्य... न वैष्णवानाम्	(विष्णुपुरा.३ ।७ ।१४)	१६०
स्वप्ने जागरणं यथा	(भाग.पुरा.११ ।१३ ।३०)	३९३
स्वमते मायायाअपि...	(शु.मा.टी.२८)	२०८
स्वशब्द: आत्मवाची...स्वतन्त्र: उच्यते	(पातं.महाभा.प्र.१ ।४ ।२३)	२८९
स्वमायां वनमालाख्यां...	(भाग.पुरा.१२ ।११ ।११)	८
स्वयं गुणाभिन्नाङ्कुरेष्वपि...	(नृ.उ.उप.९)	४६६
स्वयं देहविनाशस्य... भवेत् क्वचिद्	(स्कन्दपुरा.)	४१९
स्वयं विहृत्य स्वयं निर्माय	(बृह.उप. ४ ।३ ।९)	३४७
स्वयम् आहृतपर्णेषु... वा त्रपुसीसयो:	( )	३९
स्वरितेन अधिकार:	(पाणि.सू.१ ।३ ।११)	३०८
स्वर्गकामो यजेत	( )	४६०
स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनै:...	(साहि.दर्प.७ ।३)	२२७
स्वशक्ति: दृश्यस्य... सएव संयोग:	(पातं.यो.सू.भो.२ ।२३)	१३७
स्वस्वामिशक्त्यो: स्वरूपोपलब्धिहेतु: संयोग:	(पातं.यो.सू.२ ।२३)	१३५, १३७
स्वातन्त्र्याभावात् कर्तृत्वानुपपत्तौ...	(शु.मा.प्र.४४)	२८४
स्वातन्त्र्येण विवक्षितो अर्थ:	(पाणि.सू.सि.कौ.१ ।४ ।५४)	२८९
स्वात्मना सदृशान्... कोटिशतान् प्रभु:	(कूर्मपुरा.१ ।१० ।३३–३५)	६२
स्वादुष्किलायं मधुमां उतायम्	(ऋक्.संहि.६ ।४७ ।१)	३५१
स्वाध्यायस्य तथात्वेनहि समाचारे...	(ब्र.सू.३ ।३ ।३)	१३१, १३३
स्वाध्यायस्यैष धर्मोन... समामनन्ति	(ब्र.सू.शां.भा.३ ।३ ।३)	१३१, १३३
स्वार्थाकाङ्क्षितं... महावाक्यार्थबोध:	(न्या.का.दि.श.खं.८२)	६०

ह

हंस: कमडलुं... मन्त्रै: कृशवपुर्धरा:	( )	३२
हंस: कमण्डलुं... बहि:पटम्	( )	३२
हंस: तृतीयो... वा सरित्तटे	( )	३२
हन्त तिरोसानि	(बृह.उप.१ ।४ ।४)	३०४
हन् हिंसा–गत्यो:	(पाणि.सू.२ ।४ ।३७)	२४८
हरि: प्राणो...मायावी पुरुषोत्तम	(कूर्मपुरा.१ ।१२ ।१५–१९)	४५५
हलदन्तात् सप्तम्या:...	(पाणि.सू.६ ।३ ।९)	५०२

हलश्च (पाणि.सू.३।३।१२१) ५, ६५
हिंसानुग्रहयोः अनारम्भः... इति गौतमस्मरणाद् ( ) ४९
हिरण्मयानि पात्राणि... ( ) ३९
हिरण्यं हस्ते... देवदत्तएव भोजयितव्यः (जै.मी.सू.शा.भा.१।२।११) १६६
हिरण्यगर्भः त्रिरूपः ईश्वरवद्... (नृ.उ.ता.उप.९) ४६६
हिरण्यगर्भः समवर्तत अग्रे (ऋक्.संहि. १०।१२१।१) ४६९
हिरण्यगर्भोभगवान्... अन्तरधीयत (कूर्मपुरा.१।१५।२२) १२१
हिरण्यमात्रेयाय ददाति (द्र.जै.मी.सू.शा.भा.२।२।१) १३५
हे इन्द्र ! परमेश्वर... अनुनेषि अनुगमय (ऋक्.संहि.सा.भा.६।४७।७–८) ३५१
हेत्वाभासाः च यथोक्ताः (गौ.न्या.सू.५।२।२४) १३६
हेयं दुःखम् अनागतम् (पातं.यो.सू.२।१६) १३७
हेयत्वावचनाच्च (ब्र.सू.१।१।८) ४७३, ४९१, ४९३

***



उद्धृतग्रन्थसंकेततालिका

ग्रन्थसंकेत	ग्रन्थनाम
अत्रिस्मृ.	अत्रिस्मृति
अनु.जा.सं.प्र.	अनुमितिजागदीशीसंगतिप्रकरण
अम.को.	अमरकोश
अव.प्रह.वा.	अवतारवादावलीप्रहस्तवाद
अव.प्रह.वेदा.	अवतारवादावलीप्रहस्तवादवेदान्ततात्पर्यनिरूपणम्
आद्यप्र.	आद्यप्रस्तावना
आप.श्रौ.सू.	आपस्तम्बश्रौतसूत्र
आरुणि.उप.	आरुणिकोपनिषद्
ईशा.उप.	ईशावास्योपनिषद्
ऋक्.संहि.	ऋक्वेदसंहिता
ऐत.उप.	ऐतरेयोपनिषद्
ऐत.ब्रा.	ऐतरीयब्राह्मण
कठोप.	कठोपनिषद्
काव्यप्र.	काव्यप्रकाश
काव्यप्रदी.	काव्यप्रदीप
कुमा.सं.	कुमारसम्भव
कुमा.सं.म.	कुमारसम्भवमल्लिनाथ
कुला.त.उल्ला.	कुलार्णवतन्त्रउल्लास
कूर्मपुरा.	कूर्मपुराण
कृष्णयजु.	कृष्णयजुर्वेद
केनोप.	केनोपनिषद्
कैव.उप.	कैवल्योपनिषद्
कौषी.ब्रा.उप.	कौषीतकिब्राह्मणोपनिषद्
खं.खं.खा.	खण्डनखण्डनखाद्य
गरु.पुरा.	गरुडपुराण
गो.तापि.उप.	गोपालपूर्वतापिन्युपनिषद्
गो.पू.ताप.	गोपालपूर्वतापिन्युपनिषद्
गोपथब्रा.	गोपथब्राह्ण

गौ.गृ.सू.	गौतमगृह्यसूत्र
गौ.न्या.सू.	गौतमन्यायसूत्र
गौ.न्या.सू.	गौतमन्यायसूत्र
गौ.न्या.सू.भा.	गौतमन्यायसूत्रभाष्य
गौ.न्या.सू.भा.	गौतमन्यायसूत्रभाष्य
चि.अव.प्रक.	चिन्तामणिअवयवप्रकरण
चित्युप.	चित्युपनिषद्
छान्दो.उप.	छान्दोग्योपनिषद्
जाबा.उप.	जाबालोपनिषद्
जाबा.दर्श.उप.	जाबालदर्शनोपिषद्
जै.मी.सू.	जैमिनिमीमांसासूत्र
जै.मी.सू.न्या.मा.	जैमिनिमीमांसासूत्रन्यायमाला
जै.मी.सू.भाट्टदी.	जैमिनिमीमांसाभाट्टदीपिका
जै.मी.सू.शा.भा.	जैमिनिमीमांसासूत्रशाबरभाष्य
जै.मी.सू.श्लो.वा.	जैमिनिमीमांसासूत्रश्लोकवार्तिक
त.दी.नि.	तत्त्वार्थदीपनिबन्ध
त.दी.नि.आ.	तत्त्वार्थदीपनिबन्धआवरणभंग
त.दी.नि.प्र.	तत्त्वार्थदीपनिबन्धप्रकाश
त.दी.नि.यो.	तत्त्वार्थदीपनिबन्धयोजना
त.सं.प्र.	तर्कसंग्रहप्रत्यक्षखण्ड
तत्त्वचि.अनु.खं.	तत्त्वचिन्तामणिअनुमानखण्ड
तर्कदी.	तर्कदीपिका
तैत्ति.आर.	तैत्तिरीयआरण्यक
तैत्ति.उप.	तैत्तिरीयोपनिषद्
तैत्ति.उप.शां.भा.	तैत्तिरीयोपनिषद्शांकरभाष्य
तैत्ति.प्राति.	तैत्तिरीयप्रातिशाख्य
तैत्ति.ब्रा.	तैत्तिरीयब्राह्मण
तैत्ति.संहि.	तैत्तिरीयसंहिता
दक्षस्मृ.	दक्षस्मृति
द्रव्यकि.	द्रव्यकिरणावली
नार.उपपुरा.	नारदउपपुराण

नार.पुरा.	नारदपुराण
नारदपरि.उप.	नारदपरिव्राजकोपनिषद्
नि.सिं.	निर्णयसिन्धु
निरु.	निरुक्तकार
नृ.उ.उप.	नृसिंहोत्तरतापिन्युपनिषद्
न्या.का.दि.श.खं.	न्यायकारिकावलीदिनकरीशब्दखण्ड
न्या.मु.	न्यायमुक्तावली
न्या.मु.अनु.खं.	न्यायमुक्तावलीअनुमानखण्ड
न्या.मु.प्रभा.अनु.	न्यायमुक्तावलीप्रभाकरअनुमानखण्ड
न्या.मु.रा.प्र.खं.	न्यायमुक्तावलीरामरुद्रीयप्रत्यक्षखण्ड
न्या.मु.श.खं.	न्यायमुक्तावलीशब्दखण्ड
न्या.लीला.	न्यायलीलावती
न्या.सि.मु.	न्यायसिद्धान्तमुक्तावली
न्या.सि.मु.का.	न्यायसिद्धान्तमुक्तावलीकारिका
पञ्चद.	पञ्चदशी
पञ्चद.तृप्ति.	पञ्चदशीतृप्तिदीप
पत्रा.	पत्रावलम्बन
पद्मपुरा.	पद्मपुराण
परमहं.उप.	परमहंसोउपनिषद्
परमहं.परि.उप.	परमहंसपरिव्राजकोपनिषद्
परा.उपपुरा.	पराशरउपपुराण
परा.स्मृति.	पराशरस्मृति
पा.धा.	पाणिनिधातुपाठ
पाणि.सू.	पाणिनिसूत्र
पाणि.सू.काशि.	पाणिनिसूत्रकाशिकावृत्ति
पाणि.सू.त.बो.	पाणिनिसूत्रतत्त्वबोधिनी
पाणि.सू.धा.पा.	पाणिनिसूत्रधातुपाठ
पाणि.सू.बा.म.	पाणिनिसूत्रबालमनोरमा
पाणि.सू.लघु.कौ.	पाणिनिसूत्रलघुसिद्धान्तकौमुदी
पाणि.सू.वा.	पाणिनिसूत्रवार्तिक
पाणि.सू.सि.कौ.	पाणिनिसूत्रसिद्धान्तकौमुदी

पातं.महाभा.	पातञ्जलमहाभाष्य
पातं.महाभा.उद्यो.	पातञ्जलमहाभाष्यउद्योतकार
पातं.महाभा.प्र.	पातञ्जलमहाभाष्यप्रदीप
पातं.महाभा.वि.	पातञ्जलमहाभाष्यविवरण
पातं.यो.सू.	पातञ्जलयोगसूत्र
पातं.यो.सू.भा.	पातञ्जलयोगसूत्रभाष्य
पातं.यो.सू.भा.त.वै.	पातञ्जलयोगसूत्रभाष्यतत्त्ववैशारदी
पातं.यो.सू.भो.	पातञ्जलयोगसूत्रभोजराज
पातं.यो.सू.व्या.भा.	पातञ्जलयोगसूत्रव्यासभाष्य
पु.ना.स.	पुरुषोत्तमनामसहस्र
पु.सू.	पुरुषसूक्त
प्रश्नोप.	प्रश्नोपनिषद्
बा.बो.	बालबोध
बृह.उप.	बृहदारण्यकोपनिषद्
बृह.उप.शां.भा.	बृहदारण्यकोपनिषत् शांकरभाष्य
बृह.उप.शां.भा.	बृहदारण्यकोपनिषद् शांकरभाष्य
ब्र.सू.	ब्रह्मसूत्र
ब्र.सू.माध्व.भा.	ब्रह्मसूत्रमाध्वभाष्य
ब्र.सू.शां.भा.पञ्चपा.	ब्रह्मसूत्रशांकरभाष्यपञ्चपादिका
ब्र.सू.शां.भा.भा.	ब्रह्मसूत्रशांकरभाष्यभामती
ब्र.सू.शां.भा.र.	ब्रह्मसूत्रशांकरभाष्यरत्नप्रभा
ब्रह्मपुरा.	ब्रह्मपुराण
भग.गीता.	भगवद्गीता
भग.गीता.शं.ता.बो.	भगवद्गीताशंकरानन्दकृततात्पर्यबोधिनि
भग.गीता.शां.भा.	भगवद्गीताशांकरभाष्य
भाग.पुरा.श्री.	भागवतपुराणश्रीधरी
मत्स्यपुरा.	मत्स्यपुराण
मनुस्मृ.	मनुस्मृति
महाना.उप.	महानारायणोपनिषद्
महाभा.	महाभारत
महाभा.ता.नि.	महाभारततात्पर्यनिर्णय

माण्डु.गौ.का.शां.भा.	माण्डुकोपनिषद्गौडपादकारिकाशांकरभाष्य
मार्क.पुरा.	मार्कण्डपुराण
मुण्ड.उप.	मुण्डकोपनिषद्
मैत्रा.संहि.	मैत्रायणीसंहिता
याज्ञ.स्मृ.	याज्ञवल्क्यस्मृति
याज्ञ.स्मृ.मिता.	याज्ञवल्क्यस्मृतिमिताक्षर
रामा.	रामायण
ल.मञ्जू.बौ.नि.	लघुमञ्जूषाबौद्धार्थस्यनिरूपण
लघुमञ्जूषा	
लिङ्गपुरा.	लिङ्गपुराण
लौकि.न्या.सा.	लौकिकन्यायसाहस्री
वसि.स्मृ.	वसिष्ठस्मृति
वा.प्र.	वाक्यप्रदीप
वायुपुरा.	वायुपुराण
वारा.पुरा.	वाराहपुराण
वि.ध.सू.	विष्णुधर्मसूत्र
वि.सह.ना.	विष्णुसहस्रनाम
विष्णुपुरा.	विष्णुपुराण
विष्णुस.ना.	विष्णुसहस्रनाम
विष्णुस.ना.शां.भा.	विष्णुसहस्रनामशांकरभाष्य
वेदा.परि.	वेदान्तपरिभाषा
८४वै.वा.	८४वैष्णववार्ता
वैशे.सू.	वैशेषिकसूत्र
वैशे.सू.उप.	वैशेषिकसूत्रउपस्कार
वैशे.सू.वृ.	वैशेषिकसूत्रवृत्ति
श.कल्प.	शब्दकल्पद्रुम
शतप.ब्रा.	शतपथब्राह्मण
शब्द.उप.	शब्दसारस्वत्वसर्वस्वम् उपपातकम्
शांडि.सं.भ.खं.	शाण्डिल्यसंहिताभक्तिखण्ड
शिवपुरा.	शिवपुराण
शु.मा.	शुद्धाद्वैतमार्तण्ड

शु.मा.उप.	शुद्धाद्वैतमार्तण्डउपसंहार
शु.मा.प्र.	शुद्धाद्वैतमार्तण्डप्रकाश
शुकर.उप.	शुकरहस्योपनिषद्
वै.भू.	वैयाकरणभूषण
श्रीशंक.दिग्वि.	श्रीशंकरदिग्विजय
श्लो.वा.	श्लोकवार्तिक
श्वेता.उप.	श्वेताश्वेतरोपनिषद्
सर्वदर्श.पूर्णप्र.	सर्वदर्शनपूर्णप्रज्ञप्रकरण
सां.का.	सांख्यकारिका
सां.कौ.	सांख्यकौमुदी
सां.त.कौ.	सांख्यतत्त्वकौमुदी
सां.सू.भा.	सांख्यसूत्रभाष्य
साहि.दर्प.	साहित्यदर्पण
सि.मु.	सिद्धान्तमुक्तावली
स्क.पुरा.शिव.खं.	स्कन्दपुराणशिवरहस्यखण्ड
हस्ता.स्तो.	हस्तामलकस्तोत्र
हारि.स्मृ.	हारितस्मृति
हितोप.	हितोपदेश

***